श्रीमहाभारतम्।

श्रीमन्महर्षिवेदव्यासविरचितम्।

आदिपर्व्व।

रायोपाधिकेन श्रीप्रतापचन्द्रेण

प्रकाशितम्

मूल्यं विना वितरितञ्च

इदन्तपादादिसम्बन्धा यूयं किमवबोधव।



कलिकाता राजधान्यां भारत दक्षे

श्रीप्रतापचन्द्ररायेण मुद्रितम्।

शकाब्दाः १८०४।

ॐ नमो गणेशाय ।

भागीरथीमधुस्यन्दं भक्तभृङ्गनिषेवितम् ।
जयत्यच्छतसौगन्ध्यं भगवत्पादपङ्कजम् ॥

उपक्रमणिका ।

स्वस्तिश्रवणमङ्गलनामधेयाप्रतिमवीर्य्यवारांनिधि-सकलशोभा-
शुभदर्शनैकधर्मवीर-यशःकुसुमसुरभीकृतदशदिग्वधूमुख-पर-
वीरवारणकुम्भपाटनैकपटुमृगपति-लक्ष्मीपति—

श्रीलश्रीमन्महाराजाधिराजरणवीरसिंहबाहादूर

के, बि, एस, आइ,

काश्मीरमहामण्डलेश्वर-रणवीरसिंहवरणीयेषु—

काश्मीरे नगरे शुभे निवसति क्षीरोदगर्भोपमे
प्रद्योतद्विमलद्युतिश्च कुमुदं प्रोल्लासयन् प्राच्यगः ।
सौम्यानां धुरि संस्थितोऽतिमहितः क्षेमाच्छतप्रोद्भवः
प्रेयांस्वमवनीशचन्द्र सततं प्रोक्ष्य सर्वोपरि ॥

सकलभुवनगीतो वर्द्धमानोदितश्री-
रभिमतगुणशाली सज्जनानां मनोज्ञः ।
विबुधकविगुरूणां सन्निधानाञ्चितश्री-
र्जयति च नृपसूर्य्यः पद्मिनीनां रसज्ञः ॥

भवादृशानां खलु पुण्यकर्मणां
विद्याव्रतस्नानजुषां कृतात्मनाम् ।
दीनेषु विस्राणितसर्वसम्पदां
यज्जीवनं तच्च शुभावहं शुभम् ॥

त्वद्गेहे नरदेव देवदयिता लक्ष्मीः सदा राजते
देवी वाक् सततं पितामहमहोजुष्टा स्थिता पुष्कला ।
शक्तिर्या भुवनेऽवने च विदिता हेतुः परः शूलिनः
सा चैवाधिगता गताघ पुरुषौ ब्रह्मा त्वया निर्जिताः ॥
रामस्त्वं लक्ष्मणस्त्वं हि शत्रुघ्नो भरतोसि च ।
त्वं स राजा दशरथः अयोध्या ते पुरी मता ॥
हंसस्त्वं हि राजहंसतमोसि त्वं तमोपहः ।
कीर्त्या राजन् विराजन् वा तेजसा ते वरोऽवरः ॥
युधिष्ठिरोसि भीमोसि भीष्मोसि त्वं धनञ्जयः ।
दुर्योधनस्त्वं विदुरो धृतराष्ट्रस्त्वमेव हि ॥

जितमनोभव देव दयालवान्
गुणवरैः कमलापतिसाम्यधृक् ।
स्वमहसा कृतलोकगतिर्विभु-
स्त्वमसि धीर चतुर्मुखः ॥
विविधकाञ्चनरत्नवरान्वितः
सततसुचतिभाग्बलसेवितः ।
धृतमहीमहनीयमहोदय-
स्त्वमसि भो जितवान् स हिमाचलम् ॥
वरतनुवरणीयवरार्चितो
वरकृतिर्वरदो वरसेवितः ।
वरदयालुतया वरलाञ्छितः
सकलजोऽवयवो वरभावितः ॥

एतत्ते नृप चक्रचिह्नचचिरे पद्माङ्कुशं भास्करे
छत्रोभाहरहेरिवोरुकलनासौभाग्यगर्वोद्धरे ।

दण्डोद्दामतरेऽतिपाटनपटौ शोकोत्कराणां करे
श्रद्धाप्रीतिभरेण पूतमनसा भक्त्यार्पितं भारतम् ॥

देव !

दिष्ट्यैव मया चुद्रेण प्रारिप्सितस्य निर्विघ्नपरिसमाप्तिकामनया भावितात्मनां भवतां सुपवित्रनामधेयमुद्दिश्य शुभ एव क्षणे समारब्धमहो रामायणवितरणकार्य्यम् तेनैव निरन्तरमेतत् सम्वर्द्धते। नाममाहात्म्येनैवेदं सुसम्पत्स्यत इत्यपि सर्वे समाश्वसन्ति। कालवैगुण्यादनार्याश्च संवृत्ता वयं भारतीयाः। आर्य्यधर्माचारं पुण्यभूमिं भारतेऽधुना हतभाग्यवशादस्माकमीदृशो नरपतिः क्वचित् दृश्यते। देव एवैको धर्मवीरः सततं सुसमाहितः सनातनधर्मपरिरक्षणार्थं जागर्त्ति बिभर्त्ति च मुमूर्षुप्रायं बद्धविघ्ननिपीड़ितमार्य्यजनानां धर्माचारम्। अतो क्षुनाथा अपि वयं श्रीमता देवेन नरपतिचूड़ाभूषणेन भवता सर्वया सनाथान् मन्यामहे आशासाहे च यद्दैवदुर्विपाकवशादधःपतितेस्मिन् भारते भवत्कृपाकटाक्षपातात् पुनरभ्युदेष्यति विमलं धर्मज्योतिः। प्रत्यक्षीकृतय मद्रामायणानुकूल्यमुखेन भारतीयान् प्रति देवस्यानुग्रहः। तस्मात् बद्धकृतज्ञधियैव सुपुण्यं पुण्यावहं भरतवंशचरितं भारतमिदं भक्तिश्रद्धासमन्वितमुपह्रियते। स्वीकृतेस्मिन् कृपया देवेन सम्पद्यतेस्माकं बद्धाञ्जलेः कृतकृत्यतेति।

भक्तिभारावनतोनुगतः
किंकरः
श्रीप्रतापचन्द्रशर्म्मा।

विज्ञापितपूर्वमेवेदं बहुशो मया यत् पाश्चात्यानुकूल्यवशात् काल-वेगाद्वाङ्मिन् पवित्रभूमि भारते धर्माचारविप्लवरूपं महद्भयमा-पतितमिति। पूर्वेषां धर्माचारादिभिः सम्यक्परिचयाभाव एवास्य निदानमित्यप्युद्घोषितञ्चासीत्। पुराणादिशास्त्रालोचनैवेदं महद् भयमपनेष्यति। शास्त्रवितरणमन्तरेण च सर्वशः शास्त्रालोचना दुर्लभेति च धिया मया दातव्यभारतकार्य्यालय इति नाम्ना सप्त-वर्षाणि यावदयं कार्य्यालयः प्रतिष्ठापितः। देशहितैषिणां धार्मिकानामानुकूल्यमेव मे समुद्दिष्टावलम्बनमासीत्। दिष्ट्या प्रार्थिता एवास्यानुकूल्याय समुद्यता यथासम्भवं सुलभत्वाच्चा-सन्नत्वाद्देशप्रिया वदान्याः। पवित्रश्लोकानां तेषामेवानुकूलमिदं धर्म्यं कर्म पुष्णाति।

प्रथमं तावत् भारतस्य वङ्गीयानुवादमेव वितरितुमारब्धम्। संस्करणत्रयेणास्य च प्रायशो नव सहस्राणि वितरितानि अतीते च काले बहुविज्ञप्तिभिर्यां परामर्शेन विविच्य स्वीकृतं यत् परतो मूलमपि प्रतिनिबन्धस्यानुवादेन सह प्रकाशनीयं वितरितव्यञ्च। तदनु रामायणं प्रकाश्यते।

बहुविज्ञानवारानिषेधधर्माचारनिलयभूतस्य भारतस्य मूल-प्रचारश्चिरोद्दिष्ट एवासीत्। बहुलव्ययसाध्यतयास्य कर्मणः तत्सिद्धिषु सुदूरं पराहता। तेन च वयं मर्मणि तुदिता आसन्। धर्माभिमुख्येन भाग्यवशाच्च तन्महत् कार्य्यमधुनारब्धमभवत्। स्वदे-शीयानां भिन्नदेशीयानाञ्च बहूनां कृतधियां वदान्यानां वारयितु-मशक्ता वयं गत्यन्तरमदृष्ट्वा ईदृशं दुर्वहकार्य्यभारमीदृशं दुर्बल-स्कन्धमारोपितवन्तः। दुर्बला अपि वयं नावसीदामः। साधारण-

वद्दान्यतैव साक्षान् सवलयति। आशास्महे च वयमधुना सर्वेषा-मेवास्यां तनूजानां भारतीयानामनुकूलतरातिप्रशस्तं हस्तालम्बनम्।

अस्मिन्नीकृतेऽप्यस्मिन् भारते ऐहिकामुष्मिकसुखसाधनमत्यनर्थं [illegible] धर्मरत्नं लाघुनापि हृतम्। अतस्तदुद्धाराय सर्वे समाहिताः [illegible]। आर्याः खलु धर्मधनैरेव च धनिकाः। धर्ममेव ते [illegible]। धर्म एव तेषां माहात्म्यं गौरवञ्च प्रतिष्ठितम्। यावत् [illegible] तावत् न तेषां किमपि गतम्। धिगस्मान् यदि वयमेतादृशस्य धर्मरत्नस्य प्रभवोऽपि सीदामः। यदन्यत् सर्वं याति यातु धर्मं सर्वात्मना रक्षत नचिराद्वश्यमेवेह परत्र च समृद्धाः प्रतिष्ठिताश्च भविष्यथ।

वक्तव्यञ्चैवेदमुपसंहारे यद्धूर्त्तानां वञ्चनावारणार्थं डाक-योगेन प्रकाशितपुस्तकानां प्रेषणनियमो व्यवस्थापितस्तच्चुल्कार्थञ्च प्रतिनिबन्धं किञ्चिदुद्गच्छत इत्यलं विस्तरेण।

दातव्यभारतकार्य्यालयः
योड़ासांको कलिकाता।
शकाब्दाः १८०४।

श्रीप्रतापचन्द्रराय.।

महाभारतम्।

आदिपर्व्व।

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम्।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत्॥

लोमहर्षणपुत्र उग्रश्रवाः सौतिः पौराणिको नैमिषारण्ये। शौनकस्य कुलपतेर्द्वादशवार्षिके सत्रे॥ १॥ सुखासीनानभ्यगच्छन्महर्षीन् संशितव्रतान्। विनयावनतो भूत्वा कदाचित् सूतनन्दनः॥ २॥ तमाश्रममनुप्राप्तं नैमिषारण्यवासिनाम्। चित्राः श्रोतुं कथास्तत्र परिवव्रुस्तपस्विनः॥ ३॥ अभिवाद्य मुनींस्तांस्तु सर्व्वानेव कृताञ्जलिः। अपृच्छत् स तपोवृद्धिं सद्भिश्चैवाभिपूजितः॥ ४॥ अथ तेषूपविष्टेषु सर्व्वेष्वेव तपस्विषु। निर्दिष्टमासनं भेजे विनयाल्लोमहर्षणिः॥ ५॥ सुखासीनं ततस्तन्तु विश्रान्तमुपलक्ष्य च। अथाभ्यभाषदृषिस्तत्र कश्चित् प्रस्तावयन् कथाः॥ ६॥ कुत आगम्यते सौते क्व चायं विहृतस्त्वया। कालः कमलपत्राक्ष शंसैतत् प्रच्छतो मम॥ ७॥ एवं पृष्टोऽब्रवीत् सूत्यं यथावल्लोमहर्षणिः। वाक्यं वचनसम्पन्नस्तेषां च चरिताश्रयम्॥ ८॥ तस्मिन् सदसि विस्तीर्णे मुनीनां भावितात्मनाम्।

सौतिरुवाच। जनमेजयस्य राजर्षेः सर्पसत्रे महात्मनः॥ ९॥ समीपे पार्थिवेन्द्रस्य सम्यक् पारीक्षितस्य च। कृष्णद्वैपायन-

प्रोक्ताः सुपुण्या विविधाः कथाः ॥ १० ॥ कथिताश्चापि विधिवद्या वैचित्र्यान्वयनेन वै । श्रुत्वाहं ता विचित्रार्था महाभारतसंश्रिताः ॥ ११ ॥ बहूनि सम्परिक्रम्य तीर्थान्यायतनानि च । समन्तपञ्चकं नाम पुण्यं द्विजनिषेवितम् ॥ १२ ॥ गतवानस्मि तं देशं युद्धं यत्राभवत् पुरा । कुरूणां पाण्डवानां च सर्व्वेषां च महीक्षिताम् ॥ १३ ॥ दिदृक्षुरागतस्तस्मात् समीपं भवतामिह । आयुष्मन्तः सर्व एव ब्रह्मभूता हि मे मताः ॥ १४ ॥ अस्मिन् यज्ञे महाभागाः सूर्य्य पावकवर्च्चसः । क्षताभिषेकाः शुचयः क्षतजप्याश्च ताग्नयः । भवन्त आसने स्वस्था ब्रवीमि किमहं द्विजाः ॥ १५ ॥ पुराणसंश्रिताः पुण्याः कथा धर्मार्थसंश्रिताः । इतिहासं नरेन्द्राणामृषीणाञ्च महात्मनाम् ॥ १६ ॥

ऋषय ऊचुः । द्वैपायनेन यत् प्रोक्तं पुराणं परमर्षिणा । सुरैर्ब्रह्मर्षिभिश्चैव श्रुत्वा यदभिपूजितम् ॥ १७ ॥ तस्याख्यानवरिष्ठस्य विचित्रपदपर्व्वणः । सूक्ष्मार्थन्याययुक्तस्य वेदार्थैर्भूषितस्य च ॥ १८ ॥ भारतस्येतिहासस्य पुण्यां ग्रन्थार्थसंयुताम् । संस्कारोपगतां ब्राह्मीं नानाशास्त्रोपबृंहिताम् ॥ १९ ॥ जनमेजयस्य यां राज्ञो वैचित्र्यान्वयन उक्तवान् । यथावत्स ऋषिस्तुष्ट्या सर्वे द्वैपायनाज्ञया ॥ २० ॥ वेदैश्चतुर्भिः संयुक्तां व्यासस्याद्भुतकर्म्मणः । संहितां श्रोतुमिच्छामः पुण्यां पापभयापहाम् ॥ २१ ॥

सौतिरुवाच । आद्यं पुरुषमीशानं पुरुहूतं पुरुष्टुतम् । ऋतमेकाक्षरं ब्रह्म व्यक्ताव्यक्तं सनातनम् ॥ २२ ॥ असच्च सदसच्चैव यद्विश्वं सदसत्परम् । परावराणां स्रष्टारं पुराणं परमव्ययम् ॥ २३ ॥ मङ्गल्यं मङ्गलं विष्णुं वरेण्यमनघं शुचिम् । नमस्कृत्य हृषीकेशं चराचरगुरुं हरिम् ॥ २४ ॥ महर्षेः पूजितस्येह सर्व्वलोकैर्महात्मनः । प्रवक्ष्यामि मतं पुण्यं व्यासस्याद्भुतकर्म्मणः ॥ २५ ॥ आचचक्षुः कवयः केचित् संप्रत्याचक्षते परे ।

आख्यास्यन्ति तथैवान्य इतिहासमिमं भुवि ॥ २६ ॥ इदन्तु त्रिषु लोकेषु महज्ज्ञानं प्रतिष्ठितम् । विस्तरैश्च समासैश्च धार्य्यते यद्द्विजातिभिः ॥ २७ ॥ अलंकृतं शुभैः शब्दैः समयैर्दिव्यमानुषैः । छन्दोवृत्तैश्च विविधैरन्वितं विदुषां प्रियम् ॥ २८ ॥ निष्प्रभेऽस्मिन्निरालोके सर्वतस्तमसा वृते । बृहदण्डमभूदेकं प्रजानां बीजमव्ययम् ॥ २९ ॥ युगस्यादौ निमित्तं तन्महद्दिव्यं प्रचक्षते । यस्मिन् संभूयते सत्यं ज्योतिर्ब्रह्म सनातनम् ॥ ३० ॥ अद्भुतं चाप्यचिन्त्यञ्च सर्वत्र समतां गतम् । अव्यक्तं कारणं सूक्ष्मं यत्तत् सदसदात्मकम् ॥ ३१ ॥ यस्मात् पितामहो जज्ञे प्रभुरेकः प्रजापतिः । ब्रह्मा सुरगुरुः स्थाणुर्मनुः कः परमेष्ठ्यथ ॥ ३२ ॥ प्राचेतसस्तथा दक्षो दक्षपुत्राश्च सप्त वै । ततः प्रजानां पतयः प्रभवन्त्येकविंशतिः ॥ ३३ ॥ पुरुषश्चाप्रमेयात्मा यं सर्वे ऋषयो विदुः । विश्वे देवास्तथादित्या वसवोऽथाश्विनावपि ॥ ३४ ॥ यक्षाः साध्याः पिशाचाश्च गुह्यकाः पितरस्तथा । ततः प्रसूता विद्वांसः शिष्टा ब्रह्मर्षिसत्तमाः ॥ ३५ ॥ राजर्षयश्च बहवः सर्वैः समुदिता गुणैः । आपो द्यौः पृथिवी वायुरन्तरीक्षं दिशस्तथा ॥ ३६ ॥ संवत्सरर्त्तवो मासाः पक्षाहोरात्रयः क्रमात् । यच्चान्यदपि तत्सर्वं संभूतं लोकसाक्षिकम् ॥ ३७ ॥ यदिदं दृश्यते किञ्चिद्भूतं स्थावरजङ्गमम् । पुनः संक्षिप्यते सर्वं जगत्प्राप्ते युगक्षये ॥ ३८ ॥ यथर्त्तावृतुलिङ्गानि नानारूपाणि पर्य्यये । दृश्यन्ते तानि तान्येव तथा भावा युगादिषु ॥ ३९ ॥ एवमेतदनाद्यन्तं भूतसंहारकारकम् । अनादिनिधनं लोके चक्रं सम्परिवर्त्तते ॥४०॥ चयस्त्रिंशत्सहस्राणि चयस्त्रिंशच्छतानि च । चयस्त्रिंशच्च देवानां सृष्टिः संक्षेपलक्षणा ॥४१॥ दिवः पुत्रो बृहद्भानुश्चतुरात्मा विभावसुः । सविता स ऋचीकोऽर्को भानुराशावहो रविः ॥ ४२ ॥ पुरा विश्वसृतः सर्वं मन्वन्तेषां तथावरः । देवभ्राट् तनयस्तस्य

सुभ्राडिति ततः स्मृतः ॥ ४३ ॥ सुभ्राजस्तु त्रयः पुत्राः प्रजावन्तो बहुश्रुताः। दशज्योतिः शतज्योतिः सहस्रज्योतिरेव च ॥ ४४ ॥ दश पुत्रसहस्राणि दशज्योतेर्महात्मनः। ततो दशगुणाश्चान्ये शतज्योतेरिहात्मजाः ॥ ४५ ॥ भूयस्ततो दशगुणाः सहस्रज्योतिषः सुताः। तेभ्योऽयं कुरुवंशश्च यदूनां भरतस्य च ॥ ४६ ॥ ययातीच्वाकुवंशश्च राजर्षीणाञ्च सर्वशः। संभूता बहवो वंशा भूतसर्गाः सुविस्तराः ॥ ४७ ॥ भूतस्थानानि सर्वाणि रहस्यं त्रिविधञ्च यत्। वेदा योगः सविज्ञानो धर्मोऽर्थः काम एव च ॥ ४८ ॥ धर्मकामार्थयुक्तानि शास्त्राणि विविधानि च। लोकयात्राविधानञ्च सर्वं तदृष्टवानृषिः ॥ ४९ ॥ इतिहासाः सवैयाख्या विविधाः श्रुतयोऽपि च। इह सर्वमनुक्रान्तमुक्तं ग्रन्थस्य लक्षणम् ॥ ५० ॥ विस्तीर्य्यैतन्महज्ज्ञानमृषिः संक्षिप्य चाब्रवीत्। इष्टं हि विदुषां लोके समासव्यासधारणम् ॥ ५१ ॥ मन्वादि भारतं केचिदास्तीकादि तथापरे। तथोपरिचरादन्ये विप्राः सम्यगधीयते ॥ ५२ ॥ विविधं संहिताज्ञानं दीपयन्ति मनीषिणः। व्याख्यातुं कुशलाः केचिन्नधीतुं धारयितुं परे ॥ ५३ ॥ तपसा ब्रह्मचर्य्येण व्यस्य वेदं सनातनम्। इतिहासमिमं चक्रे पुण्यं सत्यवतीसुतः ॥ ५४ ॥ पराशरात्मजो विद्वान् ब्रह्मर्षिः संशितव्रतः। तदाख्यानवरिष्ठं स श्रुत्वा द्वैपायनः प्रभुः ॥ ५५ ॥ कथमध्यापयानीह शिष्यानित्यन्वचिन्तयत्। तस्य तच्चिन्तितं ज्ञात्वा ऋषेर्द्वैपायनस्य च ॥ ५६ ॥ तत्राजगाम भगवान् ब्रह्मा लोकगुरुः स्वयम्। प्रीत्यर्थं तस्य चैवर्षेर्लोकानां हितकाम्यया ॥ ५७ ॥ तं दृष्ट्वा विस्मितो भूत्वा प्राञ्जलिः प्रणतः स्थितः। आसनं कल्पयामास सर्वैर्मुनिगणैर्वृतः ॥ ५८ ॥ हिरण्यगर्भमासीनं तस्मिंस्तु परमासने। परिवृत्यासनाभ्याशे वासवेयः स्थितोऽभवत् ॥ ५९ ॥ अनुज्ञातोऽथ कृष्णस्तु ब्रह्मणा परमेष्ठिना। निष-

सादासनाभ्यासे प्रीयमाणः शुचिस्मितः ॥ ६० ॥ उवाच स महातेजा ब्रह्माणं परमेष्ठिनम् । कृतं मयेदं भगवन् काव्यं परमपूजितम् ॥ ६१ ॥ ब्रह्मन्वेदरहस्यञ्च यच्चान्यत् स्थापितं मया । सांगोपनिषदाञ्चैव वेदानां विस्तरक्रियाः ॥ ६२ ॥ इतिहासपुराणानामुन्मेषं निर्मितञ्च यत् । भूतं भव्यं भविष्यञ्च त्रिविधं कालसंज्ञितम् ॥ ६३ ॥ जराद्यत्युभयव्याधिभावाभावविनिश्चयः । विविधस्य च धर्मस्य ह्याश्रमाणाञ्च लक्षणम् ॥ ६४ ॥ चातुर्वर्ण्यविधानञ्च पुराणानाञ्च कृत्स्नशः । तपसो ब्रह्मचर्य्यस्य पृथिव्याश्चन्द्रसूर्य्ययोः ॥ ६५ ॥ ग्रहनक्षत्रताराणां प्रमाणञ्च युगैः सह । ऋचो यजूंषि सामानि वेदाध्यात्मं तथैव च ॥ ६६ ॥ न्यायशिक्षा चिकित्सा च दानं पाशुपतं तथा । हेतुनैव समं जन्म दिव्यमानुषसंज्ञितम् ॥ ६७ ॥ तीर्थानाञ्चैव पुण्यानां देशानाञ्चैव कीर्त्तनम् । नदीनां पर्वतानाञ्च वनानां सागरस्य च ॥ ६८ ॥ पुराणां चैव दिव्यानां कल्पानां युद्धकौशलम् । वाक्यजातिविशेषाञ्च लोकयात्राक्रमस्य यः ॥ ६९ ॥ यच्चापि सर्वगं वस्तु तच्चैव प्रतिपादितम् । परं न लेखकः कश्चिदेतस्य भुवि विद्यते ॥ ७० ॥

ब्रह्मोवाच । तपोविशिष्टादपि वै विशिष्टान् मुनिसत्तमात् । मन्ये श्रेष्ठतरं त्वां वै रहस्यज्ञानवेदनात् ॥ ७१ ॥ जन्मप्रभृति सत्यान्ते वेद्मि गां ब्रह्मवादिनीम् । त्वया च काव्यमित्युक्तं तस्मात् काव्यं भविष्यति ॥ ७२ ॥ अस्य काव्यस्य कवयो न समर्था विशेषणे । विशेषणे गृहस्यस्य शेषाश्चय इवाश्रमाः ॥ ७३ ॥ काव्यस्य लेखनार्थाय गणेशः स्मर्य्यतां मुने ।

सौतिरुवाच । एवमाभाष्य तं ब्रह्मा जगाम स्वं निवेशनम् ॥ ७४ ॥ ततः सस्मार हेरम्बं व्यासः सत्यवतीसुतः । स्मृतमात्रो गणेशानो भक्तचिन्तितपूरकः ॥ ७५ ॥ तत्राजगाम विघ्नेशो

वेदव्यासो यतः स्थितः। पूजितश्चोपविष्टश्च व्यासेनोक्तस्तदानघ ॥ ७६ ॥ लेखको भारतस्यास्य भव त्वं गणनायक। मयैव प्रोच्यमानस्य मनसा कल्पितस्य च ॥ ७७॥ श्रुत्वैतत् प्राह विघ्नेशो यदि मे लेखनी क्षणम्। लिखतो नावतिष्ठेत तदा स्यां लेखको ह्यहम् ॥७८ ॥ व्यासोऽप्युवाच तं देवमबुध्वा मा लिख क्वचित्। ओमित्युक्त्वा गणेशोऽपि बभूव किल लेखकः ॥ ७९ ॥ ग्रन्थग्रन्थिं तदा चक्रे मुनिर्गूढं कुबुद्धलात्। यस्मिन् प्रतिज्ञया प्राह मुनिर्ह्येपायनस्त्विदम् ॥ ८० ॥ अष्टौ श्लोकसहस्राणि अष्टौ श्लोकशतानि च। अहं वेद्मि शुको वेत्ति सञ्जयो वेत्ति वा नवा ॥ ८१ ॥ तत् श्लोककूटमद्यापि ग्रथितं सुदृढं मुने। भेत्तुं न शक्यतेऽर्थस्य गूढत्वात् प्रथितस्य च ॥ ८२ ॥ सर्वज्ञोऽपि गणेशो यत् क्षणमास्ते विचारयन्। तावच्चकार व्यासोऽपि श्लोकानन्यान् बहूनपि ॥८३ ॥ अज्ञानतिमिरान्धस्य लोकस्य तु विचेष्टतः। ज्ञानाञ्जनशलाकाभिर्नेत्रोन्मीलनकारकम् ॥ ८४ ॥ धर्मार्थकाममोक्षार्थैः समासव्यासकीर्त्तनैः। तथा भारतसूर्येण नृणां विनिहतं तमः ॥ ८५ ॥ पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्नाः प्रकाशिताः। कृबुद्धिकैरवाणाञ्च कृतमेतत् प्रकाशनम् ॥ ८६ ॥ इतिहासप्रदीपेन मोहावरणघातिना। लोकगर्भगृहं कृत्स्नं यथावत् संप्रकाशितम् ॥ ८७ ॥ संग्रहाध्यायबीजो वै पौलोमास्तीकमूलवान्। सम्भवस्कन्धविस्तारः सभारण्यविटङ्कवान् ॥८८॥ अरण्यीपर्वरूपाढ्यो विराटोद्योगसारवान्। भीष्मपर्वमहाशाखो द्रोणपर्वपलाशवान् ॥ ८९ ॥ कर्णपर्वसितैः पुष्पैः शल्यपर्वसुगन्धिभिः। स्त्रीपर्वैषीकविश्रामः शान्तिपर्वमहाफलः ॥ ९० ॥ अश्वमेधामृतरसश्चाश्रमस्थानसंश्रयः। मौसलश्रुतिसंक्षेपः शिष्टद्विजनिषेवितः ॥ ९१ ॥ सर्वेषां कविमुख्यानामुपजीव्यो भविष्यति। पर्जन्य इव भूतानामक्षयो भारतद्रुमः ॥ ९२ ॥

सूत उवाच ॥ तस्य वृक्षस्य वक्ष्यामि शाश्वतीः पुष्पफलोदयम् । स्वादुमेध्यरसोपेतममृत्यममरैरपि ॥ ९३ ॥ मातुर्नियोगाद्धर्मात्मा गांगेयस्य च धीमतः । क्षेत्रे विचित्रवीर्यस्य कृष्णद्वैपायनः पुरा । त्रीरग्नीनिव कौरव्यान् जनयामास वीर्यवान् ॥ ९४ ॥ उत्पाद्य धृतराष्ट्रं च पाण्डुं विदुरमेव च । जगाम तपसे धीमान् पुनरेवाश्रमं प्रति ॥ ९५ ॥ तेषु जातेषु वृद्धेषु गतेषु परमां गतिम् । अब्रवीद्भारतं लोके मानुषेऽस्मिन्महानृषिः ॥ ९६ ॥ जनमेजयेन पृष्टः सन् ब्राह्मणैश्च सहस्रशः । शशास शिष्यमासीनं वैशम्पायनमन्तिके ॥ ९७ ॥ स सदस्यैः सहासीनः श्रावयामास भारतम् । कर्मान्तरेषु यज्ञस्य चोद्यमानः पुनः पुनः ॥ ९८ ॥ विस्तरं कुरुवंशस्य गांधार्या धर्मशीलताम् । क्षत्तुः प्रज्ञां धृतिं कुन्त्याः सत्यं द्वैपायनोऽब्रवीत् ॥ ९९ ॥ वासुदेवस्य माहात्म्यं पाण्डवानां च सत्यताम् । दुर्वृत्तं धार्तराष्ट्राणामुक्तवान् भगवानृषिः ॥ १०० ॥ चतुर्विंशतिसाहस्रीं चक्रे भारतसंहिताम् । उपाख्यानैर्विना तावद्भारतं प्रोच्यते बुधैः ॥ १०१ ॥ ततोऽध्यर्धशतं भूयः संक्षेपं कृतवानृषिः । अनुक्रमणिकाध्यायं वृत्तान्तानां सपर्वणाम् ॥ १०२ ॥ इदं द्वैपायनः पूर्वं पुत्रमध्यापयच्छुकम् । ततोऽन्येभ्योऽनुरूपेभ्यः शिष्येभ्यः प्रददौ विभुः ॥ १०३ ॥ षष्टिं शतसहस्राणि चकारान्यां स संहिताम् । त्रिंशच्छतसहस्रं च देवलोके प्रतिष्ठितम् ॥ १०४ ॥ पित्र्ये पञ्चदश प्रोक्तं गन्धर्वेषु चतुर्दश । एकं शतसहस्रं तु मानुषेषु प्रतिष्ठितम् ॥ १०५ ॥ नारदोऽशृणवद्देवानसितो देवलः पितॄन् । गन्धर्वयक्षरक्षांसि शृणवामास वै शुकः ॥ १०६ ॥ अस्मिंस्तु मानुषे लोके वैशम्पायन उक्तवान् । शिष्यो व्यासस्य धर्मात्मा सर्ववेदविदाम्वरः । एकं शतसहस्रं तु मयोक्तं वै निबोधत ॥ १०७ ॥ दुर्योधनो मन्युमयो महाद्रुमः स्कन्धः कर्णः शकुनिस्तस्य शाखाः । दुःशासनः पुष्प-

पुष्पे सम्बद्धे मूल राजा धृतराष्ट्रो मनीषी ॥ १०८ ॥ युधिष्ठिरो धर्ममयो महाद्रुमः स्कन्धोऽर्जुनो भीमसेनोऽस्य शाखाः । माद्री-सुतौ पुष्पफले समृद्धे मूलं कृष्णो ब्रह्म च ब्राह्मणाश्च ॥ १०९ ॥ पाण्डुर्जित्वा बहून् देशान् बुद्ध्या विक्रमणेन च । अरण्ये मृगया-शीलो न्यवसन्मुनिभिः सह ॥ ११० ॥ मृगव्यवायनिधनात् कृच्छ्रां प्राप स आपदम् । जन्मप्रभृति पार्थानां तत्राचारविधिक्रमः ॥ १११ ॥ मात्रोरप्युपपत्तिश्च धर्मोपनिषदं प्रति । धर्मस्य वायोः शक्रस्य देवयोश्च तथाश्विनोः ॥ ११२ ॥ तापसैः सह संवृद्धा माद्र्यां परिरक्षिताः । मेध्यारण्येषु पुण्येषु महतामाश्रमेषु च ॥ ११३ ॥ ऋषिभिर्यत्नदा नीता धार्त्तराष्ट्रान् प्रति स्वयम् । शिशवश्चाभि-रूपाश्च जटिला ब्रह्मचारिणः ॥ ११४ ॥ पुत्राश्च भ्रातरश्चेमे शिष्याश्च सुहृदश्च वः । पाण्डवा एत इत्युक्ता मुनयोऽन्तर्हिता-स्ततः ॥ ११५ ॥ तांस्तैर्निवेदितान् दृष्ट्वा पाण्डवान् कौरवास्तदा । शिष्टाश्च वर्षाः पौरा ये ते हर्षाच्चुक्रुशुर्भृशम् ॥ ११६ ॥ आजुः केचिन्न तस्यैते तस्यैत इति चापरे । यदा चिरमृतः पाण्डुः कथन्तस्येति चापरे ॥ ११७ ॥ स्वागतं सर्वथा दिष्ट्या पाण्डोः पश्याम सन्ततिम् । उच्यतां स्वागतमिति वाचोऽभूयन्त सर्वशः ॥ ११८ ॥ तस्मिन्नुपरते शब्दे दिशः सर्वा निनादयन् । अन्त-र्हितानां भूतानां निःस्वनस्तुमुलोऽभवत् ॥ ११९ ॥ पुष्पवृष्टिः शुभा गन्धाः शङ्खदुन्दुभिनिस्वनाः । आसन् प्रवेशे पार्थानां तदद्भुतमिवाभवत् ॥ १२० ॥ तत्प्रीत्या चैव सर्वेषां पौराणां हर्षसम्भवः । शब्द आसीन्महांस्तत्र दिवस्पृक्कीर्त्तिवर्द्धनः ॥ १२१ ॥ तेऽधीत्य निखिलान्वेदांश्छास्त्राणि विविधानि च । न्यवसत् पाण्डवास्तत्र पूजिता अकुतोभयाः ॥ १२२ ॥ युधिष्ठिरस्य शौचेन प्रीताः प्रकृतय ऽभवन् । धृत्या च भीमसेनस्य विक्रमे-णार्जुनस्य च ॥ १२३ ॥ गुरुशुश्रूषया कुन्त्या यमयोर्विनयेन च ।

तुतोष लोकः सकलस्तेषां शौर्य्येण च ॥ १२४ ॥ समवाये ततो राज्ञां कन्यां भर्तृंस्वयंवराम् । प्राप्तवानर्जुनः कृष्णां कृत्वा कर्म सुदुष्करम् ॥ १२५ ॥ ततःप्रभृति लोकेऽस्मिन् पूज्यः सर्वधनुष्मताम् । आदित्य इव दुष्प्रेक्ष्यः समरेष्वपि चासवत् ॥ १२६ ॥ स सर्वान् पार्थिवान् जित्वा सर्वांश्च महतो गणान् । आजह्रारार्जुनो राज्ञो राजसूयं महाक्रतुम् ॥ १२७ ॥ प्राप्तवान् दक्षिणांश्चाप्त सर्वैः समुदितो गुणैः ॥ युधिष्ठिरेण संप्राप्तो राजसूयो महाक्रतुः ॥ १२८ ॥ सुनयाद्वासुदेवस्य भीमार्जुनबलेन च । घातयित्वा जरासन्धं चैद्यञ्च बलगर्वितम् ॥ १२९ ॥ दुर्य्योधनं समागच्छन्महार्हाणि ततस्ततः । मणिकाञ्चनरत्नानि गोहस्त्यश्वधनानि च ॥ १३० ॥ विचित्राणि च वासांसि प्रावाराबरणानि च । कम्बलाजिनरत्नानि राङ्कवास्तरणानि च ॥ १३१ ॥ समृद्धान्तां तथा दृष्ट्वा पाण्डवानां तदा श्रियम् । ईर्ष्यासमुत्थः सुमहांस्तस्य मन्युरजायत ॥ १३२ ॥ विमानप्रतिमान्तत्र मयेन सुकृतां सभाम् । पाण्डवानामुपकृतां स दृष्ट्वा पर्य्यतप्यत ॥ १३३ ॥ तत्रावहसितश्चासीत् प्रस्कन्दन्निव सम्भ्रमात् । प्रत्यक्षं वासुदेवस्य भीमेनानभिजातवत् ॥ १३४ ॥ स भोगान् विविधान् भुञ्जन् रत्नानि विविधानि च । कथितो धृतराष्ट्रस्य विवर्णो हरिणः कृशः ॥ १३५ ॥ अन्वजानात्ततो द्यूतं धृतराष्ट्रः सुतप्रियः । तच्छ्रुत्वा वासुदेवस्य कोपः समभवन्महान् ॥ १३६ ॥ नातिप्रीतमनाश्चासीद्विवादांश्चान्वमोदत । द्यूतादीननयान् घोरान् विविधांश्चाप्यपैक्षत ॥ १३७ ॥ निरस्य विदुरं भीष्मं द्रोणं शारद्वतं कृपम् । विग्रहे तुमुले तस्मिन् दहत्क्षत्रं परस्परम् ॥ १३८ ॥ जयत्सु पाण्डुपुत्रेषु श्रुत्वा सुमहदप्रियम् । दुर्य्योधनमतं ज्ञात्वा कर्णस्य शकुनेस्तथा ॥ १३९ ॥ धृतराष्ट्रश्चिरं ध्यात्वा सञ्जयं वाक्यमब्रवीत् । शृणु सञ्जय सर्वं मे न चासूयितुमर्हसि ॥ १४० ॥ श्रुतवानसि

मेधावी बुद्धिमान् प्राज्ञसम्मतः । न विग्रहे मम मतिर्नच प्रीये कुलक्षये ॥ १४१ ॥ न मे विशेषः पुत्रेषु स्वेषु पाण्डुसुतेषु वा । वृद्धं मामभ्यसूयन्ति पुत्रा मन्युपरायणाः ॥ १४२ ॥ अहं त्वचक्षुः कार्पण्यात् पुत्रप्रीत्या सहामि तत् । सुह्यन्तं चानुसुह्याभि दुर्बुद्धिधनमचेतनम् ॥ १४३ ॥ राजसूये श्रियं दृष्ट्वा पाण्डवस्य महौजसः । तच्चावहसनं प्राप्य सभारोहणदर्शने ॥ १४४ ॥ अमर्षणः स्वयं जेतुमशक्तः पाण्डवान् रणे । निरुत्साहश्च संप्राप्तं सुश्रियं क्षत्रियोऽपि सन् ॥ १४५ ॥ गान्धारराजसहितश्छद्मद्यूतमममन्त्रयत् । तत्र यद्यद्यथा ज्ञातं मया सञ्जय तच्छृणु ॥ १४६ ॥ श्रुत्वा तु मम वाक्यानि बुद्धियुक्तानि तत्वतः । ततो ज्ञास्यसि मां सौते प्रज्ञाचक्षुषमित्युत ॥ १४७ ॥ यदाश्रौषं धनुरायम्य चित्रं विद्धं लक्ष्यं पातितं वै पृथिव्याम् । क्षीणां हृतां प्रेक्षतां सर्वराज्ञां तदा नाशंसे विजयाय सञ्जय ॥ १४८ ॥ यदाश्रौषं द्वारकायां सुभद्रां प्रसह्योढां माधवीमर्जुनेन । इन्द्रप्रस्थं तृप्तिमीरौ च यातौ तदा नाशंसे विजयाय सञ्जय ॥ १४९ ॥ यदाश्रौषं देवराजं प्रवृष्टं शरैर्दिव्यैर्वारितं चार्जुनेन । अग्निं तदा तर्पितं खाण्डवे च तदा नाशंसे विजयाय सञ्जय ॥ १५० ॥ यदाश्रौषं जातुषाद्वेश्मनस्तान्मुक्तान् पार्थान् पञ्च कुन्त्या समेतान् । युक्तञ्चैषां विदुरं स्वार्थसिद्धौ तदा नाशंसे विजयाय सञ्जय ॥ १५१ ॥ यदाश्रौषं द्रौपदीं रङ्गमध्ये लक्ष्यं भित्वा निर्जितामर्जुनेन । शूरान् पाञ्चालान् पाण्डवेयांश्च युक्तांस्तदा नाशंसे विजयाय सञ्जय ॥ १५२ ॥ यदाश्रौषं मागधानाञ्चरिष्टं जरासन्धं क्षत्रमध्ये ज्वलन्तम् । दोर्भ्यां हतं भीमसेनेन गत्वा तदा नाशंसे विजयाय सञ्जय ॥ १५३ ॥ यदाश्रौषं दिग्जये पाण्डुपुत्रैर्वशीकृतान् भूमिपालान् प्रसह्य । महाक्रतुं राजसूयं क्रतुञ्च तदा नाशंसे विजयाय सञ्जय ॥ १५४ ॥ यदाश्रौषं द्रौपदीमश्रुकण्ठीं सभां नीतां

दुःखितामेकवस्त्राम्। रजस्वलां नाथवतीमनाथवत्तदा नाशंसे विजयाय सञ्जय ॥ १५५ ॥ यदाऽौषं वाससां तत्र राशिं समाक्षिपत्कितवो मन्दबुद्धिः। दुःशासनो गतवान्नैव चान्तं तदा नाशंसे विजयाय सञ्जय ॥ १५६ ॥ यदाऽौषं हृतराज्यं युधिष्ठिरं पराजितं सौबलेनाक्षवत्याम्। अन्वागतं भ्रातृभिरप्रमेयैस्तदा नाशंसे विजयाय सञ्जय ॥ १५७ ॥ यदाऽौषं विविधास्तत्र चेष्टा धर्मात्मनां प्रस्थितानां वनाय। ज्येष्ठप्रीत्या क्लिश्यतां पाण्डवानां तदा नाशंसे विजयाय सञ्जय ॥ १५८ ॥ यदाऽौषं ज्ञातकानां सकाशे रन्वागतं धर्मराजं वनस्थम्। भिक्षाभुजां ब्राह्मणानां महात्मनां तदा नाशंसे विजयाय सञ्जय ॥ १५९ ॥ यदाऽौषमर्जुनं देवदेवं किरातरूपं त्र्यम्बकं तोष्य युद्धे। अवाप्तवन्तं पाशुपतं महास्त्रं तदा नाशंसे विजयाय सञ्जय ॥ १६० ॥ यदाऽौषं त्रिदिवस्थं धनञ्जयं शक्रात् साक्षाद्दिव्यमस्त्रं यथावत्। अधीयानं शंसितं सत्यसन्धं तदा नाशंसे विजयाय सञ्जय ॥ १६१ ॥ यदाऽौषं कालकेयास्ततस्ते पौलोमानो वरदानाच्च दृप्ताः। देवैरजेया निर्जिताश्चार्जुनेन तदा नाशंसे विजयाय सञ्जय ॥ १६२ ॥ यदाऽौषमसुराणां वधार्थं किरीटिनं यातमभित्रकर्षणम्। कृतार्थं चाप्यागतं शक्रलोकात् तदा नाशंसे विजयाय सञ्जय ॥ १६३ ॥ यदाऽौषं वैश्रवणेन सार्द्धं समागतं भीमसन्यांश्च पार्थान्। तस्मिन्देशे मानुषाणामगम्ये तदा नाशंसे विजयाय सञ्जय ॥ १६४ ॥ यदाऽौषं घोषयात्रागतानां बन्धं गन्धर्वैर्मोक्षणं चार्जुनेन। स्वेषां सुतानां कर्णवृद्धौ रतानां तदा नाशंसे विजयाय सञ्जय ॥ १६५ ॥ यदाऽौषं यक्षरूपेण धर्मं समागतं धर्मराजेन सूत। प्रश्नान् कांश्चिद्विब्रुवाणञ्च सम्यक् तदा नाशंसे विजयाय सञ्जय ॥ १६६ ॥ यदाऽौषं न विदुर्मामकास्तान् प्रच्छन्नरूपान्वसतः पाण्डवेयान्। विराटराष्ट्रे सह कृष्णया तांस्तदा नाशंसे विजयाय सञ्जय ॥ १६७ ॥

यदाश्रौषं मामकानां वरिष्ठान् धनञ्जयेनैकरथेन भग्नान्। विराट-राष्ट्रे वसतां महात्मनां तदा नाशंसे विजयाय सञ्जय ॥ १६८ ॥ यदाश्रौषं सत्कृतां मत्स्यराज्ञा सुतां दत्तामुत्तरामर्जुनाय। ताञ्चार्जुनः प्रत्यगृह्णात् सुतार्थे तदा नाशंसे विजयाय सञ्जय ॥ १६९ ॥ यदाश्रौषं निर्जितस्याधनस्य प्रव्राजितस्य स्वजनात् प्रच्युतस्य। अक्षौहिण्यः सप्त युधिष्ठिरस्य तदा नाशंसे विजयाय सञ्जय ॥ १७० ॥ यदाश्रौषं माधवं वासुदेवं सर्वात्मना पाण्डवार्थे निविष्टम्। यस्येमां गां विक्रममेकमाजौ तदा नाशंसे विजयाय सञ्जय ॥ १७१ ॥ यदाश्रौषं नरनारायणौ तौ कृष्णार्जुनौ वदतो नारदस्य। अहं द्रष्टा ब्रह्मलोके च सम्यक् तदा नाशंसे विजयाय सञ्जय ॥ १७२ ॥ यदाश्रौषं लोकहिताय कृष्णं शमार्थिनमुपयातं कुरूणाम्। शमं कुर्वाणमकृतार्थञ्च यातं तदा नाशंसे विजयाय सञ्जय ॥ १७३ ॥ यदाश्रौषं कर्णदुर्योधनाभ्यां बुद्धिं कृतां निग्रहे केशवस्य। तं चात्मानं बहुधा दर्शयानं तदा नाशंसे विजयाय सञ्जय ॥ १७४ ॥ यदाश्रौषं वासुदेवे प्रयाते रथस्यैकामग्रतस्तिष्ठमानाम्। आर्तां पृथां सान्त्वितां केशवेन तदा नाशंसे विजयाय सञ्जय ॥ १७५ ॥ यदाश्रौषं मन्त्रिणं वासुदेवं तथा भीष्मं शान्तनवञ्च तेषाम्। भारद्वाजस्याग्निवेश्यानुबुद्धाणं तदा नाशंसे विजयाय सञ्जय ॥ १७६ ॥ यदा कर्णो भीष्ममुवाच वाक्यं नाहं योत्स्ये युध्यमाने त्वयीति। हित्वा सेनामपचक्राम चापि तदा नाशंसे विजयाय सञ्जय ॥ १७७ ॥ यदाश्रौषं वासुदेवार्जुनौ तौ तथा धनुर्गाण्डिवमप्रमेयम्। चीर्णव्रतौ खाण्डवे सम्प्रदाहे तदा नाशंसे विजयाय सञ्जय ॥ १७८ ॥ यदाश्रौषं कश्मलेनाभिपन्ने रथोपस्थे सीदमानेऽर्जुने वै। कृष्णं लोकान् दर्शयानं शरीरे तदा नाशंसे विजयाय सञ्जय ॥ १७९ ॥ यदाश्रौषं भीष्ममतिमर्त्यकर्माणं निघ्नन्तमाजावयुतं रथानाम्।

नैषां कश्चिद्ध्यते ख्यातरूपस्तदा नाशंसे विजयाय सञ्जय ॥ १८० ॥ यदाऽऽशीषं चापगेयेन संख्ये स्वयं मृत्युं विहितं धार्मिकेण। तच्चाकर्षुः पाण्डवेयाः प्रहृष्टास्तदा नाशंसे विजयाय सञ्जय ॥१८१॥ यदाऽऽशीषं भीष्ममत्यन्तशूरं हतं पार्थेनाहवेष्वप्रधृष्यम्। शिखण्डिनं पुरतःस्थापयित्वा तदा नाशंसे विजयाय सञ्जय ॥ १८२ ॥ यदाऽऽशीषं शरतल्पे शयानं वृद्धं वीरं सादितं चित्रपुंखैः। भीष्मं कृत्वा सोमकानल्पशेषांस्तदा नाशंसे विजयाय सञ्जय ॥ १८३ ॥ यदाऽऽशीषं शान्तनवे शयाने पानीयार्थे चोदितेनार्जुनेन। भूमिं भित्वा तर्पितं तत्र भीष्मं तदा नाशंसे विजयाय सञ्जय ॥ १८४ ॥ यदा वायुः शक्रसूर्यौ च युक्तौ कौन्तेयानामनुलोमा जयाय। नित्यं चास्मान् क्षापदा भीषयन्ति तदा नाशंसे विजयाय सञ्जय ॥ १८५ ॥ यदा द्रोणो विविधानस्त्रमार्गान्निदर्शयन् समरे चित्रयोधी। न पाण्डवान् श्रेष्ठतरान्निहन्ति तदा नाशंसे विजयाय सञ्जय ॥ १८६ ॥ यदाऽऽशीषं चास्मदीयान्महारथान् व्यवस्थितानर्जुनस्यान्तकाय। संयत्तकान्निहतानर्जुनेन तदा नाशंसे विजयाय सञ्जय। १८७ ॥ यदाऽऽशीषं व्यूहमभेद्यमन्यैर्भारद्वाजेनात्तशस्त्रेण गुप्तम्। भित्त्वा सौभद्रं वीरमेकं प्रविष्टं तदा नाशंसे विजयाय सञ्जय। १८८ ॥ यदाभिमन्युं परिवार्य बालं सर्वे हत्वा हृष्टरूपा बभूवुः। महारथाः पार्थमशक्नुवन्तस्तदा नाशंसे विजयाय सञ्जय ॥ १८९ ॥ यदाऽऽशीषमभिमन्युं निहत्य हर्षान्मूढान् क्रोशतो धार्तराष्ट्रान्। क्रोधादुक्तं सैन्धवे चार्जुनेन तदा नाशंसे विजयाय सञ्जय ॥ १९० ॥ यदाऽऽशीषं सैन्धवार्थे प्रतिज्ञां प्रतिज्ञातां तद्वधायार्जुनेन। सत्यान्तीर्णां शत्रुमध्ये च तेन तदा नाशंसे विजयाय सञ्जय ॥ १९१ । यदाऽऽशीषं आन्तहये धनञ्जये सुप्ता हयान् पाययित्वोपहृत्तान्। पुनर्युक्ता वासुदेवं प्रयातं तदा नाशंसे विजयाय सञ्जय ॥ १९२ ॥ यदा-

औषं वाहनेष्वक्षमेषु रथोपस्थे तिष्ठता पाण्डवेन । सर्वान् योधान् वारितानर्जुनेन तदा नाशंसे विजयाय सञ्जय ॥ १९३॥ यदा-औषं नागबलैः सुदुःसहं द्रोणानीकं युयुधानं प्रमथ्य । यातं वार्ष्णेयं यत्र तौ कृष्णपार्थौ तदा नाशंसे विजयाय सञ्जय ॥१९४॥ यदाऔषं कर्णमासाद्य मुक्तं बधाङ्गीमं कुत्सयित्वा वचोभिः । धनुःकोट्या तुद्य कर्णेन वीरं तदा नाशंसे विजयाय सञ्जय ॥ १९५ ॥ यदाऔषं द्रोणः कृतवर्मा कृपश्च कर्णो द्रौणिर्मद्रराजश्च शूरः । अमर्षयन् सैन्धवं बध्यमानं तदा नाशंसे विजयाय सञ्जय ॥ १९६ ॥ यदाऔषं देवराजेन दत्तां दिव्यां शक्तिं व्यंसितां माधवेन । घटोत्कचे राक्षसे घोररूपे तदा नाशंसे विजयाय सञ्जय ॥ १९७ ॥ यदाऔषं कर्णघटोत्कचाभ्यां युद्धे मुक्तां स्तूतपुत्रेण शक्तिम् । यया बध्यः समरे सव्यसाची तदा नाशंसे विजयाय सञ्जय ॥ १९८ ॥ यदाऔषं द्रोणमाचार्यमेकं धृष्टद्युम्नेनाभ्यतिक्रम्य धर्मम् । रथोपस्थे प्रायगतं विशस्तं तदा नाशंसे विजयाय सञ्जय ॥ १९९ ॥ यदाऔषं द्रौणिना दैरथस्थं माद्रीसुतं नकुलं लोकमध्ये । समं युद्धे मण्डलशश्चरन्तं तदा नाशंसे विजयाय संजय ॥ २०० ॥ यदा द्रोणे निहते द्रोणपुत्रो नारायणं दिव्यमस्त्रं विकुर्वन् । मैथामन्तं गतवान् पाण्डवानां तदा नाशंसे विजयाय संजय ॥ २०१ ॥ यदाऔषं भीमसेनेन पीतं रक्तं भ्रातुर्युधि दुःशासनस्य । निवारितं नान्यतमेन भीमं तदा नाशंसे विजयाय संजय ॥ २०२ ॥ यदाऔषं कर्णमत्यन्तशूरं हतं पार्थेनाहवेष्वप्रधृष्यम् । तस्मिन् भ्रातॄणां विग्रहे देवगुह्ये तदा नाशंसे विजयाय संजय ॥२०३॥ यदाऔषं द्रोणपुत्रञ्च शूरं दुःशासनं कृतवर्माणमुग्रम् । युधिष्ठिरं धर्मराजं जयन्तं तदा नाशंसे विजयाय संजय ॥ २०४ ॥ यदाऔषं निहतं मद्रराजं रणे शूरं धर्मराजेन सूत । सदा

संग्रामे सङ्कर्षते यस्तु कृष्णं तदा नाशंसे विजयाय संजय ॥२०५॥
यदाशौषं कलहद्यूतमूलं मायाबलं सौबलं पाण्डवेन हृतं
संग्रामे सहदेवेन पापं तदा नाशंसे विजयाय संजय ॥ २०६ ॥
यदाशौषं आन्तमेकं शयानं ह्रदं गत्वा स्तम्भयित्वा तदम्भः ।
दुर्य्योधनं विरथं भग्नशक्तिं तदा नाशंसे विजयाय संजय ॥२०७॥
यदाशौषं पाण्डवांश्लिष्टमानान् गत्वा ह्रदे वासुदेवेन सार्द्धम् ।
अमर्षणं धर्षयतः सुतं मे तदा नाशंसे विजयाय संजय । २०८॥
यदाशौषं विविधांश्चित्रमार्गान् गदायुद्धे मण्डलशश्चरन्तम् ।
मिथ्याहतं वासुदेवस्य बुद्ध्या तदा नाशंसे विजयाय संजय
॥ २०९॥ यदाशौषं द्रौणपुत्रादिभिस्त्रैर्हतान् पाञ्चालान्द्रौपदेयांश्च
सुप्तान् । कृतं वीभत्समयशस्यञ्च कर्म तदा नाशंसे विजयाय
सञ्जय ॥ २१० ॥ यदाशौषं भीमसेनानुयातेनाश्वत्थाम्ना पर-
मास्त्रं प्रयुक्तम् । क्रुद्धेनैषीकमबधीद्येन गर्भं तदा नाशंसे विज-
याय सञ्जय ॥ २११ ॥ यदाशौषं ब्रह्मशिरोऽर्जुनेन स्वस्तीत्युक्ता-
स्त्रमस्त्रेण शान्तम् । अश्वत्थाम्ना मणिरत्नञ्च दत्तं तदा नाशंसे
विजयाय संजय ॥ २१२ ॥ यदाशौषं द्रौणपुत्रेण गर्भे वैराट्या
वै पात्यमाने महास्त्रैः । द्वैपायनः केशवो द्रौणपुत्रं परस्परे-
णाभिशापैः शशाप ॥ २१३ ॥ शोच्या गान्धारी पुत्रपौत्रैर्विहीना
तथा बन्धुभिः पितृभिर्भ्रातृभिश्च । कृतं कार्य्यं दुष्करं पाण्डवेयैः
प्राप्तं राज्यमसपत्नं पुनस्तैः ॥२१४ ॥ कष्टं युद्धे दश शेषाः श्रुत्वा
मे त्वयोऽस्माकं पाण्डवानाञ्च सप्त । द्यूना विंशतिराहताश्चौ-
हिणीनां तस्मिन् संग्रामे भैरवे क्षत्रियाणाम् ॥ २१५ ॥ तमस्वतीव
विस्तीर्णं मोह आविशतीव माम् । संज्ञां नोपलभे सूत मनो
विह्वलतीव मे ॥ २१६ ॥

सौतिरुवाच । इत्युक्ता धृतराष्ट्रोऽथ विलप्य बहुदुःखितः ।
मूर्च्छितः पुनराश्वस्तः संजयं वाक्यमब्रवीत् ॥ २१७ ॥

धृतराष्ट्र उवाच। संजयैव गते प्राणांस्त्यक्तुमिच्छामि मा चिरम्। लोकं त्वपि न पश्यामि फलं जीवितधारणे ॥ २१८ ॥

सौतिरुवाच। तं तथा वादिनं दीनं विलपन्तं महीपतिम्। निःश्वसन्तं यथा नागं मुह्यमानं पुनः पुनः ॥ २१९ ॥ गावल्गणिरिदं धीमान्महार्थं वाक्यमब्रवीत्।

संजय उवाच। श्रुतवानसि वै राजन्महोत्साहान्महाबलान् ॥ २२० ॥ द्वैपायनस्य वदतो नारदस्य च धीमतः। महत्सु राजवंशेषु गुणैः समुदितेषु च ॥ २२१ ॥ जातान् दिव्यास्त्रविदुषः शक्रप्रतिमतेजसः। धर्मेण पृथिवीं जित्वा यज्ञैरिष्ट्वा सुदक्षिणैः ॥ २२२ ॥ अस्मिल्लोके यशः प्राप्य ततः कालवशं गतान्। शैव्यं महारथं वीर सृंजयं जयतांवरम् ॥ २२३ ॥ सुहोत्रं रन्तिदेवञ्च काक्षीवन्तं महाद्युतिम्। वाह्लीकं दमनञ्चैव शर्यातिमजितं नलम् ॥ २२४ ॥ विश्वामित्रममित्रघ्नमम्बरीषं महाबलम्। मरुत्तं मनुमिक्ष्वाकुं गयं भरतमेवच ॥ २२५ ॥ रामं दाशरथिञ्चैव शशबिन्दुं भगीरथम्। कृतवीर्यं महाभागं तथैव जनमेजयम् ॥ २२६ ॥ ययातिं शुभकर्माणं देवैर्यो याजितः स्वयम् ॥ २२७ ॥ चैत्ययूपाङ्किता भूमिर्यस्येयं सवनाकरा। इति राज्ञां चतुर्विंशं नारदेन सुरर्षिणा ॥ २२८ ॥ पुत्रशोकाभितप्ताय पुरा शैव्याय कीर्त्तितम्। तेभ्यश्चान्ये गताः पूर्वं राजानो बलवत्तराः ॥ २२९ ॥ महारथा महात्मानः सर्वैः समुदिता गुणैः। पुरुः कुरुर्यदुः शूरो विश्वगश्वो महाद्युतिः ॥ २३० ॥ अणुहो युवनाश्वश्च ककुत्स्थो विक्रमी रघुः। विजयो वीतिहोत्रोऽङ्गो भवः श्वेतो बृहद्गुरुः ॥ २३१ ॥ उशीनरः शतरथः कंको दुलिदुहो द्रुमः। दम्भोद्भवः परो वेणः सगरः संकृतिर्निमिः ॥ २३४ ॥ अजेयः परशुः पुण्ड्रः शम्भुर्देवावृधोऽनघः। देवाह्वयः सुप्रतिमः सुप्रतीको बृहद्रथः ॥ २३३ ॥ महोत्साहो विनी-

ताम्रा सुक्रतुर्नैषधो नलः । सत्यव्रतः शान्तभयः सुमित्रः सुबलः प्रभुः ॥ २३४ ॥ जानुजंघोऽनरण्योऽर्कः प्रियभृत्यः शुचिव्रतः । बलबन्धुर्निरामर्दः केतुशृङ्गो बृहद्बलः ॥ २३५ ॥ धृष्टकेतुर्बृहत्केतुर्दीप्तकेतुर्निरामयः । अविक्षिच्चपलो धूर्त्तः क्षतबन्धुर्दृढेषुधिः ॥ २३६ ॥ महापुराणसम्भाव्यः प्रत्यङ्गः परहा श्रुतिः । एते चान्ये च राजानः शतशोऽथ सहस्रशः ॥ २३७ ॥ भूयन्ते शतशस्त्वन्ये संख्याताश्चैव पञ्चशः । हित्वा सुविपुलान् भोगान् बुद्धिमन्तो महाबलाः ॥ २३८ ॥ राजानो निधनं प्राप्तास्तव पुत्रा इव प्रभो । येषां दिव्यानि कर्माणि विक्रमस्त्याग एव च ॥ २३९ ॥ माहात्म्यमपि चास्तिक्यं सत्यं शौचं दयार्जवम् । विद्वद्भिः कथ्यते लोके पुराणे कविसत्तमैः ॥ २४० ॥ सर्वैर्द्विगुणसम्पन्नास्ते चापि निधनं गताः । तव पुत्रा दुरात्मानः प्रतप्तास्चैव मन्युना ॥ २४१ ॥ लुब्धा दुर्वृत्तभूयिष्ठा न ताञ्शोचितुमर्हसि । श्रुतवानसि मेधावी बुद्धिमान् प्राज्ञसंमतः ॥ २४२ ॥ येषां शास्त्रानुगा बुद्धिर्न ते मुह्यन्ति भारत । निग्रहानुग्रहौ चापि विदितौ ते नराधिप ॥ २४३ ॥ नात्यन्तमेवानुवृत्तिः कार्य्या ते पुत्ररक्षणे । भवितव्यं तथा तत्र नानुशोचितुमर्हसि ॥ २४४ ॥ दैवं प्रज्ञाविशेषेण को निवर्त्तितुमर्हति । विधानविहितं मार्गं न कश्चिदतिवर्त्तते । कालमूलमिदं सर्वं भावाभावौ सुखासुखे ॥ २४५ ॥ कालः हरति भूतानि कालः संहरते प्रजाः । निर्दहति प्रजाः कालः कालः शमयते पुनः ॥ २४६ ॥ कालो हि कुरुते भावान् सर्वलोके शुभाशुभान् । कालः संक्षिपते सर्वाः प्रजा विसृजते पुनः ॥ २४७ ॥ कालः सुप्तेषु जागर्त्ति कालो हि दुरतिक्रमः । कालः सर्वेषु भूतेषु चरत्यविधृतः समः ॥ २४८ ॥ अतीतानागता भावा ये च वर्त्तन्ति साम्प्रतम् । तान् कालनिर्मितान् बुद्ध्या न संज्ञां हातुमर्हसि ॥ २४९ ॥

सौतिरुवाच। इत्येवं पुत्रशोकार्त्तं धृतराष्ट्रं जनेश्वरम्। आश्वास्य स्वस्थमकरोत् कृतो गावल्गणिस्तदा ॥ २५० ॥ अतो-पनिषदं पुण्यां कृष्णद्वैपायनोऽब्रवीत्। विद्वद्भिः कथ्यते लोके पुराणे कविसत्तमैः ॥ २५१ ॥ भारताध्ययनं पुण्यमपि पाद-मधीयतः। श्रद्दधानस्य पूयन्ते सर्वपापान्यशेषतः ॥ २५२ ॥ देवा देवर्षयो ह्यत्र तथा ब्रह्मर्षयोऽमलाः। कीर्त्यन्ते शुभकर्माणः स्था यक्षा महोरगाः ॥ २५३ ॥ भगवान् वासुदेवश्च कीर्त्यते-ऽत्र सनातनः। स हि सत्यमृतञ्चैव पवित्रं पुण्यमेव च ॥ २५४ ॥ शाश्वतं ब्रह्म परमं ध्रुवं ज्योतिः सनातनम्। यस्य दिव्यानि कर्माणि कथयन्ति मनीषिणः ॥ २५५ ॥ असच्च सदसच्चैव यस्मा-द्विश्वं प्रवर्त्तते। सन्ततिश्च प्रवृत्तिश्च जन्ममृत्युपुनर्भवाः ॥ २५६ ॥ अध्यात्मं श्रूयते यच्च पञ्चभूतगुणात्मकम्। अव्यक्तादि परं यच्च स एव परिगीयते ॥ २५७ ॥ यत्तद्यतिवरा मुक्ता ध्यानयोगबला-न्विताः। प्रतिबिम्बमिवादर्शे पश्यन्त्यात्मन्यवस्थितम् ॥ २५८ ॥ श्रद्दधानः सदायुक्तः सदाधर्मपरायणः। आसेवेन्निममध्यायं नरः पापात् प्रमुच्यते ॥ २५९ ॥ अनुक्रमणिकाध्यायं भारतस्येममा-दितः। आस्तिकः सततं शृण्वन्न कृच्छ्रेष्ववसीदति ॥ २६० ॥ उभे संध्ये जपन् किञ्चित्सद्यो मुच्येत किल्बिषात्। अनुक्रमण्या यावत् स्यादृक्षा रात्र्या च संचितम् ॥ २६१ ॥ भारतस्य वपुर्ह्येतत्सत्यं चामृतमेव च। नवनीतं यथा दध्नो द्विपदां ब्राह्मणो यथा ॥ २६२ ॥ आरण्यकं च वेदेभ्यौषधिभ्योऽमृतं यथा। ह्रदानामुदधिः श्रेष्ठो गौर्वरिष्ठा चतुष्पदाम् ॥ २६३ ॥ यथैतानीतिहासानां तथा भारतमुच्यते। यश्चैनं श्रावयेच्छ्राद्धे ब्राह्मणान् पादमन्ततः। अक्षय्यमन्नपानं वै पितॄंस्तस्योपतिष्ठते ॥ २६४ ॥ इतिहासपुरा-णाभ्यां वेदं समुपबृंहयेत्। बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरि-ष्यति ॥ २६५ ॥ काणं वेदमिमं विद्वान् श्रावयित्वार्थमश्नुते।

भ्रूणहत्यादिकं चापि पापं दह्यादसंशयम् ॥ २६६ ॥ य इमं शुचिरध्यायं पठेत् पर्वणि पर्वणि । अधीतं भारतं तेन कृत्स्नं स्यादिति मे मतिः ॥ २६७ ॥ यश्चैनं शृणुयान्नित्यमार्षं श्रद्धासमन्वितः । स दीर्घमायुः कीर्तिं च स्वर्गतिं चाप्नुयान्नरः ॥ २६८ ॥ एकतश्चतुरो वेदान् भारतं चैतदेकतः । पुरा किल सुरैः सर्वैः समेत्य तुलया धृतम् ॥ २६९ ॥ चतुर्भ्यः सरहस्येभ्यो वेदेभ्यो ह्यधिकं यदा । तदाप्रभृति लोकेऽस्मिन्महाभारतमुच्यते ॥ २७० ॥ महत्त्वे च गुरुत्वे च ध्रियमाणं यतोऽधिकम् । महत्त्वाद्भारवत्त्वाच्च महाभारतमुच्यते । निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ॥ २७१ ॥ तपो न कल्कोऽध्ययनं न कल्कः स्वाभाविको वेदविधिर्न कल्कः । प्रसह्य वित्ताहरणं न कल्कस्त्वान्येव भावोपहतानि कल्कः ॥ २७२ ॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां आदिपर्वण्यनुक्रमणिकाध्यायः प्रथमः ॥ १ ॥

ऋषय ऊचुः । समन्तपञ्चकमिति यदुक्तं सूतनन्दन । एतत् सर्वं यथातत्त्वं श्रोतुमिच्छामहे वयम् ॥ १ ॥

सौतिरुवाच । शृणुध्वं मम भो विप्रा ब्रुवतश्च कथाः शुभाः । समन्तपञ्चकाख्यश्च श्रोतुमर्हथ सत्तमाः ॥ २ ॥ त्रेताद्वापरयोः सन्धौ रामः शस्त्रभृतां वरः । असक्तत्क्षत्रियं रोषाज्जघानामर्षचोदितः ॥ ३ ॥ स सर्वं क्षत्रमुत्साद्य स्वबाहुबलमाश्रितः । समन्तपञ्चके पञ्च चकार रुधिरान् ह्रदान् ॥ ४ ॥ स तेषु रुधिराम्भःसु ह्रदेषु क्रोधमूर्च्छितः । पितॄन् सन्तर्पयामास रुधिरेणेति नः श्रुतम् ॥ ५ ॥ अथर्चीकादयोऽभ्येत्य पितरो राममब्रुवन् । राम राम महाभाग प्रीताः स्मस्तव भार्गव ॥ ६ ॥ अनया पितृ-

भक्त्या च विक्रमेण तव प्रभो। वरं वृणीष्व भद्रं ते यमिच्छसि महाद्युते ॥ ७ ॥

राम उवाच। यदि मे पितरः प्रीता यद्यनुग्राह्यता मयि। यच्च रोषाभिभूतेन क्षत्रमुत्सादितं मया ॥ ८ ॥ अतश्च पापान्मुच्ये-ऽहमेष मे प्रार्थितो वरः। ह्रदाश्च तीर्थभूता मे भवेयुर्भुवि विश्रुताः ॥ ९ ॥ एवं भविष्यतीत्येवं पितरस्तमथाब्रुवन्। तं क्षमस्वेति निषिषिधुस्ततः स विरराम ह ॥ १० ॥ तेषां समीपे यो देशो ह्रदानां रुधिराम्भसाम्। समन्तपञ्चकमिति पुण्यं तत्परिकीर्त्तितम् ॥ ११ ॥ यैन लिङ्गेन यो देशो युक्तः समुपलक्ष्यते। तेनैव नाम्ना तं देशं वाच्यमाङ्गर्मनीषिणः ॥ १२ ॥ अन्तरे चैव सम्प्राप्ते कलिद्वापरयोरभूत्। समन्तपञ्चके युद्धं कुरुपाण्डवसेनयोः ॥ १३ ॥ तस्मिन् परमधर्मिष्ठे देशे भूदोषवर्जिते। अष्टादश समाजग्मुरक्षौहिण्यो युयुत्सया ॥ १४ ॥ समेत्य तं द्विजास्ताश्च तत्रैव निधनं गताः। एतन्नामाभिनिर्वृत्तं तस्य देशस्य वै द्विजाः ॥ १५ ॥ पुण्यश्च रमणीयश्च स देशो वः प्रकीर्त्तितः। तदेतत् कथितं सर्वं मया ब्राह्मणसत्तमाः ॥ १६ ॥ यथा देशः स विख्यातस्त्रिषु लोकेषु सुव्रताः।

ऋषय ऊचुः। अक्षौहिण्य इति प्रोक्तं यत्त्वया सूतनन्दन। एतदिच्छामहे श्रोतुं सर्वमेव यथातथम् ॥ १७ ॥ अक्षौहिण्याः परीमाणं नराश्वरथदन्तिनाम्। यथावच्चैव नो ब्रूहि सर्वं हि विदितं तव ॥ १८ ॥

सौतिरुवाच। एको रथो गजश्चैको नराः पञ्च पदातयः। त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ॥ १९ ॥ पत्तिं तु त्रिगुणामेतामाहुः सेनामुखं बुधाः। त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते ॥ २० ॥ त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः। स्मृतास्तिस्रस्तु वाहिन्यः पृतनेति विचक्षणैः ॥ २१ ॥

चमूसु पृतनासिच्छसिच्छसच्चक्षनीकिनी। अनीकिनीं दशगुणां प्राऊरक्षौहिणीं बुधाः॥ २२॥ अक्षौहिण्यः प्रसंख्याता रथानां द्विजसत्तमाः। संख्यागणिततत्त्वज्ञैः सहस्राण्येकविंशतिः॥२३॥ शतान्यपरि चैवाष्टौ तथा भूयश्च सप्ततिः। गजानाञ्च परीमाणमेतदेव विनिर्द्दिशेत्॥ २४॥ ज्ञेयं शतसहस्रन्तु सहस्राणि नवैव तु। नराणामपि पञ्चाग्रशतानि त्रीणि चानघाः॥२५॥ पञ्चषष्टिसहस्राणि तथाश्वानां शतानि च। दशोत्तराणि षट् प्राऊर्य्यावद्दिह संख्यया॥ २६॥ एतामक्षौहिणीं प्राऊः संख्यातत्त्वविदो जनाः। यथा कथितवानस्मि विस्तरेण तपोधनाः॥ २७॥ एतया संख्यया ह्यासन् कुरुपाण्डवसेनयोः। अक्षौहिण्यो द्विजश्रेष्ठाः पिण्डिताष्टादशैव तु॥ २८॥ समेतास्तत्र वै देशे तत्रैव निधनं गताः। कौरवान् कारणं कृत्वा कालेनाद्भुतकर्मणा॥ २९॥ अहानि युयुधे भीष्मो दश वै परमास्त्रवित्। अहानि पञ्च द्रोणस्तु ररक्ष कुरुवाहिनीम्॥ ३०॥ अहनी युयुधे द्वे तु कर्णः परबलार्द्दनः। शल्योऽर्द्धदिवसञ्चैव गदायुद्धमतःपरम्। दुर्य्योधनस्य भीमस्य दिनार्द्धमभवत्तयोः॥ ३१॥ तस्यैव दिवसस्यान्ते द्रौणिहार्दिक्यगौतमाः। प्रसुप्तं निशि विश्वस्तं जघ्नुर्यौधिष्ठिरं बलम्॥ ३२॥ यत्तु शौनकसत्रे ते भारताख्यानमुत्तमम्। जनमेजयस्य तत्सत्रे व्यासशिष्येण धीमता॥ ३३॥ कथितं विस्तरार्थञ्च यशो वीर्य्यं महौजसाम्। पौष्यं तत्र च पौलोममास्तीकं चादितः स्मृतम्॥ ३४॥ विचित्रार्थपदाख्यानमनेकसमयान्वितम्। प्रतिपर्व नरैः प्राज्ञैर्वैराग्यमिव मोक्षिभिः॥ ३५॥ आत्मेव वेदितव्येषु प्रियेष्विव हि जीवितम्। इतिहासः प्रधानार्थः श्रेष्ठः सर्वागमेष्वयम्॥ ३६॥ अनास्तिक्येदमाख्यानं कथा भुवि न विद्यते। आहारमनपास्तिक्य शरीरस्येव धारणम्॥ ३७॥ तदेतद्भारतं नाम ऋषिभिस्तूप-

जीव्यते । उदयप्रेप्सुभिर्भृत्यैरभिजातः सुवेश्वरः ॥ ३८ ॥ इतिहासोत्तमे ह्यस्मिन्गर्थिता बुद्धिरुत्तमा । स्वरव्यंजनयोः छतृस्था लोकवेदाश्रयेव वाक् ॥ ३९ ॥ तस्य प्रज्ञाभिपन्नस्य विचित्रपदपर्वणः । सूक्ष्मार्थन्याययुक्तस्य वेदार्थैर्भूषितस्य च ॥ ४० ॥ भारतस्येतिहासस्य श्रूयतां पर्वसंग्रहः । पर्वानुक्रमणीपूर्वं द्वितीयः पर्वसंग्रहः ॥ ४१ ॥ पौष्यं पौलोममास्तीकमादिर्वंशावतारणम् । ततः सम्भवपर्वोक्तमद्भुतं रोमहर्षणम् ॥ ४२ ॥ दाहो जतुगृहस्यात्र हैडिम्बं पर्व चोच्यते । ततो वकवधः पर्व पर्व चैत्ररथं ततः ॥ ४३ ॥ ततः स्वयम्वरो देव्याः पाञ्चाल्याः पर्व चोच्यते । क्षात्रधर्मेण निर्जित्य ततो वैवाहिकं स्मृतम् ॥ ४४ ॥ विदुरागमनं पर्व राज्यलाभस्तथैव च । अर्जुनस्य वने वासः सुभद्राहरणं ततः ॥ ४५ ॥ सुभद्राहरणादूर्ध्वं ज्ञेयं हरणहारिकम् । ततः खाण्डवदाहाख्यं तत्रैव मयदर्शनम् ॥ ४६ । सभापर्व ततः प्रोक्तं मन्त्रपर्व ततः परम् । जरासन्धवधः पर्व पर्व दिग्विजयं तथा ॥ ४७ ॥ पर्व दिग्विजयादूर्ध्वं राजसूयिकमुच्यते । ततश्चार्घाभिहरणं शिशुपालवधस्ततः ॥ ४८ ॥ द्यूतपर्व ततः प्रोक्तमनुद्यूतमतः परम् । तत आरण्यकं पर्व किर्मीरवध एव च ॥ ४९ ॥ अर्जुनस्याभिगमनं पर्व ज्ञेयमतः परम् । ईश्वरार्जुनयोर्युद्धं पर्व कैरातसंज्ञितम् ॥ ५० ॥ इन्द्रलोकाभिगमनं पर्व ज्ञेयमतः परम् । नलोपाख्यानमपि च धार्मिकं करुणोदयम् ॥ ५१ ॥ तीर्थयात्रा ततः पर्व कुरुराजस्य धीमतः । जटासुरवधः पर्व यक्षयुद्धमतः परम् ॥ ५२ ॥ निवातकवचैर्युद्धं पर्व चाजगरं ततः । मार्कण्डेयसमस्या च पर्वानन्तरमुच्यते ॥ ५३ ॥ संवादश्च ततः पर्व द्रौपदीसत्यभामयोः । घोषयात्रा ततः पर्व ह्यगस्त्योद्धरणं ततः ॥ ५४ ॥ व्रीहिद्रौणिकमाख्यानमैन्द्रद्युम्नं तथैव च । द्रौपदीहरणं पर्व जयद्रथविमोक्षणम् ॥ ५५ ॥ पतिव्रतायाः माहात्म्यं सावित्र्या·

चैवमद्भुतम्। रामोपाख्यानमत्रैव पर्व ज्ञेयमतः परम् ॥ ५६ ॥ कुण्डलाहरणं पर्व ततः परमिहोच्यते। आरण्येयं ततः पर्व वैराटं तदनन्तरम्। पाण्डवानां प्रवेशश्च समयस्य च पालनम् ॥ ५७ ॥ कीचकानां वधः पर्व पर्व गोग्रहणं ततः। अभिमन्योश्च वैराट्याः पर्व वैवाहिकं स्मृतम् ॥५८॥ उद्योगपर्व विज्ञेयमत ऊर्ध्वं महाद्भुतम्। ततः सञ्जययानाख्यं पर्व ज्ञेयमतः परम् ॥ ५९ ॥ प्रजागरस्तथा पर्व धृतराष्ट्रस्य चिन्तया। पर्व सानत्सुजातं वै गुह्यमध्यात्मदर्शनम् ॥ ६० ॥ यानसन्धिस्ततः पर्व भगवद्यानमेव च। मातलीयमुपाख्यानं चरितं गालवस्य च ॥ ६१ ॥ सावित्रवामदेवञ्च वैन्योपाख्यानमेव च। जामदग्न्यमुपाख्यानं पर्व षोड्शराजिकम् ॥ ६२ ॥ सभाप्रवेशः कृष्णस्य विदुलापुत्रशासनम्। उद्योगः सैन्यनिर्याणं श्वेतोपाख्यानमेव च ॥ ६३ ॥ ऋषभं विवाहपर्वात्र कर्णस्यापि महात्मनः। निर्याणञ्च ततः पर्व कुरुपाण्डवसेनयोः ॥ ६४ ॥ रथातिरथसंख्या च पर्वोक्तं तदनन्तरम्। उलूकदूतागमनं पर्वामर्षविवर्द्धनम् ॥ ६५ ॥ अम्बोपाख्यानमत्रैव पर्व ज्ञेयमतः परम्। भीष्माभिषेचनं पर्व ततश्चाद्भुतमुच्यते ॥ ६६ ॥ जम्बूखण्डविनिर्माणं पर्वोक्तं तदनन्तरम। भूमिपर्व ततः प्रोक्तं द्वीपविस्तारकीर्त्तनम् ॥ ६७ ॥ पर्वोक्तं भगवद्गीता पर्व भीष्मवधस्ततः। द्रोणाभिषेचनं पर्व संशप्तकवधस्ततः ॥ ६८ ॥ अभिमन्युवधः पर्व प्रतिज्ञापर्व चोच्यते। जयद्रथवधः पर्व घटोत्कचवधस्ततः ॥ ६९ ॥ ततो द्रोणवधः पर्व विज्ञेयं लोमहर्षणम्। मोक्षो नारायणास्त्रस्य पर्वानन्तरमुच्यते ॥ ७० ॥ कर्णपर्व ततो ज्ञेयं शल्यपर्व ततः परम्। ह्रदप्रवेशनं पर्व गदायुद्धमतः परम् ॥ ७१ ॥ सारस्वतं ततः पर्व तीर्थवंशानुकीर्त्तनम्। अत ऊर्द्धं सुवीभत्सं पर्व सौप्तिकमुच्यते ॥ ७२ ॥ ऐषीकं पर्व चोद्दिष्टमत ऊर्द्धं सुदारुणम्। जलप्रदानिकं पर्व

स्त्रीविलापस्ततःपरम् ॥ ७३ ॥ आङ्गपर्व ततो ज्ञेयं कुरूणा-मौर्द्धदेहिकम् । चार्वाकस्य बधः पर्व रक्षसो ब्रह्मरूपिणः ॥७४॥ आभिषेचनिकं पर्व धर्मराजस्य धीमतः । प्रविभागो महाराज्ञ पर्वोक्तं तदनन्तरम् ॥ ७५ ॥ शान्तिपर्व ततो यत्र राजधर्मा-नुशासनम् । आपद्धर्मश्च पर्वोक्तं मोक्षधर्मस्ततः परम् ॥ ७६ ॥ शुकप्रश्नाभिगमनं ब्रह्मप्रश्नानुशासनम् । प्रादुर्भावश्च दुर्वासःसंवा-दश्चैव मायया ॥ ७७ ॥ ततः पर्व परिक्षेयमानुशासनिकं परम् । स्वर्गारोहणिकञ्चैव ततो भीष्मस्य धीमतः ॥ ७८ ॥ ततोऽश्व-मेधिकं पर्व सर्वपापप्रणाशनम् । अनुगीता ततः पर्व ज्ञेय-मध्यात्मवाचकम् ॥ ७९ ॥ पर्व चाश्रमवासाख्यं पुत्रदर्शनमेव च । नारदागमनं पर्व ततः परमिहोच्यते ॥ ८० ॥ मौसलं पर्व चोद्दिष्टं ततो घोरं सुदारुणम् । महाप्रस्थानिकं पर्व स्वर्गारोहणिकं ततः ॥ ८१ ॥ हरिवंशस्ततः पर्व पुराणं खिलसंज्ञितम् । विष्णु-पर्व गिरीशस्य विष्णोः कंसवधस्तथा ॥ ८२ ॥ भविष्यं पर्व चाप्युक्तं खिले चैवाङ्गतं महत् । एतत् पर्वशतं पूर्णं व्यासेनोक्तं महात्मना ॥ ८३ ॥ यथावत् सूतपुत्रेण लौमहर्षणिना ततः । उक्तानि नैमिषारण्ये पर्वाण्यष्टादशैव तु ॥ ८४ ॥ समासो भार-तस्यायमुक्तः पर्वसंग्रहः । पौष्यं पौलोममास्तीकमादिवंशा-वतारणम् ॥ ८५ ॥ सम्भवो जतुवेश्माख्यं हिडिम्बवकयोर्वधः । तथा चैत्ररथं दिव्याः पाञ्चाल्याश्च स्वयम्वरः ॥ ८६ ॥ क्षात्रधर्मेण निर्जित्य ततो वैवाहिकं स्मृतम् । विदुरागमनञ्चैव राज्यलम्भ-स्तथैव च ॥ ८७ ॥ वनवासोऽर्जुनस्यापि सुभद्राहरणं ततः । हरणाहरणञ्चैव दहनं खाण्डवस्य च ॥ ८८ ॥ मयस्य दर्शनञ्चैव आदिपर्वणि कथ्यते । पौष्ये पर्वणि माहात्म्यमुतङ्कस्योपवर्णि-तम् ॥८९॥ पौलोमे भृगुवंशस्य विस्तारः परिकीर्त्तितः । आस्तीके सर्वनागानां गरुडस्य च सम्भवः ॥९०॥ क्षीरोदमथनञ्चैव जन्मोच्चैः-

अवसत्तया। यजतः सर्पसत्रेण राज्ञः पारीक्षितस्य च ॥ ९१ ॥ कथेयमभिनिर्वृत्ता भरतानां महात्मनाम्। विविधा सम्भवा राज्ञामुक्ताः सम्भवपर्वणि ॥ ९२ ॥ अन्येषाञ्चैव शूराणामृषेर्द्वैपायनस्य च। अंशावतरणं चात्र देवानां परिकीर्त्तितम् ॥९३॥ दैत्यानां दानवानाञ्च यक्षाणाञ्च महौजसाम्। नागानामथ सर्पाणां गन्धर्वाणां पतत्रिणाम् ॥ ९४ ॥ अन्येषाञ्चैव भूतानां विविधानां समुद्भवः। महर्षेराश्रमपदे कण्वस्य च तपस्विनः ॥ ९५ ॥ शकुन्तलायां दुष्मन्ताज्जातस्यापि जज्ञिवान्। यस्य लोकेषु नाम्नेदं प्रथितं भारतं कुलम् ॥ ९६ ॥ वसूनां पुनरुत्पत्तिर्भागीरथ्यां महात्मनाम्। शान्तनोर्वेश्मनि पुनस्तेषां चारोहणं दिवि ॥ ९७ ॥ तेजोंऽशानाञ्च सम्भूतौ भीष्मस्याप्यत्र सम्भवः। राज्यान्निवर्त्तनं तस्य ब्रह्मचर्य्यव्रते स्थितिः ॥ ९८ ॥ प्रतिज्ञापालनञ्चैव रक्षा चित्राङ्गदस्य च। हते चित्राङ्गदे चैव रक्षा भ्रातुर्य्यवीयसः ॥ ९९ ॥ विचित्रवीर्य्यस्य तथा राज्ये संप्रतिपादनम्। धर्म्मस्य वृषु संभूतिरणीमाण्डव्यशापजा ॥ १०० ॥ कृष्णद्वैपायनाच्चैव प्रसूतिर्वरदानजा। धृतराष्ट्रस्य पाण्डोश्च पाण्डवानाञ्च सम्भवः ॥ १०१ ॥ वारणावतयात्रायां मन्त्रो दुर्य्योधनस्य च। कूटस्य धार्त्तराष्ट्रेण प्रेषणं पाण्डवान् प्रति ॥१०२॥ हितोपदेशस्य पथि धर्मराजस्य धीमतः। विदुरेण कृतो यत्र हितार्थं म्लेच्छभाषया ॥ १०३ ॥ विदुरस्य च वाक्येन सुरङ्गोपक्रमक्रिया। निषादाः पञ्चपुत्रायाः सुप्तायाः जतुवेश्मनि ॥१०४॥ पुरोचनस्य चात्रैव दहनं संप्रकीर्त्तितम्। पाण्डवानां वने घोरे हिडिम्बायाश्च दर्शनम् ॥ १०५ ॥ तत्रैव च हिडिम्बस्य वधो भीमान्महाबलात्। घटोत्कचस्य चोत्पत्तिरत्रैव परिकीर्त्तिता ॥ १०६ ॥ महर्षेर्दर्शनञ्चैव व्यासस्यामिततेजसः। तदाज्ञयैकचक्रायां ब्राह्मणस्य निवेशने ॥ १०७ ॥ अज्ञातचर्य्यया वासो यत्र

तेषां प्रकीर्त्तितः । वकस्य निधने चैव नागराणाञ्च विस्मयः ॥१०८॥
सम्भवश्चैव कृष्णाया धृष्टद्युम्नस्य चैव हि । ब्राह्मणात्सप्रसूत्य
व्यासवाक्यप्रचोदिताः ॥ १०९ ॥ द्रौपदीं प्रार्थयन्तस्ते स्वयम्बर-
दिदृक्षया । पाञ्चालानभितो जग्मुर्यत्र कौतूहलान्विताः ॥११०॥
अङ्गारपर्णं निर्जित्य गङ्गाकूलेऽर्जुनस्तदा । सख्यं कृत्वा तत-
स्तेन तस्मादेव च शुश्रुवे ॥१११॥ तापत्यमथ वाशिष्ठमौर्वं चाख्यान-
मुत्तमम् । भ्रातृभिः सहितः सर्वैः पाञ्चालानभितो ययौ ॥११२॥
माञ्चालनगरे चापि लक्ष्यं भित्वा धनञ्जयः । द्रौपदीं लब्धवानत्र
मध्ये सर्वमहीक्षिताम् ॥ ११३ ॥ भीमसेनार्जुनौ यत्र संरब्धान्
पृथिवीपतीन् । शल्यकर्णौ च तरसा जितवन्तौ महाहवे ॥११४॥
दृष्ट्वा तयोश्च तद्वीर्य्यमप्रमेयममानुषम् । शङ्कमानौ पाण्डवांस्तान्
रामकृष्णौ महामती ॥ ११५ ॥ जग्मतुस्तैः समागन्तुं शाला-
न्मार्गववेश्मनि । पञ्चानामेकपत्नीत्वे विमर्शौ द्रुपदस्य च ॥११६॥
पञ्चेन्द्राणामुपाख्यानमत्रैवाङ्गुतमुच्यते । द्रौपद्या देवविहितो
विवाहश्चाप्यमानुषः ॥११७॥ चक्षुश्च धार्त्तराष्ट्रेण प्रेषणं पाण्ड-
वान् प्रति । विदुरस्य च सम्प्राप्तिर्दर्शनं केशवस्य च ॥ ११८ ॥
खाण्डवप्रस्थवासश्च तथा राज्यार्द्धशासनम् । नारदस्याज्ञया चैव
द्रौपद्याः समयक्रिया ॥ ११९ ॥ सुन्दोपसुन्दयोस्तद्वदाख्यानं परि-
कीर्त्तितम् । अनन्तरञ्च द्रौपद्या सहासीनं युधिष्ठिरम् ॥ १२० ॥
अनुप्रविश्य विप्रार्थे फाल्गुनो गृह्य चायुधम् । मोचयित्वा गृहं
गत्वा विप्रार्थं कृतनिश्चयः ॥ १२१ ॥ समयं पालयन्वीरो वनं यत्र
जगाम ह । पार्थस्य वनवासे च उलूप्या पथि सङ्गमः ॥ १२२ ॥
पुण्यतीर्थानुसंयानं चित्रवाहनजन्म च । तत्रैव मोचयामास पञ्च
सोऽप्सरसः शुभाः ॥ १२३ ॥ शापाद्ग्राहत्वमापन्ना ब्राह्मणस्य
तपस्विनः । प्रभासतीर्थे पार्थेन कृष्णस्य च समागमः ॥ १२४ ॥
द्वारकायां सुभद्रा च कामयानेन कामिनी । वासुदेवस्यानुमते

प्राप्ता चैव किरीटिना ॥ १२५ ॥ गृहीत्वा हरणं प्राप्ते कृष्णे देवकिनन्दने । अभिमन्योः सुभद्रायां जन्म चोत्तमतेजसः ॥ १२६ ॥ द्रौपद्याश्चनयानाञ्च सम्भवोऽनु प्रकीर्त्तितः । विहारार्थञ्च गतयोः कृष्णयोर्यमुनामनु ॥ १२७ ॥ सम्प्राप्तिश्चक्रधनुषोः खाण्डवस्य च दाहनम् । मयस्य मोक्षो ज्वलनाज्जङ्घस्य च मोक्षणम् ॥ १२८ ॥ महर्षेर्मन्दपालस्य शार्ङ्गयां तनयसम्भवः ॥ १२९ ॥ इत्येतदादिपर्वोक्तं प्रथमस्यङ्गविस्तरम् । अध्यायानां शते द्वे तु संख्याते परमर्षिणा । सप्तविंशतिरध्याया व्यासेनोक्तमतेजसा ॥ १३० ॥ अष्टौ श्लोकसहस्राणि अष्टौ श्लोकशतानि च । श्लोकाश्च चतुरशीतिर्मुनिनोक्ता महात्मना ॥ १३१ ॥ द्वितीयन्तु सभापर्व बहुवृत्तान्तमुच्यते । सभाक्रिया पाण्डवानां किङ्कराणाञ्च दर्शनम् ॥ १३२ ॥ लोकपालसभाख्यानं नारदाद्देवदर्शिनः । राजसूयस्य चारम्भो जरासन्धवधस्तथा ॥ १३३ ॥ गिरिव्रजे निरुद्धानां राज्ञां कृष्णेन मोक्षणम् । तथा दिग्विजयोऽचैव पाण्डवानां प्रकीर्त्तितः ॥ १३४ ॥ राज्ञामागमनञ्चैव सार्हणानां महाक्रतौ । राजसूयेऽर्घ्यसंवादे शिशुपालवधस्तथा ॥ १३५ ॥ यत्र विभूतिं तां दृष्ट्वा दुःखामर्षान्वितस्य च । दुर्य्योधनस्यावहासो भीमेन च सभातले ॥ १३६ ॥ यत्रास्य मन्युरुद्भूतो येन द्यूतमकारयत् । यत्र धर्मसुतं द्यूते शकुनिः कितवोऽजयत् ॥ १३७ ॥ यत्र द्यूतार्णवे मग्नां द्रौपदीं नौरिवार्णवात् । धृतराष्ट्रो महाप्राज्ञः स्नुषां परमदुःखिताम् ॥ १३८ ॥ तारयामास तांस्तीर्णान् ज्ञात्वा दुर्य्योधनो नृपः । पुनरेव ततो द्यूते समाह्वयत पाण्डवान् ॥ १३९ ॥ जित्वा स वनवासाय प्रेषयामास तांस्ततः । एतत् सर्वं सभापर्व समाख्यातं महात्मना ॥ १४० ॥ अध्यायाः सप्ततिश्चैवास्तथा चाष्टौ प्रसंख्यया । श्लोकानां द्वे सहस्रे तु पञ्चश्लोकशतानि च ॥ १४१ ॥ श्लोकाश्चैकादश ज्ञेयाः पर्वण्यस्मिन् द्विजोत्तमाः । अतः परं

तृतीयन्तु ज्ञेयमारण्यकं महत् ॥ १४२ ॥ वनवासं प्रयातेषु पाण्डवेषु महात्मसु। पौरानुगमनञ्चैव धर्मपुत्रस्य धीमतः ॥ १४३ ॥ ओषधीनाञ्च कृते पाण्डवेन महात्मना। द्विजानां भरणार्थञ्च कृतमाराधनं रवेः ॥ १४४ ॥ धौम्योपदेशात्तिग्मांशुप्रसादादन्नसम्भवः। हितञ्च ब्रुवतः क्षत्तुः परित्यागोऽम्बिकासुतात् ॥ १४५ ॥ त्यक्तस्य पाण्डुपुत्राणां समीपगमनं तथा। पुनरागमनञ्चैव धृतराष्ट्रस्य शासनात् ॥ १४६ ॥ कर्णप्रोत्साहनाच्चैव धार्त्तराष्ट्रस्य दुर्मतेः। वनस्थान् पाण्डवान् हन्तुं मन्त्रो दुर्य्योधनस्य च ॥ १४७ ॥ तं दुष्टभावं विज्ञाय व्यासस्यागमनं द्रुतम्। निर्व्याणप्रतिषेधञ्च सुरख्याख्यानमेव च ॥ १४८ ॥ मैत्रेयागमनं चात्र राज्ञश्चैवानुशासनम्। शापोत्सर्गश्च तेनैव राज्ञो दुर्य्योधनस्य च ॥ १४९ ॥ किर्म्मीरस्य वधश्चात्र भीमसेनेन संयुगे। हृष्णीनामागमश्चात्र यादवानाञ्च सर्वशः ॥ १५० ॥ श्रुत्वा शकुनिना द्यूते निकृत्या निर्जितांश्च तान्। क्रुद्धस्यानुप्रशमनं हरेश्चैव किरीटिना ॥ १५१ ॥ परिदेवनञ्च पाञ्चाल्या वासुदेवस्य सन्निधौ। याज्ञसेन्याश्च कृष्णेन दुःखार्त्तायाः प्रकीर्त्तितम् ॥ १५२ । तथा सौभवधाख्यानमत्रैवोक्तं महर्षिणा। सुभद्रायाः सपुत्रायाः कृष्णेन द्वारकां पुरीम् ॥ १५३ ॥ नयनं द्रौपदेयानां धृष्टद्युम्नेन चैव हि। प्रवेशः पाण्डवेयानां रम्ये द्वैतवने ततः ॥ १५४ । धर्मराजस्य चात्रैव संवादः कृष्णया सह। संवादश्च तथा राज्ञा भीमस्यापि प्रकीर्त्तितः ॥ १५५ ॥ समीपं पाण्डुपुत्राणां व्यासस्यागमनं तथा। प्रतिस्मृत्याय विद्याया दानं राज्ञो महर्षिणा ॥ १५६ ॥ गमनं काम्यके चापि व्यासे प्रतिगते ततः। अस्त्रहेतोर्विवासश्च पार्थस्यामिततेजसः ॥ १५७ ॥ महादेवेन युद्धञ्च किरातवपुषा सह। दर्शनं लोकपालानामस्त्रप्राप्तिस्तथैव च ॥ १५८ ॥ महेन्द्रलोकगमनमस्त्रार्थे च किरीटिनः। यत्र चित्रा समुत्पन्ना

धृतराष्ट्रस्य भूयसी ॥ १५८ ॥ दर्शनं ह्रदस्य महर्षेर्भाविता-त्मनः । युधिष्ठिरस्य चार्त्तस्य व्यसनं परिदेवनम् ॥ १६० ॥ नलोपाख्यानमत्रैव धर्मिष्ठं करुणोदयम् । दमयन्त्याः स्थिति-र्यत्र नलस्य चरितं तथा ॥ १६१ ॥ तथाश्वहृदयप्राप्तिस्तस्मादेव महर्षितः । लोमशस्यागमस्तत्र स्वर्गात् पाण्डुसुतान् प्रति ॥ १६२ ॥ वनवासगतानाञ्च पाण्डवानां महात्मनाम् । स्वर्गे प्रवृत्तिराख्याता लोमशेनार्जुनस्य वै ॥ १६३ ॥ सन्देशादर्जुनस्यात्र तीर्था-भिगमनक्रिया । तीर्थानाञ्च फलप्राप्तिः पुण्यत्वञ्चापि कीर्त्तितम् ॥ १६४ ॥ पुलस्त्यतीर्थयात्रा च नारदेन महर्षिणा । तीर्थ-यात्रा च तत्रैव पाण्डवानां महात्मनाम् ॥ १६५ ॥ कर्णस्य परिमोक्षोऽत्र कुण्डलाभ्यां पुरन्दरात् । तथा यज्ञविभूतिश्च गय-स्यात्र प्रकीर्त्तिता ॥ १६६ ॥ आगस्त्यमपि चाख्यानं यत्र वाता-पिभक्षणम् । लोपामुद्राभिगमनमपत्यार्थस्तथेष्टितः ॥ १६७ ॥ ऋष्यशृङ्गस्य चरितं कौमारब्रह्मचारिणः । जामदग्न्यस्य रामस्य चरितं भूरितेजसः ॥ १६८ ॥ कार्त्तवीर्य्यबधो यत्र हैहयानाञ्च वर्ण्यते । प्रभासतीर्थे पाण्डूनां ऋषिभिश्च समागमः ॥ १६९ ॥ सौकन्यमपि चाख्यानं च्यवनो यत्र भार्गवः । अश्विनीयज्ञे नासत्यौ कृतवान् सोमपीतिनौ ॥ १७० ॥ ताभ्याञ्च यत्र स मुनिर्यौवनं प्रतिपादितः । मान्धातुश्चाप्युपाख्यानं राज्ञोऽत्रैव प्रकीर्त्तितम् ॥ १७१ ॥ जन्तूपाख्यानमत्रैव यत्र पुत्रेण सोमकः । पुत्रार्थमयजद्राजा लेभे पुत्रशतञ्च सः ॥ १७२ ॥ ततः श्ये-नकपोतीयमुपाख्यानमनुत्तमम् । इन्द्राग्नी यत्र धर्मञ्चाप्यजिज्ञा-सञ्छिविं नृपः ॥ १७३ ॥ अष्टावक्रीयमत्रैव विवादो यत्र वन्दिना । अष्टावक्रस्य विप्रर्षेर्जनकस्याध्वरेऽभवत् ॥ १७४ ॥ नैयायिकानां सुखेन वरुणस्यात्मजेन च । पराजितो यत्र वन्दी विवादेन महात्मना ॥ १७५ ॥ विजित्य सागरं प्राप्तं पितरं लब्धवा-

ऋषिः । यवक्रीतस्य चाख्यानं रैभ्यस्य च महात्मनः । गन्धमादनयात्रा च वासो नारायणाश्रमे ॥ १७६ ॥ नियुक्तो भीमसेनश्च द्रौपद्या गन्धमादने । व्रजन् पथि महाबाहुर्दृष्टवान् पवनात्मजम् ॥ १७७ ॥ कदलीषण्डमध्यस्थं हनूमन्तं महाबलम् । यत्र सौगन्धिकार्थेऽसौ नलिनीं तामधर्षयत् ॥ १७८ ॥ यत्रास्य युद्धमभवत् सुमहद्राक्षसैः सह । यक्षैश्चैव महावीर्यैर्मणिमत्प्रमुखैस्तदा ॥ १७९ ॥ जटासुरस्य च बधो राक्षसस्य दुरोदरात् । वृषपर्वणो राजर्षेस्ततोऽभिगमनं स्मृतम् ॥ १८० ॥ आर्ष्टिषेणाश्रमे चैषां गमनं वास एव च । प्रोत्साहनञ्च पाञ्चाल्या भीमस्यात्र महात्मनः ॥ १८१ ॥ कैलासारोहणं प्रोक्तं यत्र यक्षैर्बलोत्कटैः । युद्धमासीन्महाघोरं मणिमत्प्रमुखैः सह ॥ १८२ ॥ अवाप्य दिव्यान्यस्त्राणि गुर्वर्थं सव्यसाचिना । निवातकवचैर्युद्धं हिरण्यपुरवासिभिः ॥ १८३ ॥ निवातकवचैर्घोरैर्हीनवैः सुरशत्रुभिः । पौलोमैः कालकेयैश्च यत्र युद्धं किरीटिनः ॥ १८४ ॥ बधश्चैषां समाख्यातो राक्षसेनैव धीमता । अस्त्रसन्दर्शनारम्भो धर्मराजस्य सन्निधौ ॥ १८५ ॥ पार्थस्य प्रतिषेधश्च नारदेन सुरर्षिणा । पुनश्चैवावरोहणं पाण्डूनां गन्धमादनात् ॥ १८६ ॥ भीमस्य ग्रहणं चात्र पर्वताभोगवर्ष्मणा । भुजगेन्द्रेण बलिना तस्मिन् सुगहने वने ॥ १८७ ॥ अमोचयच्च चैनं प्रश्नानुक्त्वा युधिष्ठिरः । काम्यकागमनञ्चैव पुनस्तेषां महात्मनाम् ॥ १८८ ॥ तत्रस्थांश्च पुनर्द्रष्टुं पाण्डवान् पुरुषर्षभान् । वासुदेवस्यागमनमत्रैव परिकीर्त्तितम् ॥ १८९ ॥ मार्कण्डेयसमास्यायामुपाख्यानानि सर्वशः । दृष्यर्वैन्यस्य यत्रोक्तमाख्यानं परमर्षिणा ॥ १९० ॥ संवादश्च सरस्वत्यास्तार्क्ष्यर्षेः सुमहात्मनः । मत्स्योपाख्यानमत्रैव प्रोच्यते तदनन्तरम् ॥ १९१ ॥ मार्कण्डेयसमास्या च पुराणं परिकीर्त्यते । प्रेन्द्रद्युम्नसुपाख्यानं धौन्धुमारन्तथैव च ॥ १९२ ॥

पतिव्रतायाश्चाख्यानं तथैवाङ्गिरसं स्मृतम् । द्रौपद्याः कीर्त्तितश्चात्र संवादः सत्यभामया ॥ १९३ ॥ पुनर्द्वैतवनञ्चैव पाण्डवाः समुपागताः । घोषयात्रा च गन्धर्वैर्यत्र बद्धः सुयोधनः ॥ १९४ ॥ म्रियमाणस्तु मन्दात्मा मोचितोऽसौ किरीटिना । धर्मराजस्य चात्रैव मृगस्वप्ननिदर्शनम् ॥ १९५ ॥ काम्यके काननश्रेष्ठे पुनर्गमनमुच्यते । व्रीहिद्रौणिकमाख्यानमत्रैव बहुविस्तरम् ॥ १९६ ॥ दुर्वाससोऽप्युपाख्यानमत्रैव परिकीर्त्तितम् । जयद्रथेनापहारो द्रौपद्याश्चाश्रमान्तरात् ॥ १९७ ॥ यत्रैतमन्वयाद्भीमो वायुवेगसमो जवे । चक्रे चैनं पञ्चशिखं यत्र भीमो महाबलः ॥ १९८ ॥ रामायणमुपाख्यानमत्रैव बहुविस्तरम् । यत्र रामेण विक्रम्य निहतो रावणो युधि ॥ १९९ ॥ सावित्र्याश्चाप्युपाख्यानमत्रैव परिकीर्त्तितम् । कर्णस्य परिमोचोऽत्र कुण्डलाभ्यां पुरन्दरात् ॥ २०० ॥ यत्रास्त्र शक्तिं तुष्टोऽसावदादेकबधाय च । आरण्येयमुपाख्यानं यत्र धर्मोऽन्वशात् सुतम् ॥ २०१ ॥ जग्मुर्लब्धवरा यत्र पाण्डवाः पश्चिमां दिशम् । एतदारण्यकं पर्व तृतीयं परिकीर्त्तितम् ॥ २०२ ॥ अत्राध्यायशते द्वे तु संख्यया परिकीर्त्तिते । एकोनसप्ततिश्चैव तथाध्यायाः प्रकीर्त्तिताः ॥ २०३ ॥ एकादश सहस्राणि श्लोकानां षट्शतानि च । चतुःषष्टिस्तथा श्लोकाः पर्वण्यस्मिन् प्रकीर्त्तिताः ॥ २०४ ॥ अतः परं निबोधेदं वैराटं पर्व विस्तरम् । विराटनगरे गत्वा श्मशाने विपुलां शमीम् ॥ २०५ ॥ दृष्ट्वा सन्निदधुस्तत्र पाण्डवा ह्यायुधान्युत । यत्र प्रविश्य नगरं छद्मना न्यवसंस्तु ते ॥ २०६ ॥ पाञ्चालीं प्राथयानस्य कामोपहतचेतसः । दुष्टात्मनो बधो यत्र कीचकस्य दृकोदरात् ॥ २०७ ॥ पाण्डवान्वेषणार्थञ्च राज्ञो दुर्य्योधनस्य च । चराः प्रस्थापिता यत्र निपुणाः सर्वतो दिशम् ॥ २०८ ॥ न च प्रवृत्तिर्लब्धा पाण्डवानां महात्मनाम् । गोग्रहश्च विराटस्य त्रिगर्त्तैः प्रथमं

कृतः ॥ २०९ ॥ यत्रास्य युद्धं सुमहत्तैरासील्लोमहर्षणम् । क्षिय-माणश्च यत्रासौ भीमसेनेन मोचितः ॥ २१० ॥ गोधनञ्च विरा-टस्य मोचितं यत्र पाण्डवैः । अनन्तरञ्च कुरुभिस्तस्य गोग्रहणं कृतम् ॥ २११ ॥ यत्रसा यत्र पार्थेन निर्जिताः कुरवो युधि । प्रत्याहृतं गोधनञ्च विक्रमेण किरीटिना ॥ २१२ ॥ विराटेनोत्तरा दत्ता स्नुषा यत्र किरीटिनः । अभिमन्युं समुद्दिश्य सौभद्रमरि-घातिनम् ॥ २१३ ॥ चतुर्थमेतद्विपुलं वैराटं पर्व वर्णितम् । अत्रापि परिसंख्याता अध्यायाः परमर्षिणा ॥ २१४ ॥ सप्तषष्टि-रयो पूर्णा श्लोकानामपि मे शृणु । श्लोकानां द्वे सहस्रे तु श्लोकाः पञ्चाशदेव तु ॥ २१५ ॥ उक्तानि वेदविदुषा पर्वण्यस्मिन्महर्षिणा । उद्योगपर्व विज्ञेयं पञ्चमं शृण्वतः परम् ॥ २१६ ॥ उपप्लव्ये निविष्टेषु पाण्डवेषु जिगीषया । दुर्योधनोऽर्जुनश्चैव वासुदेव-मुपास्थितौ ॥ २१७ ॥ साहाय्यमस्मिन् समरे भवान्नो कर्तुमर्हति । इत्युक्ते वचने कृष्णो यत्नोवाच महामतिः ॥ २१८ ॥ अयुध्यमान-मात्मानं मन्त्रिणं पुरुषर्षभौ । अक्षौहिणीं वा सैन्यस्य कस्य किं वा ददाम्यहम् ॥ २१९ ॥ वव्रे दुर्योधनः सैन्यं मन्दात्मा यत्र दुर्मतिः । अयुध्यमानं सचिवं वव्रे कृष्णं धनञ्जयः ॥ २२० ॥ मद्रराजञ्च राजानमायान्तं पाण्डवान् प्रति । उपचारैर्वञ्चयित्वा वर्त्मन्येव सुयोधनः ॥ २२१ ॥ वरदं तं वरं वव्रे साहाय्यं क्रियतां मम । प्रत्यस्मै प्रतिश्रुत्य जगामोद्दिश्य पाण्डवान् ॥ २२२ ॥ शान्तिपूर्वं चाकथयद्यत्नेन्द्रविजयं नृपः । पुरोहितप्रेषणञ्च पाण्डवैः कौरवान् प्रति ॥ २२३ ॥ वैचित्रवीर्यस्य वचः समादाय पुरो-धसः । तथेन्द्रविजयञ्चापि यानञ्चैव पुरोधसः ॥ २२४ ॥ सञ्जयं प्रेषयामास शमार्थी पाण्डवान् प्रति । यत्र दूतं महाराजो धृत-राष्ट्रः प्रतापवान् ॥ २२५ ॥ श्रुत्वा च पाण्डवान्यत्र वासुदेवपुरो-गमान् । प्रजागरं संप्रजज्ञे धृतराष्ट्रस्य चिन्तया ॥ २२६ ॥

विदुरो यत्र वाक्यानि विचित्राणि हितानि च। आवयामास राजानं धृतराष्ट्रं मनीषिणम् ॥ २३७ ॥ तथा सनत्सुजातेन यत्राध्यात्ममनुत्तमम्। मनस्तापान्वितो राजा श्रावितः शोकलालसः ॥ २३८ ॥ प्रभाते राजसमितौ सञ्जयो यत्र वा विभोः। ऐकात्म्यं वासुदेवस्य प्रोक्तवानर्जुनस्य च ॥ २३९ ॥ यत्र कृष्णो दयापन्नः सन्धिमिच्छन्महामतिः। स्वयमागाच्छमं कर्तुं नगरं नागसाह्वयम् ॥ २४० ॥ प्रत्याख्यानञ्च कृष्णस्य राज्ञा दुर्योधनेन वै। शमार्थे याचमानस्य पञ्चयोरुभयोर्हितम् ॥ २४१ ॥ दम्भोद्भवस्य चाख्यानमत्रैव परिकीर्त्तितम्। वरान्वेषणमत्रैव मातलेश्च महात्मनः ॥ २४२ ॥ महर्षेश्चापि चरितं कथितं गालवस्य वै। विदुलायाश्च पुत्रस्य प्रोक्तं चाप्यनुशासनम् ॥ २४३ ॥ कर्ण दुर्योधनादीनां दुष्टं विज्ञाय मन्त्रितम्। योगेश्वरत्वं कृष्णेन यत्र राज्ञां प्रदर्शितम् ॥ २४४ ॥ रथमारोप्य कृष्णेन यत्र कर्णोऽनुमन्त्रितः। उपायपूर्वं शैटोर्य्यात् प्रत्याख्यातश्च तेन सः ॥ २४५ ॥ आगम्य हास्तिनपुरादुपप्लव्यमरिन्दमः। पाण्डवानां यथावृत्तं सर्वमाख्यातवान् हरिः ॥ २४६ ॥ ते तस्य वचनं श्रुत्वा मन्त्रयित्वा च यद्धितम्। सांग्रामिकं ततः सर्वं सज्जं चक्रुः परन्तपाः ॥ २४७ ॥ ततो युद्धाय निर्याता नराश्वरथदन्तिनः। नगराद्धास्तिनपुराद्बलसंख्यानमेव च ॥ २४८ ॥ यत्र राज्ञा च्युलूकस्य प्रेषणं पाण्डवान् प्रति। क्षोभाविनि महायुद्धे दौत्येन कृतवान् प्रभुः ॥ २४९ ॥ रथातिरथसंख्यानमम्बोपाख्यानमेव च। एतत् सुवृत्तान्तं पञ्चमं पर्व भारते ॥ २५० ॥ उद्योगपर्व निर्दिष्टं सन्धिविग्रहमिश्रितम्। अध्यायानां शतं प्रोक्तं षड्शीतिर्महर्षिणा ॥ २५१ ॥ श्लोकानां षट्सहस्राणि तावत्यैव शतानि च। श्लोकाश्च नवतिः प्रोक्तास्तथैवाष्टौ महात्मना ॥ २५२ ॥ व्यासेनोदारमतिना पर्वण्यस्मिंस्तपोधनाः। अतः परं विचि-

त्रार्थं भीष्मपर्व प्रचक्ष्यते ॥ २५३ ॥ जम्बूखण्डविनिर्माणं यत्रोक्तं सञ्जयेन ह। यत्र यौधिष्ठिरं सैन्यं विषादमगमत्परम् ॥ २५४॥ यत्र युद्धमभूद्घोरं दशाहानि सुदारुणम्। कश्मलं यत्र पार्थस्य वासुदेवो महामतिः ॥ २५५ ॥ मोहजं नाशयामास हेतुभिर्मोचदर्शिभिः। समीक्ष्याधोक्षजः क्षिप्रं युधिष्ठिरहिते रतः ॥२५६॥ रथादाप्लुत्य वेगेन स्वयं कृष्णः सदारधीः। प्रतोदपाणिराधावद्भीष्मं हन्तुं व्यपेतभीः ॥ २५७ ॥ वाक्यप्रतोदाभिहतो यत्र कृष्णेन पाण्डवः। गाण्डीवधन्वा समरे सर्वशस्त्रभृतांवरः ॥२५८॥ शिखण्डिनं पुरस्कृत्य यत्र पार्थो महाधनुः। विनिघ्नन्निशितैर्बाणैरथाक्षौघमपातयत् ॥ २५९ ॥ शरतल्पगतश्चैव भीष्मो यत्र बभूव ह। षष्ठमे तत्समाख्यातं भारते पर्व विस्तृतम् ॥ २५९ ॥ अध्यायानां शतं प्रोक्तं तथा सप्त दशापरे। पञ्चश्लोकसहस्राणि संख्ययाष्टौ शतानि च ॥ २६० ॥ श्लोकाश्च चतुरशीतिरस्मिन् पर्वणि कीर्त्तिताः। व्यासेन वेदविदुषा संख्याता भीष्मपर्वणि ॥ २६१ ॥ द्रोणपर्व ततश्चित्रं बहुवृत्तान्तमुच्यते। सैनापत्येऽभिषिक्तोऽथ यत्राचार्यः प्रतापवान् ॥ २६२ ॥ दुर्योधनस्य प्रीत्यर्थं प्रतिजज्ञे महाक्रतुवित्। ग्रहणं धर्मराजस्य पाण्डुपुत्रस्य धीमतः। यत्र संशप्तकाः पार्थमपनिन्यूरणाजिरात् ॥ २६३ ॥ भगदत्तो महाराजो यत्र शक्रसमो युधि। सुप्रतीकेन नागेन स हि शान्तः किरीटिना ॥ २६४ ॥ यत्राभिमन्युं बहवो जघ्नुरेकं महारथाः। जयद्रथमुखा बालं शूरमप्राप्तयौवनम् ॥ २६५ ॥ हतेऽभिमन्यौ क्रुद्धेन यत्र पार्थेन संयुगे। अक्षौहिणीः सप्त हत्वा हतो राजा जयद्रथः ॥ २६६ ॥ यत्र भीमो महाबाहुः सात्यकिश्च महारथः। अन्वेषणार्थं पार्थस्य युधिष्ठिरमुपाद्रवत्। प्रविष्टौ भारतीं सेनामप्रधृष्यां सुरैरपि ॥ २६७ ॥ संशप्तकावशेषञ्च कृतं निःशेषमाहवे। अलम्बुषः श्रुतायुश्च जलसन्धश्च वीर्यवान्

॥ २६८ ॥ सोमदत्तिर्विराटश्च द्रुपदश्च महारथः। घटोत्कचादयश्चान्ये निहता द्रोणपर्वणि ॥ २६९ ॥ अश्वत्थामापि चाल्पत्व द्रोणे युधि निपातिते। अस्त्रं प्रादुश्चकारोग्रं नारायणममर्षितः ॥ २७० ॥ आग्नेयं कीर्त्यते यत्र रुद्रमाहात्म्यमुत्तमम्। व्यासस्य चाप्यागमनं माहात्म्यं कृष्णपार्थयोः ॥ २७१ ॥ सप्तमं भारते पर्व महदेतदुदाहृतम्। यत्र ते पृथिवीपालाः प्रायशो निधनं गताः ॥ २७२ ॥ द्रोणपर्वणि ये शूरा निर्दिष्टाः पुरुषर्षभाः। यत्राध्यायशतं प्रोक्तं तथाध्यायाश्च सप्ततिः ॥ २७३ ॥ अष्टौ श्लोकसहस्राणि तथा नवशतानि च। श्लोका नव तथैवात्र संख्याता तत्त्वदर्शिना। पाराशर्येण सुनिना सङ्ख्याय द्रोणपर्वणि ॥२७४॥ अतः परं कर्णपर्व प्रोच्यते परमाद्भुतम्। सारथ्ये विनियोगश्च मद्रराजस्य धीमतः ॥ २७५ ॥ आख्यातं यत्र पौराणं त्रिपुरस्य निपातनम्। प्रयाणे परुषश्चात्र संवादः कर्णशल्ययोः। हंसकाकीयमाख्यानं तथैवात्रोपसंहितम् ॥ २७६ ॥ वधः पाण्ड्यस्य च तथा अश्वत्थाम्ना महात्मना। दण्डसेनस्य च ततो दण्डस्य च वधस्तथा ॥ २७७ ॥ द्वैरथे यत्र कर्णेन धर्मराजो युधिष्ठिरः। संशयं गमितो युद्धे मिषतां सर्वधन्विनाम् ॥ २७८ ॥ अन्योन्यं प्रति च क्रोधो युधिष्ठिरकिरीटिनोः। यत्रैवानुनयः प्रोक्तो माधवेनार्जुनस्य हि ॥ २७९ ॥ प्रतिज्ञापूर्वकञ्चापि वधो दुःशासनस्य च। भित्त्वा हृकोदरो रक्तं पीतवान्यत्र संयुगे ॥ २८० ॥ द्वैरथे यत्र पार्थेन हृतः कर्णो महारथः। अष्टमं पर्व निर्दिष्टमेतद्भारतचिन्तकैः ॥ २८१ ॥ एकोनसप्ततिः प्रोक्ता अध्यायाः कर्णपर्वणि। चत्वार्येव सहस्राणि नव श्लोकशतानि च ॥२८२॥ चतुःषष्टिस्तथा श्लोकाः पर्वण्यस्मिन् प्रकीर्त्तिताः। अतः परं विचित्रार्थं शल्यपर्व प्रकीर्त्तितम् ॥ २८३ ॥ हतप्रवीरे सैन्ये तु नेता सद्वेश्वरोऽभवत्। हतानि रथयूथानि कीर्त्यन्ते यत्र

भागशः ॥ २८४ ॥ विनाशः कुरुमुख्यानां शल्यपर्वणि कीर्त्यते। शल्यस्य निधनं चात्र धर्मराजान्महात्मनः ॥ २८५ ॥ शकुनेश्च वधोऽत्रैव सहदेवेन संयुगे। सैन्ये च हतभूयिष्ठे किञ्चिच्छिष्टे सुयोधनः ॥२८६॥ ह्रदं प्रविश्य यत्रासौ संस्तभ्यापो व्यवस्थितः। प्रवृत्तिस्तत्र चाख्याता यत्र भीमस्य लुब्धकैः ॥ २८७ ॥ क्षेपयुक्तैर्वचोभिश्च धर्मराजस्य धीमतः। ह्रदात् समुत्थितो यत्र धार्त्तराष्ट्रोऽत्यमर्षणः ॥ २८८ ॥ भीमेन गदया युद्धं यत्रासौ कृतवान् सह। समवाये च युद्धस्य रामस्यागमनं स्मृतम् ॥ २८९ ॥ सरस्वत्याश्च तीर्थानां पुण्यता परिकीर्त्तिता। गदायुद्धञ्च तुमुलमत्रैव परिकीर्त्तितम् ॥ २९० ॥ दुर्योधनस्य राज्ञोऽथ यत्र भीमेन संयुगे। ऊरू भग्नौ प्रसह्याजौ गदया भीमवेगया ॥२९१॥ नवमं पर्व निर्दिष्टमेतद्भृशमर्थवत्। एकोनषष्टिरध्यायाः पर्वण्यत्र प्रकीर्त्तिताः ॥२९२॥ संख्याता बब्रुवृत्तान्ताः श्लोकसंख्यात्र कथ्यते। त्रीणि श्लोकसहस्राणि द्वे शते विंशतिस्तथा ॥ २९३ ॥ मुनिना सत्यवतीसुतेन कौरवाणां यशोभृता। अतः परं प्रवक्ष्यामि सौप्तिकं पर्व दारुणम् ॥ २९४ ॥ भग्नोरुं यत्र राजानं दुर्योधनममर्षणम्। अपयातेषु पार्थेषु त्रयस्तेऽभ्याययुरथाः। कृतवर्मा कृपो द्रौणिः सायाह्ने रुधिरोक्षितम् । २९५ ॥ समेत्य ददृशुर्भूमौ पतितं रथमूर्द्धनि। प्रतिजज्ञे दृढक्रोधो द्रौणिर्यत्र महारथः ॥ २९६ ॥ अहत्वा सर्वपाञ्चालान् धृष्टद्युम्नपुरोगमान्। पाण्डवांश्च सहामात्यान्न विमोक्ष्यामि दंशनम् ॥ २९७ ॥ यत्रैवमुक्त्वा राजानमपक्रम्य त्रयो रथाः। सूर्य्यास्तमनवेलायामासेदुस्ते महद्वनम् ॥ २९८ ॥ न्यग्रोधस्यात्र महतो यत्राधस्ताद्व्यवस्थिताः। ततः काकान् बहून् रात्रौ दृष्ट्वोलूकेन हिंसितान् ॥२९९॥ द्रौणिः क्रोधसमाविष्टः पितुर्बधमनुस्मरन्। पाञ्चालानां प्रसुप्तानां बधं प्रति मनो दधे ॥ ३०० ॥ गत्वा च शिबिरद्वारि दुर्दृशं तत्र

राक्षसम् । घोररूपमपश्यत्स दिवमाहत्य धिष्ठितम् ॥ २०१ ॥
तेन व्याघातमस्त्राणां क्रियमाणमवेक्ष्य च । द्रौणिर्यत्र विरूपाक्षं
रुद्रमाराध्य सत्वरः ॥ २०२ ॥ प्रसुप्तान्निशि विश्वस्तान्धृष्टद्युम्न-
पुरोगमान् । पाञ्चालान् सपरीवारान्द्रौपदेयांश्च सर्वशः । कृत-
वर्मणा च सहितः कृपेण च विजघ्निवान् ॥ २०३ ॥ यत्रासुप्यन्त
ते पार्थाः पञ्च कृष्णबलाश्रयात् । सात्यकिश्च महेष्वासः शेषाश्च
निधनं गताः ॥ २०४ ॥ पाञ्चालानां प्रसुप्तानां यत्र द्रौणसुता-
द्वधः । धृष्टद्युम्नस्य सूतेन पाण्डवेषु निवेदितः ॥ २०५ ॥
द्रौपदी पुत्रशोकार्त्ता पितृभ्रातृवधार्दिता । कृतानशनसङ्कल्पा
यत्र भर्तॄनुपाविशत् ॥ २०६ ॥ द्रौपदीवचनाद्यत्र भीमो भीम-
पराक्रमः । प्रियं तस्याश्चिकीर्षन् वै गदामादाय वीर्यवान् ।
अन्वधावत् सुसंक्रुद्धो भारद्वाजगुरोः सुतम् ॥ २०७ ॥ भीम-
सेनभयाद्यत्र दैवेनाभिप्रचोदितः । अपाण्डवायेति रुषा द्रौणि-
रस्त्रमवाहृजत् ॥ २०८ ॥ नैवमित्यब्रवीत् कृष्णः शमयंस्तस्य तेजसः ।
यत्रास्त्रमस्त्रेण च तच्छमयामास फाल्गुनः ॥ २०९ ॥ द्रौणेश्च
द्रोहबुद्धित्वं वीक्ष्य पापात्मनस्तदा । द्रौणिद्वैपायनादीनां शापा-
श्चान्योन्यकारिताः ॥ २१० ॥ मणिं तथा समादाय द्रौणपुत्रा-
न्न्यहारयात् । पाण्डवाः प्रददुर्हृष्टा द्रौपद्यै जितकाशिनः ॥ २११ ॥
एतद्वै दशमं पर्व सौप्तिकं समुदाहृतम् । अष्टादशास्मिन्नध्यायाः
पर्वण्युक्ता महात्मना ॥ २१२ ॥ श्लोकानां कथितान्यत्र शतान्यष्टौ
प्रसंख्यया । श्लोकाश्च समतिः प्रोक्ता मुनिना ब्रह्मवादिना ॥ २१३ ॥
सौप्तिकैषीकसंबद्धे पर्वण्युत्तमतेजसा । अत ऊर्ध्वमिदं प्राहुः
स्त्रीपर्व करुणोदयम् ॥ २१४ ॥ पुत्रशोकाभिसन्तप्तः प्रज्ञाचक्षु-
र्नराधिपः । कृष्णोपनीतां यत्रासावायसीं प्रतिमां दृढाम् । भीम-
सेनद्रोहबुद्धिर्धृतराष्ट्रो बभञ्ज ह । २१५ ॥ तथा शोकाभितप्तस्य
धृतराष्ट्रस्य धीमतः । संसारगहनं बुद्ध्या हेतुभिर्मोक्षदर्शनैः ॥ २१६ ॥

विदुरेण च यत्रास्य राज्ञ आख्यानं कृतम्। धृतराष्ट्रस्य चात्रैव कौरवायोधनं तथा। सान्तःपुरस्य गमनं शोकार्त्तस्य प्रकीर्त्तितम् ॥ ३१७ ॥ विलापो वीरपत्नीनां यत्रातिकरुणः स्मृतः। क्रोधावेशः प्रमोहश्च गान्धारीधृतराष्ट्रयोः ॥ ३१८ ॥ यत्र तान् क्षत्रियाः शूरान् संग्रामेष्वनिवर्त्तिनः। पुत्रान् भ्रातॄन् पितॄंश्चैव ददृशुर्निहतान् रणे ॥ ३१९ ॥ पुत्रपौत्रवधार्त्तायास्तथात्रैव प्रकीर्त्तिता। गान्धार्य्याश्चापि कृष्णेन क्रोधोपशमनक्रिया ॥ ३२० ॥ यत्र राजा महाप्राज्ञः सर्वधर्मभृतांवरः। राज्ञां तानि शरीराणि दाहयामास शास्त्रतः ॥ ३२१ ॥ तोयकर्मणि चारब्धे राज्ञामुदकदानिके। गूढोत्पन्नस्य चाख्यानं कर्णस्य पृथयात्मनः ॥ ३२२ ॥ सुतस्यैतदिह प्रोक्तं व्यासेन परमर्षिणा। एतदेकादशं पर्व शोकवैक्लव्यकारकम् ॥ ३२३ ॥ प्रणीतं सज्जनमनोवैक्लव्याश्रुप्रवर्त्तकम्। सप्तविंशतिरध्यायाः पर्वण्यस्मिन् प्रकीर्त्तिताः ॥ ३२४ ॥ श्लोकसप्तशती चापि पञ्चसप्ततिसंयुता। संख्यया भारताख्यानमुक्तं व्यासेन धीमता ॥ ३२५ ॥ अतः परं शान्तिपर्व द्वादशमुच्यते नृप। यत्र निर्वेदमापन्नो धर्मराजो युधिष्ठिरः। घातयित्वा पितॄन् भ्रातॄन् पुत्रान् सम्बन्धिमातुलान् ॥ ३२६ ॥ शान्तिपर्वणि धर्माश्च व्याख्याताः शारतल्पिकाः। राजभिर्वेदितव्यास्ते सम्यग्ज्ञानबुभुत्सुभिः ॥ ३२७ ॥ आपद्धर्माश्च तत्रैव कालहेतुप्रदर्शिनः। यान्बुद्ध्वा पुरुषः सम्यक् सर्वज्ञत्वमवाप्नुयात् ॥ ३२८ ॥ मोक्षधर्माश्च कथिता विचित्रा बहुविस्तराः। द्वादशं पर्व निर्दिष्टमेतत् प्राज्ञजनप्रियम् ॥ ३२९ ॥ अत्र पर्वणि विज्ञेयमध्यायानां शतत्रयम्। त्रिंशच्चैव तथाध्याया नव चैव तपोधनाः ॥ ३३० ॥ चतुर्दशसहस्राणि तथा सप्तशतानि च। सप्तश्लोकास्तथैवात्र पञ्चविंशतिसंख्यया ॥ ३३१ ॥ अत ऊर्द्धं च विज्ञेयमनुशासनमुत्तमम्। यत्र प्रकृतिमापन्नः श्रुत्वा

धर्मविनिश्चयम् । भीष्माद्भागीरथीपुत्रात् कुरुराजो युधिष्ठिरः ॥३३७॥ व्यवहारोऽत्र कार्त्स्न्येन धर्मार्थीयः प्रकीर्त्तितः । विधानाश्च दानानां फलयोगाः प्रकीर्त्तिताः ॥ ३३३ ॥ तथा पात्रविशेषाश्च दानानाञ्च परो विधिः । आचारविधियोगश्च सत्यस्य च परा गतिः ॥ ३३४ ॥ महाभाग्यं गवाञ्चैव ब्राह्मणानां तथैव च । रहस्यञ्चैव धर्माणां देशकालोपसंहितम् ॥३३५॥ एतत् सुवर्णदृष्टान्तसुत्तमं चानुशासनम् । भीष्मस्यात्मैव सम्प्राप्तिः स्वर्गस्य परिकीर्त्तिता ॥ ३३६ ॥ एतत्त्रयोदशं पर्व धर्मनिश्चयकारकम् । अध्यायानां शतन्त्वत्र षट्चत्वारिंशदेव तु ॥ ३३७ ॥ श्लोकानान्तु सहस्राणि प्रोक्तान्यष्टौ प्रसंख्यया । ततोऽश्वमेधिकं नाम पर्व प्रोक्तं चतुर्दशम् ॥ ३३८ ॥ तत् सम्वर्त्तमरुत्तीयं यत्राख्यानमनुत्तमम् । सुवर्णकोषसम्प्राप्तिर्जन्म चोक्तं परीक्षितः । दग्धस्याक्षाग्निना पूर्वं कृष्णात् सञ्जीवनं पुनः ॥ ३३९ ॥ चर्य्यायां हयमुत्सृष्टं पाण्डवस्यानुगच्छतः । तत्र तत्र च युद्धानि राजपुत्रैरमर्षणैः ॥ ३४० ॥ चित्राङ्गदायाः पुत्रेण पुत्रिकायां धनञ्जयः । संग्रामे बभ्रुवाहेन संयुगं चाच दर्शितम् ॥ ३४१ ॥ अश्वमेधे महायज्ञे नकुलाख्यानमेव च । इत्याश्वमेधिकं पर्व प्रोक्तमेतन्महाद्भुतम् ॥३४२॥ अध्यायानां शतञ्चैव त्रयोऽध्यायाश्च कीर्त्तिताः । त्रीणि श्लोकसहस्राणि तावन्त्येव शतानि च । विंशतिश्च तथा श्लोकाः संख्याता स्तत्त्वदर्शिना ॥ ३४३ ॥ ततश्चाश्रमवासाख्यं पर्व यच्चदशं स्मृतम् । यत्र राज्यं सुतं दत्त्वा गान्धार्या सहितो नृपः । धृतराष्ट्रोऽश्रमपदं विदुरस्य जगाम ह ॥ ३४४ ॥ यं दृष्ट्वा प्रस्थितं साध्वी पृथाप्यनुययौ तदा । पुत्रराज्यं परित्यज्य गुरुशुश्रूषणे रता ॥ ३४५ ॥ यत्र राजा हतान् पुत्रान् पौत्रानन्यांश्च पार्थिवान् । लोकान्तरगतान् वीरानपश्यत् पुनरागतान् ॥ ३४६ ॥ ऋषेः प्रसादात् कृष्णस्य दृष्ट्वाश्चर्य्यमनुत्तमम् । त्यक्त्वा शोकं सदा-

रत्र सिद्धिं परमिकां गतः ॥ ३४७ ॥ यत्र धर्मं समाश्रित्य विदुरः सुगतिं गतः । सञ्जयश्च सहामात्यो विद्वान् गावल्गणिर्वशी ॥ ३४८ ॥ ददर्श नारदं यत्र धर्मराजो युधिष्ठिरः । नारदाश्चैव शुश्राव ऋषीनां कदनं महत् ॥ ३४९ ॥ एतदाश्रमवासाख्यं पर्वोक्तं सुमहाद्भुतम् । द्विचत्वारिंशदध्यायाः पर्वैतदभिसंख्यया ॥ ३५० ॥ सहस्रमेकं श्लोकानां पञ्चश्लोकशतानि च । षड़ेव च तथा श्लोकाः संख्यातास्तत्त्वदर्शिना ॥ ३५१ । अतः परं निबोधेदं मौषलं पर्व दारुणम् । यत्र ते पुरुषव्याघ्राः शस्त्रस्पर्शसहा युधि । ब्रह्मदण्डविनिष्पिष्टाः समीपे लवणाम्भसः ॥ ३५२ ॥ आपाने पानकलिता दैवेनाभिप्रचोदिताः । एरकारूपिभिर्वज्रैर्निजघ्नुरितरेतरम् ॥ ३५३ ॥ यत्र सर्वक्षयं कृत्वा तावुभौ रामकेशवौ । नातिचक्रमतुः कालं प्राप्तं सर्वहरं महत् ॥ ३५४ ॥ यत्रार्जुनो द्वारवतीमेत्य वृष्णिविनाकृताम् । दृष्ट्वा विषादमगमत् परां चार्त्तिं नरर्षभः ॥ ३५५ ॥ स संस्कृत्य नरश्रेष्ठं मातुलं शौरिमात्मनः । ददर्श यदुवीराणामापाने वैशसं महत् ॥ ३५६ ॥ शरीरं वासुदेवस्य रामस्य च महात्मनः । संस्कारं लभयामास वृष्णीनां च प्रधानतः ॥ ३५७ ॥ स वृद्धबालमादाय द्वारवत्यास्ततो जनम् । ददर्शापदि कष्टायां गाण्डीवस्य पराभवम् ॥ ३५८ ॥ सर्वेषाञ्चैव दिव्यानामस्त्राणामप्रसन्नताम् । नाशं वृष्णिकलत्राणां प्रभावाणामनित्यताम् ॥ ३५९ ॥ दृष्ट्वा निर्वेदमापन्नो व्यासवाक्यप्रचोदितः । धर्मराजं समासाद्य सन्न्यासं समरोचयत् ॥ ३६१ ॥ इत्येतन्मौषलं पर्व षोड़शं परिकीर्त्तितम् । अध्यायाष्टौ समाख्याताः श्लोकानाञ्च शतत्रयम् । श्लोकानां विंशतिश्चैव संख्याता तत्त्वदर्शिना ॥ ३६२ ॥ महाप्रास्थानिकं तस्मादूर्द्धं सप्तदशं स्मृतम् । यत्र राज्यं परित्यज्य पाण्डवाः पुरुषर्षभाः ॥ ३६३ ॥ द्रौपद्या सहिता देव्या महाप्रस्थानमास्थिताः । यत्र तेऽग्निं दद-

शिरे लौहित्यं प्राप्य सागरम् ॥ २६४ ॥ यत्राग्निना चोदितश्च पार्थस्तस्मै महात्मने । ददौ सम्पूज्य तद्दिव्यं गाण्डीवं धनुरुत्तमम् ॥ २६५ ॥ यत्र भ्रातृन्निपतितान्द्रौपदीं च युधिष्ठिरः । दृष्ट्वा हित्वा जगामैव सर्वाननवलोकयन् ॥ २६३ ॥ एतत् रहदृश्यं पर्व महाप्रास्थानिकं स्मृतम् । यत्राध्यायास्त्रयः प्रोक्ताः श्लोकानाञ्च शतत्रयम् । विंशतिश्च तथा श्लोकाः संख्याताऋषिदर्शिना ॥२६६॥ स्वर्गपर्व ततो ज्ञेयं दिव्यं यत्तदमानुषम् । प्राप्तं दैवरथं स्वर्गान्नेष्टवान् यत्र धर्मराट् । आरोढुं सुमहाप्राज्ञ आदृश्यांस्याच्छुना विना ॥२६७॥ तामस्याविचलां ज्ञात्वा स्थितिं धर्मे महात्मनः । स्वरूपं यत्र तत्त्यक्त्वा धर्मेणात्मा समन्वितः ॥ २६८ ॥ स्वर्गं प्राप्तः स च तथा यातनां विपुलां यशम् । देवदूतेन नरकं यत्र व्याजेन दर्शितम् ॥ २६९ ॥ शुश्राव यत्र धर्मात्मा भ्रातृणां करुणा गिरः । निर्देशे वर्त्तमानानां देशे तत्रैव वर्त्तताम् ॥२७०॥ अनुदर्शितश्च धर्मेण देवराज्ञा च पाण्डवः । श्रुत्वाकाशगङ्गायां देहं त्यक्त्वा स मानुषम् ॥ २७१ ॥ स्वधर्मनिर्जितं स्थानं स्वर्गं प्राप्य स धर्मराट् । मुमुदे पूजितः सर्वैः सेन्द्रैः सुरगणैः सह ॥ २७२ ॥ एतदष्टादशं पर्व प्रोक्तं व्यासेन धीमता । अध्यायाः पञ्च संख्याताः पर्वण्यस्मिन्महात्मना ॥ २७३ ॥ श्लोकानां हे शते चैव प्रसंख्याते तपोधनाः । नव श्लोकास्तथैवान्ये संख्याताः परमर्षिणा ॥ २७४ ॥ अष्टादशैवमुक्तानि पर्वाण्येतान्यशेषतः । खिलेषु हरिवंशश्च भविष्यच्च प्रकीर्त्तितम् ॥ २७५ ॥ दशश्लोकसहस्राणि विंशत् श्लोकशतानि च । खिलेषु हरिवंशे च संख्यातानि महर्षिणा ॥ २७६ ॥ एतत्पर्व समाख्यातं भारते पर्वसंग्रहः । अष्टादश समाजग्मुरक्षौहिण्यो युयुत्सया । तन्महादारुणं युद्धमहान्यष्टादशाभवत् ॥ २७७ ॥ यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः । न चाख्यानमिदं विद्यादैव स

ख्यादिचक्षणः ॥ ३७८ ॥ अर्थशास्त्रमिदं प्रोक्तं धर्मशास्त्रमिदं महत् । कामशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना ॥ ३७९ ॥ श्रुत्वा त्विदमुपाख्यानं अश्रद्दधन्न रोचते । पुंस्कोकिलगिरं श्रुत्वा रुचा ध्वाङ्क्षस्य वागिव ॥ ३८० ॥ इतिहासोत्तमादस्मा-ज्जायन्ते कविबुद्धयः । पक्षभ्य इव भूतेभ्यो लोकसम्विषयबुद्धयः ॥ ३८१ ॥ अस्याख्यानस्य विषये पुराणं वर्त्तते द्विजाः । अन्त-रीक्षस्य विषये प्रजा इव चतुर्विधाः ॥ ३८२ ॥ क्रियागुणानां सर्वेषामिदमाख्यानमाश्रयः । इन्द्रियाणां समस्तानां चित्ता इव मनःक्रिया ॥ ३८३ ॥ अनाश्रित्यैतदाख्यानं कथा भुवि न विद्यते । आहारमनपाश्रित्य शरीरस्येव धारणम् ॥३८४॥ इदं कविवरैः सर्वैराख्यानमुपजीव्यते । उदयप्रेप्सुभिर्भृत्यैरभिजातैरिवेश्वरः ॥ ३८५ ॥ अस्य काव्यस्य कवयो न समर्था विशेषणे । साधोरिव गृहस्थस्य शेषाश्रमाः ॥३८६॥ धर्मे मतिर्भवतु वः सततो-त्थितानां स लोक एव परलोकगतस्य बन्धुः । अर्थाश्रियश्च निपुणै-रपि सेव्यमाना नैवाप्नुवन्ति न च स्थिरत्वम् ॥ ३८७ ॥ द्वैपायनोष्ठपुटनिःसृतमप्रमेयं पुण्यं पवित्रमघ पापहरं शिवञ्च । यो भारतं समधिगच्छति वाच्यमानं किं तस्य पुष्करजलैरभि-षेचनेन ॥ ३८८ ॥ यद्ब्रह्मा कुरुते पापं ब्राह्मणस्त्विन्द्रियैश्चरन् । महाभारतमाख्याय सन्ध्यां मुञ्चति पश्चिमाम् ॥ ३८९ ॥ यद्रात्रौ कुरुते पापं कर्मणा मनसा गिरा । महाभारतमाख्याय पूर्वां सन्ध्यां प्रमुञ्चते ॥३९०॥ यो गोशतं कनकशृङ्गमयं ददाति विप्राय वेदविदुषे च बहुश्रुताय । पुण्याञ्च भारतकथां शृणुयान्न नित्यं तुल्यं फलं भवति तस्य च तस्य चैव ॥ ३९१ ॥ आख्यानं तदिद-मनुत्तमं महार्थं विज्ञेयं महदिह पर्वसंग्रहेण । श्रुत्वादौ भवति नृणां सुखावगाहं विस्तीर्णं लवणजलं यथा प्लवेन ॥ ३९२ ॥

इतिश्रीमहाभारते आदिपर्वणि पर्वसंग्रहः समाप्तः ॥ २ ॥

अथ पौष्यपर्व ॥ १ ॥

सौतिरुवाच । जनमेजयः पारिक्षितः सह भ्रातृभिः कुरुक्षेत्रे दीर्घसत्रमुपास्ते ॥ १ ॥ तस्य भ्रातरश्चत्वारः श्रुतसेन उग्रसेनो भीमसेन इति । तेषु तत्सत्रमुपासीनेष्वागच्छत् सारमेयः ॥ २ ॥ स जनमेजयस्य भ्रातृभिरभिहतो रोरूयमाणो मातुः समीपमुपागच्छत् ॥ ३ ॥ तं माता रोरूयमाणमुवाच किं रोदिषि केनास्यभिहत इति ॥ ४ ॥ स एवमुक्तो मातरं प्रत्युवाच जनमेजयस्य भ्रातृभिरभिहतोऽस्मीति ॥ ५ ॥ तं माता प्रत्युवाच व्यक्तं त्वया तत्रापराद्धं येनास्यभिहत इति ॥ ६ ॥ स तां पुनरुवाच नापराध्यामि किञ्चिन्नावेक्षे हवींषि नावलिह इति ॥ ७ ॥ तच्छ्रुत्वा तस्य माता सरमा पुत्रदुःखार्त्ता तत् सत्रमुपागच्छद्यत्र स जनमेजयः सह भ्रातृभिर्दीर्घं सत्रमुपास्ते ॥ ८ ॥ स तया क्रुद्धया तत्रोक्तोऽयं मे पुत्रो न किञ्चिदपराध्यति नावेक्षते हवींषि नावलेढि किमर्थमभिहत इति ॥ ९ ॥ न किञ्चिदुक्तवन्तस्ते सा तानुवाच यस्मादयमभिहतोऽनपकारी तस्मादहष्टन्वां भयमागमिष्यतीति ॥ १० ॥ जनमेजय एवमुक्तो देवशुन्या सरमया भृशं संभ्रान्तो विषण्णश्चासीत् ॥ ११ ॥ स तस्मिन् सत्रे समाप्ते हास्तिनपुरं प्रत्येत्य पुरोहितमनुरूपमन्विच्छमानः परं यत्नमकरोत् यो मे पापकृत्यां शमयेदिति ॥ १२ ॥ स कदाचिन्मृगयां गतः पारीक्षितो जनमेजयः कस्मिंश्चित् स्वविषये आश्रममपश्यत् ॥ १३ ॥ तत्र कश्चिदृषिरासाञ्चक्रे श्रुतश्रवा नाम तस्य तपस्यभिरतः पुत्र आस्ते सोमश्रवा नाम ॥ १४ ॥ तस्य तं पुत्रमभिगम्य जनमेजयः पारीक्षितः पौरोहित्याय वव्रे ॥ १५ ॥ स नमस्कृत्य तमृषिमुवाच भगवन्नयं तव पुत्रो मम पुरोहितोऽस्त्विति ॥ १६ ॥ स एवमुक्तः प्रत्युवाच जनमेजयं भो जनमेजय पुत्रोऽयं मम सर्व्याज्ञातो महातपस्वी स्वाध्यायसम्पन्नो मत्तपो-

वीर्य्यसम्भृतो मच्छ्रुतीतवत्याश्चास्याः कुक्षौ जातः ॥१७॥ समर्थो-ऽयं भवतः सर्वाः पापकृत्याः शमयितुमन्तरेण महादेवकृत्याम् ॥ १८ ॥ अस्य लोकमुपांशुव्रतं यदेनं कश्चिद्ब्राह्मणः कश्चिदर्थ-मभियाचेत्तं तस्मै दद्यादयं यद्येतदुत्सहसे ततो नयस्वैनमिति ॥ १९ ॥ तैवमुक्तो जनमेजयस्तं प्रत्युवाच भगवंस्तत्तथा भविष्यतीति ॥ २० ॥ स तं पुरोहितमुपादायोपावृत्तो भ्रातृ-नुवाच मयायं हृत उपाध्यायो यदयं ब्रूयात्तत् कार्य्यमविचा-रयद्भिर्भवद्भिरिति ॥ २१ ॥ तैवमुक्ता भ्रातरस्तस्य तथा चक्रुः । स तथा भ्रातॄन् सन्दिश्य तक्षशिलाम् प्रत्यभिप्रतस्थे तञ्च देशं वशे स्थापयामास ॥ २२ ॥ एतस्मिन्नन्तरे कश्चिदृषिर्धौम्यो-नामायोदस्तस्य शिष्यास्त्रयो बभूवुः उपमन्युरारुणिर्वेदश्चेति ॥२३॥ स एकं शिष्यमारुणिं पाञ्चाल्यं प्रेषयामास गच्छ केदारखण्डं बधानेति ॥ २४ ॥ स उपाध्यायेन संदिष्ट आरुणिः पाञ्चाल्यस्तत्र गत्वा तत् केदारखण्डं बद्धुं नाशकत् ॥ २५ ॥ स क्लिश्यमानो-ऽमन्यदुपायं भवत्वेवं करिष्यामीति ॥ २६ ॥ स तत्र संविवेश केदारखण्डे शयाने च तथा तस्मिंस्तदुदकं तस्थौ ॥ २७ ॥ ततः कदाचिदुपाध्याय आयोदौ धौम्यः शिष्यानपृच्छत् क्व आरुणिः पाञ्चाल्यो गत इति ॥ २८ ॥ ते तं प्रत्यूचुर्भगवंस्त्वयैव प्रेषितो गच्छ केदारखण्डं बधानेति । स एवमुक्तस्तान् शिष्यान् प्रत्यु-वाच तस्मात्तत्र सर्वे गच्छामो यत्र स गत इति ॥ २९ ॥ स तत्र गत्वा तस्याह्वनाय शब्दञ्चकार भो आरुणे पाञ्चाल्य क्वासि वत्सैहीति ॥ ३० ॥ स तच्छ्रुत्वारुणिरुपाध्यायवाक्यं तस्मात् केदारखण्डात् सहसोत्थाय तमुपाध्यायमुपतस्थे ॥ ३१ ॥ प्रोवाच चैनमयमस्मात्र केदारखण्डे निःसरमाणमुदकमवारणीयं संरोद्धुं संविष्टो भगवच्छब्दं श्रुत्वैव सहसा विदार्य्य केदारखण्डं भव-न्तमुपस्थितः ॥ ३२ ॥ तदभिवादये भगवन्तमाज्ञापयतु भवान्

कामर्थं करवाणीति ॥ ३३ ॥ स एवमुक्त उपाध्यायः प्रत्युवाच यस्माच्छ्वान् केदारखण्डं विदार्योत्थितस्तस्मादुद्दालक एव नाम्ना भवान् भविष्यतीत्युपाध्यायेनानुगृहीतः ॥ ३४ ॥ यस्माच्च त्वया मद्वचनमनुष्ठितं तस्माच्छ्रेयोऽवाप्स्यसि । सर्वे एव ते वेदाः प्रतिभास्यन्ति सर्वाणि च धर्मशास्त्राणीति ॥ ३५ ॥ स एवमुक्त उपाध्यायेनेष्टं देशं जगाम । अथापरः शिष्यस्तस्यैवायोदधौम्यस्योपमन्युर्नाम ॥ ३६ ॥ तं चोपाध्यायः प्रेषयामास वत्सोपमन्यो गा रक्षस्वेति ॥ ३७ ॥ स उपाध्यायवचनादरक्षद्गाः स चाहनि गा रक्षित्वा दिवसक्षये गुरुगृहमागम्योपाध्यायस्याग्रतः स्थित्वा नमश्चक्रे ॥ ३८ ॥ तमुपाध्यायः पीवानमपश्यदुवाच चैनं वत्सोपमन्यो केन वृत्तिं कल्पयसि पीवानसि दृढमिति ॥ ३९ ॥ स उपाध्यायं प्रत्युवाच भो भैक्ष्येण वृत्तिं कल्पयामीति ॥ ४० ॥ तमुपाध्यायः प्रत्युवाच मय्यनिवेद्य भैक्ष्यं नोपयोक्तव्यमिति । स तथेत्युक्तो भैक्ष्यं चरित्वोपाध्यायाय न्यवेदयत् ॥ ४१ ॥ स तस्मादुपाध्यायः सर्वमेव भैक्ष्यमगृह्णात् । स तथेत्युक्तः पुनररक्षद्गाः अहनि रक्षित्वा निशामुखे गुरुकुलमागम्य गुरोरग्रतः स्थित्वा नमश्चक्रे ॥ ४२ ॥ तमुपाध्यायस्तथापि पीवानमेव दृष्ट्वोवाच वत्सोपमन्यो सर्वमशेषतस्ते भैक्ष्यं गृह्णामि केनेदानीं वृत्तिं कल्पयसीति ॥ ४३ ॥ स एवमुक्त उपाध्यायं प्रत्युवाच भगवते निवेद्य पूर्वमपरं चरामि तेन वृत्तिं कल्पयामीति ॥ ४४ ॥ तमुपाध्यायः प्रत्युवाच नैषा न्याय्या गुरुवृत्तिरन्येषामपि भैक्ष्योपजीविनां वृत्त्युपरोधं करोषि वृत्त्येवं वर्त्तमानो लुब्धोऽसीति ॥ ४५ ॥ स तथेत्युक्त्वा गा अरक्षत् रक्षित्वा च पुनरुपाध्यायगृहमागम्योपाध्यायस्याग्रतः स्थित्वा नमश्चक्रे ॥ ४६ ॥ तमुपाध्यायस्तथापि पीवानमेव दृष्ट्वा पुनरुवाच वत्सोपमन्यो अहं ते सर्वं भैक्ष्यं गृह्णामि न चान्यद्वरसि पीवानसि भृशं केन वृत्तिं कल्पय-

सीति ॥ ४७ ॥ स एवमुक्तस्तमुपाध्यायं प्रत्युवाच भो एतासां गवां पयसा वृत्तिं कल्पयामीति तमुवाचोपाध्यायो नैतच्चाय्यं पय उपयोक्तुं भवतो मया नाभ्यनुज्ञातमिति ॥ ४८ ॥ स तथेति प्रतिज्ञाय गा रक्षित्वा पुनरुपाध्यायस्याश्रममेत्य गुरोरग्रतः स्थित्वा नमश्चक्रे ॥ ४९ ॥ तमुपाध्यायः पीवानमेव दृष्ट्वोवाच वत्सोपमन्यो भैक्ष्यं नाश्नासि नवान्यच्चरसि पयो न पिबसि पीवानसि भृशं केनेदानीं वृत्तिं कल्पयसीति ॥ ५० ॥ स एवमुक्त उपाध्यायं प्रत्युवाच भोः फेनं पिबामि यमिमे वत्सा मातृणां स्तनान् पिबन्त उद्गिरन्ति ॥ ५१ ॥ तमुपाध्यायः प्रत्युवाच एते तदनुकम्पया गुणवन्तो वत्साः प्रभूततरं फेनमुद्गिरन्ति तदेषामपि वत्सानां वृत्त्युपरोधं करोष्येवं वर्त्तमानः फेनमपि भवान्न पातुमर्हतीति स तथेति प्रतिश्रुत्य पुनररक्षद्गाः ॥ ५२ ॥ तया प्रतिषिद्धो भैक्ष्यं नाश्नाति न चान्यच्चरति पयो न पिबति फेनं नोपयुङ्क्ते स कदाचिदरण्ये क्षुधार्त्तोऽर्कपत्राण्यभक्षयत् ॥ ५३ ॥ स तैरर्कपत्रैर्भक्षितैः क्षारतिक्तकटुरूक्षोष्णविपाकैश्चक्षुष्युपहतोऽन्धो बभूव ततः सोऽन्धोऽपि चंक्रम्यमाणः कूपे पपात ॥ ५४ ॥ अथ तस्मिन्ननागच्छति सूर्य्ये चास्ताचलावलम्बिनि उपाध्यायः शिष्यानवोचत् नायात्युपमन्युः त ऊचुर्वनं गतो गा रक्षितुमिति ॥ ५५ ॥ तानाह उपाध्यायः मयोपमन्युः सर्वतः प्रतिषिद्धः स नियतं कुपितस्ततो नागच्छति चिरं ततोऽन्वेष्य इत्येवमुक्त्वा शिष्यैः सार्द्धमरण्यं गत्वा तस्याह्वानाय शब्दं चकार भो उपमन्यो क्वासि वत्सैहीति ॥ ५६ ॥ स उपाध्यायवचनं श्रुत्वा प्रत्युवाचोच्चैरयमस्मिन् कूपे पतितोऽस्मिति तमुपाध्यायः प्रत्युवाच कथं त्वमस्मिन् कूपे पतितः इति ॥ ५७ ॥ स उपाध्यायं प्रत्युवाच अर्कपत्राणि भक्षयित्वान्धीभूतोऽस्मात् कूपे पतित इति ॥ ५८ ॥ तमुपाध्यायः प्रत्युवाच अश्विनौ स्तुहि तौ देवभिषजौ त्वां

चक्षुश्चन्तं कर्णावितिं स एवमुक्त ऊषाध्वायेनोममन्थुरश्विनौ स्तोतुमुपचक्रमे देवावश्विनौ वाग्भिर्ऋग्भिः ॥ ५८ ॥ प्रपूर्वगौ पूर्वजौ चित्रभानू गिरा वाग्वंसाभि तपसा ह्यनन्तौ। दिव्यौ सुपर्णौ विरजौ विमानावधिक्षिपन्तौ भुवनानि विश्वा ॥ ६० ॥ हिरण्मयौ शकुनी साम्परायौ नासत्यदस्रौ सुनसौ वैजयन्तौ। शुक्लं वयन्तौ तरसा सुवेमावधिष्ण्यन्तावसितं विवस्वतः ॥ ६१ ॥ ग्रस्तां सुपर्णस्य बलेन वर्त्तिकाममुञ्चतामश्विनौ सौभगाय। तावत् सुवृत्तावनमन्त मायया वसत्तमा गा अरुणा उदाऽवहम् ॥ ६२ ॥ षष्टिश्च गावश्चियताश्च धेनव एकं वत्सं सुवते तं दुहन्ति। नानागोष्ठा विहिता एकदोहनास्तावश्विनौ दुहतो धर्ममुक्थ्यम् ॥ ६३ ॥ एकां नाभिं सप्तशता अराः श्रिता प्रधिष्वन्या विंशतिरर्पिता अराः। अनेमिचक्रं परिवर्त्ततेऽजरं मायाश्विनौ समनक्ति चर्षणी ॥ ६४ ॥ एकं चक्रं वर्त्तते द्वादशारं षण्नाभिमेकाक्षमृतस्य धारणम्। यस्मिन्देवा अधिविश्वे विषक्तास्तावश्विनौ मुञ्चतो मा विषीदतम् ॥ ६५ ॥ अश्विनाविन्दुमच्छतं द्युत्तभ्रूयौ तिरोधत्ता-मश्विनौ दासपत्नी। क्षित्वा गिरिमश्विनौ गामुदा चरन्तौ तदृष्टिमक्षा प्रक्षितौ बलस्य ॥ ६६ ॥ युवां दिशो जनयथो दशाग्रे समानं मूर्द्धि रथ्यातं वियन्ति। तासां यातमृषयोऽनुप्रयान्ति देवा मनुष्याः क्षितिमाचरन्ति ॥ ६७ ॥ युवां वर्णान्त्रिकुरुथो विश्वरूपांस्तेऽधिक्षिपन्ते भुवनानि विश्वा। ते मानवोऽप्यनुहतावरन्ति देवा मनुष्याः क्षितिमाचरन्ति ॥ ६८ ॥ तौ नासत्यावश्विनौ वां मधेऽहं स्रजं च यां बिभृथः पुष्करस्य। तौ नासत्यावृतावृधावृते देवासत् प्रपदे न स्पृते ॥ ६९ ॥ सुखेन गर्भं लभेतां युवानौ गतासुरेतत् प्रपदे न स्पृते। सद्यो जातो मातरमत्ति गर्भस्तावश्विनौ मुञ्चथो जीवसे गाः ॥ ७० ॥ इत्येवं तेनाभिष्टूतावश्विनावाजग्मतुराहतुश्चैनं प्रीतौ स्व एष ते-

ऽपूपोऽद्यानेनमिति ॥ ७१ ॥ स एवमुक्तः प्रत्युवाच नानृतपूर्वमूचतुर्भगवन्तौ । न त्वहमेतमपूपमुपयोक्तुमुत्सहे गुरवेऽनिवेद्येति ॥ ७२ ॥ ततस्तमश्विनावूचतुः आवाभ्यां पुरस्ताद्भवत उपाध्यायेनैवमेवाभिष्टुताभ्यामपूपो दत्त उपयुक्तः स तेनानिवेद्य गुरवे त्वमपि अथैव कुरुष्व यथाऽऽत्थ उपाध्यायेनेति ॥ ७३ ॥ स एवमुक्तः प्रत्युवाच एतत् प्रत्यनुनये भवन्तावश्विनौ नोत्सहेऽहमनिवेद्य गुरवेऽपूपमेनमुपयोक्तुमिति ॥ ७४ ॥ तमश्विनावाहतुः प्रीतौ स्वस्तवानया गुरुभक्त्या उपाध्यायस्य ते काञ्चनायसा दन्ता भवतोऽपि हिरण्मया भविष्यन्ति चक्षुष्मांश्च भविष्यसि श्रेयश्चावाप्स्यसीति ॥ ७५ ॥ स एवमुक्तोऽश्विभ्यां लब्धचक्षुरुपाध्यायसकाशमागम्योपाध्यायमभ्यवादयत् आचचक्षे च स चास्य प्रीतिमान्बभूव आह चैनं यथाश्विनावाहतुस्तथा त्वं श्रेयोऽवाप्स्यसीति ॥ ७६ ॥ सर्वे च ते वेदाः प्रतिभास्यन्ति सर्वाणि च धर्मशास्त्राणीति एषा तस्यापि परीक्षोपमन्योः ॥ ७७ ॥ अथापरः शिष्यस्तस्यैवायोदधौम्यस्य वेदो नाम तमुपाध्यायः समादिदेश वत्स वेद इहास्यतां तावन्मम गृहे कञ्चित्कालं शुश्रूषुणा च भवितव्यं श्रेयस्ते भविष्यतीति ॥ ७८ ॥ स तथेत्युक्त्वा गुरुकुले दीर्घकालं गुरुशुश्रूषापरोऽवसत् गौरिव नित्यं गुरुणा धूर्षु नियोज्यमानः शीतोष्णक्षुत्तृष्णादुःखसहः सर्वत्राप्रतिकूलस्तस्य महता कालेन गुरुः परितोषं जगाम ॥ ७९ ॥ तत्परितोषाच्च श्रेयः सर्वज्ञतां चावाप एष तस्यापि परीक्षा वेदस्य ॥ ८० ॥ स उपाध्यायेनानुज्ञातः समावृत्तस्तस्माद्गुरुकुलवासाद्गृहाश्रमं प्रत्यपद्यत ॥ ८१ ॥ तस्यापि स्वगृहे वसतस्त्रयः शिष्या बभूवुः स शिष्यान्न किञ्चिदुवाच कर्म वा क्रियतां गुरुशुश्रूषा वेति ॥ ८२ ॥ दुःखाभिज्ञो हि गुरुकुलवासस्य शिष्यान् परिक्लेशेन योजयितुं नेयेष ॥ ८३ ॥ अथ कस्मिंश्चित्काले वेदं ब्राह्मणं जनमेजयः पौष्यश्च क्षतियावुपेत्य

वरयित्वोपाध्यायं चक्रतुः ॥ ८४ ॥ स कदाचिद्याज्यकार्य्येणा-
भिप्रस्थित उतङ्कनामानं शिष्यं नियोजयामास ॥ ८५ ॥ भो
यत्किञ्चिदस्मद्गृहे परिहीयते तदिच्छाम्यहमपरिहीयमानं भवता
क्रियमाणमिति स एवं प्रतिसन्दिश्योतङ्कं वेदः प्रवासं जगाम
॥ ८६ ॥ अथोतङ्कः शुश्रूषुर्गुरुनियोगमनुतिष्ठमानो गुरुकुले
वसतिस्म । स तत्र वसमान उपाध्यायस्त्रीभिः सहिताभिराज्ञप्तः
॥ ८७ ॥ उपाध्यायानी ते ऋतुमती उपाध्यायश्च प्रोषितोऽस्मा
यथायमृतुर्वन्ध्यो न भवति तथा क्रियतामेषा विषीदतीति ॥ ८८ ॥
एवमुक्तास्ताः स्त्रियः प्रत्युवाच न तया स्त्रीणां वचनादिदमकार्य्यं
कारणीयं न ह्यहमुपाध्यायेन सन्दिष्टोऽकार्य्यमपि तया कार्य्य-
मिति ॥ ८९ ॥ तस्य पुनरुपाध्यायः कालान्तरेण गृहमाज-
गाम तस्मात् प्रवासात् स तु तद्वृत्तं तस्याग्रेऽसुपलभ्य प्रीतिमान-
भूत् ॥ ९० ॥ उवाच चैनं वत्सोतङ्क किन्ते प्रियं करवाणीति
धर्मतो हि शुश्रूषितोऽस्मि भवता तेन प्रीतिः परस्परेण नौ
सम्वृद्धा तदनुजाने भवन्तं सर्वानेव कामानवाप्नुहि गम्यतामिति
॥ ९१ ॥ स एवमुक्तः प्रत्युवाच किन्ते प्रियं करवाणीति एव-
माहः ॥ ९२ ॥ यद्यधर्मेण वै ब्रूयाद्यचाधर्मेण पृच्छति तयो-
रन्यतरः प्रैति विद्वेषं चाधिगच्छति ॥ ९३ ॥ सोऽहमनुज्ञातो
भवता इच्छानीष्टं गुर्वर्थमुपहर्त्तुमिति तेनैवमुक्त उपाध्यायः
प्रत्युवाच वत्सोतङ्क उच्यतां तावदिति ॥ ९४ ॥ स कदाचि-
दुपाध्यायमाहोतङ्कः आज्ञापयतु भवान् किं ते प्रियमुपहरामि
गुर्वर्थमिति ॥ ९५ ॥ तमुपाध्यायः प्रत्युवाच वत्सोतङ्क बहुशो
माम्बोदयसि गुर्वर्थमुपहरामीति तद्गच्छैनां प्रविश्योपाध्यायानीं
पृच्छ किमुपहरामीति एषा यद्व्रवीति तदुपहरस्वेति स एव-
मुक्तो उपाध्यायेनोपाध्यायानीमपृच्छत् भगवत्युपाध्यायेनास्म्यनु-
ज्ञातो गृहं गन्तुमिच्छामीष्टं ते गुर्वर्थमुपहृत्यानृणो गन्तुमिति

॥ ९६ ॥ तदाज्ञापयतु भवती किमुपहरामि गुर्वर्थमिति सैव-मुक्तोपाध्यायानी तमुतङ्कं प्रत्युवाच गच्छ पौष्यं प्रति राजानं कुण्डले भिक्षितुं तस्य क्षत्रियया पिनद्धे ॥ ९७ ॥ ते आनयस्व चतुर्थेऽहनि पुण्यकं भविता ताभ्यामावद्धाभ्यां शोभमाना ब्राह्म-णान् परिवेष्टुमिच्छामि तत्प्रयच्छ एवं हि कुर्वतः श्रेयो भवि-तान्यथा कुतः श्रेय इति ॥ ९८ ॥ स एवमुक्तस्तया प्रातिष्ठतो-तङ्कः स पथि गच्छन्नपश्यद्वृषभमतिप्रमाणं तमधिरूढश्च पुरुषमति-प्रमाणमेव स पुरुष उतङ्कमभ्यभाषत ॥ ९९ ॥ भो उतङ्कैतत् पुरीषमस्य वृषभस्य भक्षयस्वेति स एवमुक्तो नैच्छत् ॥ १०० ॥ तमाह पुरुषो भूयो भक्षयस्वोतङ्क माविचारयोपाध्यायेनापि ते भक्षितं पूर्वमिति ॥ १०१ ॥ स एवमुक्तो वाढमित्युक्त्वा तदा तद्वृषभस्य मूत्रं पुरीषञ्च भक्षयित्वोतङ्कः स संभ्रमादुत्थित एवा-पोऽपस्पृश्य प्रतस्थे ॥ १०२ ॥ यत्र स क्षत्रियः पौष्यस्तमुपेत्या-सीनमपश्यदुतङ्कं स उतङ्कस्तमुपेत्याशीर्भिरभिनन्द्योवाच ॥ १०३ ॥ अर्थी भवन्तमुपागतोऽस्मीति स एनमभिवाद्योवाच भगवन् पौष्यः खल्वहं किङ्करवाणीति ॥ १०४ ॥ स तमुवाच गुर्वर्थे कुण्डलयो-रर्थेनाभ्यागतोऽस्मीति ये वै ते क्षत्रियया पिनद्धे कुण्डले ते भवा-न्दातुमर्हतीति ॥ १०५ ॥ तं प्रत्युवाच पौष्यः प्रविश्यान्तःपुरं क्षत्रिया याच्यतामिति स तेनैवमुक्तः प्रविश्यान्तःपुरं क्षत्रियां नापश्यत् ॥ १०६ ॥ स पौष्यं पुनरुवाच न युक्तं भवताहमनृते-नोपचरितुं न हि तेऽन्तःपुरे क्षत्रिया सन्निहिता नैनां पश्यामि ॥ १०७ ॥ स एवमुक्तः पौष्यः क्षणमात्रं विमृश्योतङ्कं प्रत्युवाच नियतं भवानुच्छिष्टः स्मर तावन्न हि सा क्षत्रिया उच्छिष्टेना-शुचिना शक्या द्रष्टुं पतिव्रतात्वात् सैषा नाशुचेर्हविर्मनुपैतीति ॥ १०८ ॥ अथैवमुक्त उतङ्कः स्मृत्वोवाचास्ति खलु मयोत्थितेनो-पसृष्टं शीघ्रं गच्छता चेति तं पौष्यः प्रत्युवाच एष ते व्यति-

क्रमो नोत्थितेनोपस्पृष्टं भवतीति शीघ्रं गच्छता चेति ॥ १०९ ॥ अथोतङ्कस्तं तथेत्युक्त्वा प्राङ्मुख उपविश्य सुप्रक्षालितपाणिपादवदनो निःशब्दाभिरफेणाभिरनुष्णाभिर्हृताभिरद्भिस्त्रिः पीत्वा द्विः परिमृज्य खान्यङ्गिरुपस्पृश्य चान्तःपुरं प्रविवेश ॥ ११० ॥ ततस्तां क्षत्रियामपश्यत् सा च दृष्ट्वैवोतङ्कं प्रत्युत्थायाभिवाद्योवाच स्वागतं ते भगवन्नाज्ञापय किङ्करवाणीति ॥ १११ ॥ स तामुवाचैते कुण्डले गुर्वर्थं मे भिक्षिते दातुमर्हसीति सा प्रीतातेन तस्य सद्भावेन पात्रोपयमनतिक्रमणीयश्चेति मत्वा ते कुण्डलेऽवमुच्याह प्रायच्छदाह चैनमेते कुण्डले तक्षको नागराजः सुभृशं प्रार्थयत्यप्रमत्तो नेतुमर्हसीति ॥ ११२ ॥ स एवमुक्तस्तां क्षत्रियां प्रत्युवाच भवती सुनिर्वृता भव न मां शक्तस्तक्षको नागराजो धर्षयितुमिति ॥ ११३ ॥ स एवमुक्त्वा तां क्षत्रियामामन्त्र्य पौष्यसकाशमागच्छत् आह चैनं भोः पौष्य प्रीतोऽस्मीति तमुतङ्कं पौष्यः प्रत्युवाच ॥ ११४ ॥ भगवच्चिरेण पात्रमासाद्यते भवांश्च गुणवानतिथिस्तदिच्छे आज्ञां कर्तुं क्रियतां क्षण इति ॥ ११५ ॥ तमुतङ्कः प्रत्युवाच कृतक्षण एवास्मि शीघ्रमिच्छामि यथोपपन्नमुपस्कृतं भवतेति स तथेत्युक्त्वा यथोपपन्नेनान्नेनैनं भोजयामास ॥ ११६ ॥ अथोतङ्कः सकेशं प्रीतमन्नं दृष्ट्वा अशुचेतदिति मत्वा तं पौष्यमुवाच यस्मान्नो अशुचयन्नं ददासि तस्मादन्धो भविष्यसीति ॥ ११७ ॥ तं पौष्यः प्रत्युवाच यस्मात्त्वमप्यदुष्टमन्नं दूषयसि तस्मात्त्वमनपत्यो भविष्यसीति तमुतङ्कः प्रत्युवाच ॥ ११८ ॥ न युक्तं भवतान्नमशुचि दत्वा प्रतिशापं दातुं तस्मादन्नमेव प्रत्यक्षीकुरु ततः पौष्यस्तदन्नमशुचि दृष्ट्वा तस्याशुचिभावमपरोक्षयामास ॥ ११९ ॥ अथ तदन्नं मुक्तकेशा स्त्रियोपहृतमनुष्णं सकेशं चाशुच्यतदिति मत्वा तच्छिष्यमुतङ्कं प्रसादयामास ॥ १२० ॥ भगवन्नेतदज्ञानादन्नं

सकाशमुपाहृतं शीतं तत् ज्ञानये भवन्तं न भवेयमन्य इति तमुतङ्कः प्रत्युवाच ॥ १२१ ॥ न मृषा ब्रवीमि भूत्वा त्वमन्यो नचिरादनन्यो भविष्यसीति ममापि शापो भवता दत्तो न भवेदिति ॥ १२२ ॥ तं पौष्यः प्रत्युवाच न चाहं शक्तः शापं प्रत्यादातुं न हि मे मन्युरद्याप्युपशममङ्गच्छति किञ्चैतद्भवता न ज्ञायते यथा ॥ १२३ ॥ नवनीतं हृदयं ब्राह्मणस्य वाचि क्षुरो निधितस्तीक्ष्णधारः । तदुभयमेतद्विपरीतं क्षत्रियस्य वाङ्नवनीतं हृदयं तीक्ष्णधारमिति ॥ १२४ ॥ तदेवं गते न शक्तोऽहं तीक्ष्णहृदयत्वात्तं शापनत्यर्थाकर्तुं गम्यतामिति तमुतङ्कः प्रत्युवाच भवताऽमन्त्र्याशुचिभावमालक्ष्य प्रत्यनुनीतः प्राक्तोऽभिहितम् ॥ १२५ ॥ यस्माददृष्टमन्त्रं दूषयसि तस्मादनयत्यो भविष्यसीति । दुष्टे चान्ने नैष मम शापो भविष्यतीति ॥ १२६ ॥ साधयामस्तावदित्युक्त्वा प्रातिष्ठतोतङ्कः ते कुण्डले गृहीत्वा सोऽपश्यदथ पथि नग्नं क्षपणकमागच्छन्तं मुहुर्मुहुर्दृश्यमानमदृश्यमानञ्च ॥ १२७ ॥ अथोतङ्कस्ते कुण्डले सन्यस्य भूमावुदकार्यं प्रचक्रमे एतस्मिन्नन्तरे स क्षपणकस्वरमाण उपसृत्य ते कुण्डले गृहीत्वा प्राद्रवत् ॥ १२८ ॥ तमुतङ्कोऽभिसृत्य कृतोदकार्यः शुचिः प्रयतो नमो देवेभ्यो गुरुभ्यश्च कृत्वा महता जवेन तमन्वयात् ॥ १२९ ॥ तस्य तक्षको दृढमासन्नः स तं जग्राह गृहीतमात्रः स तद्रूपं विहाय तक्षकस्वरूपं कृत्वा सहसा धरण्यां विवृतं महाबिलं प्रविवेश ॥ १३० ॥ प्रविश्य च नागलोकं स्वभवनमगच्छत् अथोतङ्कस्यास्याः क्षत्रियाया वचः स्मृत्वा तं तक्षकमन्वगच्छत् ॥ १३१ ॥ स तद्बिलं दण्डकाष्ठेन चखान न चाशकत् तं क्लिश्यमानमिन्द्रोऽपश्यत्स वज्रं प्रेषयामास ॥ १३२ ॥ गच्छास्य ब्राह्मणस्य साहाय्यं कुरुष्वेति । अथ वज्रं दण्डकाष्ठमनुप्रविश्य तद्बिलमदारयत् ॥ १३३ ॥ तमुतङ्कोऽनुविवेश तेनैव बिलेन प्रविश्य च तं नागलोकमपश्यन्त-

मनेकविधप्रासादहर्म्यवलभीनिर्व्यूहशतसङ्कुलमुच्चावचक्रीड़ास्थानावकीर्णमपश्यत् ॥ १३७ ॥ स तत्र नागांस्तानसुवर्णैः श्लोकैः ये ऐरावतराजानः सर्पाः समितिशोभनाः। चरन्त इव जीमूताः सविद्युत्पवनेरिताः ॥ १३५ ॥ सुरूपा बहुरूपाश्च तथा कल्माषकुण्डलाः। आदित्यवर्णाकपृष्ठे रेजुरैरावतोद्भवाः ॥ १३६ ॥ बहूनि नागवेश्मानि गङ्गायास्तीर उत्तरे। तत्रस्थानपि संस्तौमि मतः पन्नगानहम् ॥ १३७ ॥ इच्छेत्कोऽर्कांशुसेनायां चर्त्तुमैरावतं विना। शतान्यशीतिरष्टौ च सहस्राणि च विंशतिः। सर्पाणां प्रयुता यान्ति धृतराष्ट्रोऽयमेजति ॥१३८॥ ये चैनमुपसर्पन्ति ये च दूरपथङ्गताः। अहमैरावतज्येष्ठभ्रातृभ्योऽकरवं नमः ॥ १३९ ॥ यस्य वासः कुरुक्षेत्रे खाण्डवे चाभवत् पुरा। तं नागराजमस्तौषं कुण्डलार्थाय तक्षकम् ॥ १४० । तक्षकश्चाश्वसेनश्च नित्यं सहचरावुभौ। कुरुक्षेत्रे च वसतां नदीमिक्षुमतीमनु ॥ १४१ ॥ जघन्यजस्तक्षकस्य श्रुतसेनेति यः सुतः। अवसन्नो महद्भूम्नि प्रार्थयन्नागमुख्यताम्। करवाणि सदा चाहं नमस्तस्मै महात्मने ॥१४२॥ एवं स्तुत्वा स विप्रर्षिरुतङ्को भुजगोत्तमान्। नैव ते कुण्डले लेभे ततश्चिन्तामुपागमत् ॥ १४३॥ एवं स्तुवन्नपि नागान् यदा ते कुण्डले नालभत्तदापश्यत् स्त्रियौ तन्त्रे अधिरोप्य सुवेमे पटं वयन्त्यौ तस्मिंस्तन्त्रे कृष्णाः सिताश्च तन्तवश्चक्रं चापश्यत् द्वादशारं षड्भिः कुमारैः परिवर्त्यमानं पुरुषं चापश्यदश्वं दर्शनीयम्। स तान् सर्वांस्तुष्टाव एभिर्मन्त्रवादस्तोकैः ॥ १४४ ॥ वीरुधश्चितान्यत्र शतानि मध्ये षष्टिश्च नित्यं चरति ध्रुवेऽस्मिन्। चक्रे चतुर्विंशतिपर्वयोगे षड्वै कुमाराः परिवर्त्तयन्ति ॥ १४५ ॥ तन्त्रञ्चेदं विश्वरूपे युवत्यौ वयतस्तन्तून् सततं वर्त्तयन्त्यौ। कृष्णान् सितांश्चैव विवर्त्तयन्त्यौ भूतान्यजस्रं भुवनानि चैव ॥ १४६ ॥ वज्रस्य भर्त्ता भुवनस्य गोप्ता वृत्रस्य

हन्ता नमुचेर्निहन्ता । क्षणे वसानो वसने महात्मा सत्यानृते यो विविनक्ति लोके ॥ १४७ ॥ यो वाजिनं गर्भमपां पुराणं वैश्वानरं वाहनमभ्युपैति । नमोऽस्तु तस्मै जगदीश्वराय लोकत्रयेशाय पुरन्दराय ॥ १४८ ॥ ततः स एनं पुरुषः प्राह प्रीतोऽस्मि तेऽहमनेन स्तोत्रेण किन्ते प्रियं करवाणीति ॥ १४९ ॥ स तमुवाच नागा मे वश्यमीयुरिति स चैनं पुरुषः पुनरुवाच एतमश्वमपाने धमस्वेति ॥ १५० ॥ ततोऽश्वस्यापानमधमत्ततोऽश्वादृश्यमानात् सर्वस्रोतोभ्यः पावकार्चिषः सधूमा निष्पेतुः ॥ १५१ ॥ ताभिर्नागलोकः उपधूपितोऽथ संभ्रान्तस्तक्षकोऽग्नेस्तेजोभयाद्विषण्णः कुण्डले गृहीत्वा सहसा भवनान्निष्क्रम्योतङ्कमुवाच ॥ १५२ ॥ इमे कुण्डले गृह्णातु भवानिति स ते प्रतिजग्राहोतङ्कः प्रतिगृह्य च कुण्डलेऽचिन्तयत् ॥ १५३ ॥ अद्य तत् पुण्यकमुपाध्यायान्या दूरं चाहमभ्यागतः स कथं सम्भावयेयमिति तत एनं चिन्तयानमेव स पुरुष उवाच ॥ १५४ ॥ उतङ्क एनमेवाश्वमधिरोह त्वां क्षणेनैवोपाध्यायकुलं प्रापयिष्यतीति ॥ १५५ ॥ स तथेत्युक्त्वा तमश्वमधिरुह्य प्रस्थितजगामोपाध्यायकुलं उपाध्यायानी च स्नाता केशानावपयन्त्युपविष्टोतङ्को नागच्छतीति शापायास्य मनो दधे ॥ १५६ ॥ अथैतस्मिन्नन्तरे स उतङ्कः प्रविश्योपाध्यायगृहे उपाध्यायानीमभ्यवादयत् ते चास्यै कुण्डले प्रायच्छत् सा चैनं प्रत्युवाच ॥ १५७ ॥ उतङ्क देशे कालेऽभ्यागतः स्वागतं ते वत्स त्वमनागसि मया न शप्तः श्रेयस्तवोपस्थितं सिद्धिमाप्नुहीति ॥ १५८ ॥ अथोतङ्क उपाध्यायमभ्यवादयत् । तमुपाध्यायः प्रत्युवाच वत्सोतङ्क स्वागतं ते किं चिरं कृतमिति ॥ १५९ ॥ तमुतङ्क उपाध्यायं प्रत्युवाच भोस्तक्षकेण मे नागराजेन विघ्नः कृतोऽस्मिन् कर्मणि तेनास्मि नागलोकं गतः ॥ १६० ॥ तत्र च मया दृष्टे स्त्रियौ तत्रैवाधिरोप्य पटं वयन्त्यौ तस्मिंश्च कृष्णाः सिताश्च तन्तवः

किं तत् ॥ १६१ ॥ तत्र च मया चक्रं दृष्टं द्वादशारं षट् चैनं कुमाराः परिवर्त्तयन्ति तदपि किं पुरु चापि मया दृष्टः स चापि कः अश्वश्चातिप्रमाणो दृष्टः स चापि कः ॥ १६२ ॥ पथि गच्छता च मया द्वयभो दृष्टस्तच्च पुरुषोऽधिरूढस्तेनाक्षि सोपचारमुक्तः उतङ्कास्य ऋषभस्य पुरीषं भक्षय उपाध्यायेनापि ते भक्षितमिति ॥ १६३ ॥ ततस्तस्य वचनान्मया तदृषभस्य पुरीषमुपयुक्तं स चापि वाकः तदेतद्भवतोपोद्दिष्टमिच्छेयं श्रोतुं किं तदिति ॥ १६४ ॥ स तैनैवमुक्त उपाध्यायः प्रत्युवाच ये वै स्त्रियौ धाता विधाता च ये च ते कृष्णाः सितास्तन्तवस्ते रात्रयहनी यदपि तच्चक्रं द्वादशारं षड् वै कुमाराः परिवर्त्तयन्ति तेऽपि षड्ऋतवः संवत्सरश्चक्रम् ॥ १६५ ॥ यः पुरुषः स पर्जन्यः योऽश्वः सोऽग्निः य ऋषभस्तया पथि गच्छता दृष्टः स ऐरावतो नागराट् ॥ १६६ ॥ यश्चैनमधिरूढः पुरुषः स चेन्द्रः यदपि ते भक्षितं तस्य ऋषभस्य पुरीषं तदमृतं तेन खल्वसि तस्मिन्नागभवने न व्यापन्नस्त्वम् ॥ १६७ ॥ स हि भगवानिन्द्रो मम सखा त्वदनुक्रोशादिममनुग्रहं कृतवान् तस्मात् कुण्डले गृहीत्वा पुनरागतोऽसि ॥ १६८ ॥ तत् सौम्य गम्यतामनुजाने भवन्तं श्रेयोऽवाप्स्यसीति स उपाध्यायेनानुज्ञातो भगवानुतङ्कः कुण्डलाभ्यां प्रतिचिकीर्षमाणो हास्तिनपुरं प्रतस्थे ॥ १६९ ॥ स हास्तिनपुरं प्राप्य न चिरादिव प्रसक्तमः । समागच्छत राजानमुतङ्को जनमेजयम् ॥ १७० ॥ पुरा तक्षशिलासंस्थं निहत्तमपराजितम् । सम्यग्विजयिनं दृष्ट्वा समन्तान्मन्त्रिभिर्वृतम् ॥ १७१ ॥ तस्मै जयाशिषः पूर्वं यथान्यायं प्रयुज्य सः । उवाचैनं वचः काले शब्दसम्पन्नया गिरा ॥ १७२ ॥

उतङ्क उवाच । अन्यस्मिन् करणीये तु कार्ये पार्थिवसत्तम । बाल्यादिवान्यदेव त्वं कुरुषे नृपसत्तम ॥ १७३ ॥

सौतिरुवाच । एवमुक्तस्तु विप्रेण स राजा जनमेजयः । अर्चयित्वा यथान्यायं प्रत्युवाच द्विजोत्तमम् ॥ १७४ ॥

जनमेजय उवाच । आसां प्रजानां परिपालनेन त्वं क्षत्रधर्मं परिपालयसि । ब्रूहि मे किं करणीयमद्य येनासि कार्य्येण समागतस्त्वम् ॥ १७५ ॥

सौतिरुवाच । स एवमुक्तस्तु नृपोत्तमेन द्विजोत्तमः पुण्यकृतां वरिष्ठः । उवाच राजानमदीनसत्त्वं स्वमेव कार्य्यं नृपते कुरुष्व । १७६ ॥

उतङ्क उवाच । तक्षकेण महीन्द्रेन्द्र येन ते क्षिंसितः पिता । तस्मै प्रतिकुरुष्व त्वं पन्नगाय दुरात्मने ॥ १७७ ॥ कार्य्यकालं हि मन्येऽहं विधिदृष्टस्य कर्मणः । तच्छ्रुत्वापचितिं राजन् पितुस्तस्य महात्मनः ॥ १७८ ॥ तेन ह्यनपराधी स दष्टो दुष्टान्तरात्मना । एकत्वमगमद्राजा वज्राहत इव द्रुमः ॥ १७९ ॥ बलदर्पसमुत्सिक्तस्तक्षकः पन्नगाधमः । अकार्य्यं कृतवान् पापो योऽदशत् पितरं तव ॥ १८० ॥ राजर्षिवंशगोप्तारमसुरप्रतिमं नृपम् । क्षियासुं काश्यपश्चैव न्यवर्त्तयत पापकृत् ॥ १८१ ॥ क्षन्तुमर्हसि तं पापं ज्वलिते हव्यवाहने । सर्पसत्रे महाराज त्वरितं तच्छ्रियतां ॥ १८२ ॥ एवं पितुस्त्वापचितिं कृतवांस्त्वं भविष्यसि । मम प्रियञ्च सुमहत् कृतं राजन् भविष्यति ॥ १८३ ॥ कर्मणः क्षिवीपाल मम येन दुरात्मना । विघ्नः कृतो महाराज गुर्वर्थं चरतोऽनघ ॥ १८४ ॥

सौतिरुवाच । एतच्छ्रुत्वा तु नृपतिस्तक्षकाय चुकोप ह । उतङ्कवाक्यहविषा दीप्तोऽग्निर्हविषा यथा ॥ १८५ ॥ अपृच्छत् स तदा राजा मन्त्रिणस्तान् सुदुःखितः । उतङ्कस्यैव सान्निध्ये पितुः स्वर्गगतिं प्रति ॥ १८६ ॥ तदैव हि स राजेन्द्रो दुःखशोकाभितोऽभवत् । यदैव श्रुतं पितरमुतङ्कादशृणोत्तदा ॥ १८७ ॥

इति श्रीमहाभारते आदिपर्वणि पौष्याख्यानं समाप्तं तृतीयोध्यायः ॥ ३ ॥

—०:०—

अथ पौलोमपर्व ॥ ४ ॥

लोमहर्षणपुत्र उग्रश्रवाः सौतिः पौराणिको नैमिषारण्ये शौनकस्य कुलपतेर्द्वादशवार्षिके सत्रे ऋषीनभ्यागतानुपतस्थे ॥ १ ॥ पौराणिकः पुराणे कृतश्रमः स कृताञ्जलिरासीनानुवाच किमभवन्तः श्रोतुमिच्छन्ति किमहं ब्रवाणीति ॥ २ ॥ तमृषय ऊचुः परमं लौमहर्षणे वक्ष्यामस्त्वां नः प्रतिवक्ष्यसि वचः शुश्रूषतां कथायोगं नः कथायोगे ॥ ३ ॥ तत्र भगवान् कुलपतिस्तु शौनकोऽग्निशरणमध्यास्ते ॥ ४ ॥ योऽसौ दिव्याः कथा वेद देवतासुरसंश्रिताः । मनुष्योरगगन्धर्वकथा वेद च सर्वशः ॥५॥ स चाप्यस्मिन्मखे सौते विद्वान् कुलपतिर्द्विजः । दक्षो धृतव्रतो धीमाञ्छास्त्रे चारण्यके गुरुः ॥ ६ ॥ सत्यवादी शमपरस्तपस्वी नियतव्रतः । सर्वेषामेव नो मान्यः स तावत् प्रतिपाल्यताम् ॥ ७ ॥ तस्मिन्नध्यासति गुरावासनं परमर्चितम् । ततो वक्ष्यसि यत्त्वां स प्रच्यति द्विजसत्तमः ॥ ८ ॥

सौतिरुवाच । एवमस्तु गुरौ तस्मिन्नुपविष्टे महात्मनि । तेन दृष्टः कथाः पुण्या वक्ष्यामि विविधाश्रयाः ॥ ९ ॥ सोऽथ विप्रर्षभः सर्वं कृत्वा कार्यं यथाविधि । देवान्वाग्निः पितॄनद्भिस्तर्पयित्वाजगाम ह ॥ १० ॥ यत्र ब्रह्मर्षयः सिद्धाः सुखासीना धृतव्रताः । यज्ञायतनमाश्रित्य सूतपुत्रपुरःसराः ॥ ११ ॥ ऋत्विक्ष्वथ सदस्येषु स वै गृहपतिस्तदा । उपविष्टेषूपविष्टः शौनकोऽथाब्रवीदिदम् ॥ १२ ॥

इति आदिपर्वणि कथाप्रवेशो नाम चतुर्थोऽध्यायः ॥ ४ ॥

शौनक उवाच । पुराणमखिलं तात पिता तेऽधीतवान् पुरा । कच्चित्त्वमपि तत् सर्वमधीषे लौमहर्षणे ॥ १ ॥ पुराणे हि कथा दिव्या आदिवंशाश्च धीमताम् । कथ्यन्ते ये पुराऽस्माभिः श्रुतपूर्वाः पितुस्तव ॥ २ ॥ तत्र वंशमहं पूर्वं श्रोतुमिच्छामि भार्गवम् । कथयस्व कथामेतां कल्याः स्म श्रवणे तव ॥ ३ ॥

सूत उवाच । यदधीतं पुरा सम्यक् द्विजश्रेष्ठैर्महात्मभिः । वंशम्यायनविप्राग्र्यैस्तैश्चापि कथितं यथा ॥ ४ ॥ यदधीतञ्च पित्रा मे सम्यक् चैव ततो मया । तावच्छृणुष्व यो देवैः सेन्द्रैः सर्षि-मरुद्गणैः ॥ ५ ॥ पूजितः प्रवरो वंशो भार्गवो भृगुनन्दन । इमं वंशमहं पूर्वं भार्गवन्ते महामुने ॥ ६ ॥ निगदामि यथायुक्तं पुराणाश्रयसंयुतम् । भृगुर्महर्षिर्भगवान् ब्रह्मणा वै स्वयम्भुवा ॥ ७ ॥ वरुणस्य क्रतौ जातः पावकादिति नः श्रुतम् । भृगोः सुदयितः पुत्रश्च्यवनो नाम भार्गवः ॥ ८ ॥ च्यवनस्य च दायादः प्रमतिर्नाम धार्मिकः । प्रमतेरप्यभूत् पुत्रो घृताच्यां रुरुरित्युत ॥ ९ ॥ रुरोरपि सुतो जज्ञे शुनको वेदपारगः । प्रमद्वरायां धर्मात्मा तव पूर्वपितामहः ॥ १० ॥ तपस्वी च यशस्वी च श्रुत-वान् ब्रह्मवित्तमः । धार्मिकः सत्यवादी च नियतो नियताशनः ॥ ११ ॥

शौनक उवाच । सूतपुत्र यथा तस्य भार्गवस्य महात्मनः । च्यवनत्वं परिख्यातं तन्ममाचक्ष्व पृच्छतः ॥ १२ ॥

सौतिरुवाच । भृगोः सुदयिता भार्य्या पुलोमेत्यभिविश्रुता । तस्यां समभवद्गर्भो भृगुवीर्य्यसमुद्भवः ॥ १३ ॥ तस्मिन् गर्भेऽथ संभूते पुलोमायां भृगूद्वह । समये समशीलिन्यां धर्मपत्न्यां यशस्विनः ॥ १४ ॥ अभिषेकाय निष्क्रान्ते भृगौ धर्मभृतांवरे । आश्रमं तस्य रक्षोऽथ पुलोमाभ्याजगाम ह ॥ १५ ॥ तं प्रविश्या-श्रमं दृष्ट्वा भृगोर्भार्य्यामनिन्दिताम् । दृष्ट्येन समाविष्टो विचेताः

समपद्यत ॥ १६ ॥ अभ्यागतन्तु तद्रक्षः पुलोमा चारुदर्शना। न्यमन्त्रयत वन्येन फलमूलादिना तदा ॥ १७ ॥ तान्तु रक्षसदा ब्रह्मन् हृच्छयेनाभिपीड़ितम्। दृष्ट्वा हृष्टमभूद्राजन् जिहीर्षुस्तामनिन्दिताम् ॥ १८ ॥ जातमित्यब्रवीत् काव्यं जिहीर्षुर्मुदितः शुभाम्। सा हि पूर्वं हृता तेन पुलोम्ना तु शुचिस्मिता ॥ १९ ॥ तान्तु प्रादात्पिता पश्चाद्भृगवे शास्त्रवत्तदा। तस्य तत् किल्बिषं नित्यं हृदि वर्त्तति भार्गव ॥ २० ॥ इदमन्तरमित्येवं कर्त्तुं चक्रे मनस्तदा। अथाग्निशरणेऽपश्यज्ज्वलन्तं जातवेदसम् ॥ २१ ॥ तमपृच्छत्ततो रक्षः पावकं ज्वलितं तदा। शंस मे कस्य भार्य्येयमग्ने दृच्छे ऋतेन वै ॥ २२ ॥ मुखं त्वमसि देवानां वह पावक दृच्छते। मया हीयं हृता पूर्वमाभ्यार्थे वरवर्णिनी ॥ २३ ॥ पश्चादिमां पिता प्रादाद्भृगवेऽनृतकारिणे। सेयं यदि वरारोहा भृगोर्भार्य्या रहोगता ॥ २४ ॥ तथा सत्यं समाख्याहि जिहीर्षाम्याश्रमादिमाम्। स मन्युस्तव हृदय प्रदहन्निव तिष्ठति। मत्पूर्वभार्य्यां यदिमां भृगुराप सुमध्यमाम् ॥ २५ ॥

सौतिरुवाच। एवं रक्षसमामन्त्र्य ज्वलितं जातवेदसम्। शङ्कमानं भृगोर्भार्य्यां पुनः पुनरपृच्छत ॥ २६ ॥ त्वमग्ने सर्वभूतानामन्तश्चरसि नित्यदा। साक्षिवत् पुण्यपापेषु सत्यं ब्रूहि कवे वचः ॥ २७ ॥ मत्पूर्वापहृता भार्य्या भृगुणानृतकारिणा। सेयं यदि तथा मे त्वं सत्यमाख्यातुमर्हसि ॥ २८ ॥ श्रुत्वा वचो भृगोर्भार्य्यां हरिष्याम्याश्रमादिमाम्। जातवेदः प्रयच्छस्व वह सत्यार्क्षरं मम ॥ २९ ॥

सूत उवाच। तस्यैतद्वचनं श्रुत्वा सप्तार्चिर्दुःखितोऽभवत्। भीतोऽनृताच्च शापाच्च भृगोरित्यब्रवीच्छनैः ॥ ३० ॥

अग्निरुवाच। त्वया हृता पुलोमेयं पूर्वं दानवनन्दन। किं त्वियं विधिना पूर्वं मन्त्रवच्च हृता त्वया ॥ ३१ ॥ पिता तु

भृगवे दत्ता पुलोमेयं यशस्विनी। प्रदत्ता नतु वै तुभ्यं वरलो-भान्महायशाः ॥ ३२ ॥ अर्घेमां वेददृष्टेन कर्मणा विधिपूर्वकम्। भार्यार्थेऽपिर्भृगुः प्राप मां पुरस्कृत्य दानव ॥ ३३ ॥ सेयमित्यव-गच्छामि नानृतं वक्तुमुत्सहे। नानृतं हि सदा लोके पूज्यते दानवोत्तम ॥ ३४ ॥

इत्यादिपर्वणि पौलोमे पञ्चमोऽध्यायः ॥ ५ ॥

—०:०—

सौतिरुवाच। अग्नेरथ वचः श्रुत्वा तद्रक्षः प्रजहार ताम्। ब्रह्मन् वराहरूपेण मनोमारुतरंहसा ॥१॥ ततः स गर्भो निवसन् कुक्षौ भृगुकुलोद्वह। रोषान्मातुश्च्युतः कुक्षेश्च्यवनस्तेन सोऽभवत् ॥२॥ तं दृष्ट्वा मातुरुदराच्च्युतमादित्यवर्चसम्। तद्रक्षो भस्मसाद्भूतं पपात परिसृत्य ताम् ॥ ३ ॥ सा तमादाय सुश्रोणी ससार भृगुनन्दन। च्यवनं भार्गवं पुत्रं पुलोमा दुःखमूर्छिता ॥ ४ ॥ तां ददर्श स्वयं ब्रह्मा सर्वलोकपितामहः। रुदन्तीं बाष्पपूर्णाक्षीं भृगोर्भार्यामनिन्दिताम् ॥ ५ ॥ सान्त्वयामास भगवान् वधूं ब्रह्मा पितामहः। अश्रुबिन्दूञ्जवा तस्याः प्रावर्तत महानदी ॥ ६ ॥ अनुवर्त्माश्रिता तस्या भृगोः पत्न्यास्तपस्विनः। तस्या मार्गं स्रुतवतीं दृष्ट्वा तु सरितं तदा ॥७॥ नाम तस्यास्तदा नद्याश्चक्रे लोकपिता-महः। वधूसरेति भगवांश्च्यवनस्याश्रमं प्रति ॥८॥ स एवं च्यवनो जज्ञे भृगोः पुत्रः प्रतापवान्। तं ददर्श पिता तत्र च्यवनं ताञ्च भाविनीम्। स पुलोमां ततो भार्यां पप्रच्छ कुपितो भृगुः ॥ ९ ॥

भृगुरुवाच। केनासि रक्षसे तस्मै कथिता त्वं जिहीर्षते। न हि त्वां वेद तद्रक्षो भद्रार्थां चारुहासिनि ॥ १० ॥ तत्त्व-माख्याहि तं ह्यद्य यमुमिच्छाम्यहं रुषा। बिभेति को न शापान्मे कस्य चायं व्यतिक्रमः ॥ ११ ॥

पुलोमोवाच । अग्निना भगवंस्त्वत्तो रक्षसेऽहं निवेदिता । ततो मामनयद्गृह्य क्रोशन्तीं कुररीमिव ॥ १२ ॥ सार्द्धं तव सुतस्यास्य तेजसा परिमोचिता । भस्मीभूतं तु तद्रक्षो मामुत्सृज्य ययौ तदा ॥ १३ ॥

सूत उवाच । इति श्रुत्वा पुलोमाया भृगुः परममन्युमान् । शशापाग्निमतिक्रुद्धः सर्वभक्षो भविष्यसि ॥ १४ ॥

इत्यादिपर्वणि पौलोमेऽग्निशापः षष्ठोऽध्यायः ॥ ६ ॥

—०—

सौतिरुवाच । शप्तस्तु भृगुणा वह्निः क्रुद्धो वाक्यमथाब्रवीत् । किमिदं साहसं ब्रह्मन् कृतवानसि मां प्रति ॥ १ ॥ धर्मं प्रयतमानस्य सत्यञ्च वदतः समम् । पृष्टो यद्ब्रुवं सत्यं व्यभिचारोऽत्र को मम ॥ २ ॥ पृष्टो हि साक्षी यः साक्ष्यं जानानोऽप्यन्यथा वदेत् स मूर्वानात्मनः सप्त कुले हन्यात्तथापरान् ॥ ३ ॥ यश्च कार्य्यार्थतत्त्वज्ञो जानानोऽपि न भाषते । सोऽपि तेनैव पापेन लिप्यते नात्र संशयः ॥ ४ ॥ शप्तोऽहमपि शप्तुं त्वां मान्यास्तु ब्राह्मणा मम । जानतोऽपि च ते ब्रह्मन् कथयिष्ये निबोध तत् ॥ ५ ॥ योगेन बहुधात्मानं कृत्वा तिष्ठामि मूर्त्तिषु । अग्निहोत्रेषु सत्रेषु क्रियासु च मखेषु च ॥ ६ ॥ वेदोक्तेन विधानेन मयि यद्हूयते हविः । देवताः पितरश्चैव तेन तृप्ता भवन्ति वै ॥ ७ ॥ आपो देवगणाः सर्वे आपः पितृगणास्तथा । दर्शस्य पौर्णमासस्य देवानां पितृभिः सह ॥ ८ ॥ देवताः पितरस्तस्मात्पितरश्चापि देवताः । एकीभूताश्च दृश्यन्ते पृथक्त्वेन च पर्वसु ॥ ९ ॥ देवताः पितरश्चैव भुञ्जते मयि यद्धुतम् । देवतानां पितॄणाञ्च सुखमेतदहं स्मृतम् ॥ १० ॥ अमावास्यां हि पितरः

पौर्णमास्यां हि देवताः। मन्मुखेनैव हूयन्ते भुञ्जते च हुतं हविः। सर्वभक्षः कथं तेषां भविष्यामि सुखं त्वहम् ॥ ११ ॥

सौतिरुवाच। चिन्तयित्वा ततो वह्निरृषीणां संहारमात्मनः। द्विजानामग्निहोत्रेषु यज्ञसत्क्रियासु च ॥ १२ ॥ निरोङ्कार-वषट्काराः स्वधास्वाहाविवर्जिताः। विनाग्निना प्रजाः सर्वा-स्तत आसन् सुदुःखिताः ॥ १३ ॥ अथर्षयः समुद्विग्ना देवान् गत्वाब्रुवन्वचः। अग्निनाशात् क्रियाभ्रंशाद्वान्ता लोकास्त्रयो-नघाः ॥ १४ ॥ विदह्यमत्र यत्कार्यं न स्यात्कालात्ययो यथा। अथर्षयश्च देवाश्च ब्रह्माणमुपगम्य तु ॥ १५ ॥ अग्नेरावेदयच्छापं क्रियासंहारमेव च। भृगुणा वै महाभाग शप्तोऽग्निः कारणा-न्तरे ॥ १६ ॥ कथं देवमुखो भूत्वा यज्ञभागानभुक्तथा। हुत-भुक् सर्वलोकेषु सर्वभक्षत्वमेष्यति ॥ १७ ॥ श्रुत्वा तु तद्वचस्तेषा-मग्निमाहूय विश्वकृत्। उवाच वचनं श्लक्ष्णं भूतभावनमव्ययम् ॥ १८ ॥ लोकानामिह सर्वेषां त्वं कर्त्ता चान्त एव च। त्वं धारयसि लोकांस्त्रीन् क्रियाणाञ्च प्रवर्त्तकः ॥ १९ ॥ स तथा कुरु लोकेश नोच्छिद्येरन्यथा क्रियाः। कस्मादेवं विमूढस्त्वमी-श्वरः सन् हुताशन ॥ २० ॥ त्वं पवित्रं सदा लोके सर्वभूत-गतिश्च ह। न त्वं सर्वशरीरेण सर्वभक्षत्वमेष्यसि ॥ २१ ॥ अपाने ह्यर्चिषो यास्ते सर्वं भोक्ष्यन्ति ताः शिखिन्। क्रियादा च तनुर्या ते सा सर्वं भक्षयिष्यति। यथा सूर्यांशुभिः स्पृष्टं सर्वं शुचि विभाव्यते ॥ २२ ॥ तथा त्वदर्चिर्भिर्दग्धं सर्वं शुचि भविष्यति। त्वमग्ने परमं तेजः स्वप्रभावाद्विनिर्गतम् ॥ २३ ॥ स्वतेजसैव तं शापं कुरु सत्यश्रुषेर्विभो। देवानां चात्मनो भागं गृह्णन् त्वं मुखे हुतम् ॥ २४ ॥

सौतिरुवाच। एवमस्विति तं वह्निः प्रत्युवाच पितामहम्। जगाम शासनं कर्त्तुं देवस्य परमेष्ठिनः ॥ २५ ॥ देवर्षयश्च

मुदितास्ततो जग्मुर्यथागतम् । ऋषयश्च यथापूर्वं क्रियाः सर्वाः प्रचक्रिरे ॥ २६ ॥ दिवि देवा मुमुदिरे भूतसङ्घाश्च लौकिकाः । अग्निश्च परमां प्रीतिमवाप हुतकल्मषः ॥ २७ ॥ एवं स भगवाञ्छापं लेभेऽग्निर्भृगुतः पुरा । एवमेष पुरावृत्त इतिहासोऽग्निशापजः । पुलोमाच्च विनाशोऽयं च्यवनस्य च सम्भवः ॥२८॥

इत्यादिपर्वणि पौलोमे सप्तमोऽध्यायः ॥ ७ ॥

—०*०—

सूत उवाच । स चापि च्यवनो ब्रह्मन् भार्गवोऽजनयत् सुतम् । सुकन्यायां महात्मानं प्रमतिं दीप्ततेजसम् ॥ १ ॥ प्रमतिस्तु रुरुं नाम घृताच्यां समजीजनत् । रुरुः प्रमद्वरायान्तु शुनकं समजीजनत् ॥ २ ॥ तस्य ब्रह्मन् रुरोः सर्वं चरितं भूरितेजसः । विस्तरेण प्रवक्ष्यामि तच्छृणुष्व महर्षेतः । ३ ॥ ऋषिरासीन्महान् पूर्वं तपोविद्यासमन्वितः । स्थूलकेश इति ख्यातः सर्वभूतहिते रतः । ४ ॥ एतस्मिन्नेव काले तु मेनकायां प्रजज्ञिवान् । गन्धर्वराजो विप्रर्षे विश्वावसुरिति स्मृतः ॥ ५ ॥ अप्सरा मेनका तस्य तं गर्भं भृगुनन्दन । उत्ससर्ज यथाकालं स्थूलकेशाश्रमं प्रति ॥ ६ ॥ उत्सृज्य चैव तं गर्भं नद्यास्तीरं जगाम सा । अप्सरा मेनका ब्रह्मन्निर्दया निरपत्रपा ॥ ७ ॥ कन्यामसमगर्भाभां ज्वलन्तीमिव च श्रिया । तान्ददर्श समुत्सृष्टां नदीतीरे महाऋषिः ॥ ८ ॥ स्थूलकेशः स तेजस्वी विजने बन्धुवर्जिताम् । स तां दृष्ट्वा तदा कन्यां स्थूलकेशो महाद्विजः ॥ ९ ॥ जग्राह च मुनिश्रेष्ठः कृपाविष्टः पुपोष च । ववृधे सा वरारोहा तस्याश्रमपदे शुभे ॥ १० ॥ जातकाद्याः क्रियास्तस्या विधिपूर्वं यथाक्रमम् । स्थूलकेशो महाभागश्चकार सुमहानृषिः ॥ ११ ॥ प्रमदाभ्यो वरा सा तु सत्त्वरूपगुणान्विता ।

ततः प्रमद्वरेत्यस्या नाम चक्रे महाऋषिः ॥ १२ ॥ तामाश्रमपदे तस्य रुरुर्दृष्ट्वा प्रमद्वराम् । बभूव किल धर्मात्मा मदनोपहतस्तदा ॥ १३ ॥ पितरं सखिभिः सोऽथ आवयामास भार्गवम् । प्रमतिश्चाभ्ययाचत्तां स्थूलकेशं यशस्विनम् ॥ १४ ॥ ततः प्रादात्पिता कन्यां रुरवे तां प्रमद्वराम् । विवाहं स्थापयित्वाग्ये नक्षत्रे भगदैवते ॥ १५ ॥ ततः कतिपयाहस्य विवाहे समुपस्थिते । सखीभिः क्रीडती सार्द्धं सा कन्या वरवर्णिनी । १६ ॥ नाप-श्यत् संप्रसुप्तं वै भुजङ्गं तिर्यगायतम् । पदा चैनं समाक्रामत्सुमूर्षुः कालचोदिता ॥ १७ ॥ स तस्याः संप्रमत्तायाश्चोदितः कालधर्मणा । विषोपलिप्तान्दशनान् हृदयमङ्गे न्यपातयत् ॥ १८ ॥ सा दष्टा तेन सर्पेण पपात सहसा भुवि । विवर्णा विगतश्रीका भ्रष्टाभरणचेतना ॥ १९ ॥ निरानन्दकरी तेषां बन्धूनां सुकुमूर्द्धजा । व्यसुरप्रेक्षणीया सा प्रेक्षणीयतमाभवत् ॥ २० ॥ प्रसुप्तेवाभवच्चापि भुवि सर्पविषार्दिता । भूयो मनोहरतरा बभूव तनुमध्यमा ॥ २१ ॥ दृष्ट्वा तां पिता चैव ये चैवान्ये तपस्विनः । विचेष्टमानां पतितां भूतले मद्यवर्च्चसम् ॥ २२ ॥ ततः सर्वे द्विजवराः समाजग्मुः कृपान्विताः । स्वस्त्यात्रेयो महाजानुः कुशिकः शङ्खमेखलः ॥ २३ ॥ उद्दालकः कठश्चैव श्वेतश्चैव महायशाः । भरद्वाजः कौणकुत्स्य आर्ष्टिषेणोऽथ गौतमः ॥ २४ ॥ प्रमतिः सह पुत्रेण तथान्ये वनवासिनः । तां ते कन्यां व्यसुं दृष्ट्वा भुजङ्गस्य विषार्दितां । रुरुदुः कृपयाविष्टा रुरुस्त्वार्त्तो वचिर्यथौ ॥ २५ ॥

इत्यादिपर्वणि पौलोमेऽष्टमोऽध्यायः ॥ ८ ॥

—०—

सौतिरुवाच । तेषु तत्रोपविष्टेषु ब्राह्मणेषु महात्मसु । रुरु-
रुक्रोश गहनं वनं गत्वातिदुःखितः ॥ १ ॥ शोकेनाभिहतः
सोऽथ विलपन् करुणं बहु । अस्रवीद्वचनं घोरं प्रियां स्मृत्वा
प्रमद्वराम् ॥ २ ॥ शेते सा भुवि तन्वङ्गी मम शोकविवर्द्धिनी ।
बान्धवानाञ्च सर्वेषां किं नु दुःखमतः परम् ॥३॥ यदि दत्तं तपस्तप्तं
गुरवो वा मया यदि । सम्यगाराधितास्तेन सञ्जीवतु मम प्रिया
॥ ४ ॥ यथा च जन्मप्रभृति यतात्माहं धृतव्रतः । प्रमद्वरा तथा-
द्यैषा समुत्तिष्ठतु भाविनी ॥ ५ ॥ एवं विलपतस्तस्य भार्य्यार्थे
दुःखितस्य च । देवदूतस्तदाभ्येत्य वाक्यमाह रुरुं वने ॥ ६ ॥

देवदूत उवाच । अभिधत्से न यद्वाक्यं रुरो दुःखेन तन्मृषा ।
यतो मर्त्यस्य धर्मात्मन्नायुरस्ति गतायुषः ॥७॥ गतायुरेषा कृपणा
गन्धर्वाप्सरसोः सुता । तस्माच्छोकं मनस्तात मास्मयाक्षं कथ-
ञ्चन ॥ ८ ॥ उपायश्चात्र विहितः पूर्वं दैवैर्महात्मभिः । तं यदी-
च्छसि कर्त्तुं त्वं प्राप्स्यसीह प्रमद्वराम् ॥ ९ ॥

रुरुरुवाच । क उपायः कृतो देवैर्ब्रूहि तत्त्वेन खेचर ।
करिष्येऽहं तथा श्रुत्वा त्वातुमर्हति मां भवान् ॥ १० ॥

देवदूत उवाच । आयुषोऽर्द्धं प्रयच्छ त्वं कन्यायै भृगुनन्दन ।
एवमुत्थास्यति रुरो तव भार्य्या प्रमद्वरा ॥ ११ ॥

रुरुरुवाच । आयुषोऽर्द्धं प्रयच्छामि कन्यायै खेचरोत्तम ।
सृङ्गारूपाभरणा समुत्तिष्ठतु मे प्रिया ॥ १२ ॥

सूत उवाच । ततो गन्धर्वराजश्च देवदूतश्च सत्तमौ । धर्म-
राजमुपेत्येदं वचनं प्रत्यभाषताम् ॥ १३ ॥ धर्मराजायुषोऽर्द्धेन
रुरोर्भार्य्या प्रमद्वरा । समुत्तिष्ठतु कल्याणी सृतैवं यदि मन्यसे
॥ १४ ॥

धर्मराज उवाच । प्रमद्वरां रुरोर्भार्य्यां देवदूत वहीच्छसि ।
उत्तिष्ठत्वायुषोऽर्द्धेन रुरोरेव समन्विता ॥ १५ ॥

सौतिरुवाच । एवमुक्ते ततः कन्या सोदतिष्ठत् प्रमद्वरा । रुरोस्तस्यायुषोऽर्द्धेन सुप्तेव वरवर्णिनी ॥१६॥ एतद्दृष्टं भविष्ये हि रुरोरुत्तमतेजसः । आयुषोऽतिप्रदत्तस्य भार्य्यार्थेऽर्द्धं मनुष्यत ॥ १७ ॥ तत दृष्टेऽहनि तयोः पितरौ चक्रतुर्मुदा । विवाहं तौ च रेमाते परस्परहितैषिणौ ॥ १८ ॥ स लब्ध्वा दुर्लभां भार्य्यां पद्मकिञ्जल्कसुप्रभाम् । व्रतं चक्रे विनाशाय जिह्मगानां धृतव्रतः ॥ १९ ॥ स दृष्ट्वा जिह्मगान् सर्वान्सौव्रकोपसमन्वितः । अभिहन्ति यथासत्त्वं सह प्रहरणं सदा ॥ २० ॥ स कदाचिद्वनं विप्रो रुरुरभ्यागमन्महत् । ग्रथानं तत्र चापश्यत् डुण्डुभं वयसान्वितम् ॥२१॥ तत उद्यम्य दण्डं स कालदण्डोपमं तदा । जिघांसुः कुपितो विप्रस्तमुवाचाथ डुण्डुभः ॥ २२ ॥ नापराध्यामि ते किञ्चिद्दृष्ट्वा तपोधन । मंरस्माञ्च किमर्थं मामभिहंसि रुषान्वितः ॥ २३ ॥

इत्यादिपर्वणि पौलोमे नवमोऽध्यायः ॥ ९ ॥

—०—

रुरुरुवाच । मम प्राणसमा भार्य्या दष्टासीद्भुजगेन ह । तत्र मे क्षमयो घोर आत्मनोरग वै कृतः ॥ १ ॥ भुजङ्गं वै सदा हन्यां यं यं पश्येयमित्युत । ततोऽहं त्वां जिघांसामि जीविते-नाद्य मोक्ष्यसे ॥ २ ॥

डुण्डुभ उवाच । अन्ये ते भुजगा ब्रह्मन् ये दशन्तीह मानवान् । डुण्डुभानद्विगन्धेन न त्वं हिंसितुमर्हसि ॥ ३ ॥ एकानर्थान् पृथगर्थानेकदुःखान् पृथक्सुखान् । डुण्डुभान्धर्मविद्भूत्वा न त्वं हिंसितुमर्हसि ॥ ४ ॥

सौतिरुवाच । इति श्रुत्वा वचस्तस्य भुजगस्य रुरुस्तदा । नाघघीत्क्षयसंविग्नस्तस्मिन्नथ डुण्डुभम् ॥ ५ ॥ उवाच चैनं

भगवान् रुरुः संयमयन्निव । कामं मां भुजग ब्रूहि कोऽसीमां विक्रियां गतः ॥ ६ ॥

डुण्डुभ उवाच । अहं पुरा रुरो नाम्ना ऋषिरासं सहस्रपात् । सोऽहं शापेन विप्रस्य भुजगत्वमुपागतः ॥ ७ ॥

रुरुरुवाच । किमर्थं शप्तवान् क्रुद्धो द्विजस्त्वां भुजगोत्तम । कियन्तं चैव कालं ते वपुरेतद्भविष्यति ॥ ८ ॥

इत्यादिपर्वणि पौलोमे दशमोऽध्यायः ॥ १० ॥

—***—

डुण्डुभ उवाच । सखा बभूव मे पूर्वं खगमो नाम वै द्विजः । भृशं संयतवाक् सोऽथ तपोबलसमन्वितः ॥ १ ॥ स मया क्रीडता बाल्ये ह्रत्वा तार्णं भुजङ्गमम् । अग्निहोत्रे प्रसक्तासु भीषितः प्रमुमोह व ॥ २ ॥ लब्ध्वा स च पुनः संज्ञां मामुवाच तपोधनः । निर्हेतुकमिव क्रोधेन सत्यवाक् शंसितव्रतः ॥ ३ ॥ यथावीर्यं त्वया रुर्यः कृतोऽयं महिभीषया । तथावीर्यो भुजङ्गस्त्वं मम शापाद्भविष्यसि ॥ ४ ॥ तस्यात्तं तपसो वीर्यं जानानस्तत् तपोधन । भृशमुद्विग्नहृदयस्तमवोचमहं तदा ॥ ५ ॥ प्रणतः संभ्रमाच्चैव प्राञ्जलिः पुरतः स्थितः । सखेति हसतेदं ते नर्मार्थं वै कृतं मया ॥ ६ ॥ क्षन्तुमर्हसि मे ब्रह्मन् शापोऽयं विनिवर्त्यताम् । सोऽथ मामब्रवीद्दृष्ट्वा भृशमुद्विग्नचेतसम् ॥ ७ ॥ मुञ्चरुषं विनिश्वस्य सुसंभ्रान्तस्तपोधनः । नानृतं वै मया प्रोक्तमभवितेदं कथञ्चन ॥ ८ ॥ यत्तु वक्ष्यामि ते वाक्यं शृणु तन्मे तपोधन । श्रुत्वा च हृदि ते वाक्यमिदमस्तु सदानघ ॥ ९ ॥ उत्पत्स्यति रुरुर्नाम प्रमतेरात्मजः शुचिः । तं दृष्ट्वा शापमोक्षस्ते भविता नचिरादिव ॥ १० ॥ स त्वं रुरुरिति ख्यातः प्रमते-

राक्षसोऽपि च । स्वं रूपं प्रतिपद्याहमद्य वक्ष्यामि ते हितम् ॥ ११ ॥ स डौण्डुभं परित्यज्य रूपं विप्रर्षभस्तदा । स्वरूपं भास्वरं भूयः प्रतिपेदे महायशाः ॥ १२ ॥ इदं चोवाच वचनं रुरुमप्रतिमौजसम् । अहिंसा परमो धर्मः सर्वप्राणभृतांवर ॥ १३ ॥ तस्मात् प्राणभृतः सर्वान्न हिंस्याद्ब्राह्मणः क्वचित् । ब्राह्मणः सौम्य एवेह भवतीति परा श्रुतिः ॥ १४ ॥ वेदवेदाङ्गविन्नाम सर्वभूताभयप्रदः । अहिंसा सत्यवचनं क्षमा चेति विनिश्चितम् ॥ १५ ॥ ब्राह्मणस्य परो धर्मो वेदानां धारणापि च । क्षत्रियस्य हि यो धर्मः स हि नेष्येत वै तव ॥ १६ ॥ दण्डधारणमुग्रत्वं प्रजानां परिपालनम् । तदिदं क्षत्रियस्यासीत्कर्म वै शृणु मे रुरो ॥ १७ ॥ जनमेजयस्य यज्ञेऽत्र सर्पाणां हिंसनं पुरा । परित्राणञ्च भीतानां सर्पाणां ब्राह्मणादपि ॥ १८ ॥ तपोवीर्यबलोपेताद्वेदवेदाङ्गपारगात् । आस्तीकाद्द्विजमुख्याद्वै सर्पसत्रे द्विजोत्तम ॥ १९ ॥

इत्यादिपर्वणि पौलोमे एकादशोऽध्यायः ॥ ११ ॥

रुरुरुवाच । कथं हिंसितवान् सर्पान् स राजा जनमेजयः । सर्पा वा हिंसितास्तत्र किमर्थं द्विजसत्तम ॥ १ ॥ किमर्थं मोचितश्चैव यज्ञगास्तेन धीमता । आस्तीकेन द्विजश्रेष्ठ श्रोतुमिच्छाम्यशेषतः । २ ॥

ऋषिरुवाच । श्रोष्यसि त्वं रुरो सर्वमास्तीकचरितं महत् । ब्राह्मणानां कथयतामित्युक्तान्तरधीयत ॥ ३ ॥

सौतिरुवाच । रुरुस्त्वपि वनं सर्वं पर्यधावत्समन्ततः । तस्यर्षिं नष्टमन्विच्छन् संभ्रान्तो व्यपतद्भुवि ॥ ४ ॥ स मोहं परमं गत्वा नष्टसंज्ञ इवाभवत् । तद्दर्शनं तथ्यं चिन्तयानः पुनः पुनः

॥ ५ ॥ लब्धसंज्ञो रुरुश्चायात्तदाचख्यौ पितुस्तदा। पिता चास्य तदाख्यानं दृष्टः सर्वं न्यवेदयत् ॥ ६ ॥

इत्यादिपर्वणि सर्पसत्रप्रस्तावना पौलोमं समाप्तम्

द्वादशोऽध्यायः ॥ १२ ॥

अथास्तीकपर्व।

शौनक उवाच। किमर्थं राजशार्दूलः स राजा जनमेजयः। सर्पसत्रेण सर्पाणां गतोऽन्तं तद्वदस्व मे ॥ १ ॥ निखिलेन यथातत्त्वं सौते सर्वमशेषतः। आस्तीकश्च द्विजश्रेष्ठः किमर्थं जपतां वरः। मोक्षयामास भुजगान् प्रदीप्ताद्धुतभुग्वेतसः ॥ २ ॥ कस्य पुत्रः स राजासीत् सर्पसत्रं य आहरत्। स च द्विजातिप्रवरः कस्य पुत्रोऽभिधत्स्व मे ॥ ३ ॥

सौतिरुवाच। महदाख्यानमास्तीकं यथैतत् प्रोच्यते द्विज। सर्वमेतदशेषेण शृणु मे वदतांवर ॥ ४ ॥

शौनक उवाच। श्रोतुमिच्छाम्यशेषेण कथामेतां मनोरमाम्। आस्तीकस्य पुराणर्षेर्ब्राह्मणस्य यशस्विनः ॥ ५ ॥

सौतिरुवाच। इतिहासमिमं विप्राः पुराणं परिचक्षते। कृष्णद्वैपायनप्रोक्तं नैमिषारण्यवासिषु ॥ ६ ॥ पूर्वं प्रचोदितः सूतः पिता मे लोमहर्षणः। शिष्यो व्यासस्य मेधावी ब्राह्मणेष्विदमुक्तवान् ॥ ७ ॥ तस्मादहमुपश्रुत्य प्रवक्ष्यामि यथातथम्। इदमास्तीकमाख्यानं तुभ्यं शौनक पृच्छते ॥ ८ ॥ कथयिष्याम्यशेषेण सर्वपापप्रणाशनम्। आस्तीकस्य पिता ह्यासीत् प्रजापतिसमः प्रभुः ॥ ९ ॥ ब्रह्मचारी यताहारस्तपस्युग्रे रतः सदा। जरत्कारुरिति ख्यात ऊर्ध्वरेता महातपाः ॥ १० ॥ यायावराणां प्रवरो धर्मज्ञः संशितव्रतः। स कदाचिन्महाभागस्तपोबलसम-

न्वितः ॥ ११ ॥ चचार पृथिवीं सर्वां यत्रसायंगृहो मुनिः। तीर्थेषु च समाधायं कुर्वन्नटति सर्वशः ॥ १२ ॥ चरन्तीर्घां महातेजा दुश्चरामकृतात्मभिः। वायुभक्षो निराहारः शुष्यन्निमिषो मुनिः ॥ १३ ॥ इतस्ततः परिचरन्दीप्तपावकसप्रभः। अटमानः कदाचित् स्वान् स ददर्श पितामहान् ॥ १४ ॥ लम्बमानान्महागर्त्ते पादैरूर्द्धैरवाङ्मुखान्। तानब्रवीत्स दृष्ट्वैव जरत्कारुः पितामहान् ॥ १५ ॥ के भवन्तोऽवलम्बन्ते गर्त्ते ह्यस्मिन्नधोमुखाः। वीरणस्तम्बके लग्नाः सर्वतः परिभक्षिते। मूषिकेण निगूढेन गर्त्तेऽस्मिन्नित्यवासिना ॥ १६ ॥

पितर ऊचुः। यायावरा नाम वयमृषयः संशितव्रताः। सन्तानप्रक्षयाद्ब्रह्मन्नधो गच्छाम मेदिनीम् ॥ १७ ॥ अस्माकं सन्ततिस्त्वेको जरत्कारुरिति स्मृतः। मन्दभाग्योऽल्पभाग्यानां तप एकं समास्थितः ॥ १८ ॥ न स पुत्रान् जनयितुं दारान्वा कुरुतेऽधिकौपीनतां। तेन लम्बामहे गर्त्ते सन्तानस्य क्षयादिह ॥ १९ ॥ अनाथास्तेन नाथेन यथा दुष्कृतिनस्तथा। कस्मं बन्धुरिवास्माकमनुशोचसि सत्तम ॥ २० ॥ ज्ञातुमिच्छामहे ब्रह्मन् को भवानिह नः स्थितः। किमर्थं चैव नः शोच्याननुशोचसि सत्तम ॥ २१ ॥

जरत्कारुरुवाच। मम पूर्वे भवन्तो वै पितरः संशितव्रताः। ब्रूत किं करवाण्यद्य जरत्कारुरहं स्वयम् ॥ २२ ॥

पितर ऊचुः। यतस्व यत्नवांस्तात सन्तानाय कुलस्य नः। आत्मनोऽर्थेऽस्मदर्थं च धर्म इत्येव वा विभो ॥ २३ ॥ न हि धर्मफलैस्तात न तपोभिः सुसञ्चितैः। तां गतिं प्राप्नुवन्तीह पुरुषा यां व्रजन्ति वै ॥ २४ ॥ तद्दारग्रहणे यत्नं सन्तत्यां च मनः कुरु। पुत्रकास्मन्नियोगात्त्वमेतन्नः परमं हितम् ॥ २५ ॥

जरत्कारुरुवाच। न दारान्वै करिष्येऽहं न धनं जीविता-

र्थेतः। भवतान्तु हितार्थाय करिष्ये दारसंग्रहम् ॥ २६ ॥ समयेन च कर्त्ताहमनेन विधिपूर्वकम्। तथा यद्युपलप्स्यामि करिष्ये नान्यथा ह्यहम् ॥२७॥ सनाम्नी या भवित्री मे हितैषिता चैव बन्धुभिः। भैक्ष्यवत्तामहं कन्यामुपयंस्ये विधानतः ॥ २८ ॥ दरिद्राय हि भार्य्यां को मे दास्यति विशेषतः। प्रतिग्रहीष्ये भिक्षान्तु यदि कश्चित् प्रदास्यति ॥ २९ ॥ एवं दारक्रियाहेतोः प्रवर्तिष्ये पितामहाः। अनेन विधिना शश्वन्न करिष्येऽहमन्यथा ॥ ३०॥ तत्र चोत्पत्स्यते जन्तुर्भवतां तारणाय वै। शाश्वतं स्थानमासाद्य मोदन्तां पितरो मम ॥ ३१ ॥

इत्यादिपर्वण्यास्तीके त्रयोदशोऽध्यायः ॥ १३ ॥

—०:०—

सौतिरुवाच। ततो निवेदाय तदा स विप्रः शंसितव्रतः। महीं चचार दारार्थी न च दारानविन्दत ॥ १ ॥ स कदाचिद्वनं गत्वा विप्रः पित्रवचः स्मरन्। चुक्रोश कन्याभिक्षार्थी तिस्रो वाचः शनैरिव ॥ २ ॥ तं वासुकिः प्रत्यगृह्णादुदस्य भगिनीं तदा। न स तां प्रतिजग्राह न सनाम्नीति चिन्तयन् ॥ ३ ॥ सनाम्नीं चोद्यतां भार्य्यां गृह्णीयामिति तस्य हि। मनो निविष्टमभवज्जरत्कारोर्महात्मनः ॥ ४ ॥ तमुवाच महाप्राज्ञो जरत्कारुर्महातपाः। किंनाम्नी भगिनीयं ते ब्रूहि सत्यं भुजङ्गम ॥ ५ ॥

वासुकिरुवाच। जरत्कारो जरत्कारुः स्वसेयमनुजा मम। प्रतिगृह्णीष्व भार्य्यार्थे मया दत्तां सुमध्यमाम्। त्वदर्थं रक्षिता पूर्वं प्रतीच्छेमां द्विजोत्तम ॥ ६ ॥ एवमुक्ता ततः प्रादाद्भार्य्यार्थे वरवर्णिनीम्। स च तां प्रतिजग्राह विधिदृष्टेन कर्मणा ॥ ७ ॥

इत्यादिपर्वणि आस्तीके चतुर्दशोऽध्यायः ॥ १४ ॥

—•—

सौतिरुवाच। माता हि भुजगाः शप्ताः पूर्वं ब्रह्मविदाम्वर। जनमेजयस्य वो यज्ञे धक्ष्यत्यनिलसारथिः॥ १॥ तस्य शापस्य शान्त्यर्थं प्रददौ पन्नगोत्तम। स्वसारमृषये तस्मै सुव्रताय महात्मने॥ २॥ स च तां प्रतिजग्राह विधिदृष्टेन कर्मणा। आस्तीको नाम पुत्रस्य तस्यां जज्ञे महामनाः॥ ३॥ तपस्वी च महात्मा च वेदवेदाङ्गपारगः। शमः सर्वस्य लोकस्य पितृमातृभयापहः॥ ४॥ अथ दीर्घस्य कालस्य पाण्डवेयो नराधिपः। आजहार महायज्ञं सर्पसत्रमिति श्रुतिः॥ ५॥ तस्मिन् प्रवृत्ते सत्रे तु सर्पाणामन्तकाय वै। मोचयामास तान्नागानास्तीकः सुमहातपाः॥ ६॥ भ्रातृंश्च मातुलांश्चैव तथैवान्यान् स पन्नगान्। पितृंश्च तारयामास सन्तत्या तपसा तथा॥ ७॥ व्रतैश्च विविधैर्ब्रह्मन् स्वाध्यायैश्चानृणोऽभवत्। देवांश्च तर्पयामास यज्ञैर्विविधदक्षिणैः॥ ८॥ ऋषींश्च ब्रह्मचर्येण सन्तत्या च पितामहान्। अपहृत्य गुरुं भारं पितॄणां शंसितव्रतः॥ ९॥ जरत्कारुर्गतः स्वर्गं सहितः स्वैः पितामहैः। आस्तीकश्च सुतं प्राप्य धर्मं चानुत्तमं मुनिः॥ १०॥ जरत्कारुः सुमहता कालेन स्वर्गमीयिवान्। एतदाख्यानमास्तीकं यथावत्कथितं मया। प्रब्रूहि भृगुशार्दूल किमन्यत्कथयामि ते॥ ११॥

इत्यादिपर्वणि आस्तीके पञ्चदशोऽध्यायः॥ १५॥

—•—

शौनक उवाच। सौते त्वं कथयस्वेमां विस्तरेण कथां पुनः। आस्तीकस्य कवेः साधोः शुश्रूषा परमा हि नः॥ १॥ मधुरं कथ्यते सौम्य श्रुत्वाऽत्यद्भुतमीदृशं त्वया। प्रीयामहे भृशं तात पितेवेदं प्रभाषसे॥ २॥ अस्माच्छुश्रूषणे नित्यं पिता हि निरतस्तव। आचष्टैतद्यथाख्यानं पिता ते त्वं तथा वद॥ ३॥

सौतिरुवाच। आयुष्मन्निदमाख्यानमास्तीकं कथयामि ते। यथाश्रुतं कथयतः सकाशाद्दे पितुर्मया ॥ ४ ॥ पुरा देवयुगे ब्रह्मन् प्रजापतिसुते शुभे। आस्तां भगिन्यौ रूपेण समुपेतेऽङ्गुतैऽनघ ॥ ५ ॥ ते भार्ये कश्यपस्यास्तां कद्रूश्च विनता च ह। प्रादात्ताभ्यां वरं प्रीतः प्रजापतिसमः पतिः ॥ ६ ॥ कश्यपो धर्मपत्नीभ्यां मुदा परमया युतः। वरातिसर्गं श्रुत्वैवं कश्यपादुत्तमञ्च ते ॥ ७ ॥ हर्षादभ्यधिकां प्रीतिं प्रापतुः स्म वरस्त्रियौ। वव्रे कद्रूः सुतान्नागान् सहस्रं तुल्यवर्चसः ॥ ८ ॥ द्वौ पुत्रौ विनता वव्रे कद्रूः पुत्राधिकौ बले। तेजसा वपुषा चैव विक्रमेणाधिकौ च तौ ॥ ९ ॥ तस्यै भर्त्ता वरं प्रादादत्यर्थं पुत्रमीप्सितम्। एवमस्त्विति तं चाह कश्यपं विनता तदा ॥ १० ॥ यथावत् प्रार्थितं लब्ध्वा वरं तुष्टाभवत्तदा। कृतकृत्या तु विनता लब्ध्वा वीर्याधिकौ सुतौ ॥ ११ ॥ कद्रूश्च लब्ध्वा पुत्राणां सहस्रं तुल्यवर्चसाम्। धार्य्यौ प्रयत्नतो गर्भावित्युक्त्वा स महातपाः ॥ १२ ॥ ते भार्ये वरसन्तुष्टे कश्यपो वनमाविशत्।

सौतिरुवाच। कालेन महता कद्रूरण्डानां दशतीर्द्दश। जनयामास विप्रेन्द्र हे चाण्डे विनता तदा ॥ १३ ॥ तयोरण्डानि निदधुः प्रहृष्टाः परिचारिकाः। सोपस्वेदेषु भाण्डेषु पञ्चवर्षशतानि च ॥ १४ ॥ ततः पञ्चशते काले कद्रूपुत्रा विनिःसृताः। अण्डाभ्यां विनतायास्तु मिथुनं न व्यदृश्यत ॥ १५ ॥ ततः पुत्रार्थिनी देवी व्रीड़िता च तपस्विनी। अण्डं विभेद विनता तत्र पुत्रमपश्यत ॥ १६ ॥ पूर्वार्द्धकायसम्पन्नमितरेणाप्रकाशता। स पुत्रः क्रोधसंरब्धः शशापैनामिति श्रुतिः ॥ १७ ॥ योऽहमेवं कृतो मातस्त्वया लोभपरीतया। अरीरेणासमग्रेण तस्माद्दासी भविष्यसि ॥ १८ ॥ पञ्चवर्षशतान्यस्या यया विध्वर्द्धसे सह। एष च त्वां सुतो मातर्द्दासीत्वान्मोचयिष्यति ॥ १९ ॥ यद्येनमपि मातस्त्वं

मात्मिषाण्डविभेदनात्। न करिष्यस्यनङ्गं वा व्यङ्गं वापि यशस्विनम् ॥ २० ॥ प्रतिपालयितव्यस्ते जन्मकालोऽस्य धीरया। विशिष्टं बलमौष्ण्यान्त्या यच्चवर्षशतात्परः ॥ २१ ॥ एवं श्रुत्वा ततः पुत्रो विनतामन्तरीक्षगः। अरुणो दृश्यते ब्रह्मन् प्रभातसमये सदा ॥ २२ ॥ आदित्यरथमध्यास्ते सारथ्यं समकल्पयत्। गरुडोऽपि यथाकालं जज्ञे पन्नगभोजनः ॥ २३ ॥ स जातमात्रो विनतां परित्यज्य जगाम ह। आहारायात्मनो भोज्यमन्नं विहितमस्य यत्। विधात्रा क्षुधितो बालः क्षुधितः पतगेश्वरः ॥ २४ ॥

इत्यादिपर्वणि आस्तीके षोडशोऽध्यायः ॥ १६ ॥

सूत उवाच। एतस्मिन्नेव काले तु भगिन्यौ ते तपोधन। अपश्यतां समायातमुच्चैःश्रवसमन्तिकात् ॥ १ ॥ यत्तं देवगणाः सर्वे हृष्टरूपमपूजयन्। मथ्यमानेऽम्बुधौ जातमश्वरत्नमनुत्तमम् ॥ २ ॥ अमोघवलमश्वानामुत्तमं जगतां वरम्। श्रीमन्तमजरं दिव्यं सर्वलक्षणपूजितम् ॥ ३ ॥

शौनक उवाच। कथं तदमृतं देवैर्मथितं क्व च शंस मे। यत्र जज्ञे महावीर्यः सोऽश्वराजो महाद्युतिः ॥ ४ ॥

सौतिरुवाच। ज्वलन्तमचलं मेरुं तेजोराशिमनुत्तमम्। आच्छिन्नं प्रभया भानोः स्वशृङ्गैः काञ्चनोज्ज्वलैः ॥ ५ ॥ कनकाभरणं चित्रं देवगन्धर्वसेवितम्। अप्रमेयमनाधृष्यमधर्षबहुलैर्जनैः ॥ ६ ॥ व्यालैराचरितं घोरैर्हिंस्रौषधिविदीपितम्। नाकमाहत्य तिष्ठन्तमुच्छ्रयेण महागिरिम् ॥ ७ ॥ अगम्यं मनसाप्यन्यैर्नदीह्रदसमन्वितम्। नानापतगसङ्घैश्च नादितं सुमनोहरैः ॥ ८ ॥ तस्य शृङ्गमुपारुह्य वज्ररत्नाचितं शुभम्। अनन्तकल्पमजरं सुराः सर्वे महौजसः ॥ ९ ॥ ते [illegible] आ-

स्तवासीना दिवौकसः । अब्रुवाय समागम्य तपोनिधमसंयुताः ॥ १० ॥ तत्र नारायणो देवो ब्रह्माणमिदमब्रवीत् । चिन्तयत्सु सुरेष्वेवं मन्त्रयत्सु च सर्वशः ॥ ११ ॥ देवैरसुरसङ्घैश्च मथ्यतां क्षीरसागरः । भविष्यत्यमृतं तत्र मथ्यमाने महोदधौ ॥ १२ ॥ सर्वौषधीः समावाप्य सर्वरत्नानि चैव ह । मथ्नध्वमुदधिं देवा वेत्स्यध्वममृतं ततः ॥ १३ ॥

इत्यादिपर्वणि अमृतमथने सप्तदशोऽध्यायः ॥ १७ ॥

सौतिरुवाच । ततोऽभ्रशिखराकारैर्गिरिशृङ्गैरलङ्कृतम् । मन्दरं पर्वतवरं लताजालसमाकुलम् ॥ १ ॥ नानाविहगसङ्घुष्टं नानादंष्ट्रिसमाकुलम् । किन्नरैरप्सरोभिश्च देवैरपि च सेवितम् ॥ २ ॥ एकादशसहस्राणि योजनानां समुच्छ्रितम् । अधोभूमेः सहस्रेषु तावत्स्वेव प्रतिष्ठितम् ॥ ३ ॥ तमुद्धर्तुमशक्ता वै सर्वे देवगणास्तदा । विष्णुमासीनमभ्येत्य ब्रह्माणं चेदमब्रुवन् ॥ ४ ॥ भवन्तावत्र कुर्वातां बुद्धिं नैश्रेयसीं पराम् । मन्दरोद्धरणे यत्नः क्रियतां च हिताय नः ॥ ५ ॥

सौतिरुवाच । तथेति चाब्रवीद्विष्णुर्ब्रह्मणा सह भार्गव । अचोदयदमेयात्मा फणीन्द्रं पद्मलोचनः ॥ ६ ॥ ततोऽनन्तः समुत्थाय ब्रह्मणा परिचोदितः । नारायणेन चाप्युक्तस्तस्मिन् कर्मणि वीर्यवान् ॥ ७ ॥ अथ पर्वतराजानं तमनन्तो महाबलः । उज्जहार बलाद्ब्रह्मन् सवनं सवनौकसम् ॥ ८ ॥ ततस्तेन सुराः सार्धं समुद्रमुपतस्थिरे । तमूचुरमृतस्यार्थे निर्मथिष्यामहे जलम् ॥ ९ ॥ अपाम्पतिरथोवाच ममाप्यंशो भवेत्ततः । सोढास्मि विपुलं मन्दरभ्रमणादिति ॥ १० ॥ ऊचुश्च कूर्मराजानमक्षुपारे सुरासुराः । अधिष्ठानं गिरेरस्य भवान् भवितुमर्हति

॥ ११ ॥ कूर्मेण तु तथेत्युक्त्वा पृष्ठमस्य समर्पितम्। तं शैलं तस्य पृष्ठस्थं यन्त्रयेन्द्रो न्यपीड़यत् ॥ १२ ॥ मन्थानं मन्दरं कृत्वा तथा नेत्रञ्च वासुकिम्। देवा मथितुमारब्धाः समुद्रं निधिमम्भसाम् ॥ १३ ॥ अमृतार्थे पुरा ब्रह्मंस्तथैवासुरदानवाः। एकमन्त्रमुपाश्रिता नागराजो महासुराः ॥ १४ ॥ विबुधाः सहिताः सर्वे यतः पुच्छं ततः स्थिताः। अनन्तो भगवान्देवो यतो नारायणस्ततः। शिर उत्क्षिप्य नागस्य पुनः पुनरवाक्षिपत् ॥ १५ ॥ वासुकेरथ नागस्य सहसा क्षिप्यतः सुरैः। सधूमाः सार्चिषो वाता निष्पेतुरसकृन्मुखात् ॥ १६ ॥ ते धूमसङ्घाः सम्भूता मेघसङ्घाः सविद्युतः। अभ्यवर्षन् सुरगणान् श्रमसन्तापकर्षितान् ॥ १७ ॥ तस्माच्च गिरिकूटाग्रात् प्रच्युताः पुष्पवृष्टयः। सुरासुरगणान् सर्वान् समन्तात्समवाकिरन् ॥ १८ ॥ बभूवात्र महानादो महामेघरवोपमः उदधेर्मथ्यमानस्य मन्दरेण सुरासुरैः ॥ १९ ॥ तत्र नानाजलचरा विनिष्पिष्टा महाद्रिणा। विलयं समुपाजग्मुः शतशो लवणाम्भसि ॥ २० ॥ वारुणानि च भूतानि विविधानि महीधरः। पातालतलवासीनि विलयं समुपानयत् ॥ २१ ॥ तस्मिंश्च भ्राम्यमाणेऽद्रौ सङ्घृष्यन्तः परस्परम्। न्यपतन् पतगोपेताः पर्वताग्रान्महाद्रुमाः ॥ २२ ॥ तेषां सङ्घर्षजश्चाग्निरर्चिर्भिः प्रज्वलन्मुहुः। विद्युद्भिरिव नीलाभ्रमावृणोन्मन्दरं गिरिम् ॥ २३ ॥ ददाह कुञ्जरान्सर्वान् सिंहांश्चैव विनिर्गतान्। विगतासूनि सर्वाणि सत्त्वानि विविधानि च ॥ २४ ॥ तमग्निममरश्रेष्ठः प्रदहन्तमितस्ततः। वारिणा मेघजेनेन्द्रः शमयामास सर्वशः ॥ २५ ॥ ततो नानाविधास्तत्र सुस्रुवुः सागराम्भसि। महाद्रुमाणां निर्य्यासा वह्नयश्चौषधीरसाः ॥ २६ ॥ तेषाममृतवीर्य्याणां रसानां पयसैव च। अमरत्वं सुरा जग्मुः काञ्चनस्य च निश्चयात् ॥ २७ ॥ ततस्तस्य समुद्रस्य तज्जात-

मुदकं पयः । रसोत्तमैर्विमिश्रञ्च ततः क्षीरादभूद्घृतम् ॥ २८ ॥
ततो ब्रह्माणमासीनं देवा वरदमब्रुवन् । आज्यः स्म सुभृशं ब्रह्मन्नोऽवत्सलतश्च तत् ॥ २९ ॥ विना नारायणं देवं सर्वेऽन्ये देवदानवाः । चिरारब्धमिदञ्चापि सागरस्यापि मन्थनम् ॥३०॥ ततो नारायणं देवं ब्रह्मा वचनमब्रवीत् । विधत्स्वैषां बलं विष्णो भवानत्र परायणम् ॥ ३१ ॥

विष्णुरुवाच । बलं ददामि सर्वेषां कर्मैतत्ये समास्थिताः । क्षोभ्यतां कलशः सर्वैर्मन्दरः परिवर्त्यताम् ॥ ३२ ॥

सूत उवाच । नारायणवचः श्रुत्वा बलिनस्ते महोदधेः । तत्यजुः सहिता भूयश्चक्रिरे मथनाकुलम् ॥ ३३ ॥ ततः शत-सहस्रांशुर्मथ्यमानात्तु सागरात् । प्रसन्नात्मा समुत्पन्नः सोमः शीतांशुरुज्ज्वलः ॥३४॥ श्रीरनन्तरमुत्पन्ना घृतात्पाण्डरवासिनी । सुरादेवी समुत्पन्ना तुरगः पाण्डरस्तथा ॥ ३५ ॥ कौस्तुभस्तु मणिर्हित्वा उत्पन्नो घृतसम्भवः । मरीचिविकचः श्रीमान्नारायण उरोगतः ॥ ३६ ॥ (पारिजातस्तु तत्रैव सुरभिस्तु महामुने । अजायत तदा ब्रह्मन् सर्वकामफलप्रदे ॥३७॥) श्रीः सुरा चैव सोमश्च तुरगश्च मनोजवः । यतो देवास्ततो जग्मुरादित्यपथमाश्रिताः ॥ ३८ ॥ धन्वन्तरिस्ततो देवो वपुष्मानुदतिष्ठत । श्वेतं कम-ण्डलुं बिभ्रदमृतं यत्र तिष्ठति ॥३९॥ एतदत्यद्भुतं दृष्ट्वा दानवानां समुत्थितः । अस्तार्थं महान्नादो ममेदमितिजल्पताम् ॥ ४० ॥ श्वेतैर्हस्तैश्चतुर्भिस्तु महाकायस्ततः परम् । ऐरावणो महानागो-ऽभवद्वज्रभृता धृतः ॥ ४१ ॥ अतिनिर्मथनादेव कालकूटस्तथा-परः । जगदावृत्य सहसा सधूमोऽग्निरिव ज्वलन् ॥ ४२ ॥ त्रैलोक्यं मोहितं यस्य गन्धमाघ्राय तद्विषम् । प्राग्रसल्लोकरक्षार्थं ब्रह्मणो वचनाच्छिवः ॥ ४३ ॥ दधार भगवान् कण्ठे मन्त्रमूर्त्ति-र्महेश्वरः । तदाप्रभृति देवस्तु नीलकण्ठ इति श्रुतिः ॥ ४४ ॥

एतत्तदद्भुतं दृष्ट्वा निराशा दानवाः स्थिताः । अमृतार्थे च लक्ष्म्यर्थे महान्तं वैरमास्थिताः ॥ ४५ ॥ ततो नारायणो मायां मोहिनीं समुपाश्रितः । स्त्रीरूपमद्भुतं कृत्वा दानवानभिसंश्रितः ॥ ४६ ॥ ततस्तदमृतं तस्यै ददुस्ते मूढचेतसः । स्त्रियै दानवदैतेयाः सर्वे तद्गतमानसाः ॥ ४७ ॥

इत्यादिपर्वणि अमृतमन्थने अष्टादशोऽध्यायः ॥ १८ ॥

—०*०—

सौतिरुवाच । अथावरणमुख्यानि नानाप्रहरणानि च । प्रगृह्याभ्यद्रवन्देवान् सहिता दैत्यदानवाः ॥ १ ॥ ततस्तदमृतं देवो विष्णुरादाय वीर्यवान् । जहार दानवेन्द्रेभ्यो नरेण सहितः प्रभुः ॥ २ ॥ ततो देवगणाः सर्वे पपुस्तदमृतं तदा । विष्णोः सकाशात् संप्राप्य संभ्रमे तुमुले सति ॥ ३ ॥ ततः पिबत्सु तत्काले देवेष्वमृतमीप्सितम् । राहुर्विबुधरूपेण दानवः प्रापिबत्तदा ॥ ४ ॥ तस्य कण्ठमनुप्राप्ते दानवस्यामृते तदा । आख्यातं चन्द्रसूर्याभ्यां सुराणां हितकाम्यया ॥ ५ ॥ ततो भगवता तस्य शिरश्चक्रेण सूदितम् । चक्रायुधेन चक्रेण पिबतोऽमृतमोजसा ॥ ६ ॥ तच्छैलशृङ्गप्रतिमं दानवस्य शिरो महत् । चक्रच्छिन्नं खमुत्पत्य ननादातिभयङ्करम् ॥ ७ ॥ तत्कबन्धं पपातास्य विक्षुरद्वरणीतले । सपर्वतवनद्वीपां दैत्यस्याकम्पयन्महीम् ॥ ८ ॥ ततो वैरविनिर्बन्धः कृतो राहुमुखेन वै । भास्वतश्चन्द्रसूर्याभ्यां यस्मात्यद्यापि चैव तौ ॥ ९ ॥ विहाय भगवांस्त्यापि स्त्रीरूपमतुलं हरिः । नानाप्रहरणैर्भीमैर्दानवान् समकम्पयत् ॥ १० ॥ ततः प्रवृत्तः संग्रामः समीपे लवणाम्भसः । सुराणामसुराणाञ्च सर्वघोरतरो महान् ॥ ११ ॥ प्रासाश्च विपुलास्तीक्ष्णा न्यपतन्त सहस्रशः । तोमराश्च सुतीक्ष्णाग्राः शस्त्राणि विविधानि

च ॥ १२ ॥ ततोऽसुराश्चक्रभिन्ना वमन्तो रुधिरं बहु। असि-शक्तिगदाहस्ता निपेतुर्धरणीतले ॥ १३ ॥ छिन्नानि पट्टिशैश्चैव शिरांसि युधि दारुणैः। तप्तकाञ्चनचित्राणि निपेतुरनिशं तदा ॥ १४ ॥ रुधिरेणानुलिप्ताङ्गा निहताश्च महासुराः। अद्रीणा-मिव कूटानि धातुरक्तानि बिभ्रते ॥ १५ ॥ हाहाकारः समभव-त्तत्र तत्र सहस्रशः। अन्योन्यं छिन्दतां शस्त्रैरादित्ये लोहिता-यति ॥ १६ ॥ परिघैरायसैस्तीक्ष्णैः सन्निकर्षे च मुष्टिभिः। निघ्नतां समरेऽन्योन्यं शब्दो दिवमिवास्पृशत् ॥ १७ ॥ छिन्धि भिन्धि प्रधाव त्वं पातयाभिसरेति च। व्यश्रूयन्त महाघोराः शब्दास्तत्र समन्ततः ॥ १८ ॥ एवं सुतुमुले युद्धे वर्त्तमाने महा-भये। नरनारायणौ देवौ समाजग्मतुराहवम् ॥ १९ ॥ तत्र दिव्यं धनुर्दृष्ट्वा नरस्य भगवानपि। चिन्तयामास तच्चक्रं विष्णु-र्दानवसूदनम् ॥ २० ॥ ततोऽम्बराद्विनिर्यान्तमादित्यमिव भास्वरम्। चक्रमप्रतिमं घोरं ददृशे दानवैः सह ॥ २१ ॥ तदागतं ज्वलितहुताशनप्रभं भयङ्करं करिकरबाहुरच्युतः। मुमोच वै प्रबलबलवेगवान्महाप्रभं पर-नगरावदारणम् ॥ २२ ॥ तदन्तकान्तकसमानवर्चसं पुनः पुन-र्न्यपतत वेगवत्तदा। विदारयद्दितिसुतजान् सहस्रशः करैरितं पुरुषवरेण संयुगे ॥ २३ ॥ दहत् क्वचिज्ज्वलन इवावलेलिहत् प्रसह्य तानसुरगणान्प्रकृन्तत। प्रवेरितं वियति मुहुः चितौ तथा पपौ रणे रुधिरमथो पिशाचवत् ॥ २४ ॥ तथासुरा गिरि-शिखरैरदीनचेतसो मुहुर्मुहुः सुरगणमर्दयंस्तदा। महाबला विग-लितमेघवर्चसः सहस्रशो गगनमभिप्रपद्य च ॥ २५ ॥ अथाम्बरा-द्भयजननाः प्रपेदिरे सपादपा बहुविधमेघरूपिणः। महाद्रयः परिगलितायसानवः परस्परं द्रुतमभिहत्य सस्वनाः ॥ २६ ॥ ततो मही प्रविचलिता सकानना महाद्रिपाताभिहता समन्ततः। पर-

स्वरं भयमभिगर्जंतां मुञ्चरणाजिरे भयमभिमुखवर्त्तिते ॥ २७ ॥
नरस्ततो वरकनकाग्यभूषणैर्महेषुभिर्गगनपथं समावृणोत्। विदा-
रयन् गिरिगिखराणि पत्रिभिर्महाभयेऽसुरगणविग्रहे तदा ॥२८॥
ततो मही जवणजलञ्च सागरं महासुराः प्रविविशुरर्दिता: सुरैः।
वियद्गतं ज्वलितजटाग्रनप्रभं सुदर्शनं परिकुपितं निशम्य ते
॥ २९ ॥ ततः सुरैर्विजयमवाप्य सुन्दरः स्वमेव देशं गमितः
सुपूजितः। विनाश्य खं दिवमपि चैव सर्वशस्ततो गताः सलिल-
धरा यथागतम् ॥ ३० ॥ ततोऽमृतं सुनिहितमेव चक्रिरे सुराः
परां मुदमभिगम्य पुष्कलाम्। हृदो च तं निधिममृतस्य रचितुं
किरीटिने बलभिदथामरैः सह ॥ ३१ ॥

इत्यादिपर्वणि अमृतमन्थनं समाप्तं एकोनविंशोऽध्यायः ॥ १९ ॥

—०—

सौतिरुवाच। एतत्ते कथितं सर्वममृतं मथितं यथा। अत्र सोऽश्वः समुत्पन्नः श्रीमानतुलविक्रमः ॥ १ ॥ यं निशम्य तदा कद्रूर्विनतामिदमब्रवीत्। उच्चैःश्रवा हि किंवर्णो भद्रे ब्रूहि माचिरम् ॥ २ ॥

विनतोवाच। श्वेत एवाश्वराजोऽयं किं वा त्वं मन्यसे शुभे। ब्रूहि वर्णं त्वमप्यस्य ततोऽत्र विपणावहे ॥ ३ ॥

कद्रूरुवाच। कृष्णवालमहं मन्ये हयमेनं शुचिस्मिते। एहि सार्द्धं मया दीव्य दासीभावाय भामिनि ॥ ४ ॥

सौतिरुवाच। एवं ते समयं कृत्वा दासीभावाय वै मिथः। जग्मतुः स्वगृहानेव श्वो द्रक्ष्याव इति स्म ह ॥ ५ ॥ ततः सुतः सहस्रन्तु कद्रूर्जिह्मां चिकीर्षती। आज्ञापयामास तदा बालाभूवाञ्जनप्रभाः ॥ ६ ॥ आविशध्वं हयं क्षिप्रन्दासी न स्यामहं यथा। नावपद्यन्त ये वाक्यं तान् ययाप भुजङ्गमान् ॥ ७ ॥

सर्पसत्रे वर्त्तमाने पावको वः प्रधक्ष्यति । जनमेजयस्य राजर्षेः पाण्डवेयस्य धीमतः ॥ ८ ॥ शापमेनन्तु शुश्राव स्वयमेव पितामहः । अतिक्रूरं समुत्सृष्टं कद्रूा दैवादतीव हि ॥ ९ ॥ सार्द्धं देवगणैः सर्वैर्वाचं तामन्वमोदत । वज्रत्वं प्रेक्ष्य सर्पाणां प्रजानां हितकाम्यया ॥ १० ॥ तिग्मवीर्यविषा ह्येते दन्दशूका महाबलाः । तेषां तीक्ष्णविषत्वाद्धि प्रजानाञ्च हिताय च ॥ ११ ॥ युक्तं मात्रा कृतं तेषां परपीडोपसर्पिणाम् । अन्येषामपि सत्त्वानां नित्यं दोषपरास्तु ये ॥ १२ ॥ तेषां प्राणान्तिको दण्डो दैवेन विनिपात्यते । एवं सम्भाव्य देवस्तु पूज्य कद्रूञ्च तां तदा ॥ १३ ॥ आहूय कश्यपं देव इदं वचनमब्रवीत् । यदेते दन्दशूकाश्च सर्पा जातास्त्वयानघ ॥ १४ ॥ विषोल्बणा महाभोगा मात्रा यस्माः परन्तप । तत्र मन्युस्त्वया तात न कर्त्तव्यः कथञ्चन ॥ १५ ॥ दृष्टं पुरातनं ह्येतद्यज्ञे सर्पविनाशनम् । इत्युक्त्वा सृष्टिकृद्वह्मा प्रसाद्य प्रजापतिम् । प्रादाद्विषहरीं विद्यां कश्यपाय महात्मने ॥१६॥

इत्यादिपर्वणि सौपर्णे विंशोऽध्यायः ॥ २० ॥

—०*०—

सौतिरुवाच । ततो रजन्यां व्युष्टायां प्रभातेऽभ्युदिते रवौ । कद्रूश्च विनता चैव भगिन्यौ ते तपोधन ॥ १ ॥ अमर्षिते सुपर्णस्थे दास्ये कृतपणे तदा । जग्मतुस्तुरगं द्रष्टुमुच्चैःश्रवसमन्तिकात् ॥ २ ॥ ददृशातेऽथ ते तत्र समुद्रं निधिमम्भसाम् । महान्तमुदकागाधं क्षोभ्यमाणं महास्वनम् ॥ ३ ॥ तिमिभिर्गिलभिषाकीर्णं मकरैराहृतं तथा । सत्त्वैश्च बहुसाहस्रैर्नानारूपैः समाहतम् ॥ ४ ॥ भीषणैर्विकृतैरन्यैर्घोरैर्जलचरैस्तथा । सदैर्नित्यमनाधृष्यं कूर्मग्राहसमाकुलम् ॥ ५ ॥ आकरं सर्वरत्नानामालयं वरुणस्य च । नागानामालयं रम्यमुत्तमं सरितां पतिम् ॥ ६ ॥

पातालज्वलनावासमसुराणाञ्च बान्धवम्। भयङ्करञ्च सत्त्वानां पयसां निधिमव्ययम् ॥ ७ ॥ शुभं दिव्यममर्त्यानामद्भुतस्याकरं परम्। अप्रमेयमचिन्त्यञ्च सुपुण्यजलमद्भुतम् ॥ ८ ॥ घोरं जलचरारावरौद्रं भैरवनिःस्वनम्। गम्भीरावर्त्तकलिलं सर्वभूतभयङ्करम् ॥ ९ ॥ वेलान्दोलानिलबलं क्षोभोद्वेगसमुच्छ्रितम्। वीचीहस्तैः प्रचलितैर्नृत्यन्तमिव सर्वतः ॥ १० ॥ चन्द्रवृद्धिक्षयवशादुद्वृत्तोर्मिसमाकुलम्। पाञ्चजन्यस्य जननं रत्नाकरमनुत्तमम् ॥ ११ ॥ गां विन्दता भगवता गोविन्देनामितौजसा। वराहरूपिणा चान्तर्विक्षोभितजलाविलम् ॥ १२ ॥ ब्रह्मर्षिणा व्रतवता वर्षाणां शतमत्रिणा। अनासादितगाधञ्च पातालतलमव्ययम् ॥ १३ ॥ अध्यात्मयोगनिद्राञ्च पद्मनाभस्य सेवतः। युगादिकालशयनं विष्णोरमिततेजसः ॥ १४ ॥ वज्रपातनसन्त्रस्तमैनाकस्याभयप्रदम्। डिम्बाहवादितानाञ्च असुराणां परायणम् ॥ १५ ॥ वड़वामुखदीप्ताग्नेः स्रोतोहव्यप्रदं शिवम्। अगाधपारं विस्तीर्णमप्रमेयं सरित्पतिम् ॥ १६ ॥ महानदीभिर्वेगीभिः स्वर्द्वयेव सहस्रशः। अभिसार्य्यमाणमनिशं दृश्यते महार्णवम्। आपूर्य्यमाणमत्यर्थं नृत्यमानमिवोर्मिभिः ॥ १७ ॥ गम्भीरं तिमिमकरोग्रसंकुलं तं गर्जन्तं जलचररावरौद्रनादैः। विस्तीर्णं दृश्यतुरश्वरप्रकाशं तेऽगाधं निधिसुरमभ्यसामनन्तम् ॥ १८ ॥

इत्यादिपर्वणि सौपर्णे एकविंशतितमोऽध्यायः ॥ २१ ॥

सौतिरुवाच। नागाश्च सम्विदं कृत्वा कर्त्तव्यमिति तद्वचः। निःस्नेहा वै दहेन्माता असम्प्राप्तमनोरथा ॥ १ ॥ प्रसन्ना मोक्षयेदस्मांस्तस्माच्छापाच्च भाविनी। कृष्णं पुच्छं करिष्यामस्तुरगस्य न संशयः ॥ २ ॥ तथा हि गत्वा ते तस्य पुच्छे बाला इति

सुताः। एतस्मिन्नन्तरे ते तु सपत्न्यौ पणिते तदा ॥ ३ ॥ ततस्ते पणितं कृत्वा भगिन्यौ द्विजसत्तम। जग्मतुः परया प्रीत्या परं पारं महोदधेः ॥ ४ ॥ कद्रूश्च विनता चैव दाक्षायण्यौ विहायसा। आलोकयन्त्यावच्योभ्यं समुद्रं निधिमम्भसाम् ॥ ५ ॥ वायुनातीव सहसा क्षोभ्यमाणं महास्वनम्। तिमिङ्गिलसमाकीर्णं मकरैराहतं तथा ॥ ६ ॥ संवृतं बहुमाहस्रैः सत्त्वैर्नानाविधैरपि। घोरैर्घोरमनाधृष्यं गम्भीरमतिभैरवम् ॥ ७ ॥ आकरं सर्वरत्नानामालयं वरुणस्य च। नागानामालयञ्चापि सुरम्यं सरितां पतिम् ॥ ८ ॥ पातालज्वलनावासमसुराणां तथालयम्। भयङ्कराणां सत्त्वानां प्रयत्नो निधिमव्ययम् ॥ ९ ॥ शुभं दिव्यममर्त्यानामद्भुतस्याकरं परम। अप्रमेयमचिन्त्यञ्च सुपुण्यजलसंमितम् ॥ १० ॥ महानदीभिर्वेगीभिरुह्यमानं तत्र सहस्रशः। आपूर्यमाणमत्यर्थं नृत्यन्तमिव चोर्मिभिः ॥ ११ ॥ इत्येवं तरलतरोर्मिसंकुलं तं गम्भीरं विकसितमम्बरप्रकाशम्। पातालज्वलनशिखाविदीपिताङ्गं गर्जन्तं द्रुतमभिजग्मतुस्ततस्ते ॥ १२ ॥

इत्यादिपर्वणि सौपर्णे समुद्रदर्शनं नाम
द्वाविंशतितमोऽध्यायः ॥ २२ ॥

—०—

सूत उवाच। तं समुद्रमतिक्रम्य कद्रूर्विनतया सह। न्यपतत्तुरगाभ्यासे नचिरादिव शीघ्रगा ॥ १ ॥ ततस्ते तं हयश्रेष्ठं ददृशाते महाजवम्। शशाङ्ककिरणप्रख्यं कालवालमुभे तदा ॥ २ ॥ निशम्य च बहून्वालान् कृष्णान् पुच्छसमाश्रितान्। विषरूपां विनतां कद्रूर्दास्ये न्ययोजयत् ॥ ३ ॥ ततः सा विनता तस्मिन् पणितेन पराजिता। अभवद्दुःखसन्तप्ता दासीभावं समाश्रिता ॥ ४ ॥ एतस्मिन्नन्तरे चापि गरुडः काल

आगते। विना मात्रा महातेजा विदार्य्याण्डमजायत ॥ ५ ॥ महासत्त्ववलोपेतः सर्वा विद्योतयन्दिशः। कामरूपः कामगमः कामवीर्य्यो विहङ्गमः ॥ ६ ॥ अग्निराशिरिवोद्गच्छन् समिद्धोऽतिभयङ्करः। विद्युद्विस्पष्टपिङ्गाक्षो युगान्ताग्निसमप्रभः ॥ ७ ॥ प्रहृष्टः सहसा पक्षी महाकायो नभोगतः। घोरो घोरस्वनो रौद्रो वह्निरौर्व इवापरः ॥ ८ ॥ तं दृष्ट्वा शरणं जग्मुर्देवाः सर्वे विभावसुम्। प्रणिपत्याब्रुवंस्तत्रासीनं विग्रहरूपिणम् ॥ ९ ॥ अग्ने मा त्वं प्रवर्द्धिष्ठाः क्वचिन्नो न दिधक्षसि। असौ हि राशिः सुमहान् समिद्धस्तव सर्पति ॥ १० ॥

अग्निरुवाच। नैतदेवं यथा यूयं मन्यध्वमसुरार्दनाः। गरुडो बलवानेष मम तुल्यश्च तेजसा ॥ ११ ॥ जातः परमतेजस्वी विनतानन्दवर्द्धनः। तेजोराशिमिमं दृष्ट्वा युष्मान्मोहः समाविशत् ॥ १२ ॥ नागक्षयकरश्चैव काश्यपेयो महाबलः। देवानाञ्च हिते युक्तश्चरितो दैत्यरक्षसाम् ॥ १३ ॥ न भीः कार्य्या कथं चात्र पश्यध्वं सहिता मम ॥ १४ ॥ एवमुक्तास्तदा गत्वा गरुडं वाग्भिरस्तुवन्। ते दूरादब्रुवंस्तत्रैनं देवाः सर्षिगणास्तदा ॥ १५ ॥

देवा ऊचुः। त्वच्चक्षुं महाभागक्षं देवः पतगेश्वरः। त्वं प्रभुश्चपनः सूर्य्यः परमेष्ठी प्रजापतिः ॥ १६ ॥ त्वमिन्द्रश्चं हयमुखश्चं शरश्चं जगत्पतिः। त्वं मुखं पद्मजो विप्रश्चमग्निः पवनश्चया ॥ १७ ॥ त्वं हि धाता विधाता च त्वं विष्णुः सुरसत्तम। त्वं महानभिभूः शश्वद्दक्षतं त्वं महद्यशः ॥ १८ ॥ त्वं प्रभाश्चमभिप्रेतं त्वं लक्षाणमनुत्तमम्। वज्रोर्जिमान् साधुरदीनसत्त्वः सद्भिमान् दुर्विषहश्चनेव। त्वत्तः श्रुतं सर्वमहीनकीर्त्तेर्भूतभागतं चोपगतं च सर्वम् ॥ १९ ॥ त्वमुत्तमः सर्वमिदं चराचरं गभस्तिभिर्भानुरिवावभासते। समाविशन् भानुमतः प्रभां शुभां श्चनन्तकः सर्वमिदं ध्रुवाध्रुवम् ॥ २० ॥ दिवाकरः परि-

कुपितो यथा दहेत् प्रजास्तथा दहसि ऊताशनप्रभ । भयङ्करः प्रलय इवाग्निरुत्थितो विनाशयन् युगपरिवर्त्तनान्तकृत् ॥ २१ ॥ खगेश्वरं शरणमुपागता वयं महौजसं ज्वलनसमानवर्च्चसम् । तडित्प्रभं वितिमिरमभ्रगोचरं महाबलं गरुडमुपेत्य खेचरम् ॥ २२ ॥ परावरं वरदमजय्यविक्रमं तवौजसा सर्वमिदं प्रतापितम् । जगत्प्रभो तपसुवर्णवर्च्चसा त्वं पाहि सर्वांश्च सुरान्महाबलः ॥ २३ ॥ भयान्विता नभसि विमानगामिनो विमानिता विपथगतिं प्रयान्ति ते । ऋषेः सुतस्त्वमसि दयावतः प्रभो महाबलः खगवर कश्यपस्य ह ॥ २४ ॥ स मा क्रुधः कुरु जगतो दयां परां त्वमीश्वरः प्रशमसुपैहि पाहि नः । महाशनिस्फुरित समस्वनेन ते दिशोऽम्बरं विदिवमिवच्च मेदिनी ॥ २५ ॥ चलन्ति नः खग हृदयानि चानिशं निरीक्षतां वपुरिदमग्निसन्निभम् । तव द्युतिं कुपितकृतान्तसन्निभां निशम्य नश्चलति मनोऽव्यवस्थितम् । प्रसीद नः पतगपते प्रयाचतां शिवश्च नो भव भगवन् सुखावहः ॥ २६ ॥ एवं स्तुतः सुपर्णस्तु देवैः सर्षिगणैस्तदा । तेजसः प्रतिसंहारमात्मनः स चकार ह ॥ २७ ॥

इत्यादिपर्वणि सौपर्णे सौपर्णस्तुतौ त्रयोविंशोऽध्यायः ॥ २३ ॥

—•—

सौतिरुवाच । स श्रुत्वायाचनो देहं सुपर्णः प्रेक्ष्य च स्वयम् । शरीरप्रतिसंहारमात्मनः संप्रचक्रमे ॥ १ ॥

सुपर्ण उवाच । न मे सर्वाणि भूतानि विभियुर्देहदर्शनात् । भीमरूपात्मसुद्विग्नास्तस्मात्तेजस्तु संहरे ॥ २ ॥

सौतिरुवाच । ततः कामगमः पक्षी कामवीर्यो विहङ्गमः । ऊरुणं चात्मनः पुत्रमारोप्य स पितुर्गृहात् ॥ ३ ॥ मातुरन्तिकमागच्छत्परं तीरं महोदधेः । तत्रारुणस्य निचिक्षेप दिशं

पूर्वां महाद्युतिः। सूर्यस्तेजोभिरत्युग्रैर्लोकान्दग्धुमना यदा ॥ ४ ॥

ऋरुरुवाच। किमर्थं भगवान् सूर्यो लोकान् दग्धुमनास्तदा। किमस्यापकृतं देवैर्येनेमं मन्युराविशत् ॥ ५ ॥

प्रमतिरुवाच। चन्द्रादित्यैर्यदा राहुराख्यातो ह्यमृतं पिबन्। वैरानुबन्धं कृतवांश्चन्द्रादित्ये तदानघ ॥ ६ ॥ बध्यमाने ग्रहेणाथ आदित्ये मन्युराविशत्। सुरार्थाय समुत्पन्ना रोषो राहोस्तु मां प्रति ॥ ७ ॥ बह्वनर्थकरं पापमेकोऽहं समवाप्नुयाम्। सहाय एव कार्येषु न च कृच्छ्रेषु दृश्यते ॥ ८ ॥ पश्यन्ति ग्रस्यमानं मां सहन्ते वै दिवौकसः। तस्माल्लोकविनाशार्थं ह्यवतिष्ठे न संशयः ॥ ९ ॥ एवं कृतमतिः सूर्यो ह्यस्तमभ्यगमद्गिरिम्। तस्माल्लोकविनाशाय संतापयत भास्करः ॥ १० ॥ ततो देवानुपागम्य प्रोचुरेनं महर्षयः। अद्यार्धरात्रसमये सर्वलोकभयावहः। उत्पत्स्यते महान्दाहस्त्रैलोक्यस्य विनाशनः ॥ ११ ॥ ततो देवाः सर्षिगणा उपगम्य पितामहम्। अब्रुवन् किमिवेहाद्य महद्दाहकृतं भयम् ॥ १२ ॥ न तावद्दृश्यते सूर्यः क्षयोऽयं प्रतिभाति च। उदिते भगवन् भानौ कथमेतद्भविष्यति ॥ १३ ॥

पितामह उवाच। एष लोकविनाशाय रविरुद्यन्तुमुद्यतः। दृश्यत्वेव हि लोकान् स भस्मराशी करिष्यति ॥ १४ ॥ तस्य प्रतिविधानञ्च विहितं पूर्वमेव हि ॥ १५ ॥ कश्यपस्य सुतो धीमानरुणेत्यभिविश्रुतः। महाकायो महातेजाः स स्थास्यति पुरो रवेः ॥ १६ ॥ करिष्यति च सारथ्यं तेजश्चास्य हरिष्यति। लोकानां स्वस्ति चैव स्याद्यतीनाञ्च दिवौकसाम् ॥ १७ ॥

प्रमतिरुवाच। ततः पितामहाज्ञातः सर्वं चक्रे तदारुणः। उदितश्चैव सविता ह्यरुणेन समाहृतः ॥ १८ ॥ एतत्ते सर्व-

आख्यातं यत् सूर्य्यं मन्युराविशत्। ततश्च यथैवास्य सारथ्य-
मकरोत्प्रभुः। भूय एवापरं ब्रह्मन् शृणु पूर्वमुदाहृतम् ॥ १९ ॥

इत्यादिपर्वणि सौपर्णे चतुर्विंशतितमोऽध्यायः ॥ २४ ॥

—०:०—

सौतिरुवाच। ततः कामगमः पक्षी महावीर्यो महाबलः।
मातुरन्तिकमागच्छत्वरं पारं महोदधेः ॥ १ ॥ यत्र सा विनता
तस्मिन् पणितेन पराजिता। अतीव दुःखसन्तप्ता दासीभाव-
मुपागता ॥ २ ॥ ततः कदाचिद्विनतां प्रणतां पुत्रसन्निधौ।
काले चाह्वय वचनं कद्रूरिदमभाषत ॥ ३॥ नागानामालय भद्रे
सुरम्यं चारुदर्शनम्। समुद्रकुक्षावेकान्ते तत्र मां विनते नय
॥ ४ ॥ ततः सुपर्णमाता तामवहत्प्रेषमातरम्। पन्नगान् गरु-
ड़श्चापि मातुर्वचनचोदितः ॥ ५ ॥ स सूर्य्यमभितो याति वैन-
तेयो विहङ्गमः। सूर्य्यरश्मिप्रतप्ताश्च मूर्छिताः पन्नगाभवन् ॥६॥
तदवस्थान् सुतान् दृष्ट्वा कद्रूः शक्रमथास्तुवत्। नमस्ते सव-
देवेश नमस्ते बलसूदन ॥ ७ ॥ नमुचिघ्न नमस्तेऽस्तु सहस्राक्ष
शचीपते। सर्पाणां सूर्य्यतप्तानां वारिणा त्वं प्रभो भव ॥ ८ ॥
त्वमेव परमं त्राणमस्माकममरोत्तम। ईड्यो ह्यसि पथः स्रष्टुं
त्वमनल्पं पुरन्दर ॥ ९ ॥ त्वमेव वायुस्त्वं मेघस्त्वमग्निर्विद्युतो-
ऽम्बरे। त्वमभ्रगणविक्षेप्ता त्वामेवाहुर्महाघनम् ॥ १० ॥ त्वं
वज्रमतुलं घोरं घोषवांस्त्वं बलाहकः। स्रष्टा त्वमेव लोकानां
संहर्त्ता चापराजितः ॥ ११ ॥ त्वं ज्योतिः सर्वभूतानां त्वमा-
दित्यो विभावसुः। त्वं महद्भूतमाश्चर्य्यं त्वं राजा त्वं सुरोत्तमः
॥ १२ ॥ त्वं विष्णुस्त्वं सहस्राक्षस्त्वं देवस्तं परायणः। त्वं सर्व-
ममृतं देव त्वं सोमः परमार्चितः ॥ १३ ॥ त्वं मुहूर्त्तस्तिथिश्च त्वं
लवश्च त्वं पुनः क्षणः। शुक्लस्त्वं बहुलस्त्वं च कला काष्ठा

तुष्टिस्तथा । सम्वत्सरर्तवो मासा रजन्यश्च दिनानि च ॥ १४ ॥
त्वमुत्तमा सगिरिवना वसुन्धरा समाकरं वितिमिरमम्बरं तथा ।
महोदधिः सतिमितिमिङ्गिलस्तथा महोर्मिमान्बहुमकरोझषाकुलः
॥ १५ ॥ महायशास्त्वमिति सदाभिपूज्यसे मनीषिभिर्मुदित-
मनोमहर्षिभिः । अभिष्टुतः पिबसि च सोममध्वरे वषट्कृता-
न्यपि च हवींषि भूतये ॥ १६ ॥ त्वं विप्रैः सततमिहेज्यसे फलार्थं
वेदाङ्गेष्वतुलबलोऽपि गीयसे च । तद्धेतोर्यजनपरायणा द्विजेन्द्रा
वेदाङ्गान्यभिगमयन्ति सर्वयत्नैः ॥ १७ ॥

इत्यादिपर्वणि पौलोमे पञ्चविंशतितमोऽध्यायः ॥ २५ ॥

—•—

सौतिरुवाच । एवं स्तुतस्तदा कद्रू भगवान् हरिवाहनः ।
नीलजीमूतसंघातैः सर्वमम्बरमावृणोत् । मेघानाज्ञापयामास
वर्षध्वमम्बरं शुभम् ॥ १ ॥ ते मेघा मुमुचुस्तोयं प्रभूतं विद्यु-
दुज्ज्वलाः । परस्परमिवात्यर्थं गर्ज्जन्तः सततं दिवि ॥ २ ॥
सम्पूर्त्तमिवाकाशं जलदैः सुमहाद्भुतैः । ह्रदज्ञिरतुलं तोय-
मजस्रं सुमहारवैः ॥ ३ ॥ संप्रवृत्तमिवाकाशं धारोर्मिभिरनेकशः ।
मेघस्तनितनिर्घोषैर्विद्युत्पवनकम्पितैः ॥ ४ ॥ तैर्मेघैः सततासारं
वर्षद्भिरनिशन्तदा ॥ ५ ॥ नष्टचन्द्रार्ककिरणमम्बरं समपद्यत ।
नागानामुत्तमो हर्षात्तदा वर्षति वासवे ॥ ६ ॥ आपूर्य्यत मही
चापि सलिलेन समन्ततः । रसातलमनुप्राप्तं शीतलं विमलं जलम् ।
तदा भूरभवच्छन्ना जलोर्मिभिरनेकशः ॥ ७ ॥ रामणीयक-
मागच्छन्मात्रा सह भुजङ्गमाः ॥ ८ ॥

इत्यादिपर्वणि पौलोमे षड्विंशतितमोऽध्यायः ॥ २६ ॥

———

सौतिरुवाच । तस्मिन्हृष्टास्ततो नागा जलधाराश्च तादृशाः । सुपर्णेनोह्यमानास्ते जग्मुस्तं द्वीपमाशु वै ॥ १ ॥ तं द्वीपं मकरावासं विहितं विश्वकर्मणा । तत्र ते लवणं घोरं ददृशुः पूर्वमागताः ॥ २ ॥ सुपर्णसहिताः सर्वे: काननञ्च मनोरमम् । सागराम्बुपरिक्षिप्तं पक्षिसङ्घनिनादितम् ॥ ३ ॥ विचित्रकल-पुष्पाभिर्वनराजीभिरावृतम् । भवनैराततं रम्यैस्तथा पद्माकरैरपि ॥ ४ ॥ प्रमत्तमत्तिलैश्चापि शुभैर्द्विजविभूषितम् । दिव्य-गन्धवहैः पुण्यैर्माकतैरुपवीजितम् ॥ ५ ॥ उत्पतद्भिरिवाकाशं हृष्टैर्मेघरवैरपि । मयूरैर्नृत्यमानैश्च सुरुचिरैरतीव हि ॥ ६ ॥ वायुविक्षिप्तकुसुमैस्तथान्यैरपि पादपैः । किरद्भिरिव तत्रस्था-न्नागान् पुष्पाम्बुवृष्टिभिः ॥ ७ ॥ मनःसंहर्षजं दिव्यं गन्धर्वो-ऽप्सरसां प्रियम् । मत्तभ्रमरसङ्घुष्टं मनोज्ञाकृतिदर्शनम् ॥ ८ ॥ रमणीयं शिवं पुण्यं सर्वैर्ऋतुभिरुत्तरैः । नानापक्षिरुतं रम्यं ऋद्धं पुष्पप्रदर्शनम् ॥ ९ ॥ तत्रते वनं समासाद्य विजह्रुः पन्नगास्तदा । अब्रवंश्च महावीर्यं सुपर्णं पतगेश्वरम् ॥ १० ॥ वहास्मानपरं द्वीपं सुरम्यं विमलोदकम् । त्वं हि देशान् बहून् रम्यान् व्रजन् पश्यसि खेचर ॥ ११ ॥ स विचिन्त्याब्रवीत्तत्रो मातरं विनतां तदा । किं कारणं मया मातः कर्त्तव्यं सर्पभाषितम् ॥ १२ ॥

विनतोवाच । दासीभूताऽस्मि दुर्योगात्सपत्न्याः पतगोत्तम । पणं वितथमास्थाय सर्पैरुपधिना कृतम् ॥ १३ ॥ तस्मिंस्तु कथिते माता कारणे गगनेचरः । उवाच वचनं सर्पांस्तेन दुःखेन दुःखितः ॥ १४ ॥ किमाहृत्य विदित्वा वा किम्वा कृत्वेह पौरुषम् । दास्याद्वो विप्रमुच्येयं तथ्यं वदत खेलिहाः ॥ १५ ॥

सौतिरुवाच । श्रुत्वा तमब्रुवन् सर्पा आहरामृतमोजसा । ततो दास्याद्विप्रमोक्षो भविता तव खेचर ॥ १६ ॥

इत्यादिपर्वणि सौपर्णे सप्तविंशतितमोऽध्यायः ॥ २७ ॥

सौतिरुवाच । इत्युक्तो गरुडः सर्पैस्ततो मातरमब्रवीत् । गच्छाम्यहमृतमाहर्त्तुं भक्ष्यमिच्छामि वेदितुम् ॥ १ ॥

विनतोवाच । समुद्रकुक्षावेकान्ते निषादालयमुत्तमम् । निषादानां सहस्राणि तान् भुक्त्वामृतमानय ॥ २ ॥ न च ते ब्राह्मणं हन्तुं कार्य्या बुद्धिः कथञ्चन । अवध्यः सर्वभूतानां ब्राह्मणो ह्यनलोपमः ॥ ३ ॥ अग्निरर्कौ विषं शस्त्रं विप्रो भवति कोपितः । गुरुर्हि सर्वभूतानां ब्राह्मणः परिकीर्त्तितः । एवमादिभिरूपैस्तु सतां वै ब्राह्मणो मतः ॥ ४ ॥ स ते तात न हन्तव्यः संक्रुद्धेनापि सर्वथा । ब्राह्मणानामभिद्रोहो न कर्त्तव्यः कथञ्चन ॥ ५ ॥ न ह्येवमग्निर्नादित्यो भस्म कुर्य्यात्तथानघ । यथा कुर्य्यादभिक्रुद्धो ब्राह्मणः संशितव्रतः ॥ ६ ॥ तदेतैर्विविधैर्लिङ्गैर्ज्ञेयं विद्वांसं द्विजोत्तमम् । भूतानामग्रभूर्विप्रो वर्णश्रेष्ठः पिता गुरुः ॥ ७ ॥

गरुड उवाच । किंरूपो ब्राह्मणो मातः किंशीलः किंपराक्रमः । किं स्विदग्निनिभो भाति किंस्वित्सौम्यप्रदर्शनः ॥ ८ ॥ यथाहमभिजानीयां ब्राह्मणं लक्षणैः शुभैः । तन्मे कारणतो मातः प्रच्छतो वक्तुमर्हसि ॥ ९ ॥

विनतोवाच । यस्ते कण्ठमनुप्राप्तो निगीर्णं वडिशं यथा । दहेदङ्गारवत्पुत्र तं विद्या ब्राह्मणर्षभम् ॥ १० ॥ विप्रस्वया न हन्तव्यः संक्रुद्धेनापि सर्वदा । प्रोवाच चैनं विनता पुत्रस्नेहादिदं वचः ॥ ११ ॥ जठरे न च जीर्य्येद्यस्तं जानीहि द्विजोत्तमम् । पुनः प्रोवाच विनता पुत्रस्नेहादिदं वचः ॥ १२ ॥ जानन्त्यप्यतुलं वीर्य्यं माशीर्वादपरायणा । प्रीता परमदुःखार्त्ता नागैर्विप्रकृता सती ॥ १३ ॥

विनतोवाच । पक्षौ ते मारुतः पातु चन्द्रसूर्य्यौ च पृष्ठतः । शिरश्च पातु वक्त्रस्थो वसवः सर्वतस्तनुम् ॥ १४ ॥ अक्षयं ते सदा

पुत्र शान्तिस्वस्तिपरायणा। इहासीना भविष्यामि स्वस्तिकारे रता सदा। अरिष्टं व्रज पन्थानं पुत्र कार्य्यार्थसिद्धये ॥ १५ ॥

सौतिरुवाच। ततः स मातुर्वचनं निशम्य वितत्य पक्षौ नभ उत्पपात। ततो निषादान् बलवानुपागतो बुभुक्षितः काल इवान्तकोऽपरः ॥ १६ ॥ स तान्निषादानुपसंहरंस्तदा रजः समुद्धूय नभःस्पृशं महत्। समुद्रकुक्षौ च विशोषयन् पयः समीपजान् भूधरजान् विचालयन् ॥ १७ ॥ ततः स चक्रे महदाननं तदा निषादमार्गं प्रतिरुध्य पक्षिराट्। ततो निषादास्त्वरिताः प्रवव्रजुर्यतो मुखं तस्य भुजङ्गभोजिनः ॥ १८ ॥ तदाननं विहतमतिप्रमाणवत्समभ्युपागमन्निवार्हिताः खगाः। सहस्रशः पवनरजोविमोहिता यथानिलप्रचलितपादपे वने ॥ १९ ॥ ततः खगो वदनमभित्वतापनः समाहरत्यरिचपलो महाबलः। निशूदयन्बहुविधमत्स्यजीविनो बुभुक्षितो गगनचरेश्वरस्तदा ॥ २० ॥

इत्यादिपर्वणि सौपर्णे अष्टाविंशोऽध्यायः ॥ २८ ॥

—•—

सौतिरुवाच। तस्य कण्ठमनुप्राप्तो ब्राह्मणः सह भार्य्यया। दह्यन्दीप्त इवाङ्गारस्तमुवाचान्तरीक्षगः ॥ १ ॥ द्विजोत्तम विनिर्गच्छ त्वरमाणस्यादहतात्। न हि मे ब्राह्मणो वध्यः पापेष्वपि रतः सदा ॥ २ ॥ ब्रुवाणमेवं गरुडं ब्राह्मणः प्रत्यभाषत। निषादी मम भार्य्येयं निर्गच्छतु मया सह ॥ ३ ॥

गरुड़ उवाच। एतामपि निषादीं त्वं परिगृह्याशु निष्पत। त्वरं सम्भावयात्मानमजीर्णं मम तेजसा ॥ ४ ॥

सौतिरुवाच। ततः स विप्रो निष्क्रान्तो निषादीसहितस्तदा। वर्द्धयित्वा च गरुडमिष्टं देशं जगाम ह ॥ ५ ॥ सह भार्य्यां विनिष्क्रान्ते तस्मिन् विप्रे च पक्षिराट्। वितत्य पक्षा-

दाक्षायणसुतायात मनोजवः। ६॥ ततोऽपश्यत्स पितरं दृष्ट्वा-
ख्यातवान् पितुः। यथाख्यायमनेयात्मा तज्जोवाच महाऋषिः॥७॥

कश्यप उवाच। कच्चिदः कुशलं नित्यं भोजने बञ्जुल सुत।
कच्चित्त मातुषे लोके तवान्नं विद्यते बहु॥ ८॥

गरुड़ उवाच। माता मे कुशला ब्रह्मन्तथा भ्राता तथाऽहम्। न हि मे कुशलं तात भोजने बहुले सदा॥ ९॥
अहं हि सर्पैः प्रहितः सोममाहर्त्तुमुत्तमम्। मातुर्दास्यविमो-
क्षार्थमाहरिष्ये तदद्य वै॥ १०॥ माता चात्र समादिष्टा निषा-
दान् भक्षयेति ह। न च मे तृप्तिरभवद्भक्षयित्वा सहस्रशः॥११॥
तद्भोजनं त्वमपरं भगवन् प्रदिशस्व मे। यद्भुक्त्वाऽमतमाहर्त्तुं
समर्थः स्यामहं प्रभो। तृप्तिर्यावद्विधातार्थं भक्तमाख्यातु मे
भवान्॥ १२॥

कश्यप उवाच। दूरं गतो महापुण्यं देवलोकोऽपि विश्रु-
तम्। यत्र कुमोदवत् कृष्णो सदा कमलवाङ्मुखः॥ १३॥
तयोर्जेष्ठान्तरे तैरं भक्षभक्ष्याद्यमेषतः। तन्मे तत्त्वं निबोधस्व
यत्प्रभावौ च तावुभौ॥ १४॥ आसीद्विभावसुर्नाम महर्षिः
सोमनो भुवि। भ्राता तस्यानुजश्चासीत् सुप्रतीको महातपाः
॥ १५॥ स नेच्छति धनं भ्राता सहैकस्थं महामुनिः। विभागं
कर्त्तुमेव सुप्रतीको हि नित्यशः॥ १६॥ अथाब्रवीच्च तं
भ्राता सुप्रतीकं विभावसुः। विभागं बहवो मोहात्कर्त्तु-
मिच्छन्ति नित्यशः॥ १७॥ ततो विभक्तास्त्वन्योन्यं विरुध्यन्तोऽर्थ-
मोहिताः। तमः स्वार्थपरान्मूढान् दृष्ट्वा भूतान् स्वकैर्वनैः॥ १८॥
विदित्वा भेदबुद्ध्यैतानभिन्ना भिन्नरूपिणः। विदित्वा चापरे
भिन्नानन्तरेषु वनेष्वथ॥ १९। भिन्नानामतुलो नाशः क्षिप्र-
मेव प्रवर्त्तते। तस्माद्विभागं भ्रातृणां न प्रशंसन्ति साधवः
॥ २०॥ शुक्लशाखेऽनिबद्धानामन्योन्येनाभिशङ्किनाम्। निबद्धं

न हि शक्ष्यं भेदतो धनञ्जयम् ॥२१॥ यस्माच्चस्मात् सुप्रतीक हस्तित्वं समवाप्स्यसि। अप्रमेयं सुप्रतीको विभावसुमथाब्रवीत् ॥ २२ ॥ त्वमप्यत्रार्ज्जवचरः कच्छपः संभविष्यसि। एवमन्योन्यापराधौ सुप्रतीकविभावहू ॥ २३ ॥ गजकच्छपतां प्राप्तावर्षार्थं मूढचेतसौ। रोषदोषानुषङ्गेण तिर्य्यग्योनिगतावुभौ ॥ २४ ॥ परस्परहेषरतौ प्रमाणबलदर्पितौ। सरस्यस्मिन्महाकायौ पूर्ववैरानुसारिणौ ॥ २५ ॥ तयोरन्यतरः श्रीमान् समुपैति महागजः यस्य हर्षितशब्देन कूर्मोऽप्यन्तर्ज्जलेशयः ॥२६॥ स्थलिनोऽमी महाकायाः क्षुत्क्षं विक्षोभयन् सरः। यं दृष्ट्वा वेष्टतकरः परालेप गजो जलम् ॥ २७ ॥ दलदक्षाग्रलाङ्गूलपादवेगेन वीर्य्यवान्। विक्षोभयंस्ततो नागः सरो बहूक्षग्राकुलम् ॥ २८ ॥ कूर्मोऽप्यभ्युद्धतशिरा युद्धायाभ्येति वीर्य्यवान्। षड्योजनो योजनानि गजस्तद्द्विगुणायतः ॥ २९ ॥ कूर्मस्त्रियोजनोत्सेधो दशयोजनमण्डलः। तावुभौ युद्धमत्तौ परस्परवधैषिणौ ॥ ३० ॥ अवयुज्याशु कर्मेदं साधयेहितमात्मनः। महाभ्रघनसङ्काशं तं भुक्त्वामृतमानय। महागिरिसमप्रख्यं घोररूपञ्च हस्तिनम् ॥३१॥

सौतिरुवाच। इत्युक्त्वा गरुडः सोऽथ माङ्गल्यमकरोत्तदा ॥ ३२ ॥ युध्यतः सह देवैस्ते शुभं भवतु मङ्गलम्। पूषाकुर्म्यो द्विजा गावो यच्चान्यत्किञ्चिदुत्तमम् ॥ ३३ ॥ शुभं स्वस्त्ययनं चापि भविष्यति तवाच्युत। युध्यमानस्य संग्रामे देवैः सार्द्धं महाबल ॥ ३४ ॥ ऋचो यजूंषि नामानि पवित्राणि हवींषि च। रहस्यानि च सर्वाणि सर्वे वेदास्त्वं बलम् ॥ ३५ ॥ इत्युक्तो गरुडः पित्रा गतस्तं ह्रदमक्षिभ्याम्। अपश्यत्सुमहज्जलं नानापक्षिसमाकुलम् ॥ ३६ ॥ स तत् दृष्ट्वा पितुर्वाक्यं श्रीमवेगोऽन्तरीक्षगः। नखेन गजमेकेन कूर्ममेकेन चाक्षिपत् ॥ ३७ ॥ समुत्पपात चाकाशं तत उच्चैर्विहङ्गमः। सोऽचलं तीर्थमासाद्य देव-

ह्यात्मानुपागमत् ॥ ३८ ॥ ते भीताः समकम्पन्त तस्य पक्षानिलाहताः । न नो भक्ष्यादिति तदा दिव्याः कनकशाखिनः ॥ ३९ ॥ प्रचलाङ्गान् स तान् दृष्ट्वा मनोरथफलद्रुमान् । अन्यानतुलरूपाङ्गानुपचक्राम खेचरः ॥ ४० ॥ काञ्चनैराजतैश्चैव फलैर्वैदूर्यशाखिनः । सागराम्बुपरिक्षिप्तान् भ्राजमानान्महाद्रुमान् ॥ ४१ ॥ तमुवाच खगश्रेष्ठं तत्र रौहिणपादपः । अतिप्रहृष्टः सुमहानापतन्तं मनोजवम् ॥ ४२ ॥ वैषा मम महाशाखा शतयोजनमायता । एतामास्याय शाखां त्वं खादेमौ गजकच्छपौ ॥ ४३ ॥ ततो द्रुमं पतगसहस्रसेवितं महीधरप्रतिमवपुः प्रकम्पयन् । खगोत्तमो द्रुतमभिपत्य वेगवान्बभञ्ज तामविरलपत्रसञ्चयाम् ॥ ४४ ॥

इत्यादिपर्वणि सौपर्णे ऊनत्रिंशोऽध्यायः ॥ २९ ॥

—०—

सौतिरुवाच । स्पृष्टमात्रा तु पक्षाभ्यां सा गरुडेन बलीयसा । अभज्यत तरोः शाखा भग्नां चैनामधारयत् ॥ १ ॥ तां भङ्क्त्वा स महाशाखां स्वयमानो विलोकयन् । अथात्र लम्बतोऽपश्यद्वालखिल्यानधोमुखान् ॥ २ ॥ ऋषयो ह्यत्र लम्बन्ते न हन्यामिति तान्मुनीन् । तपोरतान् लम्बमानान् ब्रह्मर्षीनभिवीक्ष्य सः ॥ ३ ॥ हन्यादेतान् सम्पतन्तो शाखेत्यथ विचिन्त्य सः । नखैर्दृढतरं वीरः संगृह्य गजकच्छपौ ॥ ४ ॥ स तद्विनाशसन्त्रासादभिपत्य खगाधिपः । शाखामास्येन जग्राह तेषामेवान्ववेक्षया ॥ ५ ॥ अतिदैवन्तु तत्तस्य कर्म दृष्ट्वा महर्षयः । विस्मयोत्कम्पहृदया नाम चक्रुर्महाखगे ॥ ६ ॥ गुरुं भारं समासाद्योड्डीन एष विहङ्गमः । गरुडस्तु खगश्रेष्ठस्तस्मात्पन्नगभोजनः ॥ ७ ॥ ततः शनैः पर्वतपत्तनैः शैलान् प्रकम्पयन् । एवं सोऽभ्यपतद्देशान् बहून् सगजकच्छपः ॥ ८ ॥ दयार्थं वालखिल्यानां न च स्थान-

मविन्दत । स गत्वा पर्वतश्रेष्ठं गन्धमादनमञ्जसा ॥ ९ ॥ ददर्श कश्यपं तत्र पितरं तपसि स्थितम् । ददर्श तं पिता चापि दिव्यरूपं विहङ्गमम् ॥ १० ॥ तेजोवीर्यबलोपेतं मनोमारुतरंहसम् । शैलशृङ्गप्रतीकाशं ब्रह्मदण्डमिवोद्यतम् ॥ ११ ॥ अचिन्त्यमनभिध्येयं सर्वभूतभयङ्करम् । महावीर्यधरं रौद्रं साक्षादग्निमिवोद्यतम् ॥ १२ ॥ अप्रधृष्यमजेयञ्च देवदानवराक्षसैः । भेत्तारं गिरिशृङ्गाणां समुद्रजलशोषणम् ॥ १३ ॥ लोकसंक्षोभणं घोरं क्रतान्तसमदर्शनम् । तमागतमभिप्रेक्ष्य भगवान् कश्यपस्तदा । विदित्वा चास्य सङ्कल्पमिदं वचनमब्रवीत् ॥ १४ ॥

कश्यप उवाच । पुत्र मा साहसं कार्षीर्मासद्यो लङ्घने व्यथाम् । मा त्वां दहेयुः संक्रुद्धा वालिखिल्या मरीचिपाः ॥ १५ ॥

सौतिरुवाच । ततः प्रसादयामास कश्यपः पुत्रकारणात् । वालिखिल्यान्महाभागांस्तपसा हतकल्मषान् ॥ १६ ॥

कश्यप उवाच । प्रजाहितार्थमारम्भो गरुडस्य तपोधनाः । चिकीर्षति महत्कर्म तदनुज्ञातुमर्हथ ॥ १७ ॥

सौतिरुवाच । एवमुक्ता भगवता मुनयस्ते समभ्ययुः । मुक्त्वा शाखां गिरिं पुण्यं हिमवन्तं तपोऽर्थिनः ॥ १८ ॥ ततस्तेष्वपयातेषु पितरं विनतासुतः । शाखाव्याक्षिप्तवदनः पर्यपृच्छत कश्यपम् ॥ १९ ॥ भगवन् क्व विमुञ्चामि तरोः शाखामिमामहम् । वर्जितं मानुषैर्हेयमाख्यातु भगवान्मम ॥ २० ॥ ततो निष्पुरुषं शैलं हिममारुह्य कन्दरम् । अगम्यमनसाप्यन्यैस्तस्याचख्यौ स कश्यपः ॥ २१ ॥ तं पर्वतं महाकुक्षिमुद्दिश्य स महाखगः । जवेनाभ्यपतत्तार्क्ष्यः सशाखागजकच्छपः ॥ २२ ॥ न तां बभ्रौ परिक्षेप्तुं शतवर्मा महातनुम् । शाखिनो महतीं शाखां यां प्रगृह्य ययौ खगः ॥ २३ ॥ स ततः शतसाहस्रं योजनान्तरमागतः । कालेन नातिमहता गरुडः पतगेश्वरः ॥ २४ ॥

स तं गत्वा हयेनेव पर्वतं वचनात्पितुः। अभ्युज्जहर्तो शाखां सख्यं तत्र खेचरः॥ २५॥ पक्षानिलहतत्वास्य प्राकम्पत स शैलराट्। सुमोच पुष्पवर्षेण समागलितपादपः॥ २६॥ शृङ्गाणि च व्यशीर्य्यन्त गिरेस्तस्य समन्ततः। मणिकाञ्चनचित्राणि शोभयन्ति महागिरिम्॥ २७॥ शाखिनो बहवश्चापि शाखया भिहतास्तया। काञ्चनैः कुसुमैर्भान्ति विद्युत्वन्त इवाम्बदाः॥ २८॥ ते हेमविकचा भूमौ युताः पर्वतधातुभिः। व्यराजञ्छाखिनश्चत्र सूर्य्यांशुप्रतिरञ्जिताः॥ २९॥ ततस्तस्य गिरेः शृङ्गमास्थाय स खगोत्तमः। भक्षयामास गरुडस्तावुभौ गजकच्छपौ॥ ३०॥ तावुभौ भक्षयित्वा तु स तार्क्ष्यः कूर्मकुञ्जरौ। ततः पर्वतकूटाग्रादुत्पपात महाजवः॥ ३१॥ प्रावर्त्तन्ताथ देवानामुत्पाता भयशंसिनः। इन्द्रस्य वज्रं दयितं प्रजज्वाल भयात्ततः॥ ३२॥ मधूमा न्यपतत्सार्चिर्दिवोल्का नभस्वती। तथा वसूनां रुद्राणामादित्यानाञ्च सर्वशः॥ ३३॥ साध्यानां मरुताञ्चैव ये चान्ये देवतागणाः। स्वं स्वं प्रहरणं तेषां परस्परमुपाद्रवत्॥ ३४॥ अभूतपूर्वं संग्रामे तदा देवासुरेऽपि च। ववुर्वाताः सनिर्घाताः पेतुरुल्काः सहस्रशः॥ ३५॥ निरभ्रमेव चाकाशं प्रजगर्ज महास्वनम्। देवानामपि यो देवः सोऽप्यवर्षत शोणितम्॥ ३६॥ मर्म्मार्त्यानि देवानां नेशुस्तेजांसि चैव हि। उत्पातमेघा रौद्राश्च ववृषुः शोणितं बहु॥ ३७॥ रजांसि मुकुटान्येषामुत्थितानि व्यधर्षयन्। ततस्त्रासमुद्विग्नः सह देवैः शतक्रतुः। उत्पातान्दारुणान् पश्यन्नित्युवाच बृहस्पतिम्। ३८॥

इन्द्र उवाच। किमर्थं भगवन् घोरा उत्पाताः सहसोत्थिताः। न च शत्रुं प्रपश्यामि युधि यो नः प्रधर्षयेत्॥ ३९॥

बृहस्पतिरुवाच। तवापराधाद्देवेन्द्र प्रमादाच्च शतक्रतो। तपसा वालिखिल्यानां महर्षीणां महात्मनाम्॥ ४०॥ कश्यपस्य

मुनेः पुत्रो विनतायाश्च खेचरः । हर्त्तुं सोममभिप्राप्तो बलवान् कामरूपधृक् । ४१ ॥ समर्थो बलिनां श्रेष्ठो हर्त्तुं सोमं विहङ्गमः । सर्वं सम्भावयाम्यस्मिन्नसाध्यमपि साधयेत् ॥ ४२ ॥

सौतिरुवाच । श्रुत्वैतद्वचनं शक्रः प्रोवाचाङ्गतरक्षिणः । महावीर्यबलः पक्षी हर्त्तुं सोममिहोद्यतः ॥ ४३ ॥ युष्मान् सम्बोधयाम्येष यथा न स हरेद्बलात् । अतुलं हि बलं तस्य हृहस्पतिरुवाच ह ॥ ४४ ॥ तच्छ्रुत्वा विबुधा वाक्यं विस्मिता यत्नमास्थिताः । परिवार्य्योपतस्थुर्वज्री चेन्द्रः प्रतापवान् ॥४५॥ धारयन्तो विचित्राणि काञ्चनानि मनस्विनः । कवचानि महार्हाणि वैदूर्य्यविकृतानि च ॥ ४६ ॥ चर्माण्यपि च गात्रेषु भानुमन्ति दृढानि च । विविधानि च शस्त्राणि घोररूपाण्यनेकशः ॥ ४७ ॥ शिततीक्ष्णाग्रधाराणि समुद्यम्य सुरोत्तमाः । सविस्फुलिङ्गज्वालानि सधूमानि च सर्वशः ॥ ४८ ॥ चक्राणि परिघांश्चैव त्रिशूलानि परश्वधान् । शक्तीश्च विविधास्तीक्ष्णाः क्षुरपालांश्च निर्मलान् । स्वदेहरूपाण्यादाय गदाश्चोग्रप्रदर्शनाः ॥ ४९ ॥ तैः शस्त्रैर्भानुमद्भिश्च दिव्याभरणभूषिताः । भानुमन्तः सुरगणास्तस्थुर्विगतकल्मषाः ॥ ५० ॥ अनुपमबलवीर्यतेजसो धृतमनसः परिरक्षणेऽमृतस्य । असुरपुरविदारणाः सुरा ह्यतनुसमिद्धवपुःप्रकाशिनः ॥ ५१ ॥ इति समरवरं सुराःस्थितास्ते परिघसहस्रशतैः समाकुलम् । विगलितमिव चाम्बरान्तरं तपनमरीचिविकाशितं बभासे ॥ ५२ ॥

इत्यादिपर्वणि सौपर्णे त्रिंशोऽध्यायः ॥ ३० ॥

—०—

शौनक उवाच । कोऽपराधो महेन्द्रस्य कः प्रमादश्च सूतज । तपसा वालिखिल्यानां संभूतो गरुडः कथम् ॥ १ ॥ कश्यपस्य द्विजातेश्च कथं वै पक्षिराट् सुतः । अध्यः सर्वभूतानामवध्यस्त्राभवत्कथम् ॥ २ ॥ कथञ्च कामचारी स कामवीर्यश्च खेचरः । एतदिच्छाम्यहं श्रोतुं पुराणे यदि पठ्यते ॥ ३ ॥

सौतिरुवाच । विषयोऽयं पुराणस्य यन्मां त्वं परिपृच्छसि । शृणु मे वदतः सर्वमेतत् संक्षेपतो द्विज ॥ ४ ॥ यजतः पुत्रकामस्य कश्यपस्य प्रजापतेः । माहात्म्यमृषयो देवा गन्धर्वाश्च ऊचुः किल ॥ ५ ॥ तत्रेध्मानयने शक्रो नियुक्तः कश्यपेन ह । मुनयो वालिखिल्याश्च ये चान्ये देवतागणाः ॥ ६ ॥ शक्रस्तु वीर्यसदृशमिध्मभारं गिरिप्रभम् । समुद्यम्यानयामास नातिलक्ष्यादिव प्रभुः ॥ ७ ॥ अथापश्यद्दशान् ह्रस्वानङ्गुष्ठोदरवर्ष्मणः । मज्ञाग्रहस्तिकामेकां वहतः संहतान् पथि ॥ ८ ॥ प्रक्षीणान् स्नेष्मवाङ्मेषु निराहारांस्तपोधनान् । क्लिश्यमानान्मन्दबलान् गोष्पदे संप्लुतोदके ॥ ९ ॥ तान् सर्वान् विस्मयाविष्टो वीर्यो-न्मत्तः पुरन्दरः । अवहस्याभ्यगाच्छीघ्रं लङ्घयित्वावमत्य च ॥ १० ॥ तेऽथ रोषसमाविष्टाः सुभृशं जातमन्यवः । आरेभिरे महत्कर्म तदा शक्रभयङ्करम् ॥ ११ ॥ जुहुवुस्ते सुतपसो विधिवज्जातवेदसम् । मन्त्रैरुच्चावचैर्विप्राः येन कामेन तच्छृणु ॥ १२ ॥ कामवीर्यः कामगमो देवराजभयप्रदः । इन्द्रोऽन्यः सर्वदेवानां भवेदिति यतव्रताः ॥ १३ ॥ इन्द्राच्छतगुणः शौर्ये वीर्ये चैव मनोजवः । तपसां नः फलेनाद्य दारुणः सम्भवत्विति ॥ १४ ॥ तद्बुद्ध्वा भृशसन्तप्तो देवराजः शतक्रतुः । जगाम शरणं तत्र कश्यपं संशितव्रतम् ॥ १५ ॥ तच्छ्रुत्वा देवराजस्य कश्यपोऽथ प्रजापतिः । वालिखिल्यानुपागम्य कर्मसिद्धिमपृच्छत ॥ १६ ॥ एवमस्विति तत्रापि प्रत्यूचुः सत्यवादिनः । तान् कश्यप उवा-

चेदं सान्त्वपूर्वं प्रजापतिः ॥ १७ ॥ अयमिन्द्रस्त्रिभुवने नियोगाद्ब्रह्मणः कृतः । इन्द्रार्थं च भवन्तोऽपि यत्नवन्तस्तपोधनाः ॥१८॥ न मिथ्या ब्रह्मणो वाक्यं कर्तुमर्हथ सत्तमाः । भवतां हि न मिथ्यायं राङ्कल्पो वै त्रिविष्टपे ॥ १९ ॥ भवत्वेष पतत्रीणामिन्द्रोऽतिबलसत्त्ववान् । प्रसादः क्रियतामस्य देवराजस्य याचतः ॥ २० ॥ एवमुक्ताः कश्यपेन वालिखिल्यास्तपोधनाः । प्रत्यूचुरभिसम्पूज्य मुनिश्रेष्ठं प्रजापतिम् ॥ २१ ॥

वालिखिल्या ऊचुः । इन्द्रार्थोऽयं समारम्भः सर्वेषां नः प्रजापते । अपत्यार्थं समारम्भो भवतश्चायमीप्सितः ॥ २२ ॥ तदिदं सफलं कर्म त्वयैव प्रतिगृह्यताम् । तवाचैवं विधत्स्वात्र यथा श्रेयोऽनुपश्यसि ॥ २३ ॥

सौतिरुवाच । एतस्मिन्नेव काले तु देवी दाक्षायणी शुभा । विनता नाम कल्याणी पुत्रकामा यशस्विनी ॥ २४ ॥ तपस्तप्त्वा व्रतपरा स्नाता पुंसवने शुचिः । उपचक्राम भर्तारं तामुवाचाथ कश्यपः ॥ २५ ॥ आरम्भः सफलो देवि भविता यस्त्वयेप्सितः । जनयिष्यसि पुत्रौ द्वौ वीरौ त्रिभुवनेश्वरौ ॥ २६ ॥ तपसा वालिखिल्यानां मम सङ्कल्पजौ तथा । भविष्यतो महाभागौ पुत्रौ त्रैलोक्यपूजितौ ॥ २७ ॥ उवाच चैनां भगवान् कश्यपः पुनरेव ह । धार्यतामप्रमादेन गर्भोऽयं सुमहोदयः ॥ २८ ॥ एतौ सर्वपतत्रीणामिन्द्रत्वं कारयिष्यतः । लोकसम्भावितौ वीरौ कामरूपौ विहङ्गमौ ॥ २९ ॥ एवमुक्तमथोवाच प्रीयमाणः प्रजापतिः । त्वत्सहायौ महावीर्यौ भ्रातरौ ते भविष्यतः ॥ ३० ॥ नैताभ्यां भविता दोषः सकाशात्ते पुरन्दर । व्रतं तेऽयं सन्तापक्षमेवेन्द्रो भविष्यसि ॥ ३१ ॥ न चाप्येवं त्वया भूयः क्षेप्तव्या ब्रह्मवादिनः । न चावमान्या रूपात्ते वाग्वज्रा ह्यक्षयोपमाः ॥ ३२ ॥ एवमुक्तो जगामेन्द्रो निर्विशङ्कस्त्रिविष्टपम् ।

विनता चापि सिद्धार्था बभूव मुदिता तथा ॥ ३३ ॥ जनयामास पुत्रौ द्वावरुणं गरुडं तथा । विकलाङ्गोऽरुणस्तत्र भास्करस्य पुरःसरः ॥ ३४ ॥ पतत्रीणाञ्च गरुड इन्द्रत्वेनाभ्यषिच्यत । तस्यैतत्कर्म सुमहच्छ्रूयतां रघुनन्दन ॥ ३५ ॥

इत्यादिपर्वणि सौपर्णे एकत्रिंशोऽध्यायः ॥ ३१ ॥

—०—

सौतिरुवाच । ततस्तस्मिन् द्विजश्रेष्ठ समुद्दीर्णे तथाविधे । गरुडः पक्षिराट् क्रूरं समाप्तौ विबुधान् प्रति ॥ १ ॥ तं दृष्ट्वाति-बलञ्चैव प्राक्रम्यन्त सुरास्ततः । परस्परञ्च प्रत्यघ्नन् सर्वप्रहरणा-न्युत ॥ २ ॥ तत्र चासीदमेयात्मा विद्युदग्निसमप्रभः । भीमनः सुमहावीर्य्यः सोमस्य परिरक्षिता ॥ ३ ॥ स तेन पतगेन्द्रेण पक्षतुण्डनखक्षतः । मुहूर्त्तमतुलं युद्धं कृत्वा विनिहतो युधि ॥ ४ ॥ रजश्चोद्धूय सुमहत्पक्षवातेन खेचरः । कृत्वा लोकान्निरालोकांस्ततेन देवानवाकिरत् ॥ ५ ॥ तेनावकीर्णा रजसा देवा मोहमुपागमन् । नचैव ददृशुश्चक्षा रजसामृतरक्षिणः ॥ ६ ॥ एवं संलोड़यामास गरुडस्त्रिदिवालयम् । पक्षतुण्ड-प्रहारैस्तु देवान् स विददार ह ॥ ७ ॥ ततो देवः सहस्राक्षस्तूर्णं वायुमचोदयत् । विक्षिपेमां रजोवृष्टिं तवेदं कर्म मारुत ॥ ८ ॥ अथ वायुरपोवाच तद्रजस्तरसा बली । ततो विततिमिरे जाते देवाः शकुनिमार्दयन् ॥ ९ ॥ ननादोच्चैः स बलवान्महामेघ इवाम्बरे । बध्यमानः सुरगणैः सर्वभूतानि भीषयन् ॥ १० ॥ उत्पपात महावीर्य्यः पक्षिराट् परवीरहा । समुत्पत्यान्तरीक्षस्थं देवानामुपरि स्थितम् ॥ ११ ॥ वर्म्मिणो विबुधाः सर्वे नानाशस्त्रै-रवाकिरन् । पट्टिशैः परिघैः शूलैर्गदाभिश्च सवासवाः ॥ १२ ॥ क्षुरप्रैर्भल्लिभैश्चापि चक्रैरादित्यरूपिभिः । नानाशस्त्रविसर्गैस्तै-

र्वध्यमानः समन्ततः ॥ १३ ॥ कुर्वन् सुतुमुलं युद्धं पक्षिराट् न व्यकम्पत । निर्दहन्निव चाकाशे वैनतेयः प्रतापवान् । पक्षाभ्यामुरसा चैव समन्ताद्व्यक्षिपत् सुरान् ॥ १४ ॥ ते विक्षिप्तास्ततो देवा दुद्रुवुर्गरुड़ार्दिताः । नखतुण्डक्षताश्चैव मुमुचुः शोणितं बहु ॥ १५ ॥ साध्याः प्राचीं सगन्धर्वा वसवो दक्षिणां दिशम् । प्रजग्मुः सहिता रुद्रैः पतगेन्द्रप्रधर्षिताः ॥ १६ ॥ दिशं प्रतीचीमादित्या नासत्यावुत्तरान्दिशम् । मुहुर्मुञ्चः प्रेक्षमाणा युध्यमाना महौजसः ॥ १७ ॥ अक्षक्रन्देन वीरेण रेणुकेन च पक्षिराट् । क्रथनेन च शूरेण तपनेन च खेचरः ॥ १८ ॥ उलूकक्षसनाभ्याञ्च निमेषेण च पक्षिराट् । प्रहसेन च संग्रामं चकार पुलिनेन च ॥ १९ ॥ तान् पक्षनखतुण्डाग्रैरभिनद्विनतासुतः । युगान्तकाले संक्रुद्धः पिनाकीव परन्तपः ॥ २० ॥ महाबला महोत्साहास्ते बहुधा क्षताः । रेजुरभ्रघनप्रख्या रुधिरौघप्रवर्षिणः ॥ २१ ॥ तान् ज्ञात्वा पतगश्रेष्ठः सर्वानुत्क्रान्तजीवितान् । अतिक्रान्तोऽमृतस्यार्थे सर्वतोऽग्निमपश्यत ॥ २२ ॥ आवृण्वानं महाज्वालमर्चिर्भिः सर्वतोऽम्बरे । दहन्तमिव तीक्ष्णांशुं चण्डवायुसमीरितम् ॥ २३ ॥ ततो नवत्या नवतीर्मुखानां कृत्वा महात्मा गरुड़स्वरस्वी । नदीः समापीय सुखैस्वतस्थैः सुशीघ्रमागम्य पुनर्जवेन ॥ २४ ॥ ज्वलन्तमग्निं तमभिप्रतापनः समास्थरत्त्वत्वरथो नदीभिः । ततः प्रचक्रे वपुरन्यदल्पं प्रवेष्टुकामोऽग्निमभिप्रयाय्य ॥ २५ ॥

इत्यादिपर्वणि सौपर्णे द्वाविंशोऽध्यायः ॥ ३२ ॥

—※—

सौतिरुवाच। जाम्बूनदमयो भूत्वा मरीचिनिकरोज्ज्वलः। प्रविवेश बलात्पक्षी वारिवेग दुवार्णवम् ॥ १ ॥ स चक्रं क्षुरपर्यन्तमपश्यद्दहतान्तिके। परिभ्रमन्तमनिशं तीक्ष्णधारमयस्मयम् ॥ २ ॥ ज्वलनार्कप्रभं घोरं छेदनं सोमहारिणाम्। घोररूपं तदत्यर्थं यत्नं देवैः सुनिर्मितम् ॥ ३ ॥ तस्यान्तरं स दृष्ट्वैव व्यवर्तत खेचरः। आरान्तरेणावपतत् संक्षिप्याङ्गं क्षणेन ह ॥ ४ ॥ अथ यत्नस्य चैवाच दीप्तानलसमद्युती। विद्युज्जिह्वौ महावीर्यौ दीप्तास्यौ दीप्तलोचनौ ॥ ५ ॥ चक्षुर्विषौ महाघोरौ नित्यं क्रुद्धौ तरस्विनौ। रक्षार्थमेवाहतस्य ददर्श भुजगोत्तमौ ॥ ६ ॥ सदा संरब्धनयनौ सदा चानिमिषेक्षणौ। तयोरेकोऽपि यं पश्येत् तूर्णमभस्मसाद्भवेत् ॥ ७ ॥ तयोश्चूर्णि रजसा सुपर्णः सहसाहृणोत्। ताभ्यामदृष्टरूपोऽसौ सर्वतः समताड़यत् ॥ ८ ॥ तयोरङ्गे समाक्रम्य वैनतेयोऽन्तरीक्षगः। अच्छिनत्तरसा मध्ये सोममभ्यद्रवत्ततः ॥ ९ ॥ समुत्पाट्याहृतं तत्र वैनतेयस्ततो बली। उत्पपात जवेनैव वज्रमुन्मथ्य वीर्यवान् ॥ १० ॥ अपीत्वैवाहृतं पक्षी परिगृह्याशु निःसृतः। अगच्छदपरिश्रान्त आवार्यार्कप्रभां ततः ॥ ११ ॥ विष्णुना च तदाकाशे वैनतेयः समेयिवान्। तस्य नारायणस्तुष्टस्तेनालौल्येन कर्मणा ॥ १२ ॥ तमुवाचाव्ययो देवो वरदोऽस्मीति खेचरम्। स वव्रे तव तिष्ठेयमुपरीत्यन्तरीक्षगः ॥ १३ ॥ उवाच चैनं भूयोऽपि नारायणमिदं वचः। अजरश्चामरश्च स्यामहंतेन विनाप्यहम् ॥ १४ ॥ एवमस्त्विति तं विष्णुरुवाच विनतासुतम्। प्रतिगृह्य वरौ तौ च गरुड़ो विष्णुमब्रवीत् ॥ १५ ॥ भवतेऽपि वरन्दद्यां वृणोतु भगवानपि। तं वव्रे वाहनं विष्णुर्गच्छन्तं महाबलम् ॥ १६ ॥ ध्वजञ्च चक्रे भगवानुपरि स्यास्यतीति तम्। एवमस्त्विति तं देवमुक्त्वा नारायणं खगः ॥ १७ ॥ जगाम तरसा वेगाद्वायुं स्पर्द्धन्महाजवः। तं

व्रजन्तं खगश्रेष्ठं वज्रेणेन्द्रोऽभ्यताड़यत् ॥ १८ ॥ हरन्तममृतं रोषाद्गरुड़ं पक्षिणां वरम्। तमुवाचेन्द्रमाक्रन्दे गरुड़: पततां वरः ॥ १९ ॥ प्रहसन् श्लक्ष्णया वाचा तया वज्रसमाहतः। ऋषे-र्मानं करिष्यामि वज्रं यस्यास्थिसम्भवम् ॥ २० ॥ वज्रस्य च करिष्यामि तवैव च शतक्रतो। एतत्पत्रं त्यजाम्येकं यस्यान्तं नोपलभ्महे ॥ २१ ॥ न च वज्रनिपातेन रुजा मेऽस्तीह काचन। एवमुक्त्वा ततः पत्रमुत्ससर्ज्ज स पक्षिराट् ॥ २२ ॥ तदुत्सृष्टमभि-प्रेक्ष्य तस्य पर्णमनुत्तमम्। हृष्टानि सर्वभूतानि नाम चक्रुर्गरु-त्मतः ॥ २३ ॥ सुरूपं पत्रमालक्ष्य सुपर्णोऽयं भवत्विति। तद्दृष्ट्वा महदाश्चर्यं सहस्राक्षः पुरन्दरः ॥ २४ ॥ खगो महदिदं भूत-मिति मत्वाभ्यभाषत।

शक्र उवाच। बलं विज्ञातुमिच्छामि यत्ते परमनुत्तमम्। सख्यं चानन्तमिच्छामि त्वया सह खगोत्तम ॥ २५ ॥

इत्यादिपर्वणि सौपर्णे त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

—०—

गरुड़ उवाच। सख्यं मेऽस्तु त्वया देव यथेच्छसि पुरन्दर। बलन्तु मम जानीहि महच्चास्त्रमेव च ॥ १ ॥ कामं नैतत् प्रशं-सन्ति सन्तः स्वबलसंस्तवम्। गुणसङ्कीर्त्तनं चापि स्वयमेव शत-क्रतो ॥ २ ॥ सखेति कृत्वा तु सखे दृष्टो वक्ष्याम्यहं त्वया। न त्वात्मस्तवसंयुक्तं वक्तव्यमनिमित्ततः ॥ ३ ॥ सपर्वतवनामुर्वीं ससा-गरजलामिमाम्। वहे पक्षेण वै शक्र त्वामप्यत्रावलम्बिनम् ॥ ४ ॥ सर्वान् संपीड़िताम्वापि लोकान् सस्थाणुजङ्गमान्। वहेय-मपरिश्रान्तो विद्धीदं मे महद्बलम् ॥ ५ ॥

सौतिरुवाच। इत्युक्तवचनं वीरं किरीटी श्वेतवाहनः। आह शौनक देवेन्द्रः सर्वलोकहितः प्रभुः ॥ ६ ॥ एवमेव यथात्थ

त्वं सर्वं सम्भाव्यते त्वयि। संगच्छतामिदानीं मे सख्यमत्यन्तमुत्तमम् ॥ ७ ॥ न कार्यं यदि सोमेन मम सोमः प्रदीयताम्। अन्यांस्ते हि प्रबाधेयुर्ये श्रो दत्ताङ्गवानिमम् ॥ ८ ॥

गरुड़ उवाच। किञ्चित्कारणमुद्दिश्य सोमोऽयं नीयते मया। न दास्यामि ममादातुं सोमं कस्मैचिदप्यहम् ॥ ९ ॥ यत्रैमन्तु सहस्राक्ष निक्षिपेयमहं स्वयम्। त्वमादाय ततस्तूर्णं हरेथा स्त्रिदिवेश्वर ॥ १० ॥

शक्र उवाच। वाक्येनानेन तुष्टोऽहं यत्त्वयोक्तमिहाण्डज। यमिच्छसि वरं मत्तस्तं गृहाण खगोत्तम ॥ ११ ॥

सौतिरुवाच। इत्युक्तः प्रत्युवाचेदं कद्रूपुत्रानुपस्मरन्। स्मृत्वा चैवोपधिकृतं मातुर्दास्यं निमित्ततः ॥ १२ ॥ ईप्सोऽहमपि सर्वेस्य करिष्यामि तु तेऽर्थिताम्। भवेयुर्भुजगाः शक्र मम भक्ष्या महाबलाः ॥ १३ ॥ तथेत्युक्त्वान्वगच्छत्तं ततो दानवसूदनः। देवदेवं महात्मानं योगिनामीश्वरं हरिम् ॥ १४ ॥ स चान्वमोदत्तं चार्थं यथोक्तं गरुड़ेन वै। इदं भूयो वचः प्राह भगवांस्त्रिदशेश्वरः ॥ १५ ॥ हरिष्यामि विनिक्षिप्तं सोममित्यनुभाष्य तम्। आजगाम ततस्तूर्णं सुपर्णो मातुरन्तिके ॥ १६ ॥ अथ सर्पानुवाचेदं सर्वान् परमहृष्टवत्। इदमानीतमच्छत्तं निक्षेष्यामि कुशेषु वः ॥ १७ ॥ स्नाता मङ्गलसंयुक्तास्ततः प्राश्नीत पन्नगाः। भवद्भिरिदमाहीनैर्व्रतं तद्हि चरद्भिः ॥ १८ ॥ अदासी चैव मातेयमद्यप्रभृति चासु मे। यथोक्तं भवतामेतद्वचो मे प्रतिपादितम् ॥ १९ ॥ ततः स्नातुं गताः सर्पाः प्रत्युक्त्वा तं तथेत्युत। शक्रोऽप्यच्छतमाच्छिद्य जगाम त्रिदिवं पुनः ॥ २० ॥ अथागतास्तमुद्देशं सर्पाः सोमार्थिनस्तदा। स्नाताश्च कृतजप्याश्च प्रहृष्टाः कृतमङ्गलाः ॥ २१ ॥ यत्रैतदच्छतं चापि स्थापितं कुशसंस्तरे। तद्विज्ञाय हृतं सर्पाः प्रतिमायाकृतञ्च तत् ॥ २२ ॥ सोमस्थान-

मिदं चेति दर्भांस्ते लिलिहुस्तदा। ततो द्विधा कृता जिह्वा सर्पाणां तेन कर्मणा ॥ २३ ॥ अभवंश्चास्तसर्पाहभोक्तोऽथ पक्षिणः। एवं तदृष्टं तेन हृतमाहृतमेव च। द्विजिह्वाश्च कृताः सर्पा गरुडेन महात्मना ॥ २४ ॥ ततः सुपर्णः परमप्रहर्षवान् विहृत्य मात्रा सह तत्र कानने। भुजङ्गभक्षः परमार्चितः खगैरहीनकीर्त्तिर्विनतामनन्दयत् ॥ २५ ॥ इमाङ्कथां यः शृणुयान्नरः सदा पठेत वा द्विजगणमुख्यसंसदि। असंशयं त्रिदिवमियात्स पुण्यभाङ्महात्मनः पतगपतेः प्रकीर्त्तनात् ॥ २६ ॥

इत्यादिपर्व्वणि आस्तीके चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥
सौपर्णं समाप्तम् ॥

—०*०—

शौनक उवाच। भुजङ्गमानां शापस्य माता चैव सुतेन च। विनतायास्तया प्रोक्तं कारणं सूतनन्दन ॥ १ ॥ वरप्रदानं भर्त्ता च कद्रूविनतयोस्तथा। नामनी चैव ते प्रोक्ते पक्षिणोर्वैनतेययोः ॥ २ ॥ पन्नगानान्तु नामानि न कीर्त्तयसि सूतज। प्राधान्येनापि नामानि श्रोतुमिच्छामहे वयम् ॥ ३ ॥

सौतिरुवाच। बहुत्वान्नामधेयानि पन्नगानां तपोधन। न कीर्त्तयिष्ये सर्वेषां प्राधान्येन तु मे शृणु ॥ ४ ॥ शेषः प्रथमतो जातो वासुकिस्तदनन्तरम्। ऐरावतस्तक्षकश्च कर्कोटकधनञ्जयौ ॥ ५ ॥ कालियो मणिनागश्च नागश्चापूरणस्तथा। नागस्तथा पिञ्जरक एलापत्रोऽथ वामनः ॥ ६ ॥ नीलानीलौ तथा नागौ कल्माषशबलौ तथा। आर्य्यकश्चोग्रकश्चैव नागः कलशपोतकः ॥ ७ ॥ सुरामुखो दधिमुखस्तथा विमलपिण्डकः। आप्तः करोटकश्चैव शङ्खो वालिशिखस्तथा ॥ ८ ॥ निष्ठानको हेमगुहो नहुषः पिङ्गलस्तथा। बाह्यकर्णो हस्तिपदस्तथा मुद्गरपिण्डकः ॥ ९ ॥

कम्बलाश्वतरौ चापि नागः कालीयकस्तथा । वृत्तसम्वर्त्तकौ नागौ द्वौ च पद्मावितिश्रुतौ ॥ १० ॥ नागः शङ्खमुखश्चैव तथा कुष्माण्डकोऽपरः । क्षेमकश्च तथा नागो नागः पिण्डारकस्तथा ॥ ११ ॥ करवीरः पुष्पदंष्ट्रो बिल्वको बिल्वपाण्डरः । मूषकादः शङ्कशिराः पूर्णभद्रो हरिद्रकः ॥ १२ ॥ अपराजितो ज्योतिकश्च पन्नगः श्रीवहस्तथा । कौरव्यो धृतराष्ट्रश्च शङ्खपिण्डश्च वीर्य्यवान् ॥ १३ ॥ विरजाश्च सुबाहुश्च शालिपिण्डश्च वीर्य्यवान् । हस्तिपिण्डः पिठरकः सुमुखः कौणपाशनः ॥ १४ ॥ कुठरः कुञ्जरश्चैव तथा नागः प्रभाकरः । कुमुदः कुमुदाक्षश्च तित्तिरिर्हलिकस्तथा ॥ १५ ॥ कर्दमश्च महानागो नागश्च बहुमूलकः । कर्करा-कर्करौ नागौ कुण्डोदरमहोदरौ ॥ १६ ॥ एते प्राधान्यतो नागाः कीर्त्तिता द्विजसत्तम । बहुत्वान्नामधेयानामितरे नानुकीर्त्तिताः ॥ १७ ॥ एतेषां प्रसवो यश्च प्रसवश्च च सन्ततिः । असंख्य इति मत्वा तान्न ब्रवीमि तपोधन ॥ १८ ॥ बहूनीह सहस्राणि प्रयुतान्यर्बुदानि च । अशक्यान्येव संख्यातुं पन्नगानां तपोधन ॥ १९ ॥

इत्यादिपर्वणि आस्तीके पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

—०—

शौनक उवाच । आख्याता भुजगास्तात वीर्य्यवन्तो दुरासदाः । शापं तं तेऽभिविज्ञाय कृतवन्तः किमुत्तरम् ॥ १ ॥

सूत उवाच । तेषान्तु भगवान्ब्रह्मा वासुकिं त्यक्ता महायशाः । उग्रं तपः समातस्थे वायुभक्षो यतव्रतः ॥ २ ॥ गन्धमादनमासाद्य बदर्य्याञ्च तपोरतः । गोकर्णे पुष्करारण्ये तथा हिमवतस्तटे ॥ ३ ॥ तेषु तेषु च पुण्येषु तीर्थेष्वायतनेषु च । एकान्तशीलो नियतः सततं विजितेन्द्रियः ॥ ४ ॥ तप्यमानं तपो घोरं तं ददर्श पितामहः । संशुष्कमांसरुक्षाङ्गं जटाचीरधरं मुनिम् ॥ ५ ॥

तमब्रवीत्स्वयंभूतं तप्यमानं पितामहः । किमिदं कुरुषे शेष प्रजानां स्वस्ति वै कुरु ॥ ६ ॥ त्वं हि तीव्रेण तपसा प्रजास्रापयसेऽनघ । ब्रूहि कामश्च मे शेष यस्ते हृदि व्यवस्थितः ॥ ७ ॥

शेष उवाच । सोदर्या मम सर्वे हि भ्रातरो मन्दचेतसः । सह तैर्नोत्सहे वस्तुं तद्भवाननुमन्यताम् ॥ ८ ॥ अभ्यसूयन्ति सततं परस्परमभिप्लवत् । ततोऽहं तप आतिष्ठं नैतान् पश्येयमित्युत ॥ ९ ॥ न मर्षयन्ति ससुतां सततं विनताञ्च ते । अस्माकं चापरो भ्राता वैनतेयोऽन्तरीक्षगः ॥ १० ॥ तञ्च हिंसन्ति सततं स चापि बलवत्तरः । वरप्रदानाच्च पितुः कश्यपस्य महात्मनः ॥ ११ ॥ सोऽहं तपः समास्थाय मोक्ष्यामीदं कलेवरम् । कथं मे प्रेत्यभावेऽपि न तैः स्यात्सह सङ्गमः ॥ १२ ॥ तमेवंवादिनं शेषं पितामह उवाच ह । जानामि शेष सर्वेषां भ्रातॄणां ते विचेष्टितम् ॥ १३ ॥ मातुश्चाप्यपराधाद्वै भ्रातॄणां ते महद्भयम् । कृतोऽत्र परिहारश्च पूर्वमेव भुजङ्गम ॥ १४ ॥ भ्रातॄणां तव सर्वेषां न शोकं कर्तुमर्हसि । वृणीष्व च वरं मत्तः शेष यत्तेऽभिकाङ्क्षितम् ॥ १५ ॥ दास्यामि हि वरं तेऽद्य प्रीतिर्मे परमा त्वयि । दिष्ट्या बुद्धिश्च ते धर्मे निविष्टा पन्नगोत्तम ॥ १६ ॥ भूयो भूयश्च ते बुद्धिर्धर्मे भवतु सुस्थिरा ।

शेष उवाच । एष एव वरो देव काङ्क्षितो मे पितामह । धर्मे मे रमतां बुद्धिः शमे तपसि चेश्वर ॥ १७ ॥

ब्रह्मोवाच । प्रीतोऽस्म्नेन ते शेष दमेन च शमेन च । त्वया त्विदं वचः कार्यं मन्नियोगात् प्रजाहितम् ॥ १८ ॥ इमां महीं शैलवनोपपन्नां ससागरग्रामविहारपत्तनाम् । त्वं शेष सम्यक्चलितां यथावत्संस्थाप्य तिष्ठस्व यथाचला स्यात् ॥ १९ ॥

शेष उवाच । यथाह देवो वरदः प्रजापतिर्महीप्रतिर्भूत-

पतिर्जगत्पतिः । तथा महीं धारयितास्मि निश्चलां प्रयच्छ तां मे शिरसि प्रजापते ॥ २० ॥

ब्रह्मोवाच । अधो महीं गच्छ भुजङ्गमोत्तम स्वयं तवैषा विवरं प्रदास्यति । इमां धरां धारयता त्वया हि मे महत् प्रियं शेष कृतं भविष्यति ॥ २१ ॥

सौतिरुवाच । तथेति कृत्वा विवरं प्रविश्य स प्रभुर्भुवो भुजगवराग्रजः स्थितः । बिभर्त्ति देवीं शिरसा महीमिमां समुद्रनेमिं परिगृह्य सर्वतः ॥ २२ ॥

ब्रह्मोवाच । शेषोऽसि नागोत्तम धर्मदेवो महीमिमां धारयसे यदेकः । अनन्तभोगैः परिगृह्य सर्वं यथाऽहमेवं बलभिद्यथा वा ॥ २३ ॥

सौतिरुवाच । अधोभुवौ वमत्येवं नागोऽनन्तः प्रतापवान् । धारयन्वसुधामेकः प्रासनाद्ब्रह्मणो विभुः ॥ २४ ॥ सुपर्णञ्च सहायं वै भगवानमरोत्तमः । प्रादादनन्ताय तदा वैनतेयं पितामहः ॥ २५ ॥

इत्यादिपर्वणि आस्तीके षट्त्रिंशोऽध्यायः ॥ ३६ ॥

—०:०—

सौतिरुवाच । मातुः सकाशात्तं शापं श्रुत्वा वै पन्नगोत्तमः । वासुकिश्चिन्तयामास शापोऽयं न भवेत्कथम् ॥ १ ॥ ततः स मन्त्रयामास भ्रातृभिः सह सर्वशः । ऐरावतप्रसूतिभिः सर्वैर्धर्मपरायणैः ॥ २ ॥

वासुकिरुवाच । अयं शापो ययोद्दिष्टो विदितं वस्तथानघाः । तस्य शापस्य मोक्षार्थं मन्त्रयित्वा ब्रवीमहे ॥ ३ ॥ सर्वेषामेव शापानां प्रतिघातो हि विद्यते । न तु मात्राभिशप्तानां मोक्षः क्व च न विद्यते ॥ ४ ॥ अप्रमेयस्य सत्यस्य च तपसः ।

यज्ञा इत्येव मे श्रुत्वा जायते हृदि वेपथुः ॥ ५ ॥ नूनं सर्वविनाशोऽयमस्माकं समुपागतः । न ह्येतां मोऽव्यवां देवः शमन्तीं प्रत्यषेधयत् ॥ ६ ॥ तस्मात्संमन्त्रयामोऽद्य भृजङ्गानामनामयम् । यथा भवेद्धि सर्वेषां मा नः कालोऽत्यगादयम् ॥ ७ ॥ सर्व एव हि नस्तावद्बुद्धिमन्तो विचक्षणाः । अपि मन्त्रयमाणा हि हेतुं पश्याम मोक्षणे ॥ ८ ॥ यथा नष्टं पुरा देवा गूढमग्निं गुहागतम् । यथा स यज्ञो न भवेद्यथा वापि पराभवः । जनमेजयस्य सर्पाणां विनाशकरणाय वै । ९ ॥

सौतिरुवाच । तथेत्युक्ता ततः सर्वे काद्रवेयाः समागताः । समयं चक्रिरे तत्र मन्त्रबुद्धिविशारदाः ॥ १० ॥ एके तत्रानुवन्नागा वयं भूत्वा द्विजर्षभाः । जनमेजयं तु भिक्षामो यज्ञस्ते न भवेदिति ॥ ११ ॥ अपरे त्वनुवन्नागास्तत्र पण्डितमानिनः । मन्त्रिणोऽस्य वयं सर्वे भविष्यामः सुसंमताः ॥ १२ ॥ स नः प्रत्यति सर्वेषु कार्येष्वर्थविनिश्चयम् । तत्र बुद्धिं प्रदास्यामो यथा यज्ञो निवर्त्स्यति ॥ १३ ॥ स नो बहुमतान् राजा बुद्धा बुद्धिमतांवरः । यज्ञार्थं प्रत्यति व्यक्तं नेति वक्ष्यामहे वयम् ॥ १४ ॥ दर्शयन्तो बहून् दोषान् प्रेत्य चेह च दारुणान् । हेतुभिः कारणैश्चैव यथा यज्ञो भवेन्न सः ॥ १५ ॥ अथवा य उपाध्यायः क्रतोस्तस्य भविष्यति । सर्पसत्रविधानज्ञो राजकार्यहिते रतः ॥ १६ ॥ तं गत्वा दशतां कश्चिद्भुजङ्गः स मरिष्यति । तस्मिन्मृते यज्ञकारे क्रतुः स न भविष्यति ॥ १७ ॥ ये चान्ये सर्पसत्रज्ञा भविष्यन्त्यस्य चत्विजः । तांश्च सर्वान् दशिष्यामः क्षतमेवं भविष्यति ॥ १८ ॥ अपरे त्वनुवन्नागा धर्मात्मानो दयालवः । अबुद्धिरेषा भवतां ब्रह्महत्या न शोभनम् ॥ १९ ॥ कस्यक् सद्धर्ममूला वै व्यसने शान्तिरुत्तमा । अधर्मोत्तरता नाम ह्यतृक्षं व्यापादयेज्जगत् ॥ २० ॥ अपरे त्वनुवन्नागाः समिद्धं जातवेदसम् । वर्षै-

निर्वापयिष्यामो मेघा भूत्वा सविद्युतः ॥ २१ ॥ खण्डाख्यं निशि गत्वा च अपरे भुजगोत्तमाः। प्रसक्तानां हरन्त्वाशु विघ्नमेवं भविष्यति ॥ २२ ॥ यज्ञे वा भुजगास्तस्मिन् शतशोऽथ सहस्रशः। जनान् दशन्तु वै सर्वानेवं त्रासो भविष्यति ॥ २३ ॥ अथवा संस्कृतं भोज्यं दूषयन्तु भुजङ्गमाः। स्वेन मूत्रपुरीषेण सर्वभोज्यविनाशिना ॥ २४ ॥ अपरे त्वब्रुवंस्तत्र ऋत्विजोऽस्य भवामहे। यज्ञविघ्नं करिष्यामो दीयन्तां दक्षिणा इति ॥ २५ ॥ वक्ष्यताच्च गतोऽसौ नः करिष्यति यथेप्सितम्। अपरे त्वब्रुवंस्तत्र जले क्रीडितं दृढम् ॥ २६ ॥ गृह्यमानीय बध्नीमः क्रतुरेवं भवेन्न सः। अपरे त्वब्रुवंस्तत्र नागाः पण्डितमानिनः ॥ २७ ॥ दग्धास्तं प्रसह्याशु कृतमेवं भविष्यति। छिन्नं मूलमनर्थानां क्षते तस्मिन् भविष्यति ॥ २८ ॥ एषा नो नैष्ठिकी बुद्धिः सर्वेषामीक्षणक्षवः। अथ यद्वक्ष्यसे राजन् द्रुतं तत् संविधीयताम् ॥ २९ ॥ इत्युक्त्वा समुदैक्षन्त वासुकिं पन्नगोत्तमम्। वासुकिश्चापि सञ्चिन्त्य तानुवाच भुजङ्गमान् ॥ ३० ॥ नैषा वो नैष्ठिकी बुद्धिमेता कर्त्तुं भुजङ्गमाः। सर्वेषामेव वो बुद्धिः पन्नगानां न रोचते ॥ ३१ ॥ किं तत्र संविधातव्यं भवतां स्यादितं तु यत्। ज्ञेयः प्रसादनं मन्ये कश्यपस्य महात्मनः ॥ ३२ ॥ ज्ञातिवर्गस्य सौहार्दादात्मनश्च भुजङ्गमाः। न च जानाति वो बुद्धिः किञ्चित् कर्त्तुं वचो हि वः ॥ ३३ ॥ मया चैतद् विधातव्यं भवतां यद्धितं भवेत्। अनेनाहं क्षयं तस्मे गुणदोषौ मदाश्रयौ ॥ ३४ ॥

इत्यार्षे महाभारते आदिपर्वणि आस्तीके कद्रूवासुकिसंवादे सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

—:०:—

सौतिरुवाच। सर्पाणां तु वचः श्रुत्वा सर्वेषामिति चेति च। वासुकेश्च वचः श्रुत्वा एलापत्रोऽब्रवीदिदम् ॥ १ ॥ न स यज्ञो न भविता न स राजा तथाविधः। जनमेजयः पारुक्षवेयो यतोऽस्माकं महद्भयम् ॥ २ ॥ दैवेनोपहतो राजन् यो भवेदिह पूरुषः। स दैवमेवाश्रयते नान्यत्तत्र परायणम् ॥ ३ ॥ तदिदं दैवमस्माकं भयं पन्नगसत्तमाः। दैवमेवाश्रयामोऽत्र शृणुध्वं च वचो मम ॥ ४ ॥ अहं ह्यापि समुत्पन्ने समर्थौषं वचस्विदा। मातुरुत्सङ्गमारूढो भयात्पन्नगसत्तमाः ॥ ५ ॥ देवानां पन्नगश्रेष्ठाः क्षीण्याः क्षीण्या इति प्रभो। पितामहमुपागम्य दुःखार्त्तानां महाद्युते ॥ ६ ॥

देवा ऊचुः। का हि लब्ध्वा प्रियान् पुत्रान् शपेदेवं पितामह। ऋते कद्रूं तीक्ष्णरूपां देवदेव तवाग्रतः ॥ ७ ॥ तथेति च वचस्तस्याः स्वयाप्युक्तं पितामह। एतदिच्छाम विज्ञातुं कारणं यत्र वारिता ॥ ८ ॥

ब्रह्मोवाच। बहवः पन्नगाः क्षीण्या घोररूपा विषोल्बणाः। प्रजानां हितकामोऽहं न च वारितवांस्तदा ॥ ९ ॥ ये दन्दशूकाः क्षुद्राश्च पापाचारविषोल्बणाः। तेषां विनाशो भविता न तु ये धर्मचारिणः ॥ १० ॥ यन्निमित्तश्च भविता मोक्षस्तेषां महाभयात्। पन्नगानां निबोधध्वं तस्मिन् काले समागते ॥ ११ ॥ यायावरकुले धीमान् भविष्यति महानृषिः। जरत्कारुरिति-ख्यातस्तपस्वी नियतेन्द्रियः ॥ १२ ॥ तस्य पुत्रो जरत्कारोर्भविष्यति तपोधनः। आस्तीको नाम यज्ञं स प्रतिषेत्स्यति तं तदा। तत्र मोक्ष्यन्ति भुजगा ये भविष्यन्ति धार्मिकाः ॥ १३ ॥

देवा ऊचुः। स मुनिप्रवरो ब्रह्मन् जरत्कारुर्महातपाः। कस्यां पुत्रं महात्मानं जनयिष्यति वीर्यवान् ॥ १४ ॥

ब्रह्मोवाच। सनामायां सनाम्न स कन्यायां द्विजसत्तमः।

अपत्यं वीर्य्यसम्पन्नं वीर्य्यवान् जनयिष्यति ॥ १५ ॥ वासुकेः सर्पराजस्य जरत्कारुः स्वसा किल। स तस्यां भविता पुत्रः शापान्नागांश्च मोक्ष्यति ॥ १६ ॥

एलापत्र उवाच। एवमस्त्विति तं देवाः पितामहमथाब्रुवन्। उक्त्वैवं वचनं देवान् विरिञ्चिस्त्रिदिवं ययौ ॥ १७ ॥ सोऽहमेवं प्रपद्यामि वासुके भगिनीं तव। जरत्कारुरितिख्याता तां तस्मै प्रतिपादय ॥ १८ ॥ भैक्षवद्भिश्च माणाय नागानां भयशान्तये। ऋषये सुव्रतायैनामेष मोक्षः श्रुतो मया ॥ १९ ॥

इत्यादिपर्वण्यास्तीके अष्टात्रिंशोऽध्यायः ॥ ३८ ॥

—०—

सौतिरुवाच। एलापत्रवचः श्रुत्वा ते नागा द्विजसत्तम। सर्वे प्रहृष्टमनसः साधुसाध्वित्यथाब्रुवन् ॥ १ ॥ ततः प्रभृति तां कन्यां वासुकिः पर्य्यरक्षत। जरत्कारुं स्वसारं वै परं हर्षमवाप च ॥ २ ॥ ततो नातिमहान् कालः समतीत इवाभवत्। अथ देवासुराः सर्वे ममन्थुर्वरुणालयम् ॥ ३ ॥ तत्र नेत्रमभून्नागो वासुकिर्बलिनांवरः। समाप्य वै च तत्कर्म पितामहमुपागमन् ॥ ४ ॥ देवा वासुकिना सार्द्धं पितामहमथाब्रुवन्। भगवंश्चापभीतोऽयं वासुकिस्तप्यते भृशम् ॥ ५ ॥ अस्यैतन्मानसं शल्यं समुद्धर्त्तुं त्वमर्हसि। जनन्याः शापजं देव ज्ञातीनां हितमिच्छतः ॥ ६ ॥ हितो ह्ययं सदास्माकं प्रियकारी च नागराट्। प्रसादं कुरु देवेश शमयास्य मनोज्वरम् ॥ ७ ॥

ब्रह्मोवाच। मयैव तद्धितीर्णं वै वचनं मनसामराः। एलापत्रेण नागेन यदस्याभिहितं पुरा ॥ ८ ॥ तत्करोत्वेष नागेन्द्रः प्राप्तकालं वचः स्वयम्। विनशिष्यन्ति ये पापा न तु ये धर्मचारिणः ॥ ९ ॥ उत्पन्नः स जरत्कारुस्तपस्युग्रे रतो द्विज।

तस्यैष भगिनीं काले जरत्कारुं प्रयच्छतु ॥ १० ॥ एलापत्रेण यत् प्रोक्तं वचनं भुजगेन ह। पन्नगानां हितं देवास्तत्तथा न तदन्यथा ॥ ११ ॥

सौतिरुवाच। एतच्छ्रुत्वा तु नागेन्द्रः पितामहवचस्तदा। सन्दिश्य पन्नगान् सर्वान् वासुकिः शापमोहितः ॥ १२ ॥ स्वसारमुद्यम्य तदा जरत्कारुमृषिं प्रति। सर्पान् वहन् जरत्कारौ नित्ययुक्तान् समादधत् ॥ १३ ॥ जरत्कारुर्यदा भार्यामिच्छेद्धरयितुं प्रभुः। शीघ्रमित्य तदाख्येयं तनः श्रेयो भविष्यति ॥१४॥

इत्यादिपर्वण्यास्तीके एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

—•—

शौनक उवाच। जरत्कारुरिति ख्यातो यस्त्वया सूतनन्दन। इच्छामि तदहं श्रोतुं ऋषेस्तस्य महात्मनः ॥ १ ॥ किंकारणं जरत्कारोर्नामैतत् प्रथितं भुवि। जरत्कारुनिरुक्तिं त्वं यथावद्वक्तुमर्हसि ॥ २ ॥

सौतिरुवाच। जरेति क्षयमाख्यैर्वै दारुणं कारुसंज्ञितम्। शरीरं कारु तस्यासीत्तत् स धीमाञ्छनैः शनैः ॥ ३ ॥ क्षपयामास तीव्रेण तपसेत्यत उच्यते। जरत्कारुरिति ब्रह्मन् वासुकेर्भगिनी तथा ॥ ४ ॥ एवमुक्तस्तु धर्मात्मा शौनकः प्राहसत्तदा। उग्रश्रवसमामन्त्र्य उपपन्नमिति ब्रुवन् ॥ ५ ॥

शौनक उवाच। उक्तं नाम यथापूर्वं सर्वं तच्छ्रुतवानहम्। यथा तु जातो ह्यास्तीक एतदिच्छामि वेदितुम्। तच्छ्रुत्वा वचनं तस्य सूतः प्रोवाच शास्त्रतः ॥ ६ ॥

सौतिरुवाच। सन्दिश्य पन्नगान् सर्वान् वासुकिः सुसमाहितः। स्वसारमुद्यम्य तदा जरत्कारुमृषिं प्रति ॥ ७ ॥ अथ कालस्य महतः स मुनिः शंसितव्रतः। तपस्यभिरतो धीमान् स

दारान्नाभ्यकाङ्क्षत ॥ ८ ॥ स दुर्ज्ञेयेतासपसि प्रसक्तः स्वाध्याय-वान्वीतभयः कृतात्मा। चचार सर्वां पृथिवीं महात्मा न चापि दारान्मनसाप्यकाङ्क्षत ॥ ९ ॥ ततोऽपरस्मिन् संप्राप्ते काले कस्मिंश्चिदेव तु। परीक्षिन्नाम राजासीद्ब्रह्मन् कौरववंशजः ॥ १० ॥ यथा पाण्डुर्महाबाहुर्हनुर्धरवरो युधि। बभूव मृगया-शीलः पुरास्य प्रपितामहः ॥ ११ ॥ मृगान् विध्यन्वराहांश्च तर-क्षून्महिषांस्तथा। अन्यांश्च विविधान्वन्यांश्चचार पृथिवीपतिः ॥ १२ ॥ स कदाचिन्मृगं विद्ध्वा बाणेनानतपर्वणा। पृष्ठतो धनुरादाय ससार गहने वने ॥ १३ ॥ यथैव भगवान् रुद्रो विद्ध्वा यज्ञमृगं दिवि। अन्वगच्छद्धनुष्पाणिः पर्य्यन्वेष्टुमितस्ततः ॥१४॥ न हि तेन मृगो विद्धो जीवन् गच्छति वै वने। पूर्वरूपन्तु तत्तूर्णं सोऽगात् स्वर्गगतिं प्रति ॥ १५ ॥ परीक्षितो नरेन्द्रस्य विद्धो यन्नष्टवान्मृगः। दूरं चापहृतस्तेन मृगेण स महीपतिः ॥ १६ ॥ परिश्रान्तः पिपासार्त्तः आससाद मुनिं वने। गवां प्रचारेष्वासीनं वत्सानां मुखनिःसृतम्। भूयिष्ठमुपयुञ्जानं फेन-मापिबतां पयः। तमभिद्रुत्य वेगेन स राजा शंसितव्रतम् ॥१७॥ अपृच्छद्धनुरुद्यम्य तं मुनिं क्षुच्छमान्वितः। भो भो ब्रह्मन्नहं राजा परीक्षिदभिमन्युजः ॥ १८ ॥ मया विद्धो मृगो नष्टः कच्चित्तं दृष्टवानसि। स मुनिस्तं तु नोवाच किञ्चिन्मौनव्रते स्थितः ॥१९॥ तस्य स्कन्धे मृतं सर्पं क्रुद्धो राजा समासृजत्। समुत्क्षिप्य धनुष्कोट्या स चैनं समुपैक्षत ॥ २० ॥ न स किञ्चिदुवाचैनं शुभं वा यदि वाशुभम्। स राजा क्रोधसंतृच्छ्य व्यथितस्तं तथा-गतम्। दृष्ट्वा जगाम नगरमृषिस्वासीत्तथैव सः ॥ २१ ॥ न हि तं राजशार्दूलं क्षमाशीलो महामुनिः। स्वधर्मनिरतं भूयं समाक्षिप्तोऽप्यधर्षयत् ॥ २२ ॥ न हि तं राजशार्दूलस्तथा धर्म-परायणम्। जानाति भरतश्रेष्ठस्तत एनमधर्षयत् ॥ २३ ॥

तरुणस्तस्य पुत्रोऽभूत्तिग्मतेजा महातपाः। शृङ्गी नाम महाक्रोधो दुष्प्रसादो महाव्रतः॥ २४॥ सादरं परमासीनं सर्वभूतहिते रतम्। ब्रह्मण्यमुपतस्थे वै काले काले सुसंयतः॥२५॥ स तेन समनुज्ञातो ब्रह्मणा गृहमेयिवान्। सख्योक्तः क्रीड़मानेन स तत्र हसता किल॥ २६॥ संरम्भात्कोपनोऽतीव विषकल्पो मुनेः सुतः। उद्दिश्य पितरं तस्य यच्छुत्वा रोषमाहरत्। ऋषिपुत्रेण नर्मार्थं क्षुद्रेण द्विजसत्तम॥ २७॥

शृङ्ग उवाच। तेजस्विनस्तव पिता तथैव च तपस्विनः। श्वा स्कन्धेन वहति मा शृङ्गिन् गर्वितो भव॥ २८॥ व्याहरत्स्वृषिपुत्रेषु माद्य किञ्चिदचो वद। अस्मद्विधेषु सिद्धेषु ब्रह्मवित्सु तपस्विषु॥ २९॥ क्व ते पुरुषमानित्वं क्व ते वाचस्तथाविधाः। दर्पजाः पितरं दृष्ट्वा यज्ञं शवधरं तथा॥ ३०॥ पिता च तव तत्कर्म नानुरूपमिवात्मनः। कृतं मुनिजनश्रेष्ठ येनाहं भृशदुःखितः॥ ३१॥

इत्यादिपर्वणि आस्तीके चत्वारिंशोऽध्यायः॥ ४०॥

—०—

सौतिरुवाच। एवमुक्तः स तेजस्वी शृङ्गी कोपसमन्वितः। शतधारं गुरुं श्रुत्वा पर्यतप्यत मन्युना॥ १॥ स तं क्षणमभिप्रेक्ष्य दुःखार्तां वाचमुत्सृजन्। अपृच्छत्तं कथं तातः स मेऽद्य शतधारकः॥ २॥

शृङ्ग उवाच। राज्ञा परीक्षिता तात मृगयां परिधावता। अवसक्तः पितुस्तेऽद्य शतः स्कन्धे भुजङ्गमः॥ ३॥

शृङ्ग्युवाच। किं मे पित्रा कृतं तस्य राज्ञोऽनिष्टं दुरात्मनः। ब्रूहि तत् शृङ्ग तत्त्वेन पश्य मे तपसो बलम्॥ ४॥

शृङ्ग उवाच। स राजा मृगयां यातः परीक्षिदभिसन्धजः।

ससार मृगमिकाकी विद्ध्वा बाणेन शीघ्रगम् ॥ ५ ॥ न चापश्यन्मृगं राजा चरंस्तस्मिन्महावने। पितरं तेऽभ्यदृष्ट्वैव पप्रच्छानभिभाषणम् ॥ ६ ॥ तं स्थाणुभूतं तिष्ठन्तं क्षुत्पिपासाश्रमातुरः। पुनः पुनर्मृगं नष्टं पप्रच्छ पितरं तव ॥ ७ ॥ स च मौनव्रतोपेतो नैव तं प्रत्यभाषत। तस्य राजा धनुष्कोट्या सर्पं स्कन्धे समाहरत् ॥ ८ ॥ शृङ्गिंस्तव पिता सोऽपि तथैवास्ते यतव्रतः। सोऽपि राजा स्वनगरं प्रस्थितो गजसाह्वयम् ॥ ९ ॥

सौतिरुवाच। श्रुत्वैवर्षिसुतस्तु शवं स्कन्धे प्रतिष्ठितम्। कोपसंरक्तनयनः प्रज्वलन्निव मन्युना ॥ १० ॥ आविष्टः स हि कोपेन शशाप नृपतिं तदा। वार्ष्युपस्पृश्य तेजस्वी क्रोधवेगबलात् कृतः ॥ ११ ॥

शृङ्गी उवाच। योऽसौ हृदस्य तातस्य तथा स्कन्धगतस्य ह। स्कन्धे मृतं समाधाद्दीत्यद्यगं राजकिल्बिषी ॥ १२ ॥ तं पापमतिसंक्रुद्धस्तक्षकः पन्नगेश्वरः। आशीविषस्तिग्मतेजा महाक्ष्यबलचोदितः ॥ १३ ॥ सप्तरात्रादितो नेता यमस्य सदनं प्रति। द्विजानामवमन्तारं कुरूणामयशस्करम् ॥ १४ ॥

सौतिरुवाच। इति श्रुत्वातिसंक्रुद्धः शृङ्गी पितरमभ्यगात्। आसीनं गोव्रजे तस्मिन्वहन्तं शवपन्नगम् ॥ १५ ॥ स तमालक्ष्य पितरं शृङ्गी स्कन्धगतेन वै। शवेन भुजगेनासीद्दुःखाच्चाश्रूणि मुमुचे पितरं चेदमब्रवीत्। श्रुत्वेमां धर्षणां तात तव तेन दुरात्मना ॥ १७ ॥ राज्ञा परीक्षिता कोपादशपं तमहं नृपम्। यथार्हति स एवोग्रं शापं कुरुकुलाधमः। सप्तमेऽहनि तं पापं तक्षकः पन्नगोत्तमः ॥ १८ ॥ वैवस्वतस्य सदनं नेता परमदारुणम्। तमब्रवीत्पिता ब्रह्मंस्तया कोपसमन्वितम् ॥ १९ ॥

शमीक उवाच। न मे प्रियं कृतं तात नैष धर्मः क्षमावताम्।

वयं तस्य नरेन्द्रस्य विषये निवसामहे ॥ २० ॥ न्यायतो रक्षिता-
स्तेन तस्य पापं न रोचये । सर्वथा वर्त्तमानस्य राज्ञो ह्यस्मद्वि-
धैः सदा ॥ २१ ॥ क्षन्तव्यं पुत्र धर्मो हि हतो हन्ति न संशयः । यदि राजा न संरक्षेत्प्रीड़ा नः परमा भवेत् ॥ २२ ॥ न शक्नुयाम चरितुं धर्मं पुत्र यथासुखम् । रक्ष्यमाणा वयं तात राजभिर्धर्मदृष्टिभिः ॥ २३ ॥ चरामो विपुलं धर्मं तेषां भागोऽस्ति धर्मतः । सर्वथा वर्त्तमानस्य राज्ञः क्षन्तव्यमेव हि ॥ २४ ॥ परीक्षित्तु विशेषेण ययास्य प्रपितामहः । रक्षत्यस्मांस्तथा राज्ञा रक्षितव्याः प्रजा विभो ॥ २५ ॥ तेनेह क्षुधितेनाद्य श्रान्तेन च तपस्विना । अजानता कृतं मन्ये व्रतमेतदिदं मम ॥ २६ ॥ अराजके जनपदे दोषा जायन्ति वै सदा । उद्वृत्तं सततं लोकं राजा दण्डेन शास्ति वै ॥ २७ ॥ दण्डात् प्रतिभयं भूयः शान्तिरुत्पद्यते तदा । नोद्विग्नश्चरते धर्मं नोद्विग्नश्चरते क्रियाम् ॥ २८ ॥ राज्ञा प्रतिष्ठितो धर्मो धर्मात् स्वर्गः प्रतिष्ठितः । राज्ञो यज्ञक्रियाः सर्वा यज्ञाद्देवाः प्रतिष्ठिताः ॥ २९ ॥ देवावृष्टिः प्रवर्त्तते वृष्टेरोषधयः स्मृताः । ओषधिभ्यो मनुष्याणां धारयेत् सततं हितम् ॥ ३० ॥ मनुष्याणाञ्च यो धाता राजा राज्यकरः पुनः । दशश्रोत्रियसमो राजा इत्येवं मनुरब्रवीत् ॥ ३१ ॥ तेनेह क्षुधितेनाद्य श्रान्तेन च तपस्विना । अजानता कृतं मन्ये व्रतमेतदिदं मम ॥ ३२ ॥ कस्मादिदं त्वया बाल्यात्प्रभृति दुष्कृतं कृतम् । न ह्यर्हति नृपः शापमस्मत्तः पुत्र सर्वथा ॥ ३३ ॥

इत्यादिपर्वण्यास्तीके एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

—❋—

शृङ्ग्युवाच । यद्येतन्मयाऽऽख्यं तात यदि वा दुष्कृतं कृतम् । प्रियं वाप्यप्रियं वा ते वागुक्ता न मृषा भवेत् ॥ १ ॥ नैवान्यथेदं भविता पितरेष ब्रवीमि ते । नाहं मृषा ब्रवीम्येव स्वैरेष्वपि कुतः प्रभो ॥ २ ॥

शमीक उवाच । जानाम्यृषिप्रभावं त्वां तात सत्यगिरं तथा । नानृतं चोक्तपूर्वं ते नैतन्मिथ्या भविष्यति ॥ ३ ॥ पिता पुत्रो वयःस्थोऽपि सततं वाच्य एव तु । यथा स्याद्गुणसंयुक्तः प्राप्नुयाच्च महद्यशः ॥ ४ ॥ किं पुनर्बाल एव त्वं तपसा भावितः सदा । वर्धते च प्रभवतां कोपोऽतीव महात्मनाम् ॥ ५ ॥ सोऽहं पश्यामि वक्तव्यं त्वयि धर्मभृतां वर । पुत्रत्वं बालताञ्चैव तवावेक्ष्य च साहसम् ॥ ६ ॥ स त्वं शमपरो भूत्वा वन्यमाहारमाचरन् । चर क्रोधमिमं हत्वा नैवं धर्मं प्रहास्यसि ॥ ७ ॥ क्रोधो हि धर्मं हरति यतीनां दुःखसञ्चितम् । ततो धर्मविहीनानां गतिरिष्टा न विद्यते ॥ ८ ॥ शम एव यतीनां हि क्षमिणां सिद्धिकारकः । क्षमावतामयं लोकः परश्चैव क्षमावताम् ॥ ९ ॥ तस्माच्छरेयाः सततं क्षमाशीलो जितेन्द्रियः । क्षमया प्राप्नुयाल्लोकान् ब्रह्मणः समनन्तरान् ॥ १० ॥ मया तु शममास्थाय यच्छक्यं कर्तुमद्य वै । तत्करिष्याम्यहं तात प्रेषयिष्ये नृपाय वै ॥ ११ ॥ मम पुत्रेण शप्तोऽसि बालेनाकृतबुद्धिना । ममेमां धर्षणां तस्मात् प्रेत्य राजन्नमर्षणाः ॥ १२ ॥

सौतिरुवाच । एवमादिश्य शिष्यं स प्रेषयामास सुव्रतः । परीक्षिते नृपतये दयापन्नो महातपाः ॥ १३ ॥ संदिश्य कुशलप्रश्नं काश्यं तक्षकमेव च । शिष्यं गौरमुखं नाम शीलवन्तं समाहितम् ॥ १४ ॥ सोऽभिगम्य ततः शीघ्रं नरेन्द्रं कुरुवर्धनम् । विवेश भवनं राज्ञः पूर्वं द्वाःस्थैर्निवेदितः ॥ १५ ॥ पूजितस्तु नरेन्द्रेण द्विजो गौरमुखस्तदा । आचख्यौ च परिश्रान्तो

राज्ञः सर्वमशेषतः । शमीकवचनं घोरं यथोक्तं मन्त्रिसन्निधौ ॥ १६ ॥

गौरमुख उवाच । शमीको नाम राजेन्द्र विषये वर्त्तते तव ॥ १७ ॥ ऋषिः परमधर्मात्मा दान्तः शान्तो महातपाः । तस्य त्वया नरव्याघ्र सर्पः प्राणैर्वियोजितः ॥ १८ ॥ अवसक्तो धनुष्कोट्या स्कन्धे मौनान्वितस्य च । शान्तवांस्तव तत्कर्म पुत्रस्य न चक्षमे ॥ १९ ॥ तेन शप्तोऽसि राजेन्द्र पितुरज्ञातमद्य वै । तक्षकः सप्तरात्रेण मृत्युस्तव भविष्यति ॥ २० ॥ तत्र रक्षां कुरुष्वेति पुनः पुनरयाब्रवीत् । तदन्यथा न शक्यश्च कर्तुं केनचिदप्युत ॥ २१ ॥ न हि शक्नोति तं यन्तुं पुत्रं कोपसमन्वितम् । ततोऽहं प्रेषितस्तेन तव राजन् हितार्थिना । २२ ॥

सूत उवाच । इति श्रुत्वा वचो घोरं स राजा कुरुनन्दनः । पर्य्यतप्यत तत्पापं कृत्वा राजा महातपाः ॥ २३ ॥ तच्च मौनव्रतं श्रुत्वा वने मुनिवरं तदा । भूय एवाभवद्राजा शोकसन्तप्तमानसः ॥ २४ ॥ अनुक्रोशात्मतां तस्य शमीकस्यावधार्य्य च । पर्य्यतप्यत भूयोऽपि कृत्वा तत् किल्बिषं मुनेः ॥ २५ ॥ न हि मृत्युं तथा राजा श्रुत्वा वै सोऽन्वतप्यत । अशोचदमरप्रख्यो यथा कृत्वेह कर्म तत् ॥ २६ ॥ ततस्तं प्रेषयामास राजा गौरमुखं तदा । भूयः प्रसादं भगवान् करोत्विह ममेति वै ॥ २७ ॥ तस्मिंश्च गतमात्रेऽथ राजा गौरमुखे तदा । मन्त्रिभिर्मन्त्रयामास सह संविग्नमानसः ॥ २८ ॥ संमन्त्र्य मन्त्रिभिश्चैव स तथा मन्त्रतत्त्ववित् । प्रासादं कारयामास एकस्तम्भं सुरक्षितम् ॥ २९ ॥ रक्षाञ्च विदधे तत्र भिषजश्चौषधानि च । ब्राह्मणान्मन्त्रसिद्धांश्च सर्वतो वै न्ययोजयत् ॥ ३० ॥ राजकार्य्याणि तत्रस्थः सर्वान्येवाकरोच्च सः । मन्त्रिभिः सह धर्मज्ञः समन्तात्परिरक्षितः ॥ ३१ ॥ नचैनं कश्चिदारूढं लभते राजसत्तमम् । वातोऽपि निरवस्तत्र

प्रवेशे विनिवार्य्यते ॥ ३२॥ प्राप्ते च दिवसे तस्मिन् सप्तमे द्विजसत्तमः। काश्यपोऽभ्यागमद्दिष्टां राजानं चिकित्सितुम् ॥३३॥ श्रुतं हि तेन तद्भूत्या तं राजसत्तमम्। तक्षकः पन्नगश्रेष्ठो नेष्यते यमसादनम् ॥ ३४ ॥ तं दष्टं पन्नगेन्द्रेण करिष्येऽहमपज्वरम्। तत्र मेऽर्थश्च धर्मश्च भवितेति विचिन्तयन् ॥ ३५ ॥ तं ददर्श स नागेन्द्रस्तक्षकः काश्यपं पथि। गच्छन्तमेकमनसं द्विजो भूत्वा वयोऽतिगः ॥३६॥ तमब्रवीत्पन्नगेन्द्रः काश्यपं मुनिपुङ्गवम्। क्व भवांस्त्वरितो याति किञ्च कार्य्यं चिकीर्षति ॥ ३७ ॥

काश्यप उवाच। नृपं कुरुकुलोत्पन्नं परीक्षितमरिन्दमम्। तक्षकः पन्नगश्रेष्ठस्तेजसाद्य प्रधक्ष्यति ॥ ३८ ॥ तं दष्टं पन्नगेन्द्रेण तेनाग्निसमतेजसा। पाण्डवानां कुलकरं राजानममितौजसम्। गच्छामि त्वरितं सौम्य सद्यः कर्त्तुमपज्वरम् ॥ ३९ ॥

तक्षक उवाच। अहं स तक्षको ब्रह्मंस्तं धक्ष्यामि महीपतिम्। निवर्त्तस्व न शक्तस्त्वं मया दष्टं चिकित्सितुम् ॥ ४० ॥

काश्यप उवाच। अहं तं नृपतिं गत्वा त्वया दष्टमपज्वरम्। करिष्यामीति मे बुद्धिर्विद्याबलसमन्वितः ॥ ४१ ॥

इत्यादिपर्वण्यास्तीके द्वाचत्वारिंशोऽध्यायः ॥ ४२॥

—०:०—

तक्षक उवाच। यदि दष्टं मयेह त्वं शक्तः किञ्चिच्चिकित्सितुम्। ततो द्वत्तं मया दष्टमिमं जीवय काश्यप ॥ १ ॥ परं मन्त्रबलं यत्ते तद्दर्शय यतस्व च। न्यग्रोधमेनं धक्ष्यामि पश्यतस्ते द्विजोत्तम ॥ २ ॥

काश्यप उवाच। दश नागेन्द्र द्वत्तं त्वं यद्येतदभिमन्यसे। अहमेनं त्वया दष्टं जीवयिष्ये भुजङ्गम ॥ ३ ॥

सौतिरुवाच। एवमुक्तः स नागेन्द्रः काश्यपेन महात्मना।

अदग्धवृक्षमभ्येत्य न्यग्रोधं पन्नगोत्तमः ॥ ४ ॥ स वृक्षस्तेन दृष्टस्तु पन्नगेन महात्मना । आशीविषविषोपेतः प्रजज्वाल समन्ततः ॥ ५ ॥ तं दग्ध्वा स नगं नागः काश्यपं पुनरब्रवीत् । कुरु यत्नं द्विजश्रेष्ठ जीवयैनं वनस्पतिम् ॥ ६ ॥

सौतिरुवाच । भस्मीभूतं ततो दृष्ट्वा पन्नगेन्द्रस्य तेजसा । भस्म सर्वं समाहृत्य काश्यपो वाक्यमब्रवीत् ॥ ७ ॥ विद्याबलं पन्नगेन्द्र पश्य मेऽद्य वनस्पतौ । अहं संजीवयाम्येनं पश्यतस्ते भुजङ्गम ॥ ८ ॥ ततः स भगवान् विद्वान् काश्यपो द्विजसत्तमः । भस्मराशीकृतं वृक्षं विद्यया समजीवयत् ॥ ९ ॥ अङ्कुरं कृतवांस्तत्र ततः पर्णद्वयान्वितम् । पलाशिनं शाखिनञ्च तथा विटपिनं पुनः ॥ १० ॥ तं दृष्ट्वा जीवितं वृक्षं काश्यपेन महात्मना । उवाच तक्षको ब्रह्मन्नैतदित्यद्भुतं त्वयि ॥ ११ ॥ द्विजेन्द्र यदिदं वृक्षं हन्या मम वा महिषस्य वा । कं त्वमर्थमभिप्रेप्सुर्यासि तत्र तपोधन ॥ १२ ॥ यत्तेऽभिलषितं प्राप्तुं फलं तस्मान्नृपोत्तमात् । अहमेव प्रदास्यामि तत्ते यद्यपि दुर्लभम् ॥ १३ ॥ विप्रशापाभिभूते च क्षीणायुषि नराधिपे । घटमानस्य ते विप्र सिद्धिः संशयिता भवेत् ॥ १४ ॥ ततो यशः प्रदीप्तं ते त्रिषु लोकेषु विश्रुतम् । निरंशुरिव घर्मांशुरन्तर्धानमितो व्रजेत् ॥ १५ ॥

काश्यप उवाच । धनार्थी याम्यहं तत्र तन्मे देहि भुजङ्गम । ततोऽहं विनिवर्त्तिष्ये ख्यापयेयं प्रयच्छ वै ॥ १६ ॥

तक्षक उवाच । यावद्धनं प्रार्थयसे तस्माद्राज्ञस्ततोऽधिकम् । अहमेव प्रदास्यामि निवर्त्तस्व द्विजोत्तम ॥ १७ ॥

सौतिरुवाच । तक्षकस्य वचः श्रुत्वा काश्यपो द्विजसत्तमः । प्रदध्यौ सुमहातेजा राजानं प्रति बुद्धिमान् ॥ १८ ॥ दिव्यज्ञानः स तेजस्वी ज्ञात्वा तं नृपतिं तदा । क्षीणायुषं पाण्डवेयममावर्त्तत काश्यपः ॥ १९ ॥ लब्ध्वा वित्तं मुनिवरस्तक्षकाद्यावदी-

स्मितम्। निवृत्ते काश्यपे तस्मिन् समयेन महात्मनि। जगाम तक्षकस्तूर्णं नगरं नागसाह्वयम् ॥ २० ॥ अथ ब्रुवाव गच्छन् स तक्षको जगतीपतिम्। मन्त्रैर्गदैर्विषहरैरक्ष्यमाणं प्रयत्नतः ॥२१॥

सूत उवाच। स चिन्तयामास तदा मायायोगेन पार्थिवः। मया वञ्चयितव्योऽसौ उपायः को भवेदिति ॥ २२ ॥ ततस्तापसरूपेण प्राहिणोत्स भुजङ्गमान्। फलदर्भोदकं गृह्य राज्ञे नागोऽथ तक्षकः ॥ २३ ॥

तक्षक उवाच। गच्छध्वं यूयमव्यग्रा राजानं कार्यवत्तया। फलपुष्पोदकं नाम प्रतिग्राहयितुं नृपम् ॥ २४ ॥

सौतिरुवाच। ते तक्षकसमादिष्टास्तथा चक्रुर्भुजङ्गमाः। उपनिन्युस्तथा राज्ञे दर्भानापः फलानि च ॥२५॥ तच्च सर्वं स राजेन्द्रः प्रतिजग्राह वीर्यवान्। कृत्वा तेषाञ्च कार्याणि गम्यतामित्युवाच तान् ॥२६॥ गतेषु तेषु नागेषु तापसच्छद्मरूपिषु। अमात्यान् सुहृदश्चैव प्रोवाच स नराधिपः ॥ २७ ॥ भक्षयन्तु भवन्तो वै स्वादूनीमानि सर्वशः ॥ २८ ॥ तापसैरुपनीतानि फलानि सहिता मया। ततो राजा ससचिवः फलान्यादातुमैच्छत ॥ २९ ॥ विधिना सम्प्रयुक्तो वै ऋषिवाक्येन तेन तु। यस्मिन्नेव फले नागस्तमेवाभक्षयत् स्वयम् ॥ ३० ॥ ततो भक्षयतस्तस्य फलात् कृमिरभूदणुः। कृष्णकः कृष्णनयनस्ताम्रवर्णोऽथ शीतनक ॥ ३१ ॥ स तं गृह्य नृपश्रेष्ठः सचिवानिदमब्रवीत्। अस्तमभ्येति सविता विषादद्य न मे भयम् ॥ ३२ ॥ सत्यवागसु स मुनिः कृमिर्मान्द्यतामयम्। तक्षको नाम भूत्वा वै तथा परिहृतं भवेत् ॥ ३३ ॥ ते चैनमन्ववर्तन्त मन्त्रिणः कालचोदिताः। एवमुक्त्वा स राजेन्द्रो ग्रीवायां संनिवेश्य ह ॥ ३४ ॥ कृमिकं प्राहसत्तूर्णं मुमूर्षुर्नष्टचेतनः। प्रहसन्नेव भोगेन तक्षकेण त्ववेष्ट्यत ॥ ३५ ॥ ततात् फलाद्विनिष्क्रम्य तदा राज्ञे

निवेदितम्। वेष्टयित्वा च वेगेन विनद्य च महास्वनम्। अदृश्यत् पृथिवीपालं तक्षकः पन्नगेश्वरः॥ ३६॥

इत्यादिपर्वण्यास्तीके त्रयश्चत्वारिंशोऽध्यायः॥ ४३॥

—•—

सूत उवाच। ते तथा मन्त्रिणो दृष्ट्वा भोगेन परिवेष्टितम्। विषण्णवदनाः सर्वे रुरुदुर्भृशदुःखिताः॥ १॥ तन्तु नादं ततः श्रुत्वा मन्त्रिणस्ते प्रदुद्रुवुः। अपश्यन्त तथा यान्तमाकाशे नागमङ्गतम्॥ २॥ सौमन्तमिव कुर्वाणं नभसः पद्मवर्चसम्। तक्षकं पन्नगश्रेष्ठं दृष्ट्वा शोकपरायणाः॥ ३॥ ततस्तु ते तद्गृहमग्निनाहृतं प्रदीप्यमानं विषजेन भोगिनः। भयात्परित्यज्य दिशः प्रपेदिरे पपात राजाग्निताडितो यथा॥ ४॥ ततो नृपे तक्षकतेजसा हते प्रयुज्य सर्वाः परलोकसत्क्रियाः। शुचिर्द्विजो राजपुरोहितस्तदा तथैव तं तस्य नृपस्य मन्त्रिणः॥ ५॥ नृपं शिशुं तस्य सुतं प्रचक्रिरे समेत्य सर्वे पुरवासिनो जनाः। नृपं यमाहुस्तममित्रघातिनं कुरुप्रवीरं जनमेजयं जनाः॥ ६॥ स बाल एवार्यमतिर्नृपोत्तमः सहैव तैर्मन्त्रिपुरोहितैस्तदा। शशास राज्यं कुरुपुङ्गवाग्रजो यथास्य वीरः प्रपितामहस्तथा॥ ७॥ ततस्तु राजानमभिप्रतापनं समीक्ष्य ते तस्य नृपस्य मन्त्रिणः। सुवर्णवर्णामसुपेत्य काश्यपं वपुष्टमार्थं वरयाम्प्रचक्रमुः॥ ८॥ ततः स राजा प्रददौ वपुष्टमां कुरुप्रवीराय परीक्ष्य धर्मतः। स चापि तां प्राप्य मुदा युतोऽभवत्तदाप्यनारीषु मनो दधे क्वचित्॥ ९॥ सरःसु फुल्लेषु वनेषु चैव प्रसन्नचेता विजहार वीर्यवान्। तथा स राजन्यवरो विजह्निवान् यथोर्वशीं प्राप्य पुरा पुरूरवाः॥ १०॥ वपुष्टमा चापि वरं पतिव्रता प्रतीतरूपा

सम्भवाप्य भूपतिम्। भार्येव रामा रमयाम्बभूव तं विहारकाले-ष्वनुद्योधसुन्दरी ॥ ११ ॥

ऋष्यादिपर्वस्थाखीके चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

—०:०—

सूत उवाच। एतस्मिन्नेव काले तु जरत्कारुर्महातपाः। चचार पृथिवीं कृत्स्नां यत्रसायंगृहो मुनिः ॥ १ ॥ चरन्दीर्घां महातेजा दुश्चरामकृतात्मभिः। तीर्थेष्वाप्लवनं कृत्वा पुण्येषु विच-चार ह ॥ २ ॥ वायुभक्षो निराहारः शुष्यन्नहरहर्मुनिः। स ददर्श पितॄन् गर्त्ते लम्बमानानधोमुखान् ॥ ३ ॥ एकतन्तुवशिष्टं वै वीरणस्तम्बमाश्रितान्। तं तन्तुञ्च शनैराखुमादानं विले-शयम् ॥४॥ निराहारान् कृशान् दीनान् गर्त्ते स्वत्राणमिच्छतः। उपसृत्य स तान्दीनान् दीनरूपोऽभ्यभाषत ॥ ५ ॥ के भवन्तो-ऽवलम्बन्ते वीरणस्तम्बमाश्रिताः। दुर्बलं खादितैर्मूलैराखुना विलवासिना ॥ ६ ॥ वीरणस्तम्बके मूलं यदप्येकमिह स्थितम्। तदप्ययं शनैराखुरादत्ते दशनैः शितैः ॥ ७ ॥ छेत्स्यतेऽल्पा-वशिष्टत्वादेतदप्यचिरादिव। ततस्तु पतितारोऽत्र गर्त्ते व्यक्त-मधोमुखाः ॥ ८ ॥ तस्य मे दुःखमुत्पन्नं दृष्ट्वा युष्मानधोमुखान्। कृच्छ्रमापदमापन्नान् प्रियं किं करवाणि वः ॥ ९ ॥ तपसोऽस्य चतुर्थेन तृतीयेनाथ वा पुनः। अर्द्धेन वापि निस्तर्त्तुमापदं ब्रूत मा चिरम् ॥ १० ॥ अथवापि समग्रेण तरन्तु तपसा मम। भवन्तः सर्व एवेह कामसेवं विधीयताम् ॥ ११ ॥

पितर ऊचुः। ब्रह्मो भवान् ब्रह्मचारी यो नस्त्रातुमिहेच्छसि। न तु विप्राग्र तपसा शक्यते तद्व्यपोहितुम् ॥ १२ ॥ अस्ति नस्तात तपसः फलं प्रवदतांवर। सन्तानप्रत्ययाद्ब्रह्मन् यतामनिरयेऽशुचौ ॥ १३ ॥ सन्तानं हि परो धर्म एवमाह

पितामहः। लब्धनामेह नस्तात न ज्ञानं प्रतिभाति वै ॥ १४ ॥ येन त्वां नाभिजानीमो लोके विख्यातपौरुषम्। हन्त्वो भवान्महाभागो यो नः शोच्यान् सुदुःखितान् ॥ १५ ॥ शोचते चैव कारुण्याच्छ्रुत्वा ये वै वयं द्विज। यायावरा नाम वयश्चषयः शंसितव्रताः ॥ १६ ॥ लोकात् पुरस्कादिह भ्रष्टाः सन्तानप्रचयान्मुने। प्रणष्टं नस्तपस्तीव्रं न हि नस्तन्तुरस्ति वै ॥ १७ ॥ अस्ति त्वेकोऽद्य नस्तन्तुः सोऽपि नास्ति यथा तथा। मन्दभाग्योऽल्पभाग्यानां तप एकं समाश्रितः ॥ १८ ॥ जरत्कारुरितिख्यातो वेदवेदाङ्गपारगः। नियतात्मा महात्मा च सुव्रतः सुमहातपाः ॥ १९ ॥ तेन स्म नष्टशोभात् क्षुद्भमापादिता वयम्। न तस्य भार्या प्रुवो वा बान्धवो वापि कश्चन ॥ २० ॥ तस्मात्त्वामहे गर्त्ते नष्टसंज्ञा ह्यनाथवत्। स वक्ष्यत्यस्वया दृष्ट्वा अस्माकं नाथवत्तया ॥ २१ ॥ पितरस्तेऽवलम्बन्ते गर्त्ते दीना ह्यधोमुखाः। साधु दारान् कुरुष्वेति प्रजासुत्पादयेति च ॥ २२ ॥ कुलतन्तुर्हि नः शिष्टस्त्वमेवैकस्तपोधन। यत्त्वं पश्यसि नो ब्रह्मन् वीरणस्तम्बमाश्रितान् ॥ २३ ॥ एषोऽस्माकं कुलस्तम्ब आस्ते स्वकुलवर्द्धनः। यानि पश्यसि वै ब्रह्मन्मूलानीहास्य वीरुधः ॥ २४ ॥ एते नस्तन्तवस्तात कालेन परिभक्षिताः। यच्चैतत्पश्यसि ब्रह्मन्मूलमस्यार्द्धभक्षितम् ॥ २५ ॥ यत्र लम्बामहे गर्त्ते सोऽप्येकस्तप आस्थितः। यमाखुं पश्यसि ब्रह्मन् काल एष महाबलः। स तं तपोरतं मन्दं शनैः क्षपयते तुदन् ॥ २६ ॥ जरत्कारुं तपोलुब्धं मन्दात्मानमचेतसम्। न हि नस्तत्तपस्तस्य तारयिष्यति सत्तम ॥ २७ ॥ छिन्नमूलान् परिभ्रष्टान् कालोपहतचेतसः। अधः प्रविष्टान् पश्यास्मान्यथा दुष्कृतिनस्तथा ॥ २८ ॥ अस्मासु पतितेष्वत्र सह सर्वैः सबान्धवैः। छिन्नः कालेन सोऽप्यत्र गन्ता व नरकं ततः ॥ २९ ॥ तपो वाप्यथवा यज्ञो यज्ञान्यत्पावनं

महत्। तत्सर्वमपरं तात न सत्यात्समं मतम् ॥ २० ॥ स तात दृष्ट्वा ब्रूयास्तं जरत्कारुं तपोधनम्। यथा दृष्टमिदं वात्र त्वयाख्येयमशेषतः ॥ २१ ॥ यथा दारान् प्रकुर्य्यात्स पुत्रानुत्पादयेद्यथा। तथा ब्रह्मंस्त्वया वाच्यः सोऽस्माकं नाथवत्तथा ॥ २२ ॥ बान्धवानां हि तस्येह यथा चात्मकुलं तथा। कस्मं बन्धुमिवास्माकमनुशोचसि सत्तम। श्रोतुमिच्छाम सर्वेषां को भवानिह तिष्ठति ॥ २३ ॥

इत्यादिपर्वण्यास्तीके पञ्चचत्वारिंशोऽध्यायः ॥ ३८ ॥

—०—

सौतिरुवाच। एतच्छ्रुत्वा जरत्कारुर्भृशं शोकपरायणः। उवाच तान् पितॄन् दुःखाद्बाष्पसन्दिग्धया गिरा ॥ १ ॥

जरत्कारुरुवाच। मम पूर्वे भवन्तो वै पितरः सपितामहाः। तद्ब्रूत यन्मया कार्य्यं भवतां प्रियकाम्यया ॥ २ ॥ अहमेव जरत्कारुः किल्बिषी भवतां सुतः। ते दण्डं धारयत मे दुष्कृतेरकृतात्मनः ॥ ३ ॥

पितर ऊचुः। पुत्र दिष्ट्यासि संप्राप्त इमं देशं यदृच्छया। किमर्थञ्च त्वया ब्रह्मन्नवज्ञातो दारसंग्रहः ॥ ४ ॥

जरत्कारुरुवाच। ममायं पितरो नित्यं हृद्यर्थः परिवर्त्तते। ऊर्द्ध्वरेताः शरीरं वै प्रापयेयमसुत्र वै ॥ ५ ॥ न दारान् वै करिष्येऽहमिति मे भावितं मनः। एवं दृष्ट्वा तु भवतः शकुन्तानिव लम्बतः ॥ ६ ॥ मया निवर्तिता बुद्धिर्ब्रह्मचर्य्यात्पितामहाः। करिष्ये वः प्रियं कामं निवेक्ष्येऽहमसंशयम् ॥ ७ ॥ सनाम्नीं यद्यहं कन्यामुपलप्स्ये कदाचन। भविष्यति च या काचिद्वैक्लवत् स्वयमुद्यता ॥ ८ ॥ प्रतिग्रहीता तामस्मि न भरेयञ्च यामहम्। एवंविधमहं कुर्य्यां निवेशं प्राप्नुयां यदि ॥ ९ ॥ अन्यथा न करि-

ष्येऽहं सत्यमेतत्पितामहाः । तत्र चोत्पत्स्यते जन्तुर्भवतां तारणाय वै । शाश्वताव्ययावेव तिष्ठन्तु पितरो मम ॥ १० ॥

सूत उवाच । एवमुक्त्वा तु स पितॄंश्चचार पृथिवीं मुनिः । न च स्म लभते भार्यां ब्रह्मोऽयमिति शौनक ॥ ११ ॥ यदा निर्वेदमापन्नः पितृभिश्चोदितस्तदा । तदारण्यं स गत्वोग्रैश्चुक्रोच भृशदुःखितः ॥ १२ ॥ स त्वरण्यगतः प्राज्ञः पितॄणां हितकाम्यया । उवाच कन्यां याचामि तिस्रो वाचः शमेरिमाः ॥ १३ ॥ यानि भूतानि सन्तीह स्थावराणि चराणि च । अन्तर्हितानि वा यानि तानि शृण्वन्तु मे वचः ॥ १४ ॥ उग्रे तपसि वर्त्तन्तं पितरश्चोदयन्ति माम् । निर्विण्णस्तेन दुःखार्त्तः सन्तानस्य चिकीर्षया ॥ १५ ॥ निवेशायाखिलां भूमिं कन्याभैक्षं वरामि भोः । दरिद्रो दुःखशीलश्च पितृभिः सृष्टियोजितः ॥ १६ ॥ यस्य कन्यास्ति भूतस्य ये मयेह प्रकीर्त्तिताः । ते मे कन्यां प्रयच्छन्तु चरतः सर्वतो दिशम् ॥ १७ ॥ मम कन्या सनाम्नी या भैक्षवद्भोक्ष्यता भवेत् । भरेयञ्चैव यां नाहं तां मे कन्यां प्रयच्छत ॥ १८ ॥ ततस्ते पन्नगा ये वै जरत्कारौ समाहिताः । तामादाय प्रहृष्टास्ते वासुकेः प्रत्यवेदयन् ॥ १९ ॥ तेषां श्रुत्वा स नागेन्द्रस्तां कन्यां समलङ्कृताम् । प्रगृह्यारण्यमगमत्स्वयमेव तस्य पन्नगः ॥ २० ॥ तत्र तां भैक्षवत्कन्यां प्रादात्तस्मै महात्मने । नागेन्द्रो वासुकिर्ब्रह्मन्न स तां प्रत्यगृह्णत ॥ २१ ॥ अस्तमेति वै मत्वा भरणे चाविचारिते । मोक्षभावे स्थितश्चापि हृद्दीभूतः परियहे ॥ २२ ॥ ततो नाम स कन्यायाः पप्रच्छ भृगुनन्दन । वासुकिं भरणं वास्या न कुर्य्यामित्युवाच ह ॥ २३ ॥

इत्यादिपर्वण्यास्तीके षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

—०*०—

सौतिरुवाच। वासुकिस्वब्रवीद्वाक्यं जरत्कारुमृषिं तदा। स्वनाम्नी तव कल्येयं स्वसा मे तपसान्विता ॥ १ ॥ भरिष्यामि च ते भार्यां प्रतिच्छेमां द्विजोत्तम। रक्षणञ्च करिष्येऽस्याः सर्वयत्नात्तपोधन। त्वदर्थं रक्ष्यते चैषा मया मुनिवरोत्तम ॥२॥

ऋषिरुवाच। न भरिष्येऽहमेतां वै एष वै समयः कृतः। अप्रियञ्च न कर्त्तव्यं कृते चैनां त्यजाम्यहम् ॥ ३ ॥

सौतिरुवाच। प्रतिश्रुते तु नागेन भरिष्ये भगिनीमिति। जरत्कारुस्तदा वेश्म भुजगस्य जगाम ह ॥ ४ ॥ तत्र मन्त्रविदां श्रेष्ठस्ततो हृष्टो महाव्रतः। जग्राह पाणिं धर्मात्मा विधिमन्त्रैः पुरस्कृतम् ॥ ५ ॥ ततो वासगृहं रम्यं पन्नगेन्द्रस्य संमतम्। जगाम भार्यामादाय स्तूयमानो महर्षिभिः ॥ ६ ॥ शयनं तत्र संकल्पं स्वर्ज्जीकरणसंवृतम्। तत्र भार्यासहायो वै जरत्कारुरवास ह ॥ ७ ॥ स तत्र समयं चक्रे भार्यया सह सत्तमः। विप्रियं मे न कर्त्तव्यं न च वाच्यं कदाचन ॥ ८ ॥ त्यजेयं विप्रिये च त्वां कृते वासस्तु ते गृहे। एतद्गृहाण वचनं मया यत्समुदीरितम् ॥ ९ ॥ ततः परमसंविग्ना स्वसा नागपतेस्तदा। अतिदुःखान्विता वाक्यं तामुवाचैवमस्विति ॥ १० ॥ तथैव सा च भर्त्तारं दुःखशीलमुपाचरत्। उपायैः श्वेतकाकीयैः प्रियकामा यशस्विनी ॥ ११ ॥ ऋतुकाले ततः स्नाता कदाचिद्वासुकेः स्वसा। भर्त्तारं वै यथान्यायमुपतस्थे महामुनिम् ॥ १२ ॥ तत्र तस्याः समभवद्गर्भो ज्वलनसन्निभः। अतीव तेजसा युक्तो वैश्वानरसमद्युतिः ॥ १३ ॥ शुक्लपक्षे यथा सोमो व्यवर्द्धत तथैव सः। ततः कतिपयाहस्य जरत्कारुर्महायशाः ॥ १४ ॥ उत्सङ्गेऽस्याः शिरः कृत्वा सुष्वाप परिखिद्यवत्। तस्मिंश्च सुप्ते विप्रेन्द्रे सवितास्तमुपागमत् ॥ १५ ॥ अङ्गः परिक्षये ब्रह्मंस्ततः सा चिन्तयत्तदा। वासुकेर्भगिनी भीता धर्मलोपान्-

मनस्विनी ॥ १६ ॥ किन्नु मे सुकृतं भूयाद्धर्म्मो रक्ष्यतमं न वा ।
दुःखशीलो हि धर्मात्मा कथं नास्यापराङ्ग्याम् ॥ १७ ॥ कोपो
वा धर्मशीलस्य धर्मलोपोऽथवा पुनः । धर्मलोपो गरीयान्वै
स्यादित्यचाकरोन्नतिम् ॥ १८ ॥ उत्यापयिष्ये यद्येनं भूयः कः
करिष्यति । धर्मलोपो भवेदस्य सन्ध्यातिक्रमणे ध्रुवम् ॥ १९ ॥
इति निश्चित्य मनसा जरत्कारुर्भुजङ्गमा । तत्यजे दीप्ततपसं
शयानमनलोपमम् ॥ २० ॥ उवाचेदं वचः श्लक्ष्णं ततो मधुर-
भाषिणी । उत्तिष्ठ त्वं महाभाग सूर्य्योऽस्तमुपगच्छति ॥ २१ ॥
सन्ध्यामुपास्व भगवन्मपः स्पृष्ट्वा यतव्रत । प्रादुष्कृताग्निहोत्रोऽयं
सुकृतौ रम्यदारुणः ॥ २२ ॥ सन्ध्या प्रवर्त्तते चेयं पश्चिमस्यां
दिशि प्रभो । एवमुक्तः स भगवान् जरत्कारुर्महातपाः ॥ २३ ॥
भार्य्यां प्रस्फुरमाणौष्ठ इदं वचनमब्रवीत् । अवमानः प्रयुक्तोऽयं
त्वया मम भुजङ्गमे ॥ २४ ॥ समीपे ते न वत्स्यामि गमिष्यामि
यथागतम् । शक्तिरस्ति न वामोरु मयि सुप्ते विभावसोः ॥ २५ ॥
अस्तं गन्तुं यथाकालमिति मे हृदि वर्त्तते । न वाप्यवमतस्येह
वासो रोचेत कस्यचित् ॥ २६ ॥ किं पुनर्ब्रह्मशीलस्य मम वा
महिषस्य वा । एवमुक्ता जरत्कारुर्भर्त्रा हृदयकम्पनम् ॥ २७ ॥
अब्रवीद्वेपिनी तत्र वासुकेः सन्निवेशने । नावमानात् कृतवती
तवाहं विप्र बोधनम् ॥ २८ ॥ धर्मलोपो न ते विप्र स्यादित्ये-
तन्मया कृतम् । उवाच भार्य्यामित्युक्तो जरत्कारुर्महातपाः ॥ २९ ॥
ऋषिः कोपसमाविष्टस्त्यक्तुकामो भुजङ्गमाम् । न मे वागनृतं प्राह
गमिष्येऽहं भुजङ्गमे ॥ ३० ॥ समयो ह्येष मे पूर्वं त्वया सह
मिथः कृतः । सुखमस्युषितो भद्रे ब्रूयास्त्वं भ्रातरं शुभे ॥ ३१ ॥
इतो मयि गते भीरु गतः स भगवानिति । त्वं चापि मयि
निष्क्रान्ते न शोकं कर्त्तुमर्हसि ॥ ३२ ॥ इत्युक्ता सानवद्याङ्गी
प्रत्युवाच मुनिं तदा । जरत्कारुं जरत्कारुश्चिन्ताशोकपरायणा

॥ ३३ ॥ वाष्पगद्गदया वाचा मुखेन परिशुष्यता । लताञ्जलिवरारोहा पर्य्यश्रुनयना ततः ॥ ३४ ॥ धैर्य्यमालम्ब्य वामोरूर्हृदयेन प्रवेपता । न मामर्हसि धर्मज्ञ परित्यक्तुमनागसम् ॥३५॥ धर्मे स्थितां स्थितो धर्मे सदा प्रियहिते रताम् । प्रदाने कारणं यच्च मम तुभ्यं द्विजोत्तम ॥ ३६ ॥ तदलब्धवतीं मन्दां किं मां वक्ष्यति वासुकिः । मातृशापाभिभूतानां ज्ञातीनां मम सत्तम ॥ ३७ ॥ अपत्यमीप्सितं त्वत्तस्तच्च तावन्न दृश्यते । त्वत्तो ह्यपत्यलाभेन ज्ञातीनां मे शिवं भवेत् ॥ ३८ ॥ संप्रयोगो भवेन्नायं मम सोपक्रमया द्विज । ज्ञातीनां हितमिच्छन्ती भगवंस्त्वां प्रमादये ॥ ३९ ॥ इममभ्यक्तरूपं मे गर्भमाधाय सत्तम । कथं त्यक्ता महात्मा सन् गन्तुमिच्छस्यनागसम् ॥ ४० ॥ एवमुक्तस्तु स मुनिर्भार्य्यां वचनमब्रवीत् । यदुक्तमनृतं पूर्वं जरत्कारुं तपोधनः ॥ ४१ ॥ अस्त्यत्र सुभगे गर्भस्तव वैश्वानरोपमः । ऋषिः परमधर्मात्मा वेदवेदाङ्गपारगः ॥ ४२ ॥ एवमुक्ता स धर्मात्मा जरत्कारुर्महातपाः । उग्राय तपसे भूयो जगाम कृतनिश्चयः ॥ ४३॥

इत्यादिपर्वण्यास्तीके सप्तचत्वारिंशोऽध्यायः ॥ ४७॥

—०:०—

सौतिरुवाच । गतमात्रं तु भर्त्तारं जरत्कारुरवेदयत् । भ्रातुः सकाशमागम्य यथातथ्यं तपोधन ॥ १ ॥ ततः स भुजगश्रेष्ठः श्रुत्वा सुमहदप्रियम् । उवाच भगिनीं दीनां तदा दीनतरः स्वयम् ॥ २ ॥

वासुकिरुवाच । जानासि भद्रे यत्कार्य्यं प्रदाने कारणञ्च यत् । पन्नगानां हितार्थाय पुत्रस्ते स्यात्ततो यदि ॥ ३ ॥ स सर्पसत्रात्किल नो मोक्षयिष्यति वीर्य्यवान् । एवं पितामहः पूर्वमुक्तवांस्तु सुरैः सह । अप्यस्ति गर्भः सुभगे तस्मात्ते मुनि-

सत्तमात् । न चेच्छाम्यफलं तस्य दानकर्म मनीषिणः ॥ ४ ॥ कामश्च मम न न्याय्यं प्रष्टुं त्वां कार्य्यमीदृशम् । किन्तु कार्य्य-गरीयस्त्वात्ततस्त्वाहमचूचुदम् ॥ ५ ॥ दुर्वार्य्यतां विदित्वा च भर्त्तुस्तेऽतितपस्विनः । नैनमन्वागमिष्यामि कदाचिद्धि शपेत्स माम् ॥ ६ ॥ आचक्ष्व भद्रे भर्त्तुस्त्वं सर्वमेव विचेष्टितम् । उद्धरस्व च शल्यं मे घोरं हृदि चिरस्थितम् ॥ ७ ॥ जरत्कारुस्ततो वाक्य-मित्युक्ता प्रत्यभाषत । आश्वासयन्ती सततं वासुकिं पन्नगेश्वरम् ॥ ८ ॥

जरत्कारुरुवाच । पृष्टो मयापत्यहेतोः स महात्मा महा-तपाः । अस्तीत्युत्तरमुद्दिश्य ममेदं गतवांश्च सः ॥ ९ ॥ स्वैरे-ष्वपि न तेनाहं स्मरामि वितथं वचः । उक्तपूर्वं कुतो राजन् साम्पराये स वक्ष्यति ॥ १० ॥ न सन्तापस्त्वया कार्य्यः कार्य्यं प्रति भुजङ्गमे । उत्पत्स्यति च ते पुत्रो ज्वलनार्कसमप्रभः ॥ ११ ॥ इत्युक्ता स हि मां भ्रातर्गतो भर्त्ता तपोधनः । तस्माद्धेतु परं दुःखं तवेदं मनसि स्थितम् ॥ १२ ॥

सौतिरुवाच । एतच्छ्रुत्वा स नागेन्द्रो वासुकिः परया मुदा । एवमस्त्विति तद्वाक्यं भगिन्याः प्रत्यगृह्णत ॥ १३ ॥ सान्त्वमानार्थ-दानैश्च पूजया चानुरूपया । सोदर्य्यां पूजयामास स्वसारं पन्नगोत्तमः ॥ १४ ॥ ततः प्रववृधे गर्भो महातेजा महाप्रभः । यथा सोमो द्विजश्रेष्ठ शुक्लपक्षोदितो दिवि ॥ १५ ॥ अथ काले तु सा ब्रह्मन् प्रजज्ञे भुजगस्वसा । कुमारं देवगर्भाभं दित्या-मातृभयापहम् ॥ १६ ॥ ववृधे स तु तत्रैव नागराजनिवेशने । वेदांश्चाधिजगे साङ्गान् भार्गवाच्यवनात्मुनेः ॥ १७ ॥ चीर्णव्रतो बाल एव बुद्धिसत्त्वगुणान्वितः । नाम चास्याभवत् ख्यातं लोके-ष्वास्तीक इत्युत ॥ १८ ॥ अस्तीत्युक्ता गतो यस्मात्पिता गर्भस्थ-मेव तम् । वनं तस्मादिदं तस्य नामास्तीकेति विश्रुतम् ॥ १९ ॥

स बाल एव तत्रस्थश्चरन्नमितबुद्धिमान्। गृहे पन्नगराजस्य प्रयत्नात्परिरक्षितः ॥ २० ॥ भगवानिव देवेशः शूलपाणिर्हिरण्मयः। विवर्द्धमानः सर्वांस्तान् पन्नगानभ्यहर्षयत् ॥ २१ ॥

इत्यादिपर्वण्यास्तीके अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

—०—

शौनक उवाच। यदृच्छन्तदा राजा मन्त्रिणो जनमेजयः। पितुः स्वर्गगतिं तन्मे विस्तरेण पुनर्वद ॥ १ ॥

सौतिरुवाच। शृणु ब्रह्मन्यथाऽपृच्छन्मन्त्रिणो नृपतिस्तदा। यथा चाख्यातवन्तस्ते निधनं तत्परीक्षितः ॥ २ ॥

जनमेजय उवाच। जानन्ति स्म भवन्तस्तद्यथाऽवृत्तं पितुर्मम। आसीद्यथा स निधनं गतः काले महायशाः ॥ ३ ॥ श्रुत्वा भवत्मुखाद्धि पितुर्वृत्तमशेषतः। कल्याणं प्रतिपत्स्यामि विपरीतं न जातुचित् ॥ ४ ॥

सौतिरुवाच। मन्त्रिणोऽथाब्रुवन् वाक्यं पृष्टास्तेन महात्मना। सर्वे धर्मविदः प्राज्ञा राजानं जनमेजयम् ॥ ५ ॥

मन्त्रिण ऊचुः। शृणु पार्थिव यद्वृत्तं पितुस्तव महात्मनः। चरितं पार्थिवेन्द्रस्य यथा निष्ठां गतश्च सः ॥ ६ ॥ धर्मात्मा च महात्मा च प्रजापालः पिता तव। आसीदिष्ट्वा यथाऽऽप्तः स महात्मा शृणुष्व तत् ॥ ७ ॥ चातुर्वर्ण्यं स्वधर्मस्थं स कृत्वा पर्यरक्षत। धर्मतो धर्मविद्राजा धर्मो विग्रहवानिव ॥ ८ ॥ ररक्ष पृथिवीं देवीं शीलवानतुलविक्रमः। हेष्टारक्षस्य नैवासन् स च हेष्टि न कश्चन ॥ ९ ॥ समः सर्वेषु भूतेषु प्रजापतिरिवाभवत्। ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव स्वकर्मसु ॥ १० ॥ स्थिताः सुमनसो राज्ञा लालनेन राज्ञा स्वभिरक्षिताः। विधवानाथविकलान् कृपणांश्च बभार सः ॥ ११ ॥ सदृशः सर्वभूतानामार्तानां इवापरः।

तुष्टपुष्टजनः श्रीमान् सत्यवाग्दृढविक्रमः ॥ १२ ॥ धनुर्वेदे तु शिष्योऽभूत्पृथः आरद्वतस्य सः। गोविन्द्स्य प्रियश्चासीत्मिता ते जनमेजय ॥ १३ ॥ लोकस्य चैव सर्वस्य प्रिय आसीन्महायशाः। परिक्षीणेषु कुरुषु सोत्तरायामजीजनत् ॥ १४ ॥ परीक्षिदभवत्तेन सौभद्रस्यात्मजो बली। राजधर्मार्थकुशलो युक्तः सर्वगुणैर्वृतः ॥ १५ ॥ जितेन्द्रियश्चात्मवांश्च मेधावी धर्मसेवितः। षड्वर्गविज्महावुद्धिर्नीतिशास्त्रविदुत्तमः ॥ १६ ॥ प्रजा इमास्तव पिता यष्टिवर्षाण्यपालयत्। ततो दिष्टान्तमापन्नः सर्वेषां दुःखमाबहन्। ततस्त्वं पुरुषश्रेष्ठं धर्मेण प्रतिपेदिवान् ॥ १७ ॥ इदं वर्षसहस्राणि राज्यं कुरुकुलागतम्। बाल एवाभिषिक्तस्त्वं सर्वभूतानुपालकः ॥ १८ ॥

जनमेजय उवाच। नास्मिन् कुले जातु बभूव राजा यो न प्रजानां प्रियकृत् प्रियश्च। विशेषतः प्रेक्ष्य पितामहानां वृत्तं महद्वृत्तपरायणानाम् ॥ १९ ॥ कथं निधनमापन्नः पिता मम तथाविधः। आचक्ष्व यन्मावबुध्ये श्रोतुमिच्छामि तत्त्वतः ॥२०॥

सौतिरुवाच। एवं सञ्चोदिता राज्ञा मन्त्रिणस्ते नराधिपम्। ऊचुः सर्वे यथावृत्तं राज्ञः प्रियहितैषिणः ॥ २१ ॥

मन्त्रिण ऊचुः। स राजा पृथिवीपालः सर्वशस्त्रभृतां वरः। बभूव मृगयाशीलस्तव राजन् पिता सदा ॥ २२ ॥ यथा पाण्डुर्महाबाहुर्हन्तुर्दुरवरो युधि। अस्त्रास्त्रज्ञः सर्वाणि राजकार्याण्यवेक्षतः ॥ २३ ॥ स कदाचिद्वनगतो मृगं विव्याध पत्रिणा। विद्ध्वाचान्वसरत्तूर्णं तं मृगं गहने वने ॥ २४ ॥ पदातिर्बद्धनिस्त्रिंशस्तायुधकलापवान्। न चासमाद् गहने मृगं नष्टं पिता तव ॥ २५ ॥ परिश्रान्तो वयस्यश्च यष्टिवर्षो जरान्वितः। क्षुधितः स महारण्ये ददर्श मुनिसत्तमम् ॥ २६ ॥ सतं पप्रच्छ राजेन्द्रो मुनिं मौनव्रते स्थितम्। न च किञ्चिदुवाचेदं पृष्टोऽपि

स मुनिस्तदा ॥ २७ ॥ ततो राजा चुक्षमार्त्तं तं मुनिं स्थाणुवत् स्थितम्। मौनव्रतधरं शान्तं सद्यो मन्युवशं गतः ॥ २८ ॥ न बुबोध च तं राजा मौनव्रतधरं मुनिम्। स तं क्रोधसमाविष्टो धर्षयामास तं पिता ॥ २९ ॥ मृतं सर्पं धनुष्कोट्या समुत्क्षिप्य धरातलात्। तस्य शुद्धात्मनः प्रादात् स्कन्धे भरतसत्तम ॥ ३० ॥ न चोवाच स मेधावी तमन्यो साध्वसाधु वा। तस्थौ तथैव चाक्रुद्धः सर्पं स्कन्धेन धारयन् ॥ ३१ ॥

इत्यादिपर्वण्यास्तीके एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

—०—

मन्त्रिण ऊचुः। ततः स राजा राजेन्द्र स्कन्धे तस्य भुजङ्गमम्। मुनेः चुत्क्षाम आसज्य स्वपुरं प्रययौ पुनः ॥ १ ॥ ऋषेस्तस्य तु पुत्रोऽभूद्भवि जातो महायशाः। शृङ्गी नाम महातेजास्तिग्मवीर्योऽतिकोपनः ॥ २ ॥ ब्रह्माणं समुपागम्य मुनिः पूजां चकार ह। सोऽनुज्ञातस्तदा तत्र शृङ्गी शुश्राव तं तदा ॥ ३ ॥ सख्युः सकाशात्पितरं पिता ते धर्षितं पुरा। मृतं सर्पं समासक्तं स्थाणुभूतस्य तस्य तम् ॥ ४ ॥ वहन्तं राजशार्दूल स्कन्धेनानपकारिणम्। तपस्विनमतीवाथ तं मुनिप्रवरं नृप ॥ ५ ॥ जितेन्द्रियं विशुद्धञ्च स्थितं कर्मण्यथाङ्गतम्। तपसा द्योतितात्मानं स्वेष्वङ्गेषु यतं सदा ॥ ६ ॥ शुभाचारं शुभकथं सुस्थितं तमलोलुपम्। अक्षुद्रमनसूयञ्च ब्रह्मं मौनव्रते स्थितम्। शरण्यं सर्वभूतानां पिता विनिकृतं तव ॥ ७ ॥ शशापाथ महातेजाः पितरं ते रुषान्वितः। ऋषेः शुचो महातेजा बालोऽपि स्थविरद्युतिः ॥ ८ ॥ स क्षिप्रमुदकं स्पृष्ट्वा रोषादिदमुवाच च। पितरं तेऽभिसन्धाय तेजसा प्रज्वलन्निव। ९ ॥ अनागसि गुरौ यो मे मृतसर्पमवासृजत्। तं नागस्तक्षकः क्रुद्धस्तेजसा प्रदहिष्यति ॥ १० ॥

आशीविषस्त्रिग्मतेजा महाक्रबलचोदितः। सप्तरात्रादितः पापं पश्य मे तपसो बलम्। इत्युक्त्वा प्रययौ तत्र पिता यत्रास्य सोऽभवत्। दृष्ट्वा च पितरं तस्मै तं शापं प्रत्यवेदयत्॥ ११॥ स चापि मुनिशार्दूलः प्रेषयामास ते पितुः। शिष्यं गौरमुखं नाम शीलवन्तं गुणान्वितम्॥ १२॥ आचख्यौ स च विश्रान्तो राज्ञः सर्वमशेषतः। शप्तोऽसि मम पुत्रेण यत्तो भव महीपते॥ १३॥ तक्षकस्त्वां महाराज तेजसासौ दहिष्यति। श्रुत्वा 'च तद्वचो घोरं पिता ते जनमेजय॥ १४॥ यत्तोऽभवत्परिक्षत्तक्षकात् पन्नगोत्तमात्। ततस्त्रिंशे तु दिवसे सप्तमे समुपस्थिते॥ १५॥ राज्ञः समीपं ब्रह्मर्षिः काश्यपो गन्तुमैच्छत। तं ददर्शाथ नागेन्द्रस्तक्षकः काश्यपं तदा। तमब्रवीत्पन्नगेन्द्रः काश्यपं त्वरितं द्विजम्। क्व भवांस्त्वरितो याति किञ्च कार्यं चिकीर्षति॥ १६॥

काश्यप उवाच। यत्र राजा कुरुश्रेष्ठः परीक्षिन्नाम वै द्विज। तक्षकेण भुजङ्गेन धक्ष्यते किल सोऽद्य वै॥ १७॥ गच्छाम्यहं तं त्वरितः सद्यः कर्त्तुमपच्चरम्। मयाभिपन्नं तं चापि न सर्पो धर्षयिष्यति॥ १८॥

तक्षक उवाच। किमर्थं तं मया दष्टं संजीवयितुमिच्छसि। अहं स तक्षको ब्रह्मन् पश्य मे वीर्यमद्भुतम्॥ १९॥ न शक्तस्त्वं मया दष्टं तं संजीवयितुं नृपम्। इत्युक्त्वा तक्षकस्तत्र सोऽदशद्वै वनस्पतिम्। स दष्टमात्रो नागेन भस्मीभूतोऽभवन्नगः। काश्यपश्च ततो राजन्नजीवयत तं नगम्॥ २०॥ ततस्तं लोभयामास कामं ब्रूहीति तक्षकः। स एवमुक्तस्तं प्राह काश्यपस्तक्षकं पुनः॥ २१॥ धनलिप्सुरहं तत्र यामीत्युक्तश्च तेन सः। तमुवाच महात्मानं तक्षकः श्लक्ष्णया गिरा॥ २२॥ यावद्धनं प्रार्थयसे राज्ञस्तस्माात्ततोऽधिकम्। दृष्ट्वा मत्त एव त्वं संनिवर्त्तस्व चानघ॥ २३॥ स एवमुक्तो नागेन काश्यपो द्विपदां वरः। लब्ध्वा वित्तं निव-

हते तक्षकाद्यावदीप्सितम् ॥ २४ ॥ तस्मिन् प्रतिगते विप्रे छद्म-नोपेत्य तक्षकः। तं नृपं नृपतिश्रेष्ठं पितरं धार्मिकं तव ॥२५॥ प्रासादस्थं यत्तमपि दग्धवान्विषवह्निना। ततस्त्वं पुरुषव्याघ्र विजयायाभिषेचितः ॥ २६ ॥ एतद्दृष्टं श्रुतं चापि यथावन्नृप-सत्तम। अस्माभिर्निखिलं सर्वं कथितं तेऽतिदारुणम् ॥ २७ ॥ श्रुत्वा चैतन्नरश्रेष्ठ पार्थिवस्य पराभवम्। अस्य चर्षेरुतङ्कस्य विधत्स्व यदनन्तरम् ॥ २८ ॥

सौतिरुवाच। एतस्मिन्नेव काले तु स राजा जनमेजयः। उवाच मन्त्रिणः सर्वानिदं वाक्यमरिन्दमः ॥ २९ ॥

जनमेजय उवाच। अथ तत्कथितं केन यदुक्तं तद्वनस्पतौ। आश्चर्यभूतं लोकस्य भस्मरागीकृतं तदा ॥ ३० ॥ यदुक्तं जीवया-मास काश्यपस्तक्षकेण वै। नूनं मन्त्रैर्हतविषो न प्रणश्येत काश्यपात् ॥ ३१ ॥ चिन्तयामास पापात्मा मनसा पन्नगाधमः। दृष्टं यदि मया विप्रः पार्थिवं जीवयिष्यति ॥ ३२ ॥ तक्षकः संहतविषो लोके नास्यति हास्यताम्। विचिन्त्यैव कृता तेन ध्रुवं बुद्धिर्द्विजस्य वै ॥ ३३ ॥ भविष्यति ह्युपनयेन यस्य दास्यामि यातनाम्। एवन्तु श्रोतुमिच्छामि तदुक्तं निर्जने वने ॥३४॥ संवादं पन्नगेन्द्रस्य काश्यपस्य वचस्यया। श्रुतवान् दृष्टवांश्चापि भवतां कथमागतम्। श्रुत्वा तस्य विधास्येऽहं पन्नगान्तकरीं मतिम् ॥ ३५ ॥

मन्त्रिण ऊचुः। शृणु राजन्यथास्माकं येन तत्कथितं पुरा। समागतं द्विजेन्द्रस्य पन्नगेन्द्रस्य चाध्वनि ॥ ३६ ॥ तस्मिन् दृष्टे नरः कश्चिदिन्धनार्थाय पार्थिव। विचिन्वन् पूर्वमारूढः शुष्क-शाखो वनस्पतौ ॥ ३७ ॥ न बुध्येतामुभौ तौ च नगस्थं पन्नग-द्विजौ। सह तेनैव वृक्षेण भस्मीभूतोऽभवन्नृप ॥ ३८ ॥ द्विज-प्रभावाद्राजेन्द्र व्यजीवत्स वनस्पतिः। तेनागम्य द्विजश्रेष्ठ पुंसा-

स्वासु निवेदितम् ॥ ३९ ॥ यथावृत्तन्तु तत्सर्वं तक्षकस्य द्विजस्य च। एतत्त कथितं राजन् यथा दृष्टं श्रुतञ्च यत्। श्रुत्वा च नृपशार्दूल विधत्स्व यदनन्तरम् ॥ ४० ॥

सूत उवाच। मन्त्रिणान्तु वचः श्रुत्वा स राजा जनमेजयः। पर्य्यतप्यत दुःखार्त्तः प्रत्यपिंषत्करं करे ॥ ४१ ॥ निःश्वासमुष्णमसकृद्दीर्घं राजीवलोचनः। मुमोचाश्रूणि च तदा नेत्राभ्यां प्ररुदन्नृपः ॥ ४२ ॥ दुर्धरं वाष्पमुत्सृज्य स्पृष्ट्वा चापो यथाविधि। मुहूर्त्तमिव च ध्यात्वा निश्चित्य मनसा नृपः ॥ ४३ ॥ अमर्षी मन्त्रिणः सर्वानिदं वचनमब्रवीत्।

जनमेजय उवाच। श्रुत्वैतद्भवतां वाक्यं पितुर्मे स्वर्गतिं प्रति ॥ ४४ ॥ निश्चितेयं मम मतिर्या च तां मे निबोधत। अनन्तरञ्च मन्येऽहं तक्षकाय दुरात्मने ॥ ४५ ॥ प्रतिकर्त्तव्यमित्येवं येन मे हिंसितः पिता। सृङ्किणं हेतुमात्रं यः कृत्वा दग्ध्वा च पार्थिवम् ॥ ४६ ॥ इयं दुरात्मता तस्य काश्यपं यो न्यवर्त्तयत्। यद्यागच्छेत्स वै विप्रो ननु जीवेत्पिता मम ॥ ४७ ॥ परिहीयेत किं तस्य यदि जीवेत्स पार्थिवः। काश्यपस्य प्रसादेन मन्त्रिणां विनयेन च ॥ ४८ ॥ स तु वारितवान्मोहात्काश्यपं द्विजसत्तमम्। सञ्जिजीवयिषुं प्राप्तं राजानमपराजितम् ॥ ४९ ॥ महानतिक्रमो ह्येष तक्षकस्य दुरात्मनः। द्विजस्य योऽददद्वित्तं मा नृपं जीवयेदिति ॥ ५० ॥ ततङ्कस्य प्रियं कर्त्तुमालनय महत्प्रियम्। भवतां चैव सर्वेषां गच्छाम्यपचितिं पितुः ॥ ५१ ॥

इत्यादिपर्वणि आस्तीके पञ्चाशोऽध्यायः ॥ ५० ॥

—:०:—

सौतिरुवाच। एवमुक्ता ततः श्रीमान्मन्त्रिभिश्चानुमोदितः। आहरोद्यतिक्षां स सर्पसत्राय पार्थिवः ॥ १ ॥ ब्रह्मन् भरतशार्दूलो राजा परीक्षितस्तदा। पुरोहितमथाक्षय ऋत्विजो वसुधाधिपः ॥ २ ॥ अब्रवीद्दाक्षसम्पन्नः कार्य्यसम्पत्करं वचः। यो मे क्षिप्तवांस्तातं तक्षकः स दुरात्मवान् ॥ ३ ॥ प्रतिकुर्य्यां तथा तस्य तक्षवन्तो ब्रवन्तु मे। अपि तत्कर्म विदितं भवतां येन पन्नगम् ॥ ४ ॥ तक्षकं संप्रदीप्तेऽग्नौ प्रक्षिपेयं सबान्धवम्। यथा तेन पिता मह्यं पूर्वं दग्धो विषाग्निना ॥ ५ ॥ तथाहमपि तं पापं दग्धुमिच्छामि पन्नगम्।

ऋत्विज ऊचुः। अस्ति राजन्महत्त्रं त्वदर्थं देवनिर्मितम्। सर्पसत्रमिति ख्यातं पुराणे परिपठ्यते ॥ ६ ॥ आहर्त्ता तस्य सत्रस्य त्वन्नान्योऽस्ति नराधिप। इति पौराणिकाः प्राहुरस्माकं चास्ति स क्रतुः ॥ ७ ॥

सौतिरुवाच। एवमुक्तः स राजर्षिर्मेने दग्धं हि तक्षकम्। कृताग्रनमुखे दीप्ते प्रविष्टमिति सत्तम ॥ ८ ॥ ततोऽब्रवीन्मन्त्रविदस्तान् राजा ब्राह्मणांस्तदा। आहरिष्यामि तत्सत्रं सम्भाराः संक्रियन्तु मे ॥ ९ ॥ ततस्तु ऋत्विजस्तस्य शास्त्रतो द्विजसत्तम। तं देशं मापयामासुर्यज्ञायतनकारणात् ॥ १० ॥ यथावद्वेदविद्वांसः सर्वे वृद्धेः परं गताः। ऋद्धा परमया युक्तमिष्टं द्विजगणैर्युतम् ॥ ११ ॥ प्रभूतधनधान्याढ्यमृत्विग्भिः सुनिषेवितम्। निर्माय चापि विधिवद्यज्ञायतनमीप्सितम् ॥ १२ ॥ राजानं दीक्षयामासुः सर्पसत्राप्तये तदा। इदं चासीत्तत्र पूर्वं सर्पसत्रे भविष्यति ॥ १३ ॥ निमित्तं महदुत्पन्नं यज्ञविघ्नकरं तदा। यज्ञस्यायतने तस्मिन् क्रियमाणे वचोऽब्रवीत् ॥ १४ ॥ स्थपतिर्बुद्धिसम्पन्नो वास्तुविद्याविशारदः। इत्यब्रवीत्सूतधरः सूतः पौराणिकस्तदा ॥ १५ ॥ यस्मिन्देशे च काले च मापनेयं प्रव-

स्ति ता । ब्राह्मणं कारणं कृत्वा नायं संस्थास्यते क्रतुः ॥ १६ ॥ एतच्छ्रुत्वा तु राजासौ प्राग्दीक्षाकालमब्रवीत् । क्षत्तारं मे हि मे कश्चिदज्ञातः प्रविशेदिति ॥ १७ ॥

इत्यादिपर्वण्यास्तीके एकपञ्चाशोऽध्यायः ॥ ५१ ॥

—०*०—

सौतिरुवाच । ततः कर्म प्रवृत्ते सर्पसत्रविधानतः । पर्व-क्रामंश्च विधिवत् स्वे स्वे कर्मणि याजकाः ॥ १ ॥ प्रावृत्य कृष्ण-वासांसि धूम्रसंरक्तलोचनाः । जुह्वुर्मन्त्रवच्चैव समिद्धं जात-वेदसम् ॥ २ ॥ क्रम्यन्तश्च सर्वेषामुरगाणां मनांसि च । सर्पा-नाजुह्वुस्तत्र सर्वानग्निमुखे तदा ॥ ३ ॥ ततः सर्पाः समापेतुः प्रदीप्ते हव्यवाहने । विचेष्टमानाः क्रपणमाक्रन्दन्तः परस्परम् ॥४॥ विस्फुरन्तः प्रसन्तश्च वेष्टयन्तः परस्परम् । पुच्छैः शिरोभिश्च भृशं चित्रभानुं प्रपेदिरे । श्वेताः कृष्णाश्च नीलाश्च स्थविराः शिशवस्तथा । नदन्तो विविधान्नादान् पेतुर्दीप्ते विभावसौ ॥५॥ क्रोशयोजनमात्रा हि गोकर्णस्य प्रमाणतः । पतन्त्यजस्रं वेगेन वज्रावग्निमतां वर ॥ ६ ॥ एवं शतसहस्राणि प्रयुतान्यर्बुदानि च । अवशानि विनष्टानि पन्नगानान्तु तत्र वै ॥ ७ ॥ तुरगा इव तत्रान्ये हस्तिहस्ता इवापरे । मत्ता इव च मातङ्गा महा-काया महाबलाः ॥ ८ ॥ उच्चावचाश्च बहवो नानावर्णा विषो-ल्बणाः । घोराश्च परिघप्रख्या दन्दशूका महाबलाः । प्रपेतु-रग्नावुरगा मातृवाग्दण्डपीडिताः ॥ ९ ॥

इत्यादिपर्वण्यास्तीके द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

—०—

शौनक उवाच । सर्पसत्रे तदा राज्ञः पाण्डवेयस्य धीमतः । जनमेजयस्य के त्वासन्नृत्विजः परमर्षयः ॥ १॥ के सदस्या बभू-

वृद्ध सर्पसत्रे सुदारुणे। विषादजननेऽत्यर्थं पन्नगानां महाभये ॥ २ ॥ सर्वं विस्तरशस्तात भवान्व्यंसितुमर्हति। सर्पसत्रविधानज्ञा विज्ञेयाः के च सूतज ॥ ३ ॥

सौतिरुवाच। हन्त ते कथयिष्यामि नामानीह मनीषिणाम्। ये ऋत्विजः सदस्याश्च तस्यासन्नृपतेस्तदा ॥ ४ ॥ तत्र होता बभूवाथ ब्राह्मणश्चण्डभार्गवः। च्यवनस्यान्वये ख्यातो विप्रो वेदविदांवरः ॥ ५ ॥ उद्गाता ब्राह्मणो वृद्धो विद्वान् कौत्सोऽथ जैमिनिः। ब्रह्माभवत्प्राङ्गरवो अध्वर्युश्चापि पिङ्गलः ॥ ६ ॥ सदस्यश्चाभवद्व्यासः पुत्रशिष्यसहायवान्। उद्दालकः प्रमतकः श्वेतकेतुश्च पिङ्गलः ॥ ७ ॥ असितो देवलश्चैव नारदः पर्वतस्तथा। आत्रेयः कुण्डजठरो द्विजः कालघटस्तथा ॥ ८ ॥ वात्स्यः श्रुतश्रवा वृद्धो जपस्वाध्यायशीलवान्। कोहलो देवशर्मा च मौद्गल्यः समसौरभः ॥ ९ ॥ एते चान्ये च बहवो ब्राह्मणा वेदपारगाः। सदस्याश्चाभवंस्तत्र सत्रे पारीक्षितस्य ह ॥ १० ॥ जुह्वत्स्रुक्त्रिव्वय तदा सर्पसत्रे महाक्रतौ। अहयः प्रापतंस्तत्र घोराः प्राणभयावहाः ॥ ११ ॥ वसामेदोवहाः कुल्या नागानां सम्प्रवर्त्तिताः। ववौ गन्धश्च तुमुलो दह्यतामनिशं तदा ॥ १२ ॥ पतताञ्चैव नागानां विष्ठितानां तथाम्बरे। श्रूयतानिशं शब्दः पच्यतां चाग्निना भृशम् ॥ १३ ॥ तक्षकस्तु स नागेन्द्रः पुरन्दरनिवेशनम्। गतः शक्रेव राजानं दीक्षितं जनमेजयम् ॥ १४ ॥ ततः सर्वं यथावृत्तमाख्याय भुजगोत्तमः। अगच्छच्छरणं भीत आगस्कृत्वा पुरन्दरम् ॥ १५ ॥ तमिन्द्रः प्राह सुप्रीतो न तवास्तीह तक्षक। भयं नागेन्द्र तस्माद्वै सर्पसत्रात्कदाचन ॥ १६ ॥ प्रसादितो मया पूर्वं तवार्थाय पितामहः। तस्मात्तव भयं नास्ति व्येतु ते मानसो ज्वरः ॥ १७ ॥

सौतिरुवाच। एतमाश्वासितस्तेन ततः स भुजगोत्तमः।

उवास भवने तस्मिन् शक्रस्य मुदितः सुखी ॥ १८ ॥ अजस्रं निपतत्स्वग्नौ नागेषु श्रमदुःखितः । अल्पशेषपरीवारो वासुकिः पर्य्यतप्यत ॥ १९ ॥ कश्मलं चाविशद्घोरं वासुकिं पन्नगोत्तमम् । स घूर्णमानहृदयो भगिनीमिदमब्रवीत् ॥ २० ॥ दह्यन्त्यङ्गानि मे भद्रे न दिशः प्रतिभान्ति च । सीदामीव च सम्मोहात् घूर्णतीव च मे मनः ॥ २१॥ दृष्टिर्भ्रास्यति मेऽतीव हृदयं दीर्य्यतीव च । पतिष्याम्यवशोऽद्याहं तस्मिन्दीप्ते विभावसौ ॥ २२ ॥ पारीक्षितस्य यज्ञोऽसौ वर्त्ततेऽद्यज्जिघांसया । अक्तं मयापि गन्तव्यं प्रेतराजनिवेशनम् ॥ २३ ॥ अयं स कालः संप्राप्तो यदर्थमसि मे स्वसः । जरत्कारो मया दत्ता त्रायस्वास्मान् सबान्धवान् ॥ २४ ॥ आस्तीकः किल यज्ञं तं वर्त्तन्तं भुजगोत्तमे । प्रतिषेत्स्यति मां पूर्वं स्वयमाह पितामहः ॥ २५ ॥ तद्वत्से ब्रूहि वत्सं स्वं कुमारं दृढसंमतम् । ममाद्य त्वं सभृत्यस्य मोक्षार्थं वेदवित्तमम् ॥ २६ ।

इत्यादिपर्वण्यास्तीके त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥

—०—

सौतिरुवाच । तत आहूय पुत्रं स्वं जरत्कारुर्भुजङ्गमा । वासुकेर्नागराजस्य वचनादिदमब्रवीत् ॥ १ ॥ अहं तव पितुः पुत्र भ्राता दत्ता निमित्ततः । कालः स चायं सम्प्राप्तस्तत्कुरुष्व यथातथम् ॥ २ ॥

आस्तीक उवाच । किंनिमित्तं मम पितुर्दत्ता त्वं मातुलेन मे । तन्ममाचक्ष्व तत्त्वेन श्रुत्वा कर्त्तास्मि तत्तथा ॥ ३ ॥

सौतिरुवाच । तत आचष्ट सा तस्मै बान्धवानां हितैषिणी । भगिनी नागराजस्य जरत्कारुरविक्लवा ॥ ४ ॥

जरत्कारुरुवाच । पन्नगानामशेषाणां माता कद्रूरिति

श्रुता । तया शप्ता रुषितया सुता यस्मान्निबोध तत् ॥ ५ ॥ उच्चैःश्रवाः सोऽश्वराजो यन्मिथ्या न कृतो मम । विनतार्थाय पणितं दासभावाय पुत्रकाः ॥ ६ ॥ जनमेजयस्य वो यज्ञे धक्ष्यत्यनिलसारथिः । तत्र पञ्चत्वमापन्नाः प्रेतलोकं गमिष्यथ ॥ ७ ॥ तांश्च शप्तवतीं देवः साक्षाल्लोकपितामहः । एवमस्विति तद्वाक्यं प्रोवाचानुमुमोद च ॥ ८ ॥ वासुकिश्चापि तच्छ्रुत्वा पितामहवचस्तदा । अमृते मथिते तात देवाञ्छरणमीयिवान् ॥ ९ ॥ सिद्धार्थाश्च सुराः सर्वे प्राप्यामृतमनुत्तमम् । भ्रातरं मे पुरस्कृत्य पितामहमुपागमन् ॥ १० ॥ ते तं प्रसादयामासुः सुराः सर्वेऽजसम्भवम् । राज्ञा वासुकिना सार्धं शापोऽमौ न भवेदिति ॥ ११ ॥

देवा ऊचुः । वासुकिर्नागराजोऽयं दुःखितो ज्ञातिकारणात् । अभिशापः स मातुस्तु भगवन्न भवेत्कथम् ॥ १२ ॥

ब्रह्मोवाच । जरत्कारुर्जरत्कारुं यां भार्यां समवाप्स्यति । तत्र जातो द्विजः शापान्मोक्षयिष्यति पन्नगान् ॥ १३ ॥ एतच्छ्रुत्वा तु वचनं वासुकिः पन्नगोत्तमः । प्रादान्मामसरप्रख्य तव पित्रे महात्मने ॥ १४ ॥ प्रागेवानागते काले तस्मात्त्वं मय्यजायथाः । अयं स कालः सम्प्राप्तो भयान्नस्त्रातुमर्हसि ॥ १५ ॥ भ्रातरश्चापि मे तस्मात्त्रातुमर्हसि पावकात् । न मोघन्तु कृतं तत् स्याद्यदहं तव धीमते । पित्रे दत्त्वा विमोक्षार्थं कथं वा पुत्र मन्यसे ॥ १६ ॥

सौतिरुवाच । एवमुक्तस्तथेत्युक्त्वा सास्त्रीको मातरं तदा । अब्रवीद्दुःखसन्तप्तं वासुकिं जीवयन्निव ॥ १७ ॥ अहं त्वां मोक्षयिष्यामि वासुके पन्नगोत्तम । तस्माच्छापान्महासत्त्व सत्यमेतद्ब्रवीमि ते ॥ १८ ॥ भव स्वस्थमना नाग न हि ते विद्यते भयम् । प्रयतिष्ये तथा राजन्यथा श्रेयो भविष्यति ॥ १९ ॥ न मे वागनृतं प्राह स्वैरेष्वपि कुतोऽन्यथा । तं वै नृपवरं गत्वा दीक्षितं

जनमेजयम् ॥ २० ॥ वाग्भिर्मङ्गलयुक्ताभिस्तोषयिष्येऽद्य मातुल । यथा स यज्ञो नृपतेर्निवर्त्तिष्यति सत्तम ॥ २१ ॥ स सम्भावय नागेन्द्र मयि सर्वं महामते । न ते मयि मनो जातु मिथ्या भवितुमर्हति ॥ २२ ॥

वासुकिरुवाच । आस्तीक परिघूर्णामि हृदयं मे विदीर्यते । दिशो न प्रतिजानामि ब्रह्मदण्डनिपीडितः ॥ २३ ॥

आस्तीक उवाच । न सन्तापस्त्वया कार्यः कथञ्चित्पन्नगोत्तम । प्रदीप्ताग्नेः समुत्पन्नं नाशयिष्यामि ते भयम् ॥ २४ ॥ ब्रह्मदण्डं महाघोरं कालाग्निसमतेजसम् । नाशयिष्यामि मात्र त्वं भयं कार्षीः कथञ्चन ॥ २५ ॥

सौतिरुवाच । ततः स वासुकेर्घोरमपनीय मनोज्वरम् । आधाय चात्मनोऽङ्गेषु जगाम त्वरितो भृशम् ॥ २६ ॥ जनमेजयस्य तं यज्ञं सर्वैः समुदितं गुणैः । मोक्षाय भुजगेन्द्राणामास्तीको द्विजसत्तमः ॥ २७ ॥ स गत्वापश्यदास्तीको यज्ञायतनमुत्तमम् । हुतं सदस्यैर्बहुभिः सूर्यवह्निसमप्रभैः ॥ २८ ॥ स तत्र वारितो द्वार्स्थैः प्रविशन्द्विजसत्तमः । अभितुष्टाव तं यज्ञं प्रवेशार्थी परन्तपः ॥ २९ ॥ स प्राप्य यज्ञायतनं वरिष्ठं द्विजोत्तमः पुण्यकृतां वरिष्ठः । तुष्टाव राजानमनन्तकीर्त्तिं ऋत्विक्सदस्यांश्च तथैव चाग्निम् ॥ ३० ॥

इत्यादिपर्वण्यास्तीके चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥

—०—

आस्तीक उवाच । सोमस्य यज्ञो वरुणस्य यज्ञः प्रजापतेर्यज्ञ आसीत् प्रयागे । यथा यज्ञोऽयं तव भारताग्र पारोक्षित स्वस्ति नोऽस्तु प्रियेभ्यः ॥ १ ॥ शक्रस्य यज्ञः शतसंख्य ऊक्तस्तथा ऽर तुल्यसंख्यं शतं वै । तथा यज्ञोऽयं तव भारताग्र पारि-

क्षित स्वस्ति नोऽस्तु प्रियेभ्यः ॥ २ ॥ यमस्य यज्ञो हरिमेधसश्च यथा यज्ञो रन्तिदेवस्य राज्ञः । तथा यज्ञोऽयं तव भारताग्र पारीक्षित स्वस्ति नोऽस्तु प्रियेभ्यः ॥ ३ ॥ गयस्य यज्ञः शशबिन्दोश्च राज्ञो यज्ञस्तथा वैश्यवर्णस्य राज्ञः । तथा यज्ञोऽयं तव भारताग्र पारीक्षित स्वस्ति नोऽस्तु प्रियेभ्यः ॥ ४ ॥ नृगस्य यज्ञस्त्वजमीढस्य चासीद्यथा यज्ञो दाशरथेश्च राज्ञः । तथा यज्ञोऽयं तव भारताग्र पारीक्षित स्वस्ति नोऽस्तु प्रियेभ्यः ॥ ५ ॥ यज्ञः श्रुतो दिविदेवस्य सूनोर्युधिष्ठिरस्याजमीढस्य राज्ञः । तथा यज्ञोऽयं तव भारताग्र पारीक्षित स्वस्ति नोऽस्तु प्रियेभ्यः ॥ ६ ॥ कृष्णस्य यज्ञः सत्यवत्याः सुतस्य स्वयञ्च कर्म प्रचकार यत्र । यथा यज्ञोऽयं तव भारताग्र पारीक्षित स्वस्ति नोऽस्तु प्रियेभ्यः ॥ ७ ॥ इमे च ते सूर्य्यसमानवर्च्चसः समासते हव्यहराः क्रतुं यथा । नैषां ज्ञातुं विद्यते ज्ञानमद्य दत्तं येभ्यो न प्रणश्येत्कदाचित् ॥ ८ ॥ ऋत्विक् समो नास्ति लोकेषु चैव द्वैपायनेनेति विनिश्चितं मे । एतस्य शिष्या हि क्षितिं चरन्ति सर्वर्त्विजः कर्मसु स्वेषु दक्षाः ॥ ९ ॥ विभावसुश्चित्रभानुर्महात्मा हिरण्यरेता ऊतभुक् कृष्णवर्त्मा । प्रदक्षिणावर्त्तशिखः प्रदीप्तो हव्यं तवेदं ऊतभुग्वष्टि देवान् ॥ १० ॥ नेह त्वदन्यो विद्यते जीवलोके समो नृपः पालयिता प्रजानाम् । दृष्ट्वा च ते प्रीतमनाः सदाहं त्वं वा वरुणो धर्मराजो यमो वा ॥ ११ ॥ शक्रः साक्षाद्यज्ञपार्णिर्य्यथेह त्राता लोकेऽस्मिंस्त्वं तथेह प्रजानाम् । मतस्त्वं नः पुरुषेन्द्रेह लोके न च त्वदन्यो भूपतिरस्ति यज्ञे ॥ १२ ॥ खट्वाङ्गनाभागदिलीपकल्प ययातिमान्धातृसमप्रभाव । आदित्यतेजःप्रतिमानतेजा भीष्मो यथा राजसि सुव्रतस्त्वम् ॥ १३ ॥ वाल्मीकिवत्ते निभृतं स्ववीर्य्यं वसिष्ठवत्ते नियतश्च कोपः । प्रभुत्वमिन्द्रत्वसमं मतं मे द्वैपायनस्य नारायणवद्विभाति ॥ १४ ॥ यमो यथा धर्मविनिश्चयज्ञः कृष्णो

यथा सर्वगुणोपपन्नः । श्रियां निवासोऽसि यथा वसूनां निधानभूतोऽसि तथा क्रतूनाम् ॥ १५ ॥ दृप्तोक्षयेनासि समो बलेन रामो यथा शास्त्रविदस्त्रविच्च । और्वलितास्यामसि तुल्यतेजा दुष्प्रेक्षणीयोऽसि भगीरथेन ॥ १६ ॥

सौतिरुवाच । एवं स्तुताः सर्व एव प्रसन्ना राजा सदस्या ऋत्विजो हव्यवाहः । तेषां दृष्ट्वा भावितानीङ्गितानि प्रोवाच राजा जनमेजयोऽथ ॥ १७ ॥

इत्यादिपर्वण्यास्तीके पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥

—०—

जनमेजय उवाच । बालोऽप्ययं स्थविर इवाभाषत नायं बालः स्थविरोऽयं मतो मे । इच्छाम्यहं वरमस्मै प्रदातुं तन्मे विप्राः संविदध्वं यथावत् ॥ १ ॥

सदस्या ऊचुः । बालोऽपि विप्रो मान्य एषेह राज्ञां विद्वान्यो वै स पुनर्वै यथावत् । सर्वान् कामांस्त्वत्त एवार्हतेऽद्य यथा च नस्तक्षक एति शीघ्रम् ॥ २ ॥

सौतिरुवाच । व्याहर्तुकामे वरदे नृपे द्विजं वरम्वृणीष्वेति ततोऽब्रुवाच । होता वाक्यं नातिहृष्टान्तरात्मा कर्मण्यस्मिंस्तक्षको नैति तावत् ॥ ३ ॥

जनमेजय उवाच । यथा चेदं कर्म समाप्यते मे यथा च वै तक्षक एति शीघ्रम् । तथा भवन्तः प्रयतन्तु सर्वे परं शक्त्या स हि मे विद्विषाणः ॥ ४ ॥

ऋत्विज ऊचुः । यथा शास्त्राणि नः प्राब्रूर्यथा शंसति पावकः । इन्द्रस्य भवने राजंस्तक्षको भयपीड़ितः ॥ ५ ॥ यथा सूतो लोहिताक्षो महात्मा पौराणिको वेदितवान् पुरस्तात् । स राजानं प्राह दृष्टस्तदानीं यथाऽऽविर्विप्रास्तद्वदेतन्नृदेव ॥ ६ ॥

पुराणमागम्य ततो ब्रवीम्यहं दत्तं तस्मै वरमिन्द्रेण राजन् ।
वसेच्च त्वं मत्सकाशे सुगुप्तो न पावकस्त्वां प्रदहिष्यतीति ॥ ७ ॥
एतच्छ्रुत्वा दीक्षितस्याध्वरे ऽस्मिन् ऋत्विक्श्रेष्ठं होतारं चोदयन् कर्मकाले ।
होता च यत्तोऽस्याजुहावाथ मन्त्रैरस्यामरेन्द्रः स्वयमाजगाम ॥ ८ ॥
विमानमास्थाय महानुभावः सर्वैर्देवैः परिसंस्तूयमानः ।
बलाहकैश्चाप्यनुगम्यमानो विद्याधरैश्चाप्सरसां गणैश्च ॥ ९ ॥ तस्योत्तरीये निहितः स नागो भयोद्विग्नः शर्म नैवाभ्यगच्छत् । ततो राजा मन्त्रविदोऽब्रवीत्तान् क्रुद्धो वाक्यं तक्षकस्यान्तमिच्छन् ॥ १० ॥

जनमेजय उवाच । इन्द्रस्य भवने विप्रा यदि नागः स तक्षकः । तमिन्द्रेणैव सहितं पातयध्वं विभावसौ ॥ ११ ॥

सौतिरुवाच । जनमेजयेन राज्ञा तु चोदितस्त्वृत्विजं प्रति । होता जुहाव तत्रस्थं तक्षकं पन्नगं तथा ॥ १२ ॥ हूयमाने तथा चैव तक्षकः सपुरन्दरः । आकाशे दृश्यते चैव क्षणेन व्यथितस्तदा ॥ १३ ॥ पुरन्दरस्तं यज्ञं दृष्ट्वोरुभयमाविशत् । हित्वा तु तक्षकं तस्थौ स्वमेव भवनं ययौ ॥ १४ ॥ इन्द्रे गते तु राजेन्द्र तक्षको भयमोहितः । मन्त्रशक्त्या पावकार्चिःसमीपमवशो गतः ॥ १५ ॥

ऋत्विज ऊचुः । वर्त्तते तव राजेन्द्र कर्मैतद्विधिवत् प्रभो । अस्मै तु विप्रमुख्याय वरं त्वं दातुमर्हसि ॥ १६ ॥

जनमेजय उवाच । बालाभिरूपस्य तवाप्रमेय वरं प्रयच्छामि यथानुरूपम् । ब्रूणीष्व यत्तेऽभिमतं हृदि स्थितं तत्ते प्रदास्याम्यपि चेददेयम् ॥ १७ ॥

ऋत्विज ऊचुः । अयमायाति त्वरितं स तक्षकस्ते वशं नृप । श्रूयतेऽस्य महाञ्शब्दो नदतो भैरवं वयम् ॥ १८ ॥ नूनं मुक्तो वज्रभृता स नागो भ्रष्टो नाकाच्छक्रविस्रस्तकायः । घूर्णन्नाकाशे नष्टसंज्ञोऽभ्युपैति तीव्रान्निश्वासान्निश्वसन् पन्नगेन्द्रः ॥ १९ ॥

सौतिरुवाच। पतिष्यमाणो नागेन्द्रे तक्षके जातवेदसि। इदमन्तरमित्येवं तदास्तीकोऽभ्यचोदयत् ॥ २० ॥

आस्तीक उवाच। वरं ददासि चेन्मह्यं हृणोमि जनमेजय। सत्रं ते विरमत्वेतन्न पतेयुरिहोरगाः ॥ २१ ॥ एवमुक्तस्तदा तेन ब्रह्मन् पारीक्षितस्तु सः। नातिहृष्टमनाश्चेदमास्तीकं वाक्यमब्रवीत् ॥ २२ ॥ सुवर्णं रजतं गाश्च यच्चान्यन्मन्यसे विभो। तं ते दद्यां वरं विप्र न निवर्त्तेत् क्रतुर्मम ॥ २३ ॥

आस्तीक उवाच। सुवर्णं रजतं गाश्च न त्वां राजन् हृणोम्यहम्। सत्रं ते विरमत्वेतत् स्वस्ति मातृकुलस्य नः ॥ २४ ॥

सौतिरुवाच। आस्तीकेनैवमुक्तस्तु राजा पारीक्षितस्तदा। पुनः पुनरुवाचेदमास्तीकं वदतांवरः ॥ २५ ॥ अन्यं वरय भद्रं ते वरं द्विजवरोत्तम। अयाचत न चाप्यन्यं वरं स क्षुनन्दन ॥ २६ ॥ ततो वेदविदस्तात सदस्याः सर्व एव तम्। राजानमूचुः सहिता लभतां ब्राह्मणो वरम् ॥ २७ ॥

इत्यादिपर्वण्यास्तीके षट्पञ्चाशोऽध्यायः ॥ ५६ ॥

—०:०—

शौनक उवाच। ये सर्पाः सर्पसत्रेऽस्मिन् पतिता हव्यवाहने। तेषां नामानि सर्वेषां श्रोतुमिच्छामि सूतज ॥ १ ॥

सौतिरुवाच। सहस्राणि बहून्यस्मिन् प्रयुतान्यर्बुदानि च। न शक्यं परिसंख्यातुं बहुत्वाद्द्विजसत्तम ॥ २ ॥ यथास्मृति तु नामानि पन्नगानां निबोध मे। उच्यमानानि मुख्यानां जुहूनां जातवेदसि ॥ ३ ॥ वासुकेः कुलजातांस्तु प्राधान्येन निबोध मे। नीलरक्तान् सितान् घोरान्महाकायान्विषोल्बणान् ॥ ४ ॥ अश्वशाल्मलिवाग्दण्डपीडितान् क्षपणान् जुहूनान्। कोटिशो मानसः पूर्णः श्रुतः पाल्लो हलीमकः ॥ ५ ॥ पिच्छिलः कौणपश्चाशः कालदन्तः

वेगः प्रकालनः। हिरण्यबाहुः शरणः कक्षकः कालदन्तकः ॥ ६ ॥
एते वासुकिजा नागाः प्रविष्टा हव्यवाहने। अन्ये च बहवो विप्र तथा वै कुलसम्भवाः। प्रदीप्ताग्नौ हुताः सर्वे घोररूपा महाबलाः ॥ ७ ॥ तक्षकस्य कुले जाता प्रवक्ष्यामि निबोध तान्। पुच्छाण्डको मण्डलकः पिण्डसेक्ता रभेणकः ॥ ८ ॥ उच्छिखः शरभो भङ्गो विल्वतेजा विरोहणः। शिल्पी शलकरो मूकः सुकुमारः प्रवेपनः ॥ ९ ॥ मुञ्जरः पिञ्जरोमा च सुरोमा च महाहनुः। एते तक्षकजा नागाः प्रविष्टा हव्यवाहनम् ॥ १० ॥ पारावतः पारिजातः पाण्डरो हरिणः कृशः। विहङ्गः शरभो मेदः प्रमोदः संहतापनः ॥ ११ ॥ ऐरावतकुलादेते प्रविष्टा हव्यवाहनम्। कौरव्यकुलजान्नागाञ्छृणु मे त्वं द्विजोत्तम ॥ १२ ॥ एरकः कुण्डलो वेणी वेणीस्कन्धः कुमारकः। बाहुकः शृङ्गवेरश्च धूर्तकः प्रातरातकौ ॥ १३ ॥ कौरव्यकुलजास्त्वेते प्रविष्टा हव्यवाहनम्। धृतराष्ट्रकुले जाताञ्छृणु नागान्यथातथम् ॥ १४ ॥ कीर्त्यमानान्मया ब्रह्मन्वातवेगान् विषोल्बणान्। शङ्कुकर्णः पिठरकः कुठारमुखसेचकौ ॥ १५ ॥ पूर्णाङ्गदः पूर्णमुखः प्रहासः शकुनिर्हरिः। चमाढ्यः कामठकः सुपेणो मानसो व्ययः ॥ १६ ॥ भैरवो मुण्डवेदाङ्गः पिशङ्गस्योट्टपारकः। ऋषभो वेगवान्नागः पिण्डारकमहाहनू ॥ १७ ॥ रक्ताङ्गः सर्वसारङ्गः सन्हृदःपठवासकौ। वराहको वीरणकः सुचित्रचित्रवेगिकः ॥ १८ ॥ पराशरस्तरुणको मणिस्कन्धस्तथारुणिः। इति नागा मया ब्रह्मन् कीर्त्तिताः कीर्त्तिवर्द्धनाः ॥ १९ ॥ प्राधान्येन बहुत्वात्तु न सर्वे परिकीर्त्तिताः। एतेषां प्रसवो यश्च प्रसवस्य च सन्ततिः ॥ २० ॥ न शक्यं परिसंख्यातुं ये दीप्तं पावकं गताः। त्रिशीर्षाः सप्तशीर्षाश्च दशशीर्षास्तथापरे ॥ २१ ॥ कालानलविषा घोरा हुताः शतसहस्रशः। महाकाया महावेगाः शैलशृङ्गसमुच्छ्रयाः

॥ २२ ॥ योजनायामविस्तारा द्वियोजनसमायताः । कामरूपाः कामबला दीप्तानलविषोल्बणाः ॥ २३ ॥ दग्धास्तत्र महासत्रे ब्रह्मदण्डनिपीड़िताः ॥ २४ ॥

इत्यादिपर्वण्यास्तीके सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

—:०:—

सौतिरुवाच । इदमत्यद्भुतं चान्यदास्तीकस्यानुशुश्रुम । तथा वरैश्छन्द्यमाने राज्ञा पारीक्षितेन हि ॥ १ ॥ इन्द्रहस्ताच्च्युतो नागः ख एव यदतिष्ठत । ततश्चिन्तापरो राजा बभूव जनमेजयः ॥ २ ॥ हूयमाने ह्यग्नौ विधिवद्धुरेतसि । न स्म स प्रापतद्वह्नौ तक्षको भयपीड़ितः ॥ ३ ॥

शौनक उवाच । किं सूत तेषां विप्राणां मन्त्रग्रामो मनीषिणाम् । न प्रत्यभात्तदाग्नौ यत्स पपात न तक्षकः ॥ ४ ॥

सौतिरुवाच । तमिन्द्रहस्तादिस्रस्तं विसंज्ञं पन्नगोत्तमम् । आस्तीकस्तिष्ठतिष्ठेति वाचस्तिस्रोऽभ्युदीरयत् ॥ ५ ॥ वितस्थे सोऽन्तरीक्षे च हृदयेन विदूयता । यथा तिष्ठति वै कश्चित्स्वश्वगां चान्तरा नरः ॥ ६ ॥ ततो राजाब्रवीद्वाक्यं मदस्यैवोदितो भृशम् । काममेतद्भवत्वेवं यथास्तीकस्य भाषितम् ॥ ७ ॥ समाप्यतामिदं कर्म पन्नगाः सन्त्वनामयाः । प्रीयतामयमास्तीकः सत्यं सूतवचोऽस्तु तत् ॥ ८ ॥ ततो हलहलाशब्दः प्रीतिदः समजायत । आस्तीकस्य वरे दत्ते तथैवोपरराम ह ॥ ९ ॥ स यज्ञः पाण्डवेयस्य राज्ञः पारीक्षितस्य ह । प्रीतिमांश्चाभवद्राजा भारतो जनमेजयः ॥ १० ॥ ऋत्विग्भ्यः सदस्येभ्यो ये तत्रासन् समागताः । तेभ्यश्च प्रददौ वित्तं शतशोऽथ सहस्रशः ॥ ११ ॥ सोहिताचाय सूताय तथा स्थपतये विभुः । येनोक्तं तस्य तत्राग्रे सर्पसत्रनिवर्त्तने ॥ १२ ॥ निमित्तं ब्राह्मण इति तस्मै वित्तं ददौ

बद्ध । दत्वा द्रव्यं यथान्यायं भोजनाच्छादनान्वितम् ॥ १३ ॥ प्रीतस्तस्मै नरपतिरप्रमेयपराक्रमः । ततश्चकारावभृथं विधिदृष्टेन कर्मणा ॥ १४ ॥ आस्तीकं प्रेषयामास गृहानेव सुसंस्कृतम् । राजा प्रीतमनाः प्रीतं कृतकृत्यं मनीषिणम् ॥ १५ ॥ पुनरागमनं काय्यमिति चैनं वचोऽब्रवीत् । भविष्यसि सदस्यो मे वाजिमेधे महाक्रतौ ॥ १६ ॥ तथेत्युक्त्वा प्रदुद्राव तदास्तीको मुदा युतः । कृत्वा स्वकार्य्यं मतुलं तोषयित्वा च पार्थिवम् ॥ १७ ॥ स गत्वा परमप्रीतो मातुलं मातरञ्च ताम् । अभिगम्योपसंगृह्य यथावृत्तं न्यवेदयत् ॥ १८ ॥

सौतिरुवाच । एतच्छ्रुत्वा प्रीयमाणाः सर्पा ये तत्रामन् गन्नगा वीतमोहाः । आस्तीके वै प्रीतिमन्तो बभूवुरूचुश्चैनं वरमिष्टं वृणीष्व ॥ १९ ॥ भूयोभूयः सर्पसत्रेऽब्रुवंस्तं किं ते प्रियं करवामाद्य विद्वन् । प्रीता वयं मोचिताश्चैव सर्वे कामं किं ते करवामाद्य वत्स ॥ २० ॥

आस्तीक उवाच । सायं प्रातर्य्ये प्रसन्नात्मरूपा लोके विप्रा मानवा ये परेऽपि । धर्माख्यानं ये पठेयुर्ममेदं तेषां युष्मत्तो नैव किञ्चिद्भयं स्यात् ॥ २१ ॥ तेष्वप्युक्तो भागिनेयः प्रसन्नैरेतत्सत्यं कामयेवं वरं ते । प्रीत्या युक्ताः कामितं सर्वसत्रे कर्त्तारः स्व प्रवणा भागिनेय ॥ २२ ॥ असितं चार्त्तिमन्तञ्च सुनीथं चापि यः स्मरेत् । दिवा वा यदि रात्रौ वा नास्य सर्पभयं भवेत् ॥ २३ ॥ यो जरत्कारुणा जातो जरत्कारौ महायशाः । आस्तीकः सर्पसत्रे वः पन्नगान्योऽभ्यरक्षत । तं स्मरन्तं महाभागा न मां हिंसितुमर्हथ ॥ २४ ॥ सर्पापसर्प भद्रं ते गच्छ सर्प महाविष । जनमेजयस्य यज्ञान्ते आस्तीकवचनं स्मर ॥ २५ ॥ आस्तीकस्य वचः श्रुत्वा यः सर्पो न निवर्त्तते । शतधा भिद्यते मूर्द्धा शिंशवृक्षफलं यथा ॥ २६ ॥

सूत उवाच। स एवमुक्तस्तु तदा द्विजेन्द्रः समागतैस्तैर्भुजगेन्द्रमुख्यैः। संप्राप्य प्रीतिं विपुलां महात्मा ततो मनो वै गमनायाथ दध्रे ॥ २७ ॥ मोचयित्वा तु भुजगान् सर्पसत्राद्द्विजोत्तमः। जगाम काले धर्मात्मा दिष्टान्तं पुत्रपौत्रवान् ॥ २८ ॥ इत्याख्यानं मयास्तीकं यथावत्तत्र कीर्त्तितम्। यत्कीर्त्तयित्वा सर्पेभ्यो न भयं विद्यते क्वचित् ॥ २९ ॥ यथा कथितवान् ब्रह्मन् प्रमतिः पूर्वजस्तव। पुत्राय रुरवे प्रीतः पृच्छते भार्गवोत्तम ॥ ३० ॥ यद्दाख्यं श्रुतवांश्चाहं तथा च कथितं मया। आस्तीकस्य कवेर्विप्र श्रीमच्चरितमादितः ॥ ३१ ॥ श्रुत्वा धर्मिष्ठमाख्यानमास्तीकं पुण्यवर्द्धनम्। यन्मां त्वं पृष्टवान् ब्रह्मन् श्रुत्वा डुण्डुभभाषितम्। व्येतु ते सुमहद्ब्रह्मन् कौतूहलमरिन्दम ॥ ३२ ॥

इत्यादिपर्वणि सर्पसत्रं समाप्तं समाप्तश्चास्तीकपर्व
अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥

अथादिवंशावतारणपर्व ॥ ६ ॥

शौनक उवाच। भृगुवंशात् प्रभृत्येव त्वया मे कीर्त्तितं महत्। आख्यानमखिलं तात सौते प्रीतोऽस्मि तेन ते ॥ १ ॥ वक्ष्यामि चैव भूयस्त्वां यथावत् सूतनन्दन। याः कथा व्याससम्बद्धास्ताश्च भूयो विचक्ष्व मे ॥ २ ॥ तस्मिन् परमदुष्प्रारे सर्पसत्रे महात्मनाम्। कर्मान्तरेषु यज्ञस्य सदस्यानां तथाध्वरे ॥३। या बभूवुः कथाश्चित्रा येष्वर्थेषु यथातथम्। त्वत्त इच्छामहे श्रोतुं सौते त्वं वै प्रचक्ष्व नः ॥ ४ ॥

सौतिरुवाच। कर्मान्तरेष्वकथयन् द्विजा वेदाश्रयाः कथाः। व्यासस्त्वकथयच्चित्रमाख्यानं भारतं महत् ॥ ५ ॥

शौनक उवाच। महाभारतमाख्यानं प्राधान्यानां यथाक्रमम्।

जनमेजयेन पृष्टः सन् कृष्णद्वैपायनस्तदा ॥ ६ ॥ आवयामास विधिवत्तदा कर्मान्तरे तु सः । तामहं विधिवत् पुण्यां श्रोतुमिच्छामि वै कथाम् ॥ ७ ॥ मनःसागरसम्भूतां महर्षेर्भावितात्मनः । कथयस्व मतां श्रेष्ठ न हि तृप्यामि सूतज ॥ ८ ॥

सौतिरुवाच । हन्त ते कथयिष्यामि महदाख्यानमुत्तमम् । कृष्णद्वैपायनमतं महाभारतमादितः ॥ ९ ॥ शृणु सर्वमशेषेण कथ्यमानं मया द्विज । शंसितुं तन्महान् हर्षो ममापीह प्रवर्त्तते ॥ १० ॥

इत्यादिपर्वण्यादिवंशावतारणपर्वणि कथाबन्ध एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

सौतिरुवाच । श्रुत्वा तु सर्पसत्राय दीक्षितं जनमेजयम् । अभ्यगच्छदृषिर्विद्वान् कृष्णद्वैपायनस्तदा ॥ १ ॥ जनयामास यं काली शक्तेः पुत्रात्पराशरात् । कन्यैव यमुनाद्वीपे पाण्डवानां पितामहम् ॥ २ ॥ जातमात्रश्च यः सद्य इच्छन् देहमवीवृधत् । वेदांश्चाधिजगे साङ्गान् सेतिहासान्महायशाः ॥ ३ ॥ यन्नैति तपसा कश्चिन्न वेदाध्ययनेन च । न व्रतैर्नोपवासैश्च न प्रसूत्या न मन्युना ॥ ४ ॥ विव्यासैकं चतुर्धा यो वेदं वेदविदांवरः । परावरज्ञो ब्रह्मर्षिः कविः सत्यवतः शुचिः ॥ ५ ॥ यः पाण्डुं धृतराष्ट्रञ्च विदुरं चाप्यजीजनत् । शान्तनोः सन्ततिं तन्वन् पुण्यकीर्त्तिर्महायशाः ॥ ६ ॥ जनमेजयस्य राजर्षेः स महात्मा सदस्यया । विवेश सहितः शिष्यैर्वेदवेदाङ्गपारगैः ॥ ७ ॥ तत्र राजानमासीनं ददर्श जनमेजयम् । वृतं सदस्यैर्ऋत्विग्भिर्हविर्वैरिव पुरन्दरम् ॥ ८ ॥ तथा मूर्द्धाभिषिक्तैश्च नानाजनपदेश्वरैः । ऋत्विग्भिर्ब्रह्मकल्पैश्च कुशलैर्यज्ञसंस्तरे ॥ ९ ॥ जनमेजयस्तु राजर्षि-

दृष्ट्वा तमृषिमागतम् । सगणोऽभ्युद्ययौ तूर्णं प्रीत्या भरतसत्तमः ॥ १० ॥ काञ्चनं विष्टरं तस्मै सदस्यानुमतः प्रभुः । आसनं कल्पयामास यथा शक्रो बृहस्पतेः ॥ ११ ॥ तत्रोपविष्टं वरदं देवर्षिगणपूजितम् । पूजयामास राजेन्द्रः शास्त्रदृष्टेन कर्मणा ॥ १३ ॥ पाद्यमाचमनीयञ्च अर्घ्यं गाञ्च विधानतः । पितामहाय कृष्णाय तदर्हाय न्यवेदयत् ॥ १४ ॥ प्रतिगृह्य तु तां पूजां पाण्डवाञ्जनमेजयात् । गाञ्चैव समनुज्ञाप्य व्यासः प्रीतोऽभवत्तदा । तथा च पूजयित्वा तं प्रणयात् प्रपितामहम् ॥१५॥ उपोपविश्य प्रीतात्मा पर्य्यपृच्छदनामयम् । भगवानपि तं दृष्ट्वा कुशलं प्रतिवेद्य च ॥ १६ ॥ सदस्यैः पूजितः सर्वैः सदस्यान् प्रत्यपूजयत् । ततस्तु सहितः सर्वैः सदस्यैर्जनमेजयः । इदं पप्रच्छ द्विजश्रेष्ठं पर्य्यपृच्छत् कृताञ्जलिः ॥ १७ ॥

जनमेजय उवाच । कुरूणां पाण्डवानाञ्च भवान् प्रत्यक्षदर्शिवान् । तेषां चरितमिच्छामि कथ्यमानं त्वया द्विज ॥ १८ ॥ कथं समभवद्भेदस्तेषामक्लिष्टकर्मणाम् । तच्च युद्धं कथं वृत्तं भूतान्तकरणं महत् ॥ १९ ॥ पितामहानां सर्वेषां दैवेनाविष्टचेतसाम् । कार्त्स्न्येनैतन्ममाचक्ष्व यथावृत्तं द्विजोत्तम ॥ २० ॥

सौतिरुवाच । तस्य तद्वचनं श्रुत्वा कृष्णद्वैपायनस्तदा । शशाप शिष्यमासीनं वैशम्पायनमन्तिके ॥ २१ ॥

व्यास उवाच । कुरूणां पाण्डवानाञ्च यथा भेदोऽभवत् पुरा । तदस्मै सर्वमाचक्ष्व यन्मत्तः श्रुतवानसि ॥ २२ ॥ गुरोर्वचनमाज्ञाय स तु विप्रर्षभस्तदा । आचचक्षे ततः सर्वमितिहासं पुरातनम् ॥ २३ ॥ राज्ञे तस्मै सदस्येभ्यः पार्थिवेभ्यश्च सर्वशः । भेदं सर्वविनाशञ्च कुरुपाण्डवयोस्तदा ॥ २४ ॥

इत्यादिपर्वणि पर्वादिवंशावतारणपर्वणि षष्टितमोऽध्यायः ॥ ६० ॥

—०:०—

वैशम्पायन उवाच । गुरवे प्राङ्नमस्कृत्य मनोबुद्धिसमाधिभिः । संपूज्य च द्विजान् सर्वांस्तथान्यान् विदुषो जनान् ॥ १ ॥ महर्षेर्व्यप्तसूनोश्च सर्वलोकेषु धीमतः । प्रवक्ष्यामि मतं कृत्स्नं व्यासस्यास्य महात्मनः ॥ २ ॥ श्रोतुं पात्रञ्च राजंस्त्वं प्राप्येमां भारतीं कथाम् । गुरोर्वैक्लवपरिस्पन्दो मनः प्रोत्साहतीव मे ॥ ३ ॥ शृणु राजन्यथा भद्रः कुरुपाण्डवयोरभूत् । राज्यार्थे द्यूतसम्भूतो वनवासस्तथैव च ॥ ४ ॥ यथाच युद्धमभवत् पृथिवीक्षयकारकम् । तत्तेऽहं कथयिष्यामि पृच्छते भरतर्षभ ॥ ५ ॥ मृते पितरि ते वीरा वनादेत्य स्वमन्दिरम् । न चिरादेवविद्वांसो वेदे धनुषि चाभवन् ॥ ६ ॥ तांस्तथा सत्त्ववीर्यौजःसम्पन्नान् पौरसंमतान् । नाशपन् कुरवो दृष्ट्वा पाण्डवान् श्रीयशोभृतः ॥ ७ ॥ ततो दुर्योधनः क्रूरः कर्णश्च सहसौबलः । तेषां निग्रहनिर्वासान् विविधांस्ते समारभन् ॥ ८ । ततो दुर्योधनः शूरः कुलिङ्गस्य मते स्थितः । पाण्डवान् विविधोपायैराज्यहेतोरपीड़यत् ॥ ९ ॥ ददावथ विषं पापो भीमाय धृतराष्ट्रजः । जरयामास तद्वीरः सहान्नेन वृकोदरः ॥ १० ॥ प्रमाणकोट्यां संसुप्तं पुनर्बद्ध्वा वृकोदरम् । तोयेषु भीमं गङ्गायाः प्रक्षिप्य पुरमाव्रजत् ॥ ११ ॥ यदा विबुद्धः कौन्तेयस्तदा संछिद्य बन्धनम् । उदतिष्ठन्महाबाहुर्भीमसेनो गतव्यथः ॥ १२ ॥ आशीविषैः कृष्णसर्पैः सुप्तं चैनमदंशयत् । सर्वेष्वेवाङ्गदेशेषु न ममार च पाण्डवः ॥ १३ ॥ तेषान्तु विप्रकारेषु तेषु तेषु महामतिः । मोक्षणे प्रतिकारे च विदुरोऽवहितोऽभवत् ॥ १४ ॥ स्वर्गस्थो जीवलोकस्य यथा शक्रः सुखावहः । पाण्डवानां तथा नित्यं विदुरोऽपि सुखावहः ॥ १५ ॥ यदा तु विविधोपायैः संहतैर्विहतैरपि । नाशक्नुद्विनिहन्तुं तान्दैवभाव्यर्थरक्षितान् ॥ १६ ॥ ततः सम्मन्त्र्य सचिवैर्दुष्टयद्युःशासनादिभिः । धृतराष्ट्रमनुज्ञाप्य जातुषं गृह-

मादित्यत् ॥ १७ ॥ सुतप्रियैषी तान्राजा पाण्डवानम्बिकासुतः । ततो विवासयामास राज्यभोगबुभुत्सया ॥ १८ ॥ ते प्रातिष्ठन्त सहिता नगरान्नागसाह्वयात् । प्रख्याने चाभवन्मन्त्री तत्ता तेषां महात्मनाम् ॥ १९ ॥ तेन सुक्ता जतुगृहान्निर्यीये प्राद्रवन्वनम् । ततः सम्प्राप्य कौन्तेया नगरं वारणावतम् ॥ २० ॥ न्यवसन्त महात्मानो माता सह परन्तपाः । धृतराष्ट्रेण चाज्ञप्ता उषिता जातुषे गृहे ॥ २१ ॥ पुरोचनात् रक्ष्यमाणाः संवत्सरमतन्द्रिताः । सुरङ्गाङ्कारयित्वा ते विदुरेण प्रचोदिताः । आदीप्य जातुषं वेश्म दग्ध्वा चैव पुरोचनम् ॥२२॥ प्राद्रवन् भयसंविग्ना माता सह परन्तपाः । दहशुर्हाकरं रक्षो हिडिम्बं वननिर्झरे ॥ २३ ॥ हत्वा च तं राक्षसेन्द्रं भीताः समवबोधनात् । निशि सम्प्राद्रवन् पार्था धार्त्तराष्ट्रभयार्दिताः ॥२४॥ प्राप्ता हिडिम्बा भीमेन यत्र जातो घटोत्कचः । एकचक्रां ततो गत्वा पाण्डवाः शंसितव्रताः ॥ २५ ॥ वेदाध्ययनसम्पन्नास्तेऽभवन् ब्रह्मचारिणः । ते तत्र नियताः कालं कञ्चिद्भूषुर्नरर्षभाः ॥ २६ ॥ माता सहैकचक्रायां ब्राह्मणस्य निवेशने । तत्रासतां वृषितं पुरुषादं वृकोदरः ॥ २७ ॥ भीमसेनो महाबाहुर्बकं नाम महाबलम् । तत्रापि पुरुषव्याघ्रो बाहुवीर्येण पाण्डवः ॥ २८ ॥ निहत्य तरसा वीरो नागरान् पर्य्यमान्त्वयत् । ततस्ते प्रयुयुः कृष्णां पाञ्चालेषु स्वयम्वराम् ॥ २९ ॥ श्रुत्वा चैवाभ्यगच्छन्त गत्वा चैवालभन्त ताम् । ते तत्र द्रौपदीं लब्ध्वा परिसंवत्सरोषिताः ॥ ३० ॥ विदिता हास्तिनपुरं प्रत्याजग्मुररिन्दमाः । तत्र तान् धृतराष्ट्रेण राज्ञा शान्तनवेन च ॥ ३१ ॥ भ्रातृभिर्विग्रहात् कथं वो न भवेदिति । अस्माभिः खाण्डवप्रस्थे युष्मद्धामोऽनुचिन्त्यताम् ॥ ३२ ॥ तस्माज्जनपदोपेतं सुविभक्तमहापथम् । वासाय खाण्डवप्रस्थं व्रजध्वं गतमत्सराः ॥ ३३ ॥ तथोक्ते वच-

नाज्जग्मुः सह सर्वैः सुहृज्जनैः। नगरं खाण्डवप्रस्थं रत्नान्यादाय सर्वशः ॥३४॥ तत्र ते न्यवसन् पार्थाः संवत्सरगणान् बहून्। वशे शस्त्रप्रतापेन कुर्वन्तोऽन्यान्महीभृतः ॥ ३५ ॥ एवं धर्मप्रधानास्ते सत्यव्रतपरायणाः। अप्रमत्तोत्थिताः क्षान्ताः प्रतपन्तोऽहितान् बहून् ॥ ३६ ॥ अजयद्भीमसेनस्तु दिशं प्राचीं महायशाः। उदीचीमर्जुनो वीरः प्रतीचीं नकुलस्तथा ॥ ३७ ॥ दक्षिणां सहदेवस्तु विजिग्ये परवीरहा। एवं चक्रुरिमां सर्वे वशे क्षत्रियां वसुन्धराम् ॥ ३८ ॥ पञ्चभिः सूर्यसङ्काशैः सूर्येण च विराजता। षट्सूर्येवाभवत् पृथ्वी पाण्डवैः सत्यविक्रमैः ॥३९॥ ततो निमित्ते कस्मिंश्चिद्धर्मराजो युधिष्ठिरः। वनं प्रस्थापयामास तेजस्वी सत्यविक्रमः ॥ ४० ॥ प्राणेभ्योऽपि प्रियतरं भ्रातरं सव्यसाचिनम्। अर्जुनं पुरुषव्याघ्रं स्थिरात्मानं गुणैर्युतम् ॥४१॥ स वै संवत्सरं पूर्णं मासं चैकं वनेऽवसत्। ततोऽगच्छद्धृषीकेशं द्वारवत्यां कदाचन ॥ ४२ ॥ लब्ध्वाब्रवीद्भीमपूर्वां राजीवलोचनाम्। अनुजां वासुदेवस्य सुभद्रां भद्रभाषिणीम् ॥ ४३ ॥ सा शचीव महेन्द्रेण श्रीः कृष्णेनेव सङ्गता। सुभद्रा युयुजे प्रीत्या पाण्डवेनार्जुनेन ह ॥ ४४ ॥ अतर्पयच्च कौन्तेयः खाण्डवे हव्यवाहनम्। बीभत्सुर्वासुदेवेन सहितो नृपसत्तम ॥ ४५ ॥ नातिभारो हि पार्थस्य केशवेन सहाभवत्। व्यवसायसहायस्य विष्णोः प्रत्युद्यतेष्विव ॥ ४६ ॥ पार्थायाग्निर्ददौ चापि गाण्डीवं धनुरुत्तमम्। इषुधी चाक्षयौ राजन् रथञ्च कपिलक्षणम् ॥ ४७ ॥ मोचयामास बीभत्सुर्मयं यत्र महासुरम्। स चकार सभां दिव्यां सर्वरत्नसमन्विताम् ॥ ४८ ॥ तस्यां दुर्योधनो मन्दो लोभं चक्रे सुदुर्मतिः। ततोऽक्षैर्वञ्चयित्वा च सौबलेन युधिष्ठिरम्। वनं प्रस्थापयामास समवर्षाणि पञ्च च ॥ ४९ ॥ अज्ञातमेकं राष्ट्रे च ततो वर्षं त्रयोदशम्। तत्यजुर्दृश्ये वर्षे याचमानं स्वकं

वसु ॥ ५० ॥ नालभन्त महाराज ततो युद्धमवर्त्तत। ततस्ते क्षत्रमुत्साद्य हत्वा दुर्य्योधनं नृपम् ॥ ५१ ॥ राज्यं विकृतभूयिष्ठं प्रत्यपद्यन्त पाण्डवाः। एवमेतत् पुराहृत्तं तेषामक्लिष्टकर्म्मणाम्। भेदो राज्यविनाशाय जयस्य जयतांवर ॥ ५२ ॥

इत्यादिपर्वणि आदिवंशावतारणपर्वणि एकषष्टोऽध्यायः ॥ ६१ ॥

—०*०—

जनमेजय उवाच। कथितं वै समासेन त्वया सर्वं द्विजोत्तम। महाभारतमाख्यानं कुरूणां चरितं महत् ॥ १ ॥ कथां त्वमद्य चित्रार्थां कथयस्व तपोधन। विस्तरश्रवणे जातं कौतूहलमतीव मे ॥ २ ॥ स भवान् विस्तरेणेमां पुनराख्यातुमर्हति। न हि तृप्यामि पूर्वेषां शृण्वानश्चरितं महत् ॥ ३ ॥ न तत् कारणमल्पं वै धर्म्मज्ञा यत्र पाण्डवाः। अवध्यान् पर्वणो जघ्नुः प्रशस्यन्ते च मानवैः ॥ ४ ॥ किमर्थं ते नरव्याघ्राः शक्राः सन्तो ह्यनागसः। प्रयुज्यमानान् संक्लेशान् लब्धवन्तो दुरात्मनाम् ॥ ५ ॥ कथं नागायुतप्राणो बाहुशाली वृकोदरः। परिक्लिश्यन्नपि क्रोधं धृतवान्वै द्विजोत्तम ॥ ६ ॥ कथं सा द्रौपदी कृष्णा क्लिश्यमाना दुरात्मभिः। शक्ता सती धार्त्तराष्ट्रान्नादहत् क्रोधचक्षुषा ॥ ७ ॥ कथं व्यसनिनं द्यूते पार्थौ माद्रीसुतौ तदा। अन्वयुस्ते नरव्याघ्रा बाध्यमाना दुरात्मभिः ॥ ८ ॥ कथं धर्म्मभृतां श्रेष्ठः सुतो धर्म्मस्य धर्म्मभृत्। अनर्हः परमं क्लेशं मोहवान् स युधिष्ठिरः। कथं च बहुलाः सेनाः पाण्डवः कृष्णसारथिः। अस्यन्नेकोऽनयत् सर्वाः पितृलोकं धनञ्जयः ॥ ९ ॥ एतदाचक्ष्व मे सर्वं यथावृत्तं तपोधन। यद्यच्च कृतवन्तस्ते तत्र तत्र महारथाः ॥ १० ॥

वैशम्पायन उवाच। चर्यां कुरु महाराज विपुलोऽयमनुक्रमः। पुण्याख्यानस्य वक्तव्यः कृष्णद्वैपायनेरितः ॥ ११ ॥ महर्षेः

सर्वलोकेषु पूजितस्य महात्मनः। प्रवक्ष्यामि मतं कृत्स्नं व्यास-स्यामिततेजसः ॥१२॥ इदं शतसहस्रं हि श्लोकानां पुण्यकर्मणाम्। सत्यवत्यात्मजेनेह व्याख्यातममितौजसा ॥ १३ ॥ य इदं शृणुयान्नित्यमाख्यानं भरतस्य हि। सर्वपापविनिर्मुक्तः स याति परमां गतिम् ॥ १४ ॥ य इदं शृणुयाद्विद्वान् ये चेदं शृण्वते नराः। ते ब्रह्मणः स्थानमेत्य प्राप्नुयुर्देवतुल्यताम् ॥ १५ ॥ इदं हि वेदैः समितं पवित्रमपि चोत्तमम्। अव्याणामुत्तमं चेदं पुराणमृषिसंस्तुतम् ॥ १६ ॥ अस्मिन्नर्थश्च कामश्च निखिलेनोपदिश्यते। इतिहासे महापुण्ये बुद्धिश्च परिनैष्ठिकी ॥ १७ ॥ अशुद्धान् दानशीलांश्च सत्यशीलाननास्तिकान्। काणां वेदमिमं विद्वान् श्रावयित्वार्थमश्नुते ॥ १८ ॥ भ्रूणहत्याकृतं चापि पापं जह्यादसंशयम्। इतिहासमिमं श्रुत्वा पुरुषोऽपि सुदारुणः ॥ १९ ॥ मुच्यते सर्वपापेभ्यो राहुणा चन्द्रमा यथा। जयो नामेतिहासोऽयं श्रोतव्यो विजिगीषुणा ॥ २० ॥ महीं विजयते राजा शत्रूंश्चापि पराजयेत्। इदं पुंसवनं श्रेष्ठमिदं स्वस्त्ययनं महत् ॥ २१ ॥ महिषीयुवराजाभ्यां श्रोतव्यं बलमिच्छता। वीरं जनयते पुत्रं कन्यां वा राज्यभागिनीम् ॥ २२ ॥ धर्मशास्त्रमिदं पुण्यमर्थशास्त्रमिदं परम्। मोक्षशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना ॥ २३ ॥ मनसाप्यर्थयन्ते चेदं तथा शृण्वन्ति चापरे। पुत्राः शुश्रूषवः सन्ति प्रेष्याश्च प्रियकारिणः ॥ २४ ॥ शरीरेण कृतं पापं वाचा च मनसैव च। सर्वं स त्यजति क्षिप्रं य इदं शृणुयान्नरः ॥ २५ ॥ भरतानां महज्जन्म शृण्वतामनसूयताम्। नास्ति व्याधिभयं तेषां परलोकभयं कुतः ॥ २६ ॥ धन्यं यशस्यमायुष्यं पुण्यं स्वर्ग्यं तथैव च। कृष्णद्वैपायनेनेदं कृतं पुण्यं चिकीर्षुणा ॥ २७ ॥ कीर्तिं प्रथयता लोके पाण्डवानां महात्मनाम्। अन्येषां क्षत्रियाणां च भूरिद्रविणतेजसाम् ॥ २७ ॥ सर्वविद्याव्रदातानां लोके मथितकर्मणाम्। य इदं मानवो लोके पुण्यार्थं ब्राह्मणाञ् शुचीन् ॥ २८ ॥ श्रावयेत महा-

पुण्यं तस्य धर्मः सनातनः । कुरूणां प्रथितं वंशं कीर्त्तयन् सततं शुचिः ॥ २९ ॥ वंशमाप्नोति विपुलं लोके पूज्यतमो भवेत् । योऽधीते भारतं पुण्यं ब्राह्मणो नियतव्रतः । चतुरो वार्षिकान् मासान् सर्वपापैः प्रमुच्यते ॥ ३० ॥ विज्ञेयः स च वेदानां पारगो भारतं पठन् । देवा राजर्षयो ह्यत्र पुण्या ब्रह्मर्षयस्तथा ॥ ३१ ॥ कीर्त्यन्ते धूतपाप्मानः कीर्त्यते केशवस्तथा । भगवांश्चापि देवेशो यत्र देवी च कीर्त्यते ॥ ३२ ॥ अनेकजननो यत्र कार्त्तिकेयस्य सम्भवः । ब्राह्मणानां गवाञ्चैव माहात्म्यं यत्र कीर्त्यते । सर्वश्रुतिसमूहोऽयं श्रोतव्यो धर्मबुद्धिभिः ॥ ३३ ॥ य इदं श्रावयेद्विद्वान् ब्राह्मणानिह पर्वसु । धूतपाप्मा जितस्वर्गो ब्रह्म गच्छति शाश्वतम् ॥ ३४ ॥ श्रावयेद्ब्राह्मणान् श्राद्धे यश्चेदं पादमन्ततः । अक्षय्यं तस्य तच्छ्राद्धमुपावर्त्तेत् पितॄनिह ॥ ३५ ॥ अक्षा यदेनः क्रियते इन्द्रियैर्मनसापि वा । ज्ञानादज्ञानतो वापि प्रकरोति नरश्च यत् तन्महाभारताख्यानं श्रुत्वैव प्रविलीयते ॥ ३६ ॥ भरतानां महज्जन्म महाभारतमुच्यते । निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ॥ ३७ ॥ भरतानां यतश्चायमितिहासो महाद्भुतः । महतो ह्येनसो मर्त्यान्मोचयेदनुकीर्त्तितः ॥ ३८ ॥ त्रिभिर्वर्षैर्ह्यव्यक्तामः कृष्णद्वैपायनो मुनिः । नित्योत्थितः शुचिः शक्तो महाभारतमादितः ॥ ३९ ॥ तपो नियममास्थाय कृतमेतन्महर्षिणा । तस्मान्नियमसंयुक्तैः श्रोतव्यं ब्राह्मणैरिदम् ॥ ४० ॥ कृष्णद्वैपायनोक्तामिमां पुण्यां भारतीमुत्तमां कथाम् । श्रावयिष्यन्ति ये विप्रा ये च श्रोष्यन्ति मानवाः ॥ ४१ ॥ सर्वथा वर्त्तमाना वै न ते शोच्याः कृताकृतैः । नरेण धर्मकामेन सर्वः श्रोतव्य इत्यपि ॥ ४२ ॥ निखिलेनेतिहासोऽयं ततः सिद्धिमवाप्नुयात् । न तां स्वर्गगतिं प्राप्य तुष्टिं प्राप्नोति मानवः ॥ ४३ ॥ यां श्रुत्वैव महापुण्यमितिहासमुपाश्नुते । शृणुयाच्छ्राद्धः पुण्यश्लोकः श्रावयेच्चेद-

मङ्गलम् ॥ ४४ ॥ नरः फलमवाप्नोति राजसूयाश्वमेधयोः । यथा समुद्रो भगवान्यथा मेरुर्महागिरिः ॥ ४५ ॥ उभौ ख्यातौ रत्ननिधी तथा भारतमुच्यते । इदं हि वेदैः समितं पवित्रमपि चोत्तमम् ॥ ४६ ॥ श्रव्यं श्रुतिसुखं चैव पावनं श्रीलवर्द्धनम् । य इदं भारतं राजन्याचकाय प्रयच्छति ॥ ४७ ॥ तेन सर्वा मही दत्ता भवेत्सागरमेखला । पारीक्षितकथां दिव्यां पुण्याय विजयाय च ॥ ४८ ॥ कथ्यमानां मया कृत्स्नां शृणु हर्षकरीमिमाम् । त्रिभिर्वर्षैः सदोत्थायी कृष्णद्वैपायनो मुनिः ॥ ४९ ॥ महाभारतमाख्यानं कृतवानिदमद्भुतम् । धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ । यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ॥ ५० ॥

इत्यादिपर्वण्यादिवंशावतरणे द्विषष्टोऽध्यायः ॥ ६२ ॥

—०—

वैशम्पायन उवाच । राजोपरिचरो नाम धर्मनित्यो महीपतिः । बभूव मृगयां गन्तुं सदा किल धृतव्रतः ॥ १ ॥ स चेदिविषयं रम्यं वसुः पौरवनन्दनः । इन्द्रोपदेशाज्जग्राह रमणीयं महीपतिः ॥ २ ॥ तमाश्रमे न्यस्तशस्त्रं निवसन्तं तपोनिधिम् । देवाः शक्रपुरोगा वै राजानमुपतस्थिरे ॥ ३ ॥ इन्द्रत्वमर्हो राजायं तपसेत्यनुचिन्त्य वै । तं सान्त्वेन नृपं साक्षात्तपसः संन्यवर्तयन् ॥ ४ ॥

देवा ऊचुः । न संकीर्येत धर्मोयं पृथिव्यां पृथिवीपते । त्वया हि धर्मो विधृतः कृत्स्नं धारयते जगत् ॥ ५ ॥

इन्द्र उवाच । लोके धर्मं पालय त्वं नित्ययुक्तः समाहितः । धर्मयुक्तस्ततो लोकान् पुण्यान् पश्यसि शाश्वतान् ॥ ६ ॥ दिविष्ठस्य भुविष्ठस्त्वं सखाभूतो मम प्रियः । रम्यः पृथिव्यां यो देश-

क्षमावस नराधिप ॥ ७ ॥ पशव्यश्चैव पुण्यश्च प्रभूतधनधान्यवान् । स्वाराज्यश्चैव मोक्षश्च औग्यैर्भूमिगुणैर्युतः ॥ ८ ॥ अर्घवानेष देशो हि धनरत्नादिभिर्युतः । वसुपूर्णा च वसुधा वस चेदिषु चेदिप ॥ ९ ॥ धर्मशीला जनपदाः सुसन्तोषाश्च साधवः । न च मिथ्याप्रलापोऽत्र क्वैरेष्वपि कुतोऽन्यथा ॥ १० ॥ न च पित्रा विभज्यन्ते पुत्रा गुरुहिते रताः । युञ्जते धुरि नो गाश्च क्षयान् सम्वर्धयन्ति च ॥ ११ ॥ सर्वे वर्णाः स्वधर्मस्थाः सदा चेदिषु भानद । न तेऽस्त्यविदितं किञ्चित्रिषु लोकेषु यद्भवेत् ॥ १२ ॥ दैवोपभोग्यं दिव्यं त्वामाकाशे स्फाटिकं महत् । आकाशगं त्वां महतं विमानमुपयत्स्यते ॥ १३ ॥ त्वन्नेकः सर्वमर्त्येषु विमानवरमास्थितः । चरिष्यस्युपरिस्थो हि देवो विग्रहवानिव ॥ १४ ॥ ददामि ते वैजयन्तीं मालामम्लानपङ्कजाम् । धारयिष्यति संग्रामे या त्वां शस्त्रैरविक्षतम् ॥ १५ ॥ लक्षणं चैतदेवेश भविता ते नराधिप । इन्द्रमालेति विख्यातं धन्यमप्रतिमं महत् ॥ १६ ॥

वैशम्पायन उवाच । यष्टिं च वैणवीं तस्मै ददौ हतनिसूदनः । दृष्टप्रदानमुद्दिश्य शिष्टानां प्रतिपालनीम् ॥ १७ ॥ तस्या शक्रस्य पूजायां भुवो भूमिपतिस्तदा । प्रवेशं कारयामास गते सम्वत्सरे तदा ॥ १८ ॥ ततः प्रभृति चाद्यापि यष्टिः क्षितिपसत्तमैः । प्रवेश्यः क्रियते राजन्यथा तेन प्रवर्त्तितः ॥ १९ ॥ अपरेद्युस्ततस्तस्याः क्रियतेऽभ्युच्छ्रयो नृपैः । अलङ्कृतायाः पिटकैर्गन्धैर्माल्यैश्च भूषणैः ॥ २० ॥ माल्यदामपरिक्षिप्ता विधिवत् क्रियतेऽपि च । भगवान् पूज्यते चात्र हंसरूपेण चेश्वरः । स्वयमेव गृहीतेन वसोः प्रीत्या महात्मनः ॥ २१ ॥ तां पूजां महेन्द्रस्तु दृष्ट्वा देवः कृतां शुभाम् । वसुना राजमुख्येन प्रीतिमानब्रवीत् प्रभुः ॥ २२ ॥ ये पूजयिष्यन्ति नरा राजानश्च कृतं मम ।

कारयिष्यन्ति च मुदा यथा चेदिपतिर्नृपः ॥ २३ ॥ तेषां श्रीर्विजयश्चैव सराष्ट्राणां भविष्यति । तथा स्फीतो जनपदो मुदितश्च भविष्यति ॥ २४ ॥ एवं मघवता तेन महेन्द्रेण नराधिप । वसुः प्रीत्या मघवता महाराजोऽभिसत्कृतः ॥ २५ ॥ उत्सवं कारयिष्यन्ति सदा शक्रस्य ये नराः । भूमिरत्नादिभिर्दानैस्तथा पूज्या भजन्ति ते ॥ २६ ॥ वरदानमहायज्ञैस्तथा शक्रोत्सवेन च । सम्पूजितो मघवता वसुश्चेदीश्वरो नृपः ॥ २७ ॥ पालयामास धर्मेण चेदिस्थः पृथिवीमिमाम् । इन्द्रप्रीत्या चेदिपतिश्चकारेन्द्रमहं वसुः ॥ २८ ॥ प्रचाराग्र्य महावीर्याः पञ्चासन्नमितौजसः । नानाराज्येषु च सुतान् स कस्माङ्न्यवेशयत् ॥ २९ ॥ मगधानां विभुतो यो बृहद्रथः । प्रत्यग्रहः कुशाग्रश्च यमाहुर्गिरिवाह्वयम् ॥ ३० ॥ मावेल्लश्च यदुश्चैव राजन्यश्चापराजितः । एते तस्य सुता राजन्राजवंशभृतेजसः ॥ ३१ ॥ न्यवेशयन्नामभिः स्वैस्ते देशांश्च पुराणि च । वासवाः पञ्च राजानः पृथग्वंशाश्च विश्रुताः ॥ ३२ ॥ वसन्तमिन्द्रप्रासादे आकाशे स्फाटिके च तम् । ददतुर्मुमहात्मानं गन्धर्वाप्सरसो नृपम् ॥ ३३ ॥ राजोपरिचरेत्येवं नाम तस्याथ विश्रुतम् । पुरोपवाहिनीं तस्य नदीं शुक्तिमतीं गिरिः । अरौत्सीच्चेतनायुक्तः कामात्कोलाहलः किल ॥३४॥ गिरिं कोलाहलं तन्तु पदा वसुरताडयत् । निष्क्राम ततस्तेन प्रहारविवरेण सा ॥ ३५ ॥ तस्यां नद्यामजनयन्मिथुनं पर्वतः स्वयम् । तस्मात् विमोचणात् प्रीता नदी राज्ञे न्यवेदयत् ॥३६॥ यः पुमानभवत्तत्र तं स राजर्षिसत्तमः । वसुर्वसुप्रदश्चक्रे सेनापतिमरिन्दमः ॥ ३७ ॥ चकार पत्नीं कन्यान्तु तथा तां गिरिकां नृपः । वसोः पत्नी तु गिरिका कामकालं न्यवेदयत् । ऋतुकालमनुप्राप्ता स्नाता पुंसवने शुचिः ॥ ३८ ॥ तदहः पितरश्चैनमूचुर्जहि मृगानिति । तं राजसत्तमं प्रीतास्तदा मतिमतांवर

॥ ३१ ॥ स पितुर्वो नियोगन्तमनतिक्रम्य पार्थिवः । चचार मृगयां कामी गिरिकामेव संस्मरन् । अतीवरूपसम्पन्नां साक्षाच्छ्रियमिवापराम् ॥ ४० ॥ अशोकैश्चम्पकैश्चूतैरनेकैरतिमुक्तकैः । पुन्नागैः कर्णिकारैश्च वकुलैर्दिव्यपाटलैः ॥ ४१ ॥ पाटलैर्नारिकेलैश्च चन्दनैरर्जुनैस्तथा । एतैरन्यैर्महावृक्षैः पुष्पैः स्वादुफलैर्युतम् ॥ ४२ ॥ कोकिलाकुलसञ्चारं मत्तभ्रमरनादितम् । वसन्तकाले तत्तस्य वनञ्चैत्ररथोपमम् ॥ ४३ ॥ मन्मथाभिसरीतात्मा नापश्यद्गिरिकां तदा । अपश्यन् कामसन्तप्तश्चरमाणो यदृच्छया ॥ ४४ ॥ पुष्पसंछन्नशाखाग्रं पल्लवैरुपशोभितम् । अशोकं स्तवकैश्चित्रं रमणीयमपश्यत ॥ ४५ ॥ अधस्तात्तस्य छायायां सुखासीनो नराधिपः । मधुगन्धेन संयुक्तं पुष्पगन्धं मनोहरम् । वायुना प्रेर्यमाणन्तमाघ्राय मुदमन्वगात् ॥ ४६ ॥ तस्य रेतः प्रचस्कन्द चरतो गहने वने । स्खलनमात्रञ्च तद्रेतो ह्यक्षपत्रेण भूमिपः । प्रतिजग्राह मिथ्या मे न पतेद्रेत इत्युत ॥ ४७ ॥ दृष्ट्वं मिथ्याधिस्खलनं रेतो मे न भवेदिति । ऋतुस्नातायाः पत्न्या मे न मोघः स्यादिति प्रभुः ॥ ४८ ॥ सञ्चिन्त्यैवं तदा राजा विचार्य च पुनः पुनः । अमोघत्वञ्च विज्ञाय रेतसो राजसत्तमः ॥ ४९ ॥ शुक्रमस्यापने कालं महिष्याः प्रसमीक्ष्य वै । अभिमन्त्र्याय तच्छुक्रमारात्तिष्ठन्तमाशुगम् । श्येनमूर्ध्वमथैतत्त्वञ्जो गता श्येनं ततोऽब्रवीत् ॥ ५० ॥ मत्प्रियार्थं महद्दं सौम्य शुक्रं मम गृहं नय । गिरिकायाः प्रयच्छाशु तस्या ह्यार्त्तवमद्य वै ॥ ५१ ॥ गृहीत्वा तत्तदा श्येनस्तूर्णमुत्पत्य वेगवान् । जवं परममास्थाय प्रदुद्राव विहङ्गमः ॥ ५२ ॥ तमपश्यद्यथायान्तं श्येनं श्येनस्तथापरः । अभ्यद्रवच्च तं सद्यो दृष्ट्वैवामिषशङ्कया ॥ ५३ ॥ तुण्डयुद्धमथाकाशे तावुभौ कृतवन्तौ । युध्यतोरपतद्रेतस्तद्वापि यमुनाम्भसि ॥ ५४ ॥ तत्राद्रिकेति विख्याता ब्रह्मशापाद्धराचरा ।

मीनभावमनुप्राप्ता बभूव यमुनाचरी ॥ ५५ ॥ अथ नावादपरिभ्रष्टं तद्वीर्यं कन्यया पुनः । जग्राह तरसोपेत्य माद्रिका मत्स्यरूपिणी ॥ ५६ ॥ कदाचिदपि मत्स्यौ तां वसन्युमत्स्यजीविनः । माघे च दशमे प्राप्ते तदा भरतसत्तम ॥ ५७ ॥ उज्जह्रुरुदरात्तस्याः स्त्रीं पुमांसञ्च मानुषम् । आश्चर्यभूतं दृष्ट्वा राज्ञेऽथ प्रत्यवेदयन् ॥ ५८ ॥ काये मत्स्या इमौ राजन् सम्भूतौ मानुषाविति । तयोः पुमांसं जग्राह राजोपरिचरस्तदा ॥ ५९ ॥ स मत्स्यो नाम राजासीद्धार्मिकः सत्यसङ्गरः । साप्सरा मुक्तशापा च क्षणेन समपद्यत ॥ ६० ॥ या पुरोक्ता भगवता तिर्य्यग्योनिगता शुभा । मानुषौ जनयित्वा त्वं शापमोक्षमवाप्स्यसि ॥ ६१ ॥ ततः सा जनयित्वा तौ विप्रस्ता मत्स्यघातिना । सत्यज्य मत्स्यरूपं सा दिव्यं रूपमवाप्य च ॥ ६२ ॥ सिद्धर्षिचारणपथं जगामाथ वराप्सराः । सा कन्या दुहिता तस्या मत्स्या मत्स्यसगन्धिनी ॥ ६३ ॥ राज्ञा दत्ता च दाशाय कन्येयं ते भवेति । रूपसत्त्वसमायुक्ता सर्वैः समुदिता गुणैः ॥ ६४ ॥ सा तु सत्यवती नाम मत्स्यघात्यभिसंश्रयात् । आसीत्सा मत्स्यगन्धैव कञ्चित्कालं शुचिस्मिता ॥ ६५ ॥ शुश्रूषार्थं पितुर्नावं वाहयन्तीं जले च ताम् । तीर्थयात्रां परिक्रामन्प्रपेदे पराशरः ॥ ६६ ॥ अतीव रूपसम्पन्नां सिद्धानामपि कान्क्षिताम् । दृष्ट्वैव च स तां धीमांश्चकमे चारुहासिनीम् ॥ ६७ ॥ दिव्यां तां यामिनीं कन्यां स्मार्तं पुनिमुद्वहः । सङ्गमं मम कल्याणि कुरुष्वेत्यभ्यभाषत ॥ ६८ ॥ साब्रवीत्पश्य भगवन् पाराशारे स्थितानृषीन् । आदित्योदयवेलेयमर्थं तु ह्यात्मनागमः ॥ ६९ ॥ एवं तयोक्तो भगवान्दीक्षारक्षणतत्परः । येन देशः स सर्वत्र तमोभूत इवाभवत् ॥ ७० ॥ दृष्ट्वा दृष्ट्वा नीहारं ततस्तं परमर्षिणा । विस्मिता साभवत्कन्या नीहितात्मा तपस्विनी ॥ ७१ ॥

सत्यवत्युवाच। विद्धि मां भगवन् कन्यां सदा पितृवशानुगाम्। त्वत्संयोगाच्च दुष्येत कन्याभावो ममानघ॥ ७२॥ कन्यात्वे दूषिते चापि कथं शक्ष्ये द्विजोत्तम। गृहं गन्तुमृषे चाहं धीमन्न स्यातुमुत्सहे। एतत् संचिन्त्य भगवन्विधत्स्व यदनन्तरम्॥ ७३॥

वैशम्पायन उवाच। एवमुक्तवतीं तान्तु प्रीतिमानृषिसत्तमः। उवाच मत्प्रियं कृत्वा कन्यैव त्वं भविष्यसि॥ ७४॥ वृणीष्व च वरं भीरु यं त्वमिच्छसि भाविनि। वृथा हि न प्रसादो मे भूतपूर्वः शुचिस्मिते॥ ७५॥ एवमुक्ता वरं कृष्णे गात्रसौगन्ध्यमुत्तमम्। स चास्यै भगवान् प्रादान्मनसः काङ्क्षितं भुवि॥ ७६॥ ततो लब्धवरा प्रीता स्त्रीभावगुणभूषिता। जगाम सह संसर्गमृषिणाङ्गतकर्मणा॥ ७७॥ तेन गन्धवतीत्येवं नामास्याः प्रथितं भुवि। तस्यास्तु योजनाद्गन्धमाजिघ्रन्ति नरा भुवि॥ ७८॥ तस्या योजनगन्धेति ततो नामापरं स्मृतम्। पराशरोपि भगवान् जगाम स्वं निवेशनम्॥ ७९॥ इति सत्यवती हृष्टा लब्ध्वा वरमनुत्तमम्। पराशरेण संयुक्ता सद्यो गर्भं सुषाव सा॥८०॥ यस्मिन् च यमुनाद्वीपे पाराशर्यः स वीर्यवान्। स मातरमनुज्ञाप्य तपस्येव मनो दधे॥ ८१॥ स्मृतोऽहं दर्शयिष्यामि कृत्यष्विति च सोऽब्रवीत्। एवं द्वैपायनो जज्ञे सत्यवत्यां पराशरात्॥ ८२॥ न्यस्तो द्वीपे स यद्बालस्तस्माद्वैपायनः स्मृतः। पादापसारिणं धर्मं स तु विद्वान् युगे युगे। आयुः शक्तिञ्च मर्त्यानां युगानुगमवेक्ष्य च॥ ८३॥ ब्रह्मणो ब्राह्मणानाञ्च तथानुग्रहकाङ्क्षया। विव्यास वेदान् यस्मात्स तस्माद् व्यास इति स्मृतः॥ ८४॥ वेदानध्यापयामास महाभारतपञ्चमान्। सुमन्तुं जैमिनिं पैलं शुकञ्चैव स्वमात्मजम्॥ ८५॥ प्रभुर्वरिष्ठो वरदो वैशम्पायनमेव च। संहिताभिः पृथक्त्वेन भारतस्य प्रकाशिताः

॥ ८६ ॥ तथा भीष्मः शान्तनवो गङ्गायामभितद्युतिः । वसुवीर्य्यात्समभवन्महावीर्य्यो महायशाः ॥ ८७ ॥ वेदार्थविच्च भगवानृषिर्विप्रो महायशाः । प्रजने प्रीतः पुराणर्षिश्चोरश्चोरशङ्कया ॥ ८८ ॥ अणीमाण्डव्य इत्येवं विख्यातः स महायशाः । स धर्ममाह्य पुरा महर्षिरिदमुक्तवान् ॥ ८९ ॥ इषीकया मया बाल्याद्विद्धा स्तेका शकुन्तिका । तत्किल्बिषं स्मरे धर्म नान्यत् पापमहं स्मरे ॥ ९० ॥ तन्मे महत्समभितं कस्मान्नेहाजयत्तपः । गरीयान् ब्राह्मणवधः सर्वभूतवधाद्यतः ॥ ९१ ॥ तस्मात्त्वं किल्बिषी धर्म शूद्रयोनौ जनिष्यसि । तेन शापेन धर्मोऽपि शूद्रयोनावजायत ॥ ९२ ॥ विदान् विदुररूपेण धार्मी तनुरकिल्बिषी । सञ्जयो सुनिकल्पस्तु जज्ञे सूतो गवल्गणात् ॥ ९३ ॥ सूर्य्याच्च कुन्तिकन्यायां यज्ञे कर्णो महाबलः । सहजं कवचं बिभ्रत्कुण्डलोद्योतिताननः ॥ ९४ ॥ अनुग्रहार्थं लोकानां विष्णुर्लोकनमस्कृतः । वसुदेवात्तु देवक्यां प्रादुर्भूतो महायशाः ॥ ९५ ॥ अनादिनिधनो देवः स कर्त्ता जगतः प्रभुः । अव्यक्तमक्षरं ब्रह्म प्रधानं त्रिगुणात्मकम् ॥ ९६ । आत्मानमव्ययञ्चैव प्रकृतिं प्रभवं प्रभुम् । पुरुषं विश्वकर्माणं सत्त्वयोगं ध्रुवाक्षरम् ॥ ९७ ॥ अनन्तमचलं देवं हंसं नारायणं प्रभुम् । धातारमजमव्यक्तं यमाहुः परमव्ययम् ॥ ९८ ॥ कैवल्यं निर्गुणं विश्वमनादिमजमव्ययम् । पुरुषः स विभुः कर्त्ता सर्वभूतप्रितामहः । धर्मसंवर्द्धनार्थाय प्रजज्ञेऽन्धकवृष्णिषु ॥ ९९ ॥ अक्षय्यौ तु महावीर्य्यौ सर्वशास्त्रविशारदौ । सात्यकिः कृतवर्मा च नारायणमनुव्रतौ ॥ १०० ॥ सत्यकाद्वृष्णिकाच्चैव जज्ञातेऽस्त्रविशारदौ । भरद्वाजस्य च स्कन्नं द्रोण्यां शुक्रमवर्द्धत ॥ १०१ ॥ महर्षेर्घृताचीदर्शनात्किल । द्रोणो व्यजायत । गौतमाल्लिशनं जज्ञे शरस्तम्बात्कृपावुभौ ॥ १०२ ॥ अश्वत्थाम्नश्च जननी कृपस्यैव महात्मनः ।

अश्वत्थामा ततो जज्ञे द्रोणादेव महाबलः ॥ १०३ ॥ तथैव धृष्टद्युम्नोऽपि साक्षादग्निसमद्युतिः। वैताने कर्मणि तते पावकात्समजायत ॥ १०४ ॥ वीरो द्रोणविनाशाय धनुरादाय वीर्यवान्। तत्रैव वेद्यां कृष्णापि जज्ञे तेजस्विनी शुभा ॥ १०५ ॥ विभ्राजमाना वपुषा विभ्रती रूपमुत्तमम्। प्रह्लादश्रिष्यो नग्नजित्सुबलश्चाभवत्ततः ॥ १०६ ॥ तस्य प्रजा धर्महन्त्री जज्ञे देवप्रकोपनात्। गन्धारराजपुत्रोऽभूच्छकुनिः सौबलस्तथा ॥१०७॥ दुर्योधनस्य जननी जज्ञातेऽर्थविशारदौ। कृष्णद्वैपायनाज्जज्ञे धृतराष्ट्रो जनेश्वरः। क्षेत्रे विचित्रवीर्यस्य पाण्डुश्चैव महाबलः ॥ १०८ ॥ धर्मार्थकुशलो धीमान्मेधावी धूतकल्मषः। विदुरः शूद्रयोनौ तु जज्ञे द्वैपायनादपि ॥ १०९ ॥ पाण्डोस्तु जज्ञिरे पञ्च पुत्रा देवसमाः दृढम्। हयोः स्त्रियोर्गुणज्येष्ठ्यात्तेषामासीद्युधिष्ठिरः ॥ ११० ॥ धर्माद्युधिष्ठिरो जज्ञे मारुताच्च वृकोदरः। इन्द्राज्जनञ्जयः श्रीमान् सर्वशस्त्रभृतां वरः ॥ १११ ॥ जज्ञाते रूपसम्पन्नावश्विभ्याञ्च यमावपि। नकुलः सहदेवश्च गुरुशुश्रूषणे रतौ ॥ ११२ ॥ तथा पुत्रशतं जज्ञे धृतराष्ट्रस्य धीमतः। दुर्योधनप्रभृतयो युयुत्सुः करणस्तथा ॥ ११३ ॥ ततो दुःशासनश्चैव दुःसहश्चापि भारत। दुर्मर्षणो विकर्णश्च चित्रसेनो विविंशतिः ॥११४॥ जयः सत्यव्रतश्चैव पुरुमित्रश्च भारत। वैश्यापुत्रो युयुत्सुश्च एकादश महारथाः ॥ ११५ ॥ अभिमन्युः सुभद्रायामर्जुनाद्व्यजायत। स्वसीयो वासुदेवस्य पौत्रः पाण्डोर्महात्मनः ॥ ११६ ॥ पाण्डवेभ्यो हि पाञ्चाल्यां द्रौपद्यां पञ्च जज्ञिरे। कुमारा रूपसम्पन्नाः सर्वशास्त्रविशारदाः ॥ ११७ ॥ प्रतिविन्ध्यो युधिष्ठिरात् श्रुतसोमो वृकोदरात्। अर्जुनाच्छुतकीर्त्तिस्तु शतानीकस्तु नाकुलिः ॥ ११८ ॥ तथैव सहदेवाच्च श्रुतसेनः प्रतापवान्। हिडिम्बायाञ्च भीमेन वने जज्ञे घटो-

त्क्रवः ॥ ११९ ॥ शिखण्डी द्रुपदाज्जज्ञे कन्या पुत्रत्वमागता। यां यक्षः पुरुषं चक्रे स्थूणः प्रियचिकीर्षया ॥ १२० ॥ कुरूणां विग्रहे तस्मिन् समागच्छन् बहून्यथ। राज्ञां शतसहस्राणि योत्स्यमानानि संयुगे ॥ १२१ ॥ तेषामपरिमेयानां नामधेयानि सर्वशः। न शक्यन्ति समाख्यातुं वर्षाणामयुतैरपि। एतं तु कीर्तिता मुख्या वैराख्यानमिदं ततम् ॥ १२२ ॥

इत्यादिपर्वण्यादिवंशावतारणे त्रिषष्टोऽध्यायः ॥ ६३ ॥

—०:०—

जनमेजय उवाच। य एते कीर्तिता ब्रह्मन् ये चान्ये नानुकीर्तिताः। सम्यक् तां श्रोतुमिच्छामि राज्ञश्चान्यान् सहस्रशः ॥ १ ॥ यदर्थमिह संभूता देवकल्पा महारथाः। भुवि तन्मे महाभाग सम्यगाख्यातुमर्हति ॥ २ ॥

वैशम्पायन उवाच। रहस्यं खल्विदं राजन्देवानामिति नः श्रुतम्। तत्ते, ते कथयिष्यामि नमस्कृत्वा स्वयम्भुवे ॥ ३ ॥ त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां पुरा। जामदग्न्यस्तपस्तेपे महेन्द्रे पर्वतोत्तमे ॥ ४ ॥ तदा निःक्षत्रिये लोके भार्गवेण कृते सति। ब्राह्मणान् क्षत्रिया राजन् सुतार्थिन्योऽभिचक्रमुः ॥ ५ ॥ ताभिः सह समापेतुर्ब्राह्मणाः संशितव्रताः। ऋतावृतौ नरव्याघ्र न कामान्नानृतौ तथा ॥ ६ ॥ तेभ्यश्च लेभिरे गर्भं क्षत्रियास्ताः सहस्रशः। ततः सुषुविरे राजन् क्षत्रियान् वीर्यवत्तरान् ॥ ७ ॥ कुमारांश्च कुमारीश्च पुनः कवाभिरक्षिभिः। एवं तद्ब्राह्मणैः क्षत्रं क्षत्रियासु तपस्विभिः ॥ ८ ॥ जातं वृद्धञ्च धर्मेण सुदीर्घेणायुषान्वितम्। चत्वारोऽपि ततो वर्णा बभूवुर्ब्राह्मणोत्तराः ॥ ९ ॥ अन्यगच्छन्नृतौ नारीं न कामान्नानृतौ तथा। तथैवान्यानि भूतानि तिर्यग्योनिगतान्यपि ॥ १० ॥

ऋतौ दारांश्च गच्छन्ति तत्तथा भरतर्षभ । ततो वर्द्धन्त धर्मेण सहस्रशतजीविनः ॥ ११ ॥ ताः प्रजाः पृथिवीपाल धर्मव्रतपरायणाः । आधिभिर्व्याधिभिश्चैव विमुक्ताः सर्वशो नराः ॥१२॥ अथेमां सागरापाङ्गीं गाङ्गजेन्द्रगताखिलाम् । अध्यतिष्ठत् पुनः क्षत्रं सशैलवनपत्तनाम् । प्रशासति पुनः क्षत्रे धर्मेणेमां वसुन्धराम् । ब्राह्मणाद्याश्रतो वर्णा लेभिरे सुदसुत्तमाम् ॥ १३ ॥ कामक्रोधोद्भवान्दोषान्निरस्य च नराधिपाः । धर्मेण दण्डं दण्डेषु प्रणयन्तोऽन्वपालयन् ॥ १४ ॥ तथा धर्मपरे क्षत्रे सहस्राक्षः शतक्रतुः । स्वादु देशे च काले च वर्षेणापालयत् प्रजाः ॥ १५ ॥ न बाल एव म्रियते तदा कश्चिज्जनाधिप । न च स्त्रियं प्रजानाति कश्चिदप्राप्तयौवनः ॥ १६ ॥ एवमायुष्मतीभिस्तु प्रजाभिर्भरतर्षभ । इयं सागरपर्यन्ता समापूर्यत मेदिनी ॥ १७ ॥ ईजिरे च महायज्ञैः क्षत्रिया बहुदक्षिणैः । साङ्गोपनिषदान्वेदान् विप्राश्चाधीयते तदा ॥ १८ ॥ न च विक्रीणते ब्रह्म ब्राह्मणाश्च तदा नृप । न च शूद्रसमाभ्यासे वेदानुच्चारयन्त्युत ॥ १९ ॥ कारयन्तः कृषिं गोभिस्तथा वैश्याः क्षितावपि । युञ्जते धुरि नो गाश्च कृशाङ्गांश्चाप्यजीवयन् ॥ २० ॥ फेनपांश्च तथा वत्सान्न दुहन्ति स्म मानवाः । न कूटमानैर्वणिजः परस्वं विक्रीणते तदा ॥ २१ ॥ कर्माणि च नरव्याघ्र धर्मोपेतानि मानवाः । धर्ममेवानुपश्यन्तश्चक्रुर्धर्मपरायणाः ॥ २२ ॥ स्वकर्मनिरताश्चासन् सर्वे वर्णा नराधिप । एवं तदा नरव्याघ्र धर्मो न ह्रसते क्वचित् ॥ २३ ॥ काले गावः प्रसूयन्ते नार्यश्च भरतर्षभ । भवन्त्यृतुषु वृक्षाणां पुष्पाणि च फलानि च ॥ २४ ॥ एवं कृतयुगे सम्यग्वर्त्तमाने तदा नृप । अपूर्यत मही कृत्स्ना प्राणिभिर्बहुभिर्भृशम् ॥ २५ ॥ एवं समुदिते लोके मानुषे भरतर्षभ । असुरा जज्ञिरे क्षत्रे राज्ञान्तु मनुजेश्वर ॥ २६ ॥ आदि-

त्यैर्हि तदा दैत्या बहुशो निर्जिता युधि। ऐश्वर्य्याङ्गिताः स्वर्गात्प्रच्यवभूवुः क्षितावित्ह ॥ २७ ॥ इह देवत्वमिच्छन्तो मानुषेषु मनस्विनः। जज्ञिरे भुवि भूतेषु तेषु तेष्वसुरा विभो ॥ २८ ॥ गोष्वश्वेषु च राजेन्द्र खरोष्ट्रमहिषेषु च। कव्यात्सु चैव भूतेषु गजेषु च खगेषु च ॥ २९ ॥ जातैरिह महीपाल जायमानैश्च तैर्मही। न शशाकात्मनात्मानमियं धारयितुं धरा ॥ ३० ॥ अथ जाता महीपालाः केचिद्बहुमदान्विताः। दितेः पुत्रा दनोश्चैव तदा लोके दृढाच्युताः ॥ ३१ ॥ वीर्य्यबन्तोऽबलिप्तास्ते नानारूपधरा महीम्। इमां सागरपर्य्यन्तां परीयुररिमर्दनाः ॥ ३२ ॥ ब्राह्मणान् क्षत्रियान्वैश्यान् शूद्रांश्चैवाप्यपीडयन्। अन्यानि चैव सत्त्वानि पीड़यामासुरोजसा ॥ ३३ ॥ त्रासयन्तोऽभिनिघ्नन्तः सर्वभूतगणांश्च ते। विचेरुः सर्वशो राजन्महीं शतसहस्रशः ॥ ३४ ॥ आश्रमस्थान्महर्षींश्च धर्षयन्तस्ततस्ततः। अब्रह्मण्या वीर्य्यमदा मत्ता मदबलेन च ॥ ३५ ॥ एवं वीर्य्यबलोत्सिक्तैर्भूरियत्नैर्महासुरैः। पीड्यमाना मही राजन् ब्रह्माणमुपचक्रमे ॥ ३६ ॥ न शक्ता भूतसत्त्वौघाः पन्नगाः सनगां महीम्। तदा धारयितुं सर्वे संक्रान्तां दानवैर्बलात् ॥ ३७ ॥ ततो मही महीपाल भारार्त्ता भयपीड़िता। जगाम शरणं देवं सर्वभूतपितामहम् ॥ ३८ ॥ सा संवृतं महाभागैर्देवद्विजमहर्षिभिः। ददर्श देवं ब्रह्माणं लोककर्त्तारमव्ययम् ॥ ३९ ॥ गन्धर्वैरप्सरोभिश्च देवकर्मसु निष्ठितैः। विद्यमानं सुदोपैतैर्वन्दे चैनमेत्य सा ॥ ४० ॥ अथ विज्ञापयामास भूमिस्तं शरणार्थिनी। सन्निधौ लोकपालानां सर्वेषामेव भारत ॥ ४१ ॥ तत् प्रधानात्मनस्तस्य भूमेः कृत्यं स्वयम्भुवः। पूर्वमेवाभवद्राजन् विदितं परमेष्ठिनः ॥ ४२ ॥ स्रष्टा हि जगतः कस्मान्न संबुध्येत भारत। सप्तरात्रोषितानामग्रेणेव मनोगतम् ॥ ४३ ॥

तामुवाच महाराज भूमिं भूमिपतिः प्रभुः । प्रभवः सर्वभूतानामीशः शम्भुः प्रजापतिः ॥ ४४ ॥

ब्रह्मोवाच । यदर्थमसि संप्राप्ता मत्सकाशं वसुन्धरे । तदर्थं सन्नियोक्ष्यामि सर्वानेव दिवौकसः ॥ ४५ ॥

वैशम्पायन उवाच । इत्युक्त्वा स महीं देवो ब्रह्मा राजन् विसृज्य च । आदिदेश तदा सर्वान् विबुधान् भूतकृत् स्वयम् ॥ ४६ ॥ अस्या भूमेर्निरसितुं भारं भागैः पृथक् पृथक् । अस्यामेव प्रसूयध्वं विरोधायेति चाब्रवीत् ॥ ४७ ॥ तथैव च समानीय गन्धर्वाप्सरसां गणान् । उवाच भगवान् सर्वानिदं वचनमर्थवत् ॥ ४८ ॥

ब्रह्मोवाच । स्वैः स्वैरंशैः प्रसूयध्वं यथेष्टं मानुषेषु च । अथ शक्रादयः सर्वे श्रुत्वा सुरगुरोर्वचः । तथ्यमर्थ्यं च पथ्यं च तस्य ते जगृहुस्तदा ॥ ४९ ॥ अथ ते सर्वशोंऽशैः स्वैर्मन्तुं भूमिं कृतक्षणाः । नारायणममित्रघ्नं वैकुण्ठमुपचक्रमुः ॥ ५० ॥ यः स चक्रगदापाणिः पीतवासाः श्रितिप्रभः । पद्मनाभः सुरारिघ्नः पृथुवक्षाश्चितेक्षणः ॥ ५१ ॥ प्रजापतिपतिर्देवः सुरनाथो महाबलः । श्रीवत्साङ्को हृषीकेशः सर्वदैवतपूजितः ॥ ५२ ॥ तं भुवः शोधनायेन्द्र उवाच पुरुषोत्तमम् । अंशेनावतरेत्येवं तथेत्याह च तं हरिः ॥ ५३ ॥

इत्यादिपर्वण्यादिवंशावतारणपर्वणि चतुःषष्टोऽध्यायः ॥ ६४ ॥

समाप्तश्चेदमादिवंशावतारणपर्व ॥

— ०*० —

अथ सम्भवपर्व ॥ १ ॥

वैशम्पायन उवाच। अथ नारायणेनेन्द्रश्चकार सह संविदम्। अवतर्त्तुं महीं स्वर्गादंशतः सहितः सुरैः ॥ १ ॥ आदिश्य च स्वयं शक्रः सर्वानेव दिवौकसः। निर्जगाम पुनस्तस्मात् त्वया-नारायणस्य च ॥ २ ॥ तेऽमरारिविनाशाय सर्वलोकहिताय च। अवतेरुः क्रमेणैव महीं स्वर्गाद्दिवौकसः ॥ ३ ॥ ततो ब्रह्मर्षिवंशेषु पार्थिवर्षिकुलेषु च। जज्ञिरे राजशार्दूल यथा-कामं दिवौकसः ॥ ४ ॥ दानवान् राक्षसांश्चैव गन्धर्वान् पन्नगां-स्तथा। पुरुषादानि चान्यानि जघ्नुः सत्त्वान्यनेकशः ॥ ५ ॥ दानवा राक्षसाश्चैव गन्धर्वाः पन्नगास्तथा। न तान् बलस्थान् बाल्येऽपि जघ्नुर्भरतसत्तम ॥ ६ ॥

जनमेजय उवाच। देवदानवसंघानां गन्धर्वाप्सरसां तथा। मानवानाञ्च सर्वेषां तथा वै यक्षरक्षसाम् ॥ ७ ॥ श्रोतुमिच्छामि तत्त्वेन सम्भवं कृत्स्नमादितः। प्राधिनाञ्चैव सर्वेषां सम्भवं वक्तु-मर्हसि ॥ ८ ॥

वैशम्पायन उवाच। हन्त ते कथयिष्यामि नमस्कृत्य स्वय-म्भुवे। सुरादीनामहं कृत्स्नं लोकानां प्रभवाप्ययम् ॥ ९ ॥ ब्रह्मणो मानसाः पुत्रा विदिताः षण्महर्षयः। मरीचिरत्र्यङ्गिर-सौ पुलस्त्यः पुलहः क्रतुः ॥ १० ॥ मरीचेः कश्यपः पुत्रः कश्य-पात्तु इमाः प्रजाः। प्रजज्ञिरे महाभागा दक्षकन्याश्चतुर्दश ॥ ११ ॥ अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा। क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः ॥ १२ ॥ कद्रूश्च मनुजव्याघ्र दक्षकन्यैव भारत। एतासां वीर्यसम्पन्नं पुत्रपौत्र-मनन्तकम् ॥ १३ ॥ आदित्या द्वादशादित्याः सम्भूता भुवनेश्वराः। ये वाचक्नवतस्तात्ते कीर्त्तयिष्यामि भारत ॥ १४ ॥ धाता मित्रोऽर्यमा शक्रो वरुणस्त्वंश एव च। भगो विवस्वान् पूषा च

सविता दशमस्तथा ॥ १५ ॥ एकादशस्तथा त्वष्टा द्वादशो विष्णु-रुच्यते । जघन्यजस्तु सर्वेषामादित्यानां गुणाधिकः ॥ १६ ॥ एक एव दितेः पुत्रो हिरण्यकशिपुः स्मृतः । नाम्ना ख्यातास्तस्यैते पञ्च पुत्रा महात्मनः ॥ १७ ॥ प्रह्लादः पूर्वजस्तेषां संह्लादस्तदनन्तरम् । अनुह्लादस्तृतीयोऽभूत्तस्माच्च शिविवाष्कलौ ॥ १८ ॥ प्रह्लादस्य त्रयः पुत्राः ख्याताः सर्वत्र भारत । विरोचनश्च कुम्भश्च निकुम्भश्चेति भारत ॥ १९ ॥ विरोचनस्य पुत्रोऽभूद्बलिरेकः प्रतापवान् । बलेश्च प्रथितः पुत्रो बाणो नाम महासुरः ॥ २० ॥ रुद्रस्यानुचरः श्रीमान्महाकालेति यं विदुः । चत्वारिंशद्बलेः पुत्राः ख्याताः सर्वत्र भारत ॥ २१ ॥ तेषां प्रथमजो राजा विप्रचित्तिर्महाबलः । शरभो नमुचिश्चैव पुलोमा चेति विश्रुतः ॥ २२ ॥ असिलोमा च केशी च दुर्जयश्चैव दानवः । अयःशिरा अश्वशिरा अश्वशङ्कुश्च वीर्यवान् ॥ २३ ॥ तथा गगनमूर्धा च वेगवान् केतुमांश्च सः । स्वर्भानुरश्वोऽश्वपतिर्हयपर्वाजकस्तथा ॥ २४ ॥ अश्वग्रीवश्च सूक्ष्मश्च तुङ्गशङ्कुश्च महाबलः । एकपादेकचक्रश्च विरूपाक्षमहोदरौ ॥ २५ ॥ निचन्द्रश्च निकुम्भश्च कुपटः कपटस्तथा । शरभः शलभश्चैव सूर्याचन्द्रमसौ तथा । एते ख्याता दनोर्वंशे दानवाः परिकीर्तिताः ॥ २६ ॥ अन्यौ तु खलु देवानां सूर्याचन्द्रमसौ स्मृतौ । अन्यौ दानवमुख्यानां सूर्याचन्द्रमसौ तथा ॥ २७ ॥ इमे च वंशाः प्रथिताः सत्त्ववन्तो महाबलाः । दनुपुत्रा महाराज दशदानववंशजाः ॥ २८ ॥ एकाक्षोऽमृतपो वीरः प्रलम्बनरकावपि । वातापी शत्रुतपनः शठश्चैव महासुरः ॥ २९ ॥ गविष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः । असंख्येयाः स्मृतास्तेषां पुत्राः पौत्राश्च भारत ॥ ३० ॥ सिंहिका सुषुवे पुत्रं राजं चन्द्रार्कमर्दनम् । सुचन्द्रं चन्द्रहन्तारं तथा चन्द्रप्रमर्दनम् ॥ ३१ ॥ क्रूरस्वभावं क्रूरायाः

पुत्रपौत्रमनन्तकम् । गणः क्रोधवशो नाम क्रूरकर्मारिमर्दनः ॥ ३२ ॥ दनायुषः पुनः पुत्राश्चत्वारोऽसुरपुङ्गवाः । विप्रचितो बलवीरौ च हयश्चैव महासुरः ॥ ३३ ॥ कालायाः प्रथिताः पुत्राः कालकल्पाः प्रहारिणः । प्रविख्याता महावीर्या दानवेषु परन्तपाः ॥ ३४ ॥ विनाशनश्च क्रोधश्च क्रोधहन्ता तथैव च । क्रोधः प्रतुल्यश्चैवान्ये कालकेया इति श्रुताः ॥ ३५ ॥ असुराणामुपाध्यायः शुक्रश्चर्षिसुतोऽभवत् । ख्याताश्चोशनसः पुत्राश्चत्वारोऽसुरयाजकाः ॥ २६ ॥ त्वष्टा धरस्तथात्रिश्च हावण्यौ रौद्रकर्मिणौ । तेजसा सूर्यसङ्काशा ब्रह्मलोकपरायणाः ॥ ३७ ॥ इत्येष वंशप्रभवः कथितस्ते तरस्विनाम् । असुराणां सुराणाञ्च पुराणे संश्रुतो मया ॥ ३८ ॥ एतेषां यदपत्यन्तु न शक्यं तदशेषतः । प्रसंख्यातुं महीपाल गुणभूतमनन्तकम् ॥ ३९ ॥ तार्क्ष्यश्चारिष्टनेमिश्च तथैव गरुडारुणौ । आरुणिर्वारुणिश्चैव विनतेयाः प्रकीर्त्तिताः ॥ ४० ॥ शेषोऽनन्तो वासुकिश्च तक्षकश्च भुजङ्गमः । कूर्मश्च कुलिकश्चैव कादूवेयाः प्रकीर्त्तिताः ॥ ४१ ॥ भीमसेनोग्रसेनौ च सुपर्णो वरुणस्तथा । गोपतिर्धृतराष्ट्रश्च सूर्यवर्चाश्च सप्तमः ॥४२॥ सत्यवागर्कपर्णश्च प्रयुतश्चापि विश्रुतः । भीमश्चित्ररथश्चैव विख्यातः सर्वविद्गणौ ॥ ४३ ॥ तथा शालिशिरा राजन् पर्जन्यश्च चतुर्दशः । कलिः पञ्चदशस्तेषां नारदश्चैव षोडशः । इत्येते देवगन्धर्वा मौनेयाः परिकीर्त्तिताः ॥४४॥ अथ प्रसूतान्यन्यानि कीर्त्तयिष्यामि भारत । अनवद्यां मनुं वंशासुरां मार्गणप्रियाम् ॥ ४५ ॥ अनूपां सुभगां भासीमिति प्राधा व्यजायत । सिद्धः पूर्णश्च वर्ही च पूर्णायुश्च महायशाः ॥ ४६ ॥ ब्रह्मचारी रतिगुणः सुपर्णश्चैव सत्तमः । विश्रावसुश्च भानुश्च सुचन्द्रो दशमस्तथा ॥ ४७ ॥ इत्येते देवगन्धर्वाः प्राधेयाः परिकीर्त्तिताः । इमं त्वमुरसां वंशं विदितं पुण्यलक्षणम् ॥४८॥

ग्राधास्तूत महाभागा देवी देवर्षितः पुरा । अलम्बुषा मिश्रकेशी विद्युत्पर्णा तिलोत्तमा ॥ ४९ ॥ अरुणा रक्षिता चैव रम्भा तद्वन्मनोरमा । केशिनी च सुबाहुश्च सुरता सुरजा तथा ॥५०॥ सुप्रिया चातिबाहुश्च विख्याती च हाहाहूहूः । तुम्बुरुश्चेति चत्वारः स्मृता गन्धर्वसत्तमाः ॥ ५१ ॥ अमृतं ब्राह्मणा गावो गन्धर्वाप्सरसस्तथा । अपत्यं कपिलायास्तु पुराणे परिकीर्त्तितम् ॥ ५२ ॥ इति ते सर्वभूतानां सम्भवः कथितो मया । यथावत्संपरिख्यातो गन्धर्वाप्सरसां तथा ॥ ५३ ॥ भुजगानां सुपर्णानां रुद्राणां मरुतां तथा । गवाञ्च ब्राह्मणानाञ्च श्रीमतां पुण्यकर्मणाम् ॥ ५४ ॥ आयुष्यश्चैव पुण्यश्च धन्यः श्रुतिसुखावहः । श्रोतव्यश्चैव सततं आख्यश्चैवानसूयता ॥ ५५ ॥ इमन्तु वंशं नियमेन यः पठेन्महात्मनां ब्राह्मणदेवसन्निधौ । अपत्यलाभं लभते स पुष्कलं श्रियं यशः प्रेत्य च शोभनाङ्गतिम् ॥ ५६ ॥

इत्यादिपर्वणि सम्भवपर्वण्यंशावतरणे पञ्चषष्टोऽध्यायः ॥ ६५ ॥

—•—

वैशम्पायन उवाच । ब्रह्मणो मानसाः पुत्रा विदिताः षण्महर्षयः । एकादश सुताः स्थाणोः ख्याताः परमतेजसः ॥१॥ मृगव्याधश्च सर्पश्च निर्ऋतिश्च महायशाः । अजैकपादहिर्बुध्न्यः पिनाकी च परन्तपः ॥ २ ॥ दहनोऽथेश्वरश्चैव कपाली च महाद्युतिः । स्थाणुर्भगश्च भगवान् रुद्रा एकादश स्मृताः ॥ ३ ॥ मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः । षड़ेते ब्रह्मणः पुत्रा वीर्य्यवन्तो महर्षयः ॥ ४ ॥ त्वष्टस्वङ्गिरसः पुत्रा लोके सर्वत्र विश्रुताः । दक्षस्यतिरुतथ्यश्च सप्तर्त्तिश्च शतव्रतः ॥ ५ ॥ अत्रेस्तु बहवः पुत्राः श्रूयन्ते मनुजाधिप । सर्वे वेदविदः सिद्धाः शान्तात्मानो महर्षयः ॥ ६ ॥ राक्षसाश्च पुलस्त्यस्य वानराः किन्नरा-

स्तथा । यत्राद्य मनुजव्याघ्र पुत्रास्तस्य च धीमतः ॥ ७ ॥ पुलहस्य सुता राजञ्छलभाः परिकीर्त्तिताः । सिंहाः किंपुरुषा व्याघ्रा यत्रा देवाश्वगास्तथा ॥ ८ ॥ क्रतोः क्रतुसमाः पुत्राः पतङ्गसहचारिणः । विश्रुताखिषु लोकेषु सत्यव्रतपरायणाः ॥ ९ ॥ दक्षस्त्वजायताङ्गुष्ठाद्दक्षिणाङ्गवान्मुनिः । ब्रह्मणः पृथिवीपाल शान्तात्मा सुमहातपाः ॥ १० ॥ वामादजायताङ्गुष्ठाङ्गार्ष्या तस्य महात्मनः । तस्यां पञ्चायुतं कन्याः स एवाजनयन्मुनिः ॥ ११ ॥ ताः सर्वास्त्वनवद्याङ्ग्यः कन्याः कमललोचनाः । पुत्रिकाः स्थापयामास नष्टपुत्रः प्रजापतिः ॥ १२ ॥ ददौ स दश धर्माय सप्तविंशतिमिन्दवे । दिव्येन विधिना राजन् कश्यपाय त्रयोदश ॥ १३ ॥ नामतो धर्मपत्न्यस्ताः कीर्त्यमाना निबोध मे । कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया तथा ॥ १४ ॥ बुद्धिर्लज्जा मतिश्चैव पत्न्यो धर्मस्य ता दश । द्वाराण्येतानि धर्मस्य विहितानि स्वयम्भुवा ॥ १५ ॥ सप्तविंशतिः सोमस्य पत्न्यो लोकेषु विश्रुताः । कालस्य नयने युक्ताः सोमपत्न्यः शुचिव्रताः ॥ १६ ॥ ता हि नक्षत्रयोगिन्यो लोकयात्राविधानतः । एतासां तु मनुर्देवस्तस्य पुत्रः प्रजापतिः । तस्याष्टौ वसवः पुत्रास्तेषां वक्ष्यामि विस्तरम् ॥ १७ ॥ धरो ध्रुवश्च सोमश्च अहश्चैवानिलोऽनलः । प्रत्यूषश्च प्रभासश्च वसवोऽष्टाविति स्मृताः ॥ १८ ॥ धूम्रायास्तु धरः पुत्रो ब्रह्मविद्यो ध्रुवस्तथा । चन्द्रमास्तु मनस्विन्याः श्वसायाः श्वसनस्तथा ॥ १९ ॥ रतायाश्चाप्यहः पुत्रः शाण्डिल्याश्च हुताशनः । प्रत्यूषश्च प्रभासश्च प्रभातायाः सुतौ स्मृतौ ॥ २० ॥ धरस्य पुत्रो द्रविणो हुतहव्यवहस्तथा । ध्रुवस्य पुत्रो भगवान् कालो लोकप्रकालनः ॥ २१ ॥ सोमस्य तु सुतो वर्च्चा वर्च्चस्वी येन जायते । मनोहरायाः शिशिरः प्राणोऽथ रमणस्तथा ॥ २२ ॥ अहः सुतस्तथा ज्योतिः शमः शान्तस्तथा मुनिः । अग्नेः पुत्रः

कुमारस्तु श्रीमाञ्छरवनालयः ॥ २३ ॥ तस्य शाखो विशाखश्च नैगमेयश्च षष्ठजः । कृत्तिकाभ्युपपत्तेश्च कार्त्तिकेय इति स्मृतः ॥ २४ ॥ अनिलस्य शिवा भार्य्या तस्याः पुत्रो मनोजवः । अविज्ञातगतिश्चैव द्वौ पुत्रावनिलस्य तु ॥ २५ ॥ प्रत्यूषस्य विदुः पुत्रमृषिं नाम्नाय देवलम् । द्वौ पुत्रौ देवलस्यापि क्षमावन्तौ मनीषिणौ । बृहस्पतेस्तु भगिनी वरस्त्री ब्रह्मवादिनी ॥ २६ ॥ योगसक्ता जगत् कृत्स्नमसक्ता विचचार ह । प्रभासस्य तु भार्य्या सा वसूनामष्टमस्य ह ॥ २७ ॥ विश्वकर्मा महाभागो जज्ञे शिल्पप्रजापतिः । कर्त्ता शिल्पसहस्राणां त्रिदशानाञ्च वर्द्धकिः ॥ २८ ॥ भूषणानाञ्च सर्वेषां कर्त्ता शिल्पवतां वरः । यो दिव्यानि विमानानि त्रिदशानां चकार ह ॥ २९ ॥ मनुष्यास्योपजीवन्ति यस्य शिल्पं महात्मनः । पूजयन्ति च यं नित्यं विश्वकर्माणमव्ययम् ॥ ३० ॥ खनन्तु दक्षिणं भित्त्वा ब्रह्मणो नरविग्रहः । निःसृतो भगवान्धर्मः सर्वलोकसुखावहः ॥ ३१ ॥ त्रयस्तस्य वराः पुत्राः सर्वभूतमनोहराः । शमः कामश्च हर्षश्च तेजसा लोकधारिणः ॥ ३२ ॥ कामस्य तु रतिर्भार्य्या शमस्य प्राप्तिरङ्गना । नन्दा तु भार्य्या हर्षस्य यासु लोकाः प्रतिष्ठिताः ॥ ३३ ॥ मरीचेः कश्यपः पुत्रः कश्यपस्य सुरासुराः । जज्ञिरे नृपशार्दूल लोकानां प्रभवस्तु सः ॥ ३४ ॥ त्वाष्ट्री तु सवितुर्भार्य्या वडवारूपधारिणी । असूयत महाभागा सान्तरीक्षेऽश्विनावुभौ ॥ ३५ ॥ द्वादशैवादितेः पुत्राः शक्रमुख्या नराधिप । तेषामवरजो विष्णुर्यत्र लोकाः प्रतिष्ठिताः ॥ ३६ ॥ त्रयस्त्रिंशत इत्येते देवास्तेषामहं तव । अन्वयं सम्प्रवक्ष्यामि पञ्चैव कुलतो गणान् ॥ ३७ ॥ रुद्राणामपरः पक्षः साध्यानां मरुतां तथा । वसूनां भार्गवं विद्यादश्विदेवांस्तथैव च ॥ ३८ ॥ वैनतेयस्तु गरुडो बलवानरुणस्तथा । बृहस्पतिश्च भगवानादित्ये-

व्येव गच्छति ॥ ३९ ॥ अश्विनौ गुह्यकान् विद्धि सर्वौषध्यस्तथा मरुत्। एते देवगणा राजन् कीर्त्तितास्त्वनुपूर्वशः ॥ ४० ॥ यान् कीर्त्तयित्वा मनुजः सर्वपापैः प्रमुच्यते। ब्रह्मणो हृदयं भित्त्वा निःसृतो भगवान् भृगुः ॥ ४१ ॥ भृगोः पुत्रः कविर्विद्वां-ष्शुक्रः कविसुतो ग्रहः। त्रैलोक्यप्राणयात्रार्थं वर्षावर्षे भया-भये ॥ ४२ ॥ स्वयम्भुवा नियुक्तः सन् भुवनं परिधावति। योगा-चार्य्यो महाबुद्धिर्देवानामभवद्गुरुः। सुराणां चापि मेधावी ब्रह्मचारी यतव्रतः ॥ ४३ ॥ तस्मिन्नियुक्ते विधिना योगक्षेमाय भार्गवे। अन्यमुत्पादयामास पुत्रं भृगुरनिन्दितम् ॥ ४४ ॥ च्यवनं दीप्ततपसं धर्मात्मानं यशस्विनम्। यः स्वरोषाच्युतो गर्भान्मातु-र्मोचाय भारत ॥ ४५ ॥ आरुषी तु मनोः कन्या तस्य पत्नी मनीषिणः। और्वस्तस्यां समभवदूरुं भित्त्वा महायशाः ॥ ४६ ॥ महातेजा महावीर्य्यो बाल एव गुणैर्युतः। ऋचीकस्तस्य पुत्रस्तु जमदग्निस्ततोऽभवत् ॥ ४७ ॥ जमदग्नेस्तु चत्वार आसन् पुत्रा महात्मनः। रामस्तेषां जघन्योऽभूदजघन्यैर्गुणैर्युतः ॥ ४८ ॥ सर्व-शस्त्रेषु कुशलः क्षत्रियान्तकरो वशी। और्वस्यासीत् पुत्रशतं जमदग्निपुरोगमम्। तेषां पुत्रसहस्राणि बभूवुर्भुवि विस्तरः ॥ ४९ ॥ द्वौ पुत्रौ ब्रह्मणस्तस्य यशोस्तिष्ठति लक्षणम्। लोके धाता विधाता च यौ स्थितौ मनुना सह ॥ ५० ॥ तयोरेव स्वसा देवी लक्ष्मीः पद्मगृहा शुभा। तस्यास्तु मानसाः पुत्रास्तुरगा व्योमचारिणः ॥ ५१ ॥ वरुणस्य भार्य्या या ज्येष्ठा शुक्राद्देवी व्यजायत। तस्याः पुत्रं बलं विद्धि सुराश्च सुरनन्दिनीम् ॥ ५२ ॥ प्रजानामन्नकामाजामन्योन्यपरिभक्षणात्। अधर्मस्तत्र सञ्जातः सर्वभूतविनाशकः ॥ ५३ ॥ तस्यापि निर्ऋतिर्भार्य्या नैर्ऋता येन राक्षसाः। घोरास्तस्यात्मजाः पुत्राः पापकर्मरताः सदा ॥ ५४ ॥ भयो महाभयश्चैव मृत्युर्मृत्युभयान्तकस्तथा। न तस्य भार्य्या

पुत्रो वा यदिदस्यन्तको हि सः ॥ ५५ ॥ काकीं श्येनीं तथा भासीं धृतराष्ट्रीं तथा शुकीम् । ताम्रा तु सुषुवे देवी पञ्चैता लोकविश्रुताः ॥ ५६ ॥ उलूकान् सुषुवे काकी श्येनी श्येनान् व्यजायत । भासी भासानजनयद्गृध्रांश्चैव जनाधिप ॥ ५७ ॥ धृतराष्ट्री तु हंसांश्च कलहंसांश्च सर्वशः । चक्रवाकांश्च भद्रा तु जनयामास वै तु ॥ ५८ ॥ शुकी च जनयामास शुकानेव यशस्विनी । कल्याणगुणसम्पन्ना सर्वलक्षणपूजिता ॥ ५९ ॥ नव क्रोधवशा नारीः प्रजज्ञे क्रोधसम्भवाः । मृगी च मृगमन्दा च हरी भद्रमना अपि ॥ ६० ॥ मातङ्गी चथ शार्दूली श्वेता सुरभिरेव च । सर्वलक्षणसम्पन्ना सुरसा चैव भामिनी ॥ ६१ ॥ अपत्यं तु मृगाः सर्वे मृग्या नरवरोत्तम । ऋक्षाश्च मृगमन्दायाः स्मराश्च परन्तप ॥ ६२ ॥ ततश्चैरावतं नागं जज्ञे भद्रमनाः सुतम् । ऐरावतः सुतस्तस्या देवनागो महागजः ॥ ६३ ॥ हर्य्याश्च हर्य्योऽपत्यं वानराश्च तरस्विनः । गोलाङ्गूलांश्च भद्रान्ते हर्य्याः पुत्रान् प्रचक्षते ॥ ६४ ॥ प्रजज्ञे चथ शार्दूली सिंहान् व्याघ्रानशेषतः । द्वीपिनश्च महासत्त्वान् सर्वानेव न संशयः ॥ ६५ ॥ मातङ्ग्यपि च मातङ्गानपत्यानि नराधिप । दिशां गजांस्तु श्वेताख्यं श्वेताजनयदाशुगान् ॥ ६६ ॥ तथा दुहितरौ राजन् सुरभिर्वै व्यजायत । रोहिणीं चैव भद्रा तु गन्धर्वीं तु यशस्विनीं ॥ ६७ ॥ विमलामपि भद्रान्ते अनलामपि भारत । रोहिण्यां जज्ञिरे गावो गन्धर्व्यां वाजिनः सुताः । सप्तपिण्डफलान् वृक्षाननलापि व्यजायत ॥ ६८ ॥ अनलायाः शुकी पुत्री कद्रूस्तु सुरसासुतः । अरुणस्य भार्य्या श्येनी तु वीर्य्यवन्तौ महाबलौ ॥ ६९ ॥ सम्पातिं जनयामास वीर्य्यवन्तं जटायुषम् । सुरसाजनयन्नागान् कद्रूः पुत्रांस्तु पन्नगान् ॥ ७० ॥ दौ पुत्रौ विनतायास्तु विख्यातौ गरुडारुणौ । दृष्ट्वेमं सर्वभूतानां महान्तं

मनुजाधिप । प्रभवः कीर्त्तितः सम्यङ्मया मतिमतां वर ॥७१॥ यं श्रुत्वा पुरुषः सम्यङ्मुक्तो भवति पाप्मनः । सर्वज्ञतां च लभते गतिमग्र्यां च विन्दति ॥ ७२ ॥

इत्यादिपर्वणि सम्भवपर्वण्यंशावतरणे षट्षष्टोऽध्यायः ॥ ६६ ॥

—०:०—

जनमेजय उवाच । देवानां दानवानां च गन्धर्वोरगरक्षसाम् । सिंहव्याघ्रद्विजानां च पन्नगानां पतत्रिणाम् ॥१॥ सर्वेषामेव भूतानां सम्भवं भगवन्बहुम् । श्रोतुमिच्छामि तत्त्वेन मानुषेषु महात्मनाम् । जन्म कर्म च भूतानामेतेषामनुपूर्वशः ॥ २ ॥

वैशम्पायन उवाच । मानुषेषु मनुष्येन्द्र संभूता ये दिवौकसः । प्रथमं दानवांश्चैव तांस्ते वक्ष्यामि सर्वशः ॥ ३ ॥ विप्रचित्तिरितिख्यातो य आसीद्दानवर्षभः । जरासन्ध इति ख्यातः स आसीन्मनुजर्षभः ॥ ४ ॥ दितेः पुत्रेषु यो राजन् हिरण्यकशिपुः स्मृतः । स जज्ञे मानुषे लोके शिशुपालो नरर्षभ ॥५॥ संह्लाद इति विख्यातः प्रह्लादस्यानुजश्च यः । स शल्य इति विख्यातो जज्ञे वाह्लीकपुङ्गवः ॥ ६ ॥ अनुह्लादस्तु तेजस्वी योऽभूत् ख्यातो जगन्मयः । धृष्टकेतुरिति ख्यातः स बभूव नरेश्वरः ॥ ७ ॥ यस्तु राजञ्छिबिर्नाम दैत्यः परिकीर्त्तितः । द्रुम इत्यभिविख्यातः स आसीद्भुवि पार्थिवः ॥ ८ ॥ वाष्कलो नाम यस्त्वासीद्दानवस्तस्य । भगदत्त इति ख्यातः स जज्ञे पुरुषर्षभ ॥ ९ ॥ अयःशिरा अश्वशिरा अयःशङ्कुश्च वीर्यवान् । तथा गगनमूर्धा च वेगवांश्च पतङ्गमः ॥ १० ॥ पञ्चैते जज्ञिरे राजन् वीर्यवन्तो महासुराः । वैकर्तेषु महात्मानः पार्थिवर्षभसत्तमाः ॥११॥ केतुमानिति विख्यातो यस्तयोऽन्यः प्रतापवान् । अमितौजा इति ख्यातः सोऽयमर्जुन नराधिप ॥१२॥ ऋभुरिति

विख्यातः श्रीमान्यस्तु महासुरः । उग्रसेन इति ख्यात उग्रकर्मा नराधिपः ॥ १३ ॥ यस्त्वश्व इति विख्यातः श्रीमानासीन्महासुरः । अशोको नाम राजाभून्महावीर्योऽपराजितः ॥ १४ ॥ तस्मादबरजो यस्तु राजन्नश्वपतिः स्मृतः । दैतेयः सोऽभवद्राजा हार्दिक्यो मनुजर्षभः ॥१५॥ वृषपर्वेति विख्यातः श्रीमान्यस्तु महासुरः । दीर्घप्रज्ञ इति ख्यातः पृथिव्यां सोऽभवन्नृपः ॥ १६ ॥ अजकस्त्ववरो राजन्य आसीद्वृषपर्वणः । स शाल्व इति विख्यातः पृथिव्यामभवन्नृपः । अश्वग्रीव इति ख्यातः सत्त्ववान्यो महासुरः ॥ १७ ॥ रोचमान इति ख्यातः पृथिव्यां सोऽभवन्नृपः । सूक्ष्मस्तु मतिमान् राजन् कीर्त्तिमान् यः प्रकीर्त्तितः ॥ १८ ॥ वृहद्रथ इति ख्यातः क्षितावासीत्स पार्थिवः । तुङ्गण्ड इति विख्यातो य आसीदसुरोत्तमः ॥ १९ ॥ सेनाविन्दुरिति ख्यातः स बभूव नराधिपः । इषुपो नाम यस्तेषामसुराणां बलाधिकः ॥ २० ॥ नग्नजिन्नाम राजासीद्भुवि विख्यातविक्रमः । एकचक्र इति ख्यात आसीद्यस्तु महासुरः ॥ २१ ॥ प्रतिविन्ध्य इति ख्यातो बभूव प्रथितः क्षितौ । विरूपाक्षस्तु दैतेयश्चित्रयोधी महासुरः ॥ २२ ॥ चित्रधर्मेति विख्यातः क्षितावासीत्स पार्थिवः । हरस्त्वरिहरो वीर आसीद्यो दानवोत्तमः ॥ २३ ॥ सुबाहुरिति विख्यातः श्रीमानासीत्स पार्थिवः । सुहरस्तु महातेजाः शत्रुपक्षक्षयङ्करः ॥ २४ ॥ वाह्लीको नाम राजा स बभूव प्रथितः क्षितौ । निचन्द्रश्चन्द्रवक्त्रस्तु य आसीदसुरोत्तमः ॥ २५ ॥ सुवक्त्रेति ख्यातः श्रीमानासीत्स पार्थिवः । निकुम्भस्त्वजितः संख्ये महामतिरजायत ॥ २६ ॥ भूमौ भूमिपतिश्रेष्ठो देवाधिप इति स्मृतः । शरभो नाम यस्तेषां दैतेयानां महासुरः ॥ २७ ॥ पौरवो नाम राजर्षिः स बभूव नरोत्तमः । कुपथस्तु महावीर्यः श्रीमान् राजन्महासुरः ॥२८॥

सुपार्श्व इति विख्यातः क्षितौ जज्ञे महीपतिः । कथस्तु राजन् राजर्षिः क्षितौ जज्ञे महासुरः ॥ २८ ॥ पार्वतेय इति ख्यातः काञ्चनाचलसन्निभः । द्वितीयः शलभस्तेषामसुराणां बभूव ह ॥ ३० ॥ प्रह्लादो नाम वाह्लीकः स बभूव नराधिपः । चन्द्रस्तु दितिजश्रेष्ठो लोके ताराधिपोपमः ॥ ३१ ॥ चन्द्रवर्मेति विख्यातः काम्बोजानां नराधिपः । अर्क इत्यभिविख्यातो यस्तु दानवपुङ्गवः ॥ ३२ ॥ ऋषिको नाम राजर्षिर्बभूव नृपसत्तमः । सुतपा इति विख्यातो य आसीदसुरोत्तमः ॥ ३३ ॥ पञ्चिमानूपकं विद्धि तं नृपं नृपसत्तम । गरिष्ठस्तु महार्तेजा यः प्रख्यातो महासुरः ॥ ३४ ॥ द्रुमसेन इति ख्यातः पृथिव्यां सोऽभवन्नृपः । मयूर इति विख्यातः श्रीमान्यस्तु महासुरः ॥ ३५ ॥ स विश्व इति विख्यातो बभूव पृथिवीपतिः । सुपर्ण इति विख्यातस्तस्मादवरजस्तु यः ॥ ३६ ॥ कालकीर्त्तिरिति ख्यातः पृथिव्यां सोऽभवन्नृपः । चन्द्रहन्तेति यस्तेषां कीर्त्तितः प्रवरोऽसुरः ॥ ३७ ॥ मुनको नाम राजर्षिः स बभूव नराधिपः । विनाशनस्तु चन्द्रस्य य आख्यातो महासुरः ॥ ३८ ॥ जानकिर्नाम विख्यातः सोऽभवन्मनुजाधिपः । दीर्घजिह्वस्तु कौरव्य य उक्तो दानवर्षभः ॥ ३९ ॥ काशिराजः स विख्यातः पृथिव्यां पृथिवीपते । अहन् सुपर्वे यस्तु सिंहिकार्केन्दुमर्दनम् । स क्राथ इति विख्यातो बभूव मनुजाधिपः ॥ ४० ॥ अनायुषस्तु पुत्राणां चतुर्णां प्रवरोऽसुरः । विचरो नाम तेजस्वी वसुमित्रो नृपः स्मृतः ॥ ४१ ॥ तितीर्षा विचराद्यस्तु नराधिप महासुरः । पाञ्चालराड्नराधिप इति विख्यातः सोऽभवन्नृप ॥ ४२ ॥ बलीन इति विख्यातो यस्त्वासीदसुरोत्तमः । पौण्ड्रमत्स्यक इत्येवं बभूव स नराधिप ॥ ४३ ॥ हल इत्यभिविख्यातो यस्तु राजन्महासुरः । मणिमान्नाम राजर्षिः स बभूव नराधिपः ॥ ४४ ॥ क्रोधहन्तेति यस्यासीद्बभूवारोः

ऽसुरः। दण्ड इत्यभिविख्यात; स आसीन्नृपति; क्षितौ ॥ ४५ ॥ क्रोधवर्द्धन इत्येव यस्यान्य; परिकीर्त्तित:। दण्डधार इति ख्यात; सोऽभवन्मनुजर्षभ, ॥ ४६ ॥ कालेयानान्तु ये पुत्रास्तेषामष्टौ नराधिपा;। जज्ञिरे राजशार्दूल शार्दूलसमविक्रमा; ॥ ४७ ॥ मृगघेषु जयत्सेनस्तेषामासीत्स पार्थिव;। अष्टानामवरस्तेषां कालेयानां महासुर; ॥ ४८ ॥ द्वितीयस्तु, ततस्तेषां श्रीमान् हरिहयोपम;। अपराजित इत्येवं स बभूव नराधिप; ॥ ४९ ॥ तृतीयस्तु महातेजा महामायो महासुर;। निषादाधिपति-र्जज्ञे भुवि भीमपराक्रम:।। ५० ॥ तेषामन्यतमो यस्तु चतुर्थ: परिकीर्त्तित:। अणिमानिति विख्यात; क्षितौ राजर्षिसत्तम: ॥ ५१ ॥ पञ्चमस्त्वभवत्तेषां प्रवरो यो महासुर;। महौजा इति विख्यातो बभूवेह परन्तप; ॥ ५२ ॥ षष्ठस्तु मतिमान्यो वै तेषामासीन्महासुर;। अभीरुरिति विख्यात: क्षितौ राजर्षि-सत्तम; ॥ ५३ ॥ समुद्रसेनस्तु, नृपस्तेषामेवाभवद्गणात्। विश्रुत: सागरान्तायां क्षितौ धर्मार्थतत्त्ववित् ॥ ५४ ॥ इहन्नामाष्टम-स्तेषां कालेयानां नराधिप। बभूव राजा धर्मात्मा सर्वभूतहिते रत; ॥ ५५ ॥ कुक्षिस्तु राजन् विख्यातो दानवानां महाबल:। पार्वतीय इति ख्यात: काञ्चनाचलसन्निभ; ॥ ५६ ॥ क्रथनश्च महावीर्य: श्रीमान्राजन्महासुर;। सूर्य्याश्च इति विख्यात; क्षितौ जज्ञे महीपति; ॥ ५७ ॥ असुराणान्तु य; सूर्य्य: श्रीमां-श्चैव महासुर;। दरदो नाम वाह्लीको वर; सर्वमहीक्षिताम् ॥ ५८ ॥ गण; क्रोधवशो नाम यस्ते राजन् प्रकीर्त्तित;। तत; सञ्जज्ञिरे वीरा; क्षितावि नराधिपा: ॥ ५९ ॥ मद्रक: कर्णवेष्टश्च सिद्धार्थ; कीटकस्तथा। सुवीरश्च सुबाहुश्च महावीरोऽथ वाह्लिक: ॥ ६० ॥ क्रथो विचित्र; सुरथ; श्रीमान्नीलश्च भूमिप;। चीरवासाश्च कौरव्य भूमिपालश्च नामत; ॥ ६१ ॥ दन्तवक्रश्च

नामासीद्जयश्चैव दानवः। रुक्मी च नृपशार्दूलो राजा च जनमेजय॥ ६२॥ आषाढो वायुवेगश्च भूरितेजास्तथैव च। एकलव्यः सुमित्रश्च वाटधानोऽथ गोमुखः॥ ६३॥ कारूषकाश्च राजानः क्षेमधूर्त्तिस्तथैव च। श्रुतायुरुद्धवश्चैव बृहत्सेनस्तथैव च॥ ६४॥ क्षेमोग्रतीर्थः कुहरः कलिङ्गेषु नराधिपः। मतिमांश्च मनुष्येन्द्र ईश्वरश्चेति विश्रुतः॥ ६५॥ गणात् क्रोधवशादेष राजपूगोऽभवत् क्षितौ। जातः पुरा महाभागो महाकीर्त्तिर्महाबलः॥ ६६॥ कालनेमिरिति ख्यातो दानवानां महाबलः। स कंस इति विख्यात उग्रसेनसुतो बली॥ ६७॥ यश्चासीद्देवको नाम देवराजसमद्युतिः। स गन्धर्वपतिर्मुख्यः क्षितौ जज्ञे नराधिपः॥ ६८॥ बृहस्पतेर्बृहत्कीर्त्तेर्देवर्षेर्विद्धि भारत। अंशाद्भागं समुत्पन्नं भारद्वाजमयोनिजम्॥६९॥ धन्विनां नृपशार्दूल यः सर्वास्त्रविदुत्तमः। महाकीर्त्तिर्महातेजाः स जज्ञे मनुजेश्वरः॥ ७०॥ धनुर्वेदे च वेदे च यं तं विद्विदो विदुः। वरिष्ठं चित्रकर्माणं द्रौणं स्वकुलवर्द्धनम्॥७१॥ महादेवान्तकाभ्याञ्च कामात् क्रोधाच्च भारत। एकत्वमुपपन्नानां जज्ञे शूरः परन्तपः॥ ७२॥ अश्वत्थामा महावीर्यः शत्रुपक्षक्षयावहः। वीरः कमलपत्राक्षः क्षितावासीन्नराधिप॥७३॥ जज्ञिरे वसवस्त्वष्टौ गङ्गायां शान्तनोः सुताः। वसिष्ठस्य च शापेन नियोगाद्वासवस्य च॥ ७४॥ तेषामवरजो भीष्मः कुरूणामभयङ्करः। मतिमान्वेदविद्वाग्मी शत्रुपक्षक्षयङ्करः॥७५॥ जामदग्न्येन रामेण सर्वास्त्रविदुषां वरः। योऽयुध्यत महातेजा भार्गवेण महात्मना। यस्तु राजन् क्रतौ नाम ब्रह्मर्षिरभवत् क्षितौ। रुद्राणान्तु गणाद्विद्धि संभूतमतिपौरुषम्॥ ७६॥ शकुनिर्नाम यश्चासीद्राजा लोके महारथः। द्वापरं विद्धि तं राजन् संभूतमरिमर्दनम्॥ ७७॥ सात्यकिः सत्यसन्धश्च योऽसौ

वृष्णिकुलोद्वहः। पञ्चात्मा जज्ञे मरुतां देवानामरिमर्दनः॥७८॥
द्रुपदश्चैव राजर्षिरेत एवाभवन्नृषाः। मानुषे नृप लोकेऽस्मिन् सर्वशस्त्रभृतांवरः॥७९॥ ततश्च क्षत्रवर्माणं विद्धि राजन् जनाधिपम्। तमप्रतिमकर्माणं क्षत्रियर्षभसत्तमम्॥८०॥ मरुतान्तु गणाद्विद्धि सञ्जातमरिमर्दनम्। विराटं नाम राजानं परराष्ट्रप्रतापनम्॥८१॥ अरिष्टायास्तु यः पुत्रो हंस इत्यभिविश्रुतः। स गन्धर्वपतिर्जज्ञे कुरुवंशविवर्द्धनः॥८२॥ धृतराष्ट्र इति ख्यातः कृष्णद्वैपायनात्मजः। दीर्घबाहुर्महातेजाः प्रज्ञाचक्षुर्न्नराधिपः॥८३॥ मातुर्दोषाद्दृषेः कोपादन्ध एव व्यजायत। तस्यैवावरजो भ्राता महासत्त्वो महाबलः। स पाण्डुरिति विख्यातः सत्यधर्मरतः शुचिः॥८४॥ अत्रेस्तु सुमहाभागं पुत्रं पुत्रवतांवरम्। विदुरं विद्धि तं लोके जातं बुद्धिमतांवरम्॥८५॥ कलेरंशस्तु सञ्जज्ञे भुवि दुर्योधनो नृपः। दुर्बुद्धिर्दुर्मतिश्चैव कुरूणामयशस्करः॥८६॥ जगतो यस्तु सर्वस्य विद्विष्टः कलिपूरुषः। यः सर्वां घातयामास पृथिवीं पृथिवीपते॥८७॥ उद्दीपितं येन वैरं भूतान्तकरणं महत्। पौलस्त्या भ्रातरश्चास्य जज्ञिरे मनुजेष्विह॥८८॥ शतं दुःशासनादीनां सर्वेषां क्रूरकर्मणाम्। दुर्मुखो दुःसहश्चैव ये चान्ये नानुकीर्त्तिताः॥८९॥ दुर्योधनसहायास्ते पौलस्त्या भरतर्षभ। वैश्यापुत्रो युयुत्सुश्च धार्त्तराष्ट्रः शताधिकः॥९०॥

जनमेजय उवाच। ज्येष्ठानुज्येष्ठतामेषां नामधेयानि वा विभो। धृतराष्ट्रस्य पुत्राणामानुपूर्व्येण कीर्त्तय॥९१॥

वैशम्पायन उवाच। दुर्योधनो युयुत्सुश्च राजन्दुःशासनस्तथा। दुःसहो दुःशलश्चैव दुर्मुखश्च तथा परः॥९२॥ विविंशतिर्विकर्णश्च जलसन्धः सुलोचनः। विन्दानुविन्दौ दुर्द्धर्षः सुबाहुर्दुष्प्रधर्षणः॥९३॥ दुर्मर्षणो दुर्मुखश्च दुष्कर्णः कर्ण एव च।

चित्रोपचित्रौ चित्राक्षश्चारुचित्राङ्गदश्च ह ॥ ६४ ॥ दुर्मदो दुष्प्रधर्षश्च विविंशतिरविकटः समः। ऊर्णनाभः पद्मनाभस्तथा नन्दोपनन्दकौ ॥ ६५ ॥ सेनापतिः सुषेणश्च कुण्डोदरमहोदरौ। चित्रबाहुश्चित्रवर्मा सुवर्मा दुर्विरोचनः ॥ ६६ ॥ अयोबाहुर्महाबाहुश्चित्रचाप्यनुकुण्डलौ। भीमवेगो भीमबलो बलाकी भीमविक्रमः ॥ ६७ ॥ उग्रायुधो भीमशरः कनकायुर्दृढायुधः। दृढवर्मा दृढक्षत्रः सोमकीर्त्तिरनूदरः ॥ ६८ ॥ जरासन्धो दृढसन्धः सत्यसन्धः सहस्रवाक्। उग्रश्रवा उग्रसेनः क्षेममूर्त्तिस्तथैव च ॥ ६९ ॥ अपराजितः पण्डितको विशालाक्षो दुराधरः। दृढहस्तः सुहस्तश्च वातवेगसुवर्चसौ ॥ १०० ॥ आदित्यकेतुर्बह्वाशी नागदत्तानुयायिनौ। निषङ्गी कवची दण्डी दण्डधारो धनुर्ग्रहः। उग्रो भीमरथो वीरो वीरबाहुरलोलुपः ॥ १०१ ॥ अभयो रौद्रकर्मा च तथा दृढरथश्च यः। अनाधृष्यः कुण्डभेदी विराची दीर्घलोचनः ॥ १०२ ॥ दीर्घबाहुर्महाबाहुर्व्यूढोरुः कनकाङ्गदः। कुण्डजश्चित्रकश्चैव दुःशला च यताधिका ॥ १०३ ॥ वैश्यापुत्रो युयुत्सुश्च धार्त्तराष्ट्रः शतादिकः। एतदेकशतं राजन् कन्या चैका प्रकीर्त्तिता ॥ १०४ ॥ नामधेयानुपूर्व्या च ज्येष्ठानुज्येष्ठतां विदुः। सर्वे त्वतिरथाः शूराः सर्वे युद्धविशारदाः ॥ १०५ ॥ सर्वे वेदविदश्चैव राजशास्त्रे च पारगाः सर्वे संग्रामविद्यासु विद्याभिजनशोभिनः ॥ १०६ ॥ सर्वेषामनुरूपाश्च कृता दारा महीपते। दुःशलां समये राजन् सिन्धुराजाय कौरवः ॥ १०७ ॥ जयद्रथाय प्रददौ सौबलानुमते तदा। धर्मस्यांशन्तु राजानं विद्धि राजन्युधिष्ठिरम् ॥ १०८ ॥ भीमसेनन्तु वातस्य देवराजस्य चार्जुनम्। अश्विनोस्तु तथैवांशौ रूपेणाप्रतिमौ भुवि ॥ १०९ ॥ नकुलः सहदेवश्च सर्वभूतमनोहर। यस्तु वर्च्चा इतिख्यातः सोमपुत्रः प्रतापवान् ॥ ११० ॥

सोऽभिमन्युर्दृढक्रोधो ह्यर्जुनस्य सुतोऽभवत्। यस्यावतरणे राजन् सुरान् सोमोऽब्रवीदिदम् ॥ १११ ॥ नाहं दद्यामियं पुत्रं मम प्राणैर्गरीयसम्। समयः क्रियतामेष न शक्यमतिवर्तितुम् ॥११२॥ सुरकार्यं हि नः कार्यमसुराणां क्षितौ वधः। तत्र यास्यत्ययं वत्सो न च स्थास्यति वै चिरम् ॥ ११३ ॥ ऐन्द्रिर्बलस्तु भविता यस्य नारायणः सखा। सोऽर्जुनेत्यभिविख्यातो पाण्डोः पुत्रः प्रतापवान् ॥ ११४ ॥ तस्यायं भविता पुत्रो बालो भुवि महारथः। ततः षोड़श वर्षाणि स्थास्यत्यमरसत्तमाः ॥ ११५ ॥ अस्य षोड़शवर्षस्य स संग्रामो भविष्यति। यत्रांशा वः करिष्यन्ति कर्म वीरनिषूदनम् ॥ ११६ ॥ नरनारायणाभ्यां तु स संग्रामो विना कृतः। चक्रव्यूहं समास्थाय बोधयिष्यन्ति वः सुराः ॥११७॥ विमुखाञ्छात्रवान् सर्वान् कारयिष्यति मे सुतः। बालः प्रविश्य च व्यूहमभेद्यं विचरिष्यति ॥ ११८ ॥ महारथानां वीराणां कदनञ्च करिष्यति। सर्वेषामेव शत्रूणां चतुर्थांशं नयिष्यति ॥ ११९ ॥ दिनार्द्धेन महाबाहुः प्रेतराजपुरं प्रति। ततो महारथैर्वीरैः समेत्य वज्रभृतो रणे ॥ १२० ॥ दिनक्षये महाबाहुर्मया भूयः समेष्यति। एकं वंशकरं पुत्रं वीरं वै जनयिष्यति ॥ १२१ ॥ प्रनष्टं भारतं वंशं स भूयो धारयिष्यति। एतत् सोमवचः श्रुत्वा तथास्विति दिवौकसः ॥ १२२ ॥ प्रत्यूचुः सहिताः सर्वे ताराधिपमपूजयन्। एवं ते कथितं राजंस्तव जन्म पितुः पितुः ॥१२३॥ अग्नेर्भागन्तु विद्धि त्वं दृष्टद्युम्नं महारथम्। शिखण्डिनमथो राजंस्तथैवं विद्धि राक्षसम् ॥ १२४ ॥ द्रौपदेयाश्च ये पञ्च बभूवुर्भरतर्षभ। विश्वान्देवगणान् विद्धि सञ्ज्ञातान् भरतर्षभ ॥ १२५ ॥ प्रतिविन्ध्यः सुतसोमः श्रुतकीर्त्तिस्तथापरः। नाकुलिस्तु शतानीकः श्रुतसेनश्च वीर्यवान् ॥ १२६ ॥ शूरो नाम यदुश्रेष्ठो वसुदेवपिताभवत्। तस्य

कन्या पृथा नाम रूपेणासदृशी भुवि ॥ १२७ ॥ पितुः स्वकीय-पुत्राय सोऽनपत्याय वीर्य्यवान् । अग्रमग्रे प्रतिज्ञाय स्वस्यापत्यस्य वै तदा ॥ १२८ ॥ अग्रजातेति तां कन्यां शूरोऽनुग्रहकाङ्क्षया । अदद्वन्धुत्वभोजाय स तां दुहितरं तदा ॥ १२९ ॥ सा नियुक्ता पितुर्गेहे ब्राह्मणातिथिपूजने । उग्रमप्यृषिं चरहोरं ब्राह्मणं शंसित-व्रतम् ॥ १३० ॥ निगूढनिश्चयं धर्मे यन्तं दुर्वाससं विदुः । तमुग्रं शंसितात्मानं सर्वयत्नैरतोषयत् ॥ १३१ ॥ तुष्टोऽभिचार-संयुक्तामाचचक्षे ययाविधि । उवाच चैनां भगवान् प्रीतोऽस्मि सुभगे तव ॥ १३२ ॥ यं यं देवं त्वमेतेन मन्त्रेणावाहयिष्यसि । तस्य तस्य प्रसादात्त्वं देवि पुत्रान् जनिष्यसि ॥ १३३ ॥ एवमुक्ता च सा बाला तदा कौतूहलान्विता । कन्या सती देवमर्कं माजु-हाव यशस्विनी ॥ १३४ ॥ प्रकाशकर्त्ता भगवांस्तस्यां गर्भं दधौ तदा । अजीजनत्सुतं चास्यां सर्वशस्त्रभृतां वरम् ॥ १३५ ॥ सकुण्डलं सकवचं देवगर्भश्रियान्वितम् । दिवाकरसमं दीप्त्या चारुसर्वाङ्गभूषितम् ॥ १३६ ॥ निगूहमाना जातं वै बन्धुपक्ष-भयात्तदा । उत्ससर्ज्ज जले कुन्ती तद्कुमारं यशस्विनम् ॥ १३७ ॥ तमुत्सृष्टं जले गर्भं राधाभर्त्ता महायशाः । राधायाः कल्पया-मास पुत्रं सोऽधिरथस्तदा ॥ १३८ ॥ चक्रतुर्न्नामधेयञ्च तस्य बालस्य तावुभौ । दम्पती वसुषेणेति दिक्षु सर्वासु विश्रुतम् ॥ १३९ ॥ स वर्द्धमानो बलवान् सर्वास्त्रेषूत्तमोऽभवत् । वेदा-ङ्गानि च सर्वाणि जजाप जयतां वरः ॥ १४० ॥ यस्मिन् काले जपन्नास्ते धीमान् सत्यपराक्रमः । नादेयं ब्राह्मणेष्वासीत्तस्मिन् काले महात्मनः ॥ १४१ ॥ तमिन्द्रो ब्राह्मणो भूत्वा पुत्रार्थं भूत-भावनः । ययाचे कुण्डले वीरं कवचञ्च सहाङ्गजम् ॥ १४२ ॥ उत्कृत्य कर्णौ स्वयदत्कवचं कुण्डले तथा । शक्तिं शक्रो ददौ तस्मै विस्मितस्येदमब्रवीत् ॥ १४३ ॥ देवासुरमनुष्याणां गन्धर्वो-

रगरक्षसाम् । यस्मिन् क्षेत्रासि दुर्द्धर्ष स एको न भविष्यति ॥ १४३ ॥ पुरा नाम च तस्यासीद्वसुधेति क्षितौ । ततो वैकर्त्तनः कर्णः कर्मणा तेन सोऽभवत् ॥ १४४ ॥ आमुक्तकवचो वीरो यस्तु जज्ञे महायशाः । स कर्ण इति विख्यातः पृथायाः प्रथमः सुतः ॥ १४५ ॥ स तु सूतकुले वीरो ववृधे राजसत्तम । कर्णं नरवरश्रेष्ठं सर्वशस्त्रभृतां वरम् ॥ १४६ ॥ दुर्य्योधनस्य सचिवं मित्रं शत्रुविनाशनम् । दिवाकरस्य तं विद्धि राजन्नंशमनुत्तमम् ॥ १४७ ॥ यस्तु नारायणो नाम देवदेवः सनातनः । तस्यांशो मानुषेष्वासीद्वासुदेवः प्रतापवान् ॥ १४८ ॥ शेषस्यांशश्च नागस्य बलदेवो महाबलः । सनत्कुमारं प्रद्युम्नं विद्धि राजन्महौजसम् ॥ १४९ ॥ एवमन्ये मनुष्येन्द्रा बहवोंऽशा दिवौकसाम् । जज्ञिरे वसुदेवस्य कुले कुलविवर्द्धनाः ॥ १५० ॥ गणस्य शतसां यो वै मया राजन् प्रकीर्त्तितः । तस्य भागः क्षितौ जज्ञे नियोगाद्वासवस्य च ॥ १५१ ॥ तानि षोड्श देवीनां सहस्राणि नराधिप । बभूवुर्मानुषे लोके वासुदेवपरिग्रहाः ॥ १५२ ॥ श्रियस्तु भागः सञ्जज्ञे रत्यर्थं पृथिवीतले । भीष्मकस्य कुले साध्वी रुक्मिणी नाम नामतः ॥ १५३ ॥ द्रौपदी त्वथ सञ्जज्ञे शचीभागादनिन्दिता । द्रुपदस्य कुले कन्या वेदिमध्यादनिन्दिता ॥ १५४ ॥ नातिह्रस्वा न महती नीलोत्पलसुगन्धिनी । पद्मायताक्षी सुश्रोणी स्वसिताच्छितमूर्द्धजा ॥ १५५ ॥ सर्वलक्षणसम्पूर्णा वैदूर्य्यमणिसन्निभा । पञ्चानां पुरुषेन्द्राणां चित्तप्रमथनी रहः ॥ १५६ ॥ सिद्धिर्धृतिश्च ये देव्यौ पञ्चानामातरौ तु ते । कुन्ती माद्री च जज्ञाते मतिस्तु सुबलात्मजा ॥ १५७ ॥ इति देवासुराणां ते गन्धर्वाप्सरसां तथा । अंशावतरणं राजन्राक्षसानाञ्च कीर्त्तितम् ॥ १५८ ॥ ये पृथिव्यां समुद्भूता राजानो युद्धदुर्मदाः । महात्मानो यदूनाञ्च ये जाता विपुले कुले

॥ १५६ ॥ ब्राह्मणाः क्षत्रिया वैश्या मया ते परिकीर्त्तिताः । धन्यं यशस्यं पुत्रीयमायुष्यं विजयावहम् । इदमंशावतरणं श्रोतव्यमनसूयता ॥ १६० ॥ अंशावतरणं श्रुत्वा देवगन्धर्वरक्षसाम् । प्रभवाप्ययवित्प्राज्ञो न कृच्छ्रेष्ववसीदति ॥ १६१ ॥

इत्यादिपर्वणि सम्भवपर्वण्यंशावतरणं समाप्तं सप्तषष्टोऽध्यायः ॥ ६७ ॥

—०*०—

जनमेजय उवाच । त्वत्तः श्रुतमिदं ब्रह्मन्देवदानवरक्षसाम् । अंशावतरणं सम्यग्गन्धर्वाप्सरसां तथा ॥ १ ॥ इदं तु भूय इच्छामि कुरूणां वंशमादितः । कथ्यमानं त्वया विप्र विप्रर्षिगणसन्निधौ ॥ २ ॥

वैशम्पायन उवाच । पौरवाणां वंशकरो दुष्मन्तो नाम वीर्य्यवान् । पृथिव्याश्चतुरन्ताया गोप्ता भरतसत्तम ॥ ३ ॥ चतुर्भागं भुवः कृत्स्नं यो भुङ्क्ते मनुजेश्वरः । समुद्रावरणांश्चापि देशान् स समितिञ्जयः ॥ ४ ॥ आम्लेच्छावधिकान् सर्वान् स भुङ्क्ते रिपुमर्दनः । रत्नाकरसमुद्रान्तांश्चातुर्वर्ण्यजनावृतान् ॥ ५ ॥ न वर्णसङ्करकरो न कृष्याकरकृज्जनः । न पापकृत्कश्चिदासीत्तस्मिन्राजनि शासति ॥ ६ ॥ धर्मे रतिं सेवमाना धर्मार्थावभिपेदिरे । तदा नरा नरव्याघ्र तस्मिन् जनपदेश्वरे ॥ ७ ॥ नासीच्चौरभयं तात न क्षुधाभयमण्वपि । नासीद्व्याधिभयं चापि तस्मिन् जनपदेश्वरे ॥ ८ ॥ स्वधर्मे रेमिरे वर्णा दैवे कर्मणि निस्पृहाः । तमाश्रित्य महीपालमासंश्चैवाकुतोभयाः ॥ ९ ॥ कालवर्षी च पर्जन्यः शस्यानि रसवन्ति च । सर्वरत्नसमृद्धा च मही पशुमती तथा ॥ १० ॥ स्वकर्मनिरता विप्रा नानृतन्तेषु विद्यते । स चाङ्गतमहावीर्यो वज्रसंहननो युवा ॥ ११ ॥ उदयन्मन्दरं दोर्भ्यां वहेत्प्लवनकानम् । चतुष्पथगदायुद्धे सर्व-

प्रहरणेषु च ॥ १२ ॥ नागपृष्ठेऽश्वपृष्ठे च बभूव परिनिष्ठितः । बले विष्णुसमश्चासीत्तेजसा भास्करोपमः ॥ १३ ॥ अक्षोभ्यत्वे-ऽर्णवसमः सहिष्णुत्वे धरासमः । सम्मतः स महीपालः प्रसन्न-पुरराष्ट्रवान् । भूयो धर्मपरैर्भावैर्मुदितं जनमादिशत् ॥ १४ ॥

इत्यादिपर्वणि सम्भवपर्वणि शकुन्तलोपाख्याने अष्टषष्टोऽध्यायः ॥६८॥

जनमेजय उवाच । सम्भवं भरतस्याहं चरितञ्च महामतेः । शकुन्तलायाश्चोत्पत्तिं श्रोतुमिच्छामि तत्त्वतः ॥ १ ॥ दुष्मन्तेन च वीरेण यथा प्राप्ता शकुन्तला । तं वै पुरुषसिंहस्य भगवन् विस्तरं वदम् । श्रोतुमिच्छामि तत्त्वज्ञ सर्वं मतिमतांवर ॥ २ ॥

वैशम्पायन उवाच । स कदाचिन्महाबाहुः प्रभूतबलवाहनः । वनं जगाम महनं हयनागशतैर्वृतः ॥ ३ ॥ बलेन चतुरङ्गेण वृतः परमवल्गुना । खड्गशक्तिधरैर्वीरैर्गदासुपलपाणिभिः ॥४॥ प्रासतोमरहस्तैश्च ययौ योधशतैर्वृतः । सिंहनादैश्च योधानां शङ्खदुन्दुभिनिःस्वनैः ॥ ५ ॥ रथनेमिस्वनैश्चैव सनागवरहृंहितैः । नानायुधधरैश्चापि नानावेशधरैस्तथा ॥ ६ ॥ हेषितस्वनमिश्रैश्च क्ष्वेडितास्फोटितस्वनैः । आसीत्किलकिलाशब्दस्तस्मिन् गच्छति पार्थिवे ॥ ७ ॥ प्रासादवरशृङ्गस्थाः परया नृपशोभया । दद्दृशुस्तं स्त्रियस्तत्र शूरमात्मयशस्करम् ॥ ८ ॥ शक्रोपममभिप्रेक्ष्य परवारणवारणम् । पश्यन्तः स्त्रीगणास्तत्र वज्रपाणिं स्म मेनिरे ॥ ९ ॥ अयं स पुरुषव्याघ्रो रणे वसुपराक्रमः । यस्य बाहु-बलं प्राप्य न भवन्त्यसुहृद्गणाः ॥ १० ॥ इति वाचो ब्रुवन्त्यस्ताः स्त्रियः प्रेम्णा नराधिपम् । तुष्टुवुः पुष्पवृष्टीश्च सस्रजुस्तस्य मूर्द्धनि ॥ ११ ॥ तत्र तत्र च विप्रेन्द्रैः स्तूयमानः समन्ततः । निर्ययौ परमप्रीत्या वनं मृगजिघांसया ॥ १२ ॥ तं देवराज-

प्रतिमं मत्तवारणधूर्गतम् । द्विजक्षत्रियविट्शूद्रा निर्य्यान्तमनुजग्मिरे ॥ १३ ॥ दृष्ट्वा दुर्व्वर्यानास्ते आशीर्भिश्च जयेन च । सुदूरमनुजग्मुस्तं पौरजानपदास्तथा ॥ १४ ॥ न्यवर्त्तन्त ततः पश्चादनुज्ञाता नृपेण ह । सुपर्णप्रतिमेनाथ रथेन वसुधाधिपः ॥ १५ ॥ महीमापूरयामास घोषेण त्रिदिवं तथा । स गच्छन् ददृशे धीमान् नन्दनप्रतिमं वनम् ॥ १६ ॥ बिल्वार्कखदिराकीर्णं कपित्थधवसङ्कुलम् । विषमं पर्वतस्थैरश्मभिश्च समावृतम् ॥१७॥ निर्ज्जलं निर्मनुष्यञ्च बहुयोजनमायतम् । श्वगर्सिंहैर्वृतं घोरैरन्यैश्चापि वनेचरैः ॥ १८ ॥ तद्वनं मनुजव्याघ्रः सभृत्यबलवाहनः । लोड़यामास दुष्यन्तः क्षुदयन् विविधान्मृगान् ॥१९॥ बाणगोचरसम्प्राप्तांस्तत्र व्याघ्रगणान् बहून् । पातयामास दुष्यन्तो निर्विभेद च सायकैः ॥ २० ॥ दूरस्थान् सायकैः कांश्चिदभिनत्स नराधिपः । अभ्यासमागतांश्चान्यान् खड्गेन निरकृन्तत ॥२१॥ कांश्चिदेणान् समाजघ्ने शक्त्या शक्तिमतांवरः । गदामण्डलतत्त्वज्ञश्चचारामितविक्रमः ॥ २२ ॥ तोमरैरसिभिश्चापि गदामुषलकम्पनैः । चचार स विनिघ्नन्वै वन्यांस्तत्र मृगद्विजान् ॥२३॥ राज्ञाचाद्भुतवीर्य्येण योधैश्च समरप्रियैः । लोड्यमानं महारण्यं तत्यजुः स्म श्वगाधिपाः ॥ २४ ॥ तत्र विद्रुतयूथानि हतयूथपतीनि च । श्वगयूथान्यथोत्सृष्टाच्छब्दञ्चक्रुस्ततस्ततः ॥ २५ ॥ शुष्काण्यपि नदीर्गत्वा जलनैराश्यकर्षिताः । व्यायामक्लान्तहृदयाः पतन्ति स्म विचेतसः ॥ २६ ॥ क्षुत्पिपासापरीताश्च श्रान्ताश्च पतिता भुवि । केचित्तत्र नरा व्याघ्रैरभक्ष्यन्त बुभुक्षितैः ॥ २७ ॥ केचिदग्निमथोत्पाद्य संसाध्य च वनेचराः । भक्षयन्ति स्म मांसानि प्रकृत्य विधिवत्तदा ॥ २८ ॥ तत्र केचिद्गजा मत्ता बलिनः शस्त्रविक्षताः । सङ्कोच्यायकरान् भीताः प्रद्रवन्ति स्म वेगिताः ॥ २९ ॥ शब्दन्तूर्त्तं स्रजन्तश्च चरन्तः शोणितं

बहु । वन्या गजवराश्चत्र मत्तदुर्मनुजान् बह्वन् ॥ ३० ॥ तद्वनं बलमेघेन शरधारेण संवृतम् । व्यरोचत खगाकीर्णं राज्ञा हतखगाधिपम् ॥ ३१ ॥

इत्यादिपर्वणि सम्भवपर्वणि शकुन्तलोपाख्याने एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

—०—

वैशम्पायन उवाच । ततो मृगसहस्राणि हत्वा सबलवाहनः । राजा मृगप्रसङ्गेन वनमन्यद्विवेश ह ॥ १ ॥ एक एवोत्तमबलः क्षुत्पिपासाश्रमान्वितः । स वनस्यान्तमासाद्य महच्छून्यं समासदत् ॥ २ ॥ तच्चाप्यतीत्य नृपतिरुत्तमाश्रमसंयुतम् । मनःप्रह्लादजननं दृष्टिकान्तमतीव च ॥ ३ ॥ शीतमारुतसंयुक्तं जगामान्यन्महद्वनम् । पुष्पितैः पादपैः कीर्णमतीव सुखशाद्वलम् ॥ ४ ॥ विपुलं मधुरारावैर्नादितं विहगैस्तथा । पुंस्कोकिलनिनादैश्च झिल्लीकगणनादितम् ॥ ५ ॥ प्रवृद्धविटपैर्वृक्षैः सुखच्छायैः समावृतम् । षट्पदाघूर्णिततलं लक्ष्म्या परमया युतम् ॥ ६ ॥ नापुष्पः पादपः कश्चिन्नाफलो नापि कण्टकी । षट्पदैर्नाप्यपाकीर्णस्तस्मिन्वै काननेऽभवत् ॥ ७ ॥ विहगैर्नादितं पुष्पैरलङ्कृतमतीव च । सर्वर्तुकुसुमैर्वृक्षैः सुखच्छायैः समावृतम् ॥ ८ ॥ मनोरमं महेष्वासो विवेश वनमुत्तमम् । मारुताकलिताश्चत्र द्रुमाः कुसुमशालिनः ॥ ९ ॥ पुष्पवृष्टिं विचित्रान्तु व्यसृजंस्ते पुनः पुनः । दिवस्पृशोऽथ संघुष्टाः पक्षिकिर्मधुरस्वनैः ॥ १० ॥ विरेजुः पादपास्तत्र विचित्रकुसुमाम्बराः । तेषां तत्र प्रवालेषु पुष्पभारावनामिषु ॥ ११ ॥ रुवन्ति रावान्मधुरान् षट्पदा मधुलिप्सवः । तत्र प्रदेशांश्च बह्वन् कुसुमोत्करमण्डितान् ॥ १२ ॥ लताग्रहपरिक्षिप्तान्मनसः प्रीतिवर्द्धनान् । सम्प-

श्यन् सुमहातेजा बभूव मुदितस्तदा ॥ १३ ॥ परस्परश्लिष्टशाखैः पादपैः कुसुमान्वितैः । अशोभत वनं तत्तु महेन्द्रध्वजसन्निभैः ॥ १४ ॥ सिद्धचारणसङ्घैश्च गन्धर्वाप्सरसाङ्गणैः । सेवितं वनमत्यर्थं मत्तवानरकिन्नरम् ॥ १५ ॥ सुखः शीतः सुगन्धी च पुष्पदेशुवहोऽनिलः । परिक्रामन्वने वृक्षानुपैतीव रिरंसया ॥ १६ ॥ एवं गुणसमायुक्तं ददर्श स वनं नृपः । नदीकच्छोद्भवं काम्यमुच्छ्रितध्वजसन्निभम् ॥ १७ ॥ प्रेक्षमाणो वनं तत्तु सुप्रहृष्टविहङ्गमम् । आश्रमप्रवरं रम्यं ददर्श च मनोरमम् ॥ १८ ॥ नानावृक्षसमाकीर्णं सम्प्रज्वलितपावकम् । तं तदाप्रतिमं श्रीमानाश्रमं प्रत्यपूजयत् ॥ १९ ॥ यतिभिर्वालिखिल्यैश्च हुतं मुनिगणान्वितम् । अग्न्यागारैश्च बहुभिः पुष्पसंस्तरसंवृतम् ॥ २० ॥ महाकच्छैर्वृतं रम्यैश्च विभ्राजितमतीव च । मालिनीमभितो राजन्नदीं पुण्यां सुखोदकाम् ॥ २१ ॥ नैकपक्षिगणाकीर्णां तपोधनमनोरमाम् । तत्र व्यालमृगान् सौम्यान् पश्यन् प्रीतिमवाप सः ॥ २२ ॥ तं चाप्रतिरथः श्रीमानाश्रमं प्रत्यपद्यत । देवलोकप्रतीकाशं सर्वतः सुमनोहरम् ॥ २३ ॥ नदीस्वाश्रमसंश्लिष्टां पुण्यतोयां ददर्श सः । सर्वप्राणभृतां तत्र जननीमिव धिष्ठिताम् ॥ २४ ॥ सचक्रवाकपुलिनां पुष्पफेनप्रवाहिनीम् । सकिन्नरगणावासां वानरर्क्षनिषेविताम् ॥ २५ ॥ पुण्यस्वाध्यायसंघुष्टां पुलिनैरुपशोभिताम् । मत्तवारणसार्दूलभुजगेन्द्रनिषेविताम् ॥ २६ ॥ तस्यास्तीरे भगवतः काश्यपस्य महात्मनः । आश्रमप्रवरं रम्यं महर्षिगणसेवितम् ॥ २७ ॥ नदीमाश्रमसम्बद्धां दृष्ट्वाश्रमपदं तथा । चकाराभिप्रवेशाय मतिं स नृपतिस्तदा ॥ २८ ॥ अलङ्कृतं द्वीपवत्या मालिन्या रम्यतीरया । नरनारायणस्थानं गङ्गयेवोपशोभितम् ॥ २९ ॥ मत्तबर्हिणसंघुष्टं प्रविवेश महद्वनम् । तत्र चैत्ररथप्रख्यं समुपेत्य नरर्षभः ॥ ३० ॥

अतीवगुणसम्पन्नमनिर्देश्यञ्च वर्चसा। महर्षिं काश्यपं द्रष्टु-
मथ कण्वं तपोधनम् ॥ ३१ ॥ ध्वजिनीमश्वसञ्चाधां पदातिगज-
सङ्कुलाम्। अवस्थाप्य वनद्वारि सेनामिदमुवाच सः ॥ ३२ ॥
मुनिं विरजसं द्रष्टुं गमिष्यामि तपोधनम्। काश्यपं स्थीयता-
मत्र यावदागमनं मम ॥ ३३ ॥ तद्वनं नन्दनप्रख्यमासाद्य मनुज-
श्वरः। चुत्पिपासे जहौ राजा मुदं चावाप पुष्कलाम् ॥ ३४ ॥
सामात्यो राजलिङ्गानि सोऽपनीय नराधिपः। पुरोहितसहा-
यश्च जगामाश्रममुत्तमम् ॥ ३५ ॥ दिदृक्षुस्तत्र तं ऋषिं तपो-
राशिमथाव्ययम्। ब्रह्मलोकप्रतीकाशमाश्रमं सोऽभिवीक्ष्य ह
॥ ३६ ॥ षट्पदोद्गीतसंघुष्टं नानाद्विजगणायुतम्। ऋचो
वह्वृचमुख्यैश्च प्रेर्यमाणाः पदक्रमैः। शुश्राव मनुजव्याघ्रो
विततेष्विह कर्मसु ॥ ३७ ॥ यज्ञविद्याङ्गविद्भिश्च यजुर्विद्भिश्च
शोभितम्। मधुरैः सामगीतैश्च ऋषिभिर्नियतव्रतैः ॥ ३८ ॥
भारुण्डसामगीताभिरथर्वशिरसोद्गतैः। यताग्निभिः सुनियतैः
शुशुभे स तदाश्रमः ॥ ३९ ॥ अथर्ववेदप्रवराः पूगयज्ञीयसामगाः।
संहितामीरयन्ति स्म पदक्रमयुतां तु ते ॥ ४० ॥ शब्दसंस्कार-
संयुक्तैर्वह्निश्चापरैर्द्विजैः। नादितः स बभौ श्रीमान् ब्रह्मलोक
इवापरः ॥ ४१ ॥ यज्ञसंस्तरविद्भिश्च क्रमशिक्षाविशारदैः।
न्यायतत्त्वात्मविज्ञानसंपन्नैर्वेदपारगैः ॥ ४२ ॥ नानावाक्यसमा-
हारसमवायविशारदैः। विशेषकार्थविद्भिश्च मोक्षधर्मपरायणैः
॥ ४३ ॥ स्थापनाक्षेपसिद्धान्तपरमार्थज्ञतांगतैः। शब्दच्छन्दो-
निरुक्तज्ञैः कालज्ञानविशारदैः ॥ ४४ ॥ द्रव्यकर्मगुणज्ञैश्च
कार्यकारणवेदिभिः। पक्षिवानररुतज्ञैश्च व्यासग्रन्थसमाश्रितैः
॥ ४५ ॥ नानाशास्त्रेषु मुख्यैश्च शुश्राव स्वनमीरितम्। लोका-
यतिकमुख्यैश्च समन्तादनुनादितम् ॥ ४६ ॥ तत्र तत्र च विप्रेन्द्रा-
न्नियतान् संशितव्रतान्। जपहोमपरान् विप्रान् ददर्श पर-

वीरहा ॥ ४७ ॥ आसनानि विचित्राणि रुचिराणि महीपतिः। प्रयत्नोपहितानि स्म दृष्ट्वा विस्मयमागतः ॥ ४८ ॥ देवतायतनानाञ्च प्रेक्ष्य पूजा कृता द्विजैः। ब्रह्मलोकस्थमात्मानं मेने स नृपसत्तमः ॥ ४९ ॥ स काश्यपतपोगुप्तमाश्रमप्रवरं शुभम्। नाध्यगच्छत् प्रेक्षमाणो वै तपोबलगुणैर्वृतम् ॥ ५० ॥ स काश्यपस्यायतनं महाव्रतैर्वृतं समन्ताद्दृषिभिस्तपोधनैः। विवेश सामात्यपुरोहितोऽरिहा विविक्तमत्यर्थमनोहरं शुभम् ॥ ५१ ॥

इत्यादिपर्वणि सम्भवपर्वणि शकुन्तलोपाख्याने सप्ततितमोऽध्यायः ॥ ७० ॥

—•—

वैशम्पायन उवाच। ततो गच्छन्महाबाहुरेकोऽमात्यान् विसृज्य तान्। नापश्यच्चाश्रमे तस्मिंस्तर्षिं संशितव्रतम् ॥१॥ सोऽपश्यमानस्तर्षिं शून्यं दृष्ट्वा तथाश्रमम्। उवाच क्व गतो हेत्युक्त्वैवं सन्नादयन्निव ॥ २ ॥ श्रुत्वाथ तस्य तं शब्दं कन्या श्रीरिव रूपिणी। निश्चक्रामाश्रमात्तस्मात्तापसीवेषधारिणी ॥३॥ सा तन्दृष्ट्वैव राजानं दुष्यन्तमसितेक्षणा। स्वागतन्त इति क्षिप्रमुवाच प्रतिपूज्य च ॥ ४ ॥ आसनेनार्घ्यमादाय च पाद्येनार्घ्येण चैव हि। पप्रच्छानामयं राजन् कुशलञ्च नराधिपम् ॥ ५ ॥ यथावदर्चयित्वाथ दृष्ट्वा चानामयं तदा। उवाच स्वयमानैव किङ्कार्य्यं क्रियतामिति ॥ ६ ॥ तामब्रवीत्ततो राजा कन्यां मधुरभाषिणीम्। दृष्ट्वा चैवानघद्वाङ्गीं यथावत् प्रतिपूजितः ॥ ७ ॥ आगतोऽहं महाभागश्रमं द्रष्टुमृषेरिह। क्व गतो भगवान् भद्रे तन्ममाचक्ष्व शोभने ॥ ८ ॥

शकुन्तलोवाच। गतः पिता मे भगवान् फलान्याहर्त्तुमाश्रमात्। मुहूर्त्तं सम्प्रतीक्षस्व द्रष्टास्येनमुपागतम् ॥ ९ ॥

वैशम्पायन उवाच । अपश्यमानस्तमृषिं तथाचोक्तस्तया च सः । तां दृष्ट्वा च वरारोहां श्रीमतीं चारुहासिनीम् ॥ १० ॥ विभ्राजमानां वपुषा तपसा च दमेन च । रूपयौवनसम्पन्नामित्युवाच महीपतिः ॥ ११ ॥ का त्वं कस्यासि सुश्रोणि किमर्थं चागता वनम् । एवंरूपगुणोपेता कुतस्त्वमसि शोभने ॥ १२ ॥ दर्शनादेव हि शुभे त्वया मेऽपहृतं मनः । इच्छामि त्वामहं ज्ञातुं तन्ममाचक्ष्व शोभने ॥ १३ ॥ एवमुक्ता तु सा कन्या तेन राज्ञा तमाश्रमे । उवाच हसती वाक्यमिदं सुमधुराक्षरम् ॥१४॥ कण्वस्याहं भगवतो दुष्यन्त दुहिता मता । तपस्विनो धृतिमतो धर्मज्ञस्य महात्मनः ॥ १५ ॥

दुष्यन्त उवाच । ऊर्ध्वरेता महाभागो भगवान् लोकपूजितः । चलेद्धि हत्त्वाद्धर्मोऽपि न चलेच्छंसितव्रतः ॥ १६ ॥ कथं त्वं तस्य दुहिता सम्मता वरवर्णिनी । संशयो मे महानत्र तन्मे छेत्तुमिहार्हसि ॥ १७ ॥

शकुन्तलोवाच । यथायमागमो मह्यं यथाचेदमभूत्पुरा । शृणु राजन्यथातत्त्वं यथास्मि दुहिता मुनेः ॥ १८ ॥ ऋषिः कश्चिदिहागम्य मम जन्माभ्यचोदयत् । तस्मै प्रोवाच भगवान्यथा तच्छृणु पार्थिव ॥ १९ ॥

कण्व उवाच । तप्यमानः किल पुरा विश्वामित्रो महत्तपः । सुभृशं तापयामास शक्रं सुरगणेश्वरम् ॥ २० ॥ तपसा दीप्तवीर्योऽयं स्थानान्मां च्यावयेदिति । भीतः पुरन्दरस्तस्मान्मेनकामिदमब्रवीत् ॥ २१ ॥ गुणैरप्सरसां दिव्यैर्मेनके त्वं विशिष्यसे । श्रेयो मे कुरु कल्याणि यत्त्वां वक्ष्यामि तच्छृणु ॥ २२ ॥ असौ वादित्यसङ्काशो विश्वामित्रो महातपाः । तप्यमानस्तपो घोरं मम कम्पयते मनः ॥ २३ ॥ मेनके तव भारोऽयं विश्वामित्रः सुमध्यमे । शंसितात्मा सुदुर्धर्ष उग्रे तपसि वर्त्तते ॥ २४ ॥

स मां न च्यावयेत् स्थानात्तं वै गत्वा प्रलोभय। चर तस्य तपोविघ्नं कुरु मेऽविघ्नमुत्तमम् ॥ २५ ॥ रूपयौवनमाधुर्य्यचेष्टितस्मितभाषितैः। लोभयित्वा वरारोहे तपस्तस्य निवर्त्तय ॥२६॥

मेनकोवाच। महातेजाः स भगवांस्तथैव च महातपाः। कोपनश्च तथा ह्येनं जानाति भगवानपि ॥ २७ ॥ तेजसस्तपसश्चैव कोपस्य च महात्मनः। त्वमप्युद्विजसे यस्य नोद्विजेयमहं कथम् ॥ २८ ॥ महाभागं वशिष्ठं यः पुत्रैरिष्ट्वा व्ययोजयत्। क्षत्रजातश्च यः पूर्वमभवद्ब्राह्मणो बलात् ॥ २९ ॥ शौचार्थं यो नदीं चक्रे दुर्गमां बहुभिर्जलैः। यां तां पुण्यतमां लोके कौशिकीति विदुर्जनाः ॥ ३० ॥ बभार यत्रास्य पुरा काले दुर्गे महात्मनः। दाराञ्शतङ्को धर्मात्मा राजर्षिर्व्याधतां गतः ॥ ३१ ॥ अतीतकाले दुर्भिक्षे अध्येत्य पुनराश्रमम्। मुनेः पारेति नद्या वै नाम चक्रे तदा प्रभुः ॥ ३२ ॥ मतङ्गं याजयाञ्चक्रे यत्र प्रीतमनाः स्वयम्। त्वञ्च सोमं भयाद्यस्य गतः पातुं सुरेश्वर ॥३३॥ चकारान्यञ्च लोकं व क्रुद्धो नक्षत्रसम्पदा। प्रतिश्रवणपूर्वाणि नक्षत्राणि चकार यः। गुरुशापहतस्यापि त्रिशङ्कोः शरणं ददौ ॥ ३४ ॥ एतानि यस्य कर्माणि तस्माद्दहं भयमुद्विजे। तथासौ न दहेत् क्रुद्धस्तथाशापय मां विभो ॥ ३५ ॥ तेजसा निर्दहेल्लोकान् कम्पयेद्धरणीं यदा। संक्षिपेच्च महामेरुं द्वर्णमावर्त्तयेद्दिगः ॥ ३६ ॥ तादृशं तपसा युक्तं प्रदीप्तमिव पावकम्। कथमस्मद्विधा नारी जितेन्द्रियमभिस्पृशेत् ॥ ३७ ॥ ऋताशनमुखं दीप्तं सूर्य्यचन्द्रार्चितारकम्। कालजिह्वं सुरश्रेष्ठ कथमस्मद्विधा स्पृशेत् ॥ ३८ ॥ यमस्य सोमस्य सहपेयस्य साध्या विश्वे वालखिल्याश्च सर्वे। एतेऽपि यस्योद्विजन्ते प्रभावात्तस्मात्कस्मान्नाहमेनं उद्विजेत ॥ ३९ ॥ त्वयैवमुक्ता च कथं समीपस्थेन गच्छेयमहं सुरेन्द्र। रक्षान्तु मे चित्तग देवराज यथा त्वदर्थं

रक्षिताहं चरेयम् ॥ ४० ॥ कामन्तु मे मारुतस्तत्र वास: प्रक्रीड़िताया विवृणोतु देव । भवेच्च मे मन्मथस्तत्र कार्य्ये सहायभूतस्तु तव प्रसादात् ॥ ४१ ॥ वनाच्च वायु: सुरभि: प्रवायात्तस्मिन् काले तस्यर्षिं लोभयन्त्या: । तथेत्युक्ता विहिते चैव तस्मिंस्ततो ययौ साश्रमं कौशिकस्य ॥ ४२ ॥

इत्यादिपर्वणि सम्भवपर्वणि शकुन्तलोपाख्याने एकसप्ततोऽध्याय: ॥ ७१ ॥

—•:•—

कण्व उवाच । एवमुक्तस्तया शक्र: सन्दिदेश सदागतिम् । प्रातिष्ठत तदा काले मेनका वायुना सह ॥ १ ॥ अथापश्यद्धरारोहा तपसा दग्धकिल्बिषम् । विश्वामित्रं तप्यमानं मेनका भीरराश्रमे ॥ २ ॥ अभिवाद्य ततः सा तं प्राक्रीड़दृषिसन्निधौ । अपोवाह च वासोऽस्या मारुतः शशिसन्निभम् ॥ ३ ॥ सागच्छत्त्वरिता भूमिं वासस्तदभिलिप्सती । स्मयमानेव सव्रीड़ं मारुतं वरवर्णिनी ॥ ४ ॥ पश्यतस्तस्य तत्तर्षेरप्यग्निसमतेजस: । विश्वामित्रस्ततस्तां तु विषमस्थामनिन्दिताम् ॥ ५ ॥ दृष्ट्वा वाससि संभ्रान्तां मेनकां मुनिसत्तम: । अनिर्देश्यवयोरूपामपश्यद्विवृतां तदा ॥ ६ ॥ तस्या रूपगुणान् दृष्ट्वा स तु विप्रर्षभस्तदा । चकार भावं संसर्गात्तया कामवशं गत: ॥ ७ ॥ न्यमन्त्रयत चाप्येनां सा चाप्यैच्छदनिन्दिता । तौ तत्र सुचिरं कालमुभौ व्यहरतां तदा ॥ ८ ॥ रममाणौ यथाकामं यथैकदिवसं तथा । जनयामास स मुनिर्मेनकायां शकुन्तलाम् ॥ ९ ॥ प्रस्थे हिमवतो रम्ये मालिनीमभितो नदीम् । जातमुत्सृज्य तं गर्भं मेनका मालिनीमनु ॥ १० ॥ कृतकार्य्या ततस्तूर्णमगच्छच्छक्रसंसदम् । तं वने विजने गर्भं सिंहव्याघ्रसमाकुले ॥ ११ ॥ दृष्ट्वा शयानं शकुना:

समन्तात्पर्य्यवारयन्। नेमां हिंस्युर्वने बालां क्रव्यादा मांसगृद्धिनः॥ १२॥ पर्य्यरक्षन्त तां तत्र शकुन्ता मेनकात्मजाम्। उपस्पृष्टं गतश्चाश्रमपदं शयितामिमाम्॥ १३॥ निर्जने विपिने रम्ये शकुन्तैः परिवारिताम्। आनयित्वा ततश्चैनां दुहितृत्वे न्यवेशयम्॥ १४॥ शरीरकृत्प्राणदाता यस्य चान्नानि भुञ्जते। क्रमेणैते त्रयोऽप्युक्ताः पितरो धर्मशासने॥ १५॥ निर्जने तु वने यस्मात् शकुन्तैः परिवारिता। शकुन्तलेति नामास्याः कृतं चापि ततो मया॥ १६॥ एवं दुहितरं विद्धि मम विप्र शकुन्तलाम्। शकुन्तला च पितरं मन्यते मामनिन्दिता॥ १७॥

शकुन्तलोवाच। एतदाचष्ट पृष्टः सन्मम जन्म महर्षये। सुताङ्कस्थस्य मामेवं विद्धि त्वं मनुजाधिप॥ १८॥ कस्त्वं हि पितरं मन्ये पितरं स्वमजानती। इति ते कथितं राजन्यथा वृत्तं श्रुतं मया॥ १९॥

इत्यादिपर्वणि सम्भवपर्वणि शकुन्तलोपाख्याने द्विसप्ततोऽध्यायः॥ ७२॥

—०—

दुष्मन्त उवाच। सुव्यक्तं राजपुत्री त्वं यथा कल्याणि भाषसे। भार्य्या मे भव सुश्रोणि ब्रूहि किं करवाणि ते॥ १॥ सुवर्णमालां वासांसि कुण्डले परिहाटके। नानापक्षिनजे शुभ्रे मणिरत्ने च शोभने॥ २॥ आहरामि तवाद्याहं निष्कादीन्यजिनानि च। सर्वराज्यं तवाद्यास्तु भार्य्या मे भव शोभने॥ ३॥ गान्धर्वेण च मां भीरु विवाहेनैहि सुन्दरि। विवाहानां हि रम्भोरु गान्धर्वः श्रेष्ठ उच्यते॥ ४॥

शकुन्तलोवाच। फलाहारी गतो राजन् पिता मे दूत आश्रमात्। मुहूर्त्तं सम्प्रतीक्षस्व स मां तुभ्यं प्रदास्यति॥ ५॥

दुष्यन्त उवाच। इच्छामि त्वां वरारोहे भजमानामनिन्दिते। त्वदर्थं मां स्थितं विद्धि तद्धतं हि मनो मम ॥ ६ ॥ आत्मनो बन्धुरात्मैव गतिरात्मैव चात्मनः। आत्मनैवात्मनो दानं कर्त्तुमर्हसि धर्मतः ॥ ७ ॥ अष्टावेव समासेन विवाहा धर्मतः स्मृताः। ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः ॥८॥ गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमः स्मृतः। तेषां धर्म्यान्यथापूर्वं मनुः स्वायम्भुवोऽब्रवीत् ॥ ९ ॥ प्रशस्तांश्चतुरः पूर्वान् ब्राह्मणस्योपधारय। षड़ानुपूर्व्या क्षत्रस्य विद्धि धर्म्यानिनिन्दिते ॥ १० ॥ राक्षसान्तु राक्षसोऽप्युक्तो विट्शूद्रेष्वासुरः स्मृतः। पञ्चानान्तु त्रयो धर्मा अधर्मौ द्वौ स्मृताविह ॥११॥ पैशाचश्चासुरश्चैव न कर्त्तव्यौ कदाचन। अनेन विधिना कार्य्यो धर्मस्यैषा गतिः स्मृता ॥ १२ ॥ गान्धर्वराक्षसौ क्षत्रे धर्म्यौ तौ मा विशङ्किथाः। प्रसह्य वा यदि वा मिथ्यौ कर्त्तव्यौ नात्र संशयः ॥१३॥ सा त्वं मम सकामस्य सकामा वरवर्णिनी। गान्धर्वेण विवाहेन भार्य्या भवितुमर्हसि ॥ १४ ॥

शकुन्तलोवाच। यदि धर्मपथस्त्वेष यदि चात्मा प्रभुर्मम। प्रदाने पौरवश्रेष्ठ शृणु मे समयं प्रभो ॥ १५ ॥ सत्यं मे प्रतिजानीहि यथा वक्ष्याम्यहं रहः। मयि जायेत यः पुत्रः स भवेत्त्वदनन्तरः ॥ १६ ॥ युवराजो महाराज सत्यमेतद्ब्रवीमि ते। यद्येतदेवं दुष्यन्त अस्तु मे सङ्गमस्त्वया ॥ १७ ॥

वैशम्पायन उवाच। एवमस्त्विति तां राजा प्रत्युवाचाविचारयन्। अपि च त्वां हि नेष्यामि नगरं स्वं शुचिस्मिते ॥ १८ ॥ यथा त्वमर्हा सुश्रोणि सत्यमेतद्ब्रवीमि ते। एवमुक्त्वा स राजर्षिस्तामनिन्दितगामिनीम् ॥ १९ ॥ जग्राह विधिवत्पाणावुवास च तया सह। विश्वास्य चैनां स प्रायादब्रवीच्च पुनः पुनः ॥ २० ॥ प्रेषयिष्ये तवार्थाय वाहिनीं चतुरङ्गिणीम्। तया त्वानाययिष्यामि निवासं स्वं शुचिस्मिते ॥ २१ ॥

वैशम्पायन उवाच । इति तस्याः प्रतिश्रुत्य स नृपो जनमेजय । मनसा चिन्तयन् प्रायात्काश्यपं प्रति पार्थिवः ॥ २२ ॥ भगवांस्तपसा युक्तः श्रुत्वा किंनु करिष्यति । एवं स चिन्तयन्नेव प्रविवेश स्वकं पुरम् ॥ २३ ॥ मुहूर्त्तयाते तस्मिंस्तु कण्वोऽप्याश्रममागमत् । शकुन्तला च पितरं ह्रिया नोपजगाम तम् ॥२४॥ निवेद्याथ च तां कण्वो दिव्यज्ञानो महातपाः । उवाच भगवान् प्रीतः पश्यन् दिव्येन चक्षुषा ॥ २५ ॥ त्वयाद्य भद्रे रहसि यदनाहृत्य यः कृतः । पुंसा सह समायोगो न स धर्मोपघातकः ॥ २६ ॥ क्षत्रियस्य हि गान्धर्वो विवाहः श्रेष्ठ उच्यते । सकामायाः सकामेन निर्मन्त्रो रहसि स्मृतः ॥ २७ ॥ धर्मात्मा च महात्मा च दुष्यन्तः पुरुषोत्तमः । अभ्यगच्छः पतिं यज्ञं भजमानं शकुन्तले ॥ २८ ॥ महात्मा जनिता लोके सुतस्तव महाबलः । य इमां सागरापाङ्गीं कृत्स्नां भोक्ष्यति मेदिनीम् ॥ २९ ॥ परचक्राभियातस्य चक्रं तस्य महात्मनः । भविष्यत्यप्रतिहतं ततं चक्रवर्त्तिनः ॥ ३० ॥ ततः प्रक्षाल्य पादौ सा विश्रान्तं सुनिमन्त्रयौत् । विनिधाय ततो भारं सन्निधाय फलानि च ॥ ३१ ॥

शकुन्तलोवाच । मया पतिर्वृतो राजा दुष्यन्तः पुरुषोत्तमः । तस्मै सचिवाय त्वं प्रसादं कर्त्तुमर्हसि ॥ ३२ ॥

कण्व उवाच । प्रसन्न एव तस्याहं त्वत्कृते वरवर्णिनि । गृह्यतां च वरं मत्तस्त्वं शुभे यदभीप्सितम् ॥ ३३ ॥

वैशम्पायन उवाच । ततो धर्मिष्ठतां वव्रे राज्याच्चास्खलनं तथा । शकुन्तला पौरवाणां दुष्यन्तहितकाम्यया ॥ ३४ ॥

इत्यादिपर्वणि सम्भवपर्वणि शकुन्तलोपाख्याने त्रिसप्ततोऽध्यायः ॥ ७३ ॥

वैशम्पायन उवाच । प्रतिज्ञाय तु दुष्यन्ते प्रतियाते शकुन्तला । गर्भं सुषाव वामोरुः कुमारममितौजसम् ॥ १ ॥ त्रिषु वर्षेषु पूर्णेषु दीप्तानलसमद्युतिम् । रूपौदार्यगुणोपेतं दीप्तिमन्तं जनमेजय ॥ २ ॥ जातकर्मादिसंस्कारं कण्वः पुण्यकृतांवरः । विधिवत्कारयामास वर्धमानस्य धीमतः ॥ ३ ॥ दन्तैः शुक्लैः शिखरिभिः सिंहसंहननो महान् । चक्राङ्कितकरः श्रीमान्महामूर्धा महाबलः । कुमारो देवगर्भाभः स तत्राशु व्यवर्धत ॥ ४ ॥ षड्वर्ष एव बालः स कण्वाश्रमपदं प्रति । सिंह्यामान् वराहांश्च महिषांश्च गजांस्तथा । यवन्य वृक्षे बलवानाश्रमस्य समीपतः ॥ ५ ॥ आरोहन्हसयंश्चैव क्रीडंश्च परिधावति । ततोऽस्य नाम चक्रुस्ते कण्वाश्रमनिवासिनः । अस्यैष सर्वदमनः सर्वं हि दमयत्यसौ ॥ ६ ॥ स सर्वदमनो नाम कुमारः समपद्यत । विक्रमेणौजसा चैव बलेन च समन्वितः ॥ ७ ॥ तं कुमारमृषिर्दृष्ट्वा कर्मचास्यातिमानुषम् । समयौ यौवराज्यायेत्यब्रवीच्च शकुन्तलाम् ॥ ८ ॥ तस्य तद्वचनाज्ञाय कण्वः शिष्यानुवाच ह । शकुन्तलामिमां शीघ्रं सहपुत्रामितो गृहात् । भर्तुः प्रापयतागारं सर्वलक्षणपूजितम् ॥ ९ ॥ नारीणां चिरवासो हि बान्धवेषु न रोचते । कीर्तिश्चारित्रधर्मश्च लक्ष्यान्वयत मा चिरम् ॥ १० ॥ तथेत्युक्त्वा तु ते सर्वे प्रातिष्ठन्त महौजसः । शकुन्तलां पुरस्कृत्य सपुत्रां गजसाह्वयम् ॥ ११ ॥ दृष्ट्वामरगर्भाभं पुत्रं कमललोचनम् । आजगाम ततः सुभ्रूर्दुष्मन्तं विद्धिताद्धनात् ॥ १२ ॥ अभिसृत्य च राजानं विद्धिता च प्रवेशिता । सह तेनैव पुत्रेण बालार्कसमतेजसा ॥ १३ ॥ निवेदयित्वा ते सर्वे आश्रमं पुनरागताः । पूजयित्वा यथान्यायमब्रवीच्च शकुन्तला ॥ १४ ॥ अयं पुत्रस्तया राजन्यौवराज्येऽभिषिच्यताम् । त्वया ह्ययं सुतो राजन्नस्मत्तः सुरोपमः । यथा-

समयमेतस्मिन् वर्त्तस्व पुरुषोत्तम ॥ १५ ॥ यथा मत्सङ्गमे पूर्वं यः कृतः समयस्त्वया । तं स्मरस्व महाभाग कण्वाश्रमपदं प्रति ॥ १६ ॥ सोऽथ श्रुत्वैव तद्वाक्यं तस्या राजा स्मरन्नपि । अब्रवीन्न स्मरामीति कस्य त्वं दुष्टतापसि ॥ १७ ॥ धर्मकामार्थसम्बन्धं न स्मरामि त्वया सह । गच्छ वा तिष्ठ वा कामं यद्वापीच्छसि तत्कुरु ॥ १८ ॥ सैवमुक्ता वरारोहा व्रीड़ितेव तपस्विनी । निःसंज्ञेव च दुःखेन तस्थौ स्थूणेव निश्चला ॥ १९ ॥ संरम्भामर्षताम्राक्षी स्फुरमाणौष्ठसंपुटा । कटाक्षैर्निर्दहन्तीव तिर्य्यगाजानमैक्षत ॥ २० ॥ आकारं गूहमाना च मन्युना च समीरिता । तपसा सम्भृतं तेजो धारयामास वै तदा ॥ २१ ॥ सा मुहूर्त्तमिव ध्यात्वा दुःखामर्षसमन्विता । भर्त्तारमभिसम्प्रेक्ष्य क्रुद्धा वचनमब्रवीत् ॥ २२ ॥ जानन्नपि महाराज कस्मादेवं प्रभाषसे । न जानामीति निःशङ्कं यथान्यः प्राकृतो जनः ॥ २३ ॥ अत्र ते हृदयं वेद सत्यस्यैवानृतस्य च । कल्याणं वद साक्ष्येण मात्मानमवमन्यथाः ॥ २४ ॥ योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चौरेणात्मापहारिणा ॥ २५ ॥ एकोऽहमस्मीति च मन्यसे त्वं न हृच्छयं वेत्सि मुनिं पुराणम् । यो वेदिता कर्मणः पापकस्य तस्यान्तिके त्वं व्रजिनं करोषि ॥ २६ ॥ मन्यते पापकं कृत्वा न कश्चिदेत्ति मामिति । विदन्ति चैनं देवाश्च यश्चैवान्तरपूरुषः ॥ २७ ॥ आदित्यचन्द्रावनिलानलौ च द्यौर्भूमिरापो हृदयं यमश्च । अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम् ॥ २८ ॥ यमो वैवस्वतस्तस्य निर्व्यातयति दुष्कृतम् । हृदि स्थितः कर्मसाक्षी क्षेत्रज्ञो यस्य तुष्यति ॥ २९ ॥ न तु तुष्यति यस्त्वेष पुरुषस्य दुरात्मनः । तं यमः पापकर्माणं वियातयति दुष्कृतम् ॥ ३० ॥ योऽवमन्याज्ञानादात्मानमन्यथा प्रतिपद्यते । न तस्य देवाः श्रेयांसो यस्यात्मापि

न कारणम् ॥ ३१ ॥ स्वयं प्राप्तेति मामेवं मावमंस्थाः पतिव्रताम्। अर्चार्हां नार्चयसि मां स्वयं भार्यामुपस्थिताम् ॥३२॥ किमर्थं मां प्राकृतवदुपप्रेक्षसि संसदि। न खल्वहमिदं शून्ये रौमि किं न शृणोषि मे ॥ ३३ ॥ यदि मे याचमानाया वचनं न करिष्यसि। दुष्यन्त शतधा मूर्ध्नि ततस्त्वद्य स्फुटिष्यति ॥३४॥ भार्यां पतिः समाविश्य स यस्माज्जायते पुनः। जायायास्त्वद्धि जायात्वं पौराणाः कवयो विदुः ॥ ३५ ॥ यदागमवतः पुंसस्तदपत्यं प्रजायते। तत्तारयति सन्तत्या पूर्वप्रेतान् पितामहान् ॥ ३६ ॥ पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः। तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा ॥ ३७ ॥ पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते। अथ पौत्रस्य पुत्रेण मोदन्ते प्रपितामहाः ॥ ३८ ॥ सा भार्या या गृहे दक्षा सा भार्या या प्रजावती। सा भार्या या पतिप्राणा सा भार्या या पतिव्रता ॥ ३९ ॥ अर्धं भार्या मनुष्यस्य भार्या श्रेष्ठतमः सखा। भार्या मूलं त्रिवर्गस्य भार्या मूलं तरिष्यतः ॥ ४० ॥ भार्यावन्तः क्रियावन्तः सभार्या गृहमेधिनः। भार्यावन्तः प्रमोदन्ते भार्यावन्तः श्रियान्विताः ॥ ४१ ॥ सखायः प्रविविक्तेषु भवन्त्येताः प्रियम्वदाः। पितरो धर्मकार्येषु भवन्त्यार्तस्य मातरः ॥ ४२ ॥ कान्तारेष्वपि विश्रामो जनस्याध्वनिकस्य वै। यः सदारः स विश्वास्यस्तस्माद्दाराः परा गतिः ॥ ४३ ॥ संस्करन्तमपि प्रेतं विषमेष्वेकपातिनम्। भार्यैवान्वेति भर्तारं सततं या पतिव्रता ॥ ४४ ॥ प्रथमं संस्थिता भार्या पतिं प्रेत्य प्रतीक्षते। पूर्वं मृतश्च भर्तारं पश्चात्साध्वनुगच्छति ॥ ४५ ॥ एतस्मात्कारणाद्राजन् पाणिग्रहणमिष्यते। यदाप्नोति पतिर्भार्यामिह लोके परत्र च ॥ ४६ ॥ आत्मात्मनैव जनितः पुत्र इत्युच्यते बुधैः। तस्माद्भार्यां नरः पश्येन्मातृवत्पुत्रमातरम् ॥ ४७ ॥

भार्य्यायां जनितं पुत्रमादर्शेष्विव चाननम्। ह्लादते जनिता प्रेक्ष्य स्वर्गं प्राप्येव पुण्यकृत् ॥ ४८ ॥ दह्यमाना मनोदुःखैर्व्याधिभिश्चातुरा नराः। ह्लादन्ते स्वेषु दारेषु घर्मार्ताः सलिलेष्विव ॥ ४९ ॥ सुसंरब्धोऽपि रामाणां न कुर्य्यादप्रियं नरः। रतिं प्रीतिञ्च धर्मञ्च तास्वायत्तमवेक्ष्य हि ॥ ५० ॥ आत्मनो जन्मनः क्षेत्रं पुण्यं रामाः सनातनम्। ऋषीणामपि का शक्तिः स्रष्टुं रामामृते प्रजाम् ॥ ५१ ॥ प्रतिपद्य पदा स्पृष्टुर्धरणीरेणुगुण्ठितः। पितुरालिङ्ग्यतेऽङ्गानि किमस्त्यभ्यधिकं ततः ॥ ५२ ॥ स त्वं स्वयमभिप्राप्तं साभिलाषमिमं सुतम्। प्रेक्षमाणं कटाक्षेण किमर्थमवमन्यसे ॥ ५३ ॥ अण्डानि बिभ्रति स्वानि न भिन्दन्ति पिपीलिकाः। न भरेथाः कथन्नु त्वं धर्मज्ञः सन् स्वमात्मजम् ॥ ५४ ॥ न वासस्तां न रामाणां नाम स्पर्शसुखाविधः। शिशोरालिङ्ग्यमानस्य सुतस्यार्य्या सुखः ॥ ५५ ॥ ब्राह्मणो द्विपदां श्रेष्ठो गौर्विशिष्टचतुष्पदाम्। गुरुर्गरीयसां श्रेष्ठः पुत्रः स्वर्गवतां वरः ॥ ५६ ॥ स्पृशतु त्वां समाश्लिष्य पुत्रोऽयं प्रियदर्शनः। पुत्रस्पर्शात् सुखतरः स्पर्शो लोके न विद्यते ॥ ५७ ॥ त्रिषु वर्षेषु पूर्णेषु प्रजातोऽमरिन्दम। इमं कुमारं राजेन्द्र तव शोकविनाशनम् ॥ ५८ ॥ आहर्त्ता वाजिमेधस्य शतक्रतुसमस्य गौरव। इति वाग्नन्दरीचे मां स्तुतकोऽभ्यवदत् पुरा ॥ ५९ ॥ ननु नामाङ्कमारोप्य स्नेहाङ्गान्यालभ्य गताः। मूर्द्धि पुत्रानुपाघ्राय प्रतिनन्दन्ति मानवाः ॥ ६० ॥ वेदेष्वपि वदन्तीमं मन्त्रग्रामं द्विजातयः। जातकर्मणि पुत्राणां तवापि विदितं तथा ॥ ६१ ॥ अङ्गादङ्गात्सम्भवसि हृदयादभिजायसे। आत्मा वै पुत्रनामासि स जीव शरदः शतम् ॥ ६२ ॥ जीवितं त्वदधीनं मे सन्तानमपि चाक्षयम्। तस्मात्त्वं जीव मे पुत्र सुसुखी शरदां शतम् ॥ ६३ ॥ त्वदङ्गेभ्यः प्रसूतायं पुरुषात् पुरुषोऽपरः।

सरसीवामलेलानं द्वितीयं पश्य वै सुतम् ॥ ६४ ॥ यथा ह्याहवनीयोऽग्निर्गार्हपत्यात् प्रणीयते । तथा त्वत्तः प्रसूतोऽयं त्वमेकः सन् द्विधाकृतः ॥ ६५ ॥ ऋगावकृष्टेन पुरा ऋगयां परिधावता । अहमासादिता राजन् कुमारी पितुराश्रमे ॥ ६६ ॥ उर्वशीपूर्वचित्तिश्च सहजन्या च मेनका । विश्वाची च घृताची च षड़्वाप्सरसां वराः ॥ ६७ ॥ तासां सा मेनका नाम ब्रह्मयोनिर्वराप्सराः । दिवः सस्राप्य जगतीं विश्वामित्रादजीजनत् ॥६८॥ सा मां हिमवतः प्रस्थे सुषुवे मेनकाप्सराः । अवकीर्य्य च मां याता परात्मजमिवासती ॥ ६९ ॥ किन्तु कर्मशुभं पूर्वं कृतवत्कन्यजन्मनि । यदहं वान्धवैस्त्यक्ता बाल्ये सम्प्रति च त्वया ॥७०॥ कामं त्वयोपरित्यक्ता गमिष्यामि स्वमाश्रमम् । इमन्तु बालं सन्त्यक्तुं नार्हस्यात्मजमात्मनः ॥ ७१ ॥

दुष्यन्त उवाच । न पुत्रमभिजानामि त्वयि जातं शकुन्तले । असत्यवचना नार्य्यः कस्ते श्रद्धास्यते वचः ॥ ७२ ॥ मेनका निरनुक्रोशा बन्धकी जननी तव । यया हिमवतः पृष्ठे निर्माल्यमिव चोज्झिता ॥ ७३ ॥ स चापि निरनुक्रोशः क्षत्रयोनिः पिता तव । विश्वामित्रो ब्राह्मण्ये लुब्धः कामवशं गतः ॥७४॥ मेनकाप्सरसां श्रेष्ठा मह्यर्षीणां पिता च ते । तयोरपत्यं कस्मात्त्वं पुंश्चलीव प्रभाषसे ॥ ७५ ॥ अश्रद्धेयमिदं वाक्यं कथयन्ती न लज्जसे । विशेषतो मत्सकाशे दुष्टतापसि गम्यताम् ॥ ७६ ॥ क्व महर्षिः स चैवाग्र्यः साप्सराः क्व च मेनका । क्व च त्वमेवं कृपणा तापसीवेशधारिणी ॥ ७७ ॥ अतिकायश्च ते पुत्रो बालोऽतिबलवानयम् । कथमल्पेन कालेन प्राकस्तम्भ इवोद्गतः ॥ ७८ ॥ सुनिकृष्टा च ते योनिः पुंश्चलीव प्रभाषसे । यदृच्छया कामरागाज्जाता मेनकया ह्यसि ॥ ७९ ॥ सर्वमेतत् परोक्षं मे यक्षं वदसि तापसि । नाहं त्वामभिजानामि यथेष्टं गम्यतां त्वया ॥८०॥

शकुन्तलोवाच। राजन् सर्षपमात्राणि परच्छिद्राणि पश्यसि। आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यसि ॥ ८१ ॥ मेनका त्रिदशेष्वेव त्रिदशाश्चानुमेनकाम्। ममैवोद्विज्यते जन्म दुष्यन्त तव जन्मनः ॥ ८२ ॥ क्षितावटसि राजेन्द्र अन्तरीक्षे चरास्यहम्। आवयोरन्तरं पश्य मेरुसर्षपयोरिव ॥ ८३ ॥ महेन्द्रस्य कुबेरस्य यमस्य वरुणस्य च। भवनान्यनुसंयामि प्रभावं पश्य मे नृप ॥८४॥ सत्यश्चापि प्रवादोऽयं यं प्रवक्ष्यामि तेऽनघ। निदर्शनार्थं न द्वेषाच्छ्रुत्वा तं क्षन्तुमर्हसि ॥ ८५ ॥ विरूपो यावदादर्शे नात्मनः पश्यते मुखम्। मन्यते तावदात्मानमन्येभ्यो रूपवत्तरम् ॥ ८६ ॥ यदा स्वमुखमादर्शे विकृतं सोऽभिवीक्षते। तदान्तरं विजानीते आत्मानं चेतरं जनम् ॥ ८७ ॥ अतीव रूपसम्पन्नो न कश्चिदवमन्यते। अतीव जल्पन् दुर्वाचो भवतीह विचेटकः ॥८८॥ मूर्खो हि जल्पतां पुंसां श्रुत्वा वाचः शुभाशुभाः। अशुभं वाक्यमादत्ते पुरीषमिव शूकरः ॥ ८९ ॥ प्राज्ञस्तु जल्पतां पुंसां श्रुत्वा वाचः शुभाशुभाः। गुणवद्वाक्यमादत्ते हंसः क्षीरमिवाम्भसः ॥ ९० ॥ अन्यान् परिवदन् साधुर्व्यथां हि परितप्यते। तथा परिवदन्नन्यांस्तुष्टो भवति दुर्जनः ॥ ९१ ॥ अभिवाद्य यथा वृद्धान् सन्तो गच्छन्ति निर्वृतिम्। एवं सज्जनमाक्रुश्य मूर्खो भवति निर्वृतः ॥ ९२ ॥ सुखं जीवन्त्यदोषज्ञा मूर्खा दोषानुदर्शिनः। यत्र वाच्याः परैः सन्तः परानाहुस्तथाविधान् ॥ ९३ ॥ अतो ह्यस्तरं लोके किञ्चिदन्यन्न विद्यते। यत्र दुर्जनमित्याहुर्दुर्जनाः सज्जनं स्वयम् ॥ ९४ ॥ सत्यधर्मच्युतात् पुंसः क्रुद्धादाशीविषादिव। अनास्तिकोऽप्युद्विजते जनः किम्पुनरास्तिकः ॥ ९५ ॥ स्वयमुत्पाद्य वै पुत्रं सदृशं यो न मन्यते। तस्य देवाः श्रियं घ्नन्ति न च लोकानुपाश्नुते ॥ ९६ ॥ कुलवंशप्रतिष्ठां हि पितरः पुत्रमब्रुवन्। उत्तमं सर्वधर्माणां तस्मात् पुत्रं न

संत्यजत् ॥ ९७ ॥ स्वपत्नीप्रभवान् पञ्च लब्धान् क्रीतान् विवर्द्धितान् । कृतानन्यासु चोत्पन्नान् पुत्रान्वै मनुरब्रवीत् ॥९८॥ धर्मकीर्त्यावहा नृणां मनसः प्रीतिवर्द्धनाः । त्रायन्ते नरकाज्जाताः पुत्रा धर्मकृतः पितॄन् ॥ ९९ ॥ स त्वं नृपतिशार्दूल पुत्रं न त्यक्तुमर्हसि । आत्मानं सत्यधर्मौ च पालयन् पृथिवीपते ॥ १०० ॥ नरेन्द्रसिंह कपटं न वोढुं त्वमिहार्हसि । वरं कूपशतादापी वरं वापीशतात् क्रतुः । वरं क्रतुशतात् पुत्रः सत्यं पुत्रशताद्वरम् ॥ १०१ ॥ अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम् । अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥ १०२ ॥ सर्ववेदाधिगमनं सर्वतीर्थावगाहनम् । सत्यञ्च वचनं राजन् समं वास्याच्चवा समम् ॥१०३॥ नास्ति सत्यसमो धर्मो न सत्याद्विद्यते परम् । न हि तीव्रतरं किञ्चिदनृतादिह विद्यते ॥ १०४ ॥ राजन् सत्यं परं ब्रह्म सत्यञ्च समयः परः । मा त्याक्षीः समयं राजन् सत्यं सङ्गतमस्तु ते ॥ १०५ ॥ अनृते चेत्प्रसङ्गस्ते स्वदधासि न चेत् स्वयम् । आत्मना हन्त गच्छामि त्वादृशे नास्ति सङ्गतम् ॥ १०६ ॥ त्वामृतेऽपि च दुष्यन्त शैलराजावतंसिकाम् । चतुरन्तामिमामुर्वीं पुत्रो मे पालयिष्यति ॥ १०७ ॥

वैशम्पायन उवाच । एतावदुक्त्वा राजानं प्रातिष्ठत शकुन्तला । अथान्तरीक्षात् दुष्मन्तं वागुवाचाशरीरिणी । ऋत्विक् पुरोहिताचार्यैर्मन्त्रिभिश्च हृतं तदा ॥ १०८ ॥ भस्त्रा माता पितुः पुत्रो येन जातः स एव सः । भरस्व पुत्रं दुष्मन्त मावमंस्थाः शकुन्तलाम् ॥ १०९ ॥ रेतोधाः पुत्र उन्नयति नरदेव यमक्षयात् । त्वन्नास्य धाता गर्भस्य सत्यमाह शकुन्तला ॥११०॥ जाया जनयते पुत्रमात्मनोऽङ्गं द्विधाकृतम् । तस्माद्भरस्व दुष्मन्त पुत्रं शाकुन्तलं नृप ॥ १११ ॥ अभूतिरेषा यत्पत्न्या जोवेज्जीवन्तमात्मजम् । शाकुन्तलं महात्मानं दीप्यन्तं भर पौरव ॥ ११२ ॥

भर्त्तव्योऽयं त्वया यस्मादस्माकं वचनादपि। तस्माद्भवत्वयं नाम्ना भरतो नाम ते सुतः॥ ११३॥ तच्छ्रुत्वा पौरवो राजा व्याहृतं त्रिदिवौकसाम्। पुरोहितममात्यांश्च सम्प्रहृष्टोऽब्रवीदिदम्॥ ११४॥ सत्यवन्त्येतद्भवन्तोऽस्य देवदूतस्य भाषितम्। अहं चाप्येवमेवैनं जानामि स्वयमात्मजम्॥ ११५॥ यद्यहं वचनादेव गृह्णीयामि स्वमात्मजम्। भवेद्धि शङ्कितो लोकस्य नैवशुद्धो भवेदयम्॥ ११६॥

वैशम्पायन उवाच। तं विशोध्य तदा राजा देवदूतेन भारत। हृष्टः प्रमुदितश्चापि प्रतिजग्राह तं सुतम्॥ ११७॥ ततस्तस्य तदा राजा पित्रकर्माणि सर्वशः। कारयामास मुदितः प्रीतिमानात्मजस्य ह॥ ११८॥ मूर्ध्नि चैनमुपाघ्राय सस्नेहं परिषस्वजे। सभाज्यमानो विप्रैश्च स्तूयमानश्च वन्दिभिः॥ ११९॥ स मुदं परमां लेभे पुत्रसंस्पर्शजां नृपः। ताञ्चैव भाष्यां दुष्मन्तः पूजयामास धर्मतः। अब्रवीच्च तां राजा सान्त्वपूर्वमिदं वचः॥ १२०॥ कृतो लोकपरीक्षोऽयं सख्यस्त्वय्य त्वया सह। तस्मादेतन्मया देवि त्वच्छुद्ध्यर्थं विचारितम्॥ १२१॥ मन्यते चैव लोकस्तु स्त्रीभावान्मयि सङ्कृतम्। पुत्रस्यायं हृतो राज्ये मया तस्माद्विचारितम्॥ १२२॥ यच्च कोपितयात्यर्थं त्वयोक्तोऽस्मि प्रियं प्रिये। प्रणयिन्या विशालाक्षि तत्क्षान्तं ते मया शुभे॥ १२३॥ तामेवमुक्त्वा राजर्षिर्दुष्मन्तो महिषीं प्रियाम्। वासोभिरन्नपानैश्च पूजयामास भारत॥ १२४॥ दुष्मन्तस्तु ततो राजा पुत्रं शाकुन्तलं तदा। भरतं नामतः कृत्वा यौवराज्येऽभ्यषेचयत्॥ १२५॥ तस्य तत्प्रथितं चक्रं प्रावर्त्तत महात्मनः। भास्वरं दिव्यमजितं लोकसन्त्रासनं महत्॥ १२६॥ स विजित्य महीपालांश्चकार वशवर्त्तिनः। चचार च सतां धर्मं प्राप चानुत्तमं यशः॥ १२७॥ स राजा चक्रवर्त्यासीत्सार्वभौमः प्रताप-

वान् । ईजे च वह्निभिर्यज्ञैर्यया शंक्रो मरुत्पतिः ॥ १२८ ॥ याजयामास तं कण्वो विधिवज्ज्ञूरिदक्षिणम् । श्रीमान् गोवितततं नाम वाजिमेधमवाप सः ॥ १२९ ॥ यस्मिन् सहस्रं पद्मानां कण्वाय भरतो ददौ । भरताद्भारती कीर्त्तिर्येनेदं भारतं कुलम् ॥ १३० ॥ अपरे ये च पूर्वे वै भारता इति विश्रुताः । भरतस्यान्ववाये हि देवकल्पा महौजसः ॥ १३१ ॥ बभूवुर्ब्रह्मकल्पाश्च बहवो राजसत्तमाः । येषामपरिमेयानि नामधेयानि सर्वशः ॥ १३२ ॥ तेषान्तु ते यथा मुख्यं कीर्त्तयिष्यामि भारत । महाभागान्देवकल्पान् सत्यार्জ্জवपरायणान् ॥ १३३ ॥

इत्यादिपर्वणि सम्भवपर्वणि शाकुन्तलं समाप्तमिति
चतुःसप्ततोऽध्यायः ॥ ७४ ॥

—•—

वैशम्पायन उवाच । प्रजापतेस्तु दक्षस्य मनोर्वैवस्वतस्य च । भरतस्य कुरोः पूरोराजमीढस्य चानघ ॥ १ ॥ यादवानामिमं वंशं कौरवाणाञ्च सर्वशः । तथैव भरतानाञ्च पुण्यं स्वस्त्ययनं महत् ॥ २ ॥ धन्यं यशस्यमायुष्यं कीर्त्तयिष्यामि तेऽनघ । तेजोभिरुदिताः सर्वे महर्षिसमतेजसः ॥ ३ ॥ दश प्राचेतसाः पुत्राः सर्वे प्रचेतसः स्मृताः । सुखजेनाग्निना यैस्ते पूर्वं दग्धा महौजसः ॥ ४ ॥ तेभ्यः प्राचेतसो जज्ञे दक्षो दक्षादिमाः प्रजाः । सम्भूताः पुरुषव्याघ्र स हि लोकपितामहः ॥ ५ ॥ वीरिण्या सह सङ्गम्य दक्षः प्राचेतसो मुनिः । आत्मतुल्यानजनयत् सहस्रं संशितव्रतान् ॥ ६ ॥ सहस्रसङ्ख्यान् सम्भूतान् दक्षपुत्रांश्च नारदः । मोक्षमध्यापयामास साङ्ख्यज्ञानमनुत्तमम् ॥ ७ ॥

ततः पञ्चाशतं कन्याः पुत्रिका अभिसन्दधे । प्रजापतिः प्रजा दक्षः सिस्रक्षुर्जनमेजय ॥ ८ ॥ ददौ दश स धर्माय कश्यपाय त्रयोदश । कालस्य नयने युक्ताः सप्तविंशतिमिन्दवे ॥ ९ ॥ त्रयोदशानां पत्नीनां या तु दाक्षायणी वरा । मारीचः कश्यपस्तस्यामादित्यान् समजीजनत् ॥ १० ॥ इन्द्रादीन्वीर्यसम्पन्नान् विवस्वन्तमथापि च । विवस्वतः सुतो जज्ञे यमो वैवस्वतः प्रभुः ॥ ११ ॥ मार्त्तण्डस्य मनुर्धीमानजायत सुतः प्रभुः । यमश्चापि सुतो जज्ञे ख्यातस्तस्यानुजः प्रभुः । १२ ॥ धर्मात्मा स मनुर्धीमान्यत्र वंशः प्रतिष्ठितः । मनोर्वंशो मानवानां ततोऽयं प्रथितोऽभवत् ॥१३॥ ब्रह्मक्षत्रादयस्तस्मान्मनोर्जातास्तु मानवाः । ततोऽभवन्महाराज ब्रह्म क्षत्रेण सङ्गतम् ॥ १४ ॥ ब्राह्मणा मानवास्तेषां साङ्गं वेदमधारयन् । वेणं पृषधुं नरिष्यन्तं नाभागेक्ष्वाकुमेव च ॥ १५ ॥ कारूषमथ शर्य्यातिं तथा चैवाष्टमीमिलाम् । पृषध्रं नवमं प्राहुः क्षत्रधर्मपरायणम् ॥ १६ ॥ नाभागारिष्टदृषमान्मनोः पुत्रान् प्रचक्षते । पञ्चाशत्तु मनोः पुत्रास्तथैवान्येऽभवन् क्षितौ ॥ १७ ॥ अन्योन्यभेदात्ते सर्वे विनेशुरिति नः श्रुतम् । पुरूरवास्ततो विद्वानिलायां समपद्यत ॥ १८ ॥ सा वै तस्याभवन्माता पिता चैवेति नः श्रुतम् । त्रयोदश समुद्रस्य द्वीपानभ्रम् पुरूरवाः । अमानुषैर्वृतः सर्वैर्मानुषः सन्महायशाः ॥ १९ ॥ विप्रैः स विग्रहं चक्रे वीर्य्योन्मत्तः पुरूरवाः । जहार च स विप्राणां रत्नान्युत्क्रोशतामपि ॥ २० ॥ सनत्कुमारस्तं राजन् ब्रह्मलोकादुपेत्य ह । अनुदर्शं ततश्चक्रे प्रत्यगृह्णान्नचाप्यसौ ॥ २१ ॥ ततो महर्षिभिः क्रुद्धैः सद्यः स प्रभो व्यनश्यत । लोभान्वितो बलमदान्नष्टसंज्ञो नराधिपः ॥ २२ ॥ स हि गन्धर्वलोकस्यानुर्वश्या सहितो विराट् । आनिनाय क्रियार्थेऽग्नीन्यथावद्विहितांस्त्रिधा ॥ २३ ॥ षट् सुता जज्ञिरे

चैलादायुर्धीमानमावसुः । दृढायुश्च वनायुश्च शतायुश्चोर्वशीसुताः ॥ २४ ॥ नहुषं वृद्धशर्माणं राजिङ्गयमनेनसम् । रम्भानवी-सुतानेतानायोः पुत्रान् प्रचक्षते ॥ २५ ॥ आयुषो नहुषः पुत्रो धीमान् सत्यपराक्रमः । राज्यं शशास सुमहद्धर्मेण पृथिवीपते ॥ २६ ॥ पितॄन्देवानृषीन्विप्रान् गन्धर्वोरगराक्षसान् । नहुषः पालयामास ब्रह्मक्षत्रमथो विशः ॥ २७ ॥ स हत्वा दस्युसङ्घातान् ऋषीन् करमदापयत् । पशुवच्चैव तान् पृष्ठे वाहयामास वीर्यवान् ॥ २८ ॥ कारयामास चेन्द्रत्वमभिभूय दिवौकसः । तेजसा तपसा चैव विक्रमेणौजसा तथा ॥ २९ ॥ यतिं ययातिं संयाति-मायातिमयतिं ध्रुवम् । नहुषो जनयामास षट् सुतान् प्रियवादिनः ॥ ३० ॥ यतिस्तु योगमास्थाय ब्रह्मभूतोऽभवन्मुनिः । ययातिर्नाहुषः सम्राडासीत्सत्यपराक्रमः ॥ ३१ ॥ स पालयामास महीमीजे च बहुभिर्मखैः । अतिभक्त्या पितॄनर्चन्देवांश्च प्रयतः सदा ॥ ३२ ॥ अन्वगच्छात् प्रजां सर्वां ययातिरपराजितः । तस्य पुत्रा महेष्वासाः सर्वैः समुदिता गुणैः ॥ ३३ ॥ देवयान्यां महाराज शर्मिष्ठायाश्च जज्ञिरे । देवयान्यामजायेतां यदुस्तुर्वसुरेव च ॥ ३४ ॥ द्रुह्युश्चानुश्च पूरुश्च शर्मिष्ठायां प्रजज्ञिरे । स शाश्वतीः समा राजन् प्रजा धर्मेण पालयन् ॥ ३५ ॥ जरामार्च्छन्महाघोरां नाहुषो रूपनाशिनीम् । जराभिभूतः पुत्रान् स राजा वचनमब्रवीत् ॥ ३६ ॥ यदुं पूरुं तुर्वसुञ्च द्रुह्युं चानुञ्च भारत । यौवनेन चरन् कामान्युवा युवतिभिः सह ॥ ३७ ॥ विहर्तुमहमिच्छामि साह्यं कुरुत पुत्रकाः । तं पुत्रो देवयानेयः पूर्वजो वाक्यमब्रवीत् ॥ ३८ ॥ किं कार्यं भवतः कार्यमस्माकं यौवनेन ते । ययातिरब्रवीत्तं वै जरा मे प्रतिगृह्यताम् ॥ ३९ ॥ यौवनेन त्वदीयेन चरेयं विषयानहम् । यजतो दीर्घसत्रैर्मे शापाच्छोशनसो मुनेः । कामार्थः परिहीणोऽयं तप्येयं तेन

पुत्रकाः ॥ ४० ॥ मामकेन शरीरेण राज्यमेकः प्रशास्तु वः । अहं तन्वाभिनवया युवा काममवाप्नुयाम् ॥ ४१ ॥ ते न तस्य प्रत्यगृह्णन्यदुप्रभृतयो जराम् । तमब्रवीत्ततः पूरुः कनीयान् सत्यविक्रमः ॥ ४२ ॥ राजंश्चराभिनवया तन्वा यौवनगोचरः । अहं जरां समादाय राज्ये स्थास्यामि तेऽनया ॥ ४३ ॥ एवमुक्तः स राजर्षिस्तपोवीर्यसमाश्रयात् । सञ्चारयामास जरां तदा पुत्रे महात्मनि ॥ ४४ ॥ पौरवेणाथ वयसा राजा यौवनमास्थितः । ययातिनापि वयसा राज्यं पूरुरकारयत् ॥ ४५ ॥ ततो वर्षसहस्रान्ते ययातिरपराजितः । स्थितः स नृपशार्दूलः शार्दूलसमविक्रमः ॥ ४६ ॥ ययातिरपि पत्नीभ्यां दीर्घकालं विहृत्य च । विश्वाच्या सहितो रेमे पुनश्चैत्ररथे वने ॥ ४७ ॥ नाध्यगच्छत्तदा तृप्तिं कामानां स महायशाः । अवेत्य मनसा राजन्निमां गाथां तदा जगौ ॥ ४८ ॥ न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ ४९ ॥ पृथिवी रत्नसंपूर्णा हिरण्यं पशवः स्त्रियः । नालमेकस्य तत् सर्वमिति मत्वा शमं व्रजेत् ॥ ५० ॥ यदा न कुरुते पापं सर्वभूतेषु कर्हिचित् । कर्मणा मनसा वाचा ब्रह्म सम्पद्यते तदा ॥ ५१ ॥ यदा चायं न बिभेति यदा चास्मान्न बिभ्यति । यदा नेच्छति न द्वेष्टि ब्रह्म सम्पद्यते तदा ॥ ५२ ॥ इत्यवेक्ष्य महाप्राज्ञः कामानां फल्गुतां नृप । समाधाय मनो बुध्या प्रत्यगृह्णाज्जरां सुतात् ॥ ५३ ॥ दत्त्वा च यौवनं राजा पूरुं राज्येऽभिषिच्य च । अतृप्त एव कामानां पूरुं पुत्रमुवाच ह ॥ ५४ ॥ त्वया दायादवानस्मि त्वं मे वंशकरः सुतः । पौरवो वंश इति ते ख्यातिं लोके गमिष्यति ॥ ५५ ॥

वैशम्पायन उवाच । ततः स नृपशार्दूल पूरुं राज्येऽभिषिच्य च । तपः सुचरितं कृत्वा भृगुतुङ्गे महातपाः ॥ ५६ ॥

कालेन महता पश्चात्कालधर्ममुपेयिवान्। कारयित्वा त्वनग्नं सदारः स्वर्गमाप्तवान् ॥ ५७ ॥

इत्यादिपर्वणि सम्भवपर्वणि ययात्युपाख्याने पञ्चसप्ततोऽध्यायः ॥ ७५ ॥

—०—

जनमेजय उवाच। ययातिः पूर्वजोऽस्माकं दशमो यः प्रजापतेः। कथं स शुक्रतनयां लेभे परमदुर्लभाम् ॥ १ ॥ एतदिच्छाम्यहं श्रोतुं विस्तरेण तपोधन। आनुपूर्व्या च मे शंस राज्ञो वंशकरान् पृथक् ॥ २ ॥

वैशम्पायन उवाच। ययातिरासीन्नृपतिर्देवराजसमद्युतिः। तं शुक्रवृषपर्वाणौ वव्राते वै यथा पुरा ॥ ३ ॥ तत्तेऽहं सम्प्रवक्ष्यामि पृच्छते जनमेजय। देवयान्याश्च संयोगं ययातेर्नाहुषस्य च ॥ ४ ॥ सुराणामसुराणाञ्च समजायत वै मिथः। ऐश्वर्यं प्रतिसंघर्षस्त्रैलोक्ये सचराचरे ॥ ५ ॥ जिगीषया ततो देवा वव्रिरेऽङ्गिरसं मुनिम्। पौरोहित्येन याज्यार्थं काव्यं त्वशनसं परे ॥ ६ ॥ ब्राह्मणौ तावुभौ नित्यमन्योन्यस्पर्द्धिनौ भृशम्। तत्र देवा निजघ्नुर्यान्दानवान् युधि सङ्गतान् ॥ ७ ॥ तान् पुनर्जीवयामास काव्यो विद्याबलाश्रयात्। ततस्ते पुनरुत्थाय योधयाञ्चक्रिरे सुरान् ॥ ८ ॥ असुरास्तु निजघ्नुर्यान् सुरान् समरमूर्द्धनि। न तान् सञ्जीवयामास बृहस्पतिरुदारधीः ॥ ९ ॥ न हि वेद स तां विद्यां यां काव्यो वेत्ति वीर्यवान्। सञ्जीविनीं ततो देवा विषादमगमन् परम् ॥ १० ॥ ते तु देवा भयोद्विग्नाः काव्यादुशनसस्तदा। ऊचुः कचमुपागम्य ज्येष्ठं पुत्रं बृहस्पतेः ॥ ११ ॥ भजमानान् भजस्वास्मान् कुरु नः साह्यमुत्तमम्। या सा विद्या निवसति ब्राह्मणेऽमिततेजसि ॥ १२ ॥ शुक्रे तामा-

हर क्षिप्रं भागभाङ्नो भविष्यसि। हयपर्वसमीपे हि शक्यो द्रष्टुं त्वया द्विजः॥ १३॥ रक्षते दानवांस्तत्र न स रक्षत्यदानवान्। तमाराधयितुं शक्तो भवान्यूर्ववया कविम्॥ १४॥ देवयानीञ्च दयितां सुतां तस्य महात्मनः। त्वामाराधयितुं शक्तो नान्यः कश्चन विद्यते॥ १५॥ शीलदाक्षिण्यमाधुर्य्यैराचारेण दमेन च। देवयान्यां हि तुष्टायां विद्यां तां प्राप्स्यसि ध्रुवम्॥ १६॥ तथेत्युक्त्वा ततः प्रायाद्बृहस्पतिसुतः कचः। तदाभिपूजितो देवैः समीपे हयपर्वणः॥ १७॥ स गत्वा त्वरितो राजन्देवैः सम्प्रेषितः कचः। असुरेन्द्रपुरे शुक्रं दृष्ट्वा वाक्यमुवाचह॥ १८॥ ऋषेरङ्गिरसः पौत्रं पुत्रं साक्षाद्बृहस्पतेः। नाम्ना कचमिति ख्यातं शिष्यं गृह्णातु मां भवान्॥ १९॥ ब्रह्मचर्य्यं चरिष्यामि त्वय्यहं परमं गुरौ। अनुमन्यस्व मां ब्रह्मन् सहस्रं परिवत्सरान्॥ २०॥

शुक्र उवाच। कच सुस्वागतं तेऽस्तु प्रतिगृह्णामि ते वचः। अर्चयिष्येऽहमर्च्यं त्वामर्चितोऽस्तु बृहस्पतिः॥ २१॥

वैशम्पायन उवाच। कचस्तु तं तथेत्युक्त्वा प्रतिजग्राह तद्व्रतम्। आदिष्टं कविपुत्रेण शुक्रेणोशनसा स्वयम्॥ २२॥ व्रतस्य प्राप्तकालं स यथोक्तं प्रत्यगृह्णत। आराधयन्नुपाध्यायं देवयानीञ्च भारत॥ २३॥ नित्यमाराधयिष्यंस्तौ युवा यौवनगोचरे। गायन्नृत्यन् वादयंश्च देवयानीमतोषयत्॥ २४॥ स शीलयन्देवयानीं कन्यां सम्प्राप्तयौवनाम्। पुष्पैः फलैः प्रेषणैश्च तोषयामास भारत॥ २५॥ देवान्यपि तं विप्रं नियमव्रतधारिणम्। गायन्ती च ललन्ती च रहःपर्य्यचरत्तथा॥ २६॥ पञ्चवर्षशतान्येवं कचस्य चरतो व्रतम्। तत्रातीयुरथो बुद्ध्वा दानवास्तं ततः कचम्॥ २७॥ गा रक्षन्तं वने दृष्ट्वा रहस्येकमनर्षिताः। जघ्नुर्बृहस्पतेर्हेतोर्द्विधा चक्रुश्चार्थमेव च॥ २८॥ हत्वा

शालावृकेभ्यश्च प्रायच्छल्लवणं कृतम् । ततो गावो निवृत्तास्ता अगोपाः स्वं निवेशनम् ॥ २९ ॥ सा दृष्ट्वा रहिता गाश्च कचे-नाभ्यागता वनात् । उवाच वचनं काले देवयान्यश्च भारत ।३०॥

देवयान्युवाच । आहृतं चाग्निहोत्रं ते सूर्य्यश्चास्तं गतः प्रभो । अगोपाश्चागता गावः कचस्तात न दृश्यते ॥ ३१ ॥ व्यक्तं हतो मृतो वापि कचस्तात भविष्यति । तं विना न च जीवेयमिति सत्यं ब्रवीमि ते ॥ ३२ ॥

शुक्र उवाच । अयमेहीति संशब्द्य हतं सञ्जीवयाम्यहम् । ततः सञ्जीवनीं विद्यां प्रयुज्य कचमाह्वयत् ॥ ३३ ॥ भित्त्वा भित्त्वा शरीराणि दैत्यानां स विनिर्गतः । आहूतः प्रादुरभवत्कचो हृष्टोऽथ विद्यया ॥ ३४ ॥ कस्मान्चिरायितोऽसीति पृष्टस्तामाह भार्गवीम् । समिधश्च कुशादीनि काष्ठभारञ्च भाविनि ॥ ३५ ॥ गृहीत्वाश्रमभाराक्तं वटवृक्षं समाश्रितः । गावश्च संहिताः सर्वा वृक्षच्छायामुपाश्रिताः ॥ ३६ ॥ असुरास्तत्र मां दृष्ट्वा कस्त्वमित्य-भ्यचोदयन् । बृहस्पतिसुतश्चाहं कच इत्यभिविश्रुतः ॥ ३७ ॥ इत्युक्तमात्रे मां हत्वा पेषीकृत्वा तु दानवाः । दत्त्वा शालावृकेभ्यस्तु सुखं जग्मुः स्वमालयम् ॥ ३८ ॥ आहूतो विद्यया भद्रे भार्गवेण महात्मना । त्वत्समीपमिहायातः कथञ्चित्प्राण-जीवितः ॥ ३९ ॥ स पुनर्देवयान्योक्तः पुष्पाहारो यदृच्छया । वनं ययौ कचो विप्रो दृष्ट्वर्षीनवाच्य ते । पुनस्तं पेषयित्वा तु समुद्राम्भस्यमिश्रयन् ॥ ४० ॥ चिरगतं पुनः कन्या पितरं संन्यवेदयत् । विप्रेण पुनराहूतो विद्यया गुरुदेहजः । पुन-राहृत्य तद्वृत्तं न्यवेदयत तत्त्वतः ॥ ४१ ॥ ततस्तृतीयं हत्वा तं दग्ध्वा कृत्वा च चूर्णशः । प्रायच्छन् ब्राह्मणायैव सुरायामसुरा-स्तथा ॥ ४२ ॥ देवयान्यश्च भूयोपि पितरं वाक्यमब्रवीत् । पुष्पा-हारः प्रेषणकृत् कचस्तात न दृश्यते ॥ ४३ ॥ व्यक्तं हतो मृतो

वापि कचस्तात भविष्यति। तं विना न च जीवेयं कचं सत्यं ब्रवीमि ते॥ ४४॥

शुक्र उवाच। बृहस्पतेः सुतः पुत्रि कचः प्रेतगतिं गतः। विद्यया जीवितोऽप्येवं हन्यते करवाम किम्॥ ४५॥ मैवं शुचो भारुद देवयानि न त्वादृशी मर्त्यमनुप्रशोचति। यस्यास्तव ब्रह्म च ब्राह्मणाश्च सेन्द्रा देवा वसवोऽश्विनौ च॥ ४६॥ सुरद्विषश्चैव जगच्च सर्वमुपस्थाने सज्जमन्ति प्रभावात्। अशक्योऽसौ जीवयितुं द्विजातिः सञ्जीवितो बध्यते चैव भूयः॥ ४७॥

देवयान्युवाच। यस्याङ्गिरा बृहतमः पितामहो बृहस्पतिश्चापि पिता तपोनिधिः। ऋषेः पुत्रं तमथोवापि पौत्रं कथं न शोचेयमहं न रुद्याम्॥ ४८॥ स ब्रह्मचारी च तपोधनश्च सदोत्थितः कर्मसु चैव दक्षः। कचस्य मार्गं प्रतिपत्स्ये न भोक्ष्ये प्रियो हि मे तात कचोऽभिरूपः॥ ४९॥

वैशम्पायन उवाच। स पीड़ितो देवयान्या महर्षिः समाह्वयत् संरम्भाच्चैव काव्यः। असंशयं मामसुरा द्विषन्ति ये मे शिष्यानागतान् हृदयन्ति॥ ५०॥ अब्राह्मणं कर्तुमिच्छन्ति रौद्रास्ते मां यथा व्यभिचरन्ति नित्यम्। अघस्य पापस्य भवेदिहान्तः कं ब्रह्महत्या न दहेदमीन्द्रम्। गुरोर्हि भीतो विद्यया चोपहूतः श्वनैर्वाक्यं जठरे व्याजहार॥ ५१॥

वैशम्पायन उवाच। तमब्रवीत्केन पथोपनीतस्त्वं चोदरे तिष्ठसि ब्रूहि विप्र।

कच उवाच। तव प्रसादान्न जहाति मां स्मृतिः स्मरामि सर्वं यच्च यथा च वृत्तम्। नत्वेवं स्यात्तपसः संक्षयो मे ततः क्लेशं घोरमिमं सहामि॥ ५२॥ असुरैः सुरायां भवतोऽस्मि दत्तो हत्वा दग्ध्वा चूर्णयित्वा च काव्य। ब्राह्मीं मायां चासुरीं विप्र मायां त्वयि स्थिते कथमेवातिवर्त्तते॥ ५३॥

शुक्र उवाच। किन्ते प्रियं करवाण्यद्य वत्से बधेन मे जीवितं स्यात्कचस्य। नान्यत कुक्षेर्मम भेदनेन हन्येत्कचो मद्गतो देवयानि ॥ ५४ ॥

देवयान्युवाच। द्वौ मां शोकावग्निकल्पौ दहेतां कचस्य नाशस्तव चैवोपघातः। कचस्य नाशे मम नास्ति धर्म नास्ति तवोपघाते जीवितुं नास्मि शक्ता ॥ ५५ ॥

शुक्र उवाच। संसिद्धरूपोऽसि बृहस्पतेः सुत यत्त्वां भक्तं भजते देवयानी। विद्यामिमां प्राप्नुहि जीवनीं त्वं न चेदिन्द्रः कचरूपी त्वमद्य ॥ ५६ ॥ न निवर्त्तेत् पुनर्जीवन् कश्चिदन्यो ममोदरात्। ब्राह्मणं वर्जयित्वैकं तस्माद्विद्यामवाप्नुहि ॥ ५७ ॥ पुत्रो भूत्वा भावय भावितो मामस्माद्देहादुपनिष्क्रम्य तात। समीक्षेथा धर्मवतीमवेक्षां गुरोः सकाशात्प्राप्य विद्यां सविद्यः ॥ ५८ ॥

वैशम्पायन उवाच। गुरोः सकाशात्समवाप्य विद्यां भित्त्वा कुक्षिं निर्विचक्राम विप्रः। कचोऽभिरूपस्तत्क्षणाद्ब्राह्मणस्य शुक्लात्यये पौर्णमास्यामिवेन्दुः ॥ ५९ ॥ दृष्ट्वा च तं पतितं ब्रह्मराशिमुत्थापयामास मृतं कचोऽपि। विद्यां सिद्धां तामवाप्याभिवाद्य ततः कचस्तं गुरुमित्युवाच ॥ ६० ॥ यः श्रोत्रयोरमृतं स निषिञ्चेद्यो मे नर्विद्यस्य वधा ममायम्। तं मन्येऽहं पितरं मातरञ्च तस्मै न द्रुह्येत् कृतमस्य जानन् ॥ ६१ ॥ ऋतस्य दातारमनुत्तमस्य निधिं निधीनामपि लब्धविद्याः। ये नाद्रियन्ते गुरुमर्चनीयं पापाल्लोकांस्ते व्रजन्त्यप्रतिष्ठाः ॥ ६२ ॥

वैशम्पायन उवाच। सुरापानादहनां प्राप्य विद्वान् संज्ञानाशञ्चैव महातिघोरम्। दृष्ट्वा कचं चापि तथाभिरूपं पीतं तदा सुरया मोहितेन ॥ ६३ ॥ समन्युरुत्थाय महानुभावस्तदोशना विप्रहितं चिकीर्षुः। सुरापानं प्रति सञ्जातमन्युः काव्यः स्वयं वाक्यमिदं जगाद ॥ ६४ ॥ यो ब्राह्मणोऽद्यप्रभृतीह कश्चि-

न्मोहात् सुरां पास्यति मन्दबुद्धिः । अपेतधर्मा ब्रह्महा चैव स स्यादस्मिन् लोके गर्हितः स्यात्परे च ॥ ६५ ॥ मया चैतां विप्रधर्मोक्तिसीमां मर्य्यादां वै स्थापितां सर्वलोके । सन्तो विप्राः शुश्रुवांसो गुरूणां देवा लोकाश्चोपशृण्वन्तु सर्वे ॥ ६६ ॥ इत्युदीदमुक्त्वा स महानुभावस्तपोनिधीनां निधिरप्रमेयः । तान्दानवान्देवविमूढबुद्धीनिदं समाहूय वचोऽभ्युवाच ॥ ६७ ॥ आचक्षे वो दानवा बालिशाः स्थ सिद्धः कचो वत्स्यति मत्समीपे । सञ्जीवनीं प्राप्य विद्यां महात्मा तुल्यप्रभावो ब्राह्मणो ब्रह्मभूतः ॥ ६८ ॥ एतावदुक्त्वा वचनं विरराम स भार्गवः । दानवा विस्मयाविष्टाः प्रययुः स्वं निवेशनम् ॥ ६९ ॥ गुरोरस्य समीपे तु दशवर्षशतानि सः । अनुज्ञातः कचो गन्तुमियेष त्रिदशालयम् ॥ ७० ॥

इत्यादिपर्वणि सम्भवपर्वणि ययात्युपाख्याने षट्सप्ततोऽध्यायः ॥ ७६ ॥

—:०:—

वैशम्पायन उवाच । समाप्तव्रतं तन्तु विसृष्टं गुरुणा तदा । प्रस्थितं त्रिदशावासं देवयान्यब्रवीदिदम् ॥ १ ॥ ऋषेरङ्गिरसः पौत्र दृप्तेनाभिजनेन च । भ्राजसे विद्यया चैव तपसा च दमेन च ॥ २ ॥ ऋषिर्यथाङ्गिरा मान्यः पितुर्मम महायशाः । तथा मान्यश्च पूज्यश्च मम भूयो दृढस्मृतिः ॥ ३ ॥ एवं ज्ञात्वा विजानीहि यद्ब्रवीमि तपोधन । व्रतस्थेनियमोपेते यथा वर्त्तिष्यहं त्वयि ॥ ४ ॥ स समाप्तविद्यो मां भक्तां भजितुमर्हसि । गृह्णीष्व पाणिं विधिवन्मम मन्त्रपुरस्कृतम् ॥ ५ ॥

कच उवाच । पूज्यो मान्यश्च भगवान्यथा तव पिता मम । तथा त्वमनवद्याङ्गि पूजनीयतरा मम ॥ ६ ॥ प्राणेभ्योऽपि प्रियतरा भार्गवस्य महात्मनः । त्वं भद्रे धर्मतः पूज्या गुरुपुत्री सदा

मम ॥ ७ ॥ यथा मम गुरुर्नित्यं मान्यः शुक्रः पिता तव । देवयानि तथैव त्वं नैवं मां वक्तुमर्हसि ॥ ८ ॥

देवयान्युवाच । गुरुपुत्रस्य पुत्रो वै न त्वं पुत्रश्च मे पितुः । तस्मात् पूजश्च मान्यश्च ममापि त्वं द्विजोत्तम ॥ ९ ॥ असुरैर्हन्यमाने च कच त्वयि पुनः पुनः । तदा प्रभृति या प्रीतिस्तां त्वमद्य स्मरस्व मे ॥ १० ॥ सौहार्दे चानुरागे च वेत्थ मे भक्तिमुत्तमाम् । न मामर्हसि धर्मज्ञ त्यक्तुं भक्तामनागसम् ॥ ११ ॥

कच उवाच । अनियोज्ये नियोगे मां नियुनक्षि शुभव्रते । प्रसीद सुभ्रु त्वं मह्यं गुरोर्गुरुतरा शुभे ॥ १२ ॥ यत्रोषितं विशालाक्षि त्वया चन्द्रनिभानने । तत्राहमुषितो भद्रे कुक्षौ काव्यस्य भाविनि ॥ १३ ॥ भगिनी धर्मतो मे त्वं मैवं वोचः सुमध्यमे । सुखमस्मुषितो भद्रे न मन्युर्विद्यते मम ॥ १४ ॥ आपृच्छे त्वां गमिष्यामि शिवमाशंस मे पथि । अविरोधेन धर्मस्य स्मर्त्तव्योऽस्मि कथान्तरे । अप्रमत्तोत्थिता नित्यमाराधय गुरुं मम ॥ १५ ॥

देवयान्युवाच । यदि मां धर्मकामार्थं प्रत्याख्यास्यसि याचितः । ततः कच न ते विद्या सिद्धिमेषा गमिष्यति ॥ १६ ॥

कच उवाच । गुरुपुत्रीति कृत्वाहं प्रत्याचक्षे न दोषतः । गुरुणा चाननुज्ञातः काममेवं शपस्व माम् ॥ १७ ॥ आर्षं धर्मं ब्रुवाणोऽहं देवयानि यथा त्वया । शप्तो नार्होऽस्मि शापस्य कामतोऽद्य न धर्मतः ॥ १८ ॥ तस्माद्भवत्या यः कामो न तथा स भविष्यति । ऋषिपुत्रो न ते कश्चिज्जातु पाणिं ग्रहीष्यति ॥ १९ ॥ फलिष्यति न ते विद्या यत्त्वं मामात्थ तत्तथा । अध्यापयिष्यामि तु यं तस्य विद्या फलिष्यति ॥ २० ॥

वैशम्पायन उवाच । एवमुक्त्वा द्विजश्रेष्ठो देवयानीं कचस्तदा । विद्यागर्वात्तं शीघ्रं जगाम द्विजसत्तमः ॥ २१ ॥ तमा-

गतमभिप्रेक्ष्य देवा इन्द्रपुरोगमाः । बृहस्पतिं समाज्येदं कचं वचनमब्रुवन् ॥ २२ ॥

देवा ऊचुः । यत्त्वयास्मद्धितं कर्म कृतं वै परमाद्भुतम् । न ते यशः प्रणशिता भागभाक्त्वं भविष्यसि ॥ २३ ॥

इत्यादिपर्वणि सम्भवपर्वणि ययात्युपाख्याने सप्तसप्ततोऽध्यायः ॥ ७७ ॥

वैशम्पायन उवाच । कृतविद्ये कचे प्राप्ते हृष्टरूपा दिवौकसः । कचादधीत्य तां विद्यां कृतार्था भरतर्षभ ॥ १ ॥ सर्व एव समागम्य शतक्रतुमथाब्रुवन् । कालस्ते विक्रमस्याद्य जहि शत्रून् पुरन्दर ॥ २ ॥ एवमुक्तस्तु सहितैस्त्रिदशैर्मघवांस्तदा । तथेत्युक्त्वा प्रचक्राम सोऽपश्यत वने स्त्रियः ॥ ३ ॥ क्रीडन्तीनान्तु कन्यानां वने चैत्ररथोपमे । वायुभूतः स वस्त्राणि सर्वाण्येवं व्यमिश्रयत् ॥ ४ ॥ ततो जलात्समुत्तीर्य कन्यास्ताः सहितास्तदा । वस्त्राणि जगृहुस्तानि यथासन्नान्यनेकशः ॥ ५ ॥ तत्र वासो देवयान्याः शर्मिष्ठा जगृहे तदा । व्यतिमिश्रमजानन्ती दुहिता वृषपर्वणः ॥ ६ ॥ ततस्तयोर्मिथस्तत्र विरोधः समजायत । देवयान्याश्च राजेन्द्र शर्मिष्ठायाश्च तत्कृते ॥ ७ ॥

देवयान्युवाच । कस्माद्गृह्णासि मे वस्त्रं शिष्या भूत्वा ममासुरि । समुदाचारहीनाया न ते साधु भविष्यति ॥ ८ ॥

शर्मिष्ठोवाच । आसीनञ्च शयानञ्च पिता ते पितरं मम । स्तौति वन्दीव चाभीक्ष्णं नीचैः स्थित्वा विनीतवत् ॥ ९ ॥ याचतस्त्वं हि दुहिता सुवतः प्रतिगृह्णतः । सुताहं स्तूयमानस्य ददतोऽप्रतिगृह्णतः ॥ १० ॥ आदुन्वस्व विदुन्वस्व दुह्य कुप्यस्व

आचक्ष्व । अनायुधा सायुधाया रिक्ता क्षुभ्यसि भिक्षुकि ॥ ११ ॥ लक्षयसे प्रतियोद्धारं न हि त्वां गणयाम्यहम् ।

वैशम्पायन उवाच । समुच्छ्रयं देवयानीं गतां सक्तां च वाससि । शर्मिष्ठा प्राक्षिपत् कूपे ततः स्वपुरमागमत् ॥ १२ ॥ इतीयमिति विज्ञाय शर्मिष्ठा पापनिश्चया । अनवेक्ष्य ययौ वेश्म क्रोधवेगपरायणा ॥ १३ ॥ अथ तं देशमभ्यागाद्ययातिर्नहुषात्मजः । आन्तयुग्यः आन्तहयो वृगलिप्सुः पिपासितः ॥ १४ ॥ स नाहुषः प्रेक्षमाणः उदपानं गतोदकम् । ददर्श राजा तां तत्र कन्यामग्निशिखामिव ॥ १५ ॥ तामप्रच्छत्स दृष्ट्वैव कन्यामप्सरवर्णिनीम् । सान्त्वयित्वा नृपश्रेष्ठः श्लक्ष्णया परमवल्गुना ॥ १६ ॥ का त्वं तन्वनखी श्यामा सुदृष्टमणिकुण्डला । दीर्घं ध्यायसि चात्यर्थं कस्माच्छोचसि चातुरा ॥ १७ ॥ कथञ्च पतितास्यस्मिन् कूपे वीरुत्तृणावृते । दुहिता चैव कस्य त्वं वद सत्यं सुमध्यमे ॥ १८ ॥

देवयान्युवाच । योऽसौ देवैर्हतान्दैत्यानुत्थापयति विद्यया । तस्य शुक्रस्य कन्याहं स मां नूनं न बुध्यते ॥ १९ ॥ एष मे दक्षिणो राजन् पाणिस्तन्वनखाङ्गुलिः । समुद्वह गृहीत्वा मां कुलीनस्त्वं हि मे मतः ॥ २० ॥ जानामि त्वामहं शान्तं वीर्यवन्तं यशस्विनम् । तस्मान्मां पतितामस्मात् कूपादुद्धर्तुमर्हसि ॥ २१ ॥

वैशम्पायन उवाच । तामथो ब्राह्मणीं राजा विज्ञाय नहुषात्मजः । गृहीत्वा दक्षिणे पाणावुज्जहार ततोऽवटात् ॥ २२ ॥ उद्धृत्य चैनां तरसा तस्मात् कूपान्नराधिपः । आमन्त्रयित्वा सुश्रोणीं ययातिः स्वपुरं ययौ ॥ २३ ॥ गते तु नाहुषे तस्मिन् देवयान्यप्यनिन्दिता । उवाच शोकसन्तप्ता वृषपर्वाणमागतं पुरः ॥ २४ ॥

देवयान्युवाच । त्वरितं घूर्णिके गच्छ शीघ्रमाचक्ष्व मे पितुः । नेदानीं सम्भवेच्यामि नगरं वृषपर्वणः ॥ २५ ॥

वैशम्पायन उवाच । सा तत्र त्वरितं गत्वा घूर्णिकासुरमन्दिरम् । दृष्ट्वा काव्यसुवाचेदं सम्भ्रमाविष्टचेतना ॥ २६ ॥ आचचक्षे महाब्रह्मन्देवयानीं वने हृताम् । शर्मिष्ठया महाभाग दुहित्रा वृषपर्वणः ॥ २७ ॥ श्रुत्वा दुहितरं काव्यस्तत शर्मिष्ठया हृताम् । त्वरया निर्ययौ दुःखान्मागमाणः सुतां वने ॥२८॥ दृष्ट्वा दुहितरं काव्यो देवयानीं ततो वने । बाहुभ्यां संपरिष्वज्य दुःखितो वाक्यमब्रवीत् ॥२९॥ आत्मदोषैर्नियच्छन्ति सर्वे दुःखसुखे जनाः । मन्ये दुश्चरितं तेऽस्ति यस्येयं निष्कृतिः कृता ॥ ३० ॥

देवयान्युवाच । निष्कृतिर्मेऽस्तु वा मास्तु शृणुष्वावहितो मम । शर्मिष्ठया यदुक्तास्मि दुहित्रा वृषपर्वणः ॥ ३१ ॥ सत्यं किलैतत्पुरा प्राह दैत्यानामसि गायनः । एवं हि मे कथयति शर्मिष्ठा वार्षपर्वणी ॥ ३२ ॥ वचनं तीक्ष्णपरुषं क्रोधरक्तेक्षणा भृशम् । स्तुवतो दुहिता नित्यं याचतः प्रतिगृह्णतः ॥ ३३ ॥ अहन्तु स्तूयमानस्य ददतोऽप्रतिगृह्णतः । इदं मामाह शर्मिष्ठा दुहिता वृषपर्वणः । क्रोधसंरक्तनयना दर्पपूर्णा पुनः पुनः ॥३४॥ यद्यहं स्तुवतस्तात दुहिता प्रतिगृह्णतः । प्रसादयिष्ये शर्मिष्ठामित्युक्ता तु सखी मया ॥ ३५ ॥

शुक्र उवाच । स्तुवतो दुहिता न त्वं याचतः प्रतिगृह्णतः । अस्तोतुः स्तूयमानस्य दुहिता देवयान्यसि ॥ ३६ ॥ वृषपर्वैव तद्वेद यको राजा च नाहुषः । अचिन्त्यं ब्रह्म निर्द्वन्द्वमैश्वरं हि बलं मम ॥ ३७ ॥ यच्च किञ्चित्सर्वगतं भूमौ वा यदि वा दिवि । तस्याहमीश्वरो नित्यं तुष्टेनोक्तः स्वयम्भुवा ॥ ३८ ॥ अहं जलं विसृजामि प्रजानां हितकाम्यया । पुष्णाम्योषधयः सर्वा इति सत्यं ब्रवीमि ते ॥ ३९ ॥

वैशम्पायन उवाच । एवं विषादमापन्नां मन्युना सम्प्रमोहिताम् । वचनैर्मधुरैः श्लक्ष्णैः सान्त्वयामास तां पिता ॥४०॥

इत्यादिपर्वणि सम्भवपर्वणि ययात्युपाख्याने
चतुःसप्ततोऽध्यायः ॥ ७८ ॥

—०—

शुक्र उवाच । यः परेषां नरो नित्यमतिवादांस्तितिक्षते । देवयानि विजानीहि तेन सर्वमिदं जितम् ॥ १ ॥ यः समुत्पतितं क्रोधं निगृह्णाति हयं यथा । स वन्तेत्युच्यते सद्भिर्न यो रश्मिषु सज्जते ॥ २ ॥ यः समुत्पतितं क्रोधमक्रोधेन निरस्यति । देवयानि विजानीहि तेन सर्वमिदं जितम् ॥ ३ ॥ यः समुत्पतितं क्रोधं क्षमयेह निरस्यति । यथोरगस्त्वचं जीर्णां स वै पुरुष उच्यते ॥ ४ ॥ यः सन्धारयते मन्युं योऽतिवादांस्तितिक्षते । यश्च तप्तो न तपति दृढं सोऽर्थस्य भाजनम् ॥ ५ ॥ यो यजेदपरिश्रान्तो मासि मासि शतं समाः । न क्रुद्ध्येच्च सर्वस्य तयोरक्रोधनोऽधिकः ॥ ६ ॥ यत् कुमाराः कुमार्यश्च वैरं कुर्युरेतसः । न तत्प्राज्ञोऽनुकुर्वीत न विदुस्ते बलाबलम् ॥ ७ ॥

देवान्युवाच । वेदाहं तात बालापि धर्माणां चदिहान्तरम् । अक्रोधे चातिवादे च वेद चापि बलाबलम् ॥ ८ ॥ शिष्यस्याशिष्यवृत्तं सु न चन्तव्यं बुभूषता । तस्मात् सङ्कीर्णवृत्तेषु वासो मम न रोचते ॥ ९ ॥ नृमांसो ये हि निन्दन्ति वृत्तेनाभिजनेन च । न तेषु निवसेत्प्राज्ञः श्रेयोऽर्थी पापबुद्धिषु ॥ १० ॥ ये त्वेनमभिजानन्ति वृत्तेनाभिजनेन वा । तेषु साधुषु वस्तव्यं स वासः श्रेष्ठ उच्यते ॥ ११ ॥ वाग्दुरुक्तं महाघोरं दुहितुर्वृषपर्वणः । मम मन्युति हृदयमग्निकाम इवारणिम् ॥ १२ ॥ न ह्यतो दुष्करतरं मन्ये लोकेष्वपि त्रिषु ।

यः सपत्नश्रियं दीप्तां हीनयोः पर्य्युपासते । मरणं शोभनं तस्य इति विद्वज्जना विदुः ॥ १३ ॥

इत्यादिपर्वणि सम्भवपर्वणि ययात्युपाख्याने एकोनाशीतितमोऽध्यायः ॥ ७९ ॥

—•—

वैशम्पायन उवाच । ततः काव्यो भृगुश्रेष्ठः समन्युरुपगम्य ह । वृषपर्वाणमासीनमित्युवाचाविचारयन् ॥ १ ॥ नाधर्मश्चरितो राजन् सद्यः फलति गौरिव । शनैरावर्त्यमानो हि कर्त्तुर्मूलानि कृन्तति ॥ २ ॥ पुत्रेषु वा नप्तृषु वा नचेदात्मनि पश्यति । फलत्येव ध्रुवं पापं गुरुभुक्तमिवोदरे ॥ ३ ॥ यदघातयिथा विप्रं कचमाङ्गिरसं तदा । अपापशीलं धर्मज्ञं शुश्रूषुं मज्ञ्हे रतम् ॥ ४ ॥ वधादनर्हतस्तस्य वधाच्च दुहितुर्मम । वृषपर्वन्निबोधेदं त्यक्ष्यामि त्वां सबान्धवम् ॥ ५ ॥ स्थातुं त्वद्विषये राजन्नशक्ष्यामि त्वया सह । अहो मानमभिजानासि दैत्य मिथ्या प्रलापिनम् । यथेममात्मनो दोषं न नियच्छस्युपेक्षसे ॥ ६ ॥

वृषपर्वोवाच । नाधर्मं न मृषा वादं त्वयि जानामि भार्गव । त्वयि धर्मश्च सत्यञ्च तत्प्रसीदतु मे भवान् ॥ ७ ॥ यद्यस्मान्नापहाय त्वमितो गच्छसि भार्गव । समुद्रं सम्प्रवेक्ष्यामो नान्यदस्ति परायणम् ॥ ८ ॥

शुक्र उवाच । समुद्रं प्रविशध्वं वा दिशो वा द्रवतासुराः । दुहितुर्नाप्रियं सोढुं शक्नोऽहं दयिता हि मे ॥ ९ ॥ प्रसाद्यतां देवयानी जीवितं यत्र मे स्थितम् । योगक्षेमकरस्तेऽहमिन्द्रस्येव बृहस्पतिः ॥ १० ॥

वृषपर्वोवाच । यत्किञ्चिदसुरेन्द्राणां विद्यते वसु भार्गव । भुवि हस्तिगवाश्वञ्च तस्य त्वं मम चेश्वरः ॥ ११ ॥

शुक्र उवाच। यत्किञ्चिदस्ति द्रविणं दैत्येन्द्राणां महासुर। तस्येश्वरोऽस्मि यद्येषा देवयानी प्रसाद्यताम् ॥ १२ ॥

वैशम्पायन उवाच। एवमुक्तस्ययेत्याह वृषपर्वा महाकविः। देवयान्यन्तिकं गत्वा तमर्थं प्राह भार्गवः ॥ १३ ॥

देवयान्युवाच। यदि त्वमीश्वरस्तात राज्ञो वित्तस्य भार्गव। नाभिजानामि तत्तोऽहं राजा तु वदतु स्वयम् ॥ १४ ॥

वृषपर्वोवाच। यं काममभिकामासि देवयानि शुचिस्मिते। तं तेऽहं सम्प्रदास्यामि यदि वापि हि दुर्लभम् ॥ १५ ॥

देवयान्युवाच। दासीं कन्यासहस्रेण शर्मिष्ठामभिकामये। अनु मां तत्र गच्छेत्सा यत्र दद्याच्च मे पिता ॥ १६ ॥

वृषपर्वोवाच। उत्तिष्ठ त्वं गच्छ धात्रि शर्मिष्ठां शीघ्रमानय। यच्च कामयते कामं देवयानी करोतु तम् ॥ १७ ॥

वैशम्पायन उवाच। ततो धात्री तत्र गत्वा शर्मिष्ठां वाक्यमब्रवीत्। उत्तिष्ठ भद्रे शर्मिष्ठे ज्ञातीनां सुखमावह ॥ १८ ॥ त्यजति ब्राह्मणः शिष्यान्देवयान्या प्रचोदितः। सा यं कामयते कामं स कार्य्योऽद्य त्वयानघे ॥ १९ ॥

शर्मिष्ठोवाच। यं सा कामयते कामं करवाण्यहमद्य तम्। यद्येवमाह्वयेच्छुक्रो देवयानीकृते हि माम्। महीयान्मागमच्छुक्रो देवयानी च मत्कृते ॥ २० ॥

वैशम्पायन उवाच। ततः कन्यासहस्रेण वृता शिविकया तदा। पितुर्नियोगात्त्वरिता निश्चक्राम पुरोत्तमात् ॥ २१ ॥

शर्मिष्ठोवाच। अहं दासीसहस्रेण दासी ते परिचारिका। अनु त्वां तत्र यास्यामि यत्र दास्यति ते पिता ॥ २२ ॥

देवयान्युवाच। स्तुवतो दुहिताहं ते याचतः प्रतिगृह्णतः। स्तूयमानस्य दुहिता कथं दासी भविष्यसि ॥ २३ ॥

शर्मिष्ठोवाच। येन केनचिदार्त्तानां ज्ञातीनां सुखमावहेत्। अतस्त्वामनुयास्यामि यत्र दास्यति ते पिता ॥ २४ ॥

वैशम्पायन उवाच। प्रतिश्रुते दासभावे दुहित्रा वृषपर्वणः। देवयानी वृषश्रेष्ठ पितरं वाक्यमब्रवीत् ॥ २५ ॥

देवयान्युवाच। प्रविशामि पुरं तात तुष्टास्मि द्विजसत्तम। अमोघं तव विज्ञानमस्तु विद्याबलञ्च ते ॥ २६ ॥

वैशम्पायन उवाच। एवमुक्तो दुहित्रा स द्विजश्रेष्ठो महायशाः। प्रविवेश पुरं हृष्टः पूजितः सर्वदानवैः ॥ २७ ॥

इत्यादिपर्वणि सम्भवपर्वणि ययात्युपाख्यानेऽशीतितमोऽध्यायः ॥ ८० ॥

वैशम्पायन उवाच। अथ दीर्घस्य कालस्य देवयानी वृषोत्तम। वनन्तदेव निर्याता क्रीड़ार्थं वरवर्णिनी ॥ १ ॥ तेन दासीसहस्रेण सार्द्धं शर्मिष्ठया तदा। तमेव देशं सम्प्राप्ता यथाकामं चचार सा ॥ २ ॥ ताभिः सखीभिः सहिता सर्वाभिर्मुदिता भृशम्। क्रीड़न्त्योऽभिरताः सर्वाः पिबन्त्यो मधुमाधवीम् ॥ ३ ॥ खादन्त्यो विविधान् भक्ष्यान्विदशन्त्यः फलानि च। पुनश्च नाहुषो राजा स्वगलिष्यर्यदृच्छया ॥ ४ ॥ तमेव देशं सम्प्राप्तो जलार्थी श्रमकर्षितः। ददर्श देवयानीं स शर्मिष्ठां ताश्च योषितः ॥ ५ ॥ पिबन्तीर्ल्ललमानाश्च दिव्याभरणभूषिताः। उपविष्टाश्च ददृशे देवयानीं शुचिस्मिताम् ॥ ६ ॥ रूपेणाप्रतिमां तासां स्त्रीणां मध्ये वराङ्गनाम्। शर्मिष्ठया सेव्यमानां पादसंवाहनादिभिः ॥ ७ ॥

ययातिरुवाच। द्वाभ्यां कन्यासहस्राभ्यां ह कन्ये परिवारिते। गोत्रे च नामनी चैव ह्योः पृच्छाम्यहं शुभे ॥ ८ ॥

देवयान्युवाच। आख्यास्याम्यहमादत्स्व वचनं मे नराधिप। शुक्रो नामासुरगुरुः सुतां जानीहि तस्य माम् ॥ ९ ॥ इयञ्च मे सखी दासी यत्राहं तत्र गामिनी। दुहिता दानवेन्द्रस्य शर्मिष्ठा वृषपर्वणः ॥ १० ॥

ययातिरुवाच। कथन्नु ते सखी दासी कन्येयं वरवर्णिनी। असुरेन्द्रसुता सुभ्रुः परङ्कीर्तूहलं हि मे ॥ ११ ॥

देवयान्युवाच। सर्व एव नरश्रेष्ठ विधानमनुवर्त्तते। विधानविहितं मत्वा मा विचित्राः कथाः कथाः ॥ १२ ॥ राजवद्रूपवेशौ ते ब्राह्मीं वाचं बिभर्षि च। को नाम त्वं कुतश्चासि कस्य पुत्रश्च शंस मे ॥ १३ ॥

ययातिरुवाच। ब्रह्मचर्य्येण वेदो मे कृत्स्नः श्रुतिपथं गतः। राजाहं राजपुत्रश्च ययातिरिति विश्रुतः ॥ १४ ॥

देवयान्युवाच। केनार्थेन नृपते दूरं देशमुपागतः। जिघृक्षुर्वारिजं किञ्चिदथ वा मृगलिप्सया ॥ १५ ॥

ययातिरुवाच। मृगलिप्सुरहं भद्रे पानीयार्थमुपागतः। बहुधाप्यनुयुक्तोऽस्मि तदनुज्ञातुमर्हसि ॥ १६ ॥

देवयान्युवाच। द्वाभ्यां कन्यासहस्राभ्यां दास्या शर्मिष्ठया सह। त्वदधीनास्मि भद्रं ते सखा भर्त्ता च मे भव ॥ १७ ॥

ययातिरुवाच। विद्वीश्वनसि भद्रन्ते न त्वामर्होऽस्मि भाविनि। अविवाह्या हि राजानो देवयानि पितुस्तव ॥ १८ ॥

देवयान्युवाच। संसृष्टं ब्रह्मणा क्षत्रं क्षत्रेण ब्रह्म संहितम्। ऋषिस्त्वाप्यृषिपुत्रञ्च नाऽऽषाङ्ग वहस्व माम् ॥ १९ ॥

ययातिरुवाच। एकदेहोद्भवा वर्णाश्चत्वारोऽपि वराङ्गने। पृथग्धर्माः पृथक्शौचास्तेषान्तु ब्राह्मणो वरः ॥ २० ॥

देवयान्युवाच। पाणिधर्मो नाऽऽषायं न पुंभिः सेवितः पुरा। तं मे त्वमग्रहीरग्रे दृष्टोऽसि त्वामहं ततः ॥ २१ ॥ कथं

नु मे मनस्विन्याः पाणिमन्यः पुमान् स्पृशेत्। गृहीतश्चपिपुत्रेण स्वयं वाप्यृषिणा त्वया॥ २२॥

ययातिरुवाच। क्रुद्धादाशीविषात्सर्पाज्ज्वलनात्सर्वतोमुखात्। दुराधर्षतरो विप्रो ज्ञेयः पुंसा विजानता॥ २३॥

देवयान्युवाच। कथमाशीविषात्सर्पाज्ज्वलनात्सर्वतोमुखात्। दुराधर्षतरो विप्र इत्याह पुरुषर्षभ॥ २४॥

ययातिरुवाच। एकमाशीविषो हन्ति शस्त्रेणैकश्च बध्यते। हन्ति विप्रः सराष्ट्राणि पुराण्यपि हि क्रोपितः॥ २५॥ दुराधर्षतरो विप्रस्तस्माद्भीरु मतो मम। अतोऽदत्ताञ्च पित्रा त्वां भद्रे न विवहाम्यहम्॥ २६॥

देवयान्युवाच। दत्तां वहस्व तस्मां त्वं पित्रा राजन् हृतो मया। अयाचतो भयं नास्ति दत्ताञ्च प्रतिगृह्णतः॥ २७॥

वैशम्पायन उवाच। त्वरितं देवयान्याथ सन्दिष्टं पितुरात्मनः। सर्वं निवेदयामास धात्री तस्मै यथातथम्॥ २८॥ श्रुत्वैव च स राजानं दर्शयामास भार्गवः। दृष्ट्वैव चागतं शुक्रं ययातिः पृथिवीपतिः। ववन्दे ब्राह्मणं काव्यं प्राञ्जलिः प्रणतः स्थितः॥ २९॥

देवयान्युवाच। राजायं नाऽवधीत्तात दुर्गमे पाणिमग्रहीत्। नमस्ते देहि मामस्मै लोके नान्यं पतिं वृणे॥ ३०॥

शुक्र उवाच। वृतोऽनया पतिर्वीर सुतया त्वं ममेष्टया। गृहाणेमां मया दत्तां मर्षिर्नाऽवमन्यते॥ ३१॥

ययातिरुवाच। अधर्मो न स्पृशेदेवं महाभाग्यमिह भार्गव। वर्णसङ्करजो ब्रह्मन्निति त्वां न वृणोम्यहम्॥ ३२॥

शुक्र उवाच। अधर्मात्त्वां विमुञ्चामि वृणु त्वं वरमीप्सितम्। अस्मिन्विवाहे मास्वासीरहं पापं नुदामि ते॥ ३३॥ वहस्व भार्यां धर्मेण देवयानीं सुमध्यमाम्। अनया सह

सम्प्रीतिमतुलां समवाप्नुहि ॥३४॥ इयं चापि कुमारी ते शर्मिष्ठा वार्षपर्वणी । संपूज्या सततं राजन्मा चैनां शयने ह्वये ॥ ३५ ॥

वैशम्पायन उवाच । एवमुक्तो ययातिस्तु शुक्रं कृत्वा प्रदक्षिणम् । शास्त्रोक्तविधिना राजा विवाहमकरोच्छुभम् ॥ ३६ ॥ लब्ध्वा शुक्रान्महद्वित्तं देवयानीं तदोत्तमाम् । द्विसहस्रेण कन्यानां तथा शर्मिष्ठया सह ॥ ३७ ॥ संपूजितश्च शुक्रेण दैत्यैश्च नृपसत्तमः । जगाम स्वपुरं हृष्टोऽनुज्ञातोऽथ महात्मना ॥ ३८ ॥

इत्यादिपर्वणि सम्भवपर्वणि ययात्युपाख्याने
एकाशीतोऽध्यायः ॥ ८१ ॥

वैशम्पायन उवाच । ययातिः स्वपुरं प्राप्य महेन्द्रपुरसन्निभम् । प्रविश्यान्तःपुरं तत्र देवयानीं न्यवेशयत् ॥ १ ॥ देवयान्याश्चानुमते सुतां तां वृषपर्वणः । अशोकवनिकाभ्याशे गृहं कृत्वा न्यवेशयत् ॥ २ ॥ ददौ दासीसहस्रेण शर्मिष्ठां वार्षपर्वणीम् । वासोभिरन्नपानैश्च संविभज्य सुसत्कृताम् ॥ ३ ॥ देवयान्या तु सहितः स नृपो नहुषात्मजः । विजहार बहूनब्दान्देववदुदितः सुखी ॥ ४ ॥ ऋतुकाले तु संप्राप्ते देवयानी वराङ्गना । लेभे गर्भं प्रथमतः कुमारं च व्यजायत ॥ ५ ॥ गते वर्षसहस्रे तु शर्मिष्ठा वार्षपर्वणी । ददर्श यौवनं प्राप्ता ऋतुं सा चान्वचिन्तयत् ॥ ६ ॥ ऋतुकालश्च संप्राप्तो न च मेऽस्ति पतिर्हृतः । किं प्राप्तं किन्नु कर्त्तव्यं किस्वा कृतं भवेत् ॥ ७ ॥ देवयानी प्रजातासौ वृथाहं प्राप्तयौवना । यथा तथा वृतो भर्त्ता तथैवाहं वृणोमि तम् ॥ ८ ॥ राज्ञा पुत्रफलं देयमिति मे निश्चिता मतिः । अपीदानीं स धर्मात्मा दृश्यान्मे दर्शनं यदि ॥ ९ ॥ अथ निष्क्रम्य राजासौ तस्मिन् काले यदृच्छया । अशोकवनिकाभ्याशे

शर्मिष्ठां प्रेक्ष्य विष्ठितः ॥ १० ॥ तमेकं रहिते दृष्ट्वा शर्मिष्ठा चारुहासिनी । प्रत्युद्गम्याञ्जलिं कृत्वा राजानं वाक्यमब्रवीत् ॥ ११ ॥

शर्मिष्ठोवाच । सोमस्येन्द्रस्य विष्णोर्वा यमस्य वरुणस्य च । तव वा नाऽघ गृह्णे कः स्त्रियं द्रष्टुमर्हति ॥ १२ ॥ रूपाभिजनशीलैर्हि त्वं राजन्वेत्थ मां सदा । सा त्वां याचे प्रसाद्याहं क्षतुं देहि नराधिप ॥ १३ ॥

ययातिरुवाच । वेद्मि त्वां शीलसम्पन्नां दैत्यकन्यामनिन्दिताम् । रूपञ्च ते न पश्यामि सूच्यग्रमपि निन्दितम् ॥ १४ ॥ अब्रवीदुशना काव्यो देवयानीं यदावहम् । नेयमाह्वयितव्या ते शयने वार्षपर्वणी ॥ १५ ॥

शर्मिष्ठोवाच । न नर्मयुक्तं वचनं हिनस्ति न स्त्रीषु राजन्न विवाहकाले । प्राणात्यये सर्वधनापहारे पञ्चानृतान्याहुरपातकानि ॥ १६ ॥ दृष्ट्वा तु साक्ष्ये प्रवदन्तमन्यथा वदन्ति मिथ्या पतितं नरेन्द्र । एकार्थतायान्तु समाहितायां मिथ्यावदन्तं त्वनृतं हिनस्ति ॥ १७ ॥

ययातिरुवाच । राजा प्रमाणं भूतानां स नश्येत कथं वदन् । अर्थकृच्छ्रमपि प्राप्य न मिथ्या कर्त्तुमुत्सहे ॥ १८ ॥

शर्मिष्ठोवाच । समावेतौ मतौ राजन् पतिः सख्याश्च यः पतिः । समं विवाहमित्याहुः सख्या मेऽसि हृतः पतिः ॥ १९ ॥

ययातिरुवाच । दातव्यं याचमानेभ्य इति मे व्रतमाहितम् । त्वञ्च याचसि मां कामं ब्रूहि किं करवाणि ते ॥ २० ॥

शर्मिष्ठोवाच । अधर्मात्त्राहि मां राजन् धर्मञ्च प्रतिपादय । त्वत्तोऽपत्यवती लोके चरेयं धर्ममुत्तमम् ॥ २१ ॥ त्वय एवाधना राजन् भार्य्या दासस्त्रया सुतः । यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम् ॥ २२ ॥ देवयान्या भुजिष्यास्मि वश्या च तव भार्गवी । सा चाहञ्च त्वया राजन् भजनीये भजस्व माम् ॥ २३ ॥

वैशम्पायन उवाच । एवमुक्तस्तु राजा स तथ्यमित्यभिचिन्त्य च । पूजयामास शर्मिष्ठां धर्मञ्च प्रत्यपादयत् ॥ २४ ॥ स समागम्य शर्मिष्ठां यथाकाममवाप्य च । अन्योन्यं चापि सम्पूज्य जग्मतुस्तौ यथागतम् ॥ २५ ॥ तस्मिन् समागमे सुभ्रूः शर्मिष्ठा चारुहासिनी । लेभे गर्भं प्रथमतस्तस्मान्नृपतिसत्तमात् ॥ २६ ॥ प्रजज्ञे च ततः काले राजन्राजीवलोचना । कुमारं देवगर्भाभं राजीवनिभलोचनम् ॥ २७ ॥

इत्यादिपर्वणि सम्भवपर्वणि ययात्युपाख्याने द्व्यशीतितोऽध्यायः ॥ ८२ ॥

—•—

वैशम्पायन उवाच । श्रुत्वा कुमारं जातन्तु देवयानी शुचिस्मिता । चिन्तयामास दुःखार्त्ता शर्मिष्ठां प्रति भारत ॥ १ ॥ अभिगम्य च शर्मिष्ठां देवयान्यब्रवीदिदम् ।

देवयान्युवाच । किमिदं ह्यजिनं सुभ्रु कृतं वै कामलुब्धया ॥ २ ॥

शर्मिष्ठोवाच । ऋषिरभ्यागतः कश्चिद्धर्मात्मा वेदपारगः । स मया वरदः कामं याचितो धर्मसंहितम् ॥ ३ ॥ नाहमन्यायतः काममाचरामि शुचिस्मिते । तस्माद्दपेर्मापत्यमिति सत्यं ब्रवीमि ते ॥ ४ ॥

देवयान्युवाच । शोभनं भीरु यद्येवमथ स ज्ञायते द्विजः । गोत्रनामाभिजनतो वेत्तुमिच्छामि तं द्विजम् ॥ ५ ॥

शर्मिष्ठोवाच । तपसा तेजसा चैव दीप्यमानं यथा रविम् । तं दृष्ट्वा मम सम्प्रष्टुं शक्तिर्नासीच्छुचिस्मिते ॥ ६ ॥

देवयान्युवाच । यद्येतदेवं शर्मिष्ठे न मन्युर्विद्यते मम । अपत्यं यदि ते लब्धं ज्येष्ठाच्छ्रेष्ठाच्च वै द्विजात् ॥ ७ ॥

वैशम्पायन उवाच । अन्योन्यमेवमुक्त्वा तु सख्यश्च ते

मिथः । जगाम भार्गवी वेश्म तथमित्यवजग्मुषी ॥ ८ ॥ ययातिर्देवयान्यान्तु पुत्रावजनयन्नृपः । यदुञ्च तुर्वसुञ्चैव शक्रविष्णू इवापरौ ॥ ९ ॥ तस्मादेव तु राजर्षेः शर्मिष्ठा वार्षपर्वणी । द्रुह्युं चानुञ्च पूरुञ्च त्रीन् कुमारानजीजनत् ॥ १० ॥ ततः काले तु कस्मिंश्चिद्देवयानी शुचिस्मिता । ययातिसहिता राजन् जगाम रक्षितं वनम् ॥ ११ ॥ ददर्श च तदा तत्र कुमारान्देवरूपिणः । क्रीड़मानान् सुविश्रब्धान्स्मिता चेदमब्रवीत् ॥ १२ ॥

देवयान्युवाच । कस्यैते दारका राजन्देवपुत्रोपमाः शुभाः । वर्चसा रूपतश्चैव सदृशा मे मतास्तव ॥ १३ ॥

वैशम्पायन उवाच । एवं पृष्ट्वा तु राजानं कुमारान् पर्य्यपृच्छत ॥ १४ ॥

देवयान्युवाच । किं नामधेयं वंशो वः पुत्रकाः कस्य वः पिता । प्रब्रूत मे यथातथ्यं श्रोतुमिच्छामि तं त्वहम् ॥ १५ ॥ तेऽदर्शयन् प्रदेशिन्या तमेव नृपसत्तमम् । शर्मिष्ठां मातरञ्चैव तथाचख्युश्च दारकाः ॥ १६ ॥

वैशम्पायन उवाच । इत्युक्ता सहितास्ते तु राजानमुपचक्रमुः । नाभ्यनन्दत तान्राजा देवयान्यास्तदन्तिके ॥ १७ ॥ ऋदन्तस्तेऽथ शर्मिष्ठामभ्ययुर्बालकास्ततः । श्रुत्वा तु तेषां बालानां सव्रीड़ इव पार्थिवः ॥ १८ ॥ दृष्ट्वा तु तेषां बालानां प्रणयं पार्थिवं प्रति । बुद्ध्वा च तत्त्वं सा देवी शर्मिष्ठामिदमब्रवीत् ॥ १९ ॥

देवयान्युवाच । मदधीना सती कस्मादकार्षीर्विप्रियं मम । तन्मेऽसुरधर्मं त्वमाश्रिता न बिभेषि मे ॥ २० ॥

शर्मिष्ठोवाच । यदुक्तऋषिरित्येव तत्सत्यं वारुहासिनि । न्यायतो धर्मतश्चैव चरन्ती न बिभेमि ते ॥ २१ ॥ यदा त्वया हृतो भर्त्ता हृत एव तदा मया । सखीभर्त्ता हि धर्मेण भर्त्ता भवति शोभने ॥ २२ ॥ पूज्यासि मम मान्या च ज्येष्ठा च ब्राह्मणी

ह्यमि । वक्तोऽपि मे पूज्यतमो राजर्षिः किं न वेत्थ तत् ॥ २३ ॥

वैशम्पायन उवाच । श्रुत्वा [तस्यास्ततो वाक्यं देवयान्य-ब्रवीदिदम् । राजन्नाथे च वत्स्यामि विप्रियं मे कृतं त्वया ॥२४॥ सहसोत्पतितां श्यामां दृष्ट्वा तां साश्रुलोचनाम् । क्रूरां सकाश-ङ्काव्यस्य प्रस्थितां व्यथितस्तदा ॥ २५ ॥ अनुव्रज संभ्रान्तः पृष्ठतः सान्त्वयन्नृपः । व्यवर्तत न चैव स्म क्रोधसंरक्तलोचना ॥२७॥ अविब्रुवन्ती किंचित्सा राजानं साश्रुलोचना । अचिरादेव सम्प्राप्ता काव्यस्योशनसोऽन्तिकम् ॥२८॥ सा तु दृष्ट्वैव पितरमभिवाद्याग्रतः स्थिता । अनन्तरं ययातिस्तु पूजयामास भार्गवम् ॥ २९ ॥

देवयान्युवाच । अधर्मेण जितो धर्मः प्रवृत्तमधरोत्तरम् । शर्मिष्ठयासुरसुतास्मि दुहिता वृषपर्वणः ॥ ३० ॥ त्वयोऽस्यां जनिताः पुत्रा राज्ञा तेन ययातिना । दुर्भगायां मम द्वौ तु पुत्रौ तात ब्रवीमि ते ॥ ३१ ॥ धर्मज्ञ इति विख्यात एष राजा भृगूद्वह । अतिक्रान्तश्च मर्यादां काव्यैतत्क्षमयामि ते ॥ ३२ ॥

शुक्र उवाच । धर्मज्ञः सन्महाराज योऽधर्ममकृथाः प्रियम् । तस्माज्जरा त्वामचिराद्धर्षयिष्यति दुर्जया ॥ ३३ ॥

ययातिरुवाच । ऋतुं वै याचमानाया भगवन्नान्यचेतसा । दुहितुर्दानवेन्द्रस्य धर्ममेतत् कृतं मया ॥ ३४ ॥ ऋतुं वै याच-मानाया न दद्यात् पुमान्कृतम् । भ्रूणहेत्युच्यते ब्रह्मन् स वृष ब्रह्मवादिभिः ॥ ३५ ॥ अभिकामां स्त्रियं यश्च गम्यां रहसि याचितः । नोपैति स च धर्मेषु भ्रूणहेत्युच्यते बुधैः ॥ ३६ ॥ इत्येतानि समीक्ष्याहं कारणानि भृगूद्वह । अधर्मभयसंविग्नः शर्मिष्ठामुपजग्मिवान् ॥ ३७ ॥

शुक्र उवाच । नन्वहं प्रत्यवेक्षस्ते मदधीनोऽसि पार्थिव । मिथ्याचारस्य धर्मेषु चौर्यं भवति नाऽनघ ॥ ३८ ॥

वैशम्पायन उवाच। क्रुद्धेनोशनसा शप्तो ययातिर्नाहुषः किल। पूर्वं वयः परित्यज्य जरां सद्योऽन्वपद्यत ॥ ३९ ॥

ययातिरुवाच। अतृप्तो यौवनस्याहं देवयान्यां भृगूद्वह। प्रसादं कुरु मे ब्रह्मन् जरेयं न विशेच्च माम् ॥ ४० ॥

शुक्र उवाच। नाहं वृथा ब्रवीम्येतज्जरां प्राप्तोसि भूमिप। जरां त्वेतां त्वमन्यस्मिन् संक्रामय यदीच्छसि ॥ ४१ ॥

ययातिरुवाच। राज्यभाक् स भवेद्ब्रह्मन् पुण्यभाक्कीर्त्तिभाक्तथा। यो मे दद्याद्वयः पुत्रस्त्वद्वाननुमन्यताम् ॥ ४२ ॥

शुक्र उवाच। संक्रामयिष्यसि जरां यस्मिन्नेष्टं नहुषात्मज। मामनुध्याय भावेन न च पापमवाप्स्यसि ॥ ४३ ॥ वयो दास्यति ते पुत्रो यः स राजा भविष्यति। आयुष्मान् कीर्त्तिमांश्चैव बहुपत्यश्च वै च ॥ ४४ ॥

इत्यादिपर्वणि सम्भवपर्वणि ययात्युपाख्याने एकोनाशीतितमोऽध्यायः ॥ ८३ ॥

—:०:—

वैशम्पायन उवाच। जरां प्राप्य ययातिस्तु स्वपुरं प्राप्य चक्रिवान्। पुत्रं ज्येष्ठं वरिष्ठञ्च यदुमित्यब्रवीद्वचः ॥ १ ॥

ययातिरुवाच। जरा बली च मां तात पञ्चितानि च मर्षयुः। काव्यस्योशनसः शापान्न च तृप्तोऽस्मि यौवने ॥ २ ॥ त्वं यदो प्रतिपद्यस्व पाप्मानं जरया सह। यौवनेन त्वदीयेन चरेयं विषयानहम् ॥ ३ ॥ पूर्णे वर्षसहस्रे तु पुनस्ते यौवनं वहन्। दत्त्वा त्वं प्रतिपत्स्यामि पाप्मानं जरया सह ॥ ४ ॥

यदुरुवाच। जरायां बहवो दोषाः पानभोजनकारिताः। तस्मान्नाभिलषे तात यत्नेन इति मे मतिः ॥ ५ ॥ मितभाक्तुनिशालश्च जरया शिथिलीकृतः। वचोसङ्गतगात्रस्तु दुर्दर्शो

दुर्बलः कृशः ॥ ६ ॥ अशक्तः कार्य्यकरणे परिभूतः सयौवनैः। सहोपजीविभिश्चैव तां जरां नाभिकामये ॥ ७ ॥ सन्ति ते बहवः पुत्रा मत्तः प्रियतरा नृप। जरां ग्रहीतुं धर्मज्ञ तस्मादन्यं वृणीष्व वै ॥ ८ ॥

ययातिरुवाच। यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि। तस्मादराज्यभाक्तात प्रजा तव भविष्यति ॥ ९ ॥ तुर्वसो प्रतिपद्यस्व पाप्मानं जरया सह। यौवनेन चरेयं वै विषयांस्तव पुत्रक ॥ १० ॥ पूर्णे वर्षसहस्रे तु पुनर्दास्यामि यौवनम्। स्वञ्चैव प्रतिपत्स्यामि पाप्मानं जरया सह ॥ ११ ॥

तुर्वसुरुवाच। न कामये जरां तात कामभोगप्रणाशिनीम्। बलरूपान्तकरणीं बुद्धिप्राणप्रणाशिनीम् ॥ १२ ॥

ययातिरुवाच। यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि। तस्मात्प्रजासमुच्छेदं तुर्वसो तव यास्यति ॥ १३ ॥ सङ्कीर्णाचारधर्मेषु प्रतिलोमचरेषु च। पिशिताशिषु चान्त्येषु मूढ राजा भविष्यसि ॥ १४ ॥ गुरुदारप्रसक्तेषु तिर्य्यग्योनिगतेषु च। पशुधर्मिषु पापेषु म्लेच्छेषु त्वं भविष्यसि ॥ १५ ॥

वैशम्पायन उवाच। एवं स तुर्वसुं शप्त्वा ययाति सुतमात्मनः। शर्मिष्ठायाः सुतं द्रुह्युमिदं वचनमब्रवीत् ॥ १६ ॥

ययातिरुवाच। द्रुह्यो त्वं प्रतिपद्यस्व वर्णरूपविनाशिनीम्। जरां वर्षसहस्रं मे यौवनं स्वन्ददस्व च ॥ १७ ॥ पूर्णे वर्षसहस्रे तु पुनर्दास्यामि यौवनम्। स्वं चादास्यामि भूयोऽहं पाप्मानं जरया सह ॥ १८ ॥

द्रुह्युरुवाच। न गजं न रथं नाश्वं जीर्णो भुङ्क्ते न च स्त्रियम्। वाग्भङ्गश्चास्य भवति तां जरां नाभिकामये ॥ १९ ॥

ययातिरुवाच। यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि। तस्माद्द्रुह्यो प्रियः कामो न ते सम्पत्स्यते क्वचित् ॥ २ ॥

यत्राश्वरथमुख्यानामग्र्यानां स्याद्गतं न च । शस्त्रिनां पीठकानाञ्च गर्द्दभानान्तथैव च । वस्त्रानाञ्च गवाञ्चैव शिबिकायास्तथैव च ॥ २१ ॥ उडुपञ्चवसन्तारो यत्र नित्यं भविष्यति । यराजभाजश्चन्तं तत्र प्राप्स्यसि सान्वयः ॥ २२ ॥

ययातिरुवाच । अनो त्वं प्रतिपद्यस्व पाप्मानं जरया सह । एकं वर्षसहस्रन्तु चरेयं यौवनेन ते ॥ २३ ॥

अनुरुवाच । जीर्णः शिशुवदादत्ते कालेऽन्नमशुचिर्यथा । न जुहोति च कालेऽग्निं तां जरां नाभिकामये ॥ २४ ॥

ययातिरुवाच । यत्त्वं मे हृदयाज्जातो वयः त्वं न प्रयच्छसि । जरादोषस्त्वया प्रोक्तस्तस्मात्त्वं प्रतिलप्स्यसे ॥ २५ ॥ अजाश्च यौवनं प्राप्ता विनशिष्यन्त्यनो तव । अग्निप्रस्कन्दनपरस्त्वं चाप्येवं भविष्यसि ॥ २६ ॥

ययातिरुवाच । पूरो त्वं मे प्रियः पुत्रस्त्वं वरीयान् भविष्यसि । जरा बली च मां तात पलितानि च पश्य मे ॥ २७ ॥ काव्यस्योशनसः शापान्न च तृप्तोऽस्मि यौवने । पूरो त्वं प्रतिपद्यस्व पाप्मानं जरया सह । कञ्चित्कालं चरेयं वै विषयान् वयसा तव ॥ २८ ॥ पूर्णे वर्षसहस्रे तु पुनर्दास्यामि यौवनम् । स्वञ्चैव प्रतिपत्स्यामि पाप्मानं जरया सह ॥ २९ ॥

वैशम्पायन उवाच । एवमुक्तः प्रत्युवाच पूरुः पितरमञ्जसा । यथात्थ मां महाराज तत्करिष्यामि ते वचः ॥ ३० ॥ प्रतिपत्स्यामि ते राजन् पाप्मानं जरया सह । गृहाण यौवनं मत्तः स्वरं कामान्यथेप्सितान् ॥ ३१ ॥ जरयाहं प्रतिच्छन्नो वयोरूपधरस्तव । यौवनं भवते दत्त्वा चरिष्यामि यथात्थ माम् ॥ ३२ ॥

ययातिरुवाच । पूरो प्रीतोऽस्मि ते वत्स प्रीतश्चेदं ददामि ते । सर्वकामसमृद्धा ते प्रजा राज्ये भविष्यति ॥ ३३ ॥ एव-

मुक्त्वा ययातिस्तु स्मृत्वा काव्यं महातपाः । संक्रामयामास जरां तदा पूरौ महात्मनि ॥ ३४ ॥

इत्यादिपर्वणि सम्भवपर्वणि ययात्युपाख्याने
चतुरशीतितोऽध्यायः ॥ ८४ ॥

वैशम्पायन उवाच । पौरवेणाथ वयसा ययातिर्नहुषात्मजः । प्रीतियुक्तो नृपश्रेष्ठश्चचार विषयान् प्रियान् ॥ १ ॥ यथाकामं यथोत्साहं यथाकालं यथासुखम् । धर्माविरुद्धं राजेन्द्र यथार्हति स एव हि ॥ २ ॥ देवानतर्पयद्यज्ञैः श्राद्धैस्तद्वत्पितॄनपि । दीनाननुग्रहैरिष्टैः कामैश्च द्विजसत्तमान् ॥ ३ ॥ अतिथीनन्नपानैश्च विधिवत्परिपालनैः । आनृशंस्येन भृत्यांश्च दस्यून् स नियहेण च ॥ ४ ॥ धर्मेण च प्रजाः सर्वा यथावदनुरञ्जयन् । ययातिः पालयामास साक्षादिन्द्र इवापरः ॥ ५ ॥ स राजा सिंहविक्रान्तो युवा विषयगोचरः । अविरोधेन धर्मस्य चचार सुखमुत्तमम् ॥ ६ ॥ स संप्राप्य शुभान् कामांस्तृप्तः खिन्नश्च पार्थिवः । कालं वर्षसहस्रान्तं सस्मार मनुजाधिपः ॥ ७ ॥ परिसङ्ख्याय कालज्ञः कलाः काष्ठाश्च वीर्यवान् । यौवनं प्राप्य राजर्षिः सहस्रपरिवत्सरान् ॥ ८ ॥ विश्वाच्या सहितो रेमे व्यभ्राजन्नन्दने वने । अलकायां स कालन्तु मेरुपृष्ठे तथोत्तरे ॥ ९ ॥ यदा स पश्यते कालं धर्मात्मा तं महीपतिः । पूर्णं मत्वा ततः कालं पूरुं पुत्रमुवाच ह ॥ १० ॥ यथाकामं यथोत्साहं यथाकालमरिन्दम । सेविता विषयाः पुत्र यौवनेन मया तव ॥ ११ ॥ न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ १२ ॥ यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः । एकस्यापि न पर्याप्तं तस्मात्तृष्णां परित्यजेत्

॥ १३ ॥ या दुस्त्यजा दुर्मतिभिर्या न जीर्य्यति जीर्य्यतः। योऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः सुखम् ॥ १४ ॥ पूर्णं वर्षसहस्रं मे विषयासक्तचेतसः। तथाप्यनुदिनं तृष्णा ममैतेष्वभिजायते ॥ १५ ॥ तस्मादेनामहं त्यक्त्वा ब्रह्मण्याधाय मानसम्। निर्द्वन्द्वो निर्ममो भूत्वा चरिष्यामि मृगैः सह ॥ १६ ॥ पूरो प्रीतोऽस्मि भद्रन्ते गृहाणेदं स्वयौवनम्। राज्यं चेदं गृहाण त्वं त्वं हि मे प्रियकृत् सुतः ॥ १७ ॥

वैशम्पायन उवाच। प्रतिपेदे जरां राजा ययातिर्नाहुषस्तदा। यौवनं प्रतिपेदे च पूरुः स्वं पुनरात्मनः ॥ १८ ॥ अभिषेक्तुकामं नृपतिं पूरुं पुत्रं कनीयसम्। ब्राह्मणप्रमुखा वर्णा इदं वचनमब्रुवन् ॥ १९ ॥ कथं शुक्रस्य नप्तारं देवयान्याः सुतं प्रभो। ज्येष्ठं यदुमतिक्रम्य राज्यं पूरोः प्रयच्छसि ॥ २० ॥ यदुर्ज्येष्ठस्तव सुतो जातस्तमनु तुर्वसुः। शर्मिष्ठाया सुतो द्रुह्युस्ततोऽनुः पूरुरेव च ॥ २१ ॥ कथं ज्येष्ठानतिक्रम्य कनीयान्राज्यमर्हति। एतत्सर्वोधयामस्त्वां धर्मं त्वं प्रतिपालय ॥ २२ ॥

ययातिरुवाच। ब्राह्मणप्रमुखा वर्णाः सर्वे शृण्वन्तु मे वचः। ज्येष्ठं प्रति यथाराज्यं न देयं मे कथञ्चन ॥ २३ ॥ मम ज्येष्ठेन यदुना नियोगो नानुपालितः। प्रतिकूलः पितुर्यश्च न स पुत्रः सतां मतः ॥ २४ ॥ मातापित्रोर्वचनकृद्धितः पथ्यश्च यः सुतः। स पुत्रः पुत्रवद्यश्च वर्त्तते पितृमात्रोः ॥ २५ ॥ यदुनाहमवज्ञातस्तथा तुर्वसुनापि च। द्रुह्युनाचानुना चैव मद्यवज्ञा कृता भृशम् ॥ २६ ॥ पूरुणा तु कृतं वाक्यं मानितश्च विशेषतः। कनीयान्मत्प्रियार्थी स्तुता येन जरा मम ॥ २७ ॥ मम कामः स च कृतः पूरुणा मित्ररूपिणा। शुक्रेण च वरो दत्तो काव्येनोशनसा स्वयम् ॥ २८ ॥ पुत्रो यस्यानुवर्त्तेत स राजा श्रीमतीपतिः। अतोऽनुनयाम्येवं पूरुराज्येऽभिषिच्यताम् ॥ २९ ॥

प्रकृतय ऊचुः । यः पुत्रो गुणसंपन्नो मातापित्रोर्हितः सदा । सर्वमर्हति कल्याणं कनीयानपि सत्तम ॥ ३० ॥ अर्हः पूरुरिदं राज्यं यः सुतः प्रियकृत्तव । वरदानेन शुक्रस्य न शक्यं वक्तुमुत्तरम् ॥ ३१ ॥

वैशम्पायन उवाच । पौरजानपदैस्तुष्टैरित्युक्तो नाहुषस्तदा । अभ्यषिञ्चत्ततः पूरुं राज्ये स्वे सुतमात्मनः ॥ ३२ ॥ दत्त्वा च पूरवे राज्यं वनवासाय दीक्षितः । पुरात्स निर्ययौ राजा ब्राह्मणैस्तापसैः सह ॥ ३३ ॥ यदोस्तु यादवा जातास्तुर्वसोर्यवनाः स्मृताः । द्रुह्योः सुतास्तु वै भोजा अनोस्तु म्लेच्छजातयः ॥ ३४ ॥ पूरोस्तु पौरवो वंशो यत्र जातोऽसि पार्थिव । इदं वर्षसहस्राणि राज्यं कारयितुं वशी ॥ ३५ ॥

इत्यादिपर्वणि सम्भवपर्वणि पूर्वययात्युपाख्यानं समाप्तमिति पञ्चाशीतोऽध्यायः ॥ ८५ ॥

वैशम्पायन उवाच । एवं स नाहुषो राजा ययातिः पुत्रमौशनम् । राज्येऽभिषिच्य मुदितो वानप्रस्थोऽभवन्मुनिः ॥ १ ॥ उषित्वा च वने वासं ब्राह्मणैः संसितव्रतः । फलमूलाशनो दान्तस्ततः स्वर्गमितो गतः ॥ २ ॥ स गतः स्वर्निवासन्तं निवसन्मुदितः सुखी । कालेन नातिमहता पुनः शक्रेण पातितः ॥ ३ ॥ निपतन् प्रच्युतः स्वर्गादप्राप्तो मेदिनीतलम् । स्थित आसीदन्तरीक्षे स तदेति श्रुतं मया ॥ ४ ॥ तत एव पुनश्यापि गतः स्वर्गमिति श्रुतम् । राज्ञा वसुमता सार्धमष्टकेन च वीर्यवान् । प्रतर्दनेन शिविना समेत्य किल संसदि ॥ ५ ॥

जनमेजय उवाच । कर्मणा केन स दिवं पुनः प्राप्तो महीपतिः । सर्वमेतदशेषेण श्रोतुमिच्छामि तत्त्वतः ॥ ६ ॥ कथ-

मानं त्वया विप्र विप्रर्षिगणसन्निधौ । देवराजसमो ह्यासी-
ययातिः पृथिवीपतिः ॥ ७ ॥ वर्द्धनः कुरुवंशस्य विभावसुसम-
द्युतिः । तस्य विस्तीर्णयशसः सत्यकीर्त्तेर्महात्मनः । चरितं
श्रोतुमिच्छामि दिवि चेह च सर्वशः ॥ ८ ॥

वैशम्पायन उवाच । हन्त ते कथयिष्यामि ययातेरुत्तमां
कथाम् । दिवि चेह च पुण्यार्थां सर्वपापप्रणाशिनीम् ॥ ९ ॥
ययातिर्नाहुषो राजा पूरुं पुत्रं कनीयसम् । राज्येऽभिषिच्य
मुदितः प्रव्रव्राज वनं तदा ॥ १० ॥ अग्र्येषु स विनिक्षिप्य पुत्रा-
न्यदुपुरोगमान् । फलमूलाशनो राजा वने स न्यवसच्चिरम् ॥११॥
शंसितात्मा जितक्रोधस्तर्पयन् पितृदेवताः । अग्नींश्च विधि-
वज्जुह्वन् वानप्रस्थविधानतः ॥ १२ ॥ अतिथीन् पूजयामास
वन्येन हविषा विभुः । शिलोञ्छवृत्तिमास्थाय शेषान्नकृतभोजनः
॥ १३ ॥ पूर्णं वर्षसहस्रस्य एवंवृत्तिरभून्नृपः । अभ्यभ्यः शर-
दश्चिंशदासीन्नियतवाङ्मुनेः ॥ १४ ॥ ततश्च वायुभक्षोऽभूत्संवत्-
सरमतन्द्रितः । तथा पञ्चाग्निमध्ये च तपस्तेपे स वत्सरम् ॥१५॥
एकपादस्थितश्चासीत् षण्मासानिलभोजनः । पुण्यकीर्त्तिर्जितः
स्वर्गं जगामादित्य रोदसी ॥ १६ ॥

इत्यादिपर्वणि सम्भवपर्वणि चरितयायात्युपाख्याने
षड्शीतोऽध्यायः ॥ ८६ ॥

—०—

वैशम्पायन उवाच । स्वर्गतः स तु राजेन्द्रो निवसन्देव-
वेश्मनि । पूजितश्चिदृशैः साध्यैर्मरुद्भिर्वसुभिस्तथा ॥ १ ॥ देव-
लोकं ब्रह्मलोकं सञ्चरन् पुण्यकृद्दृशौ । अवसत् पृथिवीपालो
दीर्घकालमिति श्रुतिः ॥ २ ॥ स कदाचिन्नृपश्रेष्ठो ययातिः शक्र-
मागमत् । कथान्ते तत्र शक्रेण स दृष्टः पृथिवीपतिः ॥ ३ ॥

शक्र उवाच । यदा स पूरुस्तव रूपेण राजन् जरां गृहीत्वा प्रचचार भूमौ । तदा च राज्यं सम्प्रदायैव तस्मै त्वया किमुक्तः कथयेह सत्यम् ॥ ४ ॥

ययातिरुवाच । गङ्गायमुनयोर्मध्ये कृतस्त्रोऽयं विषयस्तव । मध्ये पृथिव्याश्चं राजा भ्रातरोऽन्त्याधिपास्तव ॥ ५ ॥ अक्रोधनः क्रोधनेभ्यो विशिष्टस्तथा तितिक्षुरतितिक्षोर्विशिष्टः । अमानुषेभ्यो मानुषाश्च प्रधाना विद्वांस्तथैवाविदुषः प्रधानः ॥ ६ ॥ आक्रुश्यमानो नाक्रोशेन्मन्युरेव तितिक्षतः । आक्रोष्टारं निर्दहति सुकृतं चास्य विन्दति ॥ ७ ॥ नाक्रुन्दुदः स्यान्न कृशंसवादी न हीनतः परमभ्याददीत । ययास्य वाचा पर उद्विजेत न तां वदेदुषतीं पापलोक्याम् ॥ ८ ॥ अक्रुन्दुदं परुषं तीक्ष्णवाचं वाक्कण्टकैर्वितुदन्तं मनुष्यान् । विद्यादलक्ष्मीकतमं जनानां मुखे-निबद्धां निर्ऋतिं वहन्तम् ॥ ९ ॥ सद्भिः पुरस्तादभिपूजितः स्यात्सङ्गिस्तथा पृष्ठतो रक्षितः स्यात् । सदासतामतिवादांस्तितिक्षेत्सतां वृत्तं चाददीतार्यवृत्तः ॥ १० ॥ वाक्सायका वदनान्निष्पतन्ति यैराहतः शोचति रात्र्यहानि । परस्य नामर्मसु ते पतन्ति तान् पण्डितो नावसृजेत्परेषु ॥ ११ ॥ न हीदृशं संवननं त्रिषु लोकेषु विद्यते । दया मैत्री च भूतेषु दानञ्च मधुरा च वाक् ॥ १२ ॥ तस्मात्सान्त्वं सदा वाच्यं न वाच्यं परुषं क्वचित् । पूज्यान् संपूजयेद्दद्यान्न च याचेत्कदाचन ॥ १३ ॥

इत्यादिपर्वणि सम्भवपर्वण्युत्तरयायात्युपाख्याने सप्ताशीतोऽध्यायः ॥ ८७ ॥

—•—

इन्द्र उवाच । सर्वाणि कर्माणि समाप्य राजन् गृहं परित्यज्य वनं गतोऽसि । तत्त्वां पृच्छामि नहुषस्य पुत्र केनासि तुल्यस्तपसा ययाते ॥ १ ॥

ययातिरुवाच । नाहं देवमनुष्येषु गन्धर्वेषु महर्षिषु । आत्मनस्तपसा तुल्यं कञ्चित्पश्यामि वासव ॥ २ ॥

इन्द्र उवाच । यदावमंस्थाः सहशः श्रेयसश्च अल्पीयसश्चाविदितप्रभावः । तस्मात्लोकाच्च्यवन्तश्चवेमे चीर्णे पुण्ये पतितास्थ राजन् ॥ ३ ॥

ययातिरुवाच । सुरर्षिगन्धर्वनरावमानात् क्षयं गता मे यदि शक्र लोकाः । इच्छेयं वैसुरलोकादिहीनः सतां मध्ये पतितुं देवराज ॥ ४ ॥

इन्द्र उवाच । सतां सकाशे पतितासि राजंश्च्युतः प्रतिष्ठां यत्र लब्धासि भूयः । एतद्विदित्वा च पुनर्ययाते त्वं मावमंस्थाः सहशः श्रेयसश्च ॥ ५ ॥

वैशम्पायन उवाच । ततः प्रशस्यामररराजजुष्टान् पुण्यालोकान् पतमानं ययातिम् । संप्रेक्ष्य राजर्षिवरोऽष्टकस्तमुवाच सद्धर्मविधानगुप्तः ॥ ६ ॥

अष्टक उवाच । कस्त्वं युवा वासवतुल्यरूपः स्वतेजसा दीप्यमानो यथाग्निः । पतस्युदीर्णाम्बुधरान्धकारात् व्योम्नः खेचराणां प्रवरो यथार्कः ॥ ७ ॥ दृष्ट्वा च त्वां सूर्यमथात्पतन्तं वैश्वानरार्कद्युतिमप्रमेयम् । किन्नु खल्विदेतत्पततीति सर्वे वितर्कयन्तः परिमोहिताः स्म ॥ ८ ॥ दृष्ट्वा च त्वां धिष्ठितं देवमार्गे शक्रार्कविष्णुप्रतिमप्रभावम् । अभ्युद्गताश्चां वयमद्य सर्वे तत्त्वश्च पाते तव जिज्ञासमानाः ॥ ९ ॥ न चापि त्वां धृष्णुमः प्रष्टुमग्रे न च त्वमस्मान् पृच्छसि ये वयं स्म । तत्त्वां पृच्छामि सृष्टवीर्यरूप कस्त्वं वा किंनिमित्तं विसर्गः ॥ १० ॥ भयन्तु ते व्येतु

विषादमोहौ त्यजाशु चैवेन्द्रसमप्रभाव । त्वां वर्त्तमानं हि सतां समीपे नालं प्रसोढुं बलहापि शक्रः ॥ ११ ॥ सन्तः प्रतिष्ठा हि सुखच्युतानां सतां सदैवामरराजकल्प । ते सङ्गताः स्थावरजङ्गमेशाः प्रतिष्ठितस्त्वं सहशेषु सत्सु ॥ १२ ॥ प्रभुरग्निः प्रतपने भूमिरावपने प्रभुः । प्रभुः सूर्यः प्रकाशित्वे सतां चाभ्यागतः प्रभुः ॥ १३ ॥

दूत्यादिपर्वणि सम्भवपर्वण्युत्तरयायात्युपाख्याने
अष्टाशीतोऽध्यायः ॥ ८८ ॥

—०:०—

ययातिरुवाच । अहं ययातिर्नहुषस्य पुत्रः पूरोः पिता सर्वभूतावमानात् । प्रभ्रंशितः सुरसिद्धर्षिलोकात्परिच्युतः प्रपतास्म्यल्पपुण्यः ॥ १ ॥ अहं हि पूर्वो वयसा भवद्भ्यस्तेनाभिवादं भवतां न प्रयुञ्जे । यो विद्यया तपसा जन्मना वा वृद्धः स पूज्यो भवति द्विजानाम् ॥ २ ॥

अष्टक उवाच । अवादीस्त्वं वयसा यः प्रवृद्धः स वै राजन् नात्यधिकः कथ्यते च । यो विद्यया तपसा संप्रवृद्धः स एव पूज्यो भवति द्विजानाम् ॥ ३ ॥

ययातिरुवाच । प्रतिकूलं कर्मणां पापमाहुस्तद्वर्त्तते प्रवणे पापलोक्यम् । सन्तोऽसतां नानुवर्त्तन्ति चैतद्यथा चैषामनुकूलास्तथासन् ॥ ४ ॥ अभूद्वनं मे विपुलं गतं तद्विचेष्टमानो नाधिगन्ता तदस्मि । एवं प्रधार्यात्महिते निविष्टो यो वर्त्तते स विजानाति धीरः ॥ ५ ॥ महाधनो यो यजते सुयज्ञैर्यः सर्वविद्यासु विनीतबुद्धिः । वेदानधीत्य तपसा योज्य देहं दिवं समायात् पुरुषो वीतमोहः ॥ ६ ॥ न जातु हृष्येन्महता धनेन वेदानधीयीतानहङ्कृतः स्यात् । नानाभावा बहवो जीवलोके

दैवाधीना नष्टचेष्टाधिकाराः । तत्तत् प्राप्य न विहन्यत धीरो दिष्टं बलीय इति मत्वात्मबुद्धा ॥ ७ ॥ सुखं हि जन्तुर्यदिवापि दुःखं दैवाधीनं विन्दते नात्मयत्नात् । तस्माद्दिष्टं बलवन्मन्यमानो न संज्वरेन्नापि हृष्येत्कथञ्चित् ॥ ८ ॥ दुःखैर्न तप्येन्न सुखैः प्रहृष्येत्समेन वर्त्तेत सदैव धीरः । दिष्टं बलीय इति मन्यमानो न संज्वरेन्नापि हृष्येत्कथञ्चित् ॥ ९ ॥ भये न मुह्याम्यष्टकाहं कदाचित्सन्तापो मे मानसो नास्ति किञ्चित् । धाता यथा मां विदधीत लोके ध्रुवं तथाहं भवितेति मत्वा ॥ १० ॥ संस्वेदजा अण्डजा उद्भिदश्च सरीसृपाः कृमयोऽथाप्सु मत्स्याः । यथात्मानस्तृणकाष्ठञ्च सर्वं दिष्टक्षये स्वां प्रकृतिं भजन्ति ॥ ११ ॥ अनित्यतां सुखदुःखस्य बुद्धा कस्मात्सन्तापमष्टकाहं भजेयम् । किं कुर्य्यां वै किञ्च कृत्वा न तप्ये तस्मात्सन्तापं वर्ज्जयाम्यप्रमत्तः ॥ १२ ॥

वैशम्पायन उवाच । एवं ब्रुवाणं नृपतिं ययातिमथाष्टकः पुनरेवान्वपृच्छत् । मातामहं सर्वगुणोपपन्नं तत्र स्थितं स्वर्गलोके यथावत् ॥ १३ ॥

अष्टक उवाच । ये ये लोकाः पार्थिवेन्द्र प्रधानाख्या भुक्ता यश्च कालं यथावत् । तान्मे राजन् ब्रूहि सर्वान्यथावत् चैत्रक्षवत् भाषसे त्वं हि धर्मात् ॥ १४ ॥

ययातिरुवाच । राजाहमासमिह सार्वभौमस्ततो लोकान्महतश्चाजयं वै । तत्रावसं वर्षसहस्रमात्रं ततो लोकं परमस्याभ्युपेतः ॥ १५ ॥ ततः पुरीं पुरुहूतस्य रम्यां सहस्रद्वारां शतयोजनायताम् । अध्यावसं वर्षसहस्रमात्रं ततो लोकं परमस्याभ्युपेतः ॥ १६ ॥ ततो दिव्यमजरं प्राप्य लोकं प्रजापतेर्लोकपतेर्दुरापम् । तत्रावसं वर्षसहस्रमात्रं ततो लोकं परमस्याभ्युपेतः ॥ १७ ॥ स देवदेवस्य निवेशने च विहृत्य लोकानवसं यथेष्टम् । संपूज्यमानस्त्रिदशैः समस्तैस्तुल्यप्रभावद्युतिरीश्वराणाम्

॥ १८ ॥ तत्रावसन्नन्दने कामरूपी संवत्सराणामयुतं शतानाम्। सहाप्सरोभिर्विचरन् पुण्यगन्धान् पश्यन्नगान् पुष्पितांश्चारुरूपान् ॥ १९ ॥ तत्र स्थितं मां देवसुखेषु सक्तं कालेऽतीते महति ततोऽतिमात्रम्। दूतो देवानामब्रवीदुग्ररूपो ध्वंसेत्युच्चैस्त्रिदशश्रुतेन स्वरेण ॥ २० ॥ एतावन्ते विदितं राजसिंह ततो भ्रष्टोऽहं नन्दनात् क्षीणपुण्यः। वाचोऽभ्रौघं चान्तरीक्षे सुराणां सानुक्रोशाः शोचतां मां नरेन्द्र ॥ २१ ॥ अहो कष्टं क्षीणपुण्यो ययातिः पतत्यसौ पुण्यकृत् पुण्यकीर्त्तिः। तानब्रुवं पतमानस्ततोऽहं सतां मध्ये निपतेयं कथन्नु ॥ २२ ॥ तैराख्याता भवतां यज्ञभूमिः समीक्ष्य चेमां त्वरितमुपागतोऽस्मि। कविर्गन्धं दैशिकं यज्ञभूमेर्धूमापाङ्गं प्रतिगृह्य प्रतीतः ॥ २३ ॥

इत्यादिपर्वणि सम्भवपर्वण्युत्तरयायात्युपाख्याने एकोननवतितमोऽध्यायः ॥ ८९ ॥

—:०:—

अष्टक उवाच। यदावसो नन्दने कामरूपी संवत्सराणामयुतं शतानाम्। किङ्कारणं कार्त्स्न्ययुगप्रधान हित्वा च त्वं वसुधामन्वपद्यः ॥ १ ॥

ययातिरुवाच। ज्ञातिः सुहृत् स्वजनो वा यश्चेह क्षीणे वित्ते त्यज्यते मानवैर्हि। तथा तत्र क्षीणपुण्यं मनुष्यं त्यजन्ति सद्यः सेश्वरा देवसङ्घाः ॥ २ ॥

अष्टक उवाच। तस्मिन् कथं क्षीणपुण्या भवन्ति संनुद्यते सेऽत्र मनोऽतिमात्रम्। किं वा विशिष्टाः कस्य धामोपयान्ति तद्वै ब्रूहि क्षेत्रविच्चं मतो मे ॥ ३ ॥

ययातिरुवाच। इमं भौमं नरकं ते पतन्ति याज्ययाजना नरदेव सर्वे। ते काङ्क्षगोमायुबलायनार्थं क्षीणा विवृद्धिं बहुधा

व्रजन्ति ॥ ४ ॥ तस्मादेतद्दुर्ज्ञानीयं नरेन्द्र दुष्टं लोके गर्हणीयञ्च कर्म। आख्यातं ते पार्थिव सर्वमेव भूयश्चेदानीं वद किं ते वदामि ॥ ५ ॥

अष्टक उवाच। यदा तु तान्विलुदन्ते वयांसि तथा गृध्राः गिरिकूटाः पतङ्गाः। कथं भवन्ति कथमाभवन्ति न भीमम्न्यं नरकं शृणोमि ॥ ६ ॥

ययातिरुवाच। ऊर्द्धं देहात्कर्मणा जृम्भमाणाद्यत्तं पृथिव्यामनुसञ्चरन्ति। दुःखं भौमं नरकं ते पतन्ति नावेक्षन्ते वर्षपूगाननेकान् ॥ ७ ॥ षष्टिं सहस्राणि पतन्ति व्योम्नि तथा अशीतिं परिवत्सराणि। तान् वै तुदन्ति पततः प्रयातं भीमा भौमा राक्षसास्तीक्ष्णदंष्ट्राः ॥ ८ ॥

अष्टक उवाच। यदेनसस्ते पततस्तुदन्ति भीमा भौमा राक्षसास्तीक्ष्णदंष्ट्राः। कथं भवन्ति कथमाभवन्ति कथंभूता गर्भभूता भवन्ति ॥ ९ ॥

ययातिरुवाच। अस्रं रेतः पुष्पफलानुषक्तमन्वेति तद्वै पुरुषेण सृष्टम्। स वै तस्या रज आपद्यते वै स गर्भभूतः समुपैति तत्र ॥ १० ॥ वनस्पतीनोषधीश्चाविशन्ति आपो वायुं पृथिवीं चान्तरीक्षम्। चतुष्पदं द्विपदं चापि सर्वमेवं भूता गर्भभूता भवन्ति ॥ ११ ॥

अष्टक उवाच। अन्यद्वपुर्विदधातीह गर्भमुताहोस्वित् स्वेन कायेन याति। आपद्यमानो नरयोनिमेतामाचक्ष्व मे संशयात् प्रब्रवीमि ॥ १२ ॥ शरीरभेदादिसमुच्छ्रयञ्च चक्षुःश्रोत्रे लभते केन संज्ञाम्। एतत्तत्त्वं सर्वमाचक्ष्व पृष्टः क्षेत्रज्ञं त्वां तात मन्यामः सर्वे ॥ १३ ॥

ययातिरुवाच। वायुः समुत्क्रामति गर्भयोनिमृतौ रेतः पुष्परसानुषक्तम्। स तत्र तन्मात्रकृताधिकारः क्रमेण सञ्चर्दय-

क्रौञ्च गर्भम्॥ १४॥ स जायमानो विज्ञातमात्रः संग्रामधिष्ठाय ततो मनुष्यः। स श्रोत्राभ्यां वेदयतीह शब्दं स वै रूपं पश्यति चक्षुषा च॥ १५॥ घ्राणेन गन्धं जिह्वयाऽथो रसञ्च त्वचा स्पर्शं मनसा वेद भावम्। इत्यष्टकेहोपहितं हि विद्धि महात्मनः प्राणभृतां शरीरे॥ १६॥

अष्टक उवाच। यः संस्थितः पुरुषो दह्यते वा निखन्यते वापि निष्टप्यते वा। अभावभूतः स विनाशमेत्य केनात्मना चेतयते परस्तात्॥ १७॥

ययातिरुवाच। हित्वा सोऽस्तृत् सुप्तवन्निष्टनित्वा पुरोधाय सुकृतं दुष्कृतं वा। अन्यां योनिं पवनाग्नानुसारी हित्वा देहं भजते राजसिंह॥ १८॥ पुण्यां योनिं पुण्यकृतो व्रजन्ति पापां योनिं पापकृतो व्रजन्ति। कीटाः पतङ्गाश्च भवन्ति पापा न मे विवक्षास्ति महानुभाव॥ १९॥ चतुष्पदा द्विपदाः षट्पदाश्च तथाभूता गर्भभूता भवन्ति। आख्यातमेतन्निखिलेन सर्वं भूयस्तु किं पृच्छसि राजसिंह॥ २०॥

अष्टक उवाच। किं स्वित् कृत्वा लभते तात लोकान्मर्त्यः श्रेष्ठांस्तपसा विद्यया वा। तन्मे पृष्टः शंस सर्वं यथावच्छुभाल्लोकान्येन गच्छेत् क्रमेण॥ २१॥

ययातिरुवाच। तपश्च दानञ्च शमो दमश्च ह्रीरार्जवं सर्वभूतानुकम्पा। स्वर्गस्य लोकस्य वदन्ति सन्तो द्वाराणि सप्तैव महान्ति पुंसाम्। नश्यन्ति मानेन तमोऽभिभूताः पुंसः सदैवेति वदन्ति सन्तः॥ २२॥ अधीयमानः पण्डितं मन्यमानो यो विद्यया हन्ति यशः परेषाम्। तस्यान्तवन्तश्च भवन्ति लोका न चास्य तद्ब्रह्म फलं ददाति॥ २३॥ चत्वारि कर्माण्यभयंकराणि भयं प्रयच्छन्त्ययथाकृतानि। मानाग्निहोत्रमुत मानमौनं मानेनाधीतमुत मानयज्ञः॥ २४॥ न मानमान्यो मुदमा-

ददीत न सन्तापं प्राप्नुयाच्चावमानात्। सन्तः सतः पूजयन्तीह लोके नासाधवः साधुबुद्धिं लभन्ते। इति दद्यामिति यज इत्यधीय इति व्रतम्। इत्येतानि भयान्याहुस्तानि वर्ज्यानि सर्वशः ॥२५॥ ये चाप्ययं वेदयन्ते पुराणं मनीषिणो मानसमार्गरुद्धम्। तन्नः श्रेयस्तेन संयोगमेत्य परां शान्तिं प्राप्नुयुः प्रेत्य चेह ॥ १६ ॥

इत्यादिपर्वणि सम्भवपर्वण्युत्तरयायात्युपाख्याने
नवतितमोऽध्यायः ॥ ९० ॥

—:०:—

अष्टक उवाच। चरन् गृहस्थः कथमेति धर्मान् कथं भिक्षुः कथमाचार्यकर्मा। वानप्रस्थः सत्पथे सन्निविष्टो ब्रूहन्यस्मिन् संप्रतिवेदयन्ति ॥ १ ॥

ययातिरुवाच। आहूताध्यायी गुरुकर्मस्वचोद्यः पूर्वोत्थायी चरमं चोपशायी। मृदुर्दान्तो धृतिमानप्रमत्तः स्वाध्यायशीलः सिध्यति ब्रह्मचारी ॥ २ ॥ धर्मागतं प्राप्य धनं यजेत दद्यात् सदैवातिथीन् भोजयेच्च। अनाददानश्च परैरदत्तं सैषा गृहस्थोपनिषत् पुराणी ॥ ३ ॥ स्ववीर्यजीवी व्रजिनान्निवृत्तो दाता परेभ्यो न परोपतापी। तादृङ्मुनिः सिद्धिमुपैति मुख्यां वसन्नरण्ये नियताहारचेष्टः ॥ ४ ॥ अशिल्पजीवी गुणवांश्चैव नित्यं जितेन्द्रियः सर्वतो विप्रयुक्तः। अलोकयायी लघुरल्पचारश्चरन्देशानेकचरः स भिक्षुः ॥ ५ ॥ रात्र्या यया वाभिजिताश्च लोका भवन्ति कामाभिजिताः सुखाश्च। तामेव रात्रिं प्रयतेत विद्वानरण्यसंस्थो भवितुं यतात्मा ॥ ६ ॥ दशैव पूर्वान् दश चापरांश्च ज्ञातीनथात्मानमथैकविंशम्। अरण्यवासी मुक्तये दधाति विमुच्यारण्ये स्वशरीरधातून् ॥ ७ ॥

अष्टक उवाच । कतिस्विदेव मुनयः कति मौनानि चाच्युत । भवन्तीति तदाचक्ष्व श्रोतुमिच्छामहे वयम् ॥ ८ ॥

ययातिरुवाच । अरण्ये वसतो यस्य ग्रामो भवति पृष्ठतः । ग्रामे वा वसतोऽरण्यं स मुनिः स्राज्जनाधिप ॥ ९ ॥

अष्टक उवाच । कथंस्विद्वसतोऽरण्ये ग्रामो भवति पृष्ठतः । ग्रामे वा वसतोऽरण्यं कथं भवति पृष्ठतः ॥ १० ॥

ययातिरुवाच । न ग्राम्यसुपयुञ्जीत य आरण्यो मुनिर्भवेत् । तथास्य वसतोऽरण्ये ग्रामो भवति पृष्ठतः ॥ ११ ॥ अनग्निरनिकेतश्चाप्यगोत्रचरणो मुनिः । कौपीनाच्छादनं यावत्तावदिच्छेच्च चीवरम् ॥ १२ ॥ यावत् प्राणाभिसन्धानं तावदिच्छेच्च भोजनम् । तथास्य वसतो ग्रामेऽरण्यं भवति पृष्ठतः ॥ १३ ॥ यस्तु कामान् परित्यज्य त्यक्तकर्मा जितेन्द्रियः । आतिष्ठेच्च मुनिर्मौनं स लोके सिद्धिमाप्नुयात् ॥ १४ ॥ धौतदन्तं क्लृप्तनखं सदा स्नातमलङ्कृतम् । असितं सितकर्माणं कस्मर्हति नार्चितुम् ॥ १५ ॥ तपसा कर्षितः श्यामः क्षीणमांसास्थिशोणितः । स च लोकमिमं जित्वा लोकं विजयते परम् ॥ १६ ॥ यदा भवति निर्द्वन्द्वो मुनिर्मौनं समास्थितः । अथ लोकमिमं जित्वा लोकं विजयते परम् ॥ १७ ॥ आस्येन तु यदाहारं गोवन्मृगयते मुनिः । अथास्य लोकः सर्वोऽयं सोऽमृतत्वाय कल्पते ॥ १८ ॥

इत्यादिपर्वणि सम्भवपर्वण्युत्तरययात्युपाख्याने एकनवतोऽध्यायः ॥ ९१ ॥

———

अष्टक उवाच । कतरस्यनयोः पूर्वं देवानामिति साम्प्रतम् ।
उभयोर्द्यावतो राजन् सूर्याचन्द्रमसोरिव ॥ १ ॥

ययातिरुवाच । अनिकेतो मृदुष्वेषु कामहन्तेषु संयतः ।
ग्राम एव वसन् भिक्षुरयोः पूर्वतरं गतः ॥ २ ॥ अप्राप्य दीर्घ-
मायुस्तु यः प्राज्ञो विज्ञातिं चरेत् । तप्यते यदि तत् कृत्वा चरेत्
सोऽव्यक्तपथस्थतः ॥ ३ ॥ पापानां कर्मणां नित्यं विद्यादायतिं
मानवः । सुखमप्याचरञ्जित्यं सोऽत्यन्तं सुखमेधते ॥ ४ ॥ यद्वै
नृशंसं तदसत्यमार्जवं सेवते धर्ममनर्थबुद्धिः । अर्थोऽप्यनीशस्य
तथैव राजंस्तदार्जवं च समाधिरुदार्यम् ॥ ५ ॥

अष्टक उवाच । केनासि दूतः प्रहितोऽद्य राजन्वयं स्वर्गी
दर्शनीयः सुवर्चाः । कुत आयातः कतरस्यां दिशि त्वमुताहो-
स्वित् पार्थिवं स्थानमस्ति ॥ ६ ॥

ययातिरुवाच । इमं भौमं नरकं क्षीणपुण्यः प्रवेष्टुमुर्वी-
गगनाद्विहीनः । उल्काहं वः प्रपतिष्याव्यनन्तरं त्वरन्ति मां
लोकपा ब्राह्मणा ये ॥ ७ ॥ रातां शकाशे तु हतः प्रपातस्ते
सङ्गता गुणवन्तस्तु सर्वे । शक्राच्च लब्धो हि वरो मयैष पति-
ष्यता भूमितलं नरेन्द्र ॥ ८ ॥

अष्टक उवाच । पृच्छामि त्वां मा प्रपत प्रपातं यदि लोकाः
पार्थिव सन्ति मेऽत्र । यद्यन्तरीक्षे यदि वा दिवि स्थिताः क्षेत्रज्ञं
त्वां तस्य धर्मस्य मन्ये ॥ ९ ॥

ययातिरुवाच । यावत् पृथिव्यां विहितं गवाश्वं रत्नैरवद्यैः
पशुभिः पार्थिवैश्च । तावल्लोका दिवि ते संस्थितास्तै तथा विजा-
नीहि नरेन्द्रसिंह ॥ १० ॥

अष्टक उवाच । तांस्ते ददामि मा प्रपत प्रपातं ये मे लोका
दिवि राजेन्द्र सन्ति । यद्यन्तरीक्षे यदि वा दिविस्थितास्तानाक्रम
क्षिप्रमयेतमोहः ॥ ११ ॥

ययातिरुवाच । नाब्राह्मणो ब्राह्मणो ब्रह्मविच्च प्रतिग्रहे वर्त्तते राजसुख्य । यथा प्रदेयं सततं द्विजेभ्यस्तथादृदं पूर्वमहं नरेन्द्र ॥ १२ ॥ नाब्राह्मणः क्षपणो जातु जीवेद्या चापि स्याद्ब्राह्मणी वीरपत्नी । सोऽहं नैवाक्षतं पूर्वं चरेयं विधित्समानः किमु तत्र साधु ॥ १३ ॥

प्रतर्दन उवाच । इच्छामि त्वां सृञ्जयीयरूप प्रतर्दनोऽहं यदि मे सन्ति लोकाः । यद्यन्तरीक्षे यदि वा दिवि श्रिताः क्षेत्रज्ञं त्वां तस्य धर्मस्य मन्ये ॥ १४ ॥

ययातिरुवाच । सन्ति लोका बहवस्ते नरेन्द्र अप्येकैकं सप्तसप्ताप्यहानि । मधुच्युतो घृतपृक्ता विस्रोकास्ते नान्तवन्तः प्रतिपालयन्ति ॥ १५ ॥

प्रतर्दन उवाच । तांस्ते ददानि मा प्रपत प्रपातं ये मे लोकास्तव ते वै भवन्तु । यद्यन्तरीक्षे यदि वा दिवि श्रितास्तानाक्रम क्षिप्रमपेतमोहः ॥ १६ ॥

ययातिरुवाच । न तुल्यतेजाः सुकृतं कामयेत योगक्षेमं पार्थिव पार्थिवः सन् । दैवादेशादापदं प्राप्य विद्वांस्तरेन्नृशंसं न हि जातु राजा ॥ १७ ॥ धर्म्यं मार्गं यतमानो यशस्यं कुर्व्वान्नृपो धर्ममवेक्षमाणः । न मद्विधो धर्मबुद्धिः प्रजानन् कुर्य्यादेव क्षपणं मां यथात्थ ॥ १८ ॥ कुर्य्यादपूर्वं न कृतं यदन्यैर्विधित्समानः किमु तत्र साधु । ब्रुवाणमेवं नृपतिं ययातिं नृपोत्तमो वसुमानब्रवीत्तम् ॥ १९ ॥

इत्यादिपर्वणि सम्भवपर्वण्युत्तरययातूपाख्याने द्विनवतोऽध्यायः ॥ ९२ ॥

—•:•—

वसुमानुवाच । पृच्छामि त्वां वसुमानौषदश्विर्यत्ते लोको दिवि वै नरेन्द्र । यद्यन्तरीक्षे प्रथितो महात्मन् क्षेत्रज्ञं त्वां तस्य धर्मस्य मन्ये ॥ १ ॥

ययातिरुवाच । यदन्तरीक्षं पृथिवी दिशश्च यत्तेजसा तपते भानुमांश्च । लोकास्तावन्तो दिवि संस्थिता वै ते नाम्तवन्तः प्रतिपालयन्ति ॥ २ ॥

वसुमानुवाच । तांस्ते ददानि सा प्रपत प्रपातं ये मे लोकास्तव ते वै भवन्तु । क्षीणोऽसीतांस्तृणकेनापि राजन् प्रतिग्रहस्ते यदि धीमन् प्रदुष्टः ॥ ३ ॥

ययातिरुवाच । न मिथ्याहं विक्रयं वै स्मरामि हयाग्रहीतं शिबिकाच्छङ्कमानः । कुर्यां न चैवाकृतपूर्वमन्यैर्विधित्समानः किमु तत्र साधु ॥ ४ ॥

वसुमानुवाच । तांस्त्वं लोकान् प्रतिपद्यस्व राजन्मया दत्तान्यदि नेष्टः क्रयस्ते । अहं न तान्वै प्रतिगन्ता नरेन्द्र सर्वे लोकास्तव ते वै भवन्तु ॥ ५ ॥

शिबिरुवाच । पृच्छामि त्वां शिबिरौशीनरोऽहं ममापि लोका यदि सन्तीह तात । यद्यन्तरीक्षे यदि वा दिवि श्रिताः क्षेत्रज्ञं त्वां तस्य धर्मस्य मन्ये ॥ ६ ॥

ययातिरुवाच । यच्चं वाचा हृदयेनापि साधून् परीक्षमाणान्नावमंस्था नरेन्द्र । तेनानन्ता दिवि लोकाः श्रितास्ते विद्युद्रूपाः स्तनवन्तो महान्तः ॥ ७ ॥

शिबिरुवाच । तांस्त्वं लोकान् प्रतिपद्यस्व राजन्मया दत्तान्यदि नेष्टः क्रयस्ते । न चाहं तान् प्रतिपत्स्ये क्व दत्वा यत्र गत्वा नानुशोचन्ति धीराः ॥ ८ ॥

ययातिरुवाच । यथा त्वमिन्द्रप्रतिमप्रभावस्तथा चाप्यनल्पा नरेन्द्र

लोकाः । तथाद्य लोके न रमेऽन्यदत्ते तस्माच्छिबे नाभिनन्दामि देयम् ॥ ९ ॥

अष्टक उवाच । न चेदेकैकशो राजल्लोकान्नः प्रतिनन्दसि । सर्वं प्रदाय भवते गन्तारो नरकं वयम् ॥ १० ॥

ययातिरुवाच । यदर्होऽहं तदुतध्वं सन्तः सत्याभिनन्दिनः । अहं तन्नाभिजानामि यत् स्तुतं न मया पुरा ॥ ११ ॥

अष्टक उवाच । कस्यैते प्रतिदृश्यन्ते रथाः पञ्च हिरण्मयाः । यानारुह्य नरा लोकान्नभिवाञ्छन्ति शाश्वतान् ॥ १२ ॥

ययातिरुवाच । युष्मानेते वहिष्यन्ति रथाः पञ्च हिरण्मयाः । ऊर्ध्वैः सन्तः प्रकाशन्ते ज्वलन्तोऽग्निशिखा इव ॥ १३ ॥

अष्टक उवाच । आतिष्ठ रथान्राजन्निक्रमस्व विहायसम् । वयमप्यनुयास्यामो यदा कालो भविष्यति ॥ १४ ॥

ययातिरुवाच । सर्वैरिदानीं गन्तव्यं सह स्वर्गजितो वयम् । एष नो विरजाः पन्था दृश्यते देवसद्मनः ॥ १५ ॥

वैशम्पायन उवाच । तेऽधिरुह्य रथान् सर्वे प्रयाता नृपसत्तमाः । आक्रामन्तो दिवमभिर्हर्मेणादित्य रोदसी ॥ १६ ॥

अष्टक उवाच । अहं मन्ये पूर्वमेकोऽस्मि गन्ता सखा चेन्द्रः सर्वथा मे महात्मा । कस्मादेवं शिबिरौशीनरोऽयमेकोऽत्यगात् सर्ववेगेन वाहान् ॥ १७ ॥

ययातिरुवाच । अददद्वयानाय यावद्वित्तमविन्दत । उशीनरस्य पुत्रोऽयं तस्माच्छ्रेष्ठो हि वः शिविः ॥ १८ ॥ दानं तपः सत्यमथापि धर्मो ह्रीः श्रीः क्षमा सौम्यमथो विधित्सा । राजन्नेतान्यप्रमेयाणि राज्ञः शिबेः स्थितान्यप्रतिमस्य बुद्ध्या । एवंवृत्तो ह्रीनिषेवश्च यस्मात्तस्माच्छिबिरत्यगाद्वै रथेन ॥ १९ ॥

वैशम्पायन उवाच । अथाष्टकः पुनरेवान्वपृच्छन्मातामहं कौतुकेनेन्द्रकल्पम् । पृच्छामि त्वां नृपते ब्रूहि सत्यं कुतश्च

क्षयासि सुतश्च कस्य ॥ २१ ॥ क्षतन्त्रया यद्धि न तस्य कर्त्ता लोके त्वदन्यः क्षत्रियो ब्राह्मणो वा ॥ २१ ॥

ययातिरुवाच । ययातिरस्मि नहुषस्य पुत्रः पूरोः पिता सार्वभौमस्त्रिहायम् । गुह्यं चार्थं मामकेभ्यो ब्रवीमि मातामहोऽहं भवतां प्रकाशम् ॥ २१ ॥ सर्वामिमां पृथिवीं निर्जिगाय प्रादामहं क्षादनं ब्राह्मणेभ्यः । मेध्यानश्वानेकशतान् सुरूपांस्तदा देवाः पुण्यभाजो भवन्ति ॥ २२ ॥ अदामहं पृथिवीं ब्राह्मणेभ्यः पूर्णामिमामखिलां वाहनेन । गोभिः सुवर्णेन धनैश्च मुख्यैस्तदाददं गाः शतमर्बुदानि ॥ २३ ॥ सत्येन मे द्यौश्च वसुन्धरा च तथैवाग्निर्ज्वलते मानुषेषु । न मे वृथा व्याहृतमेव वाक्यं सत्यं हि सन्तः प्रतिपूजयन्ति ॥ २४ ॥ यदृष्टक प्रब्रवीमीह सत्यं प्रतर्दनं चौषदश्वित्तथैव । सर्वे च लोका मुनयश्च देवाः सत्येन पूज्या इति मे मनोगतम् ॥ २५ ॥ यो नः स्वर्गजितः सर्वान्यथावृत्तं निवेदयेत् । अनसूयुर्द्विजाग्र्येभ्यः स लभेन्नः सलोकताम् ॥ २६ ॥

वैशम्पायन उवाच । एवं राजा स महात्मा क्षतीव स्वैर्दौहित्रैस्तारितो मित्रसाहः । त्यक्त्वा महीं परमोदारकर्मा स्वर्गं गतः कर्मभिर्न्याय्य पृथ्वीम् ॥ २७ ॥

इत्यादिपर्वणि सम्भवपर्वण्युत्तरयात्युपाख्यानं समाप्तमिति त्रिनवतोऽध्यायः ॥ ९३ ॥

—•—

जनमेजय उवाच । भगवञ्छ्रोतुमिच्छामि पूरोर्वंशकरान्नृपान् । यद्वीर्य्यान् यादृशांश्चापि यावतो यत्पराक्रमान् ॥ १ ॥ न क्षत्रिय् शीलहीनो वा निर्वीर्य्यो वा नराधिपः । प्रजाविरहितो वापि भूतपूर्वः कथञ्चन ॥ २ ॥ तेषां प्रथितसत्त्वानां

राज्ञां विज्ञानशालिनाम् । चरितं श्रोतुमिच्छामि विस्तरेण तपोधन ॥ ३ ॥

वैशम्पायन उवाच । हन्त ते कथयिष्यामि यन्मां त्वं परिपृच्छसि । पूरोर्वंशधरान् वीरान् शक्रप्रतिमतेजसः । भूरिद्रविणविक्रान्तान् सर्वलक्षणपूजितान् ॥ ४ ॥ प्रवीरेश्वररौद्राश्वास्त्रयः पुत्रा महारथाः । पूरोः पौष्यामजायन्त प्रवीरो वंशवर्धनः ॥ ५ ॥ मनस्युरभवत्तस्माच्छूरसेनीसुतः प्रभुः । शक्रस्य सदृशो वीर्ये शक्रतुल्यपराक्रमः ॥ ६ ॥ शक्रः संहननो वाग्मी सौवीरीतनयास्त्रयः । मनस्योरभवन् पुत्राः शूराः सर्वे महारथाः ॥ ७ ॥ अन्वग्भानुप्रभृतयो मित्रक्षेत्र्यां मनस्विनः । रौद्राश्वस्य महेष्वासा दशाप्सरसि सूनवः ॥ ८ ॥ यज्वानो जज्ञिरे शूराः प्रजावन्तो बहुश्रुताः । सर्वे सर्वास्त्रविद्वांसः सर्वे धर्मपरायणाः ॥ ९ ॥ ऋचेयुरथ कक्षेयुः कक्षणेयुश्च वीर्यवान् । स्थण्डिलेयुर्वनेयुश्च जलेयुश्च महायशाः ॥ १० ॥ तेजेयुर्बलवान् धीमान् सत्येयुश्चेन्द्रविक्रमः । धर्मेयुः सन्नतेयुश्च दशमो देवविक्रमः ॥ ११ ॥ अनाधृष्टिरभूत्तेषां विद्वान् भुवि तथैकराट् । ऋचेयुरथ विक्रान्तो देवानामिव वासवः ॥ १२ ॥ अनाधृष्टिसुतस्त्वासीद्राजसूयाश्वमेधकृत् । मतिनार इति ख्यातो राजा परमधार्मिकः ॥ १३ ॥ मतिनारसुता राजंश्चत्वारोऽमितविक्रमाः । तंसुर्महानतिरथो द्रुह्युश्चाप्रतिमद्युतिः ॥ १४ ॥ तेषां तंसुर्महावीर्यः पौरवं वंशमुद्वहन् । आजहार यशो दीप्तं जिगाय च वसुन्धराम् ॥ १५ ॥ ईलिनन्तु सुतं तंसुर्जनयामास वीर्यवान् । सोऽपि क्षत्त्रामिमां भूमिं विजिग्ये जयतां वरः ॥ १६ ॥ रथन्तर्यां सुतान् पञ्च पञ्चभूतोपमांस्ततः । ईलिनो जनयामास दुष्यन्तप्रभृतीन्नृपान् ॥ १७ ॥ दुष्यन्तं शूरभीमौ च प्रवसुं वसुमेव च । तेषां ज्येष्ठोऽभवद्राजा दुष्यन्तो जनमेजय ॥ १८ ॥

दुष्यन्ताद्भरतो जज्ञे विद्वान् शाकुन्तलो नृपः । तस्माद्भारत-
वंशस्य विप्रतस्थे महद्यशः ॥ १९ ॥ भरतस्त्रिषु स्त्रीषु नव पुत्रा-
नजीजनत् । नाभ्यनन्दत तान् राजा मातृरूपा ममेत्युत ॥२०॥
ततस्तान्मातरः क्रुद्धाः पुत्रान्निन्युर्वधं मम । ततस्तस्य नरे-
न्द्रस्य वितथं पुत्रजन्म तत् ॥ २१ ॥ ततो महर्षिः क्रतुभिरीजानो
भरतस्तदा । लेभे पुत्रं भरद्वाजाद्भुमन्युं नाम भारत ॥ २२ ॥
ततः पुत्रिणमात्मानं ज्ञात्वा पौरवनन्दनः । भुमन्युं भरतश्रेष्ठ
यौवराज्येऽभ्यषेचयत् ॥ २३ ॥ ततो हविरथो नाम भुमन्यो-
रभवत् सुतः । सुहोत्रश्च सुहोता च सुहविः सुयजुस्तथा ॥२४॥
पुष्करिण्यामृचीकश्च भुमन्योरभवन् सुताः । तेषां ज्येष्ठः सुहो-
त्रस्तु राज्यमाप महीक्षिताम् ॥ २५ ॥ राजसूयाश्वमेधाद्यैः
सोऽयजद्भूरिभिर्मखैः । सुहोत्रः पृथिवीं कृत्स्नां बुभुजे सागरा-
म्बराम् ॥ २६ ॥ पूर्णां हस्तिगजाश्वैश्च बहुरत्नसमाकुलाम् ।
ममज्जैव मही तस्य भूरिभारावपीडिता ॥ २७ ॥ हस्त्यश्वरथ-
सम्पूर्णा मनुष्यकलिला भृशम् । सुहोत्रे राजनि तदा धर्मतः
शासति प्रजाः ॥ २८ ॥ चैत्ययूपाङ्किता चासीद्भूमिः शतसहस्रशः ।
ब्रह्मब्रह्मजनश्चासा च सर्वदैव व्यरोचत ॥ २९ ॥ ऐक्ष्वाकी जनया-
मास सुहोत्रात् पृथिवीपते । अजमीढं सुमीढञ्च पुरुमीढञ्च
भारत ॥ ३० ॥ अजमीढो वरस्तेषां तस्मिन् वंशः प्रतिष्ठितः ।
षट् पुत्रान् सोऽप्यजनयत् तिसृषु स्त्रीषु भारत ॥ ३१ ॥ ऋक्षं
धूमिन्यथो नीली दुष्यन्तपरमेष्ठिनौ । केशिन्यजनयज्जह्नुं सुतौ
च जलरूपिणौ ॥ ३२ ॥ तथेमे सर्वपाञ्चाला दुष्यन्तपरमेष्ठिनोः ।
अन्वयाः कृशिका राजञ्जह्नोरमिततेजसः ॥ ३३ ॥ जलरूपि-
णयोर्ज्येष्ठमृक्षमाद्ऋक्षनाधिपम् । ऋक्षात् संवरणो जज्ञे राज-
वंशकरः सुतः ॥ ३४ ॥ आर्क्षे संवरणे राजन् प्रशासति वसु-
म्बराम् । संक्षयः सुमहानासीत् प्रजानामिति नः श्रुतम् ॥ ३५ ॥

व्यशीर्यत ततो राष्ट्रं क्षयैर्नानाविधैस्तदा। क्षुन्मृत्युभ्यामनावृष्ट्या व्याधिभिश्च समाहतम् ॥ ३६ ॥ अभ्यघ्नन् भारतांश्चैव सपत्नानां बलानि च। चालयन् वसुधाञ्चेमां बलेन चतुरङ्गिणा ॥ ३७ ॥ अभ्ययात्तञ्च पाञ्चाल्यो विजित्य तरसा महीम्। अक्षौहिणीभिर्द्वयभिः स एनं समरेऽजयत् ॥ ३८ ॥ ततः सदारः सामात्यः सपुत्रः ससुहृज्जनः। राजा सम्वरणस्तस्मात् पलायत महाभयात् ॥ ३९ ॥ सिन्धोर्नदस्य महतो निकुञ्जे न्यवसत्तदा। नदीविषयपर्य्यन्ते पर्वतस्य समीपतः ॥ ४० ॥ तत्रावसन् बहून् कालान् भारता दुर्गमाश्रिताः। तेषां निवसतां तत्र सहस्रं परिवत्सरान् ॥ ४१ ॥ अथाभ्यगच्छद्भारतान् वशिष्ठो भगवानृषिः। तमागतं प्रयत्नेन प्रत्युद्गम्याभिवाद्य च ॥ ४२ ॥ अर्घ्यमभ्याहरंस्तस्मै ते सर्वे भारतास्तदा। निवेद्य सर्वविषये सत्कारेण सुवस्त्रवे ॥ ४३ ॥ तमासने चोपविष्टं राजा वव्रे स्वयं तदा। पुरोहितो भवान्नोऽस्तु राज्याय प्रयतेमहि ॥ ४४ ॥ ओमित्येवं वशिष्ठोऽपि भारतान् प्रत्यपद्यत। अथाभ्यषिञ्चत्साम्राज्ये सर्वक्षत्रस्य पौरवम् ॥ ४५ ॥ विषाणभूतं सर्वस्यां पृथिव्यामिति नः श्रुतम्। भरताध्युषितं पूर्वं सोऽध्यतिष्ठत् पुरोत्तमम् ॥ ४६ ॥ पुनर्बलिभृतश्चैव चक्रे सर्वमहीक्षितः। ततः स पृथिवीं प्राप्य पुनरीजे महाबलः ॥ ४७ ॥ आजमीढो महायज्ञैर्बहुभिर्भूरिदक्षिणैः। ततः सम्वरणात्पौरी तपती सुषुवे कुरुम् ॥ ४८ ॥ राजन्नेतं प्रजाः सर्वा धर्मज्ञ इति वव्रिरे। तस्य नाम्नाभिविख्यातं पृथिव्यां कुरुजाङ्गलम् ॥ ४९ ॥ कुरुक्षेत्रं स तपसा पुण्यं चक्रे महातपाः। अविक्षितमभिष्यन्तं तथा चैत्ररथं मुनिम् ॥ ५० ॥ जनमेजयञ्च विख्यातं पुत्रांश्चास्यानुशुश्रुमः। पञ्चैतान् वाहिनी पुत्रान् व्यजायत मनस्विनी ॥ ५१ ॥ अविक्षितः परिक्षिच्च बलाश्वश्च वीर्यवान्। आदिराजो विराजश्च शाल्मलिश्च

महाबलः। उच्चैःश्रवा भङ्कारो जितारिश्चाष्टमः स्मृतः॥ ५२॥ एतेषामन्ववाये तु मुख्याख्ये कर्मजैर्गुणैः। जनमेजयादयः सप्त तथैवान्ये महारथाः॥ ५३॥ परीक्षितोऽभवन् पुत्राः सर्वे धर्मार्थकोविदाः। कक्षसेनोग्रसेनौ तु चित्रसेनश्च वीर्यवान्॥ ५४॥ इन्द्रसेनः सुषेणश्च भीमसेनश्च नामतः। जनमेजयस्य तनया भुवि ख्याता महाबलाः॥ ५५॥ धृतराष्ट्रः प्रथमजः पाण्डुर्वाह्लीक एव च। निषधश्च महातेजास्तथा जाम्बूनदो बली॥ ५६॥ कुण्डोदरः पदातिश्च वसातिश्चाष्टमः स्मृतः। सर्वे धर्मार्थकुशलाः सर्वभूतहिते रताः॥ ५७॥ धृतराष्ट्रोऽथ राजासीत्तस्य पुत्रोऽथ कुण्डिकः। हस्ती वितर्कः क्राथश्च कुण्डिनश्चापि पञ्चमः॥ ५८॥ हविःश्रवास्तथेन्द्राभः शुमन्युश्चापराजितः। धार्त्तराष्ट्रसुतानाञ्च स्त्रीनेतान् प्रथितान् भुवि॥ ५९॥ प्रतीपं धर्मनेत्रञ्च सुनेत्रं चापि भारत। प्रतीपः प्रथितस्तेषां बभूवाप्रतिमो भुवि॥ ६०॥ प्रतीपस्य त्रयः पुत्रा जज्ञिरे भरतर्षभ। देवापिः शान्तनुश्चैव वाह्लीकश्च महारथः॥ ६१॥ देवापिश्च प्रवव्राज तेषां धर्महितेप्सया। शान्तनुश्च महीं लेभे वाह्लीकश्च महारथः॥ ६२॥ भरतस्यान्वये जाताः सत्त्ववन्तो नराधिपाः। देवर्षिकल्पा नृपते बहवो राजसत्तमाः॥ ६३॥ एवंविधाश्चाप्यपरे देवकल्पा महारथाः। जाता मनोरन्ववाये ऐलवंश्यविवर्द्धनाः॥ ६४॥

इत्यादिपर्वणि सम्भवपर्वणि पूरुवंशानुकीर्त्तने चतुर्नवतोऽध्यायः॥ ९४॥

—:०:—

जनमेजय उवाच । श्रुतस्त्वत्तो मया ब्रह्मन् पूर्वेषां सम्भवो महान् । उदाराश्चापि वंशेऽस्मिन्राजानो मे परिश्रुताः ॥ १ ॥ किन्तु लघ्वर्थसंयुक्तं प्रियाख्यानं न मामति । प्रीणात्यतो भवान् भूयो विस्तरेण ब्रवीतु मे ॥ २ ॥ एतामेव कथां दिव्यामाप्रजापतितो मनोः । तेषामाजननं पुण्यं कस्य न प्रीतिमावहेत् ॥ ३ ॥ सङ्क्षेपगुणमाख्यानैरभिवर्हितबुद्धिमम् । विष्टभ्य लोकान्स्त्रीनेषां यशः स्त्रोतमवस्थितम् ॥ ४ ॥ गुणप्रभाववीर्य्यौजःसत्त्वोत्साहवतामहम् । न तृप्यामि कथां शृण्वन्नमृतास्वादसन्निभाम् ॥ ५ ॥

वैशम्पायन उवाच । शृणु राजन् पुरा सत्यवत्या द्वैपायनाच्युतम् । प्रोच्यमानं मया कृत्स्नं स्ववंशजननं शुभम् ॥ ६ ॥ दक्षाददितिरदितेर्विवस्वान् विवस्वतो मनुर्मनोरिला इलायाः पुरूरवाः । पुरूरवस आयुरायुषो नहुषो नहुषाद्ययातिर्ययातेर्द्वे भार्य्ये बभूवतुः ॥ ७ ॥ उशनसो दुहिता देवयानी वृषपर्वणश्च दुहिता शर्मिष्ठा नाम । अत्रानुवंशश्लोको भवति ॥ ८ ॥ यदुश्च तुर्वसुश्चैव देवयानी व्यजायत । द्रुह्युं चानुञ्च पूरुञ्च शर्मिष्ठा वार्षपर्वणी । तत्र यदोर्यादवाः पूरोः पौरवाः ॥ ९ ॥ पूरोस्तु भार्य्या कौशल्या नाम तस्यामस्य जज्ञे जनमेजयो नाम । यज्ञीयमेधानाजहार विजित्य चेष्ट्वा वनं विवेश ॥ १० ॥ जनमेजयः खल्वनन्तां नामोपयेमे माधवीं तस्यामस्य जज्ञे प्राचिन्वान् । यः प्राचीं दिशं जिगाय यावत् सूर्य्योदयात् ततस्तस्य प्राचिन्वत्त्वम् ॥ ११ ॥ प्राचिन्वान् खल्वश्मकीमुपयेमे यादवीं तस्यामस्य जज्ञे संयातिः ॥ १२ ॥ संयातिः खलु दृषद्वतो दुहितरं वराङ्गीं नामोपयेमे तस्यामस्य जज्ञे अहंयातिः ॥ १३ ॥ अहंयातिः खलु कृतवीर्य्यदुहितरमुपयेमे भानुमतीं नाम तस्यामस्य जज्ञे सार्वभौमः ॥ १४ ॥ सार्वभौमः खलु

जित्वा जहार कैकेयीं सुनन्दां नाम तामुपयेमे तस्यामस्य जज्ञे जयत्सेनो नाम ॥ १५ ॥ जयत्सेनः खलु वैदर्भीमुपयेमे सुश्रवां नाम तस्यामस्य जज्ञे अवाचीनः ॥ १६ ॥ अवाचीनोऽपि वैदर्भीमपरामेवोपयेमे मर्य्यादां नाम तस्यामस्य जज्ञे अरिहः ॥ १७ ॥ अरिहः खल्वाङ्गीमुपयेमे तस्यामस्य जज्ञे महाभौमः ॥ १८ ॥ महाभौमः खलु प्राचेनजितीमुपयेमे सुयज्ञां नाम तस्यामस्य जज्ञे अयुतनायी यः पुरुषमेधानामयुतमानयत् तेनास्यायुतनायित्वम् ॥ १९ ॥ अयुतनायी खलु पृष्टुश्रवसो दुहितरमुपयेमे कामां नाम तस्यामस्य जज्ञे अक्रोधनः ॥ २० ॥ स खलु कालिङ्गीं करम्भां नामोपयेमे तस्यामस्य जज्ञे देवातिथिः ॥ २१ ॥ देवातिथिः खलु वैदेहीमुपयेमे मर्य्यादां नाम तस्यामस्य यज्ञेऽरिहो नाम ॥ २२ ॥ अरिहः खल्वाङ्गेयीमुपयेमे सुदेवां नाम तस्यां पुत्रमजीजनद्दृढम् ॥ २३ ॥ ऋक्षः खलु तक्षकदुहितरमुपयेमे ज्वालां नाम तस्यां पुत्रं मतिनारं नामोत्पादयामास ॥ २४ ॥ मतिनारः खलु सरस्वत्यां गुणसमन्वितं द्वादशवार्षिकं सत्रमाहरत् । समाप्ते च सत्रे सरस्वत्यभिगम्य तं भर्त्तारं वरयामास । स तस्यां पुत्रमजीजनत्तंसुं नाम ॥ २५ ॥ अत्रानुवंशश्लोको भवति । तंसुं सरस्वती पुत्रं मतिनारादजीजनत् । ईलिनं जनयामास कालिङ्ग्या तंसुरात्मजम् ॥ २६ ॥ ईलिनस्तु रथन्तर्य्यां दुष्यन्तादयान् पञ्च पुत्रानजीजनत् ॥ २७ ॥ दुष्यन्तः खलु विश्वामित्रदुहितरं शकुन्तलां नामोपयेमे तस्यामस्य जज्ञे भरतः ॥ २८ ॥ अत्रानुवंशश्लोकौ भवतः । भस्त्रा माता पितुः पुत्रो येन जातः स एव सः । भरस्व पुत्रं दुष्यन्त मावमंस्थाः शकुन्तलाम् ॥ २९ ॥ रेतोधाः पुत्र उन्नयति नरदेव यमक्षयात् । त्वञ्चास्य धाता गर्भस्य सत्यमाह शकुन्तला ॥ ३० ॥ ततोऽस्य भरतत्वं भरतः खलु काश्येयीमुपयेमे सार्वसेनीं सुनन्दां नाम तस्यामस्य जज्ञे

भुमन्युः ॥ ३१ ॥ भुमन्युः खलु दाशार्हीमुपयेमे विजयां नाम तस्यामस्य जज्ञे सुहोत्रः ॥ ३२ ॥ सुहोत्रः खल्विक्ष्वाकुकन्यामुपयेमे सुवर्णां नाम तस्यामस्य जज्ञे हस्ती य इदं हास्तिनपुरं स्थापयामास एतदस्य हास्तिनपुरत्वम् ॥ ३३ ॥ हस्ती खलु त्रैगर्त्तीमुपयेमे यशोधरां नाम तस्यामस्य जज्ञे विकुण्ठनो नाम ॥ ३४ ॥ विकुण्ठनः खलु दाशार्हीमुपयेमे सुदेवां नाम तस्यामस्य जज्ञे अजमीढो नाम ॥ ३५ ॥ अजमीढस्य चतुर्विंशं पुत्रशतं बभूव कैकेय्यां गान्धार्य्यां विशालायामृक्षायां चेति। ऋक्ष ऋक्षवंशधरा नृपतयः तत्र वंशकरः संवरणः ॥ ३६ ॥ संवरणः खलु वैवस्वतीं तपतीं नामोपयेमे तस्यामस्य जज्ञे कुरुः ॥ ३७ ॥ कुरुः खलु दाशार्हीमुपयेमे शुभाङ्गीं नाम तस्यामस्य जज्ञे विदूरथः ॥ ३८ ॥ विदूरथस्तु माधवीमुपयेमे संप्रियां नाम तस्यामस्य जज्ञे अनश्वा नाम ॥ ३९ ॥ अनश्वा खलु मागधीमुपयेमे अमृतां नाम तस्यामस्य जज्ञे परीक्षित् ॥४०॥ परीक्षित् खलु बाह्लदामुपयेमे सुयशां नाम तस्यामस्य जज्ञे भीमसेनः ॥ ४१ ॥ भीमसेनः खलु कैकेयीमुपयेमे कुमारीं नाम तस्यामस्य जज्ञे प्रतिश्रवा नाम ॥ ४२ ॥ प्रतिश्रवसः प्रतीपः। प्रतीपः खलु शैव्यामुपयेमे सुनन्दां नाम तस्यां पुत्रानुत्पादयामास देवापिं शान्तनुं बाह्लीकं चेति ॥ ४३ ॥ देवापिः खलु बाल एवारण्यं विवेश शान्तनुस्तु महीपालो बभूव ॥ ४४ ॥ अत्रानुवंशश्लोको भवति। यं यं करास्यां स्पृशति जीर्णं स सुखमश्नुते। पुनर्युवा च भवति तस्मात्तं शान्तनुं विदुः इति तदस्य शान्तनुत्वम् ॥ ४५ ॥ शान्तनुः खलु गङ्गां भागीरथीमुपयेमे तस्यामस्य जज्ञे देवव्रतो नाम यमाहुर्भीष्ममिति ॥ ४६ ॥ भीष्मः खलु पितुः प्रियचिकीर्षया सत्यवतीं मातरमुदवाहयत् यामाङ्गन्धकालीमिति ॥ ४७ ॥ तस्यां पूर्वं कानीनो गर्भः पराशराद्वैपायनो-

ऽभवत् । तस्यामेव शान्तनोरन्यौ द्वौ पुत्रौ बभूवतुः ॥ ४८ ॥ विचित्रवीर्य्यश्चित्राङ्गदश्च तयोरप्राप्तयौवन एव चित्राङ्गदो गन्धर्वेण हतः विचित्रवीर्य्यस्तु राजासीत् ॥ ४९ ॥ विचित्रवीर्य्यः खलु कौशल्यामजेऽम्बिकाम्बालिके काशिराजदुहितरावुपयेमे ॥ ५० ॥ विचित्रवीर्य्यं क्षयपत्य एव विदेहत्वं प्राप्तः ततः सत्यवत्यचिन्तयन्ना दीप्यन्तो वंश उच्छेदं व्रजेदिति ॥ ५१ ॥ सा द्वैपायनमृषिं मनसा चिन्तयामास । स तस्याः पुरतः स्थितः किङ्करवाणीति ॥ ५२ ॥ सा तमुवाच भ्राता तवानपत्य एव स्वर्यातो विचित्रवीर्य्यः साध्वपत्यं तस्योत्पादयेति ॥ ५३ ॥ स तथेत्युक्त्वा त्रीन् पुत्रानुत्पादयामास । धृतराष्ट्रं पाण्डुं विदुरञ्चेति ॥ ५४ ॥ तत्र धृतराष्ट्रस्य राज्ञः पुत्रशतं बभूव गान्धार्य्यां वरदानाद्वैपायनस्य ॥ ५५ ॥ तेषां धृतराष्ट्रस्य पुत्राणां चत्वारः प्रधाना बभूवुः । दुर्य्योधनो दुःशासनो विकर्णश्चित्रसेनश्चेति ॥ ५६ ॥ पाण्डोस्तु द्वे भार्य्ये बभूवतुः कुन्ती पृथा नाम माद्री चेत्यूभे स्त्रीरत्ने ॥ ५७ ॥ अथ पाण्डुर्मृगयां चरन्मैथुनगतऋषिमपश्यन्मृग्यां वर्त्तमानं तथैवाङ्गुतमनासादितकामरसमत्यन्तञ्च वाणेनाजघान ॥ ५८ ॥ स वाणविद्ध उवाच पाण्डुं चरताधर्ममिमं येन त्वयाभिन्नेन कामरसस्याहमनवाप्तकामरसो निहतस्तस्मात्त्वमप्येतामवस्थामासाद्यानवाप्तकामरसः पञ्चत्वमाप्स्यसि क्षिप्रमेवेति स विवर्णरूपत्वया पाण्डुः शापं परिहरमाणो नोपासर्पत भार्य्यें वाक्यं चोवाच ॥ ५९ ॥ स्वचापल्यादिदं प्राप्तवानहं शृणोमि च नानपत्यस्य लोकाः सन्तीति सा त्वं मदर्थे पुत्रानुत्पादयेति कुन्तीमुवाच सा तयोक्ता पुत्रानुत्पादयामास धर्मादुधिष्ठिरं मारुताद्भीमसेनं शक्रादर्जुनमिति ॥ ६० ॥ तां संहृष्टः पाण्डुरुवाच दृष्टं ते सपत्नानपत्या साध्वस्या अपत्यमुत्पाद्यतामिति ॥ ६१ ॥ एवमस्त्विति कुन्ती तां विद्यां माद्र्यै प्रायच्छत् । माद्र्यामश्विभ्यां

नकुलसहदेवावुत्पादितौ ॥ ६२ ॥ माद्रीं खल्वलंकृतां दृष्ट्वा पाण्डुर्भावं चक्रे स तां स्पृष्ट्वैव विदेहत्वं प्राप्तः ॥ ६३ ॥ तत्रैनं चिताग्निस्थं माद्री समन्वारुरोह उवाच कुन्तीं यमयोरप्रमत्तया त्वया भवितव्यमिति ॥ ६४ ॥ ततस्ते पाण्डवाः कुन्त्या सहिता हस्तिनपुरमानीय तापसैर्भीष्मस्य विदुरस्य च निवेदिताः । सर्ववर्णानाञ्च निवेद्यान्तर्हितास्तापसा बभूवुः प्रेक्षमाणानामेव तेषाम् ॥ ६५ ॥ तञ्च वाक्यमुपश्रुत्य भगवतामन्तरीक्षात् पुष्पवृष्टिः पपात देवदुन्दुभयश्च प्रणेदुः ॥ ६६ ॥ प्रतिगृहीताश्च पाण्डवाः पितुर्निधनमावेद्यंस्तस्यौर्द्धदेहिकं न्यायतश्च कृतवन्तस्तांस्तत्र निवसतः पाण्डवान् बाल्यात् प्रभृति दुर्बोधनो नामर्षयत् ॥ ६७ ॥ पापाचारो राक्षसीं बुद्धिमाश्रितोऽनेकैरुपायैरुद्वर्तुञ्च व्यवसितो भाविताच्चार्थस्य न शक्नोत्तांस्ते समुद्वर्त्तुम् ॥ ६८ ॥ ततश्च धृतराष्ट्रेण व्याजेन वारणावतमनुप्रेषिता गमनमरोचयत् ॥ ६९ ॥ तत्रापि जतुगृहे दग्धुं समारब्धा न शक्किता विदुरमन्त्रितेनेति ॥ ७० ॥ तस्माच्च बिडिम्बमन्तरा हत्वा एकचक्रां गताः ॥ ७१ ॥ तस्यामप्येकचक्रायां बकं नाम राक्षसं हत्वा पाञ्चालनगरमधिगताः ॥ ७२ ॥ तत्र द्रौपदीं भार्य्यामविन्दन् स्वविषयं चाभिजग्मुः ॥ ७३ ॥ कुशलिनः पुत्रांश्चोत्पादयामासुः प्रतिविन्ध्यं युधिष्ठिरः सुतसोमं वृकोदरः । श्रुतकीर्त्तिमर्जुनः शतानीकं नकुलः श्रुतकर्माणं सहदेव इति ॥ ७४ ॥ युधिष्ठिरस्तु गोवासनस्य शैब्यस्य देविकां नाम कन्यां स्वयम्वरां लेभे तस्यां पुत्रं जनयामास यौधेयं नाम ॥ ७५ ॥ भीमसेनोऽपि काश्यां बलन्धरां नामोपयेमे वीर्य्यशुल्कां तस्यां पुत्रं सर्वगं नामोत्पादयामास ॥ ७६ ॥ अर्जुनः खलु द्वारवतीं गत्वा भगिनीं वासुदेवस्य सुभद्रां भद्रभाषिणीं भार्य्यामुदावहत् । स्वविषयं चाभ्याजगाम कृशली तस्यां पुत्रमभिमन्युं

श्रुतोवगुणसम्पन्नं दयितं वासुदेवस्याजनयत् ॥ ७७ ॥ नकुलस्तु चैद्यां करेणुमतीं नाम भार्यामुदावहत्तस्यां पुत्रं निरमित्रं नामाजनयत् ॥ ७८ ॥ सहदेवोऽपि माद्रीमेव स्वयम्वरे विजयां नामोपयेमे मद्रराजस्य द्युतिमतो दुहितरं तस्यां पुत्रमजनयत् सुहोत्रं नाम ॥ ७९ ॥ भीमसेनस्तु पूर्वमेव हिडिम्बायां राक्षसं घटोत्कचं पुत्रमुत्पादयामास ॥ ८० ॥ इत्येते एकादश पाण्डवानां पुत्रास्तेषां वंशकरोऽभिमन्युः ॥ ८१ ॥ स विराटस्य दुहितरमुपयेमे उत्तरां नाम । तस्यामस्य परानुर्गर्भोऽभवत्तमुत्सङ्गेन प्रतिजग्राह पृथा नियोगात् । पुरुषोत्तमस्य वासुदेवस्य पाण्मासिकं गर्भमहमेनं जीवयिष्यामीति ॥ ८२ ॥ स भगवता वासुदेवेनासञ्जातबलवीर्यपराक्रमोऽकालजातोऽस्त्राग्निना दग्धस्तेजसा स्वेन स जीवितः जीवयित्वा चैनमुवाच परिक्षीणे कुले जातो भवत्वयं परीक्षित्त्वामेति ॥ ८३ ॥ परीक्षित् खलु माद्रवतीं नामोपयेमे त्वन्मातरं तस्यां भवान् जज्ञे जनमेजयः ॥ ८४ ॥ भवतो वपुष्टमायां द्वौ पुत्रौ जज्ञाते श्रुतानीकः शङ्कुकर्णश्च श्रुतानीकस्य वैदेह्यां पुत्र उत्पन्नोऽश्वमेधदत्त इति ॥ ८५ ॥ एष पूरोर्वंशः पाण्डवानाञ्च कीर्त्तितो धन्यः पुण्यः परमपवित्रः सततं श्रोतव्यो ब्राह्मणैर्नियमवद्भिरनन्तरं क्षत्रियैः स्वधर्मनिरतैः प्रजापालनतत्परैः । वैश्यैरपि च श्रोतव्योऽभिगम्यश्च । तथा शूद्रैरपि त्रिवर्णशुश्रूषुभिः श्रद्दधानैरिति ॥ ८६ ॥ इतिहासमिमं पुण्यमशेषतः श्रावयिष्यन्ति ये नराः । श्रोष्यन्ति वा नियतात्मानो विमत्सरा मैत्रा वेदपरास्तेऽपि स्वर्गजितः पुण्यलोका भवन्ति सततं देवब्राह्मणमनुष्याणां मान्याः सम्पूज्याश्च ॥ ८७ ॥ परं हीदं भारतं भगवता व्यासेन प्रोक्तं पावनं ये ब्राह्मणादयो वर्णाः श्रद्दधाना अमत्सरा मैत्रा वेदसम्पन्नाः श्रोष्यन्ति तेऽपि स्वर्गजितः सुकृतिनोऽग्र्याः कृताकृते भवन्ति ॥ ८८ ॥ भवतिचात्र श्लोकः । इदं हि

वेदैः समितं पवित्रमपि चोत्तमम् । धन्यं यशस्यमायुष्यं श्रोतव्यं नियतात्मभिः ॥ ८६ ॥

इत्यादिपर्वणि सम्भवपर्वणि पूरुवंशानुकीर्त्तने षञ्चनवतोऽध्यायः ॥ ६५ ॥

वैशम्पायन उवाच । इक्ष्वाकुवंशप्रभवो राजासीत् पृथिवीपतिः । महाभिष इति ख्यातः सत्यवाक् सत्यविक्रमः ॥ १ ॥ सोऽश्वमेधसहस्रेण राजसूयशतेन च । तोषयामास देवेशं स्वर्गं लेभे ततः प्रभुः ॥ २ ॥ ततः कदाचिन्ब्रह्माणमुपासाञ्चक्रिरे सुराः । तत्र राजर्षयो ह्यासन् स च राजा महाभिषः ॥ ३ ॥ अथ गङ्गा सरिच्छ्रेष्ठा समुपायात्तिताम्रहम् । तस्या वासः समुद्भूतं मारुतेन शशिप्रभम् ॥ ४ ॥ ततोऽभवन् सुरगणाः सहसाब्जमुखास्तदा । महाभिषस्तु राजर्षिरगङ्गो दृष्टवान्नदीं ॥ ५ ॥ सोपध्यातो भगवता ब्रह्मणा तु महाभिषः । उक्तश्च जातो मर्त्येषु पुनर्लोकानवाप्स्यसि ॥ ६ ॥ स चिन्तयित्वा नृपतिर्नृपानन्यांस्तपोधनान् । प्रतीपं रोचयामास पितरं भूरितेजसम् ॥ ७ ॥ महाभिषन्तु तं दृष्ट्वा नदी धैर्य्याच्च्युतं नृपम् । तमेव मनसा ध्यायन्त्युपावर्त्तत सरिद्वरा ॥ ८ ॥ सा तु विध्वस्तवपुषः कञ्चलाभिहतान्नृप । ददर्श पथि गच्छन्ती वसूनष्टौ दिवौकसः ॥ ९ ॥ तथारूपांश्च तान् दृष्ट्वा पप्रच्छ सरितांवरा । किमिदं नष्टरूपाः स्थ कच्चित् क्षेमं दिवौकसाम् ॥ १० ॥ तामूचुर्वसवो देवाः शप्ताः स्मो वै महानदि । अल्पेऽपराधे संरम्भाद्वशिष्ठेन महात्मना ॥ ११ ॥ विमूढा हि वयं सर्वे प्रच्छन्नर्षिसत्तमम् । सन्ध्यां वशिष्ठमासीनं तमत्यभिहताः पुरा । तेन कोपाद्वयं शप्ता योनौ संभवतेति च ॥ १२ ॥ न तच्छक्यं निवर्त्तयितुं यदुक्तं ब्रह्मवादिना । त्वमस्मान्मानुषी

भूत्वा स्वज पुत्रान्वसून् भुवि ॥ १३ ॥ न मानुषीणां जठरं प्रविश्येम वयं शुभे । इत्युक्ता तैश्च वसुभिस्तथेत्युक्ताब्रवीदिदम् ॥१४॥

गङ्गोवाच । मर्त्येषु पुरुषश्रेष्ठः को वः कर्त्ता भविष्यति ॥१५॥

वसव ऊचुः । प्रतीपस्य सुतो राजा शान्तनुर्लोकविश्रुतः । भविता मानुषे लोके स नः कर्त्ता भविष्यति ॥ १६ ॥

गङ्गोवाच । ममाप्येवं मतं देवा यथा मां वदतानघाः । प्रियं तस्य करिष्यामि युष्माकञ्चैतदीप्सितम् ॥ १७ ॥

वसव ऊचुः । जातान् कुमारान् स्वानम्भ प्रक्षेष्टुं वै त्वमर्हसि । यथा न चिरकालं नो निष्कृतिः स्यात्त्रिलोकगे ॥१८॥

गङ्गोवाच । एवमेतत्करिष्यामि पुत्रस्नेह विधीयताम् । नास्य मोहः सङ्गमः स्यात् पुत्रहेतोर्मया सह ॥ १९ ॥

वसव ऊचुः । तुरीयार्द्धं प्रदास्यामो वीर्य्यस्यैकैकशो वयम् । तेन वीर्य्येण पुत्रस्ते भविता तस्य चेप्सितः ॥ २० ॥ न सम्यत्स्यति मर्त्येषु पुनस्तस्य तु सन्ततिः । तस्मादप्यः पुत्रस्ते भविष्यति स वीर्य्यवान् ॥ २१ ॥ एवं ते समयं कृत्वा गङ्गया वसवः सह । जग्मुः सहृष्टमनसो यथासङ्कल्पमञ्जसा ॥ २२ ॥

इत्यादिपर्वणि सम्भवपर्वणि महाभिषोपाख्याने षष्ठवतोऽध्यायः ॥ ९६ ॥

—०:०—

वैशम्पायन उवाच । ततः प्रतीपो राजासीत्सर्वभूतहितः सदा । निषसाद समा वह्नौर्गङ्गाद्वारगतो जपन् ॥ १ ॥ तस्य रूपगुणोपेता गङ्गा स्त्रीरूपधारिणी । जत्तीर्य्य सलिलात्तस्मात्लोभनीयतमाकृतिः ॥ २ ॥ अधीयानस्य राजर्षेर्दिव्यरूपा मनस्विनी । दक्षिणं प्राससङ्गाजमूरुं भेजे शुभानना ॥ ३ ॥ प्रती-

पस्तु महीपालस्तामुवाच यशस्विनीम्। करोमि किं ते कल्याणि प्रियं यत्तेऽभिकाङ्क्षितम्॥ ४॥

स्नुषोवाच। त्वामहं कामये राजन् भजमानां भजस्व माम्। त्यागः कामवतीनां हि स्त्रीणां सद्भिर्विगर्हितः॥ ५॥

प्रतीप उवाच। नाहं परस्त्रियं कामाद्गच्छेयं वरवर्णिनि। न चासवर्णां कल्याणि धर्ममेतद्धि मे व्रतम्॥ ६॥

स्नुषोवाच। नाम्येवास्मि नागस्या न वक्तव्या च कर्हिचित्। भजन्तीं भज मां राजन् दिव्यां कन्यां वरस्त्रियम्॥ ७॥

प्रतीप उवाच। मया निदृत्तमेतत्तु यन्मां चोदयसि प्रियम्। अन्यथा प्रतिपद्यं मां नाम्येहर्मविलवः॥ ८॥ प्राप्य दक्षिणमूरुं मे त्वमाश्लिष्टा वराङ्गने। अपत्यानां स्नुषाणाञ्च भीरु विद्योतदासनम्॥ ९॥ सव्योरुः कामिनीभोग्यस्त्वया स च विवर्जितः। तस्मादहं नाचरिष्ये त्वयि कामं वराङ्गने॥ १०॥ स्नुषा मे भव सुश्रोणि पुत्रार्थं त्वां वृणोम्यहम्। स्नुषापत्यं हि वामोरु त्वमागम्य समाश्रिता॥ ११॥

स्नुषोवाच। एवमप्यस्तु धर्मज्ञ संयुज्येयं सुतेन ते। त्वज्जत्या तु भजिष्यामि प्रख्यातं भारतं कुलम्॥ १२॥ पृथिव्यां पार्थिवा ये च तेषां यूयं परायणम्। गुणा न हि मया शक्या वक्तुं वर्षशतैरपि॥ १३॥ कुलस्य ये वः प्रथितास्तत्साधुत्वमथोत्तमम्। समयेनेह धर्मज्ञ आचरेयञ्च यद्विभो। तत्सर्वमेव पुत्रस्ते न भीमांसेत कर्हिचित्॥ १४॥ एवं वसन्ती पुत्रे ते वर्धयिष्याम्यहं रतिम्। पुत्रैः पुत्रैश्च स्वर्गं प्राप्स्यति ते सुतः॥१४॥

वैशम्पायन उवाच। तथेत्युक्त्वा तु सा राजंस्तत्रैवान्तरधीयत। पुत्रजन्म प्रतीक्षन्ती स राजा तदधारयत्॥ १५॥ एतस्मिन्नेव काले तु प्रतीपः क्षत्रियर्षभः। तपस्तेपे सुतस्यार्थे समार्क्षः कुरुनन्दनः॥ १६॥ तयोः समभवत् पुत्रो देवयोः स

महाभिषः। शान्तस्य जज्ञे सन्तानस्तस्मादासीत्स शान्तनुः ॥१७॥
संस्मरंश्चाचयान् लोकान्विजितान् स्वेन कर्मणा। पुण्यकर्मकृदेवासीच्छान्तनुः कुरुसत्तमः ॥ १८ ॥ प्रतीपः शान्तनुं पुत्रं यौवनस्थं ततोऽन्वगात्। पुरा स्त्री मां समभ्यागाच्छान्तनो भूतये तव ॥ १९ ॥ त्वामाव्रजेयदि रहः सा पुत्र वरवर्णिनी। कामयानाभिरूपाङ्गा दिव्यस्त्री पुत्रकाम्यया ॥ २० ॥ सा त्वया नानुयोक्तव्या कामि कस्यासि चाङ्गने। यच्च कुर्य्यान्न तत्कर्म सा प्रष्टव्या त्वयानघ। मन्नियोगाङ्गजन्तीं तां भजेथ इत्युवाच तम् ॥ २१ ॥

वैशम्पायन उवाच। एवं सन्दिश्य तनयं प्रतीपः शान्तनुं तदा। स्वे च राज्येऽभिषिच्यैनं वनं राजा विवेश ह ॥ २२ ॥ स राजा शान्तनुर्धीमान्देवराजसमद्युतिः। बभूव मृगयाशीलः सततं वनगोचरः ॥ २३ ॥ स मृगान्महिषांश्चैव विनिघ्नन् राजसत्तमः। गङ्गामनु चचारैकः सिद्धचारणसेविताम् ॥ २४ ॥ स कदाचिन्महाराज ददर्श परमां स्त्रियम्। जाज्वल्यमानां वपुषा साक्षाच्छ्रियमिवापराम् ॥ २५ ॥ सर्वाङ्गवद्यां सुदतीं दिव्याभरणभूषिताम्। सूक्ष्माम्बरधरामेकां पद्मोदरसमप्रभाम् ॥२६॥ तां दृष्ट्वा हृष्टरोमाभूद्विस्मितो रूपसम्पदा। पिबन्निव च नेत्राभ्यां नाशक्यत नराधिपः ॥ २७ ॥ सा च दृष्ट्वैव राजानं विचरन्तं महाद्युतिम्। स्नेहादागतसौहार्दा नाशक्यत विलासिनी ॥२८॥ तामुवाच ततो राजा सान्त्वयन् श्लक्ष्णया गिरा। देवी वा दानवो वा त्वं गन्धर्वी चाप्सरा वरे ॥२९॥ यक्षी वा पन्नगी वापि मानुषी वा सुमध्यमे। याचे त्वां सुरगर्भाभे भार्या मे भव शोभने ॥३०॥

इत्यादिपर्वणि सम्भवपर्वणि शान्तनूपाख्याने
सप्तनवतोऽध्यायः ॥ ९७ ॥

—०—

वैशम्पायन उवाच । एतच्छ्रुत्वा वचो राज्ञः सस्मितं मधु वल्गु च । वसूनां समयं स्मृत्वाभ्यगच्छदनिन्दिता ॥ १ ॥ उवाच चैव राज्ञः सा ह्लादयन्ती मनो गिरा । भविष्यामि महीपाल महिषी ते वशानुगा ॥ २ ॥ यत्तु कुर्यामहं राजन् शुभं वा यदि वाशुभम् । न तद्वारयितव्यास्मि न वक्तव्या तथाप्रियम् ॥ ३ ॥ एवं हि वर्त्तमानेऽहं त्वयि वत्स्यामि पार्थिव । वारिता विप्रियं चोक्ता त्यज्येयं त्वामसंशयम् ॥ ४ ॥ तथेति राज्ञा सा प्रोक्ता तदा भरतसत्तम । प्रहर्षमतुलं लेभे प्राप्य तं पार्थिवोत्तमम् ॥ ५ ॥ आसाद्य शान्तनुस्त्वाञ्च बुभुजे कामतो वशी । न प्रष्टव्येति मन्वानो न स तां किञ्चिदूचिवान् ॥ ६ ॥ स तस्याः शीलवृत्तेन रूपौदार्य्यगुणेन च । उपचारेण च रहस्तुतोष जगतीपतिः ॥ ७ ॥ दिव्यरूपा हि सा देवी गङ्गा त्रिपथगामिनी । मानुषं विग्रहं कृत्वा श्रीमन्तं वरवर्णिनी ॥ ८ ॥ भाग्योपनतकामस्य भार्य्या चोपनताभवत् । शान्तनोर्नृपसिंहस्य देवराजसमद्युतेः ॥ ९ ॥ सम्भोगस्नेहचातुर्य्यैर्हावलास्यमनोहरैः । राजानं रमयामास यथा रेमे तथैव सः ॥ १० ॥ स राजा रतिसक्तत्वादुत्तमस्त्रीगुणैर्हृतः । सत्यमप्यतिहन्मासान् बुबुधे न वहून् गतान् ॥ ११ ॥ रममाणस्तया सार्द्धं यथाकामं नरेश्वरः । अष्टावजनयत् पुत्रान्सोममरसन्निभान् ॥ १२ ॥ जातं जातञ्च सा पुत्रं क्षिपत्यम्भसि भारत । प्रीणाम्यहं त्वामित्युक्ता गङ्गा स्रोतस्यमज्जयत् ॥ १३ ॥ तस्य तन्न प्रियं राज्ञः शान्तनोरभवत्तदा । न च तां किञ्चनोवाच त्यागाद्भीतो महीपतिः ॥ १४ ॥ अथैनामष्टमे पुत्रे जाते प्रहसतीमिव । उवाच राजा दुःखार्त्तः परीप्सन् पुत्रमात्मनः ॥ १५ ॥ मा वधीः कस्य कासीति किं हिनस्सि सुतानिति । पुत्रस्ते सुमहत्यापं सम्प्राप्तं सुगर्हितम् ॥ १६ ॥

ख्यवाच। पुत्रकाम न ते हन्मि पुत्रं पुत्रवतां वर। जीर्णोऽस्तु मम वासोऽयं यथा स समयः कृतः॥ १७॥ अहं गङ्गा जह्नुसुता महर्षिगणसेविता। देवकार्य्यार्थसिद्ध्यर्थमुषिताहं त्वया सह॥ १८॥ इमेऽष्टौ वसवो देवा महाभागा महौजसः। वशिष्ठशापदोषेण मानुषत्वमुपागताः॥ १९॥ तेषां जनयिता नान्यस्त्वदृते भूवि विद्यते। महिषा मानुषी धात्री लोके नास्तीह काचन॥ २०॥ तस्मात्तज्जननीहेतोर्मानुषत्वमुपागता। जनयित्वा वसूनष्टौ जिता लोकास्त्वयात्मया॥ २१॥ देवानां समयक्षेप वसूनां संश्रुतो मया। जातं जातं मोक्षयिष्ये जन्मतो मानुषादिति॥ २२॥ तत्ते शापाद्विनिर्मुक्ता आपवस्य महात्मनः। क्षिप्रं तेऽस्तु गमिष्यामि पुत्रं पाहि महाव्रतम्॥ २३॥ एष पर्य्यायवासो मे वसूनां सन्निधौ कृतः। मत्प्रसूतं विजानीहि गङ्गादत्तमिमं सुतम्॥ २४॥

इत्यादिपर्वणि सम्भवपर्वणि भीष्मोत्पत्तावष्ट
नवतोऽध्यायः॥ ९८॥

—:०:—

शान्तनुरुवाच। आपवो नाम को न्वेष वसूनां किञ्च दुष्कृतम्। यस्माभिशापात्ते सर्वे मानुषीं योनिमागताः॥ १॥ अनेन च कुमारेण त्वया दत्तेन किं कृतम्। यस्य चैव कृतेनायं मानुषेषु निवत्स्यति॥ २॥ ईदृगा वै सर्वलोकस्य वसवस्ते च वै कथम्। मानुषेषूदपद्यन्त तन्मामाचक्ष्व जाह्नवि॥ ३॥

वैशम्पायन उवाच। एवमुक्ता तदा गङ्गा राजानमिदमब्रवीत्। भर्तारं जाह्नवी देवी शान्तनुं पूरुषर्षभम्॥ ४॥

गङ्गोवाच। यं लेभे वरुणः पुत्रं पुरा भरतसत्तम। वशिष्ठनामा स मुनिः ख्यात आपव इत्युत॥ ५॥ तस्याश्रमपदं

पुण्यं जगपक्षिसमन्वितम् । मेरोः पार्श्वे नगेन्द्रस्य सर्वर्तु-कुसुमाद्भुतम् ॥ ६ ॥ स वारुणिस्तपस्तेपे तस्मिन् भरतसत्तम । वने पुण्यकृतां श्रेष्ठः स्वादुमूलफलोदके ॥ ७ ॥ दक्षस्य दुहिता या तु सुरभीत्यभिविश्रुता । गां प्रजाता तु सा देवी कश्यपा-ङ्गरतर्षभ ॥ ८ ॥ अनुग्रहार्थं जगतः सर्वकामदुहां वराम् । तां लेभे गां तु धर्मात्मा होमधेनुं स वारुणिः ॥ ९ ॥ सा तस्मिंस्तापसारण्ये वसन्ती मुनिसेविते । चचार पुण्ये रम्ये च गौरपेत-भया तदा ॥ १० ॥ अथ तद्वनमाजग्मुः कदाचिद्भरतर्षभ । पृथ्वाद्या वसवः सर्वे देवा देवर्षिसेवितम् ॥ ११ ॥ ते सदारा वनं तच्च व्यचरन्त समन्ततः । रेमिरे रमणीयेषु पर्वतेषु वनेषु च ॥ १२ ॥ तत्रैकस्याथ भार्य्या तु वसोर्वासवविक्रम । सञ्चरन्ती वने तस्मिन् गां ददर्श सुमध्यमा ॥ १३ ॥ नन्दिनीं नाम राजेन्द्र सर्वकामदुघोत्तमाम् । सा विस्मयसमाविष्टा शीलद्रविणसम्पदा ॥ १४ ॥ द्यवे वै दर्शयामास तां गां गोवृषभेक्षणाम् । आपी-नाञ्च सुदोग्ध्रीञ्च सुबालधिखुरां शुभाम् । उपपन्नां गुणैः सर्वैः शीलेनानुत्तमेन च ॥१५॥ एवं गुणसमायुक्तां वसवे वसुनन्दिनी । दर्शयामास राजेन्द्र पुरा पौरवनन्दन ॥ १६ ॥ द्यौस्तदा तां तु दृष्ट्वैव गां गजेन्द्रेन्द्रविक्रम । उवाच राजंस्तां देवीं तस्या रूपगुणान् वदन् ॥ १७ ॥ एषा गौरुत्तमा देवी वारुणेरसिते-क्षणा । ऋषेरस्य वरारोहे यस्येदं वनमुत्तमम् ॥१८॥ अस्याः क्षीरं पिबेन्मर्त्यः स्वादु यो वै सुमध्यमे । दशवर्षसहस्राणि स जीवेत् स्थिरयौवनः ॥ १९ ॥ एतच्छ्रुत्वा तु सा देवी नृपोत्तम सुमध्यमा । तमुवाचानवद्याङ्गी भर्त्तारं दीप्ततेजसम् ॥ २० ॥ अस्ति मे मानुषे लोके नरदेवात्मजा सखी । नाम्ना जितवती नाम रूपयौवनशालिनी ॥ २१ ॥ उशीनरस्य राजर्षेः सत्य-सन्धस्य धीमतः । दुहिता प्रथिता लोके मानुषे रूपसम्पदा

॥ २२ ॥ तस्या हेतोर्महाभाग सवत्सां गां ममेप्सिताम् । आनयस्वामरश्रेष्ठ त्वरितं पुण्यवर्द्धन ॥ २३ ॥ यावदस्याः पयः पीत्वा सा सखी मम मानद । मानुषेषु भवत्येका जरारोगविवर्जिता ॥ २४ ॥ एतन्मम महाभाग कर्तुमर्हस्यनिन्दित । प्रियं प्रियतरं ह्यस्मान्नास्ति मेऽन्यत्कथञ्चन ॥ २५ ॥ एतच्छ्रुत्वा वचस्तस्या देव्याः प्रियचिकीर्षया । दृष्ट्वा वै भ्रातृभिः सार्द्धं द्यौस्तदा तां जहार गाम् ॥ २६ ॥ तया कमलपत्राक्ष्या नियुक्तो द्यौस्तदा नृप । ऋषेस्तस्य तपस्वीव्रं न शशाक निरीक्षितुम् । हृता गौः सा तदा तेन प्रपातस्तु न तर्कितः ॥ २७ ॥ अथाश्रमपदं प्राप्तः फलान्यादाय वारुणिः । न चापश्यत्स गां तत्र सवत्सां काननोत्तमे ॥ २८ ॥ ततः स मृगयामास वने तस्मिंस्तपोधनः । नाध्यागमच्च भगवांस्तां गां मुनिरुदारधीः ॥ २९ ॥ ज्ञात्वा तथापनीतां तां वसुभिर्दिव्यदर्शनैः । यथौ क्रोधवशं सद्यः शशाप च वसूंस्तदा ॥ ३० ॥ यस्मान्मे वसवो जह्रुर्गां वै दोग्ध्रीं सुबालधिम् । तस्मात्सर्वे जनिष्यन्ति मानुषेषु न संशयः ॥ ३१ ॥ एवं शशाप भगवान् वसूँस्तान् भरतर्षभ । वशं क्रोधस्य सम्प्राप्त आपवो मुनिसत्तमः ॥ ३२ ॥ श्रुत्वा च तान्महाभागस्तपस्येव मनो दधे । एवं स शप्तवान् राजन् वसूनृषी तपोधनः । महाप्रभावो ब्रह्मर्षिर्देवान् क्रोधसमन्वितः ॥ ३३ ॥ अथाश्रमपदं प्राप्तास्ते वै भूयो महात्मनः । शप्ताः स्म इति जानन्त ऋषिं तमुपचक्रमुः ॥ ३४ ॥ प्रसादयन्तस्तमृषिं वसवः पार्थिवर्षभ । लेभिरे न च तस्मात्ते प्रसादमृषिसत्तमात् ॥ ३५ ॥ आपवात् पुरुषव्याघ्र सर्वधर्मविशारदात् ॥ ३६ ॥ उवाच चैनं धर्मात्मा शप्ता यूयं धरादयः । अनुसञ्चत्सरात्सर्वे शापमोक्षमवाप्स्यथ ॥ ३७ ॥ अयन्तु यत्कृते यूयं मया शप्ताः स वत्स्यति । द्यौस्तदा मानुषे लोके दीर्घकालं स्वकर्मणा ॥ ३८ ॥ नाकृतं तच्चिकीर्षामि कृच्छ्रे युष्मान् यद-

ध्रुवम् । न प्रजास्यति चाप्येष मानुषेषु महामनाः ॥ ३९ ॥ भविष्यति च धर्मात्मा सर्वशास्त्रविशारदः । पितुः प्रियहिते युक्तः स्त्रीभोगान् वर्जयिष्यति ॥ ४० ॥ एवमुक्त्वा वसून् सर्वान् स जगाम महाऋषिः । ततो मामुपजग्मुस्ते समेता वसवस्त्वदा ॥ ४१ ॥ अयाचन्त च मां राजन्वरं तत्र मया कृतम् । जातान् जातान् प्रक्षिपाक्षान् स्वयं गङ्गे त्वमम्भसि ॥ ४२ ॥ एवं तेषामहं सम्यक् शप्तानां राजसत्तम । मोक्षार्थं मानुषाल्लोकाद्यथावत् कृतवत्यहम् ॥ ४३ ॥ अयं शापादृषेरस्य एक एव नृपोत्तम । द्यौराजन्मानुषं लोके चिरं वत्स्यति भारत ॥ ४४ ॥

वैशम्पायन उवाच । एतदाख्याय सा देवी तत्रैवान्तरधीयत । आदाय च कुमारं तं जगामाथ यथेप्सितम् ॥ ४५ ॥ स तु देवव्रतो नाम गाङ्गेय इति चाभवत् । द्युनामा शान्तनोः पुत्रः शान्तनोरधिको गुणैः ॥ ४६ ॥ शान्तनुश्चापि शोकार्त्तो जगाम स्वपुरं ततः । तस्याहं कीर्त्तयिष्यामि शान्तनोरधिकान् गुणान् ॥ ४७ ॥ महाभाग्यञ्च नृपतेर्भारतस्य महात्मनः । यस्येतिहासो द्युतिमान् महाभारतमुच्यते ॥ ४८ ॥

इत्यादिपर्वणि सम्भवपर्वण्यापवोपाख्याने
नवनवतोऽध्यायः ॥ ९९ ॥

—०:०—

वैशम्पायन उवाच । स राजा शान्तनुर्द्दीप्तान्देवराजर्षिसत्कृतः । धर्मात्मा सर्वलोकेषु सत्यवागिति विश्रुतः ॥ १ ॥ दमो दानं क्षमा बुद्धिर्ह्रीर्धृतिस्तेज उत्तमम् । नित्यान्यासन्महात्मन्ये शान्तनौ पुरुषर्षभे ॥ २ ॥ एवं स गुणसम्पन्नो धर्मार्थकुशलो नृपः । आसीद्भरतवंशस्य गोप्ता सर्वजनस्य च ॥ ३ ॥ कम्बुग्रीवः पृथुव्यंसो मत्तवारणविक्रमः । अन्वितः परिपूर्णार्थैः सर्वैर्भोग-

लक्षणैः ॥ ४ ॥ तस्य कीर्तिमतो वृत्तमवेक्ष्य सततं नराः । धर्म एव परः कामादर्थाच्चेति व्यवस्थिताः ॥ ५ ॥ एतान्यासन्महासत्त्वे शान्तनौ पुरुषर्षभे । न वास्य सदृशः कश्चिद्बभूवातः पार्थिवोऽभवत् ॥ ६ ॥ वर्त्तमानं हि धर्मेषु सर्वधर्मभृतांवरम् । तं महीपा महीपालं राजराज्येऽभ्यषेचयन् ॥ ७ ॥ वीतशोकभयाबाधाः सुखस्वप्नविबोधनाः । पतिं भारतगोप्तारं समपद्यन्त भूमिपाः ॥ ८ ॥ तेन कीर्त्तिमता शिष्टाः शक्रप्रतिमतेजसा । यज्ञदानक्रियाशीलाः समपद्यन्त भूमिपाः ॥ ९ ॥ शान्तनुप्रमुखैर्गुप्ते लोके नृपतिभिस्तदा । नियमात्सर्ववर्णानां धर्मोत्तरमवर्त्तत ॥ १० ॥ ब्रह्म पर्य्यचरत् क्षत्रं विशः क्षत्रमनुव्रताः । ब्रह्मक्षत्रानुरक्ताश्च शूद्राः पर्य्यचरन् विशः ॥ ११ ॥ स हास्तिनपुरे रम्ये कुरूणां पुटभेदने । वसन् सागरपर्य्यन्तामक्षशास्त्रसुन्धराम् ॥ १२ ॥ स देवराजसदृशो धर्मज्ञः सत्यवाग्ऋजुः । दानधर्मतपोयोगात् श्रिया परमया युतः ॥ १३ ॥ अरागद्वेषसंयुक्तः सोऽभवत् प्रियदर्शनः । तेजसा सूर्य्यकल्पोऽभूद्वायुवेगसमो जवे । अन्तकप्रतिमः क्रोधे क्षमया पृथिवीसमः ॥ १४ ॥ बबः पशुवराणां तथैव खगपक्षिणाम् । शान्तनौ पृथिवीपाले नावर्त्तत वृथा नृप ॥ १५ ॥ ब्रह्मधर्मोत्तरे राज्ये शान्तनुर्विनयात्मवान् । समं शशास भूतानि कामरागविवर्ज्जितः ॥ १६ ॥ देवर्षिपितृयज्ञार्थमारभन्त तदा क्रियाः । न चाधर्मेण केषाञ्चित् प्राणिनामभवद्वधः ॥ १७ ॥ असुखानामनाथानां तिर्य्यग्योनिषु वर्त्तताम् । स एव राजा सर्वेषां भूतानामभवत्पिता ॥ १८ ॥ तस्मिन् कुरुपतिश्रेष्ठे राजराजेश्वरे सति । श्रिता वागभवत्सत्यं दानधर्माश्रित मनः ॥ १९ ॥ स समाः षोड्शाष्टौ च चतस्रोष्टौ तथापराः । रतिमप्राप्नुवन् स्त्रीषु बभूव वनगोचरः ॥ २० ॥ तथारूपस्तथाचारस्तथावृत्तस्तथाश्रुतः । गाङ्गेयस्य सुतोऽभून्नाम्ना

देवव्रतो वसुः ॥ २१ ॥ सर्वास्त्रेषु स निष्णातः पार्थिवेष्वितरेषु च । महाबलो महासत्त्वो महावीर्यो महारथः ॥ २२ ॥ स कदाचिन्मृगं विद्ध्वा गङ्गामनुसरन्नदीम् । भागीरथीमल्पजलां शान्तनुर्दृष्टवान्नृपः ॥ २३ ॥ तां दृष्ट्वा चिन्तयामास शान्तनुः पुरुषर्षभः । स्यन्दते किं त्वियं नाद्य सरिच्छ्रेष्ठा यथा पुरा ॥२४॥ ततो निमित्तमन्विच्छन्ददर्श स महामनाः । कुमारं रूपसम्पन्नं दहन्तं चारुदर्शनम् ॥ २५ ॥ दिव्यमस्त्रं विकुर्वाणं यथा देवं पुरन्दरम् । क्षुब्धां गङ्गां समाहत्य शरैस्तीक्ष्णैरवस्थितम् ॥२६॥ तां शरैराचितां दृष्ट्वा नदीं गङ्गां तदन्तिके । अभवद्विस्मितो राजा दृष्ट्वा कर्मातिमानुषम् ॥ २७ ॥ जातमात्रं पुरा दृष्ट्वा तं सुतं शान्तनुस्तदा । नोपलेभे स्मृतिं धीमानभिज्ञातुं तमात्मजम् ॥ २८ ॥ स तु तं पितरं दृष्ट्वा मोहयामास मायया । संमोह्य तु ततः क्षिप्रं तत्रैवान्तरधीयत ॥ २९ ॥ तदद्भुतं ततो दृष्ट्वा तत्र राजा स शान्तनुः । यज्ञमानः सुतं गङ्गामब्रवीद्दर्श्यतेति ह ॥ ३० ॥ दर्शयामास तं गङ्गा विभ्रती रूपमुत्तमम् । गृहीत्वा दक्षिणे पाणौ तं कुमारमलङ्कृतम् ॥ ३१ ॥ अलङ्कृताभरणैर्विरजोऽम्बरसंवृताम् । दृष्टपूर्वामपि स तां नाभ्यजानात्स शान्तनुः ॥३२॥

गङ्गोवाच । यं पुत्रमष्टमं राजंस्त्वं पुरा मय्यविन्दथाः । स चायं पुरुषव्याघ्र सर्वास्त्रविदनुत्तमः ॥ ३३ ॥ गृहाणेमं महाराज मया संवर्द्धितं सुतम् । आदाय पुरुषव्याघ्र नयस्वैनं गृहं विभो ॥ ३४ ॥ वेदानधिजगे साङ्गान्वशिष्ठादेष वीर्यवान् । क्षत्रास्त्रः परमेष्वासो देवराजसमो युधि ॥ ३५ ॥ सुराणां सम्मतो नित्यमसुराणाञ्च भारत । उशना वेद यच्छास्त्रमयं तद्वेद सर्वगः ॥ ३५ ॥ तथैवाङ्गिरसः पुत्रः सुरासुरनमस्कृतः । यद्वेद शास्त्रं तच्चापि कृत्स्नमस्मिन् प्रतिष्ठितम् ॥ ३६ ॥ तव पुत्रे महाबाहौ साङ्गोपाङ्गं महात्मनि । ऋषयः परमोदारा जामद-

दग्ध्वा प्रतापवान् ॥ ३७ ॥ यदस्त्रं वेद रामश्च तदेतस्मिन् प्रतिष्ठितम् । महेष्वासमिमं राजन् राजधर्मार्थकोविदम् । मया दत्तं निजं पुत्रं वीरं वीर गृहं नय ॥ ३८ ॥

वैशम्पायन उवाच । तथैवं समनुज्ञातः पुत्रमादाय शान्तनुः । भ्राजमानं यथादित्यमाययौ स्वपुरं प्रति ॥ ३९ ॥ पौरवस्तु पुरीं गत्वा पुरन्दरपुरोपमाम् । सर्वकामसमृद्धार्थं मेने चात्मानमात्मना ॥ ४० ॥ पौरवेषु ततः पुत्रं राज्यार्थमभयप्रदम् । गुणवन्तं महात्मानं यौवराज्येऽभ्यषेचयत् ॥ ४१ ॥ पौरवाच्छान्तनोः पुत्रः पितरञ्च महायशाः । राष्ट्रञ्च रञ्जयामास वृत्तेन भरतर्षभ ॥ ४२ ॥ स तथा सह पुत्रेण रममाणो महीपतिः । वर्त्तयामास वर्षाणि चत्वार्यमितविक्रमः ॥ ४३ ॥ स कदाचिद्वनं यातो यमुनामभितो नदीम् । महीपतिरनिर्देश्यमाजिघ्रन्वसुत्तमम् ॥ ४४ ॥ तस्य प्रभवमन्विच्छन् विचचार समन्ततः । स ददर्श तदा कन्यां दाशानां देवरूपिणीम् ॥ ४५ ॥ तामपृच्छत् स दृष्ट्वैव कन्यामसितलोचनाम् । कस्य त्वमसि का चासि किञ्च भीरु चिकीर्षसि ॥ ४६ ॥ साब्रवीद्दाशकन्यास्मि धर्मार्थं वाहये तरिम् । पितुर्नियोगाद्भद्रं ते दाशराज्ञो महात्मनः ॥ ४७ ॥ रूपमाधुर्य्यगन्धैस्तां संयुक्तां देवरूपिणीम् । समीक्ष्य राजा दाशेयीं कामयामास शान्तनुः ॥ ४८ ॥ स गत्वा पितरं तस्या वरयामास तां तदा । पूर्व्वमुक्तस्तु तत्तस्याः पितरं चात्मकारणात् ॥ ४९ ॥ स च तं प्रत्युवाचेदं दाशराजो महीपतिम् । जातमात्रैव मे देया वराय वरवर्णिनी । हृदि कामस्तु मे कश्चित्तं निबोध जनेश्वर ॥ ५० ॥ यदीमां धर्मपत्नीं त्वं मत्तः प्रार्थयसेऽनघ । सत्यवागसि सत्येन समयं कुरु मे ततः ॥ ५१ ॥ समयेन प्रदद्यां ते कन्यामहमिमां नृप । न हि मे त्वत्समः कश्चिद्वरो जातु भविष्यति ॥ ५२ ॥

शान्तनुरुवाच। श्रुत्वा तव वरं दाश व्यवस्येयमहं तव। दातव्यं चेत् प्रदास्यामि न त्वदेयं कथञ्चन ॥ ५३ ॥

दाश उवाच। अस्यां जायेत यः पुत्रः स राजा पृथिवीपते। त्वदूर्ध्वमभिषेक्तव्यो नान्यः कश्चन पार्थिव ॥ ५४ ॥

वैशम्पायन उवाच। नाकामयत तं दातुं वरं दाशाय शान्तनुः। शरीरजेन तीव्रेण दह्यमानोऽपि भारत ॥ ५५ ॥ स चिन्तयन्नेव तदा दाशकन्यां महीपतिः। प्रत्ययाद्धास्तिनपुरं कामोपहतचेतनः ॥ ५६ ॥ ततः कदाचिच्छोचन्तं शान्तनुं ध्यानमास्थितम्। पुत्रो देवव्रतोऽभ्येत्य पितरं वाक्यमब्रवीत् ॥ ५७ ॥ सर्वतो भवतः क्षेमं विधेयाः सर्वपार्थिवाः। तत्किमर्थमहाभीक्ष्णं परिशोचसि दुःखितः ॥ ५८ ॥ ध्यायन्निव च मां राजन्नाभिभाषसि किञ्चन। न चाश्वेन विनिर्यासि विवर्णो हरिणः क्षयः ॥ ५९ ॥ व्याधिमिच्छामि ते ज्ञातुं प्रतिकुर्यां हि तत्र वै। एवमुक्तः स पुत्रेण शान्तनुः प्रत्यभाषत ॥ ६० ॥ असंशयं ध्यानपरो यथावत्त्वं तथा शृणु। अपत्यं नस्त्वमेवैकः कुले महति भारत ॥ ६१ ॥ अस्खलित्यञ्च सततं पौरुषे पर्व वस्थितः। अनित्यताञ्च लोकानामनुशोचामि पुत्रक ॥ ६२ ॥ कथञ्चित्तव गाङ्गेय विपत्तौ नास्ति नः कुलम्। असंशयं त्वमेवैकः शतादपि वरः सुतः ॥ ६३ ॥ न चाप्यहं वृथा भूयो दारान् कर्तुमिहोत्सहे। सन्तानस्याविनाशाय कामये भद्रमस्तु ते ॥ ६४ ॥ अनपत्यन्त्वेकपुत्रमित्याहुर्धर्मवादिनः। अग्निहोत्रं त्रयी विद्या सन्तानमपि चाक्षयम् ॥ ६५ ॥ सर्वाण्येतान्यपत्यस्य कलां नार्हन्ति षोडशीम्। एवमेतन्मनुष्येषु तत्र सर्वं प्रजास्थिति ॥ ६६ ॥ यदपत्यं महाप्राज्ञ तत्र मे नास्ति संशयः। एषा त्रयी पुराणानां देवतानाञ्च शाश्वती ॥ ६७ ॥ त्वञ्च शूरः सदामर्षी अस्खलित्यञ्च भारत। नान्यत्र वृद्धात्तस्मात्ते निधनं विद्यते क्वचित् ॥ ६८ ॥ सोऽस्मि

संशयमापन्नस्त्वयि शान्ते कथं भवेत्। दूति ते कारणं तात दुःखस्योक्तमशेषतः॥ ६९॥

वैशम्पायन उवाच। ततस्तत्कारणं राज्ञो ज्ञात्वा सर्वमशेषतः। देवव्रतो महाबुद्धिः प्रज्ञया चान्वचिन्तयत्॥ ७०॥ अभ्यगच्छत्ततो वाजी द्वन्द्वामात्यं पितुर्हितम्। तमपृच्छत्ततो भीष्मो पितुस्तच्छोककारणम्॥ ७१॥ तस्मै स कुरुमुख्याय यथावत् परिपृच्छते। वरं शशंस कन्यां तामुद्दिश्य भरतर्षभ॥ ७२॥ ततो देवव्रतो वृद्धैः क्षत्रियैः सहितस्तदा। अभिगम्य दाशराजं कन्यां वव्रे पितुः स्वयम्॥ ७३॥ तं दाशः प्रतिजग्राह विधिवत् प्रतिपूज्य च। अब्रवीच्चैनमासीनं राजसंसदि भारत॥ ७४॥ त्वमेव नाथः पर्याप्तः शान्तनोर्भरतर्षभ। पुत्रः शक्रसमतां श्रेष्ठः किन्तु वक्ष्यामि ते वचः॥ ७५॥ को हि सम्बन्धकं श्राघ्यमीदृशं योनमीदृशम्। अतिक्रामन्नतप्येत साक्षादपि शतक्रतुः॥ ७६॥ अपत्यं चैतदार्घ्यस्य यो युष्माकं समो गुणैः। यस्य युष्मात्मत्यवती संभूता वरवर्णिनी॥ ७७॥ तेन मे वज्रशस्तात पिता ते परिकीर्त्तितः। अर्हः सत्यवतीं वोढुं धर्मज्ञ स नराधिपः॥ ७८॥ अस्मितो ह्यसि देवर्षिः प्रत्याख्यातः पुरा मया। सत्यवत्या भशं चार्थी स आसीद्दृषिसत्तमः॥ ७९॥ कन्यापितृत्वात् किञ्चित्तु वक्ष्यामि त्वां नराधिप। बलवत्सपत्नतामत्र दोषं पश्यामि केवलम्॥ ८०॥ यस्य हि त्वं सपत्नः स्या गन्धर्वस्यासुरस्य वा। न स जातु चिरं जीवेत्त्वयि क्रुद्धे परन्तप॥ ८१॥ एतावानत्र दोषो हि नान्यः कश्चन पार्थिव। एतज्ज्ञानीहि भद्रन्ते दानादाने परन्तप॥ ८२॥

वैशम्पायन उवाच। एवमुक्तस्तु गाङ्गेयस्तद्वाक्यं प्रत्यभाषत। शृण्वतां भूमिपालानां पितुरर्थाय भारत॥ ८३॥ इदं मे व्रतमादत्स्व सत्यं सत्यवतांवर। नैवजातो नवाजात इदृशं

वक्तुमुत्सहेत् ॥ ८४ ॥ एवमेतत्करिष्यामि यथा त्वमनुभाषसे। योऽस्यां जनिष्यते पुत्रः स नो राजा भविष्यति ॥ ८५ ॥ इत्युक्तः पुनरेवाथ तं दाशः प्रत्यभाषत। चिकीर्षुर्दुष्करं कर्म राज्यार्थे भरतर्षभ ॥ ८६ ॥ त्वमेव नाथः सत्यानां शान्तनोरमितद्युतेः। कथायाश्चैव धर्मात्मन् प्रभवैनाय वेश्वरः ॥ ८७ ॥ इदं तु वचनं सौम्य कार्यं चैव निबोध मे। कौमारिकायां प्रीत्या वै व्याख्यास्येऽनरिन्दम ॥ ८८ ॥ यत्त्वया सत्यवत्यर्थे सत्यधर्मपरायण। राजमध्ये प्रतिज्ञातमनुरूपं तवैव तत् ॥ ८९ ॥ नान्यथा तच्छमाबार्हो संशयोऽत्र न कश्चन। तवामत्यं भवेद्यत्तु तत्र नः संशयो महान् ॥ ९० ॥

वैशम्पायन उवाच। तस्यैतन्मतमाज्ञाय सत्यधर्मपरायणः। प्रत्यजानात्तदा राजन् पितुः प्रियचिकीर्षया ॥ ९१ ॥

गाङ्गेय उवाच। दाशराज निबोधेदं वचनं मे नृपोत्तम। शृण्वतां भूमिपालानां यद्ब्रवीमि पितुः कृते ॥ ९२ ॥ राज्यं तावत् पूर्वमेव मया त्यक्तं नराधिपाः। अपत्यहेतोरपि च करिष्येऽत्र विनिश्चयम् ॥ ९३ ॥ अद्यप्रभृति मे दाश ब्रह्मचर्यं भविष्यति। अपुत्रस्यापि मे लोका भविष्यन्त्यक्षया दिवि ॥ ९४ ॥

वैशम्पायन उवाच। तस्य तद्वचनं श्रुत्वा सञ्जहृष्टतनूरुहः। ददानीत्येव तं दाशो धर्मात्मा प्रत्यभाषत ॥ ९५ ॥ ततोऽन्तरीक्षेऽमरसो देवाः सर्षिगणास्तदा। अभ्यवर्षन्त कुसुमैर्भीष्मोऽयमिति चाब्रुवन् ॥ ९६ ॥ ततः स पितुरर्थाय तामुवाच यशस्विनीम्। अधिरोह रथं मातर्गच्छावः स्वगृहानिति ॥ ९७ ॥

वैशम्पायन उवाच। एवमुक्ता तु भीष्मस्तां रथमारोप्य भाविनीम्। आगम्य हास्तिनपुरं शान्तनोः संन्यवेदयत् ॥ ९८ ॥ तस्य तद्दुष्करं कर्म प्रशशंसुर्नराधिपाः। समेताश्च पृथक् चैव भीष्मोऽयमिति चाब्रुवन् ॥ ९९ ॥ तच्छ्रुत्वा दुष्करं कर्म कृतं

भीष्मेण शान्तनुः। स्वच्छन्दमरणं तुष्टो ददौ तस्मै महात्मने ॥ १०० ॥

इत्यादिपर्वणि सम्भवपर्वणि सत्यवतीलाभोपाख्याने शततमोऽध्यायः ॥ १०० ॥

—:०:—

वैशम्पायन उवाच। ततो विवाहे निर्वृत्ते स राजा शान्तनुर्नृप। तां कन्यां रूपसम्पन्नां स्वगृहे सन्न्यवेशयत् ॥ १ ॥ ततः शान्तनवो धीमान् सत्यवत्यामजायत। वीरश्चित्राङ्गदो नाम वीर्य्यवान् पुरुषेश्वरः ॥ २ ॥ अथापरं महेष्वासं सत्यवत्यां सुतं प्रभुः। विचित्रवीर्य्यं राजानं जनयामास वीर्य्यवान् ॥ ३ ॥ अप्राप्तवति तस्मिंस्तु यौवनं पुरुषर्षभे। स राजा शान्तनुर्धीमान् कालधर्ममुपेयिवान् ॥ ४ ॥ स्वर्गते शान्तनौ भीष्मश्चित्राङ्गदमरिन्दमम्। स्थापयामास वै राज्ये सत्यवत्या मते स्थितः ॥ ५ ॥ स तु चित्राङ्गदः शौर्य्यात्समवाप्तो महीपतिः। मनुष्यं न हि मेने स कञ्चित्सङ्ग्रामतस्तदा ॥ ६ ॥ तं क्षिपन्तं सुरांश्चैव मनुष्यानसुरांस्तथा। गन्धर्वराजो बलवांस्तुल्यनामाभ्ययात्तदा ॥ ७ ॥ तेनास्य सुमहद्युद्धं कुरुक्षेत्रे बभूव ह। तयोर्बलवतो राजन् गन्धर्वकुरुसत्तमयोः। नद्यास्तीरे सरस्वत्याः समाजिह्मोऽभवद्रणः ॥ ८ ॥ तस्मिन्त्रिसप्तदिवसे शस्त्रवर्षसमाकुले। मायाधिकोऽवधीद्वीरं गन्धर्वः कुरुसत्तम ॥ ९ ॥ स हत्वा तु नरश्रेष्ठं चित्राङ्गदमरिन्दमम्। अन्तायं कृत्वा गन्धर्वो दिवमाचक्रमे ततः ॥ १० ॥ तस्मिन् पुरुषशार्दूले निहते भूरितेजसि। भीष्मः शान्तनवो राजा प्रेतकार्य्याण्यकारयत् ॥ ११ ॥ विचित्रवीर्य्यं च तदा बालमप्राप्तयौवनम्। कुरुराज्ये महाबाहुरभ्यषिञ्चदनन्तरम् ॥ १२ ॥ विचित्रवीर्य्यः स तदा भीष्मस्य वचने स्थितः।

अन्वशासन्महाराज पितृपैतामहं पदम् ॥ १३ ॥ स धर्मशास्त्रकुशलं भीष्मं प्राज्ञतमं नृपः । पूजयामास धर्मेण स चैनं प्रत्यपालयत् ॥ १४ ॥

इत्यादिपर्वणि सम्भवपर्वणि चित्राङ्गदोपाख्याने एकाधिकशततोऽध्यायः ॥ १०१ ॥

—•—

वैशम्पायन उवाच । हते चित्राङ्गदे भीष्मो बाले भ्रातरि कौरव । पालयामास तद्राज्यं सत्यवत्या मते स्थितः ॥ १ ॥ संप्राप्तयौवनं दृष्ट्वा भ्रातरं धीमतांवरः । भीष्मो विचित्रवीर्यं स्य विवाहायाकरोन्मतिम् ॥ २ ॥ अथ काशिपतेर्भीष्मः कन्यास्तिस्रोऽप्सरोपमाः । शुश्राव सहिता राजन् स्वयम्वरम् ॥ ३ ॥ ततः स रथिनां श्रेष्ठो रथेनैकेन शत्रुजित् । जगामानुमते मातुः पुरीं वाराणसीं प्रभुः ॥ ४ ॥ तत्र राज्ञः समुदितान् सर्वतः समुपागतान् । ददर्श कन्यास्तास्त्रैव भीष्मः शान्तनुनन्दनः ॥ ५ ॥ कीर्त्यमानेषु राज्ञान्तु तदा नामसु सर्वशः । भीष्मस्तदा स्वयं कन्या वरयामास ताः प्रभुः ॥ ६ ॥ उवाच च महीपालान् राजन् जलदनिस्वनः । रथमारोप्य ताः कन्या भीष्म प्रहरतां वरः ॥ ७ ॥ आहूय दानं कन्यानां गुणवद्भ्यः स्मृतं बुधैः । अलङ्कृत्य यथाशक्ति प्रदाय च धनान्यपि ॥ ८ ॥ प्रयच्छन्त्यपरे कन्यां मिथुनेन गवामपि । वित्तेन कथितेनान्ये बलेनान्येऽनुमान्य च ॥ ९ ॥ प्रमत्तासुपयान्त्यन्ये स्वयमन्ये च विन्दते । आर्षं विधिं पुरस्कृत्य दारान् विन्दन्ति चापरे ॥ १० ॥ अष्टमं तमथो वित्त विवाहं कविभिर्हृतम् । स्वयम्वरन्तु राजन्याः प्रशंसन्त्युपयान्ति च । प्रमथ्य तु हृतामाहुर्ज्यायसीं धर्मवादिनः ॥ ११ ॥ ता इमाः पृथिवीपाला जिहीर्षामि बलादितः । ते यतध्वं परं

शक्त्या विजयायेतराय वा ॥ १२ ॥ स्थितोऽहं पृथिवीपाला युद्धाय कृतनिश्चयः । एवमुक्त्वा महीपालान् काशिराजश्च वीर्यवान् ॥ १३ ॥ सर्वाः कन्याः स कौरव्यो रथमारोप्य च स्वकम् । आमन्त्र्य च स तान् प्रायाच्छीघ्रं कन्याः प्रगृह्य ताः ॥ १४ ॥ ततस्ते पार्थिवाः सर्वे समुत्पेतुरमर्षिताः । संस्मृ॒शन्तः स्वकान् बाहून्दशन्तो दशनच्छदान् ॥ १५ ॥ तेषामाभरणान्याशु त्वरितानां विमुञ्चताम् । आमुञ्चतां च वर्माणि संभ्रमः सुमहानभूत् ॥ १६ ॥ ताराणामिव सम्पातो बभूव जनमेजय । भूषणानां च सर्वेषां कवचानां च सर्वशः ॥ १७ ॥ सवर्मभिर्भूषणैश्च प्रकीर्यद्भिरितस्ततः । सक्रोधामर्षजिह्मभ्रूकषायीकृतलोचनाः ॥ १८ ॥ स्रुतोपकॢप्तान् रुचिरान् सदश्वैरुपकल्पितान् । रथानास्थाय ते वीराः सर्वप्रहरणान्विताः ॥ १९ ॥ प्रयान्तमुपकौरव्यमनुसस्रुरदाबुधाः । ततः समभवद्युद्धं तेषां तस्य च भारत ॥ २० ॥ एकस्य च बहूनां च तुमुलं लोमहर्षणम् । तेत्विषन्दशसाहस्रांस्तस्मिन्युगपदाक्षिपन् । अप्राप्तांश्चैव तानाशु भीष्मः सर्वांस्तथान्तरा ॥ २१ ॥ अच्छिनच्छरवर्षेण महता लोमवाहिना ॥ २२ ॥ ततस्ते पार्थिवाः सर्वे सर्वतः परिवार्य तम् । ववृषुः शरवर्षेण वर्षेणेवाद्रिमम्बुदाः ॥ २३ ॥ स तं वाणमयं वर्षं शरैरावार्य सर्वतः । ततः सर्वान्महीपालान् पञ्चविंशतिभिस्त्रिभिः ॥ २४ ॥ एकैकस्तु ततो भीष्मं राजन् विव्याध पञ्चभिः । स च तान् प्रतिविव्याध द्वाभ्यां द्वाभ्यां पराक्रमन् ॥ २५ ॥ तद्युद्धमासीत्तुमुलं घोरं देवासुरोपमम् । पश्यतां लोकवीराणां शरशक्तिसमाकुलम् ॥ २६ ॥ स धनूंषि ध्वजाग्राणि वर्माणि च शिरांसि च । चिच्छेद समरे भीष्मः शतशोऽथ सहस्रशः ॥ २७ ॥ तस्यातिपुरुषानन्यान्लाघवं रथचारिणः । रक्षणं चात्मनः सङ्ख्ये शत्रवोऽप्यभ्यपूजयन् ॥ २८ ॥

तान्विनिर्जित्य तु रणे सर्वशस्त्रभृतां वरः । कन्याभिः सहितः प्रायाद्भारतो भारतान् प्रति ॥ २९ ॥ ततस्तं दृष्टतो राजञ्शाल्वराजो महारथः । अभ्यगच्छद्भृशात्मा भीष्मं शान्तनवं रणे ॥ ३० ॥ वारणं जघने भिन्दन्दन्ताभ्यामपरो यथा । वासितामनुसम्प्राप्तो यूथपो बलिनांवरः ॥ ३१ ॥ स्थीकामस्तिष्ठ तिष्ठेति भीष्ममाह स पार्थिवः । शाल्वराजो महाबाहुरमर्षेण प्रचोदितः ॥ ३२ ॥ ततः स पुरुषव्याघ्रो भीष्मः परबलार्दनः । तद्वाक्याकुलितः क्रोधाद्विधूमोऽग्निरिव ज्वलन् ॥ ३३ ॥ विततेधुधनुष्पाणिर्विकुञ्चितललाटभृत् । क्षत्रधर्मं समास्थाय व्यपेतभयसंभ्रमः ॥३४॥ निवर्त्तयामास रथं शाल्वं प्रति महारथः । निवर्त्तमानं तं दृष्ट्वा राजानः सर्व एव ते । प्रेक्षकाः समपद्यन्त भीष्मशाल्वसमागमम् ॥ ३५ ॥ तौ वृषाविव नर्दन्तौ बलिनौ वासितान्तरे । अन्योन्यमभिवर्त्तेतां बलविक्रमशालिनौ ॥ ३६ ॥ ततो भीष्मं शान्तनवं शरैः शतसहस्रगः । शाल्वराजो नरश्रेष्ठः समवाकिरदाशुगैः ॥३७॥ पूर्वमभ्यर्हितं दृष्ट्वा भीष्मं शाल्वेन ते नृपाः । विस्मिताः समपद्यन्त साधुसाध्विति चाब्रुवन् ॥ ३८ ॥ लाघवं तस्य ते दृष्ट्वा समरे सर्वपार्थिवाः । आपूजयन्त संहृष्टा वाग्भिः शाल्वं नराधिपम् ॥ ३९ ॥ क्षत्रियाणां ततो वाचः श्रुत्वा परपुरञ्जयः । क्रुद्धः शान्तनवो भीष्मस्तिष्ठ तिष्ठेत्यभाषत ॥ ४० ॥ सारथिं चाब्रवीत् क्रुद्धो याहि यत्रैष पार्थिवः । यावदेनं निहन्म्यद्य भुजङ्गमिव पक्षिराट् ॥ ४१ ॥ ततोऽश्वं वारुणं सम्यग्योजयामास कौरवः । तेनाश्वांश्चतुरोऽमृद्नाच्छाल्वराजस्य भूपतेः ॥४२॥ अस्त्ररश्मीणि संवार्य्य शाल्वराजस्य कौरवः । भीष्मो नृपतिशार्दूल न्यवधीत्तस्य सारथिम् ॥ ४३ ॥ अस्त्रेण चास्यैन्द्रेण न्यवधीत्तुरगोत्तमान् । कन्याहेतोर्नरश्रेष्ठ भीष्मः शान्तनवस्तदा ॥४४॥ जित्वा विसर्जयामास जीवन्तं नृपसत्तमम् । ततः शाल्वः

स्वनगरं प्रययौ भरतर्षभ ॥ ४५ ॥ स्वराज्यमन्वगाच्चैव धर्मेण नृपतिस्तदा । राजानो ये च तत्रासन् स्वयम्वरदिदृक्षवः । स्वान्येव तेऽपि राष्ट्राणि जग्मुः परपुरञ्जयाः ॥४६॥ एवं विजित्य ताः कन्या भीष्मः प्रहरतां वरः । प्रययौ हास्तिनपुरं यत्र राजा स कौरवः ॥ ४७ ॥ विचित्रवीर्य्यो धर्मात्मा प्रशास्ति वसुधामिमाम् । यया पितास्य कौरव्यः शान्तनुर्नृपसत्तमः ॥ ४८ ॥ सोऽचिरेणैव कालेन अत्यक्रामन्नराधिप । वनानि सरितश्चैव शैलांश्च विविधान् द्रुमान् ॥ ४९ ॥ अथतः चपयित्वारीन् संख्येऽसंख्येयविक्रमः । आनयामास काश्यस्य सुताः सागरगासुतः ॥ ५० ॥ स्नुषा इव स धर्मात्मा भगिनीरिव चानुजाः । यया दुहितरश्चैव परिगृह्य ययौ कुरून् ॥ ५१ ॥ आनिन्ये स महाबाहुर्भ्रातुः प्रियचिकीर्षया । ताः सर्वगुणसम्पन्ना भ्राता भ्रात्रे यवीयसे ॥ ५२ ॥ भीष्मो विचित्रवीर्य्याय प्रददौ विक्रमाहृताः । एवं धर्मेण धर्मज्ञः कृत्वा कर्मातिमानुषम् ॥ ५३ ॥ भ्रातुर्विचित्रवीर्य्यस्य विवाहं योपचक्रमे । सत्यवत्या सह मिथः कृत्वा निश्चयमात्मवान् ॥ ५४ ॥ विवाहं कारयिष्यन्तं भीष्मं काशिपतेः सुता । ज्येष्ठा तासामिदं वाक्यमब्रवीद्वरुती तदा ॥ ५५ ॥ मया सौभपतिः पूर्वं मनसा हि वृतः पतिः । तेन चास्मि हृता पूर्वमेष कामश्च मे पितुः ॥ ५६ ॥ मया वरयितव्योऽभूच्छाल्वस्तस्मिन् स्वयम्वरे । एतद्विज्ञाय धर्मज्ञ धर्मतत्त्वं समाचर ॥ ५७ ॥ एवमुक्तस्तया भीष्मः कन्यया विप्रसंसदि । चिन्तामभ्यगमद्वीरो युक्तां तस्यैव कर्मणः ॥ ५८ ॥ विनिश्चित्य स धर्मज्ञो ब्राह्मणैर्वेदपारगैः । अनुजज्ञे तदा ज्येष्ठामम्बां काशीपतेः सुताम् ॥ ५९ ॥ अम्बिकाम्बालिके भार्ये प्रादाद्भ्रात्रे यवीयसे । भीष्मो विचित्रवीर्य्याय विधिदृष्टेन कर्मणा ॥ ६० ॥ तयोः पाणी गृहीत्वा तु रूपयौवनदर्पितः । विचित्रवीर्य्यो धर्मात्मा कामात्मा समपद्यत

॥ ६१ ॥ ते चापि हरितीक्ष्णाग्रे नीलकुञ्चितमूर्द्धजे । रक्ततुङ्ग-नखोपेते पीनश्रोणिपयोधरे ॥ ६२ ॥ आत्मनः प्रतिरूपोऽसौ लब्धः पतिरिति स्थिते । विचित्रवीर्य्यं कल्याणी पूजयामास तुः मुभे ॥ ६३ ॥ स चाप्यरूपसदृशो देवतुल्यपराक्रमः । सर्वासा-मेव नारीणां चित्तप्रमथनो रहः ॥ ६४ ॥ ताभ्यां सह समाः सप्त विहरन् पृथिवीपतिः । विचित्रवीर्य्यः स्वरणो यक्ष्मणा समगृह्यत ॥ ६५ ॥ सुहृदां यतमानानामाप्तैः सह चिकित्सकैः । जगामास्तमिवादित्यः कौरव्यो वयसाऽनघ ॥ ६६ ॥ धर्मात्मा स तु गाङ्गेयश्चिन्तायोगपरायणः । प्रेतकार्याणि सर्वाणि तस्य सत्यवतीसुतः ॥ ६७ ॥ राज्ञो विचित्रवीर्य्यस्य सत्यवत्या मते स्थितः । ऋत्विग्भिः सहितो भीष्मः सर्वैश्च कुरुपुङ्गवैः ॥ ६८ ॥

इत्यादिपर्वणि सम्भवपर्वणि विचित्रवीर्य्योपरमे द्व्यधिकशततोऽध्यायः ॥ १०२ ॥

—०:०—

वैशम्पायन उवाच । ततः सत्यवती दीना कृपणा पुत्रगृद्धिनी । पुत्रस्य कृत्वा कार्य्याणि स्नुषाभ्यां सह भारत ॥ १ ॥ समाश्वास्य स्नुषे ते च भीष्मं शस्त्रभृतांवरम् । धर्मज्ञं पितृवंशज्ञं मातृवंशज्ञं भाविनी । प्रसमीक्ष्य महाभागा गाङ्गेयं वाक्यमब्रवीत् ॥ २ ॥ शान्तनोर्धर्मनित्यस्य कौरव्यस्य यशस्विनः । त्वयि पिण्डश्च कीर्त्तिश्च सन्तानश्च प्रतिष्ठितम् ॥ ३ ॥ यथा कर्म शुभं कृत्वा स्वर्गोपगमनं ध्रुवम् । यथा चाबुर्ध्रुवं सत्ये त्वयि धर्मस्थया ध्रुवः ॥ ४ ॥ वेत्थ धर्मांश्च धर्मज्ञ समासेनेतरेण च । विविधास्वं श्रुतीर्वेत्थ वेदाङ्गानि च सर्वशः ॥ ५ ॥ व्यवस्थानञ्च ते धर्मे कुलाचारञ्च लक्ष्यते । प्रतिपत्तिश्च कृच्छ्रेषु शुक्राङ्गिरसयोरिव ॥ ६ ॥ तस्मात् सुश्रुशमाणस्य त्वयि धर्मभृतांवर । कार्य्यं त्वां

विनियोक्ष्यामि तच्छ्रुत्वा कर्तुमर्हसि ।७॥ मम पुत्रस्य भ्राता वीर्यवान् सुप्रियश्च ते। बाल एव गतः स्वर्गमपुत्रः पुरुषर्षभ ॥८॥ इमे महिष्यौ भ्रातुस्ते काशिराजसुते शुभे। रूपयौवनसम्पन्ने पुत्रकामे च भारत ॥९॥ तयोरुत्पादयापत्यं सन्तानाय कुलस्य नः। मन्नियोगान्महाबाहो धर्मं कर्तुमिहार्हसि ॥१०॥ राज्ये वै चाभिषिच्यस्व भारतानुशाधि च। दारांश्च कुरु धर्मेण मा निमज्जीः पितामहान् ॥११॥

वैशम्पायन उवाच। तथोच्यमानो माता स सुहृद्भिश्च परन्तपः। इत्युवाचाथ धर्मात्मा धर्म्यमेवोत्तरं वचः ॥१२॥ असंशयं परो धर्मस्त्वया मातरुदाहृतः। त्वमपत्यं प्रति च मे प्रतिज्ञां वेत्थ वै पराम् ॥१३॥ जानासि च यथावृत्तं शुक्लहेतोस्त्वदन्तरे। स सत्यवति सत्यं ते प्रतिजानाम्यहं पुनः ॥१४॥ परित्यजेयं त्रैलोक्यं राज्यं देवेषु वा पुनः। यद्वाप्यधिकमेताभ्यां न तु सत्यं कथञ्चन ॥१५॥ त्यजेच्च पृथिवी गन्धमापश्च रसमात्मनः। ज्योतिस्तथा त्यजेद्रूपं वायुः स्पर्शगुणं त्यजेत् ॥१६॥ प्रभां समुत्सृजेदर्को भूमकेतुस्तथोष्मताम्। त्यजेच्छब्दं तथाकाशं सोमः शीतांशुतां त्यजेत् ॥१७॥ विक्रमं वृत्रहा जह्याद्धर्मं जह्याच्च धर्मराट्। न त्वहं सत्यमुत्सृष्टुं व्यवस्येयं कथञ्चन ॥१८॥ एवमुक्ता तु पुत्रेण भूरिद्रविणतेजसा। माता सत्यवती भीष्ममुवाच तदनन्तरम् ॥१९॥ जानामि ते स्थितिं सत्ये परां सत्यपराक्रम। इच्छन् सृजेथास्त्रीँल्लोकानन्यांस्त्वं स्वेन तेजसा ॥२०॥ जानामि चैवं सत्यं तन्मदर्थे यच्च भाषितम्। आपद्धर्मं त्वमावेक्ष्य वह पैतामहीं धुरम् ॥२१॥ यथा ते कुलतन्तुश्च धर्मश्च न पराभवेत्। सुहृदश्च प्रहृष्येरंस्तथा कुरु परन्तप ॥२२॥ लाल्यमानां तामेवं कृपणां पुत्रगर्द्धिनीम्। धर्मादपेतं ब्रुवतीं भीष्मो भूयोऽब्रवीदिदम् ॥२३॥ राज्ञि

धर्मानवेक्षस्व मा नः सर्वान् व्यनीनशः । सत्यान्नाति: क्षत्रियस्य न धर्मेषु प्रशस्यते ॥ २४ ॥ शान्तनोरपि सन्तानं यथा स्यात्क्षयं भुवि । तत्ते धर्मं प्रवक्ष्यामि क्षात्रं राज्ञि सनातनम् ॥ २५ ॥ श्रुत्वा तं प्रतिपद्यस्व प्राज्ञैः सह पुरोहितैः । आपद्धर्मार्थकुशलैर्लोकतन्त्रमवेक्ष्य च ॥ २६ ॥

इत्यादिपर्वणि सम्भवपर्वणि भीष्मसत्यवतीसंवादे त्र्यधिकशततोऽध्यायः ॥ १०३ ॥

भीष्म उवाच । जामदग्न्येन रामेण पितुर्बधमसह्यता । राजा परशुना पूर्वं हैहयाधिपतिर्हतः ॥ १ ॥ शतानि दश बाहूनां निकृत्तान्यर्जुनस्य वै । लोकस्याचरितो धर्मस्तेनाति किल दुष्करः ॥ २ ॥ पुनश्च धनुरादाय महास्त्राणि प्रमुञ्चता । निर्हेयं क्षत्रमसकृद्रणेन जयता महीम् ॥ ३ ॥ एवमुच्चावचैरस्त्रैर्भार्गवेण महात्मना । त्रिःसप्तकृत्वः पृथिवी कृता निःक्षत्रिया पुरा ॥ ४ ॥ एवं निःक्षत्रिये लोके कृते तेन महर्षिणा । उत्पादितान्यपत्यानि ब्राह्मणैर्वेदपारगैः ॥ ५ ॥ पाणिग्राहस्य तनय इति वेदेषु निश्चितम् । धर्मं मनसि संस्थाप्य ब्राह्मणांस्ताः समभ्ययुः ॥ ६ ॥ लोकेऽप्याचरितो दृष्टः क्षत्रियाणां पुनर्भवः । ततः पुनः समुदितं क्षत्रं समभवत्तदा । इमञ्चैवात्र वक्ष्येऽहमितिहासं पुरातनम् ॥ ७ ॥ अयोतथ्य इति ख्यात आसीद्वीर्यवानृषिः पुरा । ममता नाम तस्यासीद्भार्या परमरूपवता ॥ ८ ॥ उतथ्यस्य यवीयांसु पुरोधास्त्रिदिवौकसाम् । बृहस्पतिर्बृहत्तेजा ममतामन्वपद्यत ॥ ९ ॥ उवाच ममता तन्तु देवरं वदतां वरम् । अन्तर्वत्नी त्वहं भ्रात्रा ज्येष्ठेनारब्धतामिति ॥ १० ॥ अयञ्च मे महाभाग कुक्षावेव बृहस्पते । औतथ्यो वेदमत्रापि

षड़ङ्गं प्रत्यधीयत ॥ ११ ॥ अमोघरेताश्चाप्यासीद्द्वयोर्नास्त्यत्र सम्भवः। तस्मादेवञ्च न त्वय्यपारमितुमर्हसि ॥ १२ ॥ एवमुक्तस्तदा सम्यग्बृहस्पतिरधीरधीः। कामात्मानं तदात्मानं न शशाक नियच्छितुम् ॥ १३ ॥ स बभूव ततः कामी तया सार्द्धमकामया। ऊतथ्यजन्तन्तु तं रेतः स गर्भस्थोऽभ्यभाषत ॥ १४ ॥ भोस्तात मागमः कामं द्वयोर्नास्तीह सम्भवः। अल्पावकाशो भगवन् पूर्वं चाहमिहागतः ॥ १५ ॥ अमोघरेताश्च भवान्न पीड़ां कर्त्तुमर्हसि। अश्रुत्वैव तु तद्वाक्यं गर्भस्थस्य बृहस्पतिः ॥ १६ ॥ जगाम मैथुनायैव ममतां चारुलोचनाम्। शुक्रोत्सर्गं ततो बुद्धा तस्या गर्भगतो मुनिः। पद्भ्यामरोधयन्मार्गं शुक्रस्य च बृहस्पतेः ॥ १७ ॥ स्खानमप्राप्तमथ तद्रेतः प्रतिहतं तदा। पपात सहसा भूमौ ततः क्रुद्धो बृहस्पतिः ॥ १८ ॥ तद्दृष्ट्वा पतितं शुक्रं शशाप स रुषान्वितः। ऊतथ्यपुत्रं गर्भस्थं निर्भर्त्स्य भगवानृषिः ॥ १९ ॥ यन्मां त्वमीदृशे काले सर्वभूतेष्वसिते सति। एवमाथ वचस्तस्मात्तमो दीर्घं प्रवेक्ष्यति ॥ २० ॥ स वै दीर्घतमा नाम शापादृषिरजायत। बृहस्पतेर्बृहत्कीर्त्तेर्बृहस्पतिरिवौजसा ॥ २१ ॥ जात्यन्धो वेदवित् प्राज्ञः पत्नीं लेभे स विद्यया। तरुणीं रूपसम्पन्नां प्रद्वेषीं नाम ब्राह्मणीम् ॥ २२ ॥ स पुत्रान्जनयामास गौतमादीन्महायशाः। ऋषेरुतथ्यस्य तदा सन्तानकुलवृद्धये। लोभमोहाभिभूतास्तु पुत्रास्ते गौतमादयः ॥ २३ ॥ धर्मात्मा च महात्मा च वेदवेदाङ्गपारगः। गोधर्मं सौरभेयाच्च सोऽधीत्य निखिलं मुनिः। प्रावर्त्तत तदा कर्त्तुं अद्धावांस्तमशङ्कया ॥ २४ ॥ ततो वितथमर्य्यादं तं दृष्ट्वा मुनिसत्तमाः। क्रुद्धा मोहाभिभूतास्ते सर्वे तत्राश्रमौकसः ॥ २५ ॥ अहोऽयं भिन्नमर्य्यादो नाश्रमे वस्तुमर्हति। तस्मादेनं वयं सर्वे पापात्मानं त्यजामहे ॥ २६ ॥ इत्यन्योन्यं समाभाष्य ते दीर्घतमसं मुनिम्।

पुत्रलाभा च सा पत्नी न तुतोष पतिं तदा। प्रद्विषन्तीं पतिर्भार्यां किं मां द्वेक्षीति चाब्रवीत् ॥ २७ ॥

प्रद्वेष्युवाच। भार्य्यायाभरणाङ्कर्त्ता पालनाच्च पतिः स्मृतः। अहं त्वां भरणं कृत्वा जात्यन्धं ससुतं तदा। नित्यकालं असेवार्त्ता न भरेयं महातपाः॥ २८ ॥

भीष्म उवाच। तस्यास्तद्वचनं श्रुत्वा ऋषिः कोपसमन्वितः। प्रत्युवाच ततः पत्नीं प्रद्वेषीं ससुतां तदा। नीयतां क्षत्रियकुले धनार्थी त्वं भविष्यसि ॥ २९ ॥

प्रद्वेष्युवाच। त्वया दत्तं धनं विप्र नेच्छेयं दुःखकारणम्। यथेष्टं कुरु विप्रेन्द्र न भरेयं पुरा यथा ॥ ३० ॥

दीर्घतमा उवाच। अद्यप्रभृति मर्य्यादा मया लोके प्रतिष्ठिता। एक एव पतिर्नार्य्या यावज्जीवं परायणम् ॥ ३१ ॥ मृते जीवति वा तस्मिन्नापरं प्राप्नुयान्नरम्। अभिगम्य परं नारी पतिघ्नी न संशयः। अपतीनान्तु नारीणामद्यप्रभृति घातकम्। यद्यस्ति चेह्नं सर्वं हृद्याभोगा भवन्तु ताः ॥ ३२ ॥ अकीर्त्तिः परिवादाश्च नित्यं तासां भवन्तु वै। इति तद्वचनं श्रुत्वा ब्राह्मणी भृशकोपिता। गङ्गायां नीयतामेष सुता इत्यवब्रवीत् ॥ ३३ ॥ लोभमोहाभिभूतास्ते पुत्रास्तं गौतमादयः। बद्ध्वोडुपे परिक्षिप्य गङ्गायां समवासृजन् ॥ ३४ ॥ कस्मादन्यस्य दृढ्यस्य भर्त्तव्योऽयमिति स्म ते। चिन्तयित्वा ततः क्रूराः प्रतिजग्मुरथो गृहान् ॥ ३५ ॥ सोऽनुस्रोतसदा विप्रः प्लवमानो यदृच्छया। जगाम सुबहून्देशानन्यस्तेनोडुपेन ह ॥ ३६ ॥ तन्तु राजा बलिर्नाम सर्वधर्मविदांवरः। अपश्यन्नज्जनगतः स्रोतसाभ्यासमागतम् ॥ ३७ ॥ जग्राह चैनं धर्मात्मा बलिः सत्यपराक्रमः। ज्ञात्वैवं स च वव्रेऽथ पुत्रार्थे भरतर्षभ ॥ ३८ ॥ सन्तानार्थं महाभाग भार्य्यासु मम मानद। पुत्रान्धर्मार्थकुशलान्

नुत्पादयितुमर्हसि ॥ ३६ ॥ एवमुक्तः स तेजस्वी तं तथेत्युक्त-वानृषिः। तस्मै स राजा स्वां भार्यां सुदेष्णां प्राहिणोत्तदा ॥ ४० ॥ अन्धं दृष्ट्वा च तं मत्वा न सा देवी जगाम ह। स्वान्तु धात्रेयिकां तस्मै दृढाय प्राहिणोत्तदा ॥ ४१ ॥ तस्यां काक्षी-वदादीन् स शूद्रयोनाद्दषिस्तदा। जनयामास धर्मात्मा पुत्रा-नेकादशैव तु ॥ ४२ ॥ काक्षीवदादीन् पुत्रांस्तान् दृष्ट्वा सर्वा-नधीयतः। उवाच तमृषिं राजा मम मेम इति भारत ॥ ४३ ॥ नेत्युवाच महर्षिस्तं ममेम इति चाब्रवीत्। शूद्रयोनौ मया ह्येमे जाताः काक्षीवदादयः ॥ ४४ ॥ अन्धं दृष्ट्वा मां दृष्ट्वा सुदेष्णा महिषी तव। अवमन्य ददौ मूढा शूद्रां धात्रेयिकां मम ॥ ४५ ॥ ततः प्रसादयामास पुनस्तमृषिसत्तमम्। बलिः सुदेष्णां स्वां भार्यां तस्मै स प्राहिणोत् पुनः ॥ ४६ ॥ तां स दीर्घतमाङ्गेषु स्पृष्ट्वा देवीमथाब्रवीत्। भविष्यन्ति कुमारास्ते तेजसादित्यवर्चसः ॥ ४७ ॥ अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सुह्मश्च ते सुताः। तेषां देशाः समाख्याताः स्वनामकथिता भुवि ॥ ४८ ॥ अङ्गस्याङ्गोऽभवद्देशो वङ्गो वङ्गस्य च स्मृतः। कलिङ्गविषयश्चैव कलिङ्गस्य च स स्मृतः ॥ ४९ ॥ पुण्ड्रस्य पुण्ड्राः प्रख्याताः सुह्माः सुह्मस्य च स्मृताः। एवं बलेः पुरा वंश्याः प्रख्यातो वै महर्षिजः ॥ ५० ॥ एवमन्ये महेष्वासा ब्राह्मणैः क्षत्रिया भुवि। जाताः परमधर्मज्ञा वीर्यवन्तो महाबलाः। एतच्छ्रुत्वा त्वमप्यत्र मातः कुरु यथेप्सितम् ॥ ५१ ॥

इत्यादिपर्वणि सम्भवपर्वणि भीष्मसत्यवतीसंवादे
चतुरधिकशततोऽध्यायः ॥ १०४ ॥

—:०:—

भीष्म उवाच। पुनर्भरतवंशस्य हेतुं सन्तानवृद्धये। वक्ष्यामि नियतं मातस्तन्मे निगदतः शृणु॥ १॥ ब्राह्मणो गुणवान् कश्चिद्यथैनोपनिमन्त्र्यताम्। विचित्रवीर्य्यक्षेत्रेषु यः समुत्पादयेत्प्रजाः॥ २॥

वैशम्पायन उवाच। ततः सत्यवती भीष्मं वाचा संसज्जमानया। विहसन्तीव सव्रीड़मिदं वचनमब्रवीत्॥ ३॥ सत्यमेतन्महाबाहो यथावदसि भारत। विश्वासात्ते प्रवक्ष्यामि सन्तानाय कुलस्य नः॥ ४॥ न ते ग्रह्यमनाख्यातुमापद्धर्मं तथाविधम्। त्वमेव नः कुले धर्मस्त्वं सत्यं त्वं परा गतिः॥ ५॥ तस्मान्नियम्य सत्यं मे कुरुष्व यदनन्तरम्। धर्मयुक्तस्य धर्मार्थं पितुरासीत्तरी मम॥ ५॥ सा कदाचिदहं तत्र गता प्रथमयौवनम्। अथ धर्मविदां श्रेष्ठः परमर्षिः पराशरः। आजगाम तरीं धीमांस्तरिष्यन्यमुनां नदीम्॥ ६॥ स तार्य्यमाणो यमुनां मामुपेत्याब्रवीत्तदा। सान्त्वपूर्वं मुनिश्रेष्ठः कामार्त्तो मधुरं वचः॥ ७॥ तमहं शापभीता च पितुर्भीता च भारत। वरैरसुलभैरुक्ता न प्रत्याख्यातुमुत्सहे॥ ८॥ अभिभूय स मां बालां तेजसा वशमानयत्। तमसा लोकमावृत्य नौगतामेव भारत॥ ९॥ मत्स्यगन्धो महानासीत् पुरा मम जुगुप्सितः। तमपास्य शुभं गन्धमिमं प्रादात्स मे मुनिः॥ १०॥ ततो मामाह स मुनिर्गर्भमुत्सृज्य मामकम्। द्वीपेऽस्य एव सरितः कन्यैव त्वं भविष्यसि॥ ११॥ पाराशर्य्यो महायोगी स बभूव महाऋषिः। कन्यापुत्रो मम पुरा द्वैपायन इति श्रुतः॥ १२॥ यो व्यस्य वेदांश्चतुरस्तपसा भगवानृषिः। लोके व्यासत्वमापेदे कार्ष्ण्यात् कृष्णत्वमेव च॥ १३॥ सत्यवादी शमपरस्तपस्वी दग्धकिल्बिषः। सद्योत्पन्नः स तु महान् सह पित्रा ततो गतः॥ १४॥ स नियुक्तो मया व्यक्तं त्वया चाप्रतिमद्युतिः। भ्रातुः क्षेत्रेषु

कल्याणमपत्यं जनयिष्यति ॥ १५ ॥ स हि मामुक्तवांस्तत्र स्मरेः कृच्छ्रेषु मामिति। तं स्मरिष्ये महाबाहो यदि भीष्म त्वमिच्छसि ॥ १६ ॥ तव त्वनुमते भीष्म नियतं स महातपाः। विचित्रवीर्य्यक्षेत्रेषु पुत्रानुत्पादयिष्यति ॥ १७ ॥

वैशम्पायन उवाच। महर्षेः कीर्त्तने तस्य भीष्मः प्राञ्जलिरब्रवीत्। धर्ममर्थञ्च कामञ्च त्रीनेतान् योऽनुपश्यति। अर्थमर्थानुबन्धञ्च धर्मं धर्मानुबन्धनम् ॥ १८ ॥ कामं कामानुबन्धञ्च विपरीतान् पृथक् पृथक्। यो विचिन्त्य धिया धीरो व्यवस्यति स बुद्धिमान् ॥ १९ ॥ तदिदं धर्मयुक्तञ्च हितं चैव कुलस्य नः। उक्तमम्बया यच्छ्रेयस्तन्मह्यं रोचते भृशम् ॥ २० ॥

वैशम्पायन उवाच। ततस्तस्मिन् प्रतिज्ञाते भीष्मेण कुरुनन्दन। कृष्णद्वैपायनं काली चिन्तयामास वै मुनिम् ॥ २१ ॥ स वेदान्विब्रुवन्मीमान्मातुर्विज्ञाय चिन्तितम्। प्रादुर्बभूवाविदितः क्षणेन कुरुनन्दन ॥ २२ ॥ तस्मै पूजां ततः कृत्वा सुताय विधिपूर्वकम्। परिष्वज्य च बाहुभ्यां प्रस्नुवैरभ्यषिञ्चत ॥ २३ ॥ सुमोच वाष्पं दाशेयी पुत्रं दृष्ट्वा चिरस्य तु। तामङ्गैः परिषिच्यार्त्तां महर्षिरभिवाद्य च। मातरं पूर्वजः पुत्रो व्यासो वचनमब्रवीत् ॥ २४ ॥ भवत्या यदभिप्रेतं तदहं कर्त्तुमागतः। ग्राधि मां धर्मतत्त्वज्ञे करवाणि प्रियं तव ॥ २५ ॥ तस्मै पूजां ततोऽकार्षीत् पुरोधाः परमर्षये। स च तां प्रतिजग्राह विधिवन्मन्त्रपूर्वकम् ॥ २६ ॥ पूजितो मन्त्रपूर्वं तु विधिवत् प्रीतिमाप सः। तमासनगतं माता दृष्ट्वा कुशलमव्ययम् ॥ २७ ॥ सत्यवत्यथ वीर्य्येनमुवाचेदमनन्तरम्। मातापित्रोः प्रजायन्ते पुत्राः साधारणाः क्वचे ॥ २८ ॥ तेषां पिता यथा स्वामी तथा माता न संशयः। विधानविहितः स त्वं यथा मे प्रथमः सुतः ॥ २९ ॥ विचित्रवीर्य्यो ब्रह्मर्षे तथा मेऽवरजः सुतः। यथा च मिश्रतो भीष्मस्तथा

त्वमसि मातृतः ॥ ३० ॥ भ्राता विचित्रवीर्यस्य यथा वा पुत्र मन्यसे । अयं शान्तनवः सत्यं पालयन् सत्यविक्रमः । बुद्धिं न कुरुतेऽपत्ये तथा राज्यानुशासने ॥ ३१ ॥ स त्वं व्यपेक्षया भ्रातुः सन्तानाय कुलस्य च । भीष्मस्य चास्य वचनान्नियोगाच्च ममानघ ॥ ३२ ॥ अनुक्रोशाच्च भूतानां सर्वेषां रक्षणाय च । आनृशंस्याच्च यद्ब्रूयां तच्छ्रुत्वा कर्तुमर्हसि । यवीयसस्तव भ्रातुर्भार्ये सुरसुतोपमे ॥ ३३ ॥ रूपयौवनसम्पन्ने पुत्रकामे च धर्मतः । तयोरुत्पादयापत्यं समर्थो ह्यसि पुत्रक । अनुरूपं कुलस्यास्य सन्तत्याः प्रसवस्य च ॥ ३४ ॥

व्यास उवाच । वेत्थ धर्मं सत्यवति परं चापरमेव च । तथा तव महाप्राज्ञे धर्मे प्रणिहिता मतिः ॥ ३५ ॥ तस्मादहं त्वन्नियोगाद्धर्ममुद्दिश्य कारणम् । ईप्सितं ते करिष्यामि हृष्टं ह्येतत्सनातनम् ॥ ३६ ॥ भ्रातुः पुत्रान् प्रदास्यामि मित्रावरुणयोः समान् । व्रतं चरेतां ते देव्यौ निर्दिष्टमिह यन्मया ॥ ३७ ॥ सम्वत्सरं यथान्यायं ततः शुद्धे भविष्यतः । न हि मामव्रतोपेता उपेयात्काचिदङ्गना ॥ ३८ ॥

सत्यवत्युवाच । सद्यो यथा प्रपद्येत देवी गर्भं तथा कुरु । अराजकेषु राष्ट्रेषु प्रजानाथा विनश्यति । नश्यन्ति च क्रियाः सर्वा नास्ति वृष्टिर्न देवता ॥ ३९ ॥ कथं चाराजकं राष्ट्रं शक्यं धारयितुं प्रभो । तस्माद्गर्भं समाधत्स्व भीष्मः संवर्धयिष्यति ॥ ४० ॥

व्यास उवाच । यदि पुत्रः प्रदातव्यो मया भ्रातुरकालिकः । विरूपतां मे सहतां तयोरेतत्परं व्रतम् ॥ ४१ ॥ यदि मे सहते गन्धं रूपं वेषं तथा वपुः । अद्यैव गर्भं कौशल्या विशिष्टं प्रतिपद्यताम् ॥ ४२ ॥

वैशम्पायन उवाच । एवमुक्ता महातेजा व्यासः सत्यवतीं तदा । शयने सा च कौशल्या शुचिवस्त्रा ह्यकल्पता ॥ ४३ ॥

समागमनमाकाङ्क्षेदिति सोऽन्तर्हितो मुनिः । ततोऽभिगम्य सा देवी स्नुषां रहसि सङ्गताम् ॥ ४४ ॥ धर्म्यमर्थसमायुक्तमुवाच वचनं हितम् । कौशल्ये धर्मतत्त्वं त्वां यद्ब्रवीमि निबोध तत् ॥ ४५ ॥ भरतानां समुच्छेदो व्यक्तं मद्भाग्यसंक्षयात् । व्यथितां मां च संप्रेक्ष्य पितृवंशश्च पीडितम् ॥ ४६ ॥ भीष्मो बुद्धिमदाग्र्यां कुलस्यास्य विवृद्धये । सा च बुद्धिस्त्वयधीना पुत्रि प्रापय मां तथा । नष्टं च भारतं वंशं पुनरेव समुद्धर ॥ ४७ ॥ पुत्रं जनय सुश्रोणि देवराजसमप्रभम् । स हि राज्यधुरं गुर्वीमुद्वक्ष्यति कुलस्य नः ॥ ४८ ॥ सा धर्मतोऽनुनीयैनां कथञ्चिद्धर्मचारिणीम् । भोजयामास विप्रांश्च देवर्षीनतिथींस्तथा ॥ ४९ ॥

इत्यादिपर्वणि सम्भवपर्वणि सत्यवत्युपदेशे पञ्चाधिकशततोऽध्यायः ॥ १०५ ॥

—०:०—

वैशम्पायन उवाच । ततः सत्यवती काले वधूं स्नातामृतौ तदा । संवेशयन्ती शयने शनैर्वचनमब्रवीत् ॥ १ ॥ कौशल्ये देवरस्तेऽद्य सोऽद्य त्वामुपवेक्ष्यति । अप्रमत्ता प्रतीक्षैनं निशीथे त्वागमिष्यति ॥ २ ॥ स्नुषा श्रुत्वा तथेत्युक्त्वा शयाना शयने शुभे । साचिन्तयत्तदा भीष्ममन्यांश्च कुरुपुङ्गवान् ॥ ३ ॥ ततोऽम्बिकायां प्रथमं नियुक्तः सत्यवाग्ऋषिः । दीप्यमानेषु दीपेषु शयनं प्रविवेश ह ॥ ४ ॥ तस्य कृष्णस्य कपिला जटा दीप्ते च लोचने । बभ्रूणि चैव श्मश्रूणि दृष्ट्वा देवी न्यमीलयत् ॥ ५ ॥ संबभूव तया सार्द्धं मातुः प्रियचिकीर्षया । भयात्काशिसुता तन्तु नाशक्नोदभिवीक्षितुम् ॥ ६ ॥ ततोनिष्क्रान्तमागम्य माता पुत्रमुवाच ह । अप्यस्यां गुणवान् पुत्र राजपुत्रो भविष्यति ॥ ७ ॥ निशम्य तद्वचो मातुर्व्यासः सत्यवतीसुतः । प्रोवाचातीन्द्रिय-

ज्ञानो विधिना संप्रचोदितः ॥ ८ ॥ नागायुतसमप्राणो विद्वान् राजर्षिसत्तमः । महाभागो महावीर्यो महाबुद्धिर्भविष्यति ॥९॥ तस्य चापि शतं पुत्रा भविष्यन्ति महात्मनः । किन्तु मातुः स वैगुण्याद्न्ध एव भविष्यति ॥ १० ॥ तस्य तद्वचनं श्रुत्वा माता पुत्रमथाब्रवीत् । नान्धः कुरूणां नृपतिरनुरूपस्तपोधन ॥ ११ ॥ ज्ञातिवंशस्य गोप्तारं पितॄणां वंशवर्धनम् । द्वितीयं कुरुवंशस्य राजानं दातुमर्हसि ॥ १२ ॥ स तथेति प्रतिज्ञाय निश्चक्राम महायशाः । सापि कालेन कौशल्या सुषुवेऽन्धं तमात्मजम् ॥१३॥ पुनरेव तु सा देवी परिभाष्य स्नुषां ततः । ऋषिमावाहयत्प्रीत्या यथा पूर्वमरिन्दम ॥ १४ ॥ ततस्तेनैव विधिना महर्षिस्तामपद्यत । अम्बालिकामथाभ्यागाद्दृषिं दृष्ट्वा च सापि तम् ॥ १५ ॥ विवर्णा पाण्डुसङ्काशा समपद्यत भारत । तां भीतां पाण्डुसङ्काशां विषण्णां प्रेक्ष्य भारत ॥ १६ ॥ व्यासः सत्यवतीपुत्र इदं वचनमब्रवीत् । यस्मात्पाण्डुत्वमापन्ना विरूपमेक्ष्य मामिह ॥ १७ ॥ तस्मादेष सुतस्ते वै पाण्डुरेव भविष्यति । नाम चास्यैतदेवेह भविष्यति शुभानने ॥ १८ ॥ इत्युक्त्वा स निराक्रामद्भगवान्दृषिसत्तमः । ततो निष्क्रान्तमालोक्य सत्या पुत्रमथाब्रवीत् ॥ १९ ॥ शशंस स पुनर्मात्रे तस्य बालस्य पाण्डुताम् । तं माता पुनरेवान्यमेकं पुत्रमयाचत ॥ २० ॥ तथेति च महर्षिस्तां मातरं प्रत्यभाषत । ततः कुमारं सा देवी प्राप्तकालमजीजनत् ॥ २१ ॥ पाण्डुं लक्षणसम्पन्नं दीप्यमानं वरस्त्रिया । यस्य पुत्रा महेष्वासा जज्ञिरे पञ्च पाण्डवाः ॥ २२ ॥ ऋतुकाले ततो ज्येष्ठां बधूं तस्मै न्ययोजयत् । सा तु रूपञ्च गन्धञ्च महर्षेः प्रविचिन्त्य तम् ॥ २३ ॥ नाकरोदचनं देव्या भयात् सुरसुतोपमा । ततः स्वैर्भूषणैर्दासीं भूषयित्वाप्सरोपमाम् ॥ २४ ॥ प्रेषयामास कृष्णाय ततः काशियतेः सुता । सा तं ऋषिमनुप्राप्तं प्रत्युद्गम्याभिवाद्य च ॥ २५ ॥

संविवेशाभ्यनुज्ञाता सत्कृत्योपचचार ह । कामोपभोगेन रह-
स्तस्यां तुष्टिमगाद्दृषिः । तया सहोषितो राजन्महर्षिः संशित-
व्रतः ॥ २६ ॥ उक्तिष्ठवरदेनामभुजिष्या भविष्यसि । अयञ्च
ते शुभे गर्भः श्रेयान्सुदरमागतः । धर्मात्मा भविता लोके सर्व-
बुद्धिमतां वरः ॥ २७ ॥ स जज्ञे विदुरो नाम कृष्णद्वैपायना-
त्मजः । धृतराष्ट्रस्य वै भ्राता पाण्डोश्चैव महात्मनः ॥ २८ ॥ धर्मो
विदुररूपेण शापात्तस्य महात्मनः । माण्डव्यस्यार्थतत्त्वज्ञः काम-
क्रोधविवर्जितः । कृष्णद्वैपायनोऽप्येतत् सत्यवत्यै न्यवेदयत् ॥२९॥
प्रलम्भमात्मनश्चैव शूद्रायाः पुत्रजन्म च । स धर्मस्यानृणो भूत्वा
पुनर्मात्रा समेत्य च । तस्यै गर्भं समावेद्य तत्रैवान्तरधीयत ॥३०॥
एते विचित्रवीर्यस्य क्षेत्रे द्वैपायनादपि । जज्ञिरे देवगर्भाभाः
कुरुवंशविवर्धनाः ॥ ३१ ॥

इत्यादिपर्वणि सम्भवपर्वणि विचित्रवीर्यसुतोत्पत्तौ
षड़धिकशततोऽध्यायः ॥ १०६ ॥

—•—

जनमेजय उवाच । किं कृतं कर्म धर्मेण येन शापमुपेयि-
वान् । कस्य शापाच्च ब्रह्मर्षेः शूद्रयोनावजायत ॥ १ ॥

वैशम्पायन उवाच । बभूव ब्राह्मणः कश्चिन्माण्डव्य इति
श्रुतः । धृतिमान् सर्वधर्मज्ञः सत्ये तपसि च स्थितः ॥ २ ॥
स आश्रमपदद्वारि वृक्षमूले महातपाः । ऊर्ध्वबाहुर्महायोगी
तस्थौ मौनव्रतान्वितः ॥ ३ ॥ तस्य कालेन महता तस्मिंस्तपसि
वर्ततः । तमाश्रममनुप्राप्ता दस्यवो लोभ्रहारिणः ॥ ४ ॥ अनु-
सार्यमाणा बलभीरक्षिभिर्भरतर्षभ । ते तस्यावसथे लोभ्रं
दस्यवः कुरुसत्तमम् ॥ ५ ॥ निधाय च भयाल्लीनास्तत्रैवागते
बले । तेषु लीनेष्वथो शीघ्रं ततस्तद्रक्षिणां बलम् ॥ ६ ॥ आज-

गाम ततोऽपश्यंस्तमृषिं तस्करानुगाः । तमपृच्छंस्ततो राजं-
स्तथावृत्तं तपोधनम् ॥ ७ ॥ कतमेन पथा याता दस्यवो द्विज-
सत्तम । तेन गच्छामहे ब्रह्मन् यथा शीघ्रतरं वयम् ॥ ८ ॥
तथा तु रक्षिणां तेषां ब्रुवतां स तपोधनः । न किञ्चिदवचत्
राजन्नब्रवीत्साध्वसाधु वा ॥ ९ ॥ ततस्ते राजपुरुषा विचिन्वा-
नास्तमाश्रमम् । ददृशुस्तत्र लीनांस्तांश्चौरांस्तद्द्रव्यमेव च ॥ १० ॥
ततः शङ्का समभवद्रक्षिणां तं मुनिं प्रति । संयम्यैनं ततो राज्ञे
दस्यूंश्चैव न्यवेदयन् ॥ ११ ॥ तं राजा सह तैश्चौरैरन्वशाद्ध्यता-
मिति । स रक्षिभिस्तैरज्ञातः शूले प्रोतो महातपाः ॥ १२ ॥
ततस्ते शूल आरोप्य तं मुनिं रक्षिणस्तदा । प्रतिजग्मुर्महीं-
पालं धनान्यादाय तान्यथ ॥ १३ ॥ शूलस्थः स तु धर्मात्मा
कालेन महता ततः । निराहारोऽपि विप्रर्षिर्मरणं नाभ्यपद्यत
॥ १४ ॥ धारयामास च प्राणान्ऋषींश्च समुपानयत् । शूलाग्रे
तप्यमानेन तपसेन महात्मना ॥ १५ ॥ सन्तापं परमं जग्मु-
र्मुनयस्तपसान्विताः । ते रात्रौ शकुना भूत्वा सन्निपत्य तु भारत
॥ १६ ॥ दर्शयन्तो यथाशक्ति तमपृच्छन्द्विजोत्तमम् । श्रोतु-
मिच्छामहे ब्रह्मन् किं पापं कृतवानसि । येनेह समनुप्राप्तं
शूले दुःखभयं महत् ॥ १७ ॥

इत्यादिपर्वणि सम्भवपर्वणि अणीमाण्डव्योपाख्याने
सप्ताधिकशततोऽध्यायः ॥ १०७ ॥

—०:०—

वैशम्पायन उवाच । ततः स मुनिशार्दूलस्तानुवाच तपो-
धनान् । दोषतः कञ्चमिष्यामि न हि मेऽन्योऽपराध्यति ॥ १ ॥
तं दृष्ट्वा रक्षिणस्तत्र तथा बद्धतिथेऽहनि । न्यवेदयंस्तथा राज्ञे

यथाह्युक्तं नराधिप ॥ २ ॥ श्रुत्वा च वचनं तेषां निश्चित्य सह मन्त्रिभिः । प्रसादयामास तदा शूलस्थमृषिसत्तमम् ॥ ३ ॥

राजोवाच । यन्मयापकृतं मोहाद्ज्ञानाद्ऋषिसत्तम । प्रसादये त्वां तत्राहं न मे त्वं क्रोद्धुमर्हसि ॥ ४ ॥ एवमुक्तस्ततो राज्ञा प्रसादमकरोन्मुनिः । कृतप्रसादं राजा तं ततः समवतारयत् ॥ ५ ॥ अवतार्य च शूलाग्रात्तच्छूलं निचकर्ष ह । अयत्नवंश्च निष्कृष्टं शूलं मूले स चिच्छिदे ॥ ६ ॥ स तथान्तर्गतेनैव शूलेन व्यचरन्मुनिः । तेनातितपसा लोकान्विजिग्ये दुर्लभान् परैः ॥ ७ ॥ अणीमाण्डव्य इति च ततो लोकेषु गीयते । स गत्वा सदनं विप्रो धर्मस्य परमात्मवित् ॥ ८ ॥ आसनस्थं ततो धर्मं दृष्ट्वोपालभत प्रभुः । किन्नु तद्दुष्कृतं कर्म मया कृतमजानता ॥ ९ ॥ यस्येयं फलनिर्वृत्तिरीदृश्यासादिता मया । शीघ्रमाचक्ष्व मे तत्त्वं पश्य मे तपसो बलम् ॥ १० ॥

धर्म उवाच । पतङ्गिकानां पुच्छेषु त्वयेषीका प्रवेशिता । कर्मणस्तस्य ते प्राप्तं फलमेतत्तपोधन ॥ ११ ॥

अणीमाण्डव्य उवाच । अल्पेऽपराधेऽपि महान्मम दण्डस्त्वया धृतः । शूद्रयोनावतो धर्म मानुषः संभविष्यसि ॥ १२ ॥ मर्यादां स्थापयाम्यद्य लोके धर्मफलोदयाम् । आचतुर्दशकाद्वर्षान्न भविष्यति पातकम् । परतः कुर्वतामेव दोष एव भविष्यति ॥ १३ ॥

वैशम्पायन उवाच । एतेन त्वपराधेन प्राप्तात्तस्य महात्मनः । धर्मो विदुररूपेण शूद्रयोनावजायत ॥ १४ ॥ धर्मे चार्थे च कुशलो लोभक्रोधविवर्जितः । दीर्घदर्शी शमपरः कुरूणाञ्च हिते रतः ॥ १५ ॥

इत्यादिपर्वणि सम्भवपर्वणि अणीमाण्डव्योपाख्याने अष्टाधिकशततोऽध्यायः ॥ १०८ ॥

वैशम्पायन उवाच। तेषु त्रिषु कुमारेषु जातेषु कुरुजाङ्गलम्। कुरवोऽथ कुरुक्षेत्रं त्रयमेतदवर्धत ॥ १ ॥ अजङ्गमाश्चाभवङ्भूमिः शस्यानि रसवन्ति च। यथर्तुवर्षी पर्जन्यो बभूव पुष्पफला द्रुमाः ॥ २ ॥ वाहनानि प्रहृष्टानि मुदिता मृगपक्षिणः। गन्धवन्ति च माल्यानि रसवन्ति फलानि च ॥ ३ ॥ वणिग्भिश्चान्वकीर्यन्त नगराण्यथ शिल्पिभिः। शूराश्च कृतविद्याश्च सन्तश्च सुखिनोऽभवन् ॥ ४ ॥ नाभवन् दस्यवः केचिन्नाधर्मरुचयो जनाः। प्रदेशेष्वपि राष्ट्राणां कृतं युगमवर्तत ॥ ५ ॥ धर्मक्रिया यज्ञशीलाः सत्यव्रतपरायणाः। अन्योन्यप्रीतिसंयुक्ता व्यवर्धन्त प्रजास्तदा ॥ ६ ॥ मानक्रोधविहीनाश्च नरा लोभविवर्जिताः। अन्योऽन्यमभ्यनन्दन्त धर्मोत्तरमवर्तत ॥ ७ ॥ तन्महोदधिवत् पूर्णं नगरं वै व्यरोचत। द्वारतोरणनिर्यूहैर्युक्तमभ्रचयोपमैः ॥ ८ ॥ प्रासादशतसम्बाधं महेन्द्रपुरसन्निभम्। नदीषु वनखण्डेषु वापीपल्वलसानुषु। काननेषु च रम्येषु विजह्रुर्मुदिता जनाः ॥ ९ ॥ उत्तरैः कुरुभिः सार्धं दक्षिणाः कुरवस्तथा। विस्पर्धमाना व्यचरंस्तथा देवर्षिचारणैः ॥ १० ॥ नाभवत् क्षपणः कश्चिन्नाभवन्विधवाः स्त्रियः। तस्मिन् जनपदे रम्ये कुरुभिर्वङ्गलीकृते ॥ ११ ॥ कूपारामसभावाप्यो ब्राह्मणावसथास्तथा। बभूवुः सर्वर्द्धियुतास्तस्मिन्राष्ट्रे सदोत्सवाः ॥ १२ ॥ भीष्मेण धर्मतो राजन् सर्वतः परिरक्षिते। बभूव रमणीयश्च चैत्ययूपशताङ्कितः ॥ १३ ॥ स देयः परराष्ट्राणि विहज्याभिप्रवर्धितः। भीष्मेण विहितं राष्ट्रे धर्मचक्रमवर्तत ॥ १४ ॥ क्रियमाणेषु कृत्येषु कुमाराणां महात्मनाम्। पौरजानपदाः सर्वे बभूवुः परमोत्सुकाः ॥ १५ ॥ गृहेषु कुरुमुख्यानां पौराणाश्च नराधिप। दीयतां भुज्यतां चेति वाचोऽश्रूयन्त सर्वशः ॥ १६ ॥ धृतराष्ट्रश्च पाण्डुश्च विदुरश्च महामतिः। जन्मप्रभृति

भीष्मेण पुत्रवत्परिपालिताः ॥ १७ ॥ संस्कारैः संस्कृतास्ते तु ततोऽध्ययनसंयुताः। अमव्यायामकुशलाः समपद्यन्त यौवनम् ॥ १८ ॥ धनुर्वेदे च वेदे च गदायुद्धेऽसिचर्मणि। तथैव गजशिक्षायां नीतिशास्त्रेषु पारगाः ॥ १९ ॥ इतिहासपुराणेषु नानाशिक्षासु बोधिताः। वेदवेदाङ्गतत्त्वज्ञाः सर्वत्र कृतनिश्चयाः ॥ २० ॥ पाण्डुर्धनुषि विक्रान्तो नरेष्वभ्यधिकोऽभवत्। अन्येभ्यो बलवानासीद्धृतराष्ट्रो महीपतिः ॥ २१ ॥ त्रिषु लोकेषु न त्वासीत्कश्चिद्विदुरसम्मितः। धर्मनित्यस्तथा राजन् धर्मे च परमं गतः ॥ २२ ॥ प्रनष्टं शान्तनोर्वंशं समीक्ष्य पुनरुद्धृतम्। ततो निर्वचनं लोके सर्वराष्ट्रेष्ववर्त्तत ॥ २३ ॥ वीरसूनां काशिसुते देशानां कुरुजाङ्गलम्। सर्वधर्मविदां भीष्मः पुराणां गजसाह्वयम् ॥ २४ ॥ धृतराष्ट्रस्त्वचक्षुष्ट्वाद्राज्यं न प्रत्यपद्यत। पारक्यत्वाद्विदुरो राजा पाण्डुर्बभूव ह ॥ २५ ॥ कदाचिदथ गाङ्गेयः सर्वनीतिमतां वरः। विदुरं धर्मतत्त्वज्ञं वाक्यमाह यथोचितम् ॥ २६ ॥

इत्यादिपर्वणि सम्भवपर्वणि पाण्डुराज्याभिषेके नवाधिकशततोऽध्यायः ॥ १०९ ॥

भीष्म उवाच। गुणैः समुदितं सम्यगिदं नः ग्रथितं कुलम्। अभ्यन्यान् पृथिवीपालान् पृथिव्यामधिराज्यभाक् ॥ १ ॥ रक्षितं राजभिः पूर्वं धर्मविद्भिर्महात्मभिः। नोत्सेदमगमत्सेदं कदाचिदिह नः कुलम् ॥ २ ॥ मया च सत्यवत्या च कृष्णेन च महात्मना। समवस्थापितं भूयो सुस्थासु कुलतन्तुषु ॥ ३ ॥

तच्चैतद्वर्तते भूयः कुलं सागरवद्यथा। तथा मया विधातव्यं त्वया चैव न संशयः॥ ४॥ श्रूयते याद्दवी कन्या स्वनुरूपा कुलस्य नः। सुबलस्यात्मजा चैव तथा मद्रेश्वरस्य च॥ ५॥ कुलीना रूपवत्यश्च ताः कन्याः पुत्र सर्वशः। उचिताश्चैव सम्बन्धे ह्यस्माकं क्षत्रियर्षभाः॥ ६॥ मन्ये वरयितव्यास्ता इत्यहं धीमतां वर। सन्तानार्थं कुलस्यास्य यद्वा विदुर मन्यसे॥ ७॥

विदुर उवाच। भवान् पिता भवान्माता भवान्नः परमो गुरुः। तस्मात् स्वयं कुलस्यास्य विचार्य्यं कुरु यद्धितम्॥ ८॥

वैशम्पायन उवाच। अथ शुश्राव विप्रेभ्यो गान्धारीं सुबलात्मजाम्। आराध्य वरदं देवं भगनेत्रहरं हरम्॥ ९। गान्धारी किल पुत्राणां शतं लेभे वरं शुभा। इति शुश्राव तत्त्वेन भीष्मः कुरुपितामहः॥१०॥ ततो गान्धारराजस्य प्रेषयामास भारत। अचक्षुरिति तच्चासीत् सुबलस्य विचारणा॥ ११॥ कुलं ख्यातिञ्च दत्तञ्च बुद्ध्या तु प्रसमीक्ष्य सः। ददौ तां धृतराष्ट्राय गान्धारीं धर्मचारिणीम्॥ १२॥ गान्धारी त्वथ शुश्राव धृतराष्ट्रमचक्षुषम्। आत्मानं दिक्षितं चास्मै पिता माता च भारत॥ १४॥ ततः सा पटमादाय कृत्वा बहुगुणं तदा। बबन्ध नेत्रे स्वे राजन् पतिव्रतपरायणा॥ १५॥ नाभ्यसूयां पतिमहमित्येवं कृतनिश्चया। ततो गान्धारराजस्य पुत्रः शकुनिरभ्ययात्॥ १६॥ स्वसारं वयसा लक्ष्म्या युक्तामादाय कौरवान्। तां तदा धृतराष्ट्राय ददौ परमसत्कृताम्॥ १७॥ भीष्मस्यानुमते चैव विवाहं समकारयत्। दत्त्वा स भगिनीं वीरो यथार्हञ्च परिच्छदम्। पुनरायात् स्वनगरं भीष्मेण प्रतिपूजितः॥१८॥ गान्धार्य्यपि वरारोहा शीलाचारविचेष्टितैः। तुष्टिं कुरूणां सर्वेषां जनयामास भारत॥ १९। दत्तेनाराध्य तान् सर्वान्

गुरून् प्रतिमरायणा । वाचायि पुरुषानन्यान् सुव्रता नान्वकीर्त्तयत् ॥ २० ॥

इत्यादिपर्वणि सम्भवपर्वणि धृतराष्ट्रविवाहे दशाधिकशततोऽध्यायः ॥ ११० ॥

वैशम्पायन उवाच । शूरो नाम यदुश्रेष्ठो वसुदेवपिताभवत् । तस्य कन्या पृथा नाम रूपेणाप्रतिमा भुवि ॥ १ ॥ पितृस्वस्रीयाय स तामनपत्याय भारत । अग्रमग्ये प्रतिज्ञाय स्वस्रापत्यं स सत्यवाक् ॥ २ ॥ अग्रजामथ तां कन्यां शूरोऽनुग्रहकाङ्क्षिणे । प्रददौ कुन्तिभोजाय सखा सख्ये महात्मने ॥ ३ ॥ नियुक्ता सा पितुर्गेहे ब्राह्मणातिथिपूजने । उग्रं यर्य्यं चरत्तत्र ब्राह्मणं शंसितव्रतम् ॥ ४ ॥ निगूढनिश्चयं धर्मे यन्तं दुर्वाससं विदुः । तमुग्रं शंसितात्मानं सर्वयत्नैरतोषयत् ॥ ५ ॥ तस्यै स प्रददौ मन्त्रमापद्धर्मान्ववेक्षया । अभिचाराभिसंयुक्तमब्रवीच्चैव तां मुनिः ॥ ६ ॥ यं यं देवं त्वमेतेन मन्त्रेणावाहयिष्यसि । तस्य तस्य प्रभावेण तव पुत्रो भविष्यति ॥ ७ ॥ तथोक्ता सा तु विप्रेण कुन्ती कौतूहलान्विता । कन्या सती देवमर्कमाजुहाव यशस्विनी ॥ ८ ॥ सा ददर्श तमायान्तं भास्करं लोकभावनम् । विस्मिता चानवद्याङ्गी दृष्ट्वा तन्महदद्भुतम् ॥ ९ ॥ तां समासाद्य देवस्तु विवस्वानिदमब्रवीत् । अयमस्मासितापाङ्गि बूहि किं करवाणि ते ॥ १० ॥

कुन्त्युवाच । कश्चिन्मे ब्राह्मणः प्रादाद्वरं विद्यान्वयद्भुतम् । तद्विजिज्ञासयाह्वानं कृतवत्यस्मि ते विभो ॥ ११ ॥ एतस्मिन्नपराधे त्वां शिरसाहं प्रसादये । योषितो हि सदा रक्ष्याः स्वपराद्धापि नित्यशः ॥ १२ ॥

सूर्य्य उवाच। वेदाहं सर्वमेवैतद्यद्दुर्वासा वरं ददौ। सन्त्यज्य भयमेवेह क्रियतां सङ्गमो मम ॥ १३ ॥ अमोघं दर्शनं मह्यमाहृतस्यास्मि ते शुभे। दृष्यान्नेऽपि ते भीरु दोषः स्यान्नात्र संशयः ॥ १४ ॥

वैशम्पायन उवाच। एवमुक्ता बहुविधं सान्त्वपूर्वं विवस्वता। सा तु नैच्छद्वरारोहा कन्याहमिति भारत ॥ १५ ॥ बन्धुपक्षभयाद्भीता लज्जया च यशस्विनी। तामर्कः पुनरेवेदमब्रवीद्भरतर्षभ ॥ १६ ॥ मत्प्रसादान्न ते राज्ञि भविता दोष इत्युत। एवमुक्ता स भगवान् कुन्तिराजसुतां तदा ॥ १७ ॥ प्रकाशकर्त्ता तपनः सम्बभूव तया सह। तत्र वीरः समभवत् सर्वशस्त्रभृतां वरः। आमुक्तकवचः श्रीमान्देवगर्भः श्रियान्वितः ॥ १८ ॥ सहजं कवचं बिभ्रत् कुण्डलोद्योतिताननः। अजायत सुतः कर्णः सर्वलोकेषु विश्रुतः ॥ १९ ॥ प्रादाच्च तस्यै कन्यात्वं पुनः स परमद्युतिः। दत्त्वा च तपतां श्रेष्ठो दिवमाचक्रमे ततः ॥ २० ॥ दृष्ट्वा कुमारं जातं सा वार्ष्णेयी दीनमानसा। एकाग्रं चिन्तयामास किं कृत्वा सुकृतं भवेत् ॥ २१ ॥ गूहमानापचारं सा बन्धुपक्षभयात्तदा। उत्ससर्ज कुमारं तं जले कुन्ती महाबलम् ॥ २२ ॥ तमुत्सृष्टं जले गर्भं राधाभर्ता महायशाः। पुत्रत्वे कल्पयामास सभार्य्यः सूतनन्दनः ॥ २३ ॥ नामधेयञ्च चक्राते तस्य बालस्य तावुभौ। वसुना सह जातोऽयं वसुषेणो भवत्विति ॥ २४ ॥ स वर्द्धमानो बलवान् सर्वास्त्रेषूद्यतोऽभवत्। आदृष्टतापादादित्यमुपातिष्ठत वीर्य्यवान् ॥ २५ ॥ तस्मिन् काले तु जपतस्तस्य वीरस्य धीमतः। नादेयं ब्राह्मणेष्वासीत् किञ्चिदस्तु महीतले ॥ २६ ॥ तमिन्द्रो ब्राह्मणो भूत्वा भिक्षार्थी समुपागमत्। कवचं प्रार्थयामास फाल्गुनस्य हिते रतः ॥ २७ ॥ स्वशरीरात्समुत्कृत्य कवचं स्वनिसर्गजम्।

विप्ररूपाय शक्राय ददौ कर्णः कृताञ्जलिः ॥ २८ ॥ प्रतिगृह्य तु देवेशस्तुष्टस्तेनास्य कर्मणा। ददौ शक्तिं सुरपतिर्वाक्यं चेदमुवाच ह ॥ २९ ॥ देवासुरमनुष्याणां गन्धर्वोरगरक्षसाम्। यमेकं जेतुमिच्छेथाः सोऽनया न भविष्यति ॥ ३० ॥ प्राङ्नाम तस्य कथितं वसुषेण इति क्षितौ। कर्णो वैकर्त्तनश्चैव कर्मणा तेन सोऽभवत् ॥ ३१ ॥

इत्यादिपर्वणि सम्भवपर्वणि ऐन्द्रशक्तिलाभे एकादशाधिकशततोऽध्यायः ॥ १११ ॥

—०:०—

वैशम्पायन उवाच। सत्त्वरूपगुणोपेता धर्मारामा महाव्रता। दुहिता कुन्तिभोजस्य पृथा पृथुललोचना ॥ १ ॥ तान्तु तेजस्विनीं कन्यां रूपयौवनशालिनीम्। व्यवृणवन् पार्थिवाः केचिदतीवस्त्रीगुणैर्युताम् ॥ २ ॥ ततः सा कुन्तिभोजेन राज्ञाहूय नराधिपान्। पिता स्वयम्वरे दत्ता दुहिता राजसत्तम ॥ ३ ॥ ततः सा रङ्गमध्यस्थं तेषां राज्ञां मनस्विनी। ददर्श राजशार्दूलं पाण्डुं भरतसत्तमम् ॥ ४ ॥ सिंहदर्पं महोरस्कं वृषभाक्षं महाबलम्। आदित्यमिव सर्वेषां राज्ञां प्रच्छाद्य वै प्रभाः ॥ ५ ॥ तिष्ठन्तं राजसमितौ पुरन्दरमिवापरम्। तं दृष्ट्वा सानवद्याङ्गी कुन्तिभोजसुता शुभा। पाण्डुं नरवरं रङ्गे हृदयेनाकुलाभवत् ॥ ६ ॥ ततः कामपरीताङ्गी सकृत्प्रचलमानसा। व्रीड़माना स्वजं कुन्ती राज्ञः स्कन्धे समासजत् ॥ ७ ॥ तं निशम्य हृतं पाण्डुं कुन्त्या सर्वे नराधिपाः। यथागतं समाजग्मुर्गजैरश्वैरथैस्तथा ॥ ८ ॥ ततस्तस्याः पिता राजन्विवाहमकरोत् प्रभुः। स तया कुन्तिभोजस्य दुहित्रा कुरुनन्दनः ॥ ९ ॥ युयुजेऽमितसौभाग्यः पौलोम्या मघवानिव। कुन्त्याः पाण्डोश्च राजेन्द्र

कुन्तिभोजो महीपतिः ॥ १० ॥ कृत्वोद्वाहं तदा तत्तु नाना-
वसुभिरर्चितम् । स्वपुरं प्रेषयामास स राजा कुरुसत्तम ॥ ११॥
ततो बलेन महता नानाध्वजपताकिना । स्तूयमानः स चाग्नी-
भिर्ब्राह्मणैश्च महर्षिभिः ॥ १२ ॥ संप्राप्य नगरं राजा पाण्डुः
कौरवनन्दनः । न्यवेशयत तां भार्यां कुन्तीं स्वभवने प्रभुः ॥१३॥

इत्यादिपर्वणि सम्भवपर्वणि कुन्तीविवाहे द्वादशा-
धिकशततोऽध्यायः ॥ ११२ ॥

वैशम्पायन उवाच । ततः शान्तनवो भीष्मो राज्ञः पाण्डो-
र्ज्यायस्विनः । विवाहस्यापरस्यार्थे चकार मतिमान्मतिम् ॥ १ ॥
सोऽमात्यैः स्वविदैः सार्द्धं ब्राह्मणैश्च महर्षिभिः । बलेन चतुरङ्गेण
ययौ मद्रपतेः पुरम् ॥ २ ॥ तमागतमभिश्रुत्य भीष्मं वाह्लीक-
पुङ्गवः । प्रत्युद्गम्यार्चयित्वा च पुरं प्रावेशयन्नृपः ॥ ३ ॥ दत्त्वा
तस्यासनं शुभ्रं पाद्यमर्घ्यं तथैव च । मधुपर्कं च मद्रेभ्यः पप्रच्छा-
गमनेऽर्थिताम् ॥ ४ ॥ तं भीष्मः प्रत्युवाचेदं मद्रराजं कुरूद्वहः ।
आगतं मां विजानीहि कन्यार्थिनमरिन्दम ॥ ५ ॥ श्रूयते भवतः
साध्वी स्वसा माद्री यशस्विनी । तामहं वरयिष्यामि पाण्डो-
र्थे यशस्विनीम् ॥ ६ ॥ युक्तरूपो हि सम्बन्धो त्वं नो राजन्
वयं तव । एतच्चिन्त्य मद्रेश गृह्यतामान्यथाविधि ॥ ७ ॥
तमेवं वादिनं भीष्मं प्रत्यभाषत मद्रपः । न हि मेऽन्यो वर-
स्त्वत्तः श्रेयानिति मतिर्मम ॥ ८ ॥ पूर्वैः प्रवर्त्तितं किञ्चित्
कुलेऽस्मिन्नृपसत्तमैः । साधु वा यदि वासाधु तन्नातिक्रान्तुमुत्स-
हे ॥ ९ ॥ व्यक्तं तद्भवतश्चापि विदितं नात्र संशयः । न
चासुतं तथा वक्तुं भवान्देहीति सत्तम ॥ १० ॥ कुलधर्मः स
नो वीर प्रमाणं परमञ्च तत् । तेन त्वां न ब्रवीम्येतद्यद्विरुद्धं

वचोऽब्रिवीत् ॥ ११ ॥ तं भीष्मः प्रत्युवाचेदं मद्रराजं जनाधिपः । धर्म एष परो राजन् स्वयमुक्तः स्वयम्भुवा ॥ १२ ॥ नात्र कश्चन दोषोऽस्ति पूर्वैर्विधिरयं कृतः । विदितेयञ्च ते शल्य मर्य्यादा साधुसम्मता ॥ १३ ॥ इत्युक्त्वा स महातेजाः भ्रातृभ्यं कृताकृतम् । रत्नानि च विचित्राणि शल्यायादात्सुहृद्वशः ॥ १४ ॥ गजानश्वान्रथांश्चैव वासांस्याभरणानि च । मणिमुक्ताप्रवालञ्च गाङ्गेयो व्यसृजच्छुभम् ॥ १५ ॥ तत् प्रगृह्य धनं सर्वं शल्यः सम्प्रीतमानसः । ददौ तां समलङ्कृत्य स्वसारं कौरवर्षभे ॥ १६ ॥ स तां माद्रीसुपादाय भीष्मः सागरगासुतः । आजगाम पुरीं धीमान् प्रविष्टो गजसाह्वयम् ॥ १७ ॥ तत दृष्टेऽहनि प्राप्ते मुहूर्त्ते साधुसम्मते । जग्राह विधिवत् पाणिं माद्र्याः पाण्डुर्नराधिपः ॥ १८ ॥ ततो विवाहे निर्वृत्ते स राजा कुरुनन्दन । स्थापयामास तां भार्य्यां शुभे वेश्मनि भाविनीम् ॥ १९ ॥ स ताभ्यां व्यचरत् सार्द्धं भार्य्याभ्यां राजसत्तमः । कुन्त्या माद्र्या च राजेन्द्रो यथाकामं यथासुखम् ॥ २० ॥ ततः स कौरवो राजा विहृत्य विदया निशाः । जिगीषया मही पाण्डुर्निरक्रामत् पुरात् प्रभो ॥ २१ ॥ स भीष्मप्रमुखान् वृद्धानभिवाद्य प्रणम्य च । धृतराष्ट्रञ्च कौरव्यं तथान्यान् कुरुसत्तमान् ॥ २२ ॥ आमन्त्र्य प्रययौ राजा तैश्चैवाभ्यनुमोदितः । मङ्गलाचारयुक्ताभिराशीर्भिरभिनन्दितः ॥ २३ ॥ गजवाजिरथौघेन बलेन महतागमत् । स राजा देवगर्भाभो विजिगीषुर्वसुन्धराम् ॥ २४ ॥ हृष्टपुष्टबलैः प्रायात् पाण्डुः शत्रूननेकशः । पूर्वमागस्कृतो गत्वा दशार्णाः समरे जिताः । पाण्डुना नरसिंहेन कौरवाणां यशोवृता ॥ २५ ॥ ततः सेनामुपादाय पाण्डुर्नानाविधध्वजाम् । प्रभूतहस्त्यश्वयुतां पदातिरथसङ्कुलाम् ॥ २६ ॥ आगस्कारी महीपानां बह्वन्नबलदर्पितः । गोप्ता मगधराष्ट्रस्य दीर्घो राजगृहे

हतः ॥ २७ ॥ ततः कोषं समादाय वाहनानि च भूरिशः । पाण्डुना मिथिलां गत्वा विदेहाः समरे जिताः ॥ २८ ॥ तथा काशिषु सुह्मेषु पुण्ड्रेषु च नरर्षभ । स्वबाहुबलवीर्येण कुरूणामकरोद्यशः ॥ २९ ॥ तं शरौघनिहन्याजं शस्त्रार्च्चिषमरिन्दमम् । पाण्डुपावकमासाद्य व्यदह्यन्त नराधिपाः ॥ ३० ॥ ते सबेनाः सबेनेन विध्वंसितबला हृताः । पाण्डुना वशगाः कृत्वा कुरुकर्मसु योजिताः ॥ ३१ ॥ तेन ते निर्जिताः सर्वे दृथिव्यां सर्वपार्थिवाः । तमेकं मेनिरे शूरं देवेष्विव पुरन्दरम् ॥ ३२ ॥ तं कृताञ्जलयः सर्वे प्रणता वसुधाधिपाः । उपाजग्मुर्धनं गृह्य रत्नानि विविधानि च ॥ ३३ ॥ मणिमुक्ताप्रवालञ्च सुवर्णं रजतं बहु । गोरत्नान्यश्वरत्नानि रथरत्नानि कुञ्जरान् ॥ ३४ ॥ खरोष्ट्रमहिषांश्चैव यच्च किञ्चिदजाविकम् । कम्बलाजिनरत्नानि राङ्कवास्तरणानि च । तत्सर्वं प्रतिजग्राह राजा नागपुराधिपः ॥३५॥ तदादाय ययौ पाण्डुः पुनर्मुदितवाहनः । हर्षयिष्यन् स्वराष्ट्राणि पुरञ्च गजसाह्वयम् ॥ ३६ ॥ शान्तनोराजसिंहस्य भरतस्य च धीमतः । प्रनष्टः कीर्त्तिजः शब्दः पाण्डुना पुनराहृतः ॥३७॥ ये पुरा कुरुराष्ट्राणि जह्रुः कुरुधनानि च । ते नागपुरसिंहेन पाण्डुना करदीकृताः ॥ ३८ ॥ इत्यभाषन्त राजानो राजामात्याश्च सङ्गताः । प्रतीतमनसो हृष्टाः पौरजानपदैः सह ॥३९॥ प्रत्युद्ययुश्च तं प्राप्तं सर्वे भीष्मपुरोगमाः । तेन दूरमिवाध्वानं गत्वा नागपुरालयात् ॥ ४० ॥ आवृतं दृष्टमुर्हृष्टा लोकं बहुविधैर्धनैः । नानायानसमानीतैरत्नैरुच्चावचैस्तदा ॥ ४१ ॥ हस्त्यश्वरथरत्नैश्च गोभिरुष्ट्रैस्तथाविधैः । नान्तं ददृशुरासाद्य भीष्मेण सह कौरवाः ॥ ४२ ॥ सोऽभिवाद्य पितुः पादौ कौशल्यानन्दवर्द्धनः । यथार्हं मानयामास पौरजानपदानपि ॥ ४३ ॥ प्रहृष्य पुरराष्ट्राणि कृतार्थं पुनरागतम् । पुत्रमाश्लिष्य भीष्मस्तु हर्षा-

दत्त्वा धनवर्त्तयत् ॥ ४४ ॥ स तूर्य्यशतशङ्खानां भेरीणाञ्च महास्वनैः। हर्षयन् सर्वशः पौरान् विवेश गजसाह्वयम् ॥ ४५ ॥

इत्यादिपर्वणि सम्भवपर्वणि पाण्डुदिग्विजये त्रयोदशाधिकशततोऽध्यायः ॥ ११३ ॥

वैशम्पायन उवाच। धृतराष्ट्राभ्यनुज्ञातः स्वबाहुविजितं धनम्। भीष्माय सत्यवत्यै च मात्रे चोपजहार सः ॥ १ ॥ विदुराय च वै पाण्डुः प्रेषयामास तद्धनम्। सुहृदश्चापि धर्मात्मा धनेन समतर्पयत् ॥ २ ॥ ततः सत्यवतीं भीष्मं कौशल्याञ्च यशस्विनीम्। शुभैः पाण्डुजितैरर्थैस्तोषयामास भारत ॥ ३ ॥ ननन्द माता कौशल्या तमप्रतिमतेजसम्। जयन्तमिव पौलोमी परिष्वज्य नरर्षभम् ॥ ४ ॥ तस्य वीरस्य विक्रान्तैः सहस्रशतदक्षिणैः। अश्वमेधशतैरीजे धृतराष्ट्रो महामखैः ॥ ५ ॥ संप्रयुक्तासु कुन्त्या च माद्र्या च भरतर्षभ। जितत्रीस्तदा पाण्डुर्बभूव वनगोचरः ॥ ६ ॥ हित्वा प्रासादनिलयं शुभानि शयनानि च। अरण्यनित्यः सततं बभूव मृगयापरः ॥ ७ ॥ स चरन्दक्षिणं पार्श्वं रम्यं हिमवतो गिरेः। उवास गिरिपृष्ठेषु महाशालवनेषु च ॥ ८ ॥ रराज कुन्त्या माद्र्या च पाण्डुः सह वनेचरन्। करेणूनामिव मध्यस्थः श्रीमान् पौरन्दरो गजः ॥ ९ ॥ भारतं सह भार्य्याभ्यां खड्गबाणधनुर्धरम्। विचित्रकवचं वीरं परमास्त्रविदं नृपम् ॥ १० ॥ देवोऽयमित्यमन्यन्त चरन्तं वनवासिनः। तस्य कामांश्च भोगांश्च नरा नित्यमतन्द्रिताः। उपजह्रुर्वनान्तेषु धृतराष्ट्रेण चोदिताः ॥ ११ ॥ अथ पारसवीं कन्यां देवकस्य महीपतेः। रूपयौवनसम्पन्नां स शूरावापगासुतः ॥ १२ ॥ ततस्तु वरयित्वा तामानीय भरतर्षभः। विवाहं

कारयामास विदुरस्य महामतेः ॥ १३ ॥ तस्यां चोत्पादयामास विदुरः कुरुनन्दनः। पुत्रान् विनयसम्पन्नानात्मनः सदृशान् गुणैः ॥ १४ ॥

इत्यादिपर्वणि सम्भवपर्वणि विदुरपरिणये चतुर्दशाधिकशततोऽध्यायः ॥ ११४ ॥

—:•:—

वैशम्पायन उवाच। ततः पुत्रशतं जज्ञे गान्धार्य्यां जनमेजय। धृतराष्ट्रस्य वैश्यायामिकन्यापि शतात्परः ॥ १ ॥ पाण्डोः कुन्त्याञ्च माद्र्याञ्च पुत्राः पञ्च महारथाः। देवेभ्यः समपद्यन्त सन्तानाय कुलस्य वै ॥ २ ॥

जनमेजय उवाच। कथं पुत्रशतं जज्ञे गान्धार्य्यां द्विजसत्तम। कियता चैव कालेन तेषामायुश्च किंपरम् ॥ ३ ॥ कथं चैकः स वैश्यायां धृतराष्ट्रसुतोऽभवत्। कथञ्च सदृशीं भार्य्यां गान्धारीं धर्मचारिणीम्। आनुकूल्ये वर्त्तमानां धृतराष्ट्रोऽभ्यवर्त्तत ॥ ४ ॥ कथञ्च शप्तस्य सतः पाण्डोस्तेन महात्मना। समुत्पन्ना दैवतेभ्यः पुत्राः पञ्च महारथाः ॥ ५ ॥ एतद्विद्वन्यथान्यायं विस्तरेण तपोधन। कथयस्व न मे तृप्तिः कथ्यमानेषु बन्धुषु ॥ ६ ॥

वैशम्पायन उवाच। दुःखमाभिपरिप्लानं द्वैपायनमुपस्थितम्। तोषयामास गान्धारी व्यासस्तस्यै वरं ददौ ॥ ७ ॥ सा वव्रे सदृशं भर्त्तुः पुत्राणां शतमात्मनः। ततः कालेन सा गर्भं धृतराष्ट्रादयाग्रहीत् ॥ ८ ॥ सम्बत्सरद्वयं तन्तु गान्धारी गर्भमाहितम्। अप्रजा धारयामास ततस्तां दुःखमाविशत् ॥ ९ ॥ श्रुत्वा कुन्तीसुतं जातं बालार्कसमतेजसम्। उदरस्यात्मनः स्थैर्य्यं सुपलभ्यान्वचिन्तयत् ॥ १० ॥ अज्ञातं धृतराष्ट्रस्य यत्नेन

महता ततः। सोदरं घातयामास गान्धारी दुःखमूर्च्छिता ॥११॥ ततो जज्ञे मांसपेशी लोहाष्ठीलेव संहता। द्विवर्षसम्भृतां कुक्षौ तासुत्खष्टुं प्रचक्रमे ॥ १२ ॥ अथ द्वैपायनो ज्ञात्वा त्वरितः समुपागमत्। तां स मांसमयीं पेशीं ददर्श जयतां वरः ॥ १३॥ ततोऽब्रवीत् सौबलेयीं किमिदं ते चिकीर्षितम्। सा चात्मनो मतं सत्यं शशंस परमर्षये ॥ १४ ॥

गान्धार्युवाच। ज्येष्ठं कुन्तीसुतं जातं श्रुत्वा रविसमप्रभम्। दुःखेन परमेणेदमुदरं घातितं मया ॥ १५ ॥ शतञ्च किल पुत्राणां वितीर्णं मे त्वया पुरा। दृश्यञ्च मे मांसपेशी जाता पुत्रशताय वै ॥ १६ ॥

व्यास उवाच। एवमेतत् सौबलेयि नैतज्ज्ञात्वन्यथा भवेत्। वितथं नोक्तपूर्वं मे स्वैरेष्वपि कुतोऽन्यथा ॥ १७ ॥ हृतपूर्णं कुण्डशतं क्षिप्रमेव विधीयताम्। सुगुप्तेषु च देशेषु रक्षा चैव विधीयताम्। शीताभिरद्भिरष्ठीलामिमाञ्च परिषेचय ॥ १८ ॥

वैशम्पायन उवाच। सा सिच्यमाना त्वष्ठीला बभूव शतधा तदा। अङ्गुष्ठपर्वमात्राणां गर्भाणां शतमेव तु ॥ १९ ॥ एकाधिकशतं पूर्णं यथायोगं विशाम्यते। मांसपेश्यास्तदा राजन् क्रमशः कालपर्य्ययात् ॥ २० ॥ ततस्तांस्तेषु कुण्डेषु गर्भानवदधे तदा। सुगुप्तेषु देशेषु रक्षां चैव व्यदधात्ततः ॥ २१ ॥ शशंस चैव भगवान् कालेनैतावता पुनः। उद्घाटनीयान्येतानि कुम्भानीति च सौबलीम् ॥ २२ ॥ इत्युक्त्वा भगवान् व्यासस्तथा प्रतिनिधाय च। जगाम तपसे धीमान् हिमवन्तं शिलोच्चयम् ॥२३॥ जज्ञे क्रमेण चैतेन तेषां दुर्य्योधनो नृपः। जन्मतस्तु प्रमाणेन ज्येष्ठो राजा युधिष्ठिरः ॥ २४ ॥ तदाख्यातन्तु भीष्माय विदुराय च धीमते। यस्मिन्नहनि दुर्धर्षो जज्ञे दुर्य्योधनस्तदा। तस्मिन्नेव महाबाहुर्जज्ञे भीमोऽपि वीर्य्यवान् ॥ २५ ॥ स जात-

मात्र एवाथ धृतराष्ट्रसुतो नृप। रासभारावसदृशं रुराव च ननाद च॥ २६॥ तं खराः प्रत्यभाषन्त गृध्रगोमायुवायसाः। वाताश्च प्रववुश्चापि दिग्दाहश्चाभवत्तदा॥ २७॥ ततस्तु भीतवद्राजा धृतराष्ट्रोऽब्रवीदिदम्। समानीय बहून् विप्रान् भीष्मं विदुरमेव च॥ २८॥ अन्यांश्च सुहृदो राजन् कुरून् सर्वांस्तथैव च। युधिष्ठिरो राजपुत्रो ज्येष्ठो नः कुलवर्द्धनः। प्राप्तः स्वगुणतो राज्यं न तस्मिन् वाच्यमस्ति नः॥ २९॥ अयं त्वनन्तरस्तस्मादपि राजा भविष्यति। एतद्धि ब्रूत मे तथ्यं यदत्र भविता ध्रुवम्॥ ३०॥ वाक्यस्यैतस्य निधने दिक्षु सर्वासु भारत। क्रव्यादाः प्राणदन् घोरा शिवाश्चाग्निवर्णसिनः॥ ३१॥ लक्षयित्वा निमित्तानि तानि घोराणि सर्वशः। तेऽब्रुवन् ब्राह्मणा राजन् विदुरश्च महामतिः॥ ३२॥ यथेमानि निमित्तानि घोराणि मनुजाधिप। जल्पितानि सुते ज्येष्ठे तानि ते पुरुषर्षभ॥ ३३॥ व्यक्तं कुलान्तकरणो भवितैष सुतस्तव। तस्य शान्तिः परित्यागे गुप्तावपनयो महान्॥ ३४॥ शतमेकोनमप्यस्तु पुत्राणां ते महीपते। त्यजैनमेकं शान्तिं चेत् कुलस्येच्छसि भारत। एकेन कुरु वै चेमं कुलस्य जगतस्तथा॥ ३५॥ त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्। ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्॥ ३६॥ स तथा विदुरेणोक्तश्च सर्वैर्द्विजोत्तमैः। न चकार तथा राजा पुत्रस्नेहसमन्वितः॥ ३७॥ ततः पुत्रशतं पूर्णं धृतराष्ट्रस्य पार्थिव। मासमात्रेण संजज्ञे कन्या चैका शताधिका॥ ३८॥ गान्धार्यां क्लिश्यमानायामुदरेण विवर्द्धता। धृतराष्ट्रं महाराजं वैश्या पर्य्यचरत्किल॥ ३९॥ तस्मिन् सम्बत्सरे राजन् धृतराष्ट्रान्महायशाः। जज्ञे धीमांस्ततस्तस्यां युयुत्सुः करणो नृप॥ ४०॥ एवं पुत्रशतं जज्ञे धृतराष्ट्रस्य धीमतः। महारथानां वीराणां

कन्या चैका शतादिका। युयुत्सुश्च महातेजा वैश्यापुत्रः प्रतापवान्॥ ४१॥

इत्यादिपर्वणि सम्भवपर्वणि गान्धारीपुत्रोत्पत्तौ पञ्चदशाधिकशततोऽध्यायः॥ ११५॥

जनमेजय उवाच। धृतराष्ट्रस्य पुत्राणामादितः कथितं त्वया। ऋषेः प्रसादात्तु शतं न च कन्या प्रकीर्तिता॥ १॥ वैश्यापुत्रो युयुत्सुश्च कन्या चैका शताधिका। गान्धारराजदुहिता शतपुत्रेति चानघ॥ २॥ उक्ता महर्षिणा तेन व्यासेनामिततेजसा। कथं त्विदानीं भगवन् कन्यां त्वं तु ब्रवीषि मे॥ ३॥ यदि भागशतं पेश्यो कृता तेन महर्षिणा। न प्रजास्यति चेद्भूयः सौबलेयी कथञ्चन॥ ४॥ कथन्तु सम्भवस्तस्या दुःशलाया वदस्व मे। यथावद्द्विज विप्रर्षे परं मेऽत्र कुतूहलम्॥ ५॥

वैशम्पायन उवाच। साध्वयं प्रश्न उद्दिष्टः पाण्डवेय ब्रवीमि ते। तां मांसपेश्यीं भगवान् स्वयमेव महातपाः॥ ६॥ घृताभिरद्भिरासिच्य भागं भागमकल्पयत्। यो यया कल्पितो भागस्तं धात्रा तथा नृप। धृतपूर्णेषु कुम्भेषु एकैकं प्राक्षिपत्तदा॥ ७॥ एतस्मिन्नन्तरे साध्वी गान्धारी सुदृढव्रता। दुहितुः स्नेहसंयोगमनुध्याय वराङ्गना॥ ८॥ मनसाचिन्तयद्देवी एतत् पुत्रशतं मम। भविष्यति न सन्देहो न ब्रवीत्यन्यथा मुनिः॥ ९॥ ममेयं परमा तुष्टिर्दुहिता मे भवेद्यदि। एका शताधिका बाला भविष्यति कनीयसी॥ १०॥ ततो दौहित्रजाल्लोकादवाच्योऽसौ यतिर्मम। अधिका किल नारीणां प्रीतिर्ज्ञातिजा भवेत्॥ ११॥ यदि नाम ममापि स्याद्दुहितैका शताधिका। कृतकृत्या भवेयं वै पुत्रदौहित्रसंवृता॥ १२॥ यदि सत्यं तपस्तप्तं

दत्तं वाप्यथ वा हुतम् । गुरवस्तोषिता वापि तथास्तु दुहिता मम ॥ १३ ॥ एतस्मिन्नेव काले तु कृष्णद्वैपायनः स्वयम् । ध्यमज्जत्स तदा पैत्र्यीं भगवानृषिसत्तमः । गणयित्वा शतं पूर्णमंशानामाह सौबलीम् ॥ १४ ॥

व्यास उवाच । पूर्णं पुत्रशतं त्वेतन्न मिथ्या वागुदाहृता । दौहित्रयोगाय भाग एकः शिष्टः शतात्परः ॥ १५ ॥ एषा ते सुभगा कन्या भविष्यति यथेप्सिता । ततोऽन्यं हतकुल्यञ्च समानाय्य महातपाः ॥ १६ ॥ तच्चापि प्राक्षिपत्तत्र कन्याभागं तपोधनः । एतत्ते कथितं राजन् दुःशलाजन्म भारत । ब्रूहि राजेन्द्र किम्भूयो कीर्त्तयिष्यामि तेऽनघ ॥ १७॥

इत्यादिपर्वणि सम्भवपर्वणि दुःशलोत्पत्तौ षोड़शाधिकशततोऽध्यायः ॥ ११६ ॥

—:*:—

जनमेजय उवाच । ज्येष्ठानुज्येष्ठतां तेषां नामानि च पृथक् पृथक् । धृतराष्ट्रस्य पुत्राणामानुपूर्व्या प्रकीर्त्तय ॥ १ ॥

वैशम्पायन उवाच । दुर्य्योधनो युयुत्सुश्च राजा दुःशासनस्तथा । दुःसहो दुःशलश्चैव जलसन्धः समः सहः ॥ २ ॥ विन्दानुविन्दौ दुर्धर्षः सुबाहुर्दुष्प्रधर्षणः । दुर्मर्षणो दुर्मुखश्च दुष्कर्णः कर्ण एव च ॥ ३ ॥ विविंशतिर्विकर्णश्च शलः सत्त्वः सुलोचनः । चित्रोपचित्रौ चित्राक्षश्चारुचित्रः शरासनः ॥ ४ ॥ दुर्मदो दुर्विमोचश्च विवित्सुर्विकटाननः । ऊर्णनाभः सुनाभश्च तथा नन्दोपनन्दकौ ॥ ५ ॥ चित्रवाणश्चित्रवर्मा सुवर्मा दुर्विमोचनः । अयोवाहुर्महावाहुश्चित्राङ्गश्चित्रकुण्डलः ॥ ६ ॥ भीमवेगो भीमबलो बलाकी बलवर्द्धनः । उग्रायुधः सुषेणश्च भीमकर्मा महो-

दरः ॥ ७ ॥ चित्रायुधो निषङ्गी च पाशी वृन्दारकस्तथा। दृढवर्मा दृढक्षत्रः सोमकीर्त्तिरनूदरः ॥ ८ ॥ दृढसन्धो जरासन्धः सत्यसन्धः सदःसुवाक्। उग्रश्रवा उग्रसेनः सेनानीर्दुष्पराजयः ॥ ९ ॥ अपराजितः कुण्डशायी विशालाक्षो दुराधरः। दृढहस्तः सुहस्तश्च वातवेगसुवर्च्चसौ ॥ १० ॥ आदित्यकेतुर्बह्वाशी नागदत्तोग्रयाय्यपि। कवची क्रथनः कुण्डी कुण्डधारो धनुर्द्धरः ॥ ११ ॥ उग्रभीमरथौ वीरौ वीरबाहुरलोलुपः। अभयो रौद्रकर्म्मा च तथा दृढरथाश्रयः ॥ १२ ॥ अनाधृष्यः कुण्डभेदी विरावी चित्रकुण्डलः। प्रमथश्च प्रमाथी च दीर्घरोमश्च वीर्य्यवान् ॥१३॥ दीर्घबाहुर्महाबाहुर्व्यूढोरुः कनकध्वजः। कुण्डाशी विरजाश्चैव दुःशला च शतादिका ॥ १४ ॥ इति पुत्राश्शतं राजन् कन्या चैव शतादिका। नामधेयानुपूर्व्येण विद्धि जन्मक्रमं नृप ॥ १५ ॥ सर्वे त्वतिरथाः शूराः सर्वे युद्धविशारदाः। सर्वे वेदविदश्चैव सर्वे सर्वास्त्रकोविदाः ॥ १६ ॥ सर्वेषामनुरूपाश्च कृता दारा महीपते। धृतराष्ट्रेण समये परोक्ष्य विधिवन्नृप। १७ ॥ दुःशलां चापि समये धृतराष्ट्रो नराधिपः। जयद्रथाय प्रददौ विधिना भरतर्षभ ॥ १८ ॥

इत्यादिपर्वणि सम्भवपर्वणि धृतराष्ट्रपुत्रनामकथने सप्तदशाधिकशततोऽध्यायः ॥ ११७ ॥

—०:०—

जनमेजय उवाच। कथितो धार्त्तराष्ट्राणामार्ष्यः सम्भवः उत्तमः। अमनुष्यो मनुष्याणां भवता ब्रह्मवादिना ॥ १ ॥ नामधेयानि चाप्येषां कथ्यमानानि भागशः। त्वत्तः श्रुतानि मे ब्रह्मन् पाण्डवानाञ्च कीर्त्तय ॥ २ ॥ ते हि सर्वे महात्मानो

देवराजपराक्रमाः । त्वयैवांशावतरणे देवभागाः प्रकीर्त्तिताः ॥३॥ एतदिच्छाम्यहं श्रोतुमतिमानुषकर्मणाम् । तेषामाजननं सर्वं वैशम्पायन कीर्त्तय ॥ ४ ॥

वैशम्पायन उवाच । राजा पाण्डुर्महारण्ये मृगव्यालनिषेविते । चरन्मैथुनधर्मस्थं ददर्श मृगयूथपम् ॥ ५ ॥ ततस्तान्मृगीं तच्च रुक्मपुङ्खैः सुपत्त्रिभिः । निर्विभेद शरैस्तीक्ष्णैः पाण्डुः पञ्चभिरायुधैः ॥ ६ ॥ स च राजन्महातेजा ऋषिपुत्रस्तपोधनः । भार्य्यया सह तेजस्वी मृगरूपेण सङ्गतः ॥ ७ ॥ संसक्तश्च तया मृग्या मानुषीमीरयन् गिरम् । क्षणेन पतितो भूमौ विलपन्नाकुलेन्द्रियः ॥ ८ ॥

मृग उवाच । काममन्युपरीता हि बुद्धा विरहिता अपि । वर्जयन्ति कृशंसानि पापेष्वपि रता नराः ॥ ९ ॥ न विधिं ग्रसते प्रज्ञा प्रज्ञान्तु ग्रसते विधिः । विधिपर्य्यागतानर्थान् प्राज्ञो न प्रतिपद्यते ॥ १० ॥ अप्रशस्तमात्मनां मुख्ये कुले जातस्य भारत । कामलोभाभिभूतस्य कथं ते चलिता मतिः ॥ ११ ॥

पाण्डुरुवाच । शत्रूणां या वधे वृत्तिः सा मृगाणां वधे स्मृता । राज्ञां मृग न मां मोहात्त्वं गर्हयितुमर्हसि ॥ १२ ॥ अच्छद्मना मायया च मृगाणां वध इष्यते । स एव धर्मो राज्ञान्तु तद्धि त्वं किं नु गर्हसे ॥ १३ ॥ अगस्त्यः सत्रमासीनयजत मृगया-मृषिः । आरण्यान् सर्वदैवत्यान्मृगान् प्रोक्ष्य महावने ॥ १४ ॥ प्रमाणदृष्टधर्मेण कथमस्मान्विगर्हसे । अगस्त्यस्याभिचारेण युष्मा-कञ्च वपा हुता ॥ १५ ॥

मृग उवाच । न रिपून्वै समुद्दिश्य विमुञ्चन्ति नराः शरान् । रन्ध्र एषां विशेषेण वधकालः प्रशस्यते ॥ १६ ॥

पाण्डुरुवाच । प्रमत्तमप्रमत्तं वा विवृतं घ्नन्ति चौजसा । उपायैर्विविधैस्तीक्ष्णैः कस्मान्मृग विगर्हसे ॥ १७ ॥

मृग उवाच। नाहं घ्नन्तं मृगान् राजन्विगर्हे चात्मकारणात्। मैथुनन्तु प्रतीच्छं मे त्वयेहाद्यातृशंसतः ॥ १८ ॥ सर्वभूतहिते काले सर्वभूतस्पृहे तथा। को हि विद्वान्मृगं हन्यात्स्वरन्तं मैथुनं वने ॥ १९ ॥ अस्यां चर्यायाञ्च राजेन्द्र हर्षान्मैथुनमाचरम्। पुरुषार्थफलं कर्त्तुं तत्त्वया विफलीकृतम् ॥ २० ॥ पौरवाणां महाराज तेषामक्लिष्टकर्मणाम्। वंशे जातस्य कौरव्य नानुरूपमिदं तव ॥ २१ ॥ नृशंसं कर्म सुमहत्सर्वलोकविगर्हितम्। अस्वर्ग्यं मयस्यं चाप्यधर्मिष्ठञ्च भारत ॥ २२ ॥ स्त्रीभोगानां विशेषज्ञः शास्त्रधर्मार्थतत्त्ववित्। नार्हस्त्वं सुरसङ्काश कर्तुमस्वर्ग्यमीदृशम् ॥ २३ ॥ त्वया नृशंसकर्त्तारः पापाचाराश्च मानवाः। निगृह्याः पार्थिवश्रेष्ठ त्रिवर्गपरिवर्जिताः ॥ २४ ॥ किं कृतं ते नरश्रेष्ठ मामिहानागसं घ्नता। मुनिं मूलफलाहारं मृगवेषधरं नृप ॥ २५ ॥ वसमानमरण्येषु नित्यं शमपरायणम्। त्वयाहं क्षिप्तितो यस्मात्तस्मात्वामप्यहं शपे ॥ २६ ॥ द्वयोर्नृशंसकर्त्तारमवशं काममोहितम्। जीवितान्तकरो भाव एवमेवागमिष्यति ॥ २७ ॥ अहं हि किन्दमो नाम तपसा भावितो मुनिः। व्यपत्रपन्मनुष्याणां चर्यां मैथुनमाचरम् ॥ २८ ॥ मृगो भूत्वा मृगैः सार्द्धं चरामि गहने वने। न तु ते ब्रह्महत्येयं भविष्यत्यविजानतः ॥ २९ ॥ मृगरूपधरं हत्वा मामेवं काममोहितम्। अस्य तु त्वं फलं मूढ प्राप्स्यसीदृशमेव हि ॥ ३० ॥ प्रियया सह संवासं प्राप्य कामविमोहितः। त्वमप्यस्यामवस्थायां प्रेतलोकं गमिष्यसि ॥ ३१ ॥ अन्तकाले हि संवासं यया गन्तासि कान्तया। प्रेतराजपुरं प्राप्तं सर्वभूतदुरत्ययम्। भक्त्या मतिमतां श्रेष्ठ सैव त्वानुगमिष्यति ॥ ३२ ॥ वर्त्तमानः सुखे दुःखं यया त्वं प्रापितस्त्वया। तया त्वाञ्च सुखं प्राप्तं दुःखमप्यागमिष्यति ॥ ३३ ॥

वैशम्पायन उवाच । एवमुक्त्वा सुदुःखार्त्तो जीवितान्त व्यमुच्यत । मृगः पाण्डुश्च दुःखार्त्तः क्षणेन समपद्यत ॥ ३४ ॥

इत्यादिपर्वणि सम्भवपर्वणि पाण्डुमृगशापेऽष्टादशाधिकशततोऽध्यायः ॥ ११८ ॥

वैशम्पायन उवाच । तं व्यतीतमतिक्रम्य राजा स्वमिव बान्धवम् । सभार्य्यः शोकदुःखार्तः पर्य्यदेवयदातुरः ॥ १ ॥

पाण्डुरुवाच । सतामपि कुले जाताः कर्मणा वत दुर्गतिम् । प्राप्नुवन्त्यकृतात्मानः कामजालविमोहिताः ॥ २ ॥ यच्चधर्मात्मना जातो बाल एव पिता मम । जीवितान्तमनुप्राप्तः कामात्मैवेति नः श्रुतम् ॥ ३ ॥ तस्य कामात्मनः चेत्रे राज्ञः संयतवाग्ऋषिः । कृष्णद्वैपायनः साक्षाद्भगवान्नाममजीजनत् ॥ ४ ॥ तस्माद्य व्यसने बुद्धिः सञ्जातेयं ममाधमा । त्यक्तस्य देवैरनयान् मृगयां परिधावतः ॥ ५ ॥ मोक्षमेव व्यवस्यामि बन्धो हि व्यसनं महत् । स्वदृत्तिमनुवर्त्तिष्ये तामहं पितुरव्ययाम् ॥ ६ ॥ अतीव तपसात्मानं योजयिष्याम्यसंशयम् । तस्मादेकोऽहमेकाकी एकैकस्मिन्वनस्पतौ । चरन् भैक्ष्यं मुनिर्मुण्डश्चरिष्यामाश्रमानिमान् ॥ ७ ॥ पांशुना समवच्छन्नः शून्यागारकृतालयः । वृक्षमूलनिकेतो वा त्यक्तसर्वप्रियाप्रियः ॥ ८ ॥ न शोचन्न प्रहृष्यंश्च तुल्यनिन्दात्मसंस्तुतिः । निराशीर्निर्नमस्कारो निर्द्वन्द्वो निष्परिग्रहः ॥ ९ ॥ न चाप्यवहसन् कञ्चिन्न कुर्वन् भ्रूकुटीं क्वचित् । प्रसन्नवदनो नित्यं सर्वभूतहिते रतः ॥ १० ॥ जङ्गमाजङ्गमं सर्वमविहिंसंश्चतुर्विधम् । स्वासु प्रजास्विव सदा समः प्राणभृतः प्रति ॥ ११ ॥ एककालञ्चरन् भैक्ष्यं कुलानि दश पञ्च वा । असम्भवे वा भैक्ष्यस्य चरन्नशनान्यपि । अल्पमल्पञ्च भुञ्जानः

पूर्वलाभे न जातु चित्॥ १२॥ अन्यानविचरन् लोभाद्लाभे सप्त पूरयन्। अलाभे यदि वा लाभे समदर्शी महातपाः॥१३। वास्यैकं तक्षतो बाहुं चन्दनेनैकमुक्षतः। नाकल्याणं न कल्याणं चिन्तयन्नभयोस्तयोः॥ १४॥ न जिजीविषुवत्किञ्चिन्न सुमूर्षुवदाचरन्। जीवितं मरणञ्चैव नाभिनन्दन्न च द्विषन्॥ १५॥ याः काश्चिज्जीवता यज्ञाः कर्तुमध्वर्यवक्रियाः। ताः सर्वाः समतिक्रम्य निमेषादिष्ववस्थिताः। १६॥ तासु चाप्यनवस्थासु त्यक्तसर्वेन्द्रियक्रियः। संपरित्यक्तधर्मार्थः सुनिर्विण्णात्मकल्मषः॥ १७॥ निर्मुक्तः सर्वपापेभ्यो व्यतीतः सर्ववागुराः। न वध्ये कस्यचित्तिष्ठन् स्वधर्मान्मातरिश्वनः॥ १८॥ एतया सततं वृत्त्या चरन्नेवंप्रकारया। देहं संस्थापयिष्यामि निर्भयं मार्गमास्थितः॥ १९॥ नाहं सुकृपणे मार्गे स्ववीर्य्यक्षयशोचिते। स्वधर्मात् सततोपेते चरेयं वीर्य्यवर्जितः॥ २०॥ सत्कृतोऽसत्कृतो वापि योऽन्यं कृपणचक्षुषा। उपैति वृत्तिं कामात्मा स मुनां वर्त्तते पथि॥ २१॥

वैशम्पायन उवाच। एवमुक्त्वा सुदुःखार्त्तो निश्वासपरमो नृपः। अवेक्षमाणः कुन्तीञ्च माद्रीञ्च समभाषत॥२२॥ कौशल्या विदुरः क्षत्ता राजा च सह बन्धुभिः। आर्य्या सत्यवती भीष्मस्ते च राजपुरोहिताः॥ २३॥ ब्राह्मणाश्च महात्मानः सोमपाः शंसितव्रताः। पौरवृद्धाश्च ये तत्र निवसन्त्यस्मदाश्रयाः। प्रसाद्य सर्वे वक्तव्याः पाण्डुः प्रव्रजितो वनम्॥ २४॥ निशम्य वचनं भर्त्तुर्वनवासे धृतात्मनः। तत्क्षमं वचनं कुन्ती माद्री च समभाषताम्॥ २५॥ अन्येपि ह्याश्रमाः सन्ति ये शक्या भरतर्षभ। आवाभ्यां धर्मपत्नीभ्यां सह तप्तुं तपो महत्॥ २६॥ शरीरस्यापि मोक्षाय स्वर्गप्राप्य महाफलम्। त्वमेव भविता भर्त्ता स्वर्गस्यापि न संशयः॥ २७॥ प्रणिधायेन्द्रियग्रामं भर्तृलोक-

परायणे। त्यक्त्वा कामसुखे ह्यावां तप्स्यावो विपुलं तपः ॥२८॥ यदि चावां महाप्राज्ञ त्यक्ष्यसि त्वं विशाम्पते। अद्यैवावां प्रहास्यावो जीवितं नात्र संशयः ॥ २९ ॥

पाण्डुरुवाच। यदि व्यवसितं ह्येतद्युवयोर्धर्मसंहितम्। स्ववृत्तिमनुवर्त्तिष्ये तामहं पितुरव्ययाम् ॥ ३० ॥ त्यक्त्वा ग्राम्यसुखाहारं तप्यमानो महत्तपः। वल्कली फलमूलाशी चरिष्यामि महावने ॥ ३१ ॥ अग्नौ जुह्वदुभौ कालावुभौ कालावुपस्पृशन्। क्षपः परिमिताहारश्चीरचर्मजटाधरः ॥ ३२ ॥ शीतवातातपसहः क्षुत्पिपासानवेक्षकः। तपसा दुश्चरेणेह शरीरमुपशोषयन् ॥ ३३ ॥ एकान्तशीलो विहरन् पक्षाप्रक्षेण वर्त्तयन्। पितॄन्देवांश्च वन्येन वाग्भिरद्भिश्च तर्पयन् ॥ ३४ ॥ वानप्रस्थजनस्यापि दर्शनं कुलवासिनाम्। नाप्रियाण्याचरिष्यामि किमुनर्ग्रामवासिनाम् ॥ ३५ ॥ एवमारण्यकाख्यानमुग्रमुग्रतरं विधिम्। काङ्क्षमाणोऽहमास्थास्ये देहस्यास्य समापनात् ॥ ३६ ॥

वैशम्पायन उवाच। इत्येवमुक्त्वा भार्ये ते राजा कौरवनन्दनः। ततश्चूडामणिं निष्कमङ्गदे कुण्डलानि च ॥ ३७ ॥ वासांसि च महार्हाणि स्त्रीणामाभरणानि च। प्रदाय सर्वं विप्रेभ्यः पाण्डुः पुनरभाषत ॥ ३८ ॥ गत्वा नागपुरं वाच्यं पाण्डुः प्रव्रजितो वनम्। अर्थं कामं सुखञ्चैव रतिञ्च परमाम्बिकाम् ॥ ३९ ॥ प्रतस्थे सर्वमुत्सृज्य सभार्यः कुरुनन्दनः। ततस्तस्यानुयातारस्ते चैव परिचारिकाः ॥ ४० ॥ श्रुत्वा भरतसिंहस्य विविधाः करुणा गिरः। भीममार्त्तस्वरं कृत्वा हाहेति परिचुक्रुशुः ॥ ४१ ॥ क्षणमश्रु विमुञ्चन्तस्तं विहाय महीपतिम्। ययुर्नागपुरं तूर्णं सर्वमादाय तद्धनम् ॥ ४२ ॥ ते गत्वा नगरं राज्ञो यथावृत्तं महावने। कथयाञ्चक्रिरे राज्ञस्तद्धनं विविधं ददुः ॥ ४३ ॥ श्रुत्वा तेभ्यस्ततः सर्वं यथावृत्तं महावने। धृत-

राष्ट्रो नरश्रेष्ठ. पाण्डुमेवान्वशोचत ॥ ४४ ॥ न ह्यस्यासनभोगेषु रतिं विन्दति कर्हिचित्। भ्रातृशोकसमाविष्टस्तमेवार्थं विचिन्तयन् ॥ ४५ ॥ राजपुत्रस्तु कौरव्यः पाण्डुर्मूलफलाशनः। जगाम सह पत्नीभ्यां ततो नागशतं गिरिम् ॥ ४६ ॥ स चैत्ररथ मासाद्य कालकूटमतीत्य च। हिमवन्तमतिक्रम्य प्रययौ गन्धमादनम् ॥ ४७ ॥ रक्ष्यमाणो महाभूतैः सिद्धैश्च परमर्षिभिः। उवास स महाराज समेषु विषमेषु च॥ ४८ ॥ इन्द्रद्युम्नसरः प्राप्य हंसकूटमतीत्य च। शतशृङ्गे महाराज तापसः समतप्यत ॥४९॥

इत्यादिपर्वणि सम्भवपर्वणि पाण्डुचरिते जनविंश-
त्यधिकशततोऽध्यायः ॥ ११९ ॥

वैशम्पायन उवाच। तत्रापि तपसि श्रेष्ठे वर्त्तमानः स वीर्य्यवान्। सिद्धचारणसंघानां बभूव प्रियदर्शनः ॥१॥ शुश्रूषुरनहंवादी संयतात्मा जितेन्द्रियः। स्वर्गं गन्तुं पराक्रान्तः स्वेन वीर्य्येण भारत ॥ २ ॥ केषाञ्चिद्भवङ्भ्राता केषाञ्चिद्भवत्सखा। ऋषयस्त्वपरे चैनं पुत्रवत्परिपालयन् ॥ ३ ॥ स तु कालेन महता प्राप्य निष्कल्मषं तपः। ब्रह्मर्षिसदृशः पाण्डुर्बभूव भरतर्षभ ॥४॥ अमावास्यान्तु सहिता ऋषयः संशितव्रताः। ब्रह्माणं द्रष्टुकामास्ते सम्मतस्युर्महर्षयः ॥ ५ ॥ सम्प्रयातानृषीन्दृष्ट्वा पाण्डुर्वचनमब्रवीत्। भवन्तः क्व गमिष्यन्ति ब्रूत मे वदतांवराः ॥ ६ ॥

ऋषय ऊचुः। समवायो महानद्य ब्रह्मलोके महात्मनाम्। देवानाञ्च ऋषीणाञ्च पितॄणाञ्च महात्मनाम्। वयं तत्र गमिष्यामो द्रष्टुकामाः स्वयम्भुवम् ॥ ७ ॥

वैशम्पायन उवाच। पाण्डुरुत्थाय सहसा गन्तुकामो मह-

र्षिभिः। स्वर्गपारं तितीर्षुः स शतशृङ्गादुदङ्मुखः। प्रतस्थे सह पत्नीभ्यामब्रुवंस्तञ्च तापसाः॥ ८॥ ऊर्ध्वं पर्व्वतपरि गच्छन्तः शैलराजमुदङ्मुखाः। दृष्टवन्तो गिरौ रम्ये दुर्गान् देशान् बहून् वयम् ॥९॥ विमानशतसञ्चाधां गीतस्वरनिनादिताम्। आक्रीड़भूमिं देवानां गन्धर्वाप्सरसां तथा॥ १०॥ उद्यानानि कुवेरस्य समानि विषमाणि च। महानदीर्नितम्बांश्च गहनान् गिरिगह्वरान्॥ ११॥ सन्ति नित्यहिमा देशा निर्दृश्यमृगपक्षिणः। सन्ति क्वचिन्महादर्व्यो दुर्गाः केचिद्दुरासदाः॥ १२॥ नातिक्रमेत पक्षी यान् कुत एवेतरे मृगाः। वायुरेको हि यात्यत्र सिद्धाश्च परमर्षयः॥ १३॥ गच्छन्त्यौ शैलराजेऽस्मिन् राजपुत्र्यौ कथं त्विमे। न सीदेतामदुःखार्हे मागमो भरतर्षभ॥ १३॥

पाण्डुरुवाच। अप्रजस्य महाभागा न द्वारं परिचक्षते। स्वर्गे तेनाभितप्तोऽहमप्रजस्तु ब्रवीमि वः॥ १४॥ पित्र्यादृणादृनिर्मुक्तस्तेन तप्ये तपोधनाः। देहनाशे ध्रुवो नाशः पितृणामेष निश्चयः॥ १५॥ ऋणैश्चतुर्भिः संयुक्ता जायन्ते मानवा भुवि। पितृदेवर्षिमनुजैर्देयं तेभ्यश्च धर्मतः॥ १६॥ एतानि तु यथाकालं यो न बुध्यति मानवः। न तस्य लोकाः सन्तीति धर्मविद्भिः प्रतिष्ठितम्॥ १७॥ यज्ञैस्तु देवान् प्रीणाति स्वाध्यायतपसा मुनीन्। पुत्रैः श्राद्धैः पितॄंश्चापि आनृशंस्येन मानवान्॥ १८॥ ऋषिदेवमनुष्याणां परिमुक्तोऽस्मि धर्मतः। त्रयाणामितरेषान्तु नाश आत्मनि नश्यति॥ १९॥ पित्र्यादृणादनिर्मुक्त इदानीमस्मि तापसाः। इह तस्मात्प्रजाहेतोः प्रजायन्ते नरोत्तमाः॥ २०॥ यथैवाहं पितुः क्षेत्रे जातस्तेन महर्षिणा। तथैवास्मिन्मम क्षेत्रे कथं वै सम्भवेत् प्रजा॥ २१॥

ऋषय ऊचुः। अस्ति वै तव धर्मात्मन्विद्मो देवोपमं शुभम्। अपत्यमनघं राजन्त्वयं दिव्येन चक्षुषा॥ २२॥ देवोदृष्टं नर-

व्याघ्र कर्मणोहोपपादय। अक्लिष्टं फलमव्ययो विन्दते बुद्धि-मान्नरः ॥ २३ ॥ तस्मिन्दृष्टे फले राजन् प्रयत्नं कर्तुमर्हसि। अपत्यं गुणसम्पन्नं लब्ध्वा प्रीतिकरं ह्यसि ॥ २४ ॥

वैशम्पायन उवाच। तच्छ्रुत्वा तापसवचः पाण्डुश्चिन्तापरोऽभवत्। आत्मनो दृगशापेन जानन्नुपहतां क्रियाम् ॥ २५ ॥ सोऽब्रवीद्विजने कुन्तीं धर्मपत्नीं यशस्विनीम्। अपत्योत्पादने यत्नमापदि त्वं समर्थय ॥ २६ ॥ अपत्यं नाम लोकेषु प्रतिष्ठा धर्मसंहिता। इति कुन्ति विदुर्वीराः शाश्वतं धर्मवादिनः ॥२७॥ इष्टं दत्तं तपस्तप्तं नियमश्च स्वनुष्ठितः। सर्वमेवानपत्यस्य न पावनमिहोच्यते ॥ २८ ॥ सोऽहमेवं विदित्वैतत् प्रपश्यामि शुचिस्मिते। अनपत्यः शुभाल्लोकान्न प्राप्स्यामीति चिन्तयन् ॥ २९ ॥ दृगभिशापान्नष्टं मे जननं ह्यकृतात्मनः। नृशंसकारिणो भीरु यथैवोपहतं पुरा ॥ ३० ॥ इमे वै बन्धुदायादाः षट्पुत्रा धर्म-दर्शने। षड्वाबन्धुदायादाः पुत्रास्तान् शृणु मे पृथे ॥ ३१ ॥ स्वयं जातः प्रणीतश्च परिक्रीतश्च यः सुतः। पौनर्भवश्च कानीनः स्वैरिण्यां यश्च जायते ॥ ३२ ॥ दत्तः क्रीतः कृत्रिमश्च उपगच्छेत् स्वयञ्च यः। सहोढो ज्ञातिरेताश्च हीनयोनिष्टतश्च यः ॥ ३३ ॥ पूर्वपूर्वतमाभावे मत्वा लिप्सेत वै सुतम्। उत्तमाद्देवरात् पुंसः काङ्क्षन्ते पुत्रमापदि ॥ ३४ ॥ अपत्यं धर्मफलदं श्रेष्ठं विन्दन्ति मानवाः। आत्मशुक्रादपि पृथे मनुः स्वायम्भुवोऽब्रवीत् ॥ ३५ ॥ तस्मात् प्रहेष्याम्यद्य त्वां हीनः प्रजननात् स्वयम्। सदृशाच्छ्रेयसो वा त्वं विद्ध्यपत्यं यशस्विनम् ॥ ३६ ॥ शृणु कुन्ति कथामेतां शारद्वतायनीं प्रति। सा वीरपत्नी गुरुणा नियुक्ता पुत्रजन्मनि ॥ ३७ ॥ पुष्पेण प्रयता स्नाता निशि कुन्ति चतुर्थके। वरयित्वा द्विजं सिद्धं ज्ञात्वा पुंसवनेऽनलम् ॥ ३८ ॥ कर्मण्यवसिते तस्मिन् सा तेनैव सहावसत्। तत्र तीन् जनयामास दुर्जया-

दीन्यहारयान् ॥३९॥ तथा त्वमपि कल्याणि ब्राह्मणात् तपसाधिकात्। मन्नियोगाद्यत क्षिप्रमपत्योत्पादनं प्रति ॥ ४० ॥

इत्यादिपर्वणि सम्भवपर्वणि पाण्डुपृथासंवादे
विंशत्यधिकशततोऽध्यायः ॥ १२० ॥

वैशम्पायन उवाच। एवमुक्ता महाराज कुन्ती पाण्डुमभाषत। कुरूणामृषभं वीरं तदा भूमिपतिं पतिम् ॥ १ ॥ न मामर्हसि धर्मज्ञ वक्तुमेवं कथञ्चन। धर्मपत्नीमभिरतां त्वयि राजीवलोचने ॥ २ ॥ त्वमेव तु महाबाहो मय्यपत्यानि भारत। वीर वीर्योपपन्नानि धर्मतो जनयिष्यसि ॥ ३ ॥ स्वर्गं मनुजशार्दूल गच्छेयं सहिता त्वया। अपत्याय च मामुच्छ त्वमेव कुरुनन्दन ॥ ४ ॥ न ह्यहं मनसाप्यन्यं गच्छेयं त्वदृते नरम्। त्वत्तः प्रतिविशिष्टश्च कोऽन्योऽस्ति भुवि मानवः ॥ ५ ॥ इमाश्च तावद्धर्मात्मन् पौराणीं शृणु मे कथाम्। परिश्रुतां विशालाक्ष कीर्त्तयिष्यामि यामहम् ॥ ६ ॥ व्युषिताश्व इति ख्यातो बभूव किल पार्थिवः। पुरा परमधर्मिष्ठः पूरोर्वंशविवर्द्धनः ॥ ७ ॥ तस्मिंश्च यजमाने वै धर्मात्मनि महाभुजे। उपागमंस्ततो देवाः सेन्द्रा देवर्षिभिः सह ॥ ८ ॥ अमावसिन्द्रः सोमेन दक्षिणाभिर्द्विजातयः। व्युषिताश्वस्य राजर्षेस्ततो जज्ञे महात्मनः। देवा ब्रह्मर्षयश्चैव चक्रुः कर्म स्वयं तदा ॥ ९ ॥ व्युषिताश्वस्ततो राजन्नतिमर्त्यान् व्यरोचत। सर्वभूतान् प्रति यथा तपनः शिशिरात्यये ॥ १० ॥ स विजित्य गृहीत्वा च नृपतीन्राजसत्तम। प्राच्यानुदीच्यान् पाश्चात्यान् दाक्षिणात्यानकालयत् ॥ ११ ॥ अश्वमेधे महायज्ञे व्युषिताश्वः प्रतापवान्। बभूव स हि राजेन्द्रो दृप्तनागबलान्वितः ॥ १२ ॥ अत्रैव गाथां गायन्ति ये पुराण-

विदो जनाः। व्युषिताश्वे यशोहृद्धे मनुष्येन्द्रे कुरूद्वह ॥ १३ ॥ व्युषिताश्वः समुद्रान्तां विजित्येमां वसुन्धराम्। अपालयत्सर्ववर्णान् पिता पुत्रानिवौरसान् ॥ १४ ॥ यजमानो महायज्ञैर्ब्राह्मणेभ्यो धनं ददौ। अनन्तरत्नान्यादाय स जहार महाक्रतून् ॥ १५ ॥ सुषाव च बहून् सोमान् सोमसंस्थास्ततान च। आसीत् काक्षीवती चास्य भार्या परमसम्मता। भद्रा नाम मनुष्येन्द्र रूपेणासदृशी भुवि ॥ १६ ॥ कामयामासतुस्तौ च परस्परमिति श्रुतम्। स तस्यां कामसम्पन्नो यक्ष्मणा समपद्यत ॥ १७ ॥ तेनाचिरेण कालेन जगामास्तमिवांशुमान्। तस्मिन् प्रेते मनुष्येन्द्रे भार्यास्य भृशदुःखिता ॥ १८ ॥ अपुत्रा पुरुषव्याघ्र विललापेति नः श्रुतम्। भद्रा परमदुःखार्त्ता तन्निबोध जनाधिप ॥ १९ ॥

भद्रोवाच। नारी परमधर्मज्ञ सर्वा भर्तृविनाकृता। पतिं विना जीवति या न सा जीवति दुःखिता ॥ २० ॥ पतिं विना व्रतं श्रेयो नार्याः क्षत्रियपुङ्गव। त्वद्गतिं गन्तुमिच्छामि प्रसीदस्व नयस्व माम् ॥ २१ ॥ त्वया हीना क्षणमपि नाहं जीवितुमुत्सहे। प्रसादं कुरु मे राजन्नितस्तूर्णं नयस्व माम् ॥ २२ ॥ पृष्ठतोऽनुगमिष्यामि समेषु विषमेषु च। त्वामहं नरशार्दूल गच्छन्तमनिवर्त्तितुम् ॥ २३ ॥ छायेवानुगता राजन् सततं वशवर्त्तिनी। भविष्यामि नरव्याघ्र नित्यं प्रियहिते रता ॥ २४ ॥ अद्य प्रभृति मां राजन् कष्टा हृदयशोषणाः। आधयोऽभिभविष्यन्ति त्वामृते पुष्करेक्षण ॥ २५ ॥ अभाग्यया मया नूनं वियुक्ताः सहचारिणः। तेन मे विप्रयोगोऽयमुपपन्नस्त्वया सह ॥ २६ ॥ विप्रयुक्ता तु या पत्या मुहूर्त्तमपि जीवति। दुःखं जीवति सा पापा नरकस्थेव पार्थिव ॥ २७ ॥ संयुक्ता विप्रयुक्ताश्च पूर्वदेहे कृता मया। तमोभिः कर्मभिः पापैः पूर्वदेहेषु सञ्चितम् ॥ २८ ॥

दुःखं मानुषमाप्तं राजंस्त्वद्वियोगजम् । अद्यप्रभृत्यहं राजन् कृशसंस्मरणायिनी ॥ २९ ॥ भविष्याम्यसुखाविष्टा त्वद्दर्शनपरायणा । दर्शयस्व नरव्याघ्र शाधि मामसुखान्विताम् । कृपणां नाथ करुणां विलपन्तीं नरेश्वर ॥ ३० ॥

कुन्त्युवाच । एवं बहुविधं तस्यां विलपन्त्यां पुनः पुनः । तं शनैः सम्परिष्वज्य वाक्यिलान्तर्हितोऽब्रवीत् ॥ ३१ ॥ उत्तिष्ठ भद्रे गच्छ त्वं ददानीह वरं तव । जनयिष्याम्यपत्यानि त्वय्यहं चारुहासिनि ॥ ३२ ॥ आत्मकीये वरारोहे शयनीये चतुर्दशीम् । अष्टमीं वा ऋतुस्नाता संविशेथा मया सह ॥ ३३ ॥ एवमुक्ता तु सा देवी तथा चक्रे पतिव्रता । यथोक्तमेव तद्वाक्यं भद्रा पुत्रार्थिनी तदा ॥ ३४ ॥ सा तेन सुषुवे देवी शनेन भरतर्षभ । त्रीन् शाल्वांश्चतुरो मद्रान् सुतान् भरतसत्तम ॥ ३५ ॥ तथा त्वमपि मय्येवं मनसा भरतर्षभ । शक्तो जनयितुं पुत्रांस्तपोयोगबलान्वितः ॥ ३६ ॥

इत्यादिपर्वणि सम्भवपर्वणि व्युषिताश्वसंवादे एकविंशत्यधिकशततोऽध्यायः ॥ १२१ ॥

—०:०—

वैशम्पायन उवाच । एवमुक्तस्तया राजा तां देवीं पुनरब्रवीत् । धर्मविद्धर्मसंयुक्तमिदं वचनमुत्तमम् ॥ १ ॥

पाण्डुरुवाच । एवमेतत् पुरा कुन्ति व्युषिताश्वश्चकार ह । यथा त्वयोक्तं कल्याणि स ह्यासीदमरोपमः ॥ २ ॥ अथ त्विदं प्रवक्ष्यामि धर्मतत्त्वं निबोध मे । पुराणऋषिभिर्दृष्टं धर्मविद्भिर्महात्मभिः ॥ ३ ॥ अनावृताः किल पुरा स्त्रिय आसन्वरानने । कामचारविहारिण्यः स्वतन्त्राश्चारुहासिनि ॥ ४ ॥ तासां व्युच्चरमाणानां कौमारात्पुरुषे पतीन् । नाधर्मोऽभूदरारोहे स हि

धर्मः पुराभवत् ॥ ५ ॥ तत्रैव धर्मं पौराणं तिर्यग्योनिगताः प्रजाः । अद्याप्यनुविधीयन्ते कामक्रोधविवर्जिताः ॥ ६ ॥ प्रमाणदृष्टो धर्मोऽयं पूज्यते च महर्षिभिः । उत्तरेषु च रम्भोरु कुरुष्वद्यापि पूज्यते ॥ ७ ॥ स्त्रीणामनुग्रहकरः स हि धर्मः सनातनः । अस्मिंस्तु लोके न चिरान्मर्य्यादेयं प्रचिक्षिते । स्थापिता येन यस्माच्च तन्मे विस्तरतः शृणु ॥ ८ ॥ बभूवोद्दालको नाम महर्षिरिति नः श्रुतम् । श्वेतकेतुरितिख्यातः पुत्रस्तस्याभवन्मुनिः ॥ ९ ॥ मर्य्यादेयं कृता तेन धर्म्या वै श्वेतकेतुना । कोपात्कमलपत्राक्षि यदर्थं तं निबोध मे ॥ १० ॥ श्वेतकेतोः किल पुरा समक्षं मातरं पितुः । जग्राह ब्राह्मणः पाणौ गच्छाव इति चाब्रवीत् ॥ ११ ॥ ऋषिपुत्रस्ततः कोपं चकारामर्षचोदितः । मातरं तां तथा दृष्ट्वा नीयमानां बलादिव ॥ १२ ॥ क्रुद्धं तन्तु पिता दृष्ट्वा श्वेतकेतुमुवाच ह । मा तात कोपं कार्षीस्त्वमेष धर्मः सनातनः ॥ १३ ॥ अनावृता हि सर्वेषां वर्णानामङ्गना भुवि । यथा गावः स्थितास्तात स्वे स्वे वर्णे तथा प्रजाः ॥ १४ ॥ ऋषिपुत्रोऽथ तं धर्मं श्वेतकेतुर्न चक्षमे । चकार चैव मर्य्यादामिमां स्त्रीपुंसयोर्भुवि ॥ १५ ॥ मानुषेषु महाभागे न त्वेवान्येषु जन्तुषु । तदाप्रभृति मर्य्यादा स्थितेयमिति नः श्रुतम् ॥ १६ ॥ व्युच्चरन्त्याः पतिं भार्य्या अद्यप्रभृति पातकम् । भ्रूणहत्यासमं घोरं भविष्यत्यसुखावहम् ॥ १७ ॥ भार्य्यां तथा व्युच्चरतः कौमारब्रह्मचारिणीम् । पतिव्रतामेतदेव भविता पातकं भुवि ॥ १८ ॥ पत्या नियुक्ता या चैव पत्नी पुत्रार्थमेव च । न करिष्यति तस्याश्च भविष्यति तदेव हि ॥ १९ ॥ इति तेन पुरा भीरु मर्य्यादा स्थापिता बलात् । उद्दालकस्य पुत्रेण धर्म्या वै श्वेतकेतुना ॥ २० ॥ सौदासेन च रम्भोरु नियुक्ता पुत्रजन्मनि । मदयन्ती जगामर्षिं वसिष्ठमिति नः श्रुतम् ॥ २१ ॥ तस्माल्लेभे च सा

पुत्रमग्र्यकं नाम भाविनी । भार्य्या कल्याणपादस्य भर्तुः प्रियचिकीर्षया ॥ २२ ॥ अस्माकमपि ते जन्म विदितं कमलेक्षणे । कृष्णद्वैपायनाद्वीर कुरूणां वंशवर्द्धने ॥२३॥ अत एतानि सर्वाणि कारणानि समीक्ष्य वै । ममैतद्वचनं धर्म्यं कर्तुमर्हस्यनिन्दिते ॥ २४ ॥ ऋताहतौ राजपुत्रि स्त्रिया भर्त्ता पतिव्रते । नातिवर्त्तव्य इत्येवं धर्मं धर्मविदो विदुः ॥ २५ ॥ शेषेष्वन्येषु कालेषु स्वातन्त्र्यं स्त्री किलार्हति । धर्ममेवं जनाः सन्तः पुराणं परिचक्षते ॥ २६ ॥ भर्त्ता भार्य्यां राजपुत्रि धर्म्यं वाधर्म्यमेव वा । यद्ब्रूयात्तत्तथा कार्य्यमिति वेदविदो विदुः ॥ २७ ॥ विशेषतः पुत्रगृद्धी हीनः प्रजननात् स्वयम् । यथाहमनवद्याङ्गि पुत्रदर्शनलालसः ॥ २८ ॥ तथा रक्ताङ्गुलिनिभः पद्मपत्रनिभः शुभे । प्रसादार्थं मया तेऽयं शिरस्यभ्युद्यतोऽञ्जलिः ॥ २९ ॥ मन्नियोगात् सुकेशान्ते द्विजातेस्तपसाधिकात् । पुत्रान् गुणसमायुक्तानुत्पादयितुमर्हसि । त्वत्कृतेऽहं पृथुश्रोणि गच्छेयं पुत्रिणां गतिम् ॥ ३० ॥

वैशम्पायन उवाच । एवमुक्ता ततः कुन्ती पाण्डुं परपुरञ्जयम् । प्रत्युवाच वरारोहा भर्तुः प्रियहिते रता ॥ ३१ ॥ पितृवेश्मन्यहं बाला नियुक्तातिथिपूजने । उग्रं पर्य्यचरं तत्र ब्राह्मणं शंसितव्रतम् ॥ ३२ ॥ निगूढनिश्चयं धर्मे यन्तं दुर्वाससं विदुः । तमहं शंसितात्मानं सर्वयत्नैरतोषयम् ॥ ३३ ॥ स मेऽभिचारसंयुक्तमाचष्ट भगवान्वरम् । मन्त्रं त्विमञ्च मे प्रादाद्ब्रवीञ्चैव मामिदम् ॥ ३४ ॥ यं यं देवं त्वमेतेन मन्त्रेणावाहयिष्यसि । अकामो वा सकामो वा वशं ते समुपैष्यति ॥ ३५ ॥ तस्य तस्य प्रसादात्ते राज्ञि पुत्रो भविष्यति । इत्युक्ताहं तदा तेन पितृवेश्मनि भारत ॥ ३६ ॥ ब्राह्मणस्य वचस्तथ्यं तस्य कालोऽयमागतः । अनुज्ञाता त्वया देवमाह्वयेयमहं नृप ॥ ३७ ॥ तेन

मन्त्रेण राजर्षे यथाशास्त्रौ प्रजा हिता । आवाहयामि कं देवं ब्रूहि सत्यवतां वर । त्वत्तोऽनुज्ञामपेक्षां मां विद्ध्यस्मिन् कर्मणि स्थिताम् ॥ ३८ ॥

पाण्डुरुवाच । अद्यैव त्वं वरारोहे प्रयतस्व यथाविधि । धर्ममावाहय शुभे स हि लोकेषु पुण्यभाक् ॥ ३९ ॥ अधर्मेण न नो धर्मः संयुज्येत कथञ्चन । लोकश्चायं वरारोहे धर्मोऽयमिति मन्यते ॥ ४० ॥ धार्मिकश्च कुरूणां स भविष्यति न संशयः । धर्मेण चापि दत्तस्य नाधर्मे रंस्यते मनः ॥ ४१ ॥ तस्माद्धर्मं पुरस्कृत्य नियता त्वं शुचिस्मिते । उपचाराभिचाराभ्यां धर्ममावाहयस्व वै ॥ ४२ ॥

वैशम्पायन उवाच । सा तथोक्ता तथेत्युक्त्वा तेन भर्त्रा वराङ्गना । अभिवाद्याभ्यनुज्ञाता प्रदक्षिणमवर्तत ॥ ४३ ॥

इत्यादिपर्वणि सम्भवपर्वणि कुन्तीपुत्रोत्पत्त्यनुज्ञाने द्वाविंशत्यधिकशततोऽध्यायः ॥ १२२ ॥

—०:०—

वैशम्पायन उवाच । सम्वत्सरधृते गर्भे गान्धार्या जनमेजय । आजुहावाथ वै कुन्ती गर्भार्थं धर्ममच्युतम् ॥ १ ॥ सा बलिं त्वरिता देवी धर्मायोपजहार ह । जजाप विधिवज्जप्यं दत्तं दुर्वाससा पुरा ॥ २ ॥ आजगाम ततो देवो धर्मो मन्त्रबलात्ततः । विमाने सूर्यसङ्काशे कुन्ती यत्र जपस्थिता ॥ ३ ॥ विहस्य तां ततो ब्रूयाः कुन्ति किन्ते ददाम्यहम् । सा तं विहस्यमानापि पुत्रं देह्यब्रवीदिदम् ॥ ४ ॥ संयुक्ता सा हि धर्मेण योगमूर्त्तिधरेण ह । लेभे पुत्रं वरारोहा सर्वप्राणभृतां हितम् ॥ ५ ॥ ऐन्द्रे चन्द्रसमायुक्ते मुहूर्त्तेऽभिजितेऽष्टमे । दिवामध्यगते सूर्ये तिथौ पूर्णेऽतिपूजिते ॥ ६ ॥ सुषुवे यशसं कुन्ती सुषाव प्रवरं सुतम् ।

जातमात्रे सुते तस्मिन्नागुवाचाशरीरिणी ॥ ७ ॥ एष धर्मभृतां श्रेष्ठो भविष्यति नरोत्तमः । विक्रान्तः सत्यवाक् चैव राजा पृथ्व्यां भविष्यति ॥ ८ ॥ युधिष्ठिर इति ख्यातः पाण्डोः प्रथमजः सुतः । भविता प्रथितो राजा त्रिषु लोकेषु विश्रुतः ॥ ९ ॥ यशसा तेजसा चैव व्रतेन च समन्वितः । धार्मिकं तं सुतं लब्ध्वा पाण्डुरां पुनरब्रवीत् ॥ १० ॥ प्राज्ञः क्षत्रं बलज्येष्ठं बलज्येष्ठं सुतं वृणु । ततस्तथोक्ता भर्त्रा तु वायुमेवाजुहाव सा ॥ ११ ॥ ततस्तामागतो वायुर्मृगारूढो महाबलः । किन्ते कुन्ति ददाम्यद्य ब्रूहि यत्ते हृदि स्थितम् ॥ १२ ॥ सा सलज्जा विहस्याह पुत्रं देहि सुरोत्तम । बलवन्तं महाकायं सर्वदर्पप्रभञ्जनम् ॥ १३ ॥ तस्माज्जज्ञे महाबाहुर्भीमो भीमपराक्रमः । तमप्यतिबलं जातं वागुवाचाशरीरिणी ॥ १४ ॥ सर्वेषां बलिनां श्रेष्ठो जातोऽयमिति भारत । दृढमत्यङ्कुतं चासीज्जातमात्रे वृकोदरे ॥ १५ ॥ यदङ्कात्पतितो मातुः शिलां गात्रैर्व्यचूर्णयत् । कुन्ती व्याघ्रभयोद्विग्ना सहसोत्पतिता किल ॥ १६ ॥ नान्वबुध्यत संसुप्तमुत्सङ्गे स्वे वृकोदरम् । ततः स वज्रसंघातः कुमारो न्यपतद्गिरौ ॥ १७ ॥ पपात तेन शतधा शिला गात्रैर्विचूर्णिता । तां शिलां चूर्णितां दृष्ट्वा पाण्डुर्विस्मयमागतः ॥ १८ ॥ यस्मिन्नहनि भीमस्तु जज्ञे भरतसत्तम । दुर्योधनोऽपि तत्रैव प्रजज्ञे वसुधाधिपः ॥ १९ ॥ जाते वृकोदरे पाण्डुरिदं भूयोऽन्वचिन्तयत् । कथं नु मे वरः पुत्रो लोकश्रेष्ठो भवेदिति ॥ २० ॥ दैवे पुरुषकारे च लोकोऽयं संप्रतिष्ठितः । तत्र दैवन्तु विधिना कालयुक्तेन लभ्यते ॥ २१ ॥ इन्द्रो हि राजा देवानां प्रधान इति नः श्रुतम् । अप्रमेयबलोत्साहो वीर्यवानमितद्युतिः ॥ २२ ॥ तं तोषयित्वा तपसा पुत्रं लप्स्ये महाबलम् । यं दास्यति स मे पुत्रं स वरीयान् भविष्यति ॥ २३ ॥ अमानुषान्मानुषांश्च संग्रामे

स हनिष्यति। कर्मणा मनसा वाचा तस्मात्त्वं महत्तपः॥२४॥
ततः पाण्डुर्महाराजो मन्त्रयित्वा महर्षिभिः। दिदेश कुन्त्याः
कौरव्यो व्रतं सम्वत्सरं शुभम्॥ २५॥ आत्मना च महाबाहु-
रेकपादस्थितोऽभवत्। ऊर्ध्वं स तप आस्थाय परमेण समा-
धिना॥ २६॥ आराधयिषुर्देवं त्रिदशानां तमीश्वरम्।
स्वर्गेण सह धर्मात्मा पर्यतप्यत भारत। तं तु कालेन महता
वासवः प्रत्यपद्यत॥ २७॥

शक्र उवाच। पुत्रं तव प्रदास्यामि त्रिषु लोकेषु विश्रुतम्।
ब्राह्मणानां गवाञ्चैव सुहृदां चार्थसाधकम्॥ २८॥ दुर्हृदां
शोकजननं सर्वबान्धवनन्दनम्। सुतं तेऽहं प्रदास्यामि सर्वा-
मित्रविनाशनम्॥ २९॥ इत्युक्तः कौरवो राजा वासवेन महा-
त्मना। उवाच कुन्तीं धर्मात्मा देवराजवचः स्मरन्॥ ३०॥
उदक्कूलव कल्याणि तुष्टो देवगणेश्वरः। दातुमिच्छति ते पुत्रं
यथासङ्कल्पितं त्वया॥ ३१॥ अतिमानुषकर्माणं यशस्विन-
मरिन्दमम्। नीतिमन्तं महात्मानमादित्यसमतेजसम्॥ ३२॥
दुराधर्षं क्रियावन्तमतीवाङ्गुतदर्शनम्। पुत्रं जनय सुश्रोणि
धाम क्षत्रियतेजसाम्। लब्धः प्रसादो देवेन्द्रात्तमाह्वय शुचि-
स्मिते॥ ३३॥

वैशम्पायन उवाच। एवमुक्ता ततः शक्रमाजुहाव यश-
स्विनी। अथाजगाम देवेन्द्रो जनयामास चार्जुनम्॥ ३४॥
जातमात्रे कुमारे तु वागुवाचाशरीरिणी। महागम्भीर-
निर्घोषा नभो नादयती तदा॥ ३५॥ शृण्वतां सर्वभूतानां
तेषां चाश्रमवासिनाम्। कुन्तीमाभाष्य विष्पष्टमुवाचेदं शुचि-
स्मिताम्॥ ३६॥ कार्त्तवीर्यसमः कुन्ति शिवतुल्यपराक्रमः।
एष शक्र इवाजय्यो यशस्ते प्रथयिष्यति॥ ३७॥ अदित्या
विष्णुना प्रीतिर्यथाभूदभिवर्धिता। तथा विष्णुसमः प्रीतिं

वर्धयिष्यति तेऽर्जुनः ॥ ३८ ॥ एष मद्रान्वये कृत्वा कुरूंश्च सह सोमकैः। चेदिकाशिकरूषांश्च कुरुवत्सौं वहिष्यति ॥ ३९ ॥ एतस्य भुजवीर्येण खाण्डवे हव्यवाहनः। मेदसा सर्वभूतानां तृप्तिं यास्यति वै पराम् ॥ ४० ॥ ग्रामणीश्च महीपालानेष जित्वा महाबलः। भ्रातृभिः सहितो वीरस्त्रीन्मेधानाहरिष्यति ॥ ४१ ॥ जामदग्न्यसमः कृन्ति विष्णुतुल्यपराक्रमः। एष वीर्यवतां श्रेष्ठो भविष्यति महायशाः ॥ ४२ ॥ एष युद्धे महादेवं तोषयिष्यति शङ्करम्। अस्त्रं पाशुपतं नाम तस्मात्तुष्टादवाप्स्यति ॥ ४३ ॥ निवातकवचा नाम दैत्या विबुधविद्विषः। शक्राज्ञया महाबाहुस्तान् वधिष्यति ते सुतः ॥ ४४ ॥ तथा दिव्यानि चास्त्राणि निखिलेनाहरिष्यति। विप्रनष्टां श्रियं चायमाहर्ता पुरुषर्षभः ॥ ४५ ॥ एतामत्यद्भुतां वाचं कुन्ती शुश्राव सूतके। वाग्भिश्चरितामुच्चां निशम्य तपस्विनाम् ॥ ४६ ॥ बभूव परमो हर्षः शतशृङ्गनिवासिनाम्। तथा देवनिकायानां सेन्द्राणाञ्च दिवौकसाम् ॥ ४७ ॥ आकाशे दुन्दुभीनाञ्च बभूव तुमुलस्वनः। उदतिष्ठन्महाघोषः पुष्पवृष्टिभिरावृतः ॥ ४८ ॥ समवेत्य च देवानां गणाः पार्थमपूजयन्। काद्रवेया वैनतेया गन्धर्वाप्सरसस्तथा ॥ ४९ ॥ प्रजानां पतयः सर्वे सप्त चैव महर्षयः। भरद्वाजः कश्यपो गौतमश्च विश्वामित्रो जमदग्निर्वसिष्ठः। यश्चोदितो मास्करेऽभूत् प्रनष्टे सोऽप्यत्रात्रिर्भगवानाजगाम ॥ ५० ॥ मरीचिरङ्गिराश्चैव पुलस्त्यः पुलहः क्रतुः। दक्षः प्रजापतिश्चैव गन्धर्वाप्सरसस्तथा ॥ ५१ ॥ दिव्यमाल्याम्बरधराः सर्वालङ्कारभूषिताः। उपगायन्ति वीभत्सुं कृत्यलप्सरसाङ्गणाः ॥ ५२ ॥ तथा महर्षयश्चापि जेषुस्तत्र समन्ततः। गन्धर्वैः सहितः श्रीमान् प्रागायत च तुम्बुरुः ॥ ५३ ॥ भीमसेनोग्रसेनौ च ऊर्णायुरनघस्तथा। गोपतिर्धृतराष्ट्रश्च सूर्यवर्चास्तथाष्टमः ॥ ५४ ॥ युग-

पर्जन्यपः कार्ष्णिर्नन्दिचित्ररथस्तथा । त्रयोदशः शालिशिराः पर्जन्यश्च चतुर्दशः ॥ ५५ ॥ कलिः पञ्चदशश्चैव नारदश्चाऽपि षोडशः । सत्वाष्टहत्वाष्टहकः करालश्च महामनाः ॥ ५६ ॥ ब्रह्मचारी बभ्रुगणः सुवर्णश्चेति विश्रुतः । विश्वावसुः सुमन्युश्च सुचन्द्रश्च शरस्तथा ॥ ५७ ॥ गीतमाधुर्यसम्पन्नौ विख्यातौ च हाहाऽहूहू । इत्येते देवगन्धर्वा जगुस्तत्र नराधिप ॥ ५८ ॥ तथैवाप्सरसो हृष्टाः सर्वालङ्कारभूषिताः । नृतुर्वै महाभागा जगुश्चायतलोचनाः ॥ ५९ ॥ अनूचानानवद्या च गुणमुख्या गुणावरा । अद्रिका च तथा सोमा मिश्रकेशी त्वलम्बुषा ॥ ६० ॥ मरीचिः शुचिका चैव विद्युत्पर्णा तिलोत्तमा । अम्बिका लक्षणा क्षेमा देवी रम्भा मनोरमा ॥ ६१ ॥ असिता च सुबाहुश्च सुप्रिया च वपुस्तथा । पुण्डरीका सुगन्धा च सुरसा च प्रमाथिनी ॥ ६२ ॥ काम्या शारद्वती चैव नृतुस्तत्र संघशः । सेनका सहजन्या च कर्णिका पुञ्जिकस्थला ॥ ६३ ॥ ऋतुस्थला घृताची च विश्वाची पूर्वचित्त्यपि । उर्ध्वजोचेति च विख्याता प्रम्लोचेति च तादृशी ॥ ६४ ॥ सर्वास्त्वेकादशी तासां जगुश्चायतलोचनाः । धाताऽर्यमा च मित्रश्च वरुणोंऽशो भगस्तथा ॥ ६५ ॥ इन्द्रो विवस्वान् पूषा च त्वष्टा च सविता तथा । पर्जन्यश्चैव विष्णुश्च आदित्या द्वादश स्मृताः ॥ ६६ ॥ महिमानं पाण्डवस्य वर्धयन्तोऽम्बरे स्थिताः । मृगव्याधश्च सर्पश्च निर्ऋतिश्च महायशाः ॥ ६७ ॥ अजैकपादहिर्बुध्न्यः पिनाकी च परन्तपः । दहनोऽथेश्वरश्चैव कपाली च विशांपते । स्थाणुर्भगश्च भगवान् रुद्राश्चैतावतास्त्रिके ॥ ६८ ॥ अश्विनौ वसवश्चाष्टौ मरुतश्च महाबलाः । विश्वेदेवास्तथा साध्याश्चत्वारिंशत् परिसंस्थिताः ॥ ६९ ॥ कर्कोटकोऽथ सर्पश्च वासुकिश्च भुजङ्गमः । कच्छपश्चाथ कुण्डश्च तक्षकश्च महोरगः ॥ ७० ॥ आयुयुक्तपसा युक्ता महाक्रोधा महाबलाः । एते चान्ये

च बहवस्तत्र नागा व्यवस्थिताः ॥ ७१ ॥ तार्क्ष्यश्चारिष्टनेमिश्च गरुड़ध्वजितध्वजः। अरुणश्चारुणिश्चैव वैनतेया व्यवस्थिताः ॥ ७२ ॥ तांश्च देवगणान् सर्वांस्तपःसिद्धा महर्षयः। विमानैर्व्योमगतान्दृष्ट्वानेतरे जनाः ॥ ७३ ॥ तद्दृष्ट्वा महदाश्चर्यं विस्मिता मुनिसत्तमाः। अधिकां स्म ततो हृष्टिमवर्त्तन् पाण्डवान् प्रति ॥ ७४ ॥ पाण्डुस्तु पुनरेवैनां पुत्रलोभान्महायशाः। वक्तुमैच्छद्धर्मपत्नीं कुन्तीं त्वेनमथाब्रवीत् ॥ ७५ ॥ नात्यस्तुर्थप्रसवमापत्स्वपि वदन्त्युत। अतःपरं स्वैरिणी स्याद्बन्धकी पञ्चमे भवेत् ॥ ७६ ॥ स त्वं विद्वन्धर्ममिममधिगम्य कथं न माम्। अपत्यार्थं समुत्क्रम्य प्रमादादिव भाषसे ॥ ७७ ॥

इत्यादिपर्वणि सम्भवपर्वणि पाण्डवोत्पत्तौ त्रयोविंशत्यधिकशततोऽध्यायः ॥ १२३ ॥

वैशम्पायन उवाच। कुन्तीपुत्रेषु जातेषु धृतराष्ट्रात्मजेषु च। मद्रराजसुता पाण्डुं रहो वचनमब्रवीत् ॥ १ ॥ न मेऽस्ति त्वयि सन्तापो विगुणोऽपि परन्तप। नावरत्वे वराङ्गनाः स्थिता चानव नित्यदा ॥ २ ॥ गान्धार्याश्चैव नृपते जातं पुत्रशतं तथा। श्रुत्वा न मे तथा दुःखमभवत् कुरुनन्दन ॥ ३ ॥ इदन्तु मे महद्दुःखं तुल्यतायामपुत्रता। दिष्ट्या त्विदानीं मर्तुर्मे कुन्त्यामप्यस्ति सन्ततिः ॥ ४ ॥ यदि त्वमत्यसन्तानं कुन्तिराजसुता मयि। कुर्य्यादनुग्रहो मे स्यात्तव चापि हितं भवेत् ॥ ५ ॥ संरम्भो हि सपत्नीत्वाद्वक्तुं कुन्तिसुतां प्रति। यदि तु त्वं प्रसन्नो मे स्वयमेनां प्रचोदय ॥ ६ ॥

पाण्डुरुवाच। ममाप्येष सदा भाद्रि हृद्यर्थः परिवर्त्तते। न तु त्वां प्रसहे वक्तुमिष्टानिष्टविवक्षया ॥ ७ ॥ तव त्विदं मतं

मत्वा प्रयतिष्याम्यतःपरम् । मन्य ध्रुवं मयोक्ता सा वचन प्रतिमत्स्यते ॥ ८ ॥

वैशम्पायन उवाच । ततः कुन्तीं पुनः पाण्डुर्विविक्त इदमब्रवीत् । कुलस्य मम सन्तानं लोकस्य च कुरु प्रियम् ॥ ९ ॥ मम चापिण्डनाशाय पूर्वेषामपि चात्मनः । मत्प्रियार्थञ्च कल्याणि कुरु कल्याणमुत्तमम् ॥ १० ॥ यशसोऽर्थाय चैव त्वं कुरु कर्म सुदुष्करम् । प्राप्याधिपत्यमिन्द्रेण यज्ञैरिष्टं यशोऽर्थिना ॥ ११ ॥ तथा मन्त्रविदो विप्रास्तपसाप्त्वा सुदुष्करम् । गुरूनभ्युपगच्छन्ति यशसोऽर्थाय भाविनि ॥ १२ ॥ तथा राजर्षयः सर्वे ब्राह्मणाश्च तपोधनाः । चक्रुरुच्चावचं कर्म यशसोऽर्थाय दुष्करम् ॥ १३ ॥ सा त्वं माद्रीं प्लवेनैव तारयैनामनिन्दिते । अपत्यसंविभागेन परां कीर्तिमवाप्नुहि ॥ १४ ॥ एवमुक्ताब्रवीन्माद्रीं सकृच्चिन्त्य दैवतम् । तस्मात्ते भविताऽपत्यमनुरूपमसंशयम् ॥ १५ ॥ ततो माद्री विचार्यैव जगाम मनसाश्विनौ । तावागम्य सुतौ तस्यां जनयामासतुर्यमौ ॥ १६ ॥ नकुलं सहदेवञ्च रूपेणाप्रतिमौ भुवि । तथैव तावपि यमौ वाग्वाचाशरीरिणी ॥ १७ ॥ सत्त्वरूपगुणोपेतौ भवतोऽत्यश्विनाविति । भासतस्तेजसात्यर्थं रूपद्रविणसम्पदा ॥ १८ ॥ नामानि चक्रिरे तेषां शतशृङ्गनिवासिनः । भक्त्या च कर्मणा चैव तथाशीर्भिर्विशाम्पते ॥ १९ ॥ ज्येष्ठं युधिष्ठिरेत्येवं भीमसेनेति मध्यमम् । अर्जुनेति तृतीयञ्च कुन्तीपुत्रानकल्पयन् ॥ २० ॥ पूर्वजं नकुलेत्येवं सहदेवेति चापरम् । माद्रीपुत्रावकथयंस्ते विप्राः प्रीतमानसाः ॥ २१ ॥ अनुसम्वत्सरं जाता अपि ते कुरुसत्तमाः । पाण्डुपुत्रा व्यराजन्त पञ्च सम्वत्सरा इव ॥ २२ ॥ महासत्त्वा महावीर्या महाबलपराक्रमाः । पाण्डुर्दृष्ट्वा सुतांस्तांस्तु देवरूपान्महौजसः ॥ २४ ॥ मुदं परमिकां लेभे ननन्द

च नराधिपः । ऋषीणामपि सर्वेषां शतशृङ्गनिवासिनाम् ॥२५॥ प्रिया बभूवुस्तासाञ्च तथैव मुनियोषिताम् । कुन्तीमथ पुनः पाण्डुर्माद्र्यर्थे समचोदयत् ॥ २६ ॥ तमुवाच पृथा राजन्नहुष्युक्ता तदा सती । श्रुत्वा सकृदुदन्दमेषा लेभे तेनास्मि वञ्चिता ॥२७॥ विभेम्यस्याः परिभवात् कुन्तीणां गतिरीदृशी । नात्मानमिषमर्हं मूढा द्वन्द्वाज्ञाने फलद्वयम् ॥ २८ ॥ तस्मान्नाहं नियोक्तव्या त्वयैषोऽस्तु वरो मम । एवं पाण्डोः सुताः पञ्च देवदत्ता महाबलाः ॥ २९ ॥ सम्भूताः कीर्तिमन्तश्च कुरुवंशविवर्द्धनाः । शुभलक्षणसम्पन्नाः सोमवत् प्रियदर्शनाः ॥ ३० ॥ सिंहदर्पा महेष्वासाः सिंहविक्रान्तगामिनः । सिंहग्रीवा मनुष्येन्द्रा वहवः देवविक्रमाः ॥ ३१ ॥ विवर्द्धमानास्ते तत्र पुण्ये हैमवते गिरौ । विस्मयं जनयामासुर्महर्षीणां समेयुषाम् ॥ ३२ ॥ ते च पञ्च शतञ्चैव कुरुवंशविवर्द्धनाः । सर्वे वहुरत्वेन कालेनाप्सिव नीरजाः ॥ ३३ ॥

इत्यादिपर्वणि सम्भवपर्वणि पाण्डवोत्पत्तौ चतुर्विंशत्यधिकशततोऽध्यायः ॥ १२४ ॥

वैशम्पायन उवाच । दर्शनीयांस्ततः पुत्रान् पाण्डुः पञ्च महावने । तान् पश्यन् पर्वते रम्ये स्वबाहुबलमाश्रितः ॥१॥ सुपुष्पितवने काले कदाचिन्मधुमाधवे । भूतसंमोहने राजा सभार्यो व्यचरद्वनम् ॥२॥ पलाशैस्तिलकैश्चूतैश्चम्पकैः पारिभद्रकैः । कर्णिकारैरशोकैश्च केशरैरतिमुक्तकैः ॥ ३ ॥ तथा कुरुवकैश्चैव मत्तभ्रमरनादितैः । हृतैर्मञ्जरितैश्चैव पारिजातवनैः शुभैः ॥४॥ कलकण्ठकलोद्घुष्टं षट्पदैः प्रतिकूजितम् । अन्यैश्च वहुभिर्हृद्यैः फल-

पुष्पसञ्छन्नैः॥ ५॥ जलस्थानैश्च विविधैः पद्मिनीभिश्च शोभितम्। पाण्डोर्वनं तत् सम्प्रेक्ष्य प्रजज्ञे हृदि मन्मथः॥ ६॥ प्रहृष्टमनसं तत्र विचरन्तं यथामरम्। तं माद्र्यनुजगामैका वसनं बिभ्रती शुभम्॥ ७॥ समीक्षमाणः स तु तां वयस्यां तनुवाससम्। तस्य कामः प्रवव्रते गहनेऽग्निरिवोद्धतः॥ ८॥ रहस्येकान्ते तां दृष्ट्वा राजा राजीवलोचनाम्। शापाक न नियन्तुं तं कामं कामवशीकृतः॥ ९॥ तत एनां बलाद्राजा निजग्राह रहोगताम्। वार्ष्यमाणस्तया देव्या विक्रुरन्त्या यथाबलम्॥ १०॥ स तु कामपरीतात्मा तं शापं नान्ववुध्यत। माद्रीं मैथुनधर्मेण सोऽन्वगच्छज्ज्वलादिव॥ ११॥ जीवितान्ताय क्रौरव्य मन्मथस्य वशङ्गतः। शापजं भयमुत्सृज्य विधिना संप्रचोदितः॥ १२॥ तस्य कामात्मनो बुद्धिः साक्षात्कालेन मोहितः। संप्रमथ्येन्द्रियग्रामं प्रनष्टा सह चेतसा॥ १३॥ स तया सह सङ्गम्य भार्यया कुरुनन्दनः। पाण्डुः परमधर्मात्मा युयुजे कालधर्मणा॥ १४॥ ततो माद्री समालिङ्ग्य राजानं गतचेतसम्। मुमोच दुःखजं शब्दं पुनः पुनरतीव हि॥ १५॥ सह पुत्रैस्ततः कुन्ती माद्रीपुत्रौ च पाण्डवौ। आजग्मुः सहितास्तत्र यत्र राजा तथागतः॥ १६॥ ततो माद्र्यब्रवीद्राजन्नार्ता कुन्तीमिदं वचः। एकैव त्वमिहागच्छ तिष्ठन्त्वत्रैव दारकाः॥ १७॥ तच्छ्रुत्वा वचनं तस्यास्ततैवाघाय दारकान्। हताहमिति विक्रुश्य सहसैवाजगाम सा॥ १८॥ दृष्ट्वा पाण्डुं च माद्रीं च शयानौ धरणीतले। कुन्ती शोकपरीताङ्गी विललाप सुदुःखिता॥ १९॥ रक्ष्यमाणो मया नित्यं वीरः सततमात्मवान्। कथं त्वामत्यतिक्रान्तः शापं जानन्ननीकसः॥ २०॥ ननु नाम त्वया माद्रि रक्षितव्यो नराधिपः। सा कथं लोभितवती विजने त्वं नराधिपम्॥ २१॥ कथं दीनस्य सततं त्वामासाद्य रहोगताम्। तं विचिन्तयतः शापं

प्रहर्षः समजायत ॥ २२ ॥ धन्या त्वमसि वाह्लीकि मत्तो भाग्यतरा तथा । दृष्टवत्यसि यद्वक्त्रं प्रहृष्टस्य महीपतेः ॥ २३ ॥

माद्र्युवाच । विलपन्त्या मया देवि वार्ष्णेयेन चासकृत् । आत्मा न वारितोऽनेन सत्यं दिष्टं चिकीर्षुणा ॥ २४ ॥

कुन्त्युवाच । अहं ज्येष्ठा धर्मपत्नी ज्येष्ठं धर्मफलं मम । अवश्यंभाविनो भावान्मा मां माद्रि निवर्त्तय ॥ २५ ॥ अन्विष्यामीह भर्त्तारमहं प्रेतवशं गतम् । उत्तिष्ठ त्वं विहज्यैनमिमान् पालय दारकान् ॥ २६ ॥

माद्र्युवाच । अहमेवानुयास्यामि भर्त्तारमपलायिनम् । न हि तृप्तास्मि कामानां ज्येष्ठा मामनुमन्यताम् ॥ २७ ॥ मां चाभिगम्य क्षीणोऽयं कामाङ्गरतसत्तमः । तमुच्छिन्द्यामहं कामं कथं नु यमसादने ॥ २८ ॥ न चाप्यहं वर्त्तयन्ती निर्विशेषं सुतेषु ते । वृत्तिमार्ये चरिष्यामि स्नुषेवेनस्वया च माम् ॥ २९ ॥ तस्मान्मे सुतयोः कुन्ति वर्त्तितव्यं स्वपुत्रवत् । माच्च कामयमानोऽयं राजा प्रेतवशं गतः ॥ ३० ॥ राज्ञः शरीरेण सह ममापीदं कलेवरम् । दग्धव्यं सुप्रतिच्छन्नमेतदार्ये प्रियं कुरु ॥ ३१ ॥ दारकेष्वप्रमत्ता च भवेथाश्च हिता मम । अतोऽन्यं न प्रपश्यामि संदेष्टव्यं हि किञ्चन ॥ ३२ ॥

वैशम्पायन उवाच । इत्युक्त्वा तं चिताग्निस्थं धर्मपत्नी नरर्षभम् । मद्रराजसुता तूर्णमन्वारोहद्यशस्विनी ॥ ३३ ॥

इत्यादिपर्वणि सम्भवपर्वणि पाण्डुपरलोके पञ्चविंशत्यधिकशततोऽध्यायः ॥ १२५ ॥

—•—

वैशम्पायन उवाच । पाण्डोरुपरमं दृष्ट्वा देवकल्पा महर्षयः । ततो मन्त्रविदः सर्वे मन्त्रयाञ्चक्रिरे मिथः ॥ १ ॥

तापसा ऊचुः । हित्वा राज्यञ्च राष्ट्रञ्च स महात्मा महायशाः । अस्मिन् स्थाने तपस्तप्त्वा तापसान् शरणं गतः ॥ २ ॥ स जातमात्रान् पुत्रांश्च दारांश्च भवतामिह । प्रदायोपनिधिं राजा पाण्डुः स्वर्गमितो गतः ॥३॥ तस्येमानात्मजान्देहं भार्य्याञ्च सुमहात्मनः । स्वराष्ट्रं गत्वा गच्छामो धर्म एष हि नः स्मृतः ॥४॥

वैशम्पायन उवाच । ते परस्परमामन्त्र्य देवकल्पा महर्षयः । पाण्डोः पुत्रान् पुरस्कृत्य नगरं नागसाह्वयम् ॥ ५ ॥ उदारमनसः सिद्धा गमने चक्रिरे मनः । भीष्माय पाण्डवान् दातुं धृतराष्ट्राय चैव हि ॥ ६ ॥ तस्मिन्नेव क्षणे सर्वे तानादाय प्रतस्थिरे । पाण्डोर्दारांश्च पुत्रांश्च शरीरं ते च तापसाः ॥ ७ ॥ सुखिनी सा पुरा भूत्वा सततं पुत्रवत्सला । प्रपन्ना दीर्घमध्वानं क्लेशिनं तदमन्यत ॥ ८ ॥ सा त्वदीर्घेण कालेन सम्प्राप्ता कुरुजाङ्गलम् । वर्द्धमानपुरद्वारमाससाद यशस्विनी ॥ ९ ॥ द्वारिणं तापसा ऊचू राजानञ्च प्रकाशय । ते तु गत्वा क्षणेनैव सभायां विनिवेदिताः ॥ १० ॥ तं चारणसहस्राणां मुनीनामागमं तदा । श्रुत्वा नागपुरे नृणां विस्मयः समपद्यत ॥ ११ ॥ मुहूर्त्तोदित आदित्ये सर्वे बालपुरस्कृताः । सदारास्तापसान्द्रष्टुं निर्ययुः पुरवासिनः ॥ १२ ॥ स्त्रीसङ्घाः क्षत्रसङ्घाश्च यानसङ्घसमाश्रिताः । ब्राह्मणैः सह निर्जग्मुर्ब्राह्मणानाञ्च योषितः ॥ १३ ॥ तथा विट्शूद्रसङ्घानां महान् व्यतिकरोऽभवत् । न कश्चिदकरोदीर्ष्यामभवन् धर्मबुद्धयः ॥ १४ ॥ तथा भीष्मः शान्तनवः सोमदत्तोऽथ वाह्लिकः । प्रज्ञाचक्षुश्च राजर्षिः क्षत्ता च विदुरः स्वयम् ॥१५॥ सा च सत्यवती देवी कौशल्या च यशस्विनी । राजदारैः परिवृता गान्धारी चापि निर्ययौ ॥ १६ ॥ धृतराष्ट्रस्य दायादा

दुर्योधनपुरोगमाः । भूषिता भूषणैश्चित्रैः शतसङ्ख्या विनिर्ययुः ॥ १७ ॥ तान्महर्षिगणान् दृष्ट्वा शिरोभिरभिवाद्य च । उपोपविविशुः सर्वे कौरव्याः सपुरोहिताः ॥ १८ ॥ तथैव शिरसा भूमावभिवाद्य प्रणम्य च । उपोपविविशुः सर्वे पौरजानपदा अपि ॥ १९ ॥ तमकूजमभिज्ञाय जनौघं सर्वशस्तदा । पूजयित्वा यथान्यायं पाद्येनार्घ्येण च प्रभो ॥ २० ॥ भीष्मो राज्यञ्च राष्ट्रञ्च महर्षिभ्यो न्यवेदयत् । तेषामथो बृहत्तमः प्रत्युत्थाय जटाजिनी ॥ २१ ॥ ऋषीणां मतमाज्ञाय महर्षिरिदमब्रवीत् । यः स कौरव्यदायादः पाण्डुर्नाम नराधिपः । कामभोगान् परित्यज्य शतशृङ्गमितो गतः ॥ २२ ॥ ब्रह्मचर्य्यव्रतस्यस्य तस्य दिव्येन हेतुना । साक्षाद्धर्मादयं पुत्रस्तव जातो युधिष्ठिरः ॥ २३ ॥ तथैनं बलिनां श्रेष्ठं तस्य राज्ञो महात्मनः । मातरिश्वा ददौ पुत्रं भीमं नाम महाबलम् ॥ २४ ॥ पुरुहूतादयं जज्ञे कुन्त्या-मेव धनञ्जयः । यस्य कीर्तिर्महेष्वासान् सर्वानभिभविष्यति ॥ २५ ॥ यौ तु माद्र्यां महेष्वासावसूत पुरुषोत्तमौ । अश्विभ्यां पुरुष-व्याघ्राविमौ तावपि पश्यत ॥ २६ ॥ चरता धर्मनित्येन वनवासं यशस्विना । नष्टः पैतामहो वंशः पाण्डुना पुनरुद्धृतः ॥ २७ ॥ पुत्राणां जन्म वृद्धिञ्च वैदिकाध्ययनानि च । पश्यन्तः सततं पाण्डोः परां प्रीतिमवाप्स्यथ ॥ २८ ॥ वर्त्तमानः सतां वृत्ते पुत्र-लाभमवाप्य च । पितृलोकं गतः पाण्डुरितः सप्तदशेऽहनि ॥ २९ ॥ तं चितागतमाज्ञाय वैश्वानरमुखे हुतम् । प्रविष्टा पावकं माद्री हित्वा जीवितमात्मनः ॥ ४० ॥ सा गता सह तेनैव पतिलोक-मनुव्रता । तस्मात्तस्य च यत्कार्य्यं क्रियतां तदनन्तरम् ॥ ४१ ॥ इमे तयोः शरीरे हे पुत्रार्थे मे तयोर्वराः । क्रियाभिरनुगृह्यन्तां सह माता परन्तपाः ॥ ४२ ॥ प्रेतकार्य्ये निवृत्ते तु पितृमेधं महाक्रतुम् । लभतां सर्वमेधज्ञः पाण्डुः कुरुकुलोद्वहः ॥ ४३ ॥

वैशम्पायन उवाच । एवमुक्त्वा कुरून् सर्वान् कुरूणामेक पश्यताम् । क्षणेनान्तर्हिताः सर्वे तापसा गुह्यकैः सह ॥ ४४ ॥ गन्धर्वनगराकारं तथैवान्तर्हितं पुनः । ऋषिसिद्धगणान् दृष्ट्वा विस्मयं ते परं ययुः ॥ ४५ ॥

इत्यादिपर्वणि सम्भवपर्वणि ऋषिसंवादे षड्विंश-त्यधिकशततोऽध्यायः ॥ १२६ ॥

—०:०—

धृतराष्ट्र उवाच । पाण्डोर्विदुर सर्वाणि प्रेतकार्य्याणि कारय । राजवद्राजसिंहस्य माद्र्याश्चैव विशेषतः ॥ १ ॥ पशून् वासांसि रत्नानि धनानि विविधानि च । पाण्डोः प्रयच्छ माद्र्याश्च येभ्यो यावच्च वाञ्छितम् ॥ २ ॥ यथा च कुन्ती सत्कारं कुर्य्यान्माद्र्यास्तथा कुरु । यथा न वायुर्नादित्यः पश्येतां तां सुसंवृताम् ॥ ३ ॥ न शोच्यः पाण्डुरनघः प्रशस्यः स नराधिपः । यस्य पञ्च सुता वीरा जाताः सुरसुतोपमाः ॥ ४ ॥

वैशम्पायन उवाच । विदुरस्तं तथेत्युक्त्वा भीष्मेण सह भारत । पाण्डुं संस्कारयामास देशे परमपूजिते ॥ ५ ॥ ततस्तु नगरात्तूर्णमाज्यगन्धपुरस्कृताः । निर्हृताः पावका दीप्ताः पाण्डोराजन् पुरोहितैः ॥ ६ ॥ अथैनमार्त्तवैः पुष्पैर्गन्धैश्च विविधैः वरैः । शिबिकां तामलङ्कृत्य वाससाच्छाद्य सर्वशः ॥ ७ ॥ तां तथा शोभितां माल्यैर्वासोभिश्च महाधनैः । अमात्या ज्ञातयश्चैनं सुहृदश्चोपतस्थिरे ॥ ८ ॥ नृसिंहं नरयुक्तेन परमालङ्कृतेन तम् । अवहद्यानमुख्येन सह माद्र्या सुसंवृतम् ॥ ९ ॥ पाण्डुरेणातपत्रेण चामरव्यजनेन च । सर्ववादित्रमादेश्च समलञ्चक्रिरे ततः ॥ १० ॥ रत्नानि चाप्युपादाय बहूनि शतशो नराः । ददुः काङ्क्षमाणेभ्यः पाण्डोरस्यौर्द्धदेहिके ॥ ११ ॥ अथच्छत्राणि

शुभ्राणि चामराणि वृहन्ति च। आजह्रुः कौरवस्यार्थे वासांसि रुचिराणि च ॥ १२ ॥ याजकैः शुक्लवासोभिर्ह्रियमाना ऋताग्नयः। अगच्छन्नग्रतस्तस्य दीप्यमानाः स्वलङ्कृताः ॥ १३ ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव सहस्रशः। रुदन्तः शोकसन्तप्ता अनुजग्मुर्नराधिपम् ॥ १४ ॥ अयमस्मानपाहाय दुःखे चाधाय शाश्वते। क्वत्वा चास्माननाथांश्च क्व यास्यसि नराधिप ॥ १५ ॥ क्रोशन्तः पाण्डवाः सर्वे भीष्मो विदुर एव च। रमणीये वनोद्देशे गङ्गातीरे समे शुभे ॥ १६ ॥ न्यासयामासुरथ तां शिबिकां सत्यवादिनः। सभार्य्यस्य नृसिंहस्य पाण्डोरक्लिष्टकर्मणः ॥ १७ ॥ ततस्तस्य शरीरन्तु सर्वगन्धाधिवासितम्। शुचिकालीयकाद्यग्र्यं दिव्यचन्दनरूषितम् ॥ १८ ॥ मर्ष्यषिञ्चन् जलेनाशु शातकुम्भमयैर्घटैः। चन्दनेन च शुक्लेन सर्वतः समलेपयन् ॥ १९ ॥ कालागुरुविमिश्रेण तथा तुङ्गरसेन च। अथैनं देशजैः शुक्लैर्वासोभिः समयोजयन् ॥ २० ॥ संच्छन्नः स तु वासोभिर्जीवन्निव नराधिपः। शुशुभे स नरव्याघ्रो महार्हशयनोचितः ॥ २१ ॥ याजकैरभ्यनुज्ञाते प्रेतकर्मण्यनुष्ठिते। घृतावसिक्तं राजानं सह माद्र्या स्वलङ्कृतम् ॥ २२ ॥ तुङ्गपद्मविमिश्रेण चन्दनेन सुगन्धिना। अन्यैश्च विविधैर्गन्धैर्विधिना समदाहयन् ॥ २३ ॥ ततस्तयोः शरीरे द्वे दृष्ट्वा मोहवशं गता। हा हा पुत्रेति कौशल्या पपात सहसा भुवि ॥ २४ ॥ तां प्रेक्ष्य पतितामार्त्तां पौरजानपदो जनः। रुरोद दुःखसन्तप्तो राजभक्त्या कृपान्वितः ॥ २५ ॥ कुन्त्याश्चैवार्त्तनादेन सर्वाणि च विचुक्रुशुः। मानुषैः सह भूतानि तिर्य्यग्योनिगतान्यपि ॥ २६ ॥ तथा भीष्मः शान्तनवो विदुरश्च महामतिः। सर्वशः कौरवाश्चैव प्राणदन् भृशदुःखिताः ॥ २७ ॥ ततो भीष्मोऽथ विदुरो राजा च सह पाण्डवैः। उदकं चक्रिरे तस्य सर्वाश्च कुरुयोषितः ॥ २८ ॥

चक्रुः पाण्डवाः सर्वे भीष्मः प्राप्तनवस्तथा। विदुरो ज्ञातयश्चैव चक्रुश्चाप्युदकक्रियाः ॥ २९ ॥ कृतोदकांस्तानादाय पाण्डवाञ्शोककर्षितान्। सर्वाः प्रकृतयो राजञ्शोचमाना न्यवारयन् ॥ ३० ॥ यथैव पाण्डवा भूमौ सुषुपुः सह बान्धवैः। तथैव नागरा राजन् शिश्यिरे ब्राह्मणादयः ॥ ३१ ॥ तद्बभूवानन्दमस्वस्थमाकुमारमहृष्टवत्। बभूव पाण्डवैः सार्द्धं नगरं हादयन्निव ॥ ३२ ॥

इत्यादिपर्वणि सम्भवपर्वणि पाण्डुदाहे सप्तविंशत्यधिकशततोऽध्यायः ॥ १२७ ॥

वैशम्पायन उवाच। ततः कुन्ती च राजा च भीष्मश्च सह बन्धुभिः। दद्युः श्राद्धन्ततदा पाण्डोः स्वधाश्रितमयं तदा ॥ १ ॥ कुरूंश्च विप्रमुख्यांश्च भोजयित्वा सहस्रशः। रत्नौघान्विप्रमुख्येभ्यो दत्त्वा ग्रामवरांस्तथा ॥ २ ॥ कृतशौचांस्ततस्तांस्तु पाण्डवान् भरतर्षभान्। आदाय विविशुः सर्वे पुरं वारणसाह्वयम् ॥ ३ ॥ सततं चानुशोचन्तस्तमेव भरतर्षभम्। पौरजानपदाः सर्वे सुतं स्वमिव बान्धवम् ॥ ४ ॥ श्राद्धावसाने तु तदा दृष्ट्वा तं दुःखितं जनम्। संमूढां दुःखशोकार्त्तां व्यासो मातरमब्रवीत् ॥ ५ ॥ अतिक्रान्तसुखाः कालाः पर्य्युपस्थितदारुणाः। प्रायः प्रायः पापिष्ठदिवसाः पृथिवी गतयौवना ॥ ६ ॥ बहुमायासमाकीर्णो नानादोषसमाकुलः। लुप्तधर्मक्रियाचारो घोरः कालो भविष्यति ॥ ७ ॥ कुरूणामनयाच्चापि पृथिवी न भविष्यति। गच्छ त्वं योगमास्थाय युक्ता वस तपोवने ॥ ८ ॥ माद्राश्चौरवं कुलस्यास्य घोरं रुद्ध्वमात्मनः। तथेति समनुज्ञाय सा प्रविश्याब्रवीत् स्नुषाम् ॥ ९ ॥ अम्बिके तव पौत्रस्य दुर्व्वयात्किल भारताः। सानुबन्धा

विनङ्क्ष्यन्ति पौराश्चैवेति नः श्रुतम् ॥ १० ॥ तत्कौशल्यामिमामार्त्तां पुत्रशोकाभिपीड़िताम्। वनमादाय भद्रं ते गच्छामि यदि मन्यसे ॥ ११ ॥ तथेत्युक्ता त्वम्बिकया भीष्ममामन्त्य सुव्रता। वनं ययौ सत्यवती स्नुषाभ्यां सह भारत ॥ १२ ॥ ताः सुघोरं तपस्तप्त्वा देव्यो भरतसत्तम। देहं त्यक्त्वा महाराज गतिमिष्टां ययुस्तदा ॥ १३ ॥

वैशम्पायन उवाच। अथाग्नवन्तो वेदोक्तान् संस्कारान् पाण्डवास्तदा। संव्यवर्द्धन्त भोगांस्ते भुञ्जानाः पितृवेश्मनि ॥१४॥ धार्त्तराष्ट्रैश्च सहिताः क्रीड़न्तो मुदिताः सुखम्। बालक्रीड़ासु सर्वासु विशिष्टास्तेजसाभवन् ॥ १५ ॥ जवे लक्ष्याभिहरणे भोज्ये पांशुविकर्षणे। धार्त्तराष्ट्रान् भीमसेनः सर्वान् स परिमर्दति ॥ १६ ॥ हर्षात् प्रक्रीड़मानांस्तान् दृष्ट्वा राजन्निलीयते। शिरःसु विनिगृह्यैतान् योधयामास पाण्डवः ॥ १७ ॥ शतमेकोत्तरं तेषां कुमाराणां महौजसाम्। एक एव निगृह्णाति नातिक्षुब्धोदरः ॥ १८ ॥ कक्षेषु च निगृह्यैनान्विनिहत्य बलाद्बली। चकर्ष क्रोशतो भूमौ दृष्टजानुशिरोंऽसकान् ॥ १९ ॥ दशबालान् जले क्रीड़न् भुजाभ्यां परिगृह्य सः। आस्ते स्म सलिले मग्नो मृतकल्पान्विसृजति ॥ २० ॥ फलानि वृक्षमारुह्य विचिन्वन्ति च ते यदा। तदा पादप्रहारेण भीमः कम्पयते द्रुमान् ॥ २१ ॥ प्रहारवेगाभिहता द्रुमा व्याघूर्णितास्ततः। सफलाः प्रपतन्ति स्म द्रुतं त्रस्ताः कुमारकाः ॥ २२ ॥ न ते नियुद्धे न जवे न योग्यासु कदाचन। कुमारा उत्तरं चक्रुः स्पर्द्धमाना वृकोदरम् ॥ २३ ॥ एवं स धार्त्तराष्ट्रांश्च स्पर्द्धमानो वृकोदरः। अप्रियेऽतिष्ठदत्यन्तं बाल्यान्न द्वेषचेतसा ॥ २४ ॥ ततो बलमतिख्यातं धार्त्तराष्ट्रः प्रतापवान्। भीमसेनस्य तज्ज्ञात्वा दुष्टभावमदर्शयत् ॥ २५ ॥ तस्य धर्मादपेतस्य पापानि परिपश्यतः।

मोहादैश्वर्य्यलोभाच्च भावा मतिरजायत ॥ २६ ॥ अयं बलवतां श्रेष्ठः कुन्तीपुत्रो वृकोदरः। मध्यमः पाण्डुपुत्राणां निकृत्या संनिगृह्यताम् ॥ २७ ॥ प्राणवान्विक्रमी चैव शौर्य्येण महतान्वितः। स्पर्द्धते चापि सहितानस्मानेको वृकोदरः ॥ २८ ॥ तन्नु सुप्तं पुरोद्याने गङ्गायां प्रक्षिपामहे। अथ तस्मादवरजं श्रेष्ठं चैव युधिष्ठिरम् ॥ २९ ॥ प्रसह्य बन्धने बद्ध्वा प्रशासिष्ये वसुन्धराम्। एवं स निश्चयं पापः कृत्वा दुर्य्योधनस्तदा। नित्यमेवान्तरप्रेक्षी भीमस्यासीन्महात्मनः ॥ ३० ॥ ततो जलविहारार्थं कारयामास भारत। चैलकम्बलवेश्मानि विचित्राणि महान्ति च ॥ ३१ ॥ सर्वकामैः सुपूर्णानि पताकोच्छ्रायवन्ति च। तत्र सञ्जनयामास नानागाराण्यनेकशः ॥ ३२ ॥ उदकक्रीडनं नाम कारयामास भारत। प्रमाणकोट्यां तं देशं स्थलं किञ्चिदुपेत्य च ॥ ३३ ॥ भक्ष्यं भोज्यञ्च पेयञ्च चोष्यं लेह्यमथापि च। उपाहृतं नरैस्तत्र कुशलैः सूदकर्मणि ॥ ३४ ॥ न्यवेदयंस्तत् पुरुषा धार्त्तराष्ट्राय वै तदा। ततो दुर्य्योधनस्तत्र पाण्डवानाञ्च दुर्मतिः ॥ ३५ ॥ गङ्गां चैवानुयास्याम उद्यानवनशोभिताम्। सहिता भ्रातरः सर्वे जलक्रीड़ामवाप्नुम ॥ ३६ ॥ एवमस्त्विति तं चापि प्रत्युवाच युधिष्ठिरः। ते रथैर्नगराकारैर्देशं जग्मुर्गजोत्तमैः ॥ ३७ ॥ निर्य्युर्नगराच्छूराः कौरवाः पाण्डवैः सह। उद्यानवनमासाद्य विहृत्य च महाजनम् ॥ ३८ ॥ विश्रान्ता वीरतां तदा वीराः सिंहा इव गिरेर्गुहाम्। उद्यानमभिपश्यन्तो भ्रातरः सर्व एव ते ॥ ३९ ॥ उपस्थानगृहैः शुभ्रैर्बलभीभिश्च शोभितम्। गवाक्षकैस्तथा जालैर्मन्दैः साङ्गारिकैरपि ॥ ४० ॥ संमार्जितं सौधकारैश्चित्रकारैश्च चित्रितम्। दीर्घिकाभिश्च पूर्णाभिस्तथा पुष्करिणीभिर्हि ॥ ४१ ॥ जलं तच्छुशुभे छन्नं पुष्पैर्जलरुहैस्तथा। प्रच्छन्ना वसुमती तथा पुष्पैर्व्यदृश्यत ॥ ४२ ॥ ततो-

प्रविष्टास्ते सर्वे पाण्डवाः कौरवाश्च ह । उपच्छन्नान् बहून् कामांस्ते भुञ्जन्ति ततस्ततः ॥ ४३ ॥ अथोद्यानवरे तस्मिंस्तथा क्रीडागताश्च ते । परस्परस्य वक्त्रेभ्यो ददुर्भक्ष्यांस्ततस्ततः ॥ ४४ ॥ ततो दुर्योधनः पापस्तस्मिन्भक्ष्ये कालकूटकम् । विषं प्रक्षेपयामास भीमसेनजिघांसया ॥ ४५ ॥ स्वयमुत्थाय चैवाथ हृदयेन क्षुरोपमः । स वाचाच्छतकल्पश्च भ्रातृवच्च सुहृत्तया ॥ ४६ ॥ स्वयं प्रक्षिपते भक्ष्यं बलं भीमस्य पापकृत् । प्रतीक्षितं च भीमेन तं वै दोषमजानता ॥ ४७ ॥ ततो दुर्योधनस्तत्र हृदयेन हसन्निव । कृतकृत्यमिवात्मानं मन्यते पुरुषाधमः ॥ ४८ ॥ ततस्ते सहिताः सर्वे जलक्रीडामकुर्वत । पाण्डवा धार्तराष्ट्राश्च तदा मुदितमानसाः ॥ ४९ ॥ क्रीडावसाने ते सर्वे शुचिवस्त्राः स्वलङ्कृताः । दिवसान्ते परिश्रान्ता विहृत्य च कुरूद्वहाः ॥ ५० ॥ विहारावसथेष्वेव वीरा वासमरोचयन् । श्रान्तस्तु बलवान् भीमो व्यायामाभ्यधिकं तदा ॥ ५१ ॥ वाहयित्वा कुमारांस्तान् जलक्रीडागतांस्तदा । प्रमाणकोट्यां वासार्थी सुष्वापावाप्य तत् स्थलम् ॥ ५२ ॥ शीतं वातं समासाद्य श्रान्तो मदविमोहितः । विषेण च परीताङ्गो निश्चेष्टः पाण्डुनन्दनः ॥ ५३ ॥ ततो बद्ध्वा लताः पाशैर्भीमं दुर्योधनः स्वयम् । सुतकल्पं तदा वीरं स्थलाज्जलमपातयत् ॥ ५४ ॥ स निःसंज्ञो जलस्यान्तमथ वै पाण्डवोऽविशत् । आक्रामन्नागभवनं तदा नागकुमारकान् ॥ ५५ ॥ ततः समेत्य बहुभिस्तदा नागैर्महाविषैः । अदश्यत भृशं भीमो महादंष्ट्रैर्विषोल्बणैः ॥ ५६ ॥ ततोऽस्य दश्यमानस्य तक्षिणं कालकूटकम् । हतं सर्पविषेणैव स्थावरं जङ्गमेन तु ॥ ५७ ॥ दंष्ट्राश्च दंष्ट्रिणां तेषां मर्मस्वपि निपातिताः । त्वचं नैवास्य विभिदुः सारत्वात् पृथुवक्षसः ॥ ५८ ॥ ततः प्रबुद्धः कौन्तेयः सर्वं संच्छिद्य बन्धनम् । पोथयामास तान् सर्वान् केचिद्भीताः प्रदुद्रुवुः ॥ ५९ ॥

हतावशेषा भीमेन सर्वे वासुकिमभ्ययुः। ऊचुश्च सर्पराजानं वासुकिं वासवोपमम् ॥ ६० ॥ अयं नरो वै नागेन्द्र त्वया बद्धा प्रवेशितः। यथा च नो मतिर्वीर विषपीतो भविष्यति ॥ ६१ ॥ निश्चेष्टोऽस्थाननुप्राप्तः स च दष्टोऽन्वबुध्यत। समंजस्यापि संदृक्ष्य बन्धनमाशु नः ॥ ६२ ॥ पोथयन्तं महाबाहुं त्वं चैनं त्रातुमर्हसि। ततो वासुकिरभ्येत्य नागैरनुगतस्तदा। पश्यति स्म महाबाहुं भीमं भीमपराक्रमम् ॥ ६३ ॥ आर्यकेण च दृष्टः स पृथायाः आर्यकेण च। तदा दौहित्रदौहित्रः परिष्वक्तः सुपीडितम्। ६४ ॥ सुप्रीतश्चाभवत्तस्य वासुकिः सुमहायशाः। अब्रवीत्तञ्च नागेन्द्रः किमस्य क्रियतां प्रियम् ॥ ६५ ॥ धनौघो रत्ननिचयो वसु चास्य प्रदीयताम्। एवमुक्तस्तदा नागो वासुकिं प्रत्यभाषत ॥ ६६ ॥ यदि नागेन्द्र तुष्टोऽसि किमस्य धनसञ्चयैः। रसमस्मिंवेत् कुमारोऽयं त्वयि प्रीते महाबलः। ६७ ॥ बलं नागसहस्रस्य यस्मिन् कुण्डे प्रतिष्ठितम्। यावत्पिबति बालोऽयं तावदस्मै प्रदीयताम् ॥ ६८ ॥ एवमस्त्विति तं नागं वासुकिः प्रत्यभाषत। ततो भीमस्तदा नागैः कृतस्वस्त्ययनः शुचिः। ६९॥ प्राङ्मुखश्चोपविष्टः स रसं पिबति पाण्डवः। एकोच्छ्वासात्ततः कुण्डं पिबति स्म महाबलः ॥ ७० ॥ एवमष्टौ स कुण्डानि त्र्यपिबत्पाण्डुनन्दनः। ततस्तु शयने दिव्ये नागदत्ते महाभुजः। अशेत भीमसेनस्तु यथासुखमरिन्दमः ॥ ७१ ॥

इत्यादिपर्वणि सम्भवपर्वणि भीमसेनरसपाने अष्टत्रिंशदधिकशततोऽध्यायः ॥ १२८ ॥

वैशम्पायन उवाच । ततस्ते कौरवाः सर्वे विना भीमञ्च पाण्डवाः । हृत्तक्रीड़ाविहारास्तु प्रतस्थुर्गजसाह्वयम् ॥ १ ॥ रथैर्गजैस्तथा चाश्वैर्यानैश्चान्यैरनेकशः । ब्रुवन्तो भीमसेनस्तु यातो ह्यग्रत एव नः ॥ २ ॥ ततो दुर्योधनः पापस्तत्रापश्यन्पृष्टकोदरम् । भ्रातृभिः सहितो हृष्टो नगरं प्रविवेश ह ॥ ३ ॥ युधिष्ठिरस्तु धर्मात्मा ह्यविदन् पापमात्मनि । स्वेनानुमानेन परं साधुं समनुपश्यति ॥ ४ ॥ सोऽभ्युपेत्य तदा पार्थो मातरं भ्रातृवत्सलः । अभिवाद्याब्रवीत् कुन्तीमम्ब भीम इहागतः ॥ ५ ॥ क्व गतो भविता मातर्नेह पश्यामि तं शुभे । उद्यानानि वनञ्चैव विचितानि समन्ततः ॥ ६ ॥ तदर्थं न च तं वीरं दृष्टवन्तो वृकोदरम् । मन्यमानास्ततः सर्वे यातो नः पूर्वमेव सः ॥ ७ ॥ आगताः स्म महाभागे व्याकुलेनान्तरात्मना । इहागम्य क्व नु गतस्त्वया वा प्रेषितः क्व नु ॥ ८ ॥ कथयस्व महाबाहुं भीमसेनं यशस्विनि । न हि मे शुध्यते भावस्तं वीरं प्रति शोभने ॥ ९ ॥ यतः प्रसुप्तं मन्येऽहं भीमं नेति हतस्तु सः । इत्युक्ता च ततः कुन्ती धर्मराजेन धीमता । हा हेति कृत्वा संभ्रान्ता प्रत्युवाच युधिष्ठिरम् ॥ १० ॥ न पुत्र भीमं पश्यामि न मामभ्येत्यसाविति । शीघ्रमन्वेषणे यत्नं कुरु तस्यानुजैः सह ॥ ११ ॥ इत्युक्त्वा तनयं ज्येष्ठं हृदयेन विदूयता । क्षत्तारमानाय्य तदा कुन्ती वचनमब्रवीत् ॥ १२ ॥ क्व गतो भगवन् क्षत्तर्भीमसेनो न दृश्यते । उद्यानान्निर्गताः सर्वे भ्रातरो भ्रातृभिः सह ॥ १३ ॥ तत्रैकस्तु महाबाहुर्भीमो नाभ्येति मामिह । न च प्रीयायते चक्षुः सदा दुर्योधनस्य सः ॥ १४ ॥ क्रूरोऽसौ दुर्मतिः क्षुद्रो राज्यलुब्धोऽनपत्रपः । निहन्यादपि तं वीरं जातमन्युः सुयोधनः । तेन मे व्याकुलं चित्तं हृदयं दह्यतीव च ॥ १५ ॥

विदुर उवाच । मैवं वदस्व कल्याणि शेघसंरक्षणं कुरु ।

प्रत्यादिष्टो हि दुष्टात्मा शेषेऽपि प्रहरेत्तव ॥ १६ ॥ दीर्घायुष्मत्तव सुता यथोवाच महामुनिः। आगमिष्यति ते पुत्रं प्रीतिं चोत्पादयिष्यति ॥ १७ ॥

वैशम्पायन उवाच। एवमुक्त्वा ययौ विद्वान्विदुरः स्वं निवेशनम्। कुन्ती चिन्तापरा भूत्वा सहासीना सुतैर्गृहे ॥ १८ ॥ ततोऽष्टमे तु दिवसे प्रत्यबुध्यत पाण्डवः। तस्मिंस्तदा रसे जीर्णे सोऽप्रमेयबलो बली ॥ १९ ॥ तं दृष्ट्वा प्रतिबुध्यन्तं पाण्डवं ते भुजङ्गमाः। सान्त्वयामासुरव्यग्रा वचनं चेदमब्रुवन् ॥ २० ॥ यस्मे पीतो महाबाहो रसोऽयं वीर्यसम्मतः। तस्मान्नागायुतबलो रणेऽधृष्यो भविष्यसि ॥ २१ ॥ गच्छाद्य स्वगृहं स्नातो दिव्यैरेभिः शुभैर्जलैः। भ्रातरस्तेऽनुतप्यन्ति त्वां विना कुरुपुङ्गव ॥ २२ ॥ ततः स्नातो महाबाहुः शुचिः शुक्लाम्बरस्रजः। ततो नागस्य भवने कृतकौतुकमङ्गलः ॥ २३ ॥ ओषधीभिर्विषघ्नीभिः सुरभीभिर्विशेषतः। भुक्तवान् परमान्नञ्च नागैर्दत्तं महाबलैः ॥ २४ ॥ पूजितो भुजगैर्वीर आशीर्भिश्चाभिनन्दितः। दिव्याभरणसंच्छन्नो नागानामन्वयं पाण्डवः ॥ २५ ॥ उदतिष्ठत् प्रहृष्टात्मा नागलोकादरिन्दमः। उत्क्षिप्तः स तु नागेन जलात् जलरुहेक्षणः ॥ २६ ॥ तस्मिन्नेव वनोद्देशे स्थापितः कुरुनन्दनः। ते चान्तर्दधिरे नागाः पाण्डवस्यैव पश्यतः ॥ २७ ॥ तत उत्थाय कौन्तेयो भीमसेनो महाबलः। आजगाम महाबाहुर्मातुरन्तिकमञ्जसा ॥ २८ ॥ ततोऽभिवाद्य जननीं ज्येष्ठं भ्रातरमेव च। कनीयसः समाघ्राय शिरःस्परिविमर्दनः ॥ २९ ॥ तैश्चापि सम्परिष्वक्तः सह माता नरर्षभैः। अन्योन्यगतसौहार्दाद्दिष्ट्या दिष्ट्या ति चाब्रुवन् ॥ ३० ॥ ततस्तत्सर्वमाचष्ट दुर्योधनविचेष्टितम्। भ्रातॄणां भीमसेनश्च महाबलपराक्रमः ॥ ३१ ॥ नागलोके च यद्दृष्टं गुणदोषमशेषतः। तच्च सर्वमशेषेण कथयामास पाण्डवः

॥ ३२ ॥ ततो युधिष्ठिरो राजा भीममाह वचोऽर्थवत् । तूष्णीं भव न ते जल्प्यमिदं कार्य्यं कथञ्चन ॥ ३३ ॥ इतःप्रभृति कौन्तेया रक्षतान्योन्यमाहृताः । एवमुक्त्वा महाबाहुर्धर्मराजो युधिष्ठिरः ॥ ३४ ॥ भ्रातृभिः सहितः सर्वैरप्रमत्तोऽभवत्तदा । धर्मात्मा विदुरस्तेषां पार्थानां प्रददौ रतिम् ॥ ३५ ॥ ततो दुर्य्योधनस्तस्य पुनः प्राज्ञेपयद्विषम् । कालकूटं नवं तीक्ष्णं संभृतं लोमहर्षणम् ॥ ३६ ॥ वैश्यापुत्रस्तदाचष्ट पार्थानां हितकाम्यया । तत्रापि भुक्त्वाजरयद्विकारं वृकोदरः ॥ ३७ ॥ विकारं नाप्यजनयत् सुतीक्ष्णमपि तद्विषम् । भीमसंहननं भीमं तदप्यजरयत्ततः ॥ ३८ ॥ एवं दुर्य्योधनः कर्णः शकुनिश्चापि सौबलः । अनेकैरभ्युपायैस्तान् जिघांसन्ति स्म पाण्डवान् ॥ ३९ ॥ पाण्डवा अपि तत् सर्वं प्रत्यजानन्नमर्षिताः । उद्भावनमकुर्वन्तो विदुरस्य मते स्थिताः ॥ ४० ॥

इत्यादिपर्वणि सम्भवपर्वणि भीमप्रत्यागमने जतुगृहत्रिंशत्यधिकशततोऽध्यायः ॥ १२९ ॥

---:०:---

जनमेजय उवाच । ऋषेरापि मम ब्रह्मन् सम्भवं वक्तुमर्हसि । शरस्तम्बात्कथं जज्ञे कथं वास्त्राण्यवाप्तवान् ॥ १ ॥

वैशम्पायन उवाच । महर्षेर्गौतमस्यासीच्छरद्वान्नाम गौतमः । पुत्रः किल महाराज जातः सह शरैर्विभो ॥ २ ॥ न तस्य वेदाध्ययने तथा बुद्धिरजायत । यथास्य बुद्धिरभवद्धनुर्वेदे परन्तप ॥ ३ ॥ अधिजग्मुर्यथा वेदांस्तपसा ब्रह्मचारिणः । तथा स तपसोपेतः सर्वाण्यस्त्राण्यवाप ह ॥ ४ ॥ धनुर्वेदपरत्वाच्च तपसा त्रिपुलेन च । भृशं सन्तापयामास देवराज स गौतमः ॥ ५ ॥

ततो जानपदीं गाम देवकन्यां सुरेश्वरः । प्राहिणोत्तपसो विघ्नं कुरु तस्येति कौरव ॥ ६ ॥ सा हि गत्वाश्रमं तस्य रमणीयं शरद्वतः । धनुर्वाणधरं बाला लोभयामास गौतमम् ॥ ७ ॥ तामेकवसनां दृष्ट्वा गौतमोऽप्सरसं वने । लोकेऽप्रतिमसंस्थानां प्रोत्फुल्लनयनोऽभवत् ॥ ८ ॥ धनुश्च हि शरास्तस्य कराभ्यामपतद्भुवि । वेपथुश्चापि तां दृष्ट्वा शरीरे समजायत ॥ ९ ॥ स तु ज्ञानगरीयस्त्वात्तपसश्च समर्थनात् । अवतस्थे महाप्राज्ञो धैर्येण परमेण ह ॥ १० ॥ यस्तस्य सहसा राजन्विकारः समदृश्यत । तेन सुस्राव रेतोऽस्य स च तं नाबबुध्यत ॥ ११ ॥ धनुश्च सशरं त्यक्त्वा तथा कृष्णाजिनानि च । स विहायाश्रमं तच्च ताञ्चैवाप्सरसं मुनिः । जगाम रेतस्तत्तस्य शरस्तम्बे पपात च ॥ १२ ॥ शरस्तम्बे च पतितं द्विधा तदभवन्नृप । तस्माच्च मिथुनं जज्ञे गौतमस्य शरद्वतः ॥ १३ ॥ मृगयाञ्चरतो राज्ञः शान्तनोस्तु यदृच्छया । कश्चित्तेनाचरोऽरण्ये मिथुनं तदपश्यत ॥ १४ ॥ धनुश्च सशरं दृष्ट्वा तथा कृष्णाजिनानि च । ज्ञात्वा द्विजस्य चापत्ये धनुर्वेदान्तगस्य ह ॥ १५ ॥ स राज्ञे दर्शयामास मिथुनं सशरं धनुः । स तदादाय मिथुनं राजा च कृपयान्वितः ॥ १६ ॥ आजगाम गृहानेव मम पुत्रावितीति ब्रुवन् । ततः संवर्धयामास संस्कारैश्चाप्ययोजयत् ॥ १७ ॥ प्रातीपेयो नरश्रेष्ठो मिथुनं गौतमस्य तत् । गौतमोऽपि ततोऽभ्येत्य धनुर्वेदपरोऽभवत् ॥ १८ ॥ कृपया यन्मया बालाविमौ संवर्धितावितिति । तस्मात्कृपयोर्नाम चक्रे तदेव स महीपतिः ॥ १९ ॥ गोपितौ गौतमस्तत्र तपसा समविन्दत । आगत्य तस्मै गोत्रादि सर्वमाख्यातवांस्तदा ॥ २० ॥ चतुर्विधं धनुर्वेदं शास्त्राणि विविधानि च । निखिलेनास्य तत्सर्वं गुह्यमाख्यातवांस्तदा ॥ २१ ॥ सोऽचिरेणैव कालेन परमाचार्यतां गतः । ततोऽधिजगमुः

सर्वे ते धनुर्वेदं महारथाः ॥ २२ ॥ धृतराष्ट्रात्मजाश्चैव पाण्डवाः सह यादवैः । कृपायत्र कृपाचार्ये नानादेशसमागताः ॥ २३ ॥

इत्यादिपर्वणि सम्भवपर्वणि उपोद्घाते द्वितीयोऽधिकरणोऽध्यायः ॥ १३० ॥

वैशम्पायन उवाच । विशेषार्थी ततो भीष्मः पौत्राणां विनयेषुया । इष्वस्त्रज्ञान् पर्यपृच्छद्द्रोणाचार्यान्दीर्घसंमतान् ॥१॥ नात्यधीना महाभागस्त्रयाणामस्त्रकोविदः । नादेवसत्त्वो विनये कुरूनस्त्रे महाबलान् ॥ २ ॥ इति सञ्चिन्त्य गाङ्गेयस्तदा भरतसत्तमः । द्रोणाय वेदविदुषे भारद्वाजाय धीमते ॥ ३ ॥ पाण्डवान् कौरवांश्चैव ददौ शिष्यान्महारथान् । आस्तेतः पूजितश्चैव सम्यक्तेन महात्मना ॥ ४ ॥ स भीष्मेण महाभागस्तुष्टोऽस्त्रविदुषां वरः । प्रतिजग्राह तान् सर्वाञ्छिष्यत्वेन महायशाः ॥ ५ ॥ शिक्षयामास च द्रोणो धनुर्वेदमशेषतः । तेऽचिरेणैव कालेन सर्वास्त्रविशारदाः । बभूवुः कौरवा राजन् पाण्डवाश्चामितौजसः ॥ ६ ॥

जनमेजय उवाच । कथं समभवद्द्रोणः कथं चास्त्राण्यवाप्तवान् । कथञ्चागात् कुरून् ब्रह्मन् कस्य पुत्रः स वीर्यवान् ॥७॥ कथं चास्य सुतो जातः सोऽश्वत्थामास्त्रवित्तमः । एतदिच्छाम्यहं श्रोतुं विस्तरेण प्रकीर्तय ॥ ८ ॥

वैशम्पायन उवाच । गङ्गाद्वारं प्रति महान् बभूव भगवानृषिः । भरद्वाज इति ख्यातः सततं संशितव्रतः ॥ ९ ॥ सोऽभिषेक्तुं ततो गङ्गां पूर्वमेवागमन्नदीम् । महर्षिभिर्भरद्वाजो हविर्द्धानि चरन् पुरा ॥ १० ॥ ददर्शाप्सरसं साज्ञ घृताचीमाप्लुतामृषिः । रूपयौवनसम्पन्नां मदहृष्टां मदालसाम् ॥ ११ ॥ तस्याः

द्युनर्नदीतीरे वसनं पर्व्ववर्त्तत । व्यपकृष्टाम्बरां दृष्ट्वा तामृषि-श्चकमे ततः ॥ १२ ॥ तत्र संसक्तमनसो भरद्वाजस्य धीमतः । ततोऽस्य रेतश्चस्कन्द तद्द्रोणेऽथ आदधे ॥ १३ ॥ ततः समभव-द्द्रोणः कलशे तस्य धीमतः । अध्यगीष्ट स वेदांश्च वेदाङ्गानि च सर्वशः ॥ १४ ॥ अग्निवेशं महाभागं भरद्वाजः प्रतापवान् । प्रत्यपादयदाग्नेयमस्त्रमस्त्रविदां वरः ॥ १५ ॥ अग्नेस्तु जातः स मुनिस्ततो भरतसत्तम । भारद्वाजं तदाग्नेयं महास्त्रं प्रत्य-पाद्यत् ॥ १६ ॥ भरद्वाजसखा चासीत् पृषतो नाम पार्थिवः । तस्यापि द्रुपदो नाम तदा समभवत् सुतः ॥ १७ ॥ स नित्य-माश्रमं गत्वा द्रोणेन सह पार्थिवः । चिक्रीड़ाध्ययनञ्चैव चकार क्षत्रियर्षभः ॥ १८ ॥ ततो व्यतीते पृषते स राजा द्रुपदोऽभवत् । पाञ्चालेषु महावाङ्क्षत्तरेषु नरेश्वरः ॥ १९ ॥ भरद्वाजोऽपि भगवानारुरोह दिवं तदा । तत्रैव च वसन् द्रोणस्तपस्तेपे महातपाः ॥ २० ॥ वेदवेदाङ्गविद्वान् स तपसा दग्धकिल्बिषः । ततः पितृनियुक्तात्मा पुत्रलोभान्महायशाः ॥ २१ ॥ शारद्वतीं ततो भार्य्यां कृपीं द्रोणोऽन्वविन्दत । अग्निहोत्रे च धर्मे च दमे च सततं रताम् ॥ २२ ॥ अलभज्जौतमी पुत्रमश्वत्थामानमेव च । स जातमात्रो व्यनदद्यथैवोच्चैःश्रवा हयः ॥ २३ ॥ तच्छ्रुत्वा-न्तर्हितं भूतमन्तरीक्षस्थमब्रवीत् । अश्वस्येवास्य यत् स्थाम नदतः प्रदिशो गतम् । अश्वत्थामैव बालोऽयं तस्मान्नाम्ना भवि-ष्यति ॥ २४ ॥ सुतेन तेन सुप्रीतो भारद्वाजस्ततोऽभवत् । तत्रैव च वसन् धीमान्धनुर्वेदपरोऽभवत् ॥ २५ ॥ स ह्युपाव महात्मानं जामदग्न्यं परन्तपम् । सर्वज्ञानविदं विप्रं सर्वशस्त्रभृतां वरम् ॥ २६ ॥ ब्राह्मणेभ्यस्तदा राजन्दित्सन्तं वसु सर्वशः । स रामस्य धनुर्वेदं दिव्यान्यस्त्राणि चैव ह ॥ २७ ॥ श्रुत्वा तेषु मनश्चक्रे नीतिशास्त्रे तथैव च । ततः स व्रतिभिः शिष्यैस्तपोयुक्तैर्महा-

कृपाः ॥ २८ ॥ ततः प्रायान्महाबाहुर्महेन्द्रं पर्वतोत्तमम्। ततो महेन्द्रमासाद्य भारद्वाजो महातपाः ॥ २९ ॥ शान्तं दान्तमभित्वन्नमपश्यद्भृगुनन्दनम्। ततो द्रोणो ययौ शिष्यैरुपगम्य भृगूद्वहम् ॥ ३० ॥ आचख्यावात्मनो नाम जन्म चाङ्गिरसः कुले। निवेद्य शिरसा भूमौ पादौ चैवाभ्यवादयत् ॥ ३१ ॥ ततस्तं सर्वमुत्सृज्य वनं जिगमिषुं तदा। जामदग्न्यं महात्मानं भारद्वाजोऽब्रवीदिदम् ॥ ३२ ॥ भरद्वाजात्मसुत्पन्नं तपा त्वं मामयोनिजम्। आगतं वित्तकामं मां विद्धि द्रोणं द्विजोत्तमम् ॥ ३३ ॥ तमब्रवीन्महात्मा स सर्वक्षत्रियमर्दनः। स्वागतं ते द्विजश्रेष्ठ यदिच्छसि वदस्व मे ॥ ३४ ॥ एवमुक्तस्तु रामेण भारद्वाजोऽब्रवीद्वचः। रामं प्रहरतां श्रेष्ठं दित्सन्तं विविधं वसु। अर्थे धनमनन्तं हि प्रार्थये विपुलव्रत ॥ ३५ ॥

राम उवाच। हिरण्यं मम यच्चान्यद्वसु किञ्चिदिह स्थितम्। ब्राह्मणेभ्यो मया दत्तं सर्वमेतत्तपोधन ॥ ३६ ॥ तथैवेयं धरा देवी सागरान्ता सपत्तना। कश्यपाय मया दत्ता कृत्स्ना नगरमालिनी ॥ ३७ ॥ शरीरमात्रमेवाद्य ममेदमवशेषितम्। अस्त्राणि च महार्हाणि शस्त्राणि विविधानि च ॥ ३८ ॥ अस्त्राणि वा शरीरं वा वरयैतन्मयोद्यतम्। ब्रूहि किं प्रयच्छामि तुभ्यं द्रोण वदाशु तत् ॥ ३९ ॥

द्रोण उवाच। अस्त्राणि मे समग्राणि ससंहाराणि भार्गव। सप्रयोगरहस्यानि दातुमर्हस्यशेषतः ॥ ४० ॥ तथेत्युक्त्वा ततस्तस्मै प्रादादस्त्राणि भार्गवः। सरहस्यव्रतज्ञैव धनुर्वेदमशेषतः ॥ ४१ ॥ प्रतिगृह्य तु तत्सर्वं कृतास्त्रो द्विजसत्तमः। प्रियं सखायं सुप्रीतो जगाम द्रुपदं प्रति ॥ ४२ ॥

इत्यादिपर्वणि सम्भवपर्वणि द्रोणभार्गवसंवादे एकत्रिंशदधिकशततोऽध्यायः ॥ १३१ ॥

वैशम्पायन उवाच। ततो द्रुपदमासाद्य भारद्वाजः प्रतापवान्। अब्रवीत्पार्थिवं राजन् सख्यायं विद्धि मामिह ॥ १ ॥ दूत्येवमुक्तः सख्या स प्रीतिपूर्वं जनेश्वरः। भारद्वाजेन पाञ्चाल्यो नामृष्यत वचोऽस्य तत् ॥ २ ॥ स क्रोधामर्षजिह्मभ्रूः कषायीकृतलोचनः। ऐश्वर्यमदसम्मत्तो द्रोणं राजाब्रवीदिदम् ॥ ३ ॥

द्रुपद उवाच। अकृतेयं तव प्रज्ञा ब्रह्मन्नातिसमञ्जसी। यस्मां ब्रवीषि प्रसभं सखा तेऽहमिति द्विज ॥ ४ ॥ न हि राज्ञामुदीर्णानामेवं भूतैर्नरैः क्वचित्। सख्यं भवति मन्दात्मन् श्रिया हीनैर्दनच्युतैः ॥ ५ ॥ सौहृदान्यपि जीर्यन्ते कालेन परिजीर्यता। सौहृदं मे त्वया ह्यासीत् पूर्वं सामर्थ्यबन्धनम् ॥ ६ ॥ न सख्यमजरं लोके हृदि तिष्ठति कस्यचित्। कालो ह्येनं विकरति क्रोधो वैनं हरत्युत ॥ ७ ॥ सैवं जीर्णमुपास्य त्वं सख्यं भवदुपाश्रयि। आसीत्सख्यं द्विजश्रेष्ठ त्वया मेऽर्थनिबन्धनम् ॥ ८ ॥ न दरिद्रो वसुमतो नाविद्वान् विदुषः सखा। न शूरस्य सखा क्लीवः सखिपूर्वं किमिष्यते ॥ ९ ॥ ययोरेव समं वित्तं ययोरेव समं श्रुतम्। तयोर्विवाहः सख्यञ्च न तु पुष्टविपुष्टयोः ॥ १० ॥ नार्त्विजः याचियः याचियस्य नारथो रथिनः सखा। नाराजा पार्थिवस्यापि सखिपूर्वं किमिष्यते ॥ ११ ॥

वैशम्पायन उवाच। द्रुपदेनैवमुक्तस्तु भारद्वाजः प्रतापवान्। मुहूर्तं चिन्तयित्वा तु मन्युनाभिपरिप्लुतः ॥ १२ ॥ स विनिश्चित्य मनसा पाञ्चाल्यं प्रतिबुद्धिमान्। जगाम कुरुमुख्यानां नगरं नागसाह्वयम् ॥ १३ ॥

इत्यादिपर्वणि सम्भवपर्वणि द्रोणद्रुपदसंवादे द्वात्रिंशदधिकशततमोऽध्यायः ॥ १३२ ॥

वैशम्पायन उवाच। स नागपुरमागम्य गौतमस्य निवेशने। भारद्वाजोऽवसत्तत्र प्रच्छन्नं द्विजसत्तमः॥ १॥ ततोऽस्य तनुजः पार्थान् कृपस्यानन्तरं प्रभुः। अस्त्राणि शिक्षयामास नाबुध्यन्त च तं जनाः॥ २॥ एवं स तत्र गूढात्मा कञ्चित् कालमुवास ह। कुमाराश्चथ निष्क्रम्य समेता गजसाह्वयात्॥ ३॥ क्रीड़न्तो वीटया तत्र वीराः पथ्यं चरन्मुदा। पपात कूपे सा वीटा तेषां वै क्रीड़तां तदा॥ ४॥ ततस्ते यत्नमातिष्ठन्वीटासुद्धर्तुमाहताः। न च ते प्रत्यपद्यन्त कर्म वीटोपलब्धये॥ ५॥ ततोऽन्योन्यमवैक्षन्त व्रीड़यावनताननाः। तस्या योगमविन्दन्तो भृशं चोत्कण्ठिताभवन्॥ ६॥ तेऽपश्यन् ब्राह्मणं श्याममापन्नं पलितं कृशम्। कृत्यवन्तमदूरस्थमग्निहोत्रपुरस्कृतम्॥ ७॥ ते तं दृष्ट्वा महात्मानमुपगम्य कुमारकाः। भग्नोत्साहक्रियात्मानो ब्राह्मणं पर्य्यवारयन्॥ ८॥ अथ द्रोणः कुमारांस्तान् दृष्ट्वा कृत्यवतस्तदा। प्रहस्य मन्दं पैशल्यादभ्यभाषत वीर्य्यवान्॥ ९॥ अहो वो धिग्बलं चास्त्रं धिगेतां वः कृतास्त्रताम्। भरतस्यान्वये जाता ये वीटां नाधिगच्छत॥ १०॥ वीटाश्च मुद्रिकाश्चैव ह्यहमेतदपि द्वयम्। उद्धरेयमिषीकाभिर्भोजनं मे प्रदीयताम्॥ ११॥ एवमुक्ता कुमारांस्तान्द्रोणः स्वाङ्गुलिवेष्टनम्। कूपे निरुदके तस्मिन्नपातयदरिन्दमः। ततोऽब्रवीत्तदा द्रोणं कुन्तीपुत्रो युधिष्ठिरः॥ १२॥

युधिष्ठिर उवाच। कृपस्यानुमते ब्रह्मन् भिक्षामाशु हि गृह्यताम्। एवमुक्तः प्रत्युवाच प्रहस्य भरतानिदम्॥ १३॥

द्रोण उवाच। एषा मुष्टिरिषीकाणां मयास्त्रेणाभिमन्त्रिता। अस्त्रा वीर्य्यं निरीक्षध्वं यदन्यस्य न विद्यते॥ १४॥ भेत्स्याम्येषीकया वीटां तामिषीकां तथान्यया। तामन्यया समायोगे वीटाया ग्रहणं मम॥ १५॥

वैशम्पायन उवाच । ततो यथोक्तं द्रोणेन तत्सर्वं कृतमञ्जसा । तदवेक्ष्य कुमारास्ते विस्मयोत्फुल्ललोचनाः ॥ १६ ॥ आश्चर्यमिदमत्यन्तमिति मत्वा वचोऽब्रुवन् ।

कुमारा ऊचुः । सुद्रिकामपि विप्रर्षे शीघ्रमेतां समुद्धर ॥ १७ ॥

वैशम्पायन उवाच । ततः शरं समादाय धनुर्द्रोणो महायशाः । शरेण विद्ध्वा मुद्रां तामुर्ध्वमाबाध्यत् प्रभुः ॥ १८ ॥ सशरं समुपादाय कूपादङ्गुलिवेष्टनम् । ददौ ततः कुमाराणां विस्मितानामविस्मितः ॥ १९ ॥ सुद्रिकामुद्धृतां दृष्ट्वा तमाऊचुस्ते कुमारकाः ।

कुमारा ऊचुः । अभिवादामहे ब्रह्मन्नतोऽन्येषु विद्यते । कासि कस्यासि जानीमो वयं किं करवामहे ॥ २० ॥

वैशम्पायन उवाच । एवमुक्तस्ततो द्रोणः प्रत्युवाच कुमारकान् ॥ २१ ॥

द्रोण उवाच । आचक्षध्वञ्च भीष्माय रूपेण च गुणेन माम् । स एव सुमहातेजा, साम्प्रतं प्रतिपत्स्यते ॥ २२ ॥

वैशम्पायन उवाच । तथेत्युक्त्वा च गत्वा च भीष्ममूचुः कुमारकाः । ब्राह्मणस्य वचस्त्वथं तच्च कर्म तथाविधम् ॥ २३ ॥ भीष्मः श्रुत्वा कुमाराणां द्रोणञ्च प्रत्यजानत । शुक्ररूपः स हि गुरुरित्येवमनुचिन्त्य च ॥ २४ ॥ अथैनमानीय तदा स्वयमेव सुसत्कृतम् । परिपप्रच्छ निपुणं भीष्मः शस्त्रभृतां वरः । हेतुमागमने तत्र द्रोणः सर्वं न्यवेदयत् ॥ २५ ॥

द्रोण उवाच । महर्षेरग्निवेशस्य सकाशमहमच्युत । अस्त्रार्थमगमं पूर्वं धनुर्वेदचिकीर्षया ॥ २६ ॥ ब्रह्मचारी विनीतात्मा जटिलो वल्कलाः समाः । अवसं सुचिरं तत्र गुरुशुश्रूषणे रतः ॥ २७ ॥ पाञ्चाल्यो राजपुत्रश्च यज्ञसेनो महायतः । इष्वस्त्रहेतोर्न्यवसत्तस्मिन्नेव गुरौ प्रभुः ॥ २८ ॥ स मे तत्र सखा

आसीदुपकारी प्रियश्च मे । तेनाहं सह सङ्गम्य वर्त्तयन् सुचिरं प्रभो ॥ २८ ॥ बाल्यात् प्रभृति कौरव्य सहाध्ययनमेव च । स मे सखा तदा तत्र प्रियवादी प्रियङ्करः ॥ ३० ॥ अब्रवीदिति मां भीष्म वचनं प्रीतिवर्द्धनम् । अहं प्रियतमः पुत्रः पितुर्द्रोणस्य महात्मनः ॥ ३१ ॥ अभिषेक्ष्यति मां राज्ये स पाञ्चाल्यो यदा तदा । त्वद्भोग्यं भविता तात सखे सत्येन ते शपे ॥ ३२ ॥ मम भोगाश्च वित्तञ्च त्वदधीनं सुखानि च । एवमुक्त्वाथ वव्राज कृतास्त्रः पूजितो मया ॥ ३३ ॥ तच्च वाक्यमहं नित्यं मनसा धारयंस्तदा । सोऽहं पितुर्नियोगेन पुत्रलोभाद्यशस्विनीम् ॥ ३४ ॥ नातिकेशीं महाप्रज्ञामुपयेमे महाव्रताम् । अग्निहोत्रे च सत्रे च दमे च सततं रताम् ॥ ३५ ॥ अलभङ्गौतमी पुत्रमश्वत्थामानमौरसम् । भीमविक्रममकर्षणमादित्यसमतेजसम् ॥३६॥ पुत्रेण तेन प्रीतोऽहं भरद्वाजो मया यथा । गोक्षीरं पिबतो दृष्ट्वा धनिनस्तत्र पुत्रकान् । अश्वत्थामारुदद्बालस्तन्मे सन्देहयद्धियः ॥ ३७ ॥ न स्वातक्षोऽवसीदेत वर्त्तमानः स्वकर्मसु । इति सञ्चिन्त्य मनसा तं देशं बहुगो भ्रमन् ॥३८॥ विशुद्धमिच्छन् गाङ्गेय धर्मोपेतं प्रतिग्रहम् । अन्तान्तं परिक्रम्य नाभ्यगच्छं पयस्विनीम् ॥३९॥ अथ पिष्टोदकेनैनं लोभयन्ति कुमारकाः । पीत्वा पिष्टरसं बालः क्षीरं पीतं मयापि च ॥४०॥ ननर्त्तोत्थाय कौरव्य हृष्टो बाल्यादविमोहितः । तं दृष्ट्वा नृत्यमानन्तु बालैः परिवृतं सुतम् ॥४१॥ हास्यतामुपसम्प्राप्तं कश्मलं तत्र मेऽभवत् । द्रोणं धिगस्वधनिनं यो धनं नाधिगच्छति ॥४२॥ पिष्टोदकं सुतो यस्य पीत्वा क्षीरस्य तृष्णया । नृत्यति स्म मुदाविष्टः क्षीरं पीतं मयाप्युत ॥ ४३ ॥ इति सम्भाषतां वाचं श्रुत्वा मे बुद्धिरच्यवत् । आत्मानं चात्मना गर्हन्मनसेदं व्यचिन्तयम् ॥ ४४ ॥ अपि चाहं पुरा विप्रैर्वर्जितो गर्हितो वसे । परोपसेवां पापिष्ठां न च कुर्य्यां धनेप्सया ॥ ४५ ॥ इति मत्वा प्रियं

पुत्रं भीष्मादाय ततो ह्यहम् । पूर्वस्नेहानुरागित्वात्सदारः सोमकिं गतः ॥ ४६ ॥ अभिषिञ्चन्तु पुत्रेण कृतार्थोऽस्मीति चिन्तयन् । प्रियं सख्युः सुप्रीतो राज्यस्थं समुपागमम् । स्मरन् सङ्गमं चैव वचनं चैव तस्य तत् ॥ ४७ ॥ ततो द्रुपदमागम्य सखिपूर्वमहं प्रभो । अब्रुवं पुरुषव्याघ्र सख्युः विद्धि मामिति ॥ ४८ ॥ उपस्थितस्तु द्रुपदं सखिवच्चास्मि सङ्गतः । स मां निराकारमिव प्रहसन्निदमब्रवीत् ॥ ४९ ॥ अकृतेयं तव प्रज्ञा ब्रह्मन्नातिसमञ्जसी । यदाह्य मां त्वं प्रसभं सखा तेऽहमिति द्विज ॥ ५० ॥ सङ्गतानीह जीर्यन्ति कालेन परिजीर्यता । सौहृदं मे त्वया ह्यासीत् पूर्वं सामध्यबन्धनम् ॥ ५१ ॥ नाश्रोत्रियः श्रोत्रियस्य नारथी रथिनः सखा । साम्याद्धि सख्यं भवति वैषम्यान्नोपपद्यते ॥ ५२ ॥ न सख्यमजरं लोके विद्यते जातु कस्यचित् । कालो वैनं विहरति क्रोधो वैनं दहत्युत ॥ ५३ ॥ सेवं जीर्णमुपास्स्व त्वं सख्यं भवदुपाकृधि । आसीत्सख्यं द्विजश्रेष्ठ त्वया मेऽर्थनिबन्धनम् ॥ ५४ ॥ न ह्यनाप्तः सखाप्तस्य नाविद्वान्विदुषः सखा । न शूरस्य सखा क्लीबः सखिपूर्व किमिष्यते ॥ ५५ ॥ न हि राज्ञामुदीर्णानामेवं भूतैर्नरैः क्वचित् । सख्यं भवति मन्दात्मन् श्रिया हीनैर्धनच्युतैः ॥ ५६ ॥ नाश्रोत्रियः श्रोत्रियस्य नारथी रथिनः सखा । नाराजा पार्थिवस्यापि सखिपूर्वं किमिष्यते ॥ ५७ ॥ अहं त्वया न जानामि राज्यार्थं सख्विदं कृतम् । एकरात्रन्तु ते ब्रह्मन् कामं दास्यामि भोजनम् ॥५८॥ एवमुक्तस्त्वहं तेन सदारः प्रस्थितस्तदा । तां प्रतिज्ञां प्रतिज्ञाय यां कर्तास्म्यचिरादिव ॥ ५९ ॥ द्रुपदेनैवमुक्तोऽहं मन्युनाभिपरिप्लुतः । अभ्यागच्छं कुरून् भीष्म शिष्यैरर्थी गुणान्वितैः ॥ ६० ॥ ततोऽहं भवतः कामं सम्प्रधर्षयितुमागतः । इदं नागपुरं रम्यं ब्रूहि किं करवाणि ते ॥ ६१ ॥

वैशम्पायन उवाच । एवमुक्तस्तदा भीष्मो भारद्वाजमभाषत ॥ ६२ ॥

भीष्म उवाच । अर्घ्यं क्रियतां चार्घं साध्वर्हं प्रतिपाद्य । भुङ्क्ष्व भोगान् यशं प्रीतः पूज्यमानः कुरुष्वये ॥ ६३ ॥ कुरूणामस्ति यद्वित्तं राज्यं चेदं सराष्ट्रकम् । त्वमेव परमो राजा सर्वे च कुरवस्तव ॥ ६४ ॥ यच्च ते प्रार्थितं ब्रह्मन् कृतं तदिति चिन्त्यताम् । दिष्ट्या प्राप्तोऽसि विप्रर्षे मद्वान्धेऽनुग्रहः कृतः ॥ ६५ ॥

इत्यादिपर्वणि सम्भवपर्वणि भीष्मद्रोणसंवादे त्रयस्त्रिंशदधिकशततोऽध्यायः ॥ १३३ ॥

वैशम्पायन उवाच । ततः सम्पूजितो द्रोणो भीष्मेण द्विपदां वरः । विश्रश्राम महातेजाः पूजितः कुरुवेश्मनि ॥ १ ॥ विश्रान्तेऽथ गुरौ तस्मिन् पौत्रानादाय कौरवान् । शिष्यत्वेन ददौ भीष्मो वसूनि विविधानि च ॥ २ ॥ गृहञ्च सुपरिच्छन्नं धनधान्यसमाकुलम् । भारद्वाजाय सुप्रीतः प्रत्यपादयत प्रभुः ॥ ३ ॥ स ताञ्छिष्यान्महेष्वासः प्रतिजग्राह कौरवान् । पाण्डवान्धार्तराष्ट्रांश्च द्रोणो मुदितमानसः ॥ ४ ॥ प्रतिगृह्य च तान् सर्वान्द्रोणो वचनमब्रवीत् । रहस्येकः प्रतीतात्मा कृतोपसदनांस्तथा ॥ ५ ॥

द्रोण उवाच । कार्यं मे काङ्क्षितं किञ्चिद्धृदि सम्परिवर्तते । कृताञ्जलिं तत् प्रदेयं मे तदेतद्ब्रूतानघाः ॥ ६ ॥

वैशम्पायन उवाच । तच्छ्रुत्वा कौरवेयास्ते द्रुणीमासन्निगाम्यते । अर्जुनस्तु ततः सर्वं प्रतिजज्ञे परन्तप ॥ ७ ॥ ततोऽर्जुनं तदा मूर्ध्नि समाघ्राय पुनः पुनः । प्रीतिपूर्वं परिष्वज्य प्ररुरोद मुदा तदा ॥ ८ ॥ ततो द्रोणः पाण्डुपुत्रानस्त्राणि

विविधानि च । याहयामास दिव्यानि मानुषाणि च वीर्यवान् ॥ ९ ॥ राजपुत्रास्तथा चान्ये समेत्य भरतर्षभ । अभिजग्मुस्ततो द्रोणमस्त्रार्थे द्विजसत्तमम् ॥ १० ॥ हृष्टवच्चान्सकाश्चैव नानादेश्याश्च पार्थिवाः । सूतपुत्रश्च राधेयो गुरुं द्रोणमियात्तदा ॥ ११ ॥ सर्वमानस्तु पार्थेन सूतपुत्रोऽत्यमर्षणः । दुर्योधनं समाश्रित्य सोऽवमन्यत पाण्डवान् ॥ १२ ॥ अभ्ययात्स ततो द्रोणं धनुर्वेदचिकीर्षया । शिक्षाभुजबलोद्योगैस्तेषु सर्वेषु पाण्डवः ॥ १३ ॥ अस्त्रविद्यानुरागाच्च विशिष्टोऽभवदर्जुनः । तुल्येष्वस्त्रप्रयोगेषु लाघवे सौष्ठवेषु च ॥ १४ ॥ सर्वेषामेव शिष्याणां प्रभूताभ्यधिकोऽर्जुनः । ऐन्द्रिमप्रतिमं द्रोण उपदेशेष्वमन्यत ॥ १५ ॥ एवं सर्वकुमाराणामिष्वस्त्रं प्रत्यपादयत् । कमण्डलुञ्च सर्वेषां प्रायच्छच्चिरकारणात् ॥ १६ ॥ पुत्राय च ददौ कुम्भमविलम्बनकारणात् । यावत्ते नोपगच्छन्ति तावदस्त्रे परां क्रियाम् ॥ १७ ॥ द्रोण आचष्ट पुत्राय तत्कर्म जिष्णुरौक्षत । ततः स वारुणास्त्रेण पूरयित्वा कमण्डलुम् । समर्पयाञ्चकाराथ पुत्रेण गुरुमभ्येति फाल्गुनः ॥ १८ ॥ आचार्यपुत्रात्तस्मात्तु विशेषोपचये पृथक् । न व्यहीयत मेधावी पार्थोऽस्त्रविदां वरः ॥ १९ ॥ अर्जुनः परमं यत्नमातिष्ठद्गुरुपूजने । अस्त्रे च परमं योगं प्रियो द्रोणस्य चाभवत् ॥ २० ॥ तं दृष्ट्वा नित्यमुद्युक्तमिष्वस्त्रे प्रति फाल्गुनम् । आहूय वचनं द्रोणो रहः सूदमभाषत ॥ २१ ॥ अन्धकारेऽर्जुनायान्नं न देयं ते कदाचन । न चाख्येयमिदं चापि मद्वाक्यं विजये त्वया ॥ २२ ॥ ततः कदाचिद्भुञ्जाने प्रववौ वायुरर्जुने । तेन तत्र प्रदीपः स दीप्यमानो विलोपितः ॥ २३ ॥ भुङ्क्त एव तु कौन्तेयो नास्यादन्यत्र वर्त्तते । हस्तादोऽस्मिन्नस्त्रस्य अन्नग्रहणकारणात् ॥ २४ ॥ तदभ्यासकृतं मत्वा रात्रावपि स पाण्डवः । योग्यां चक्रे महाबाहुर्धनुषा पाण्डुनन्दनः ॥ २५ ॥

तस्य व्यात्तननिर्वीर्यं द्रोणः शुश्राव भारत । दृष्ट्वा चैनमुत्थाय परिष्वज्येदमब्रवीत् ॥ २६ ॥

द्रोण उवाच । प्रयतिष्ये तथा कर्तुं यथा नान्यो धनुर्धरः । त्वत्समो भविता लोके सत्यमेतद्ब्रवीमि ते ॥ २७ ॥

वैशम्पायन उवाच । ततो द्रोणोऽर्जुनं भूयो दृश्येषु च गजेषु च । रथेषु भूमावपि च रणशिक्षामशिक्षयत् ॥ २८ ॥ गदा-युद्धेऽसिचर्म्मण्यां तोमरप्रासशक्तिषु । द्रोणः सङ्कीर्णयुद्धे च शिक्षयामास कौरवान् ॥ २९ ॥ तस्य तत्कौशलं श्रुत्वा धनुर्वेद-जिघृक्षवः । राजानो राजपुत्राश्च समाजग्मुः सहस्रशः ॥ ३० ॥ ततो निषादराजस्य हिरण्यधनुषः सुतः । एकलव्यो महाराज द्रोणमभ्याजगाम ह ॥ ३१ ॥ न स तं प्रतिजग्राह नैषादिरिति चिन्तयन् । शिष्यं धनुषि धर्मज्ञस्तेषामेवान्ववेक्षया ॥ ३२ ॥ स तु द्रोणस्य शिरसा पादौ गृह्य परन्तपः । अरण्यमनुसम्प्राप्य कृत्वा द्रोणं महीमयम् ॥ ३३ ॥ तस्मिन्नाचार्यवृत्तिं च परमा-मास्थितस्तदा । इष्वस्त्रे योगमातस्थे परं नियममास्थितः ॥३४॥ परया श्रद्धयोपेतो योगेन परमेण च । विमोक्षादानसन्धाने लघुत्वं परमाप सः ॥ ३५ ॥ अथ द्रोणाभ्यनुज्ञाताः कदाचित् कुरुपाण्डवाः । रथैर्विनिर्ययुः सर्वे मृगयामरिमर्दनाः ॥ ३६ ॥ तत्रोपकरणं गृह्य नरः कश्चिद्यदृच्छया । राजन्ननुजगामैकः श्वानमादाय पाण्डवान् ॥ ३७ ॥ तेषां विचरतां तत्र तत्तत्कर्म चिकीर्षया । श्वा चरन् स वने मूढो नैषादिं प्रति जग्मिवान् ॥ ३८ ॥ स कृष्णमलदिग्धाङ्गं कृष्णाजिनजटाधरम् । नैषादिं श्वा समालक्ष्य भषंस्तस्थौ तदन्तिके ॥ ३९ ॥ तस्य तस्याथ भषतः शुनः सप्त शरान्मुखे । लाघवं दर्शयन्क्षिप्रे मुमोच युगपद्यथा ॥ ४० ॥ स तु श्वा शरपूर्णास्यः पाण्डवानाजगाम ह । तं दृष्ट्वा पाण्डवा वीराः परं विस्मयमागताः ॥ ४१ ॥ लाघवं शब्दवेधित्वं

दृष्ट्वा तत्परमं तदा। प्रेक्ष्य तं व्रीडिताश्चासन् प्रशशंसुश्च सर्वशः ॥ ४२ ॥ तं ततोऽन्वेषमाणास्ते वने वननिवासिनम्। ददृशुः पाण्डवा राजन्नस्यन्तमनिशं शरान् ॥ ४३ ॥ न चैनमभिजानंस्ते तदा विकृतदर्शनम्। तथैनं परिपप्रच्छुः को भवान् कस्य वेत्युत ॥ ४४ ॥

एकलव्य उवाच। निषादाधिपतेर्वीरा हिरण्यधनुषः सुतम्। द्रोणशिष्यञ्च मां वित्त धनुर्वेदकृतश्रमम् ॥ ४५ ॥

वैशम्पायन उवाच। ते तमाज्ञाय तत्त्वेन पुनरागम्य पाण्डवाः। यथावृत्तं वने सर्वं द्रोणायाचख्युरञ्जसा ॥ ४६ ॥ कौन्तेयस्त्वर्जुनो राजन्नेकलव्यमनुस्मरन्। रहो द्रोणं समासाद्य प्रणयादिदमब्रवीत् ॥ ४७ ॥

अर्जुन उवाच। तदाहं परिरभ्यैकः प्रीतिपूर्वमिदं वचः। भवतोक्तो न मे शिष्यस्त्वद्विशिष्टो भविष्यति ॥ ४८ ॥ अथ कस्मात्त्वद्विशिष्टो लोकादपि च वीर्यवान्। अन्योऽस्ति भवतः शिष्यो निषादाधिपतेः सुतः ॥ ४९ ॥

वैशम्पायन उवाच। मुहूर्त्तमिव तं द्रोणश्चिन्तयित्वा विनिश्चयम्। सव्यसाचिनमादाय नैषादिं प्रति जग्मिवान् ॥ ५० ॥ ददर्श मलदिग्धाङ्गं जटिलं चीरवाससम्। एकलव्यं धनुष्पाणिं मस्यन्तमनिशं शरान् ॥ ५१ ॥ एकलव्यस्तु तं दृष्ट्वा द्रोणमायान्तमन्तिकात्। अभिगम्योपसंगृह्य जगाम शिरसा महीम् ॥ ५२ ॥ पूजयित्वा ततो द्रोणं विधिवत्स निषादजः। निवेद्य शिष्यमात्मानं तस्थौ प्राञ्जलिरग्रतः ॥ ५३ ॥ ततो द्रोणोऽब्रवीद्राजन्नेकलव्यमिदं वचः। यदि शिष्योऽसि मे वीर वेतनं दीयतां मम। एकलव्यस्तु तच्छ्रुत्वा प्रीयमाणोऽब्रवीदिदम् ॥ ५४ ॥

एकलव्य उवाच। किं प्रयच्छामि भगवन्नाज्ञापयतु मां गुरुः। न हि किञ्चिददेयं मे गुरवे ब्रह्मवित्तम ॥ ५५ ॥

वैशम्पायन उवाच। तमब्रवीत्त्वयाङ्गुष्ठो दक्षिणा दीयतामिति। एकलव्यस्तु तच्छ्रुत्वा वचो द्रोणस्य दारुणम्॥ ५६॥ प्रतिज्ञामात्मनो रक्षन् सत्ये च नियतः सदा। तथैव हृष्टवदनस्तथैवादीनमानसः॥ ५७॥ छित्त्वा विचार्य्य तं प्रादाद्द्रोणायाङ्गुष्ठमात्मनः। ततः शरन्तु नैषादिरङ्गुलीभिर्व्यकर्षत। न तथा च स शीघ्रोऽभूत्यथा पूर्वं नराधिप॥ ५८॥ ततोऽर्जुनः प्रीतमना बभूव विगतज्वरः। द्रोणश्च सत्यवागासीन्नान्योऽभिभवितार्जुनम्॥ ५९॥ द्रोणस्य तु तदा शिष्यौ गदायोग्यौ बभूवतुः। दुर्य्योधनश्च भीमश्च सदा संरब्धमानसौ॥ ६०॥ अश्वत्थामा रहस्येषु सर्वेष्वभ्यधिकोऽभवत्। तथाति पुरुषानन्यान् ज्यारुकौ यमजावुभौ॥ ६१॥ युधिष्ठिरो रथिश्रेष्ठः सर्वत्र तु धनञ्जयः। प्रथितः सागरान्तायां रथयूथपयूथपः॥ ६२॥ बुद्धियोगबलोत्साहैः सर्वास्त्रेषु च निष्ठितः। अस्त्रे गुर्वनुरागे च विशिष्टोऽभवदर्जुनः॥ ६३॥ तुल्येष्वस्त्रोपदेशेषु सौष्ठवेन च वीर्य्यवान्। एकः सर्वकुमाराणां बभूवातिरथोऽर्जुनः॥ ६४॥ प्राणाधिकं भीमसेनं कृतविद्यं धनञ्जयम्। धार्त्तराष्ट्रा दुरात्मानो नाशयन्त परस्परम्॥ ६५॥ तांस्तु सर्वान् समानीय सर्वविद्यास्त्रशिक्षितान्। द्रोणः प्रहरणज्ञाने जिज्ञासुः पुरुषर्षभः॥ ६६॥ कृत्रिमं भासमारोप्य वृक्षाग्रे शिल्पिभिः कृतम्। अभिज्ञातं कुमाराणां लक्ष्यभूतमुपादिशत्॥ ६७॥

द्रोण उवाच। शीघ्रं भवन्तः सर्वेऽपि धनूंष्यादाय सर्वशः। भासमेतं समुद्दिश्य तिष्ठध्वं सन्धितेषवः॥ ६८॥ मदाक्यसमकालन्तु शिरोऽस्य विनिपात्यताम्। एकैकशो नियोक्ष्यामि तथा कुरुत पुत्रकाः॥ ६९॥

वैशम्पायन उवाच। ततो युधिष्ठिरं पूर्वमुवाचाङ्गिरसां वरः। सन्धत्स्व बाणं दुर्द्धर्ष मदाक्यान्ते विमुञ्च तम्॥ ७०॥

ततो युधिष्ठिरः पूर्वं धनुर्गृह्य परन्तपः। तस्थौ भाग्यं समुद्दिश्य गुरुवाक्यप्रचोदितः॥ ७१॥ ततो विततधन्वानं द्रोणास्तं कुरुनन्दनम्। स मुहूर्त्तादुवाचेदं वचनं भरतर्षभ॥ ७२॥ पश्यैनं त्वं द्रुमाग्रस्थं भासं नरवरात्मज। पश्यामीत्येवमाचार्यं प्रत्यवाच युधिष्ठिरः॥ ७३॥ स मुहूर्त्तादिव पुनर्द्रोणस्तं प्रत्यभाषत।

द्रोण उवाच। अथ वृक्षमिमं मां वा भ्रातॄन्वापि प्रपश्यसि॥ ७४॥ तमुवाच स कौन्तेयः पश्याम्येनं वनस्पतिम्। भवन्तञ्च तथा भ्रातॄन् भासञ्चेति पुनः पुनः॥ ७५॥ तमुवाचापसर्पेति द्रोणोऽप्रीतमना इव। नैतच्छक्यं त्वया वेद्धुं लक्ष्यमित्येव कुत्सयन्॥ ७६॥ ततो दुर्योधनादींस्तान्धार्त्तराष्ट्रान्महायशाः। तेनैव क्रमयोगेन जिज्ञासुः पर्य्यपृच्छत॥ ७७॥ अन्यांश्च शिष्यान् भीमादीन् राज्ञश्चैवान्यदेशजान्। तथा च सर्वे तत्सर्वं पश्याम इति कुत्सिताः॥ ७८॥

इत्यादिपर्वणि सम्भवपर्वणि द्रोणशिष्यपरीक्षायां चतुस्त्रिंशदधिकशततोऽध्यायः॥ १३४॥

वैशम्पायन उवाच। ततो धनञ्जयं द्रोणः स्थीयमानोऽभ्यभाषत। त्वयेदानीं प्रहर्त्तव्यमेतल्लक्ष्यं विलोक्यताम्॥ १॥ मदाज्ञासमकालं ते मोक्तव्योऽस्त्र भवेच्छरः। वितत्य कार्मुकं पुत्र तिष्ठ तावन्मुहूर्त्तकम्॥ २॥ एवमुक्तः सव्यसाची मण्डलीकृतकार्मुकः। तस्थौ भाग्यं समुद्दिश्य गुरुवाक्यप्रचोदितः॥ ३॥ मुहूर्त्तादिव तं द्रोणस्तथैव समभाषत। पश्यस्येनं स्थितं भाग्यं द्रुमं मामपि चार्जुन॥ ४॥ पश्याम्येकं भाग्यमिति द्रोणं पार्थोऽभ्यभाषत। न तु वृक्षं भवन्तं वा पश्यामीति च भारत॥ ५॥

ततः प्रीतमना द्रोणो सुङ्क्तीर्दिव तं पुनः । प्रत्यभाषत दुर्हर्षः पाण्डवानां महारथम् ॥ ६ ॥ भासं पश्यसि यद्येनं तथा ब्रूहि पुनर्वचः । शिरः पश्यामि भासस्य न गात्रमिति सोऽब्रवीत् ॥७॥ अर्जुनेनैवमुक्तस्तु द्रोणो हृष्टतनूरुहः । सुङ्क्तस्येत्यब्रवीत्पार्थं स सुमोचाविचारयन् ॥ ८ ॥ ततस्तस्य नगस्थस्य क्षुरेण निशितेन च । शिरश्चतुष्कृत्य तरसा पातयामास पाण्डवः ॥ ९ । तस्मिन् कर्मणि संसिद्धे पर्ज्यञ्जत पाण्डवम् । मेने च द्रुपदं संख्ये सानुबन्धं पराजितम् । १० ॥ कस्यचित्त्वथ कालस्य सशिष्यो-ऽङ्गिरसां वरः । जगाम गङ्गामभितो मज्जितुं भरतर्षभ ॥११॥ अवगाढमथो द्रोणं सलिले सलिलेचरः । ग्राहो जग्राह बल-वान्कालान्ते कालचोदितः ॥ १२ ॥ स समर्थोऽपि मोक्षाय शिष्यान् सर्वानचोदयत् । ग्राहं हत्वा मोक्षयध्वं मामिति त्वरय-न्निव ॥१३॥ तद्वाक्यसमकालन्तु बीभत्सुर्निशितैः शरैः । अवार्ध्यैः पञ्चभिर्ग्राहं मग्नमम्भस्यताड़यत् ॥ १४ ॥ इतरे त्वथ संमूढास्तत्र तत्र प्रपेदिरे । तन्तु दृष्ट्वा क्रियोपेतं द्रोणोऽमन्यत पाण्डवम् ॥ १५ ॥ विशिष्टं सर्वशिष्येभ्यः प्रीतिमांश्चाभवत्तदा । स पार्थ-बाणैर्बहुधा खण्डशः परिकल्पितः ॥ १६ ॥ ग्राहः पञ्चत्वमापेदे जङ्घां त्यक्त्वा महात्मनः । अथाब्रवीन्महात्मानं भारद्वाजो महा-रथम् ॥ १७ ॥ गृह्यतामं महाबाहो विशिष्टमतिदुर्द्धरम् । अस्त्रं ब्रह्मशिरो नाम सप्रयोगनिवर्त्तनम् ॥ १८ ॥ न च ते मानुषे-ष्वेतत् प्रयोक्तव्यं कथञ्चन । जगद्विनिर्दहेदेतदस्त्रतेजसि पातितम् ॥ २० ॥ असामान्यमिदं तात लोकेष्वस्त्रं निगद्यते । तद्धारयेथाः प्रयतः शृणु चेदं वचो मम ॥ २१ ॥ बाधेतामानुषः शत्रुर्यदि त्वां वीर कश्चन । तद्वधाय प्रयुञ्जीथास्तदस्त्रमिदमाहवे ॥ २२ ॥ तथेति स प्रतिश्रुत्य बीभत्सुः प्रकृताञ्जलिः । जग्राह परमास्त्रं तदाह चैनं पुनर्गुरुः ॥ २३ ॥ भविता त्वत्समो

नान्यः पुमाल्लोके धनुर्द्धरः। अजेयः सर्वशत्रूणां कीर्त्तिमांश्च भविष्यसि ॥ २४ ॥

इत्यादिपर्वणि सम्भवपर्वणि द्रोणग्राहमोचने पञ्चत्रिंशदधिकशततोऽध्यायः ॥ १३५ ॥

—०:०—

वैशम्पायन उवाच। कृतास्त्रान्धार्त्तराष्ट्रांश्च पाण्डुपुत्रांश्च भारत। दृष्ट्वा द्रोणोऽब्रवीद्राजन् धृतराष्ट्रं जनेश्वरम् ॥ १ ॥ कृपस्य सोमदत्तस्य बाह्लीकस्य च धीमतः। गाङ्गेयस्य च सान्निध्ये व्यासस्य विदुरस्य च ॥ २ ॥ राजन् संप्राप्तविद्यास्ते कुमाराः कुरुसत्तम। ते दर्शयेयुः स्वां शिक्षां राजन्ननुमते तव ॥ ३ ॥ ततोऽब्रवीन्महाराजः प्रहृष्टेनान्तरात्मना।

धृतराष्ट्र उवाच। भारद्वाज महत्कर्म कृतं ते द्विजसत्तम। यदानुमन्यसे कालं यस्मिन्देशे यथा यथा। तथा तथा विधानाय स्वयमाज्ञापयस्व माम् ॥ ४ ॥ स्मृत्वास्मद्य निर्वेदात् पुरुषाणां सचक्षुषाम्। अस्महेतोः पराक्रान्तान्ये मे द्रक्ष्यन्ति पुत्रकान् ॥ ५ ॥ चक्षुर्यद्गुरुराचार्य्यो ब्रवीति कुरु तत्तथा। न ह्येतद्यं प्रियं मन्ये भविता धर्मवत्सल ॥ ६ ॥ ततो राजानमामन्त्र्य निर्गतो विदुरो बहिः। भारद्वाजो महाप्राज्ञो मापयामास मेदिनीम् ॥ ७ ॥ समामट्टां निर्गुल्मामुदक्प्रस्रवणान्विताम्। तस्यां भूमौ बलिं चक्रे तिथौ नक्षत्रपूजिते ॥ ८ ॥ अवघुष्टे समाजे च तदर्थं वदतां वरः। रङ्गभूमौ सुविपुलं शास्त्रदृष्टं यथाविधि ॥ ९ ॥ प्रेक्षागारं सुविहितं चक्रुस्ते तस्य शिल्पिनः। राज्ञः सर्वायुधोपेतं स्त्रीणाञ्चैव नरर्षभ ॥ १० ॥ मञ्चांश्च कारयामासुस्तत्र जानपदा जनाः। विपुलानुच्छ्रयोपेताञ्जविकाश्च महाधनाः ॥ ११ ॥ तस्मिंस्ततोऽहनि प्राप्ते राजा सस्मचिवस्तदा। भीष्मं प्रमुखतः

कृत्वा रूपं चाचार्यं सत्तमम् ॥ १२ ॥ मुक्ताजालपरिक्षिप्तं वैदूर्य-मणिशोभितम् । शातकुम्भमयं दिव्यं प्रेक्षागारमुपागमत् ॥ १३ ॥ गान्धारी च महाभागा कुन्ती च जयतांवर । स्त्रियश्च राज्ञः सर्वाश्चाः सप्रेष्याः सपरिच्छदाः ॥ १४ ॥ कृपादारुरुहुर्मञ्चान् मेरुं देवस्त्रियो यथा । ब्राह्मणक्षत्रियाद्याश्च चातुर्वर्ण्यं पुरादुतम् ॥ १५ ॥ दर्शनेषु समभ्यागात् कुमाराणां कृतास्त्रताम् । क्षणेनैकस्थतां तत्र दर्शनेषु जगाम ह ॥ १६ ॥ प्रवादितैश्च वादित्रैर्जनकौतूहलेन च । महार्णव इव क्षुब्धः समाजः सोऽभवत्तदा ॥ १७ ॥ ततः शुक्लाम्बरधरः शुक्लयज्ञोपवीतवान् । शुक्लकेशः सितश्मश्रुः शुक्लमाल्यानुलेपनः ॥ १८ ॥ रङ्गमध्यं तदाचार्यः सपुत्रः प्रविवेश ह । नभो जलधरैर्हीनं साङ्गारक इवांशुमान् ॥ १९ ॥ स यथासमयं चक्रे बलिं बलवतांवरः । ब्राह्मणांस्तु सुमन्त्रज्ञान् कारयामास मङ्गलम् ॥ २० ॥ सुखपुण्याहघोषस्य पुण्यस्य समनन्तरम् । विविशुर्विविधं गृह्य शस्त्रोपकरणं नराः ॥ २१ ॥ ततो बद्धाङ्गित्राणा बद्धकक्षा महारथाः । बद्धगुणाः सधनुषो विविशुर्भरतर्षभाः ॥ २२ ॥ अनुज्येष्ठन्तु ते तत्र युधिष्ठिरपुरोगमाः । चक्रुरस्त्रं महावीर्याः कुमाराः परमाद्भुतम् ॥ २३ ॥ केचिच्छराक्षेपभयाच्छिरांस्यवननामिरे । मनुजा दृष्टमपरे वीक्षाञ्चक्रुः सुविस्मिताः ॥ २४ ॥ ते स्म लक्ष्याणि बिभिदुर्बाणैर्नामाङ्कशोभितैः । विविधैर्लाघवोत्कृष्टैरस्त्रज्ञो वाजिभिर्हृतम् ॥ २५ ॥ तत् कुमारबलं तत्र गृहीतशरकार्मुकम् । गन्धर्वनगराकारं प्रेक्ष्य ते विस्मिताभवन् ॥ २६ ॥ सहसा चुक्रुशुश्चान्ये नराः शतसहस्रशः । विस्मयोत्फुल्लनयनाः साधुसाध्विति भारत ॥ २७ ॥ कृत्वा धनुषि ते मार्गान् रथचर्यासु चासकृत् । गजपृष्ठेऽश्वपृष्ठे च नियुद्धे च महाबलाः ॥ २८ ॥ गृहीतखड्गचर्माणस्ततो भूयः प्रहारिणः । स्खरमार्गान् ययौ-

दृष्टांश्चेदः सर्वासु भूमिषु ॥ २९ ॥ लाघवं सौष्ठवं शोभां स्थिरत्वं दृढमुष्टिताम् । दृष्ट्वातत्र सर्वेषां प्रयोगं षड्गचर्मणोः ॥ ३० ॥ अथ तौ नित्यसंहृष्टौ सुयोधनवृकोदरौ । अवतीर्णौ गदाहस्तावेकध्वजाविवाचलौ ॥ ३१ ॥ वङ्गकच्छौ महावीर्यौ पौरुषे पर्य्यवस्थितौ । दंष्ट्रिणौ वासिताहेतोः समदाविव कुञ्जरौ ॥ ३२ ॥ तौ प्रदक्षिणसव्यानि मण्डलानि महाबलौ । चेरतुर्निर्मलगदौ समदाविव कुञ्जरौ ॥ ३३ ॥ विदुरो धृतराष्ट्राय गान्धार्य्याः पाण्डवारणिः । न्यवेदयेतां त्वत्पुत्रं कुमाराणां विचेष्टितम् ॥ ३४ ॥

इत्यादिपर्वणि सम्भवपर्वण्यस्त्रदर्शने षट्त्रिंशदधिकशततोऽध्यायः ॥ १३६ ॥

---०:०---

वैशम्पायन उवाच । कुरुराजे हि रङ्गस्थे भीमे च बलिनांवरे । पक्षपातकृतद्वेषः स हिधेवाभवज्जनः ॥ १ ॥ हा वीर कुरुराजेति हा भीम इति जल्पताम् । मुखानां सुविपुलाः प्रणादाः सहसोत्थिताः ॥ २ ॥ ततः क्षुब्धार्णवनिभं रङ्गमालोक्य बुद्धिमान् । भारद्वाजः प्रियं पुत्रमश्वत्थामानमब्रवीत् ॥ ३ ॥

द्रोण उवाच । वारयैतौ महावीर्यौ कृतयोग्यावुभावपि । माभूद्भ्रातृप्रकोपेऽयं भीमदुर्योधनोद्भवः ॥ ४ ॥

वैशम्पायन उवाच । ततस्तावुद्यतगदौ गुरुपुत्रेण वारितौ । युगान्तानिलसंक्षुब्धौ महावेलाविवार्णवौ ॥ ५ ॥ ततो रङ्गाङ्गणगतो द्रोणो वचनमब्रवीत् । निवार्य्य वादित्रगणं मेघनिर्घोषनिस्वनम् ॥ ६ ॥ यो मे पुत्रात् प्रियतरः सर्वास्त्रविशारदः । ऐन्द्रिरिन्द्रानुजसमः स पार्थो दृश्यतामिति ॥ ७ ॥ आचार्य्यवचनेनाथ कृतस्वस्त्ययनो युवा । बद्धगोधाङ्गुलित्राणः पूर्णतूणः सकार्मुकः ॥ ८ ॥ काञ्चनं कवचं बिभ्रत् प्रत्यदृश्यत फाल्गुनः । सार्कः

सेन्द्रायुधतड़ित् सस्तन्य इव तोयदः ॥ ९ ॥ ततः सर्वस्य रङ्गस्य समुत्पिञ्जलकोऽभवत् । प्रावाद्यन्त च वाद्यानि सशङ्खानि समन्ततः ॥ १० ॥ एष कुन्तीसुतः श्रीमानेष मध्यमपाण्डवः । एष पुत्रो महेन्द्रस्य कुरूणामेष रक्षिता ॥ ११ ॥ एषोऽस्त्रविदुषां श्रेष्ठ एष धर्मभृतां वरः । एष शीलवतां चापि शीलज्ञाननिधिः परः ॥ १२ ॥ इत्येवं तुमुला वाचः शुश्रुवुः प्रेक्षकेरिताः । कुन्त्याः प्रस्रवसंयुक्तैरश्रुभिः क्लिन्नमुरोऽभवत् ॥ १३ ॥ तेन शब्देन महता पूर्णश्रुतिरथाब्रवीत् । धृतराष्ट्रो नरश्रेष्ठो विदुरं हृष्टमानसः ॥ १४ ॥ क्षत्तः शुश्राव किमेष सुमहास्वनः । सहसैवोत्थितो रङ्गे भिन्दन्निव नभस्तलम् ॥ १५ ॥

विदुर उवाच । एष पार्थो महाराज फाल्गुनः पाण्डुनन्दनः । अवतीर्णः सकवचस्तलैष सुमहास्वनः ॥ १६ ॥

धृतराष्ट्र उवाच । धन्योऽस्म्यनुगृहीतोऽस्मि रक्षितोऽस्मि महामते । पृथारणिसमुद्भूतैस्त्रिभिः पाण्डवपावकैः ॥ १७ ॥

वैशम्पायन उवाच । तस्मिन् प्रमुदिते रङ्गे कथञ्चित् प्रत्युपस्थिते । दर्शयामास बीभत्सुराचार्य्यायास्त्रलाघवम् ॥ १८ ॥ आग्नेयेनास्त्रजहृक्षं वारुणेनास्त्रजत्ययः । वायव्येनास्त्रजहायुं पार्ज्जन्येनास्त्रजन्नगान् ॥ १९ ॥ भौमेन प्राविशद्भूमिं पार्वतेनाभवद्गिरिः । अन्तर्धानेन चास्त्रेण पुनरन्तर्हितोऽभवत् ॥ २० ॥ क्षणात्प्रांशुः क्षणाद्ध्रस्वः क्षणाच्च रथधूर्गतः । क्षणेन रथमध्यस्थः क्षणेनावतरन्भुवि ॥ २१ ॥ सुकुमारश्च सूक्ष्मश्च गुरुश्चापि गुरुप्रियः । सौष्ठवेनाभिसंपन्नः सोऽविध्यद्विविधैः शरैः ॥ २२ ॥ भ्रमतश्च वराहस्य क्रौडस्य प्रमुखे समम् । पञ्चबाणानसंसक्तान् संसमोचैकबाणवत् ॥ २३ ॥ गव्ये विषाणकोषे च चले रज्ज्वबलम्बिनि । निचखान महावीर्यः शायकानेकविंशतिम् ॥ २४ ॥ इत्येवमादि सुमहत् खड्गे धनुषि चानघ । गदायां शस्त्रकुशलो

मण्डलानि प्रदर्शयन् ॥ २५ ॥ ततः समाप्तभूयिष्ठे तस्मिन् कर्मणि भारत । मन्दीभूते समाजे च वादित्रस्य च निःस्वने ॥ २६ ॥ द्वारदेशात्समुद्भूतो माहात्म्यबलसूचकः । वज्रनिष्पेषसदृशः प्रादुरासीन्महान्स्वनः ॥ २७ ॥ दीर्व्यन्ते किं नु गिरयः किंस्विद्भूमिर्विदीर्व्यते । किंस्विदापूर्व्यते व्योम जलधाराघनैर्घनैः ॥ २८ ॥ रङ्गस्यैवं मतिरभूत् तस्मिन्स वसुधाधिप । द्वारस्याभिमुखाः सर्वे बभूवुः प्रेक्षकास्तदा ॥ २९ ॥ पञ्चभिर्भ्रातृभिः पार्थैर्द्रौणिः परिवृतो बभौ । पञ्चतारेण संयुक्तः सावित्रेणेव चन्द्रमाः ॥ ३० ॥ अवस्थाप्य च सहितं भ्रातॄणां शतमूर्जितम् । दुर्य्योधनमभिप्रस्थितं पर्य्यवारयत् ॥ ३१ ॥ स तैस्तदा भ्रातृभिरुद्यतायुधैर्गदाग्रपाणिः क्रमवस्थितैर्वृतः । बभौ यथा दानवसंक्षये पुरा पुरन्दरो देवगणैः समावृतः ॥ ३२ ॥

इत्यादिपर्वणि सम्भवपर्वण्यस्त्रदर्शने सप्तत्यधिकशततमोऽध्यायः ॥ १७७ ॥

—०:०—

वैशम्पायन उवाच । दत्तेऽवकाशे पुरुषैर्विस्मयोत्फुल्ललोचनः । विवेश रङ्गं विस्तीर्णं कर्णः परपुरञ्जयः ॥ १ ॥ सहजं कवचं बिभ्रत् कुण्डलोद्योतिताननः । सधनुर्बद्धनिस्त्रिंशः पादचारीव पर्वतः ॥ २ ॥ कन्यागर्भः पृथुयशाः पृथायाः पृथुलोचनः । तीक्ष्णांशोर्भास्करस्यांशः कर्णोऽरिगणसूदनः ॥ ३ ॥ सिंहप्रभगजेन्द्राणां तुल्यवीर्य्यपराक्रमः । दीप्तिकान्तिद्युतिगणैः सूर्य्येन्दुज्वलनोपमः ॥ ४ ॥ प्रांशुः कनकतालाभः सिंहसंहननो युवा । असंख्येयगुणः श्रीमान् भास्करस्यात्मसम्भवः ॥ ५ ॥ स निरीक्ष्य महाबाहुः सर्वतो रङ्गमण्डलम् । प्रणामं द्रोणकृपयोर्न्यस्या-

हृतमिवाकरोत् ॥ ६ ॥ स समाजजनः सर्वो निश्चलः स्थिरलोचनः । कोऽयमित्यागतक्षोभः कौतूहलपरोऽभवत् ॥ ७ ॥ सोऽब्रवीन्मेघगम्भीरस्वरेण वदतां वरः । भ्राता भ्रातरमज्ञातं सावित्रः पाकशासनिम् ॥ ८ ॥ पार्थ यत्ते कृतं कर्म विद्वेषवद्दुरन्वयः । करिष्ये पश्यतां नृणामात्मानं विस्फुलिंगमः ॥ ९ ॥ असमाप्ते ततस्तस्य वचने वदतांवर । यन्त्रोत्क्षिप्त इवोत्तस्थौ क्षिप्रं वै सर्वतो जनः ॥ १० ॥ प्रीतिश्च मनुजव्याघ्र दुर्योधनमुपाविशत् । ह्रीश्च क्रोधश्च वीभत्सुं क्षणेनान्वाविवेश ह ॥ ११ ॥ ततो द्रोणाभ्यनुज्ञातः कर्णः प्रियरणः सदा । यत् कृतं तत्र पार्थेन तच्चकार महाबलः ॥ १२ ॥ अथ दुर्योधनस्तत्र भ्रातृभिः सह भारत । कर्णं परिष्वज्य मुदा ततो वचनमब्रवीत् ॥ १३ ॥

दुर्योधन उवाच । स्वागतं ते महाबाहो दिष्ट्या प्राप्तोऽसि मानद । अङ्ग च कुरुराज्यं च यथेष्टमुपभुज्यताम् ॥ १४ ॥

कर्ण उवाच । कृतं सर्वमहं मन्ये सख्यित्वं च त्वया वृणे । द्वन्द्वयुद्धं च पार्थेन कर्तुमिच्छाम्यहं प्रभो ॥ १५ ॥

दुर्योधन उवाच । भुङ्क्ष्व भोगान्मया सार्धं बन्धूनां प्रियकृज्जय । दुर्हृदां कुरु सर्वेषां मूर्ध्नि पादमरिन्दम ॥ १६ ॥

वैशम्पायन उवाच । ततः क्षिप्रमिवात्मानं मत्वा पार्थोऽभ्यभाषत । कर्णं भ्रातृसमूहस्य मध्येऽचलमिव स्थितम् ॥ १७ ॥

अर्जुन उवाच । अनाहूतोपदिष्टानामनाहूतोपजल्पिनाम् । ये लोकास्तान्हतः कर्ण मया त्वं प्रतिपत्स्यसे ॥ १८ ॥

कर्ण उवाच । दृष्टोऽयं सर्वसामान्यः किमत्र तव फाल्गुन । वीर्यश्रेष्ठाश्च राजानो बलं धर्मोऽनुवर्तते ॥ १९ ॥ किं त्वेषैर्बलायासैः शरैः कथय भारत । गुरोः समक्षं यावत्ते हराम्यद्य शिरः शरैः ॥ २० ॥

वैशम्पायन उवाच । ततो द्रोणाभ्यनुज्ञातः पार्थः परपुर-

क्षयः । आदित्यरश्मिसंस्पृष्टो रणायोपजगाम तम् ॥ २१ ॥ ततो दुर्योधनेनापि सञ्चोदा समरोद्यतः । परिष्वक्तः स्थितः कर्णः प्रगृह्य सशरं धनुः ॥ २२ ॥ ततः सविद्युत्स्तनितैः सेन्द्रायुधपुरोगमैः । आवृतं गगनं मेघैर्बलाकापङ्क्तिहासिभिः ॥२३॥ ततः स्नेहाञ्जरिक्षयं दृष्ट्वा रङ्गावलोकिनम् । भास्करोऽप्यनयन्नाशं समीपोपगतान् घनान् ॥ २४ ॥ मेघच्छायोपगूढस्तु ततोऽदृश्यत फाल्गुनः । सूर्यातपपरिक्षिप्तः कर्णोऽपि समदृश्यत ॥२५॥ धार्तराष्ट्रा यतः कर्णस्तस्मिन्देशे व्यवस्थिताः । भारद्वाजः कृपो भीष्मो यतः पार्थस्ततोऽभवन् ॥२६॥ द्विधा रङ्गः समभवत् स्त्रीणां द्वैधमजायत । कुन्तिभोजसुता मोहं विश्वातार्था जगाम ह ॥ २७ ॥ तां तथा मोहमापन्नां विदुरः सर्वधर्मवित् । कुन्तीमाश्वासयामास प्रेष्याभिश्चन्दनोदकैः ॥ २८ ॥ ततः प्रत्यागतप्राणा तावुभौ परिदंशितौ । पुत्रौ दृष्ट्वा सुसंरब्धौ नान्वपद्यत किञ्चन ॥ २९ ॥ तावुद्यतमहाचापौ कृपः शारद्वतोऽब्रवीत् । द्वन्द्वयुद्धसमाचारे कुशलः सर्वधर्मवित् ॥ ३० ॥ अयं पृथायास्तनयः कनीयान् पाण्डुनन्दनः । कौरवो भवता सार्धं द्वन्द्वयुद्धं करिष्यति ॥ ३१ ॥ त्वमप्येवं महाबाहो मातरं पितरं कुलम् । ब्रूहि यस्य नरेन्द्राणां येषां त्वं कुलभूषणः ॥ ३२ ॥ ततो विदित्वा पार्थस्त्वां प्रतियोत्स्यति वा नवा । पृथाकुलसमाचारैर्न युध्यन्ते नृपात्मजाः ॥ ३३ ॥

वैशम्पायन उवाच । एवमुक्तस्य कर्णस्य व्रीडावनतमाननम् । ययौ वर्षाम्बुविक्लिन्नं पद्ममागलितं यथा ॥ ३४ ॥

दुर्योधन उवाच । आचार्य विविधा योनी राज्ञां शास्त्रविनिश्चये । मातृकुलीनस्य गुरोः यस्य सेना प्रकम्पते ॥ ३५ ॥ यद्यर्यं फाल्गुनो युद्धे नाराज्ञा योद्धुमिच्छति । तस्मादेषोऽङ्गविषये मया राज्ये ऽभिषिच्यते ॥ ३६ ॥

वैशम्पायन उवाच। ततस्तस्मिन् रणे कर्णः सलाजकुसुमैर्घटैः। काञ्चनैः काञ्चने पीठे मन्त्रविद्भिर्मङ्गारयः ॥३७॥ अभिषिक्तोऽङ्गराज्यस्य श्रिया युक्तो महाबलः। सच्छत्रबालव्यजनो जयशब्दोत्तरेण च ॥ ३८ ॥ उवाच कौरवं राजा वचनं स हृषस्तदा। अस्य राज्यप्रदानस्य सदृशं किं ददानि ते ॥ ३९ ॥ ब्रूहि राजशार्दूल कर्ता ह्यसि तथा नृप। अत्यन्तं सख्यमिच्छामीत्याह तं स सुयोधनः ॥ ४० ॥ एवमुक्तस्ततः कर्णस्तथेति प्रत्युवाच तम्। हर्षाच्चोभौ समाश्लिष्य परां मुदमवापतुः ॥ ४१ ॥

इत्यादिपर्वणि सम्भवपर्वण्यङ्गदर्शने अष्टत्रिंशदधिकशततोऽध्यायः ॥ १३८ ॥

वैशम्पायन उवाच। ततः स्वस्तोत्तरपटः सप्रस्वेदः सवेपथुः। विवेशाधिरथो रङ्गं यष्टिप्राणो ह्यथान्निव ॥ १ ॥ तमालोक्य धनुस्त्यक्त्वा पितृगौरवयन्त्रितः। कर्णोऽभिषेकार्द्रशिराः शिरसा समवन्दत ॥ २ ॥ ततः पादावबच्छाद्य पटान्तेन समंभ्रमः। पुत्रेति परिपूर्णार्थमब्रवीद्रथसारथिः ॥३॥ परिष्वज्य च तस्याथ मूर्धानं स्नेहविक्लवः। अङ्गराज्याभिषेकार्द्रमम्बुभिः सिषिचे पुनः ॥ ४ ॥ तं दृष्ट्वा सूतपुत्रोऽयमिति संचिन्त्य पाण्डवः। भीमसेनस्तदा वाक्यमब्रवीत् प्रहसन्निव ॥ ५ ॥ न त्वमर्हसि पार्थेन सूतपुत्र रणे वधम्। कुलस्य सदृशस्तूर्णं प्रतोदो गृह्यतां त्वया ॥ ६ ॥ अङ्गराज्यञ्च नार्हस्त्वमुपभोक्तुं नराधम। श्वा ऊताग्नसमीपस्थं पुरोडाशमिवाध्वरे ॥ ७ ॥ एवमुक्तस्ततः कर्णः किञ्चित् प्रस्फुरिताधरः। गगनस्थं विनिःश्वस्य दिवाकरमुदैक्षत ॥ ८ ॥

ततो दुर्योधनः कोपादुत्पपात महाबलः। भ्रातृपद्मवनात्तस्मा-न्मदोत्कट इव द्विपः॥ ९॥ सोऽब्रवीद्भीमकर्माणं भीमसेनमव-स्थितम्। वृकोदर न युक्तं ते वचनं वक्तुमीदृशम्॥ १०॥ क्षत्रि-याणां बलं ज्येष्ठं योद्धव्यं क्षत्रबन्धुना। शूराणाञ्च नदीनाञ्च दुर्विदाः प्रभवाः किल॥ ११॥ सलिलादुत्थितो वह्निर्येन व्याप्तं चराचरम्। दधीचस्यास्थितो वज्रं कृतं दानवसूदनम्॥ १२॥ आग्नेयः क्षत्तिकापुत्रो रौद्रो गाङ्गेय इत्यपि। यूयते भगवा-न्स्कन्दः सर्वगुह्यमयो गुहः॥ १३॥ क्षत्रियेभ्यश्च ये जाता ब्राह्म-णास्ते च ते श्रुताः। विश्वामित्रप्रभृतयः प्राप्ता ब्रह्मत्वमव्ययम्॥ १४॥ आचार्यः कलशाज्जातो द्रोणः शस्त्रभृतांवरः। गौत-मस्यान्ववाये च शरस्तम्बाच्च गौतमः॥ १५॥ भवताञ्च यथा जन्म तदप्यागमितं मया। सकुण्डलं सकवचं सर्वलक्षणलक्षितम्। कथमादित्यसदृशं मृगी व्याघ्रं जनिष्यति॥ १६॥ पृथिवी-राज्यमर्होऽयं नाङ्गराज्यं नरेश्वरः। अनेन बाहुवीर्येण मया चाप्यनुवर्त्तिना॥ १७॥ यस्य वा मनुजस्येदं न क्षान्तं महिचे-ष्टितम्। रथमारुह्य पद्भ्यां स विनाशयतु कार्मुकम्॥ १८॥ ततः सर्वस्य रङ्गस्य हाहाकारो महानभूत्। साधुवादानुसंवद्धः सूर्यस्यास्तमुपागमत्॥ १९॥ ततो दुर्योधनः कर्णमालम्ब्याग्र-करे नृपः। दीपिकाग्निकृतालोकस्तस्माद्रङ्गाद्विनिर्ययौ॥ २०॥ पाण्डवाश्च सहद्रोणाः सकृपाश्च विशाम्पते। भीष्मेण सहिताः सर्वे ययुः स्वं स्वं निवेशनम्॥ २१॥ अर्जुनेति जनः कश्चित् कश्चित् कर्णेति भारत। कश्चिद्दुर्योधनेत्येवं ब्रुवन्तः प्रस्थिता-स्तदा॥ २२॥ कुन्त्याश्च प्रत्यभिज्ञाय दिव्यलक्षणसूचितम्। सुतमङ्केश्वरं स्नेहाच्छन्ना प्रीतिरजायत॥ २३॥ दुर्योधनस्यापि तदा कर्णमासाद्य पार्थिव। भयमर्जुनसञ्जातं क्षिप्रमन्तरधीयत॥ २४॥ स चापि वीरः कृतशस्त्रनैःश्रमः परेण सान्त्वाभ्यवदत्

सुयोधनम्। युधिष्ठिरस्याप्यभवत्तदा मतिर्न कर्णतुल्योऽस्ति धनुर्धरः क्षितौ॥ २५॥

इत्यादिपर्वणि सम्भवपर्वण्यस्त्रदर्शने जनचत्वारिंशदधिकशततोऽध्यायः॥ १३९॥

वैशम्पायन उवाच। पाण्डवान्वार्त्तराष्ट्रांश्च कृतास्त्रान् प्रसमीक्ष्य सः। गुर्वर्थदक्षिणाकाले प्राप्तेऽमन्यत वै गुरुः॥ १॥ ततः शिष्यान् समानीय आचार्य्योऽर्थमचोदयत्। द्रोणः सर्वानशेषेण दक्षिणार्थं महीपते॥ २॥ पाञ्चालराजं द्रुपदं गृहीत्वा रणमूर्द्धनि। पर्य्यानयत भद्रं वः सा स्यात्परमदक्षिणा॥ ३॥ तथेत्युक्त्वा तु ते सर्वे रथैर्भूमिं प्रहारिणः। आचार्य्यधनदानार्थं द्रोणेन सहिता ययुः॥ ४॥ ततोऽभिजग्मुः पाञ्चालान्विन्नन्तस्ते नरर्षभाः। मत्तदुरुस्य नगरं द्रुपदस्य महौजसः॥ ५॥ दुर्य्योधनश्च कर्णश्च युयुत्सुश्च महाबलः। दुःशासनो विकर्णश्च जलसन्धः सुलोचनः॥ ६॥ एते चान्ये च बहवः कुमारा बहुविक्रमाः। अहं पूर्वमहं पूर्वमित्येवं क्षत्रियर्षभाः॥ ७॥ ततो वररथारूढाः कुमाराः सादिभिः सह। प्रविश्य नगरं सर्वे राजमार्गमुपाययुः॥ ८॥ तस्मिन् काले तु पाञ्चाल्यः श्रुत्वा दृष्ट्वा महद्बलम्। ज्ञातिभिः सहितो राजंस्त्वरया निर्ययौ गृहात्॥ ९॥ ततस्तु ज्ञातसन्नाहो यज्ञसेनो महीधरः। शरवर्षाणि सृजन्तः प्रणेदुः सर्व एव ते॥ १०॥ ततो रथेन शुभ्रेण समासाद्य तु कौरवान्। यज्ञसेनः शरान् घोरान्ववर्ष युधि दुर्जयः॥ ११॥

वैशम्पायन उवाच। पूर्वमेव तु सन्मन्त्र्य पार्थो द्रोणमथाब्रवीत्। दर्पोद्रेकात् कुमाराणामाचार्य्यं द्विजसत्तमम्॥ १२॥ एषां पराक्रमस्यान्ते वयं कुर्य्याम साहसम्। एतैरग्रः पाञ्चाल्यो

गृहीतं रथमूर्द्धनि ॥ १३ ॥ एवमुक्त्वा तु कौन्तेयो भ्रातृभिः सहितोऽनघः। अर्द्धक्रोशे तु नगरादतिष्ठद्धरिरेव सः ॥ १४ ॥ द्रुपदः कौरवान्दृष्ट्वा प्राधावत समन्ततः। रजोजालेन महता संछादयन् कौरवीं चमूम् ॥ १५ ॥ तमुद्यतं रथेनैकमानीकानि विभावसेः। अनेकमिव सञ्चक्रुर्निरैक्षन्त तदा कौरवाः ॥ १६ ॥ द्रुपदस्य शरा घोराः विचेरुः सर्वतो दिशम्। ततः शङ्खाश्च भेर्यश्च मेदुरायाथ सहस्रशः ॥ १७ ॥ प्रावाद्यन्त महाराज पाञ्चालानां निवेशने। सिंहनादश्च सञ्जज्ञे पाञ्चालानां महात्मनाम् ॥ १८ ॥ धनुर्ज्यातलशब्दश्च संरुरुध्वे गगनं महत्। दुर्योधनो विकर्णश्च सुबाहुर्दीर्घलोचनः ॥ १९ ॥ दुःशासनश्च संक्रुद्धाः शरवर्षैरवाकिरन्। सोऽतिविद्धो महेष्वासः पार्षतो युधि दुर्जयः ॥ २० ॥ व्यधमत्तान्यनीकानि तत्क्षणादेव भारत। दुर्योधनं विकर्णञ्च कर्णञ्चापि महाबलम् ॥ २१ ॥ नानानृपसुतान्वीरान् सैन्यानि विविधानि च। अलातचक्रवत्सर्वं चरन्बाणैरतर्पयत् ॥ २२ ॥ ततस्तु नागराः सर्वे मुसलैर्यष्टिभिस्तदा। अभ्यवर्षन्त कौरव्यान् वर्षमाणा घना इव ॥ २३ ॥ सबालवृद्धास्ते पौराः कौरवानभ्ययुध्यत। श्रुत्वा तु तुमुलं युद्धं कौरवानेव भारत ॥ २४ ॥ द्रवन्ति स्म नदन्ति स्म क्रोशन्तः पाण्डवान् प्रति। पाण्डवास्तु स्वनं श्रुत्वा आर्त्तानां क्रोशमर्षणम् ॥ २५ ॥ अभिवाद्य ततो द्रोणं रथानारुरुहुस्तदा। युधिष्ठिरं निवार्याशु मा युध्यस्वेति पाण्डवम् ॥ २६ ॥ माद्रेयौ चक्ररक्षौ तु फाल्गुनश्च तदाकरोत्। सेनाग्रगो भीमसेनः सदाभूद्धृदया सह ॥ २७ ॥ तदा श्रुत्वा स्वनं श्रुत्वा भ्रातृभिः सहितोऽनघः। आयाज्जवेन कौन्तेयो रथेनादित्यवर्चसा ॥ २८ ॥ पाञ्चालानां ततः सेनामुद्धतार्णवनिस्वनाम्। भीमसेनो महाबाहुर्दण्डपाणिरिवान्तकः ॥ २९ ॥ प्रविवेश महासेनां मकरः सागरं यथा। स्वयमभ्यद्रवद्भीमो नागा-

मीकं गदाधरः ॥३०॥ स युद्धकुशलः पार्थो बाहुवीर्येण चालनः । अहनत् कुञ्जरानीकं गदया कालरूपधृक् ॥ ३१ ॥ ते गजा गिरिसङ्काशाः स्रवन्तो रुधिरं बहु । भीमसेनस्य गदया भिन्नमस्तकपिण्डकाः । पतन्ति द्विरदा भूमौ वज्रघाताद्दिवाचलाः ॥ ३२ ॥ गजानश्वान्रथांश्चैव पातयामास पाण्डवः । पदातींश्च रथांश्चैव व्यवधीदर्जुनाग्रजः ॥ ३३ ॥ गोपाल इव दण्डेन यथा पशुगणान्वने । चालयन्रथनागांश्च सञ्चचाल वृकोदरः ॥ ३४ ॥

वैशम्पायन उवाच । भारद्वाजप्रियं कर्तुमुद्यतः फाल्गुनस्तदा । पार्षतं शरजालेन क्षिपन् नागाश्च पाण्डवः ॥ ३५ ॥ हयौघांश्च रथौघांश्च गजौघांश्च समन्ततः । पातयन् समरे राजन्युगान्ताग्निरिव ज्वलन् ॥ ३६ ॥ ततस्ते हन्यमाना वै पाञ्चालाः कङ्कवासतथा । शरैर्नानाविधैस्तूर्णं पार्थं संच्छाद्य सर्वशः ॥३७॥ सिंहनादं मुखैः कृत्वा समयुध्यन्त पाण्डवम् । तद्युद्धमभवद्घोरं सुमहाद्भूतदर्शनम् । सिंहनादस्वनं श्रुत्वा नामृष्यत्पाकशासनिः ॥ ३८ ॥ ततः किरीटी सहसा पाञ्चालान् समरेऽद्रवत् । छादयन्निषुजालेन महता मोहयन्निव ॥३९॥ शीघ्रमभ्यस्यतो बाणान् सन्दधानस्य चानिशम् । नान्तरं ददृशे किञ्चिल्लौल्यं तस्य यशस्विनः ॥ ४० ॥ सिंहनादश्च सञ्जज्ञे साधुशब्देन मिश्रितः । ततः पाञ्चालराजस्तु तथा सत्यजिता सह ॥ ४१ ॥ त्वरमाणोऽभिदुद्राव महेन्द्रं शबरो यथा । महता शरवर्षेण पार्थः पाञ्चालमाहवात् ॥ ४२ ॥ ततो हलहलाशब्द आसीत्पाञ्चालके बले । जिघृक्षति महासिंहो गजानामिव यूथपम् ॥ ४३ ॥ दृष्ट्वा पार्थं तदायान्तं सत्यजित्सत्यविक्रमः । पाञ्चालं वै परिप्रेप्सुर्जनञ्जयमदुद्रवत् ॥ ४४ ॥ ततस्त्वर्जुनपाञ्चालौ युद्धाय समुपागतौ । व्यचोभयेतां तौ सैन्यमिन्द्रवैरोचनाविव ॥ ४५ ॥ ततः सत्यजितं पार्थो दशभिर्मर्मभेदिभिः । विव्याध बलवद्बाणैः तद्भूतमिवा-

भवत् ॥ ४६ ॥ ततः शरगतः पार्थं पाञ्चालः शीघ्रमाद्रवत् । पार्थस्तु शरवर्षेण छाद्यमानो महारथः ॥ ४७ ॥ वेगं चक्रे महावेगो धनुर्ज्यामवमृज्य च । ततः सत्यजितश्चापं छित्वा राजानमभ्ययात् ॥ ४८ ॥ अथान्यदनुरादाय सत्यजिद्वेगवत्तरम् । साश्वं ससूतं सरथं पार्थं विव्याध सत्वरः ॥ ४९ ॥ स तं न मृष्यते पार्थः पाञ्चालेनार्दितो युधि । ततस्तस्य विनाशार्थं सत्वरं व्यसृजच्छरान् ॥ ५० ॥ हयान् ध्वजं धनुर्मुष्टिमुभौ तौ पार्ष्णिसारथी । स तथा भिद्यमानेषु कार्मुकेषु पुनः पुनः ॥ ५१ ॥ हयेषु विनियुक्तेषु विमुखोऽभवदाहवे । स सत्यजितमालोक्य तथा विमुखमाहवे ॥ ५२ ॥ वेगेन महता राजन्नभ्यवर्षत पाण्डवम् । तदा चक्रे महद्युद्धमर्जुनो जयतांवरः ॥ ५३ ॥ तस्य पार्थो धनुश्छित्वा ध्वजञ्चोर्व्यामपातयत् । पञ्चभिस्तस्य विव्याध हयान् सूतञ्च सायकैः ॥ ५४ ॥ तत उत्पत्य तच्चापमादत्तं शरावरम् । खड्गमुद्धृत्य कौन्तेयः सिंहनादमथाकरोत् ॥ ५५ ॥ पाञ्चालस्य रथस्थेयामाप्लुत्य सहसापतत् । पाञ्चालरथमास्थाय अवित्तो धनञ्जयः ॥ ५६ ॥ विद्योत्थाम्भोनिधिं पार्थस्तं नागमिव सोऽग्रहीत् । ततस्तु सर्वपाञ्चाला विद्रवन्ति दिशो दश ॥ ५७ ॥ दर्शयन् सर्वसैन्यानां स बाह्वोर्बलमात्मनः । सिंहनादस्वनं कृत्वा निर्जगाम धनञ्जयः ॥ ५८ ॥ आयान्तमर्जुनं दृष्ट्वा कुमाराः सहितास्तदा । मत्तद्रुपदस्य नगरं द्रुपदस्य महात्मनः ॥ ५९ ॥

अर्जुन उवाच । सम्बन्धी कुरुवीराणां द्रुपदो राजसत्तमः । मा वधीस्तदयं भीम गुरुदानं प्रदीयताम् ॥ ६० ॥

वैशम्पायन उवाच । भीमसेनस्तदा राजन्नर्जुनेन निवारितः । अहनो युद्धधर्मेषु व्यवर्त्तत महाबलः ॥ ६१ ॥ तं यज्ञसेनं द्रुपदं गृहीत्वा रणमूर्द्धनि । उपाजह्रुः सहामात्यं द्रोणाय भरतर्षभ ॥ ६२ ॥ भग्नदर्पं हृतधनं तं तथा वशमागतम् । स वैरं

मनसा ध्यात्वा द्रोणो द्रुपदमब्रवीत् ॥ ६३ ॥ विद्धि तरसा राष्ट्रं पुरं ते वर्द्धितं मया। प्राप्य जीवं रिपुवशं सखिपूर्वं किमिष्यते ॥ ६४ ॥ एवमुक्त्वा प्रहस्यैवं किञ्चित्स पुनरब्रवीत्। मा भैः प्राणभयाद्वीर क्षत्रियो ब्राह्मणाद्भयम् ॥ ६५ ॥ आश्रमे क्रीडितं यत्तु त्वया बाल्ये मया सह। तेन संवर्द्धितः स्नेहः प्रीतिश्च क्षत्रियर्षभ ॥ ६६ ॥ प्रार्थयेयं त्वया सख्यं पुनरेव जनाधिप। वरं ददामि ते राजन् राज्यस्यार्द्धमवाप्नुहि ॥ ६७ ॥ अराजा किल नो राज्ञः सखा भवितुमर्हति। अतः प्रवर्तितं राज्ये यज्ञसेन मया तव ॥ ६८ ॥ राजासि दक्षिणे कूले भागीरथ्याहमुत्तरे। सखायं मां विजानीहि पाञ्चाल यदि मन्यसे ॥ ६९ ॥

द्रुपद उवाच। अनार्यधर्ममिदं ब्रह्मन् विक्रान्तेषु महात्मसु। प्रीये त्वयाहं त्वत्तश्च प्रीतिमिच्छामि शाश्वतीम् ॥ ७० ॥

वैशम्पायन उवाच। एवमुक्तः स तं द्रोणो मोक्षयामास भारत। सत्कृत्य चैनं प्रीतात्मा राज्यार्द्धं प्रत्यपादयत् ॥ ७१ ॥ माकन्दीमथ गङ्गायाक्षीरे जनपदायुताम्। सोऽध्यावसद्दीनमनाः काम्पिल्यस्य पुरोत्तमम् ॥ ७२ ॥ दक्षिणांश्चापि पाञ्चालान्यावच्चर्मण्वती नदी। द्रोणेन चैवं द्रुपदः परिभूयाथ पालितः ॥ ७३ ॥ क्षात्रेण च बलेनास्य नाप्यशक्त पराजयम्। हीनं विदित्वा चात्मानं ब्राह्मेण स बलेन तु ॥ ७४ ॥ पुत्रजन्म परीप्सन्वै पृथिवीमन्वसञ्चरत्। अधिच्छत्रञ्च विषयं द्रोणः समभिपद्यत ॥ ७५ ॥ एवं राजन्नधिच्छत्रा पुरी जनपदायुता। युधि निर्जित्य पार्थेन द्रोणाय प्रतिपादिता ॥ ७६ ॥

इत्यादिपर्वणि सम्भवपर्वणि द्रुपदशासने चत्वारिंशदधिकशततोऽध्यायः ॥ १४० ॥

वैशम्पायन उवाच । ततः सम्वत्सरस्यान्ते यौवराज्याय पार्थिव । स्थापितो धृतराष्ट्रेण पाण्डुपुत्रो युधिष्ठिरः ॥ १ ॥ धृतिस्थैर्य्यं सहिष्णुत्वादानृशंस्यात्तथार्ज्जवात् । भृत्यानामनुकम्पार्थं तथैव स्थिरसौहृदात् ॥ २ ॥ ततो दीर्घेण कालेन कुन्तीपुत्रो युधिष्ठिरः । पितुरन्तर्द्धये कीर्त्तिं श्लोकतत्त्वसमाधिभिः ॥ ३ ॥ असियुद्धे गदायुद्धे रथयुद्धे च पाण्डवः । सङ्कर्षणादग्रिये च अश्वच्छिक्षां वृकोदरः ॥ ४ ॥ समाप्तशिक्षो भीमस्तु शुमत्सेनसमो बले । पराक्रमेण सम्पन्नो ज्ञातृणामचरद्वने ॥ ५ ॥ प्रगाढदृढमुष्टित्वे लाघवे वेधने तथा । क्षुरनाराचभल्लानां विपाटानाञ्च तत्ववित् ॥ ६ ॥ ऋजुवक्रविशालानां प्रयोक्ता फाल्गुनोऽभवत् । लाघवे सौष्ठवे चैव नान्यः कश्चन विद्यते । बीभत्सुसदृशो लोके इति द्रोणो व्यवस्थितः ॥ ७ ॥ ततोऽब्रवीद्गुडाकेशं द्रोणः कौरवसंसदि । अगस्त्यस्य धनुर्वेदे शिष्यो मम गुरुः पुरा ॥ ८ ॥ अग्निवेश्य इति ख्यातस्तस्य शिष्योऽस्मि भारत । तीर्थार्त्तीर्थं गमयितुमहमेतत्समुद्यतः ॥ ९ ॥ तपसा यन्मया प्राप्तमनोघमशनिप्रभम् । अस्त्रं ब्रह्मशिरो नाम यद्धरेत् पृथिवीमपि ॥ १० ॥ दद्तां गुरुणा चोक्तं न मनुष्येष्विदं त्वया । भारद्वाज विमोक्तव्यमल्पवीर्य्येष्वपि प्रभो ॥ ११ ॥ त्वया प्राप्तमिदं वीर दिव्यं नान्योऽर्हति विद्म्यहम् । समयस्तु त्वया रक्ष्यो सुनिरुष्टो विशाम्यते ॥ १२ ॥ आचार्य्यदक्षिणां देहि ज्ञातिग्रामस्य पश्यतः । ददानीति प्रतिज्ञाते फाल्गुनेनाब्रवीद्गुरुः ॥ १३ ॥ युद्धेऽहं प्रतियोद्धव्यो युध्यमानस्त्वयानघ । तथेति च प्रतिज्ञाय द्रोणाय कुरुपुङ्गवः । उपसङ्गृह्य चरणौ स प्रायादुत्तरां दिशम् ॥ १४ ॥ स्वभावादगमच्छ्रेष्ठो महीं सागरमेखलाम् । अर्जुनस्य समो लोके नास्ति कश्चिद्धनुर्धरः ॥ १५ ॥ गदायुद्धेऽसियुद्धे च रथयुद्धे च पाण्डवः । भारतश्च धनुर्युद्धे

बभूवाथ धनञ्जयः ॥ १६ ॥ नीतिमान् सकलां नीतिं विबुधाधिपतेस्तदा । अवाप्य सहदेवोऽपि भ्रातॄणां वहते वशे ॥ १७ ॥ द्रोणेनैव विनीतश्च भ्रातॄणां नकुलः प्रियः । चित्रयोधी समाख्यातो बभूवातिरथोदितः ॥ १८ ॥ त्रिवर्षकृतयज्ञस्तु गन्धर्वाणामुपाश्रवे । अर्जुनप्रमुखैः पार्थैः सौवीरः समरे हृतः ॥ १९ ॥ न शशाक वशे कर्त्तुं यं पाण्डुरपि वीर्य्यवान् । सोऽर्जुनेन वशमानीतो राजासीद्यवनाधिपः ॥ २० ॥ अतीव बलसम्पन्नः सदा मानी कुरून् प्रति । वितुलो नाम सौवीरः शस्तः पार्थेन धीमता ॥ २१ ॥ दत्तामित्र इति ख्यातं संग्रामे कृतनिश्चयम् । सुमित्रं नाम सौवीरमर्जुनोऽदमयच्छरैः ॥ २२ ॥ भीमसेनसहायश्च रथानामयुतञ्च सः । अर्जुनः समरे प्राच्यान् सर्वानेकरथोऽजयत् ॥ २३ ॥ तथैवैकरथो गत्वा दक्षिणामजयद्दिशम् । धनौघं प्रापयामास कुरुराष्ट्रं धनञ्जयः ॥ २४ ॥ एवं सर्वे महात्मानः पाण्डवा मनुजोत्तमाः । परराष्ट्राणि निर्जित्य स्वराष्ट्रं बहवः पुरा ॥ २५ ॥ ततो बलमतिख्यातं विज्ञाय दृढधन्विनाम् । दूषितः सहसा भावो धृतराष्ट्रस्य पाण्डुषु । स चिन्तापरमो राजा न निद्रामलभन्निशि ॥ २६ ॥

इत्यादिपर्वणि सम्भवपर्वणि धृतराष्ट्रचिन्तायामेकचत्वारिंशदधिकशततमोऽध्यायः ॥ १४१ ॥

—•:•—

वैशम्पायन उवाच । श्रुत्वा पाण्डुसुतान्वीरान् बलोद्रिक्तान्महौजसः । धृतराष्ट्रो महीपालश्चिन्तामगमदातुरः ॥ १ ॥ तत आहूय मन्त्रज्ञं राजशास्त्रार्थवित्तमम् । कणिकं मन्त्रिणां श्रेष्ठं धृतराष्ट्रोऽब्रवीद्वचः । २ ॥

धृतराष्ट्र उवाच। उत्सिक्ताः पाण्डवा नित्यं तेभ्योऽस्मि द्विजोत्तम। तत्र मे निश्चिततमं सन्धिविग्रहकारणम्। कणिक त्वं ममाचक्ष्व करिष्ये वचनं तव ॥ ३ ॥

वैशम्पायन उवाच। स प्रसन्नमनास्तेन परिपृष्टो द्विजोत्तमः। उवाच वचनं तीक्ष्णं राजशास्त्रार्थदर्शनः ॥ ४ ॥

कणिक उवाच। शृणु राजन्निदं तत्र प्रोच्यमानं मयानघ। न मेऽभ्यसूया कर्त्तव्या श्रुत्वैतत् कुरुसत्तम ॥ ५ ॥ नित्यमुद्यतदण्डः स्यान्नित्यं विवृतपौरुषः। अच्छिद्रच्छिद्रदर्शी स्यात्परेषां विवरानुगः ॥ ६ ॥ नित्यमुद्यतदण्डाद्धि भयमुद्विजते जनः। तस्मात्सर्वाणि कार्य्याणि दण्डेनैव विधारयेत् ॥ ७ ॥ नास्य च्छिद्रं परः पश्येच्छिद्रेण परमन्वियात्। गूहेत् कूर्म इवाङ्गानि रक्षेद्विवरमात्मनः ॥ ८ ॥ नासम्यक् कृतकारी स्याद्दृष्ट्वा कर्म कदाचन। कण्टको ह्यपि दुश्छिन्न आस्रावं जनयेच्चिरम् ॥ ९ ॥ वधमेव प्रशंसन्ति शत्रूणामपकारिणाम्। सुविदीर्णं सुविक्रान्तं सुयुद्धं सुपलायितम् ॥ १० ॥ आपद्यापदि काले च कुर्वीत न विचारयेत्। नावज्ञेयो रिपुर्जातु दुर्बलोऽपि कदाचन। अल्पोऽप्यग्निर्वनं कृत्स्नं दहत्याश्रयसंश्रयात् ॥ ११ ॥ अन्वास्यादन्यवेलायां वाधिर्व्यमपि चाश्रयेत्। कुर्व्यात्क्षणमवज्ञानं श्रयीत जगतीपतिम् ॥ १२ ॥ सान्त्वादिभिरुपायैस्तु हन्याच्छत्रुं बले स्थितम्। दया न तस्मिन् कर्त्तव्या शरणागत इत्युत ॥ १३ ॥ निरुद्विग्नो हि भवति न हताज्जायते भयम्। हन्यादमित्रं दानेन तथा पूर्वोपकारिणम् ॥ १४ ॥ हन्यात् त्रीन् पञ्च सप्तेति परपक्षस्य सर्वशः। मूलमेवादितश्छिन्द्यात्परपक्षस्य नित्यशः ॥ १५ ॥ ततः सहायांस्त्यक्त्वान् सर्वांश्च तदनन्तरम्। छिन्नमूले ह्यधिष्ठाने सर्वे तज्जीविनो हताः ॥ १६ ॥ कथं नु शाखाश्छिन्दंश्छिन्नमूले वनस्पतौ। एकाग्रः स्यादविहतो

मित्यं विवरदर्शकः ॥ १७ ॥ राजमाज्यं सदत्तेषु नित्योद्विग्नः समाचरेत् । अग्न्यागारेण यत्नेन कामायेषु जटाजिनैः ॥ १८ ॥ लोकान्विश्वासयित्वैव ततो लुब्धेष्वथा ढकः । अकृत्यं शौचमित्याह्वरर्थीमामुपधारणे ॥ १९ ॥ आमास्य फलितां श्राद्धां पक्षं पक्षं प्रशातयेत् । फलार्थोऽयं समारम्भो लोके घृणां विपश्चिताम् ॥ २० । बध्नेदमित्रं स्कन्धेन यावत्कालस्य पर्ययः । ततः प्रत्यागते काले भिन्द्याद्घटमिवाश्मनि ॥ २१ ॥ अमित्रो न विमोक्तव्यः क्षपणं बह्वपि ब्रुवन् । क्षपा न तस्मिन् कर्त्तव्या हन्यादेवापकारिणम् ॥ २२ ॥ हन्याद्दमित्रं सान्त्वेन तथा दानेन वा पुनः । तथैव भेददण्डाभ्यां सर्वोपायैः प्रशातयेत् ॥ २३ ॥

धृतराष्ट्र उवाच । कथं सान्त्वेन दानेन भेदैर्दण्डेन वा पुनः । अमित्रः शक्यते हन्तुं तन्मे ब्रूहि यथातथम् ॥ २४ ॥

कणिक उवाच । शृणु राजन्यथाख्यातं वने निवसतः पुरा । जम्बुकस्य महाराज नीतिशास्त्रार्थदर्शिनः ॥ २५ ॥ अथ कश्चित् क्षुतप्रज्ञः शृगालः स्वार्थपण्डितः । सखिभिर्व्यवसन्नार्हं व्याघ्रास्थुष्टकवभ्रुभिः ॥ २६ ॥ तेऽपश्यन्विपिने तस्मिन्वसन्तं मृगयूथपम् । अयत्ना ग्रहणे तस्य ततो मन्त्रममन्त्रयन् ॥ २७ ॥

जम्बुक उवाच । असज्जयतिलो क्षेप हन्तुं व्याघ्र वने त्वया । युवा वै जवसंपन्नो बुद्धिशाली न भक्ष्यते ॥ २८ ॥ मूषिकोऽस्य शयानस्य चरणौ भक्षयत्वयम् । अथैनं भक्षितैः पादैर्व्याघ्रो भक्षातु वै ततः ॥ २९ ॥ ततो वै भक्षयिष्यामः सर्वे मुदितमानसाः । जम्बुकस्य तु तद्वाक्यं तथा चक्रुः समाहिताः ॥ ३० ॥ मूषिकाभक्षितैः पादैर्मृगं व्याघ्रोऽवधीत्तदा । दृष्ट्वा चेष्टमानन्तु भूमौ मृगकलेवरम् । स्नात्वागच्छत भद्रं वो रक्षामीत्याह जम्बुकः ॥ ३१ ॥ शृगालवचनात्तेऽपि गताः सर्वे नदीं ततः । स चिन्तापरमो भूत्वा तस्थौ तत्रैव जम्बुकः ॥ ३२ ॥ अथाजगाम

पूर्वन्तु स्नात्वा व्याघ्रो महाबलः । ददर्श जम्बुकञ्चैव चिन्ता-कुलितमानसम् ॥ ३३ ॥

व्याघ्र उवाच । किं शोचसि महाप्राज्ञ त्वञ्तो बुद्धिमतां वरः । भक्षयित्वा पिशितान्यद्य विहरिष्यामहे वयम् ॥ ३४ ॥

जम्बुक उवाच । शृणु मे त्वं महाबाहो यद्वाक्यं मूषिको-ऽब्रवीत् । धिग्वलं मृगराजस्य मयाद्यायं मृगो हतः ॥ ३५ ॥ महाङ्कबलमाश्रित्य तृप्तिमद्य गमिष्यति । गर्जमानस्य तस्यैवमतो भक्ष्यं न रोचये ॥ ३६ ॥

व्याघ्र उवाच । ब्रवीति यदि स ह्येवं काले स्वस्मिन् प्रबो-धितः । स्वबाहुबलमाश्रित्य हनिष्येऽहं वनेचरान् । खादिष्ये तत्र मांसानि इत्युक्त्वा प्रस्थितो वनम् ॥ ३७ ॥ एतस्मिन्नेव काले तु मूषिकोऽप्याजगाम ह । तमागतमभिप्रेक्ष्य शृगालोऽप्यब्रवी-द्वचः ॥ ३८ ॥

जम्बुक उवाच । शृणु मूषिक भद्रं ते नकुलो यदिहा-ब्रवीत् । मृगमांसं न खादेयं गरमेतन्न रोचते ॥ ३९ ॥ मूषिकं भक्षयिष्यामि तन्नवानुमन्यताम् । तच्छ्रुत्वा मूषिको वाक्यं सन्त्रस्तः प्रगतो बिलम् ॥ ४० ॥ ततः स्नात्वा स वै तत्र आजगाम हको नृप । तमागतमिदं वाक्यमब्रवीज्जम्बुकस्तदा ॥ ४१ ॥ मृग-राजो हि संक्रुद्धो न ते साधु भविष्यति । सकलत्रस्त्विहायाति कुरुष्व यदनन्तरम् ॥ ४२ ॥ एवं सञ्चोदितस्तेन जम्बुकेन तदा हकः । ततोऽवलम्बनं कृत्वा प्रयातः पिशिताशनः ॥ ४३ ॥ एत-स्मिन्नेव काले तु नकुलोऽप्याजगाम ह । तमुवाच महाराज नकुलं जम्बुको वने ॥ ४४ ॥ स्वबाहुबलमाश्रित्य निर्जिताद्यो-ऽन्यतो गताः । मम दत्त्वा निजुष्टं त्वं भुङ्क्ष्व मांसं यथेप्सितम् ॥ ४५ ॥

नकुल उवाच । मृगराजो हकश्चैव बुद्धिमानपि मूषिकः ।

निर्जिता यस्त्वया वीरास्तस्माद्वीरतरो भवान् ॥ ४६ ॥ न त्वया-युत्सहे योद्धुमित्युक्त्वा सोऽप्यपागमत्।

कणिक उवाच। एवं तेषु प्रयातेषु जम्बुको हृष्टमानसः। खादति स्म तदा मांसमेकः सन्नन्यनिग्रहात् ॥ ४७ ॥ एवं समाचरन्नित्यं सुखमेधेत भूपतिः। भयेन भेदयेद्धीरं शूरमञ्जलिकर्मणा ॥ ४८ ॥ कुब्जमर्थप्रदानेन समं न्यूनं तथौजसा। एवं ते कथितं राजन् शृणु चाप्यपरं तथा ॥ ४९ ॥ सुतः सखा वा भ्राता वा पिता वा यदि वा गुरुः। रिपुस्थानेषु वर्त्तन्तः कर्त्तव्या भूतिमिच्छता ॥ ५० ॥ अपथेनाप्यरिं हन्यादर्थदानेन वा पुनः। विषेण मायया वापि नोपेक्षेत कथञ्चन। उभौ चेत्संशयोपेतौ अद्यावांस्तत्र वर्द्धते ॥ ५१ ॥ गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः। उत्पथप्रतिपन्नस्य न्याय्यं भवति शासनम् ॥ ५२ ॥ क्रुद्धोऽप्यक्रुद्धरूपः स्यात् स्मितपूर्वाभिभाषिता। न चाप्यवमन्येत्तादात्विकोपसंयुतः ॥ ५३ ॥ प्रहरिष्यन् प्रियं ब्रूयात् प्रहरन्नपि भारत। प्रहृत्य च कृपायीत शोचेत च रुदेत च ॥ ५४ ॥ आश्वासयच्चापि परं सान्त्वधर्मार्थयुक्तिभिः। अथास्य प्रहरेत्काले यदा विचलिते पथि ॥ ५५ ॥ अपि घोरापराधस्य धर्ममाश्रित्य तिष्ठतः। स हि प्रच्छाद्यते दोषः शैलो मेघैरिवासितैः ॥ ५६ ॥ यः स्यादनुप्राप्तवधस्तस्यागारं प्रदीपयेत्। अधनान्नास्तिकांश्चौरान्विषये स्वे न वासयेत् ॥ ५७ ॥ प्रत्युत्थानासनाद्येन सम्प्रदानेन केनचित्। प्रतिविध्यध्यघाती स्यात्तीक्ष्णदंष्ट्रो निमग्नकः ॥ ५८ ॥ अग्रङ्किनेभ्यः शङ्केत शङ्कितेभ्यश्च सर्वशः। अग्रङ्क्याशङ्कयमुत्पन्नमपि मूलं निकृन्तति ॥ ५९ ॥ न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्। विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥ ६० ॥ चारः सुविहितः कार्य्य आत्मनश्च परस्य वा। पाषण्डांस्तापसादींश्च परराष्ट्रेषु योजयेत् ॥ ६१ ॥

सङ्घानेषु विवादेषु देवतायतनेषु च। पानागारेषु रथ्यासु धर्म-
स्तोर्येषु चाप्यथ ॥ ६२ ॥ चत्वरेषु च कूपेषु पर्वतेषु वनेषु च।
समवायेषु सर्वेषु सरित्सु च विचारयेत् ॥ ६३ ॥ वाचा भद्रं
विनीतः स्याद्धृदयेन तथा क्षुरः। क्षितपूर्वाभिभाषी स्यात् क्षुष्टो
रौद्रेण कर्मणा ॥ ६४ ॥ अक्षतिः शयथः सान्त्वं शिरसा पाद-
वन्दनम्। आशाकरणमित्येवं कर्त्तव्यं भूतिमिच्छता ॥ ६५ ॥
सुपुष्पितः स्यादफलः फलवान् स्याद्दारुणः। आमः स्यात्पक्व-
संकाशो न च जीर्य्येत यद्धितम् ॥ ६६ ॥ विवर्गं विविधा
पीड़ा ह्यनुबन्धास्तथैव च। अनुबन्धाः शुभा ज्ञेयाः पीड़ास्तु
परिवर्जयेत् ॥ ६७ ॥ धर्मं विचरतः पीड़ा सापि द्वाभ्यां नियच्-
छति। अर्थस्याप्यर्थलुब्धस्य कामस्यातिप्रवर्त्तिनः ॥ ६८ ॥ अग-
र्वितात्मा सुलभः सान्त्वयुक्तोऽनसूयिता। अयेच्छितार्थैः शुद्धात्मा
मन्त्रयीत द्विजैः सह ॥ ६९ ॥ कर्मणा येन तेनैव मृदुना दारु-
णेन च। उद्धरेद्दीनमात्मानं समर्थो धर्ममाचरेत् ॥ ७० ॥ न
संशयमनारुह्य नरो भद्राणि पश्यति। संशयं पुनरारुह्य यदि
जीवति पश्यति ॥ ७१ ॥ यस्य बुद्धिः परिभवेत्क्षमतीतेन सान्त्व-
येत्। अनागतेन दुर्बुद्धिं प्रत्युत्पन्नेन पण्डितम् ॥ ७२ ॥ यो-
ऽरिणा सह सन्धाय शयीत हतकृत्यवत्। स ह्युत्थाय यथा सुप्तः
पतितः प्रतिबुध्यते ॥ ७३ ॥ मन्त्रसंवरणे यत्नः सदा कार्य्योऽन-
सूयता। आकारमिङ्गितं चारेणाप्यनुपालितः ॥ ७४ ॥ ना-
च्छित्त्वा परमर्माणि नाकृत्वा कर्म दारुणम्। नाहत्वा मत्स्य-
घातीव प्राप्नोति महतीं श्रियम् ॥ ७५ ॥ कर्षितं व्याधितं क्षीण-
मपानीयमघासकम्। परिविघ्नक्षमन्दञ्च प्रहर्त्तव्यमरेर्बलम् ॥७६॥
नार्थिकोऽधिनसञ्चेति कृतार्थे नास्ति सङ्गतम्। तस्मात्पूर्वाणि
साध्यानि सावशेषाणि कारयेत् ॥७७ ॥ संग्रहे विग्रहे चैव यत्नः
कार्य्योऽनसूयता। उत्साहेऽपि यत्नेन कर्त्तव्यो भूतिमिच्छता

॥ ७८ ॥ नास्य कृत्यानि बुध्येरन्मित्राणि रिपवस्तथा । आरब्धान्येव पश्येरन् सुपर्य्याप्तानि वा पुनः ॥ ७९ ॥ भीतवत् संविधातव्यं यावद्भयमनागतम् । आगतन्तु भयं दृष्ट्वा प्रहर्त्तव्यमभीतवत् ॥ ८० ॥ दृष्ट्वैनोपनतं यत्नमनुगृह्णाति यो नरः । स मृत्युमुपगृह्णीयाद्भर्मग्रहतरी यथा ॥ ८१ ॥ अनागतं हि बुध्येत यश्च कार्य्यं पुरःस्थितम् । न तु बुद्धित्वयात्किञ्चिदतिक्रामेत् प्रयोजनम् ॥ ८२ ॥ तस्मात्त्वयापि यत्नेन कर्त्तव्यो भूतिमिच्छता । विभज्य देशकालौ च दैवं धर्म्मादयस्त्रयः । नैःश्रेयसौ तु तौ श्रेयौ देशकालाविति स्थितिः ॥ ८३ ॥ तालवत् कुरुते मूलं बालः शत्रुरुपेक्षितः । गण्डमेऽग्निरिवोत्सृष्टः क्षिप्रं सञ्जायते महान् ॥ ८४ ॥ अग्निस्तोकमिवात्मानं संधुक्षयति यो नरः । स वर्द्धमानो ग्रसते महान्तमपि सञ्चयम् ॥ ८५ ॥ आशङ्काबहुलां दद्यात्कालं विघ्नेन योजयेत् । विघ्नं निमित्ततो ब्रूयान्निमित्तं वापि हेतुतः ॥ ८६ ॥ क्षुरो भूत्वा हरेत् प्राणान्रिपोः कालसाधनः । प्रतिच्छन्नो लोमहारी द्विषतां परिकर्त्तनः ॥ ८७ ॥ पाण्डवेषु यथान्यायमन्येषु च कुरूद्वह । वर्त्तमानो न मज्जेथं तथा कृत्यं समाचर ॥ ८८ ॥ सर्वकल्याणसम्पन्नो विशिष्ट इति निश्चयः । तस्मात्त्वं पाण्डुपुत्रेभ्यो रक्षात्मानं नराधिप ॥ ८९ ॥ बालेभ्यो बलिनो यस्मात् पाण्डुपुत्रा नराधिप । ब्रवीमि तस्माद्विश्लिष्टं यत् कर्त्तव्यमरिन्दम ॥ ९० ॥ सपुत्र स्मृण तद्राजन् श्रुत्वा च भव यत्नवान् । यथा भयं न पाण्डुभ्यस्तथा कुरु नराधिप । पश्चात्तापो यथा न स्यात्तथा नीतिर्विधीयताम् ॥ ९ ॥

वैशम्पायन उवाच । एवमुक्ता सम्मतस्थे कणिकः स्वरथं ततः । धृतराष्ट्रोऽपि कौरव्यः शोकार्त्तः समपद्यत ॥ ९१ ॥

इत्यादिपर्व्वणि सम्भवपर्व्वणि कणिकवाक्ये द्विचत्वारिंशदधिकशततोऽध्यायः समाप्तश्च सम्भवपर्व ॥ १४२ ॥

अथ जतुगृहपर्व ॥ ८ ॥

वैशम्पायन उवाच । ततः सुबलपुत्रस्तु राजा दुर्योधनश्च ह । दुःशासनश्च कर्णश्च दुष्टं मन्त्रममन्त्रयन् ॥ १ ॥ ते कौरव्यमनुज्ञाप्य धृतराष्ट्रं नराधिपम् । दहने तु सपुत्रायाः कुन्त्या बुद्धिमकारयन् ॥ २ ॥ तेषामिङ्गितभावज्ञो विदुरश्चाप्यदर्शिवान् । आकारेण च तं मन्त्रं बुबुधे दुष्टचेतसाम् ॥ ३ ॥ ततो विदितवेद्यात्मा पाण्डवानां हिते रतः । पलायने मतिं चक्रे कुन्त्याः पुत्रैः सहानघः ॥ ४ ॥ ततो वातसहां नावं यन्त्रयुक्तां पताकिनीम् । अभिप्रेतां दृढां ज्ञात्वा कुन्तीमिदमुवाच ह ॥ ५ ॥

विदुर उवाच । एष जातः कुलस्यास्य कीर्तिं वंशप्रणाशनः । धृतराष्ट्रः परीतात्मा धर्मं त्यजति शाश्वतम् ॥ ६ ॥ दूरं वारिपथे युक्ता तरङ्गपवनक्षमा । नौर्यया त्वमुपारूढं सपुत्रा मोक्ष्यसे शुभे ॥ ७ ॥

वैशम्पायन उवाच । तच्छ्रुत्वा व्यथिता कुन्ती पुत्रैः सह यशस्विनी । नावमारुह्य गङ्गायां प्रययौ भरतर्षभ ॥ ८ ॥ ततो विदुरवाक्येन नावं विक्रिय्य पाण्डवाः । वनं चादाय तैर्दत्तमरिष्टं प्राविशन्वनम् ॥ ९ ॥ निषादी पञ्चपुत्रा तु जातुषे तत्र वेश्मनि । कारणाभ्यागता दग्धा सह पुत्रैरनागसा ॥ १० ॥ स च म्लेच्छाधमः पापो दग्धस्तत्र पुरोचनः । वञ्चिताश्च दुरात्मानो धार्तराष्ट्राः सहानुगाः ॥ ११ ॥ अविज्ञाता महात्मानो जनानामप्रतिक्रिया । जनन्या सह कौन्तेया मुक्ता विदुरमन्त्रिता: ॥ १२ ॥ ततस्तस्मिन् पुरे लोका नगरे वारणावते । दृष्ट्वा जतुगृहं दग्धमन्वशोचन्त दुःखिताः ॥ १३ ॥ राज्ञे च प्रेषयामासुर्यथावृत्तं निवेदितुम् । संवृत्तस्ते महान् कामः पाण्डवान्दग्धवानसि ॥ १४ ॥ सकामो भव कौरव्य भुङ्क्ष्व राज्यं सपुत्रकः । तच्छ्रुत्वा धृत-

राष्ट्रेषु सह पुत्रेण घोषयन् ॥ १५ ॥ प्रेतकार्य्याणि च तथा चकार सह बान्धवैः । पाण्डवानां तथा राज्ञा भीष्मश्च कुरुसत्तमः ॥ १६ ॥

जनमेजय उवाच । पुनर्विस्तरशः श्रोतुमिच्छामि द्विजसत्तम । दाहं जतुगृहस्थस्य पाण्डवानाञ्च मोक्षणम् ॥ १७ ॥ सुदृष्टमसमिदं कर्म तेषां क्रूरोपसंहितम् । कीर्त्तयस्व यथावृत्तं परं कौतूहलं मम ॥ १८ ॥

वैशम्पायन उवाच । शृणु विस्तरशो राजन्वदतो मे परन्तप । दाहं जतुगृहस्थैतत्पाण्डवानाञ्च मोक्षणम् ॥ १९ ॥ प्राणाधिकं भीमसेनं श्रुतविद्यं धनञ्जयम् । दुर्य्योधनो वञ्चयित्वा पर्य्यतप्यत दुर्मनाः ॥ २० ॥ ततो वैकर्त्तनः कर्णः शकुनिश्चापि सौबलः । अनेकैरुपायैस्ते जिघांसन्ति स्म पाण्डवान् ॥ २१ ॥ पाण्डवा अपि तत्सर्वं प्रतिचक्रुर्य्यथागतम् । उद्धायनमकुर्वन्तो विदुरस्य मते स्थिताः ॥ २२ ॥ गुणैः समुदितान्दृष्ट्वा पौराः पाण्डुसुतांस्तदा । जनयाञ्चक्रिरे तेषां गुणान् संसत्सु भारत ॥ २३ ॥ राज्यप्राप्तिञ्च सम्प्राप्तं ज्येष्ठं पाण्डुसुतं तदा । कथयन्ति स्म सम्भूय चत्वरेषु सभासु च ॥ २४ ॥ प्रज्ञाचक्षुरचक्षुर्हा धृतराष्ट्रो जनेश्वरः । राज्यं न प्राप्तवान् पूर्वं स कथं नृपतिर्भवेत् ॥ २५ ॥ तथा शान्तनवो भीष्मः सत्यसन्धो महाव्रतः । प्रत्याख्याय पुरा राज्यं न स जातु ग्रहीष्यति ॥ २६ ॥ ते वयं पाण्डवज्येष्ठं तस्मात्तं युद्धशौण्डिनम् । अभिषिञ्चाम साध्वद्य सत्यकारुण्यवेदिनम् ॥ २७ ॥ स हि भीष्मं शान्तनवं धृतराष्ट्रञ्च धर्मवित् । सहस्रं विविधैर्भोगैर्योजयिष्यति पूजयन् ॥ २८ ॥ तेषां दुर्य्योधनः श्रुत्वा तानि वाक्यानि जल्पताम् । युधिष्ठिरानुरक्तानां पर्य्यतप्यत दुर्मतिः ॥ २९ ॥ स तप्यमानो दुष्टात्मा तेषां वाचो न चक्षमे । ईर्ष्यया चापि सन्तप्तो धृतराष्ट्रमुपागमत् ॥ ३० ॥

अथ जतुगृहपर्व ॥ ८ ॥

वैशम्पायन उवाच । ततः सुबलपुत्रस्तु राजा दुर्योधनश्च ह । दुःशासनश्च कर्णश्च दुष्टं मन्त्रममन्त्रयन् ॥ १ ॥ ते कौरव्यमनुज्ञाप्य धृतराष्ट्रं नराधिपम् । दहने तु सपुत्रायाः कुन्त्या बुद्धिमकारयन् ॥ २ ॥ तेषामिङ्गितभावज्ञो विदुरश्चाप्यदर्शिवान् । आकारेण च तं मन्त्रं बुबुधे दुष्टचेतसाम् ॥ ३ ॥ ततो विदितवेद्यात्मा पाण्डवानां हिते रतः । पलायने मतिं चक्रे कुन्त्याः पुत्रैः सहानघः ॥ ४ ॥ ततो वातसहां नावं यन्त्रयुक्तां पताकिनीम् । अभिप्रेतां दृढां ज्ञात्वा कुन्तीमिदमुवाच ह ॥ ५ ॥

विदुर उवाच । एष जातः कुलस्यास्य कीर्तिं वंशप्रणाशनः । धृतराष्ट्रः परीतात्मा धर्मं त्यजति शाश्वतम् ॥ ६ ॥ दृढं वाधिपथे युक्ता तरङ्गपवनक्षमा । नौर्यया त्वमुपामाक्षं सपुत्रा मोक्ष्यसे शुभे ॥ ७ ॥

वैशम्पायन उवाच । तच्छ्रुत्वा व्यथिता कुन्ती पुत्रैः सह यशस्विनी । नावमारुह्य गङ्गायां प्रययौ भरतर्षभ ॥ ८ ॥ ततो विदुरवाक्येन नावं विक्रिय्य पाण्डवाः । वनं चादाय तैर्दत्तमरिष्टं प्राविशन्वनम् ॥ ९ ॥ निषादी पञ्चपुत्रा तु जातुषे तत्र वेश्मनि । कारणाभ्यागता दग्धा सह पुत्रैरनागसा ॥ १० ॥ स च म्लेच्छाधमः पापो दग्धस्तत्र पुरोचनः । वञ्चिताश्च दुरात्मानो धार्तराष्ट्राः सहानुगाः ॥ ११ ॥ अविज्ञाता महात्मानो जनानामचलात्मजाः । जनन्या सह कौन्तेया मुक्ता विदुरमन्त्रिताः ॥ १२ ॥ ततस्तस्मिन् पुरे लोका नगरे वारणावते । दृष्ट्वा जतुगृहं दग्धमब्रुवोचन्त दुःखिताः ॥ १३ ॥ राज्ञे च प्रेषयामासुर्यथावृत्तं निवेदितुम् । संवृत्तस्ते महान् कामः पाण्डवान्दग्धवानसि ॥ १४ ॥ सकामो भव कौरव्य भुङ्क्ष्व राज्यं सपुत्रकः । तच्छ्रुत्वा धृत-

धृतराष्ट्र उवाच । धर्मनित्यः सदा पाण्डुस्तथा धर्मपरायणः । सर्वेषु ज्ञातिषु तथा मयि त्वासीद्विशेषतः ॥ ६ ॥ नासौ किञ्चिद्विजानाति भोजनादि चिकीर्षितम् । निवेदयति नित्यं हि मम राज्यं धृतव्रतः ॥ ७ ॥ तस्य पुत्रो यथा पाण्डुस्तथा धर्मपरायणः । गुणवान् लोकविख्यातः पौरवाणां सुसम्मतः ॥ ८ ॥ स कथं शक्यतेऽस्माभिरपाकर्तुं बलादितः । पितृपैतामहाद्राज्यात्सहायो विशेषतः ॥ ९ ॥ श्रुता हि पाण्डुनामात्या बलञ्च सततं धृतम् । श्रुता पुत्राश्च पौत्राश्च तेषामपि विशेषतः ॥ १० ॥ ते पुरा सत्कृताख्यात पाण्डुना नागरा जनाः । कथं युधिष्ठिरस्यार्थे न नो हन्युः सबान्धवान् ॥ ११ ॥

दुर्योधन उवाच । एवमेवं यथा तात भाषितं दोषमात्मनः । दृष्ट्वा प्रकृतयः सर्वा अर्थमानेन पूजिताः ॥ १२ ॥ ध्रुवमस्मत्सहायार्थे भविष्यन्ति प्रधानतः । अर्थवर्गः सहामात्यो मत्संस्थोऽद्य महीपते ॥ १३ ॥ स भवान् पाण्डवानाशु विवासयितुमर्हति । मदुनैवाभ्युपायेन नगरं वारणावतम् ॥ १४ ॥ यदा प्रतिष्ठितं राज्यं मयि राजन् भविष्यति । तदा कुन्ती सहापत्या पुनरेष्यति भारत ॥ १५ ॥

धृतराष्ट्र उवाच । दुर्योधन ममाप्येतद्धृदि संपरिवर्तते । अभिप्रायस्य पापत्वान्नैवं तु विदृणोम्यहम् ॥ १६ ॥ न च भीष्मो न च द्रोणो न च कृपो न गौतमः । विवास्यमानान् कौन्तेयानन्विच्छन्त्यथ कर्हिचित् ॥ १७ ॥ समा हि कौरवेयाणां वयन्ते चैव पुत्रक । नैते विषममिच्छेयुर्धर्मयुक्ता मनस्विनः ॥ १८ ॥ ते वयं कौरवेयाणामेतेषाञ्च महात्मनाम् । कथं न वध्यतान्तात गच्छेम जगतस्तथा ॥ १९ ॥

दुर्योधन उवाच । मध्यस्थः सततं भीष्मो द्रोणपुत्रो मयि स्थितः । यतः पुत्रस्ततो द्रोणो भविता नात्र संशयः ॥ २० ॥

क्षयः प्रारब्धतश्चैव यत एतौ ततो भवेत् । द्रोणस्य भागिनेयस्य न संत्यक्ष्यति कर्हिचित् ॥२१॥ चत्वार्यपक्षस्यास्माकं प्रच्छन्नः संयतः शरैः । न चैकः स समर्थोऽस्मान् पाण्डवार्थोऽधिबाधितुम् ॥ २२ ॥ सुविस्रब्धः पाण्डुपुत्रान् सह माता प्रवासय । वारणावतमद्यैव यथा यान्ति तथा कुरु ॥ २३ ॥ विनिष्क्रयणं घोरं हृद्दाह ग्रल्भमिवार्पितम् । घोषयावकपुष्पूलं कर्मणैतेन नाशय ॥ २४ ॥

इत्यादिपर्वणि अनुष्टुपर्वणि दुर्योधनपरामर्शे चतुश्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४४ ॥

—०:०—

वैशम्पायन उवाच । ततो दुर्योधनो राजा सर्वैः प्रकृतयः शनैः । अर्थमानप्रदानाभ्यां संजहार सहानुजः ॥ १ ॥ धृतराष्ट्रप्रयुक्ताश्च केचित् कुशलमन्त्रिणः । कथयाञ्चक्रिरे रम्यं नगरं वारणावतम् ॥ २ ॥ अयं समाजः सुमहान् रमणीयतमो भुवि । उपस्थितः पशुपतेर्नगरे वारणावते ॥ ३ ॥ सर्वरत्नसमाकीर्णे पुंसां देये मनोरमे । इत्येवं धृतराष्ट्रस्य वचनाञ्चक्रिरे कथाः ॥ ४ ॥ कथ्यमाने तथा रम्ये नगरे वारणावते । गमने पाण्डुपुत्राणां जज्ञे तत्र मतिर्नृप ॥ ५ ॥ यदा त्वमन्यत नृपो जातकौतूहला इति । उवाच चैतानथ तान् पाण्डवानम्बिकासुतः ॥ ६ ॥

धृतराष्ट्र उवाच । ममैते पुरुषा नित्यं कथयन्ति पुनः पुनः । रमणीयतमं लोके नगरं वारणावतम् ॥ ७ ॥ तं तात यदि मन्यध्वमुत्सवं वारणावते । सगणाः साध्वयाचैव विहरध्वं यथासुखाः ॥ ८ ॥ ब्राह्मणेभ्यश्च रत्नानि गायनेभ्यश्च सर्वशः । प्रयच्छध्वं यथाकामं देवा इव सुवर्चसः ॥ ९ ॥ किञ्चित्कालं विहृ

त्वमनुभूय परां मुदम् । इदं वै हास्तिनपुरं सुखिनः पुनरेष्यथ ॥ १० ॥

वैशम्पायन उवाच । धृतराष्ट्रस्य तं काममनुबुद्ध्या युधिष्ठिरः । आत्मनश्चासहायत्वं तथेति प्रत्युवाच तम् ॥ ११ ॥ ततो भीष्मं शान्तनवं विदुरञ्च महामतिम् । द्रोणञ्च वाह्लिकं चैव सोमदत्तञ्च कौरवम् ॥ १२ ॥ कृपमाचार्यपुत्रञ्च भूरिश्रवसमेव च । मान्यानन्यानमात्यांश्च ब्राह्मणांश्च तपोधनान् ॥ १३ ॥ पुरोहितांश्च पौरांश्च गान्धारञ्च यशस्विनीम् । युधिष्ठिरः शनैर्दीन उवाचेदं वचस्तदा ॥ १४ ॥ रमणीये जनाकीर्णे नगरे वारणावते । सगणास्तत्र यास्यामो धृतराष्ट्रस्य शासनात् ॥ १५ ॥ प्रसन्नमनसः सर्वे पुण्या वाचो विमुञ्चत । आशीर्भिर्ईप्सितामस्मान्न पापं प्रसहिष्यते ॥ १६ ॥ एवमुक्तास्तु ते सर्वे पाण्डुपुत्रेण कौरवाः । प्रसन्नवदना भूत्वा तेऽन्ववर्त्तन्त पाण्डवान् ॥ १७ ॥ स्वस्त्यस्तु वः पथि सदा भूतेभ्यश्चैव सर्वशः । मा च वोऽस्त्वशुभं किञ्चित्सर्वतः पाण्डुनन्दनाः ॥ १८ ॥ ततः कृतस्वस्त्ययना राज्यलम्भाय पार्थिवाः । कृत्वा सर्वाणि कार्य्याणि ययुर्वारणावतम् ॥ १९ ॥

इत्यादिपर्वणि जतुगृहपर्वणि वारणावतयात्रायां पञ्चचत्वारिंशदधिकशततमोऽध्यायः ॥ १४५ ॥

वैशम्पायन उवाच। एवमुक्तेषु राज्ञा तु पाण्डुपुत्रेषु भारत। दुर्योधनः परं हर्षमगच्छत्स दुरात्मवान्॥ १॥ स पुरोचनमेकान्तमानीय भरतर्षभ। गृहीत्वा दक्षिणे पाणौ सचिवं वाक्यमब्रवीत्॥ २॥

दुर्योधन उवाच। ममेयं वसुसम्पूर्णा पुरोचन वसुन्धरा। यथेयं मम तद्वत्ते स तां रक्षितुमर्हसि॥ ३॥ न हि मे कश्चिदन्योऽस्ति विश्वासिकतरस्त्वया। सहायो येन सन्धाय मन्त्रयेयं यथा त्वया॥ ४॥ संरक्ष तात मन्त्रञ्च सपत्नांश्च ममोदर। निपुणेनाभ्युपायेन यद्ब्रवीमि तथा कुरु॥ ५॥ पाण्डवा धृतराष्ट्रेण प्रेषिता वारणावतम्। उत्सवे विहरिष्यन्ति धृतराष्ट्रस्य शासनात्॥ ६॥ स त्वं राजभयुक्तेन स्यन्दनेनाशुगामिना। वारणावतमद्यैव यथा यासि तथा कुरु॥ ७॥ तत्र गत्वा चतुःशालं गृहं परमसंवृतम्। नगरोपान्तमाश्रित्य कारयेथा महाधनम्॥ ८॥ शणसर्जरसादीनि यानि द्रव्याणि कानिचित्। आग्नेयान्युत सन्तीह तानि तत्र प्रदापय॥ ९॥ सर्पिस्तैलवसाभिश्च लाक्षया चाप्यनल्पया। मृत्तिकां मिश्रयित्वा तं लेपं कुड्येषु दापय॥ १०॥ शणं तैलं घृतं चैव जतु दारूणि चैव हि। तस्मिन्वेश्मनि सर्वाणि निक्षिपेथाः समन्ततः॥ ११॥ यथा च तन्न पश्येरन् परीक्षन्तोऽपि पाण्डवाः। आग्नेयमिति तत्कार्य्यमपि चान्येऽपि मानवाः॥ १२॥ वेश्मन्येवं कृते तत्र गत्वा तान् परमार्चितान्। वासयेथाः पाण्डवेयान् कुन्तीञ्च ससुहृज्जनाम्॥ १३॥ आसनानि च दिव्यानि यानानि शयनानि च। विधातव्यानि पाण्डूनां यथा तुष्येत वै पिता॥ १४॥ यथा च तत्र जानन्ति नगरे वारणावते। तथा कुर्वं विधातव्यं यावत्कालस्य पर्य्ययः॥ १५॥ ज्ञात्वा च तान् सुविश्वस्तान् गतानानकुतोभयान्। अग्निमुक्त्वा ततो देयो द्वारतस्तस्य वेश्मनः

॥ १७ ॥ दह्यमाने स्वके गेहे दग्धा इति ततो जनाः। न गर्हयेयुरस्मान्वै पाण्डवार्थाय कर्हिचित् ॥ १८ ॥ स तथेति प्रतिज्ञाय कौरवाय पुरोचनः। प्रायाद्रासभयुक्तेन स्यन्देनाशुगामिना ॥ १९ ॥ स गत्वा त्वरितं राजन्दुर्योधनमते स्थितः। यथोक्तं राजपुत्रेण सर्वं चक्रे पुरोचनः ॥ २० ॥

इत्यादिपर्वणि जतुगृहपर्वणि पुरोचनोपदेशे षट्-चत्वारिंशदधिकशततोऽध्यायः ॥ १४६ ॥

वैशम्पायन उवाच। पाण्डवास्तु रथान्युक्ता सदश्वैरनिलोपमैः। आरोहमाणा भीष्मस्य पादौ जगृहुराशिषः ॥ १ ॥ राज्ञश्च धृतराष्ट्रस्य द्रोणस्य च महात्मनः। अन्येषाञ्चैव विदुषां कृपस्य विदुरस्य च ॥ २ ॥ एवं सर्वान् कुरून् दृष्ट्वानभिवाद्य यतव्रताः। समालिङ्ग्य समानाग्रैर्बालैश्चाप्यभिवादिताः ॥ ३ ॥ सर्वा मातृस्तथापृच्छ्य कृत्वा चैव प्रदक्षिणम्। सर्वाः प्रकृतयश्चैव प्रययुर्वारणावतम् ॥ ४ ॥ विदुरश्च महाप्राज्ञस्तथान्ये कुरुपुङ्गवाः। पौराश्च पुरुषव्याघ्रानन्वयुः शोककर्शिताः ॥ ५ ॥ तत्र केचिदब्रुवन्ति स्म पौरजानपदा नराः। दीनान् दृष्ट्वा पाण्डुसुतानतीव भृशदुःखिताः ॥ ६ ॥ विषमं पश्यते राजा सर्वथा स सुमन्दधीः। कौरव्यो धृतराष्ट्रस्तु न च धर्मं प्रपश्यति ॥ ७ ॥ न हि पापमपापात्मा रोचयिष्यति पाण्डवः। भीमो वा बलिनां श्रेष्ठः कौन्तेयो वा धनञ्जयः ॥ ८ ॥ कृत एव महात्मानौ माद्रीसुतौ करिष्यतः। तान् राज्यं पितृतः प्राप्तान् धृतराष्ट्रो न मृष्यते ॥ ९ ॥ अधर्म्यमिदमत्यन्तं कथं भीष्मोऽनुमन्यते। विवास्यमानानस्मांस्तु नगरे योऽभिमन्यते ॥ १० ॥ पितेव हि नृपोऽस्माकमभूज्जन्तवः पुरा। विचित्रवीर्यो राजर्षिः पाण्डुश्च कुरुनन्दनः

॥ ११ ॥ स तस्मिन् पुरुषव्याघ्रे देवभावं गते सति। राज-पुत्रानिमान् बालान् धृतराष्ट्रो न रक्ष्यते ॥ १२ ॥ वयमेतदनिच्छन्तः सर्व एव पुरोत्तमात्। गृहान्विहाय गच्छामो यत्र गन्ता युधिष्ठिरः ॥ २२ ॥ तांस्तथा वादिनः पौरान् दुःखितान्दुःखकर्शितः। उवाच मनसा ध्यात्वा धर्मराजो युधिष्ठिरः ॥ २३ ॥ पिता मान्यो गुरुः श्रेष्ठो यदाह पृथिवीपतिः। अयङ्कुमानैक्षत् कार्यमस्माभिरिति नो व्रतम् ॥ २४ ॥ भवन्तः सुहृदोऽस्माकमस्मान् कृत्वा प्रदक्षिणम्। प्रतिनन्द्य तथाशीर्भिर्निवर्त्तध्वं यथागृहम् ॥ २५ ॥ यदा तु कार्यमस्माकं भवद्भिरुपपत्स्यते। तदा करिष्यथास्माकं प्रियाणि च हितानि च ॥ २६ ॥ एवमुक्तास्ततः पौराः कृत्वा चापि प्रदक्षिणम्। आशीर्भिश्चाभिनन्द्यैतान् जग्मुर्नगरमेव हि ॥ २७ ॥ पौरेषु विनिवृत्तेषु विदुरः सर्वधर्मवित्। बोधयन् पाण्डवश्रेष्ठमिदं वचनमब्रवीत् ॥ २८ ॥ प्राज्ञः प्राज्ञं प्रलापज्ञः प्रलापज्ञमिदं वचः। यो जानाति परप्रज्ञां नीतिशास्त्रानुसारिणीम्। विज्ञायेह तथा कुर्यादापदं निस्तरेद्यया ॥२९॥ अलोहं निशितं शस्त्रं शरीरपरिकर्त्तनम्। यो वेत्ति न तु तं घ्नन्ति प्रतिघातविदं द्विषः ॥ ३० ॥ कक्षघ्नः शिशिरघ्नश्च महाकक्षे विलोकसः। न दहेदिति चात्मानं यो रक्षति स जीवति ॥ ३१ ॥ नाचक्षुर्वेत्ति पन्थानं नाचक्षुर्विन्दते दिशः। नाश्रुतिर्भूतिमाप्नोति बुध्यस्वैवं प्रबोधितः ॥ ३२ ॥ अनाप्तेर्दत्तमादत्ते नरः शस्त्रमलोहजम्। श्वाविच्छरणमासाद्य प्रमुच्येत ऋताग्रनात् ॥ ३३ ॥ चरन्मार्गान्विजानाति नक्षत्रैर्विन्दते दिशः। आत्मना चात्मनः पञ्च पीड्यन्नानुपीड्यते ॥ ३४ ॥ एवमुक्तः प्रत्युवाच धर्मराजो युधिष्ठिरः। विदुरं विदुषां श्रेष्ठं भ्रातरं पाण्डवः ॥ ३५ ॥ अनुशिष्यानुगम्यैतान् कृत्वा चैव प्रदक्षिणम्। पाण्डवानभ्यनुज्ञाय विदुरः प्रययौ गृहान् ॥ ३६ ॥ निवृत्ते विदुरे

चापि भीष्मे पौरजने तथा । अजातशत्रुमासाद्य कुन्ती वचनमब्रवीत् ॥ ३७ ॥ क्षत्ता यदब्रवीद्वाक्यं जनमध्येब्रुवन्निव । त्वया च स तथेत्युक्तो जानीमो न च तद्वयम् ॥ ३८ ॥ यदीदं शक्यमस्माभिर्ज्ञातुं न च सदोषवत् । श्रोतुमिच्छामि तत्सर्वं संवादं तव तस्य च ॥ ३९ ॥

युधिष्ठिर उवाच । गूढाङ्गिस्त्वं बोद्धव्य इति मां विदुरोऽब्रवीत् । पन्थाश्च वो नाविदितः कश्चित् स्यादिति धर्मधीः ॥ ४० ॥ जितेन्द्रियश्च वसुधां प्राप्स्यतीति च मेऽब्रवीत् । विज्ञातमिति तत्सर्वं प्रयुक्तो विदुरो मया ॥ ४१ ॥

वैशम्पायन उवाच । अष्टमेऽहनि रोहिण्यां प्रयाताः फाल्गुनस्य ते । वारणावतमासाद्य ददृशुर्नागरं जनम् ॥ ४२ ॥

इत्यादिपर्वणि जतुगृहपर्वणि वारणावतागमने सप्तचत्वारिंशदधिकशततमोऽध्यायः ॥ १४७ ॥

वैशम्पायन उवाच । ततः सर्वाः प्रकृतयो नगराद्वारणावतात् । सर्वमङ्गलसंयुक्ता यथाशास्त्रमतन्द्रिताः ॥ १ ॥ श्रुत्वागतान् पाण्डुपुत्रान्नानायानैः सहस्रशः । अभिजग्मुर्नरश्रेष्ठान् श्रुत्वैव परया मुदा ॥ २ ॥ ते समासाद्य कौन्तेयान् वारणावतका जनाः । कृत्वाजयाशिषः सर्वे परिवार्यावतस्थिरे ॥ ३ ॥ तैरेतैः पुरुषव्याघ्रो धर्मराजो युधिष्ठिरः । बिबभौ देवसङ्काशो यज्ञपार्थिरिवामरैः ॥ ४ ॥ सत्कृतास्त्वेव पौरैस्ते पौरान् सत्कृत्य चानघ । अलङ्कृतं जनाकीर्णं विविशुर्वारणावतम् ॥ ५ ॥ ते प्रविश्य पुरीं वीरास्तूर्णं जग्मू रथो गृहान् । ब्राह्मणानां महीपाल रतानां स्वेषु कर्मसु ॥ ६ ॥ नगराधिकृतानाञ्च गृहाणि रथिनां तदा । उपतस्थुर्नरश्रेष्ठा वैश्यशूद्रगृहाण्यपि ॥ ७ ॥

अर्चिताश्च नरैः पौरैः प्रागुदया भरतर्षभ। जग्मुरात्मसमं पश्चात् पुरोचनपुरःसराः ॥ ८ ॥ तेभ्यो भक्ष्यानि पानानि शयनानि शुभानि च। आसनानि च मुख्यानि प्रददौ स पुरोचनः ॥९॥ तत्र ते सत्कृतास्तेन सुमहार्हपरिच्छदाः। उषास्यमानाः पुरुषैरूषुः पुरनिवासिभिः ॥ १० ॥ दशरात्रोषितानान्तु तत्र तेषां पुरोचनः। निवेदयामास गृहं शिवाख्यमशिवं तदा ॥ ११ ॥ तच्च ते पुरुषव्याघ्रा विविशुः सपरिच्छदाः। पुरोचनस्य वचनात् कैलासमिव शुभ्रकाः ॥ १२ ॥ तज्जागारमभिप्रेक्ष्य सर्वधर्मभृतांवरः। उवाचाग्नेयमित्येवं भीमसेनं युधिष्ठिरः ॥ १३ ॥

युधिष्ठिर उवाच। जिघ्राणोऽस्य वसागन्धं सर्पिर्जतुविमिश्रितम्। कृतं हि व्यक्तमाग्नेयमिदं वेश्म परन्तप ॥ १४ ॥ शणसर्जरसं व्यक्तमानीय गृहकर्मणि। मुञ्जवल्वजवंशादि द्रव्यं सर्वं घृतोक्षितम् ॥ १५ ॥ शिल्पिभिः सुकृतं ह्यस्मै विनीतैर्वेश्मकर्मणि। विश्वस्तं सामयं पापो दग्धुकामः पुरोचनः ॥ १६ ॥ तथाहि वर्त्तते मन्दः सुयोधनवशे स्थितः। दूयान्तु तां महाबुद्धिर्विदुरो दृष्टवांस्तदा ॥ १७ ॥ आपदं तेन मां पार्थ स संबोधितवान् पुरा। तं वयं बोधितास्तेन नित्यमस्मद्धितैषिणा ॥१८॥ छित्त्वा कनीयसा स्नेहाद्वृद्धिमन्तोऽशिवं गृहम्। अनार्यैः सुकृतं गूढैर्दुर्योधनवशानुगैः ॥ १९ ॥

भीमसेन उवाच। यदीदं गृहमाग्नेयं विहितं मन्यते भवान्। तथैव साधु गच्छामो यत्र पूर्वोषिता वयम् ॥ २० ॥

युधिष्ठिर उवाच। इह यत्तु निराकारैर्वेश्मव्यमिति रोचये। अप्रमत्तैर्विचिन्वद्भिर्गतिमिष्टां ध्रुवामितः ॥ २१ ॥ यदि विन्देत चाकारमस्माकं स पुरोचनः। क्षिप्रकारी ततो भूत्वा प्रसह्यापि दहेत नः ॥ २२ ॥ नायं विभेत्युपक्रोशादधर्माद्वा पुरोचनः। तथाहि वर्त्तते मन्दः सुयोधनवशे स्थितः ॥ २३ ॥ अपि चायं

प्रदग्धेषु भीष्मोऽस्मासु पितामहः । कोपं कुर्य्यात्किमर्थं वा कौरवान् कोपयेत सः ॥ २४ ॥ अथवापीह दग्धेषु भीष्मोऽस्माकं पितामहः । धर्म इत्येव कुर्य्येरन्ये चान्ये कुरुपुङ्गवाः ॥ २५ ॥ वयन्तु यदि दाहस्य विस्मृतः प्रद्रवेम हि । स्पर्द्धेर्नोवातयेत्सर्वान् राज्यकृत्यः सुयोधनः ॥ २६ ॥ अपदस्थान् पदे तिष्ठन्नपचान् पक्षसंस्थितः । हीनकोषान्महाकोषः प्रयोगैर्घातयेद्ध्रुवम् ॥२७॥ तदस्माभिरिमं पापं तच्च पापं सुयोधनम् । वञ्चयद्भिर्नि वसव्यं छद्मवासं क्वचित् क्वचित् ॥ २८ ॥ ते वयं मृगयाशीलाश्चरामो वसुधामिमाम् । तथा नो विहिता मार्गा भविष्यन्ति पलायताम् ॥ २९ ॥ औषञ्च विषमद्यैव करवाम सुसंहतम् । गूढोच्छ्वासान्न नस्तत्र हुताशः संप्रधक्ष्यति ॥ ३० ॥ यमतोऽत्र यथा चास्मान्न बुध्येत पुरोचनः । धीरो वापि जनः कश्चित्तथा कार्य्यमतन्द्रितैः ॥ ३१ ॥

इत्यादिपर्वणि जतुगृहपर्वणि भीमसेनयुधिष्ठिरसंवादे अष्टचत्वारिंशदधिकशततोऽध्यायः ॥ १४८ ॥

—:०:—

वैशम्पायन उवाच । विदुरस्य सुहृत्कश्चित् खनकः कुशलो नरः । विविक्ते पाण्डवान् राजन्निदं वचनमब्रवीत् ॥ १ ॥ प्रहितो विदुरेणास्मि खनकः कुशलो ह्यहम् । पाण्डवानां प्रियं कार्य्यमिति किं करवाणि वः ॥ २ ॥ प्रच्छन्नं विदुरेणोक्तः ज्ञेयस्त्वमिह पाण्डवान् । प्रतिपाद्य विश्रामादिति किं करवाणि वः ॥ ३ ॥ कृष्णपक्षे चतुर्दश्यां रात्रावस्य पुरोचनः । भवनस्य तव द्वारि प्रदास्यति हुताशनम् ॥ ४ ॥ मात्रा सह प्रदग्धव्याः पाण्डवाः पुरुषर्षभाः । इति व्यवसितं तस्य धार्त्तराष्ट्रस्य दुर्मतेः ॥ ५ ॥ किञ्चिच्च विदुरेणोक्तो म्लेच्छवाचास्मि पाण्डव । त्वया

च तत्तथेत्युक्त्वेतद्विश्वासकारणम् । उवाच तं सत्यधृतिः कुन्ति-
पुत्रो युधिष्ठिरः ॥ ६ ॥

युधिष्ठिर उवाच । अभिजानामि सौम्य त्वां सुहृदं विदु-
रस्य वै ॥ ७ ॥ शुचिमात्मं प्रियञ्चैव सहा च दृढभक्तिकम् । न
विद्यते कथं किञ्चिद्विज्ञातं प्रयोजनम् ॥ ८ ॥ यथा तस्य तथा
नस्त्वं निर्विशेषा वयं त्वयि । भवतश्च यथा तस्य पालयास्मान्यथा
कविः ॥ ९ ॥ इदं शरणमाग्नेयं मन्दर्यमिति ते मतिः । पुरो-
चनेन विहितं धार्तराष्ट्रस्य शासनात् ॥ १० ॥ स पापः कोपवां-
श्चैव सस्वायत्त दुर्मतिः । अस्मानपि च पापात्मा नित्यकालं
प्रबाधते ॥ ११ ॥ स भवान्मोक्षयत्वस्मान् यत्नेनास्माद्धुताशनात् ।
अस्मास्विह हि दग्धेषु सकामः स्यात् सुयोधनः ॥ १२ ॥ सर्वद्र-
व्यायुधागारमिदं तस्य दुरात्मनः । वप्रान्तं निश्रितीकारमाग्नि-
त्वेदं कृतं महत् ॥ १३ ॥ इदं तदशुभं नूनं तस्य कर्म चिकी-
र्षितम् । प्रागेव विदुरो वेद तेनास्मानवबोधयत् ॥ १४ ॥ सेय-
मापदनुप्राप्ता रक्षा वां दृष्टवान् पुरा । पुरोचनस्याविदितान-
स्मांस्त्वं प्रतिमोचय ॥ १५ ॥ स तथेति प्रतिश्रुत्य खनको यत्न-
मास्थितः । परिखालुल्किरन्नाम चकार च महाबिलम् ॥ १६ ॥
चक्रे च वेश्मनस्तस्य मध्ये नातिमहाबिलम् । कपाटयुक्तमज्ञातं सर्म
भूम्याश्च भारत ॥ १७ ॥ पुरोचनभयादेव व्यदधात्संवृतं सुखम् ।
स तस्य तु गृहद्वारि वसत्यशुभधीः सदा ॥ १८ ॥ तत्र ते सायुधाः
सर्वे वसन्तिस्म चपां नृप । दिवा चरन्ति मृगयां पाण्डवेया वना-
दनम् ॥ १९ ॥ विश्वस्तवद्विश्वस्ता वञ्चयन्तः पुरोचनम् । अतुष्टा-
स्तुष्टवद्राजन्नूषुः परमविस्मिताः ॥ २० ॥ न चैनानन्वबुध्यन्त नरा
नगरवासिनः । ऋत्वा विदुरामात्यात्तस्मात् खनकसत्तमात् ॥ २१ ॥

इत्यादिपर्वणि जतुगृहपर्वणि जतुगृहवासे जनपद्याग-
दधिकशततोऽध्यायः ॥ १४९ ॥

वैशम्पायन उवाच । तांस्तु दृष्ट्वा सुमनसः परिसम्वत्सरोषितान् । विश्वस्तानिव संलक्ष्य हर्षञ्चक्रे पुरोचनः ॥ १ ॥ पुरोचने तथा हृष्टे कौन्तेयोऽथ युधिष्ठिरः । भीमसेनार्जुनौ चोभौ यमौ प्रोवाच धर्मवित् ॥ २ ॥

युधिष्ठिर उवाच । अज्ञानयं सुविश्वस्तान्वेत्ति पापः पुरोचनः । वञ्चितोऽयं नृशंसात्मा कालं कञ्चे यथायने ॥ ३ ॥ आयुधागारमादीप्य दग्ध्वा चैव पुरोचनम् । षट्प्राणिनो निधायेह द्रवामोऽनभिलक्षिताः ॥ ४ ॥

वैशम्पायन उवाच । अथ दानापदेशेन कुन्ती ब्राह्मणभोजनम् । चक्रे निशि महाराज आजग्मुस्तत्र योषितः ॥ ५ ॥ ता विहृत्य यथा कामं भुक्त्वा पीत्वा च भारत । जग्मुर्जग्धि मटहाजेव समनुज्ञाप्य माधवीम् ॥ ६ ॥ निषादी पञ्चपुत्रा तु तस्मिन् भोज्ये यदृच्छया । अन्वार्थिनी समभ्यागात्सपुत्रा कालचोदिता ॥ ७ ॥ सा पीत्वा मदिरां मत्ता सपुत्रा मदविह्वला । सह सर्वैः सुतैराजंस्तस्मिन्नेव निवेशने ॥ ८ ॥ सुष्वाप विगतज्ञाना मृतकल्पा नराधिप । अथ प्रवाते तुमुले निशि सुप्ते जने तदा ॥ ९ ॥ तदुपादीपयद्भीमः श्वेते यत्र पुरोचनः । ततो जतुमटहागारं दीपयामास पाण्डवः ॥ १० ॥ समन्ततो ददौ पापादग्निं तत्र निवेशने । ज्ञात्वातु तन्मृहं सर्वमादीप्तं पाण्डुनन्दनाः ॥ ११ ॥ सुरङ्गां विविशुस्तूर्णं माता सार्द्धमरिन्दमाः । ततः प्रतापः सुमहाञ्ज्वलनैव विभावसोः ॥ १२ ॥ प्रादुरासीत्तदा तेन बुबुधे स जनव्रजः । तदवेक्ष्य मटहं दीप्तमाजुः पौराः क्षणादुना ॥ १३ ॥

पौरा ऊचुः । दुर्बोधनप्रयुक्तेन पापेनाकृतबुद्धिना । मटहमात्मविनाशाय कारितं दाहितञ्च तत् ॥ १४ ॥ अहो धिग्धृतराष्ट्रस्य बुद्धिर्जातिरभञ्जसी । यः शुचीन् पाण्डुदायादान्दाह-

यामास शत्रुवत्॥ १५॥ हिंस्या त्विदानीं पापात्मा दग्धोऽयमतिदुर्मतिः। अनागसः सुविश्वस्तान्वो दहाद्य नरोत्तमान्॥१६॥

वैशम्पायन उवाच। एवन्ते विलपन्ति स्म वारणावतका जनाः। परिवार्य्य गृहं तच्च तस्थुरात्वी समन्ततः॥ १७॥ पाण्डवाश्चापि ते सर्वे सह माता सुदुःखिताः। बिलेन तेन निर्गत्य जग्मुर्तं तमलक्षिताः॥ १८॥ तेन निर्द्रोपरोधेन साध्वसेन च पाण्डवाः। न शेकुः सहसा गन्तुं सह माता परन्तपाः॥ १९॥ भीमसेनस्तु राजेन्द्र भीमवेगपराक्रमः। जगाम भ्रातृनादाय सर्वान्भ्रातरमेव च॥ २०॥ स्कन्धमारोप्य जननीं यमावङ्केन वीर्य्यवान्। पार्थौ गृहीत्वा पाणिभ्यां भ्रातरौ सुमहाबलः॥ २१॥ ऊरसा पादपान् भञ्जन्महीं पद्भ्यां विदारयन्। स जगामाशु तेजस्वी वातरंहा वृकोदरः॥ २२॥

इत्यादिपर्वणि जतुगृहपर्वणि जतुगृहदाहे पञ्चाशदधिकशततोऽध्यायः॥ १५०॥

वैशम्पायन उवाच। एतस्मिन्नेव काले तु यथा सम्भाव्यं कविः। विदुरः प्रेषयामास तद्वनं पुरुषं शुचिम्॥ १॥ स गत्वा तु यथोद्देशं पाण्डवान्ददृशे वने। जनन्या सह कौरव्य मापयानान्ददौजलम्॥ २॥ विदितं तन्महाबुद्धेर्विदुरस्य महात्मनः। ततस्तस्यापि चारेण चेष्टितं पापचेतसः॥ ३॥ ततः स प्रेषितो विद्वान् विदुरेण नरस्तदा। पार्थानां दर्शयामास मनोमारुतगामिनीम्॥ ४॥ सर्ववातसहां नावं यन्त्रयुक्तां पताकिनीम्। शिवे भागीरथीतीरे नरैर्विश्वासिभिः कृताम्॥ ५॥ ततः पुनरयोवाच तामकं पूर्वचोदितम्। युधिष्ठिर निबोधेदं संज्ञार्थं वचनं कवेः॥ ६॥ कृष्णः शिखिरश्च महाकक्षे विलौ-

कृतः । न हन्तीत्येवमात्मानं यो रक्षति स जीवति ॥ ७ ॥ तेन मां प्रेषितं विद्धि विश्वस्तं संशयानया । भूयश्चैवाह मां चक्षा विदुरः सर्वतोऽर्थवित् ॥ ८ ॥ कर्णं दुर्योधनञ्चैव भ्रातृभिः सहितं रणे । शकुनिञ्चैव कौन्तेय विजेतासि न संशयः ॥ ९ ॥ दृढं वारिपथे युक्ता नौरप्लुतसुखगामिनी । मोचयिष्यति वः सर्वा-नस्माद्देशान्न संशयः ॥ १० ॥ अथ तान् व्यथितान् दृष्ट्वा सह माता नरोत्तमान् । नावमारोप्य गङ्गायां प्रस्थितानब्रवीत् पुनः ॥ ११ ॥ विदुरो मूर्ध्न्युपाघ्राय परिष्वज्य वचो मुदुः । अरिष्टं गच्छताव्यग्राः पन्थानमिति चाब्रवीत् ॥ १२ ॥ इत्युक्ता स तु तान् वीरान् पुमान्विदुरचोदितः । तारयामास राजेन्द्र गङ्गां नावा नरर्षभान् ॥ १३ ॥ तारयित्वा ततो गङ्गां पारं प्राप्तांश्च सर्वतः । जयाशिषः प्रयुज्याथ यथागतमगाद्विभुः ॥ १४ ॥ पाण्डवाश्च महात्मानः प्रतिसन्दिश्य वै क्षत्तुः । गङ्गामुत्तीर्य वेगेन जग्मुर्गूढमलक्षिताः ॥ १५ ॥

इत्यादिपर्वणि जतुगृहपर्वणि गङ्गोत्तरणे एकपञ्चाश-
दधिकशततोऽध्यायः ॥ १५१ ॥

—०:०—

वैशम्पायन उवाच । अथ रात्र्यां व्यतीतायामशेषो नागरो जनः । तत्राजगाम त्वरितो दिदृक्षुः पाण्डुनन्दनान् ॥ १ ॥ निर्वापयन्तो ज्वलनं ते जना दृढमुक्षतः । जातुषं तद्गृहं दग्ध-ममात्यञ्च पुरोचनम् ॥ २ ॥ नूनं दुर्योधनेनेदं विहितं पाप-कर्मणा । पाण्डवानां विनाशायेत्येवं ते चुक्रुशुर्जनाः ॥ ३ ॥ विदिते धृतराष्ट्रस्य धार्त्तराष्ट्रो न संशयः । दग्धवान् पाण्डुदायादान्न स्वेनं प्रतिषिद्धवान् ॥ ४ ॥ नूनं शान्तनवोऽप्यीह न धर्ममनु-वर्त्तते । द्रोणश्च विदुरश्च व कृपश्चान्ये च कौरवाः ॥ ५ ॥ ते

वयं धृतराष्ट्रस्य प्रेषयामो दुरात्मनः । संवृत्तस्ते परः कामः पाण्डवान्दग्धवानसि ॥ ६ ॥ ततो व्यपोहमानास्ते पाण्डवार्थे कृताञ्जनम् । निषादीं दहनुर्दग्धां पञ्चपुत्रामबागसम् ॥ ७ ॥ खनकेन तु तेनैव वेश्म शोधयता बिलम् । पांशुभिः पिहितं तच्च पुरुषैर्नैलचितम् ॥ ८ ॥ ततस्ते ज्ञापयामासुर्धृतराष्ट्रस्य नागराः । पाण्डवानग्निना दग्धानमात्यस्य पुरोचनम् ॥ ९ ॥ श्रुत्वा तु धृतराष्ट्रस्तद्राजा सुमहदप्रियम् । विनाशं पाण्डुपुत्राणां विललाप सुदुःखितः ॥ १० ॥ अद्य पाण्डुर्हतो राजा मम भ्राता महायशाः । तेषु वीरेषु दग्धेषु मात्रा सह विशेषतः ॥ ११ ॥ गच्छन्तु पुरुषाः शीघ्रं नगरं वारणावतम् । सत्कारयन्तु तान् वीरान् कुन्तिराजसुताञ्च ताम् ॥ १२ ॥ कारयन्तु च कृत्यानि शुभानि च बहूनि च । ये च तत्र मृतास्तेषां सुहृदो यान्तु तानपि ॥ १३ ॥ एवं गते मया शक्यं यद्यत्कारयितुं हितम् । पाण्डवानाञ्च कुन्त्याश्च तत्सर्वं क्रियतां धनैः ॥ १४ ॥ एवमुक्ता ततश्चक्रे ज्ञातिभिः परिवारितः । उदकं पाण्डुपुत्राणां धृतराष्ट्रोऽम्बिकासुतः ॥ १५ ॥ रुरुदुः सहिताः सर्वे भृशं शोकपरायणाः । हा युधिष्ठिर कौरव्य हा भीम इति चापरे ॥ १६ ॥ हा फाल्गुनेति चाप्यन्ये हा यमाविति चापरे । कुन्तीमाद्यांश्च शोचन्त उदकं चक्रिरे जनाः ॥ १७ ॥ अन्ये पौरजनाश्च वसन्तश्चोचन्त पाण्डवान् । विदुरस्त्वल्पशश्चक्रे शोकं वेद परं हि सः ॥ १८ ॥ पाण्डवाश्चापि निर्गत्य नगराद्वारणावतात् । नदीकक्षमनुप्राप्ता मातृषष्ठा महाबलाः ॥ १९ ॥ हायानां भुजवेगेन नद्याः स्रोतो जवेन च । वायुना चानुकूलेन तूर्णं पारमवाप्नुवन् ॥ २० ॥ ततो नावं परित्यज्य प्रययुर्दक्षिणां दिशम् । विज्ञाय निशि पन्थानं नक्षत्रगणसूचितम् ॥ २१ ॥ यतमाना वनं राजन् गहनं प्रतिपेदिरे । ततः श्रान्ताः पिपासार्त्ता निद्रान्धाः पाण्डुनन्दनाः

॥२२॥ पुनरूचुर्महावीर्यं भीमसेनमिदं वचः। इतः कष्टतरं किंनु यद्वयं गहने वने। दिशश्च न विजानीमो गन्तुं चैव न शक्नुमः ॥ २३॥ तच्च पारं न जानीमो यदि दग्धः पुरोचनः। कथन्नु विप्रमुच्येम भयादस्मादलक्षिताः ॥ २४ ॥ पुनरस्मानुपादाय तथैव व्रज भारत। त्वं हि नो बलवानेको यथा सततगस्तथा ॥ २५ ॥ इत्युक्तो धर्मराजेन भीमसेनो महाबलः। आदाय कुन्तीं भ्रातॄंश्च जगामाशु महाबलः ॥ २६ ॥

इत्यादिपर्वणि जतुगृहपर्वणि पाण्डववनप्रवेशे द्विपञ्चाशदधिकशततोऽध्यायः ॥ १५२ ॥

—०६०—

वैशम्पायन उवाच। तेन विक्रमयुक्तेन ऊरुवेगसमीरितम्। वनं सहस्रविटपं व्याघूर्णितमिवाभवत् ॥ १ ॥ जङ्घाघातो ववौ चास्य शुचिशुक्रागमे यथा। आवर्जितलताहस्तं मार्गं चक्रे महाबलः ॥ २ ॥ स गच्छन् पुष्पितांश्चैव फलितांश्च वनस्पतीन्। अवरुज्य ययौ गुल्मान् पथस्तस्य समीपजान् ॥ ३ ॥ स रोषित इव क्रुद्धो वने भञ्जन्महाद्रुमान्। त्रिःप्रस्रुतमदः प्रेप्सुः षष्टिवर्षो मतङ्गराट् ॥ ४ ॥ गच्छतस्तस्य वेगेन ताक्ष्यं मारुतरंहसः। भीमस्य पाण्डुपुत्राणां मूर्च्छैव समजायत ॥ ५ ॥ असक्तज्ञापि सन्तोयं दूरपारं भुजम्बवैः। पयि प्रच्छन्नमासेदुर्धार्त्तराष्ट्रभयात्तदा ॥ ६ ॥ कृच्छ्रेण मातरञ्चैव सुकुमारीं यशस्विनीम्। अवहत्स तु पृष्ठेन रोधःसु विषमेषु च ॥ ७ ॥ अगमच्च वनोद्देशमल्पमूलफलोदकम्। क्रूरपक्षिमृगं घोरं सायाह्ने भरतर्षभ ॥ ८ ॥ घोरा समभवत्सन्ध्या दारुणा शकुनिक्षयः। अप्रकाशा दिशः सर्वा वातैरासन्नमार्त्तवैः ॥ ९ ॥ शीर्णपर्णफलैराजन् बहुगुल्मसमाकुलैः। अग्लावभुग्नभूयिष्ठैर्नानाद्रुमसमाकुलैः ॥ १० ॥ ते

श्रमेण च कौरव्यास्तृष्णया च प्रपीड़िताः। नाशक्नुवंस्तदा गन्तुं निद्रया च प्रबाधया ॥ ११ ॥ न्यविशन्त हि ते सर्वे निराखादे महावने। ततस्तु पा परिक्लान्ता कुन्ती पुत्रानथाब्रवीत् ॥१२॥ माता सती पाण्डवानां पञ्चानां मध्यतः स्थिता। तृष्णया हि परीतास्मि पुत्रान् श्रममथाब्रवीत् ॥ १३ ॥ तच्छ्रुत्वा भीमसेनस्तु मातृस्नेहात् प्रजल्पितम्। कारुण्येन मनस्तप्तं गमनायोपचक्रमे ॥ १४ ॥ ततो भीमो वनं घोरं प्रविश्य विजनं महत्। न्यग्रोधं विपुलच्छायं रमणीयं ददर्श च ॥ १५ ॥ तत्र निक्षिप्य तान् सर्वानुवाच भरतर्षभः। पानीयं मृगयामीह विश्रमध्वमिति प्रभो ॥ १६ ॥ एते रुवन्ति मधुरं सारसा जलचारिणः। ध्रुवमत्र जलस्थानं महच्चेति मतिर्मम ॥ १७ ॥ अनुज्ञातः स गच्छेति भ्रात्रा ज्येष्ठेन भारत। जगाम तत्र यत्र स्म सारसा जलचारिणः ॥ १८ ॥ स तत्र पीत्वा पानीयं स्नात्वा च भरतर्षभ। तेषामर्थे च जग्राह भ्रातॄणां भ्रातृवत्सलः ॥१९॥ उत्तरीयेण पानीयमानयामास भारत। गव्यूतिमात्रादागत्य त्वरितो मातरं प्रति। शोकदुःखपरीतात्मा निश्श्वासोरगो यथा ॥ २० ॥ स सुप्तां मातरं दृष्ट्वा भ्रातॄंश्च वसुधातले। भृशं शोकपरीतात्मा विललाप वृकोदरः ॥ २१ ॥ अतः कष्टतरं किन्नु द्रष्टव्यं हि भविष्यति। यत् पश्यामि महीसुप्तान् भ्रातॄनद्य सुमन्दभाक् ॥ २२ ॥ शयनेषु परार्ह्येषु ये पुरा वारणावते। नाधिजग्मुस्तदा निद्रां तेऽद्य सुप्ता महीतले ॥ २३ ॥ स्नुषां वसुदेवस्य शत्रुसङ्घावमर्हतीम्। कुन्तिराजसुतां कुन्तीं सर्वलक्षणपूजिताम् ॥ २४ ॥ स्नुषां विचित्रवीर्यस्य भार्यां पाण्डोर्महात्मनः। तथैव चास्माञ्जननीं पुण्डरीकोदरप्रभाम् ॥२५॥ सुकुमारतरामेनां महार्हशयनोचिताम्। शयानां पश्यताद्येह पृथिव्यामतथोचिताम् ॥ २६ ॥ धर्मादिन्द्राच्च वाताच्च सुषुवे या सुतानिमान्। सेयं भूमौ परिश्रान्ता

शेते प्रासादशायिनी ॥ २७ ॥ किन्नु दुःखतरं शक्यं मया द्रष्टुमतःपरम्। योऽहमद्य नरव्याघ्रान् सुभ्रान् पश्यामि भूतले ॥२८॥ त्रिषु लोकेषु यो राज्यं धर्मनित्योऽर्हते नृपः। सोऽयं भूमौ परिश्रान्तः शेते प्राकृतवत्कायम् ॥ २९ ॥ अयं नीलाम्बुदश्यामो नरेष्वप्रतिमोऽर्जुनः। शेते प्राकृतवद्भूमौ ततो दुःखतरं नु किम् ॥ ३० ॥ अश्विनाविव देवानां यावितौ रूपसम्पदा। तौ प्राकृतवदद्येमौ प्रसुप्तौ धरणीतले ॥ ३१ ॥ ज्ञातयो यस्य नैव स्युर्विषमाः कुलपांशनाः। स जीवेत सुखं लोके ग्रामद्रुम इवैकजः ॥ ३२ ॥ एको ह्यधो हि यो ग्रामे भवेत्सर्वफलान्वितः। चैत्यो भवति निर्ज्ञातिरर्चनीयः सुपूजितः ॥ ३३ ॥ येषाञ्च बहवः शूरा ज्ञातयो धर्ममाश्रिताः। ते जीवन्ति सुखं लोके भवन्ति च निरामयाः ॥ ३४ ॥ बलवन्तः सहभ्रार्या मित्रबान्धवनन्दनाः। जीवन्त्यन्योन्यमाश्रित्य द्रुमाः काननजा इव ॥ ३५ ॥ वयन्तु धृतराष्ट्रेण सपुत्रेण दुरात्मना। विवासिता न हन्यामः कथञ्चिद्दैवसंश्रयात् ॥ ३६ ॥ तस्मान्मुक्ता वयं दाहादिमं दृष्ट्वमुपाश्रिताः। कान्दिशं प्रतिपत्स्यामः प्राप्ताः क्लेशमनुत्तमम् ॥ ३७ ॥ सकामो भव दुर्बुद्धे धार्त्तराष्ट्रालदर्शन। नूनं देवाः प्रसन्नास्ते नानुजानीम युधिष्ठिरः ॥ ३८ ॥ प्रयच्छति वधे तुभ्यं तेन जीवसि दुर्मते। नन्वद्य सपुतामात्यं सकर्णानुजसौबलम् ॥ ३९ ॥ गत्वा क्रोधसमाविष्टः प्रेषयिष्ये यमक्षयम्। किन्नु शक्यं मया कर्त्तुं यन्न क्रुध्यते नृपः ॥ ४० ॥ धर्मात्मा पाण्डवश्रेष्ठः पापाचार वृधिष्ठिरः। एवमुक्ता महाबाहुः क्रोधसन्दीप्तमानसः ॥ ४१ ॥ करं करेण निष्पिष्य निःश्वसन् दीनमानसः। पुनर्दीप्तमनाभूत्वा शान्तार्चिरिव पावकः ॥ ४२ ॥ ज्ञातृन्मृतीतले सुप्तानवेक्षत वृकोदरः। विश्रब्धानिव संविष्टान् पृथग्जनसमानिव ॥४३॥ नातिदूरेण नगरं वनादस्माद्धि लक्षये। जागर्त्तव्ये स्वपन्तीव पुरा

जागर्म्यहं स्वयम् ॥ ४४ ॥ मास्यन्तीमे जलं पश्चात् प्रतिबुद्धा जितक्लमाः। इति भीमो व्यवस्यैव जजागार स्वयं तदा ॥४५॥

इत्यादिपर्वणि जतुगृहपर्वणि भीमजलाहरणे त्रिपञ्चाशदधिकशततोऽध्यायः समाप्तश्च जतुगृहपर्व ॥ १५३ ॥

अथ हिडिम्बवधपर्व ॥ ६ ॥

वैशम्पायन उवाच। तत्र तेषु शयानेषु हिडिम्बो नाम राक्षसः। अविदूरे वनात्तस्माच्छालवृक्षं समाश्रितः ॥ १ ॥ क्रूरो मानुषमांसादो महावीर्यपराक्रमः। प्रावृड्जलधरश्यामः पिङ्गाक्षो दारुणाकृतिः ॥ २ ॥ दंष्ट्राकरालवदनः पिप्पिलेषुः क्षुधार्दितः। लम्बस्फिक् लम्बजठरो रक्तश्मश्रुशिरोरुहः ॥ ३ ॥ महावृक्षगलस्कन्धः शङ्कुकर्णो विभीषणः। यदृच्छया तानपश्यत् पाण्डुपुत्रान्महारथान् ॥ ४ ॥ विरूपरूपः पिङ्गाक्षः कराक्षो घोरदर्शनः। पिप्पिलेषुः क्षुधार्तश्च तानपश्यदृच्छया ॥ ५ ॥ ऊर्ध्वाङ्गुलिः स कण्डूयन्स्वान् रूक्षान् शिरोरुहान्। जृम्भमाणो महावक्त्रः पुनः पुनरवेक्ष्य च ॥ ६ ॥ दृष्टो मानुषमांसस्य महाकायो महाबलः। मेघसंघातवर्णश्च तीक्ष्णदंष्ट्रोज्ज्वलाननः। आघ्राय मानुषं गन्धं भगिनीमिदमब्रवीत् ॥ ७ ॥ उपपन्नश्चिरस्याद्य भक्ष्योऽयं मम सुप्रियः। स्नेहवान् प्रस्रवति जिह्वा पर्वेति मे सुखम् ॥ ८ ॥ अष्टौ दंष्ट्राः सुतीक्ष्णाश्चिरस्यामातदुःसहाः। देहेषु मज्जयिष्यामि स्निग्धेषु पिप्पिलेषु च ॥ ९ ॥ आक्रम्य मानुषं कण्ठमाच्छिद्य धमनीमपि। उष्णं नवं प्रपास्यामि फेनिलं रुधिरं बहु ॥ १० ॥ गच्छ जानीहि के स्वपन्ते शेरते वनमाश्रिताः। मानुष्यो बलवान् गन्धो घ्राणं तर्पय-

तीव मे ॥ ११ ॥ हत्वैतान्मानुषान् सर्वानानयस्व ममान्तिकम् । अस्मद्विषयसुप्तेभ्यो नैतेभ्यो भयमस्ति ते ॥ १२ ॥ एषासृक्कृत्य मांसानि मानुषाणां यथेष्टतः । भक्षयिष्याव सहितौ कुरु तूर्णं वचो मम ॥ १३ ॥ भक्षयित्वा च मांसानि मानुषाणां प्रकामतः । तृप्त्याव सहितावावां दृक्ततालावनेकशः ॥१४॥ एवमुक्ता हिडिम्बा तु हिडिम्बेन तदा वने । भ्रातुर्वचनमाज्ञाय त्वरमाणैव राक्षसी ॥ १५ ॥ जगाम तत्र यत्र स्म पाण्डवा भरतर्षभ । ददर्श तत्र सा गत्वा पाण्डवान् पृथया सह । शयानान् भीमसेनञ्च जाग्रतं त्वपराजितम् ॥ १६ ॥ दृष्ट्वैव भीमसेनं सा बालपोतमिवोद्गतम् । राक्षसी कामयामास रूपेणाप्रतिमं भुवि ॥ १७ ॥ अयं श्यामो महाबाहुः सिंहस्कन्धो महाद्युतिः । कम्बुग्रीवः पुष्करास्यो भर्त्ता युक्तो भवेन्मम ॥ १८ ॥ नाहं भ्रातुर्वचो जातु कुर्य्यां क्रूरोपसंहितम् । पतिस्नेहोऽतिबलवान्न तथा भ्रातृसौहृदम् ॥१९॥ सुहृत्तं मेव तृप्तिश्च भवेद्भ्रातुर्ममैव च । कृतैरेतैरहत्वा तु मोदिष्ये शाश्वतीः समाः ॥ २० ॥ सा कामरूपिणी रूपं कृत्वा मानुषसुत्तमम् । उपतस्थे महाबाहुं भीमसेनं शनैः शनैः ॥ २१ ॥ लज्जमानेव ललना दिव्याभरणभूषिता । स्मितपूर्वमिदं वाक्यं भीमसेनमथाब्रवीत् ॥ २२ ॥ कृतस्त्वमसि संप्राप्तः कस्यासि पुरुषर्षभ । क इमे शेरते चेह पुरुषा देवरूपिणः ॥ २३ ॥ केयं वै हरती श्यामा सुकुमारी तवानघ । शेते वनमिदं प्राप्य विश्वस्ता खड्गधेनुवत् ॥ २४ ॥ नेदं जानाति गहनं वनं राक्षससेवितम् । वसति ह्यत्र पापात्मा हिडिम्बो नाम राक्षसः ॥ २५ ॥ तेनाहं प्रेषिता भ्राता दुष्टभावेन रक्षसा । विभक्षयिषता मांसं युष्माकममरोपमाः ॥ २६ ॥ साहं त्वामभिसंप्रेक्ष्य देवगर्भसमप्रभम् । नान्यं भर्त्तारमिच्छामि सत्यमेतद्ब्रवीमि ते ॥ २७ ॥ एतद्विज्ञाय धर्मज्ञ युक्तं मयि समाचर । कामोपहतचित्तां मां भजमानां

भजस्व माम्॥ २८॥ त्रास्यामि त्वां महाबाहो राक्षसात् पुरुषादकात्। वत्स्यावो गिरिदुर्गेषु भर्त्ता भव ममानघ॥ २९॥ अन्तरीक्षचरी ह्यस्मि कामतो विचरामि च। अतुलामानुपीं प्रीतिं तत्र तत्र मया सह॥ ३०॥

भीमसेन उवाच। मातरं भ्रातरं ज्येष्ठं सुखसुप्तान् कथं त्वियान्। परित्यजेत कोन्वद्य प्रभवन्निह राक्षसि॥ ३१॥ को हि सुप्तानिमान् भ्रातॄन्दृष्ट्वा राक्षसभोजनम्। मातरञ्च नरो गच्छेत्कामार्त्त इव मद्विधः॥ ३२॥

राक्षस्युवाच। यत्ते प्रियं तत्करिष्ये सर्वानेतान् प्रबोधय। मोचयिष्याम्यहं कामं राक्षसात् पुरुषादकात्॥ ३३॥

भीम उवाच। सुखसुप्तान् वने भ्रातॄन्मातरं चैव राक्षसि। न त्वयाहोधयिष्यामि भ्रातुस्तव दुरात्मनः॥ ३४॥ न हि मे राक्षसा भीरु सोढुं शक्ताः पराक्रमम्। न मनुष्या न गन्धर्वा न यक्षाश्चारुलोचने॥ ३५॥ गच्छ वा तिष्ठ वा भद्रे यद्वापीच्छसि तत् कुरु। तं वा प्रेषय तन्वङ्गि भ्रातरं पुरुषादकम्॥ ३६॥

इत्यादिपर्वणि हिडिम्बवधपर्वणि हिडिम्बभीमसंवादे चतुःषष्ट्यधिकशततोऽध्यायः॥ १५४॥

—:०:—

वैशम्पायन उवाच। तां विदित्वा चिरगतां हिडिम्बो राक्षसेश्वरः। अवतीर्य द्रुमात्तस्मादाजगामाशु पाण्डवान्॥ १॥ लोहिताक्षो महाबाहुरूर्द्ध्वकेशो महाननः। मेघसंघातवर्णश्च तीक्ष्णदंष्ट्रो भयानकः॥ २॥ तमापतन्तं दृष्ट्वैव तथा विकृतदर्शनम्। हिडिम्बोवाच वित्रस्ता भीमसेनमिदं वचः॥ ३॥ आपतत्येष दुष्टात्मा संक्रुद्धः पुरुषादकः। साहं त्वां भ्रातृभिः सार्द्धं यद्ब्रवीमि तथा कुरु॥ ४॥ अहं कामगमा वीर रक्षो-

बलसमन्विता । आरुहेमां मम श्रोणिं नेष्यामि त्वां विहायसा ॥ ५ ॥ प्रबोधयैतान् संसुप्तान्मातरं च परन्तप । सर्वानेव गमिष्यामि गृहीत्वा वो विहायसा ॥ ६ ॥

भीम उवाच । मा भैस्त्वं पृथुसुश्रोणि नैव कश्चिन्मयि स्थिते । हिंसितुं शक्नुयात् वत्त इति मे नियता मतिः । अहमेनं हनिष्यामि प्रेक्षन्त्यास्तु सुमध्यमे ॥ ७ ॥ नायं प्रतिबलो भीरु राक्षसापसदो मम । सोढुं युधि परिस्पन्दमथवा सर्वराक्षसाः ॥ ८ ॥ पश्य बाहू सुवृत्तौ मे हस्तिहस्तनिभावितौ । ऊरू परिघसङ्काशौ संहतं चाप्युरो महत् ॥ ९ ॥ विक्रमं मे यथेन्द्रस्य साद्य द्रक्ष्यसि शोभने । मावमंस्थाः पृथुश्रोणि मत्वा मामिह मानुषम् ॥ १० ॥

हिडिम्बोवाच । नावमन्ये नरश्रेष्ठ त्वामहं देवरूपिणम् । दृष्टप्रभावस्तु मया मानुषेष्वेव राक्षसः ॥ ११ ॥

वैशम्पायन उवाच । तथा सञ्जल्पतस्तस्य भीमसेनस्य भारत । वाचः शुश्राव ताः क्रुद्धो राक्षसः पुरुषादकः ॥ १२ ॥ अवेक्षमाणस्तस्याश्च हिडिम्बो मानुषं वपुः । खड्गदामपरिक्षिप्तं समश्नेन्दुनिभाननम् ॥ १३ ॥ सुघ्राणनासाचिकेशान्तं सुकुमारनखत्वचम् । सर्वाभरणसंयुक्तं सूक्ष्मश्लक्ष्णाम्बरवाससम् ॥ १४ ॥ तां तथा मानुषं रूपं बिभ्रतीं सुमनोहरम् । पुंस्कामां शङ्कमानश्च चुक्रोध पुरुषादकः ॥ १५ ॥ संक्रुद्धो राक्षसस्तस्या भगिन्याः कुरुसत्तम । उत्पाट्य विपुले नेत्रे ततस्तामिदमब्रवीत् ॥ १६ ॥ को हि मे भोक्तुकामस्य विघ्नं चरति दुर्मतिः । न बिभेषि हिडिम्बे किं मत्कोपाद्विप्रमोहिता ॥ १७ ॥ धिक् त्वामसति पुंस्कामे मम विप्रियकारिणि । पूर्वेषां राक्षसेन्द्राणां सर्वेषामयशस्करि ॥ १८ ॥ यानिमानाश्रिताकार्षीर्विप्रियं सुमहन्मम । एष तानद्य वै सर्वान् हनिष्यामि त्वया सह ॥ १९ ॥ एवमुक्ता हिडिम्बां स हिडिम्बो

लोहितेक्षणः । बधायाभिपपातैनान् दन्तैर्दन्तानुपस्पृशन् ॥२०॥ तमापतन्तं संप्रेक्ष्य भीमः प्रहरतांवरः । भर्त्सयामास तेजस्वी तिष्ठ तिष्ठेति चाब्रवीत् ॥ २१ ॥

वैशम्पायन उवाच । भीमसेनस्तु तं दृष्ट्वा राक्षसं प्रहसन्निव । भगिनीं प्रति संक्रुद्धमिदं वचनमब्रवीत् ॥ २२ ॥ किन्ते हिडिम्ब एतैर्वा सुखसुप्तैः प्रबोधितैः । मामासाद्य दुर्बुद्धे तरसा त्वं नराशन ॥ २३ ॥ मय्येव प्रहरेहि त्वं न स्त्रियं हन्तुमर्हसि । विशेषतोऽनपकृते परेणापकृते सति ॥२४॥ न चीयं स्ववशा बाला कामयत्यद्य मामिह । चोदितैषा ह्यनङ्गेन शरीरान्तरचारिणा ॥ २५ ॥ भगिनी तव दुर्बुद्धे राक्षसां वै यशोहर । त्वन्नियोगेन चैवेयं रूपं मम समीक्ष्य च ॥ २६ ॥ कामयत्यद्य मां भीरुस्तव नैषापराध्यति । अनङ्गेन कृते दोषे नेमां गर्हितुमर्हसि ॥२७॥ मयि तिष्ठति दुष्टात्मन्न स्त्रियं हन्तुमर्हसि । सङ्गच्छस्व मया सार्धमेकेनैको नराशन ॥ २८ ॥ अहमेको नयिष्यामि त्वामद्य यमसादनम् । अद्य भक्षनिष्पिष्टं शिरो राक्षस दीर्यताम् ॥ २९ ॥ कुञ्जरस्येव पादेन विनिष्पिष्टं बलीयसः । अद्य गात्राणि ते कङ्काः श्येना गोमायवस्तथा ॥ ३० ॥ कर्षन्तु भुवि संहृष्टा निहतस्य मया मृधे । क्षणेनाद्य करिष्येऽहमिदं वनमराक्षसम् । पुरा यदूषितं नित्यं त्वया भक्षयता नरान् ॥३१॥ अद्य त्वां भगिनी रक्षः क्षप्यमाणं मयासकृत् । द्रक्ष्यत्यद्रिप्रतीकाशं सिंहेनेव महाद्विपम् ॥ ३२ ॥ निराबाधास्वयि हते मया राक्षसपांसन । वनमेतच्चरिष्यन्ति पुरुषा वनचारिणः ॥ ३३ ॥

हिडिम्ब उवाच । गर्जितेन वृथा किं ते कत्थितेन च मानुष । कृत्वैतत्कर्मणा सर्वं कत्थेथा माचिरं कथाः ॥ ३४ ॥ बलिनं मन्यसे यच्चाप्यात्मानं सपराक्रमम् । राक्षसेऽद्य समागम्य मयात्मानं बलाधिकम् ॥ ३५ ॥ न तावदेतान् हिंसिष्ये स्वपन्त्येते

यथासुखम् । एष त्वामेव दुर्बुद्धे निहन्म्याद्यापियबदम् ॥ ३६ ॥
पीत्वा तवाङ्गात्लेभ्यस्तः पथाहिमानपि । हनिष्यामि ततः
पश्यादिमां विप्रियकारिणीम् ॥ ३७ ॥

वैशम्पायन उवाच । एवमुक्त्वा ततो बाहुं प्रगृह्य पुरुषादकः । अभ्यद्रवत संक्रुद्धो भीमसेनमरिन्दमम् ॥ ३८ ॥ तस्याभिद्रवतस्तूर्णं भीमो भीमपराक्रमः । वेगेन प्रहितं बाहुं निजग्राह हसन्निव ॥ ३९ ॥ निगृह्य तं बलाद्भीमो विस्फुरन्तं चकर्ष ह । तस्मादेशाद्वनूंष्यष्टौ सिंहः क्षुद्रमृगं यथा ॥ ४० ॥ ततः स राक्षसः क्रुद्धः पाण्डवेन बलार्दितः । भीमसेनं समाक्षिप्य व्यनदद्भैरवं रवम् ॥ ४१ ॥ पुनर्भीमो बलादेनं विचकर्ष महाबलः । मा शब्दः सुखसुप्तानां भ्रातॄणां मे भवेदिति ॥ ४२ ॥ अन्योन्यं तौ समासाद्य विचकर्षतुरोजसा । हिडिम्बो भीमसेनश्च विक्रमं चक्रतुः परम् ॥ ४३ ॥ बभञ्जतुस्तदा हस्तान्लतास्चाकर्षतुस्तदा । मत्ताविव च संरब्धौ वारणौ षष्टिहायनौ ॥ ४४ ॥ तयोः शब्देन महता विबुद्धास्ते नरर्षभाः । सह मात्रा च ददृशुर्हिडिम्बामग्रतः स्थिताम् ॥ ४५ ॥

इत्यादिपर्वणि हिडिम्बवधपर्वणि हिडिम्बभीमयुद्धे पञ्चपञ्चाशदधिकशततोऽध्यायः ॥ १५५ ॥

—०:०—

वैशम्पायन उवाच । प्रबुद्धास्ते हिडिम्बाया रूपं दृष्ट्वातिमानुषम् । विस्मिताः पुरुषव्याघ्रा बभूवुः पृथया सह ॥ १ ॥ ततः कुन्ती समीक्ष्यैनां विस्मिता रूपसम्पदा । उवाच मधुरं वाक्यं सान्त्वपूर्वमिदं शनैः ॥ २ ॥ कस्य त्वं सुरगर्भाभे का वासि वरवर्णिनि । केन कार्येण सम्प्राप्ता कुतश्चागमनं तव ॥ ३ ॥

यदि वास्य वनस्य त्वं देवता यदि वाप्सराः। आचक्ष्व मम तत् सर्वं किमर्थं चेह तिष्ठसि ॥ ४ ॥

हिडिम्बोवाच। यदेतत् पश्यसि वनं नीलमेघनिभं महत्। निवासो राक्षसस्यैव हिडिम्बस्य ममैव च ॥ ५ ॥ तस्य मां राक्षसेन्द्रस्य भगिनीं विद्धि भाविनि। भ्राता रुक्मेषिताभार्यां त्वां सपुत्रां जिघांसितुम् ॥ ६ ॥ क्रूरबुद्धेरहं तस्य वचनादागता त्विह। अद्राक्षं नवहेमाङ्गं तव पुत्रं महाबलम् ॥ ७ ॥ ततोऽहं सर्वभूतानां भावे विचरता शुभे। चोदिता तव पुत्रस्य मन्मथेन वशानुगा ॥ ८ ॥ ततो हृतो मया भर्त्ता तव पुत्रो महाबलः। अपनेतुं च यतितो न चैव शक्तितो मया ॥ ९ ॥ चिरायमाणां मां ज्ञात्वा ततः स पुरुषादकः। स्वयमेवागतो हन्तुमिमान् सर्वांस्त्वन्नजान् ॥ १० ॥ स तेन मम कान्तेन तव पुत्रेण धीमता। बलादितो विनिष्पिष्य व्यपनीतो महात्मना ॥ ११ ॥ विकर्षन्तौ महावेगौ गर्जमानौ परस्परम्। पश्यत्वं युधि विक्रान्तावेतौ च नरराक्षसौ ॥ १२ ॥

वैशम्पायन उवाच। तस्याः श्रुत्वैव वचनमुत्पपात युधिष्ठिरः। अर्जुनो नकुलश्चैव सहदेवश्च वीर्यवान् ॥ १३ ॥ तौ तं ददृशुरासक्तौ विकर्षन्तौ परस्परम्। काङ्क्षमाणौ जयं चैव सिंहाविव बलोत्कटौ ॥ १४ ॥ यथान्योन्यं समाश्रित्य विकर्षन्तौ पुनः पुनः। दावाग्निधूमसदृशं चक्रतुः पार्थिवं रजः ॥ १५ ॥ वसुधारेणुसंवीतौ वसुधाधरसन्निभौ। विभ्राजतुर्यथा शैलौ नीहारेणाभिसंवृतौ ॥ १६ ॥ राक्षसेन तदा भीमं क्लिश्यमानं निरीक्ष्य च। उवाचेदं वचः पार्थः प्रहसन्निव भारत ॥ १७ ॥ भीम मा भैर्महाबाहो न त्वां बुध्यामहे वयम्। समेतं भीमरूपेण रक्षसा ममकर्षितम् ॥ १८ ॥ साहाय्येऽस्मि स्थितः पार्थ मातरिश्वेव राक्षसम्। नकुलः सहदेवश्च मातरं गोपयिष्यतः ॥ १९ ॥

भीम उवाच । उदासीनो निरीक्षस्व न कार्यः संभ्रमस्त्वया । न जातयं पुनर्जीवन्भ्राहन्तरमागतः ॥ २० ॥

अर्जुन उवाच । किमनेन चिरं भीम जीवता पापरक्षसा । गन्तव्ये न चिरं स्थातुमिह यच्यसरिन्दम ॥ २१ ॥ पुरा संरज्यते प्राची पुरा सन्ध्या प्रवर्त्तते । रौद्रे मुहूर्त्ते रक्षांसि प्रबलानि भवन्त्युत ॥ २२ ॥ त्वरस्व भीम माक्रीड़ अहि रक्षो विभीषणम् । पुरा विकुरुते मायां भुजयोः सारमर्पय ॥ २३ ॥

वैशम्पायन उवाच । अर्जुनेनैवमुक्तस्तु भीमो रोषाज्ज्वलन्निव । बलमाहारयामास यद्दायोर्जगतः क्षये ॥ २४ ॥ ततः शब्दाबुदासस्य भीमो रोषात्तु राक्षसः । उत्तिष्ठाभ्यामयद्देहं दृष्ट्वा पतगुणं तदा ॥ २५ ॥

भीम उवाच । श्यामांसैर्दंष्ट्रयोपेतो श्यामाक्षो श्यामवर्त्मनिः । श्यामरक्षमर्हस्वं दृष्ट्वा न भविष्यति ॥ २६ ॥ क्षेममद्य करिष्यामि यथा वनमकण्टकम् । न पुनर्मानुषान् हत्वा भक्षयिष्यसि राक्षस ॥ २७ ॥

अर्जुन उवाच । यदि वा मन्यसे भारं त्वमिमं राक्षसं युधि । करोमि तव साहाय्यं शीघ्रमेनं निपात्यताम् ॥ २८ ॥ अथ वाप्यहमेवैनं हनिष्यामि वृकोदर । कृतकर्मा भविष्यन्तः साधु तावदुपारम ॥ २९ ॥ तस्य तद्वचनं श्रुत्वा भीमसेनोऽत्यमर्षणः । निष्पिष्यैनं बलाद्भूमौ पशुमारममारयत् ॥ ३० ॥ स मार्यमाणो भीमेन ननाद विपुलं स्वनम् । पूरयंल्लहनं सर्वं जलाद्रं इव दुन्दुभिः ॥ ३१ ॥ बाहुभ्यां योक्त्रयित्वा तु बलवान् पाण्डुनन्दनः । मध्ये भङ्क्त्वा महाबाहुर्हर्षयामास पाण्डवान् ॥ ३२ ॥ हिडिम्बं निहतं दृष्ट्वा संहृष्टास्ते तरस्विनः । अपूजयन्नरव्याघ्रं भीमसेनमरिन्दमम् ॥ ३३ ॥ अभिपूज्य महात्मानं भीमं भीमपराक्रमम् । पुनरेवार्जुनो वाक्यमुवाचेदं वृकोदरम् ॥ ३४ ॥ न दूरे नगरं

मन्ये वनादस्मादहं विभो। शीघ्रं गच्छाम भद्रं ते न नो विद्यात् सुयोधनः॥ ३५॥ ततः सर्वे तथेत्युक्त्वा भ्रातरः सह भार्यया। प्रययुः पुरुषव्याघ्रा हिडिम्बा चैव राक्षसी॥ ३६॥

इत्यार्षे महाभारते हिडिम्बवधपर्वणि हिडिम्बवधे षट्पञ्चाशदधिकशततमोऽध्यायः॥ १५६॥

भीमसेन उवाच। स्मरन्ति वैरं रक्षांसि मायामास्थाय मोहिनीम्। हिडिम्बे व्रज पन्थानं त्वमिमं भ्रातृसेवितम्॥१॥

युधिष्ठिर उवाच। क्रुद्धोऽपि पुरुषव्याघ्र भीम मास्म स्त्रियं वधीः। शरीरगुप्तभ्यधिकं धर्मं गोपाय पाण्डव॥ २॥ वधाभिप्रायमायान्तमवधीस्त्वं महाबलम्। रक्षसस्तस्य भगिनीं किं नः क्रुद्धा करिष्यति॥ ३॥

वैशम्पायन उवाच। हिडिम्बा तु ततः कुन्तीमभिवाद्य कृताञ्जलिः। युधिष्ठिरन्तु कौन्तेयमिदं वचनमब्रवीत्॥ ४॥ आर्ये जानासि यद्दुःखमिह क्लीणामनङ्गजम्। तदिदं मामनुप्राप्तं भीमसेनकृतं शुभे॥ ५॥ सोढुं तत्परमं दुःखं मया कालप्रतीक्षया। सोऽयमभ्यागतः कालो भविता मे सुखोदयः॥ ६॥ मया ह्यात्मज्य सुहृदः स्वधर्मं स्वजनं तथा। वृतोऽयं पुरुषव्याघ्रस्तव पुत्रः पतिः शुभे॥ ७॥ वीरेणाहं तथा तेन त्वया चापि यशस्विनि। प्रत्याख्याता न जीवामि सत्यमेतद्ब्रवीमि ते॥ ८॥ तदर्हसि कृपां कर्तुं मयि त्वं वरवर्णिनि। मत्वा मूढेति तन्वां त्वं भक्तां वानुगतेति वा॥ ९॥ अर्जुनेन महाभागे संयोजय सुतेन ते। तमुपादाय गच्छेयं यथेष्टं देवरूपिणम्। पुनश्चैवानयिष्यामि विस्रब्धं कुरु मे शुभे॥१०॥ अहं हि मनसा ध्याता सर्वान्नेष्यामि वः सदा। दुर्जनात्तारयिष्यामि दुर्गेषु

विषमेषु च ॥ ११ ॥ षष्ठेन वो वक्ष्यामि शीघ्रां गतिमभोक्ष्यतः। यूयं प्रसादं कुरुत भीमसेनो भजेत माम् ॥ १२ ॥ आपदस्तरणे प्राणान्वारयेद्येन तेन वा। सर्वमाहृत्य कर्त्तव्यं तं धर्ममनुवर्त्तता ॥ १३ ॥ आपत्सु यो धारयति धर्मं धर्मविदुत्तमः। व्यसनं ह्येव धर्मस्य धर्मिणामापदुच्यते ॥ १४ ॥ पुरुषं प्राणान्वारयति पुरुषं प्राणदमुच्यते। येन येनाचरेद्धर्मं तस्मिन् गर्हा न विद्यते ॥ १५ ॥

युधिष्ठिर उवाच। एवमेव यथात्थ त्वं हिडिम्बेनात्र संशयः। स्थातव्यं तु त्वया सत्ये यथा ब्रूयाः सुमध्यमे ॥ १६ ॥ स्नातं कृताङ्किकं भद्रे कृतकौतुकमङ्गलम्। भीमसेनं भजेथास्त्वं प्रागस्तमनादृवेः ॥ १७ ॥ अहःसु विहरानेन यथाकामं मनोजवा। अयं त्वानयितव्यस्ते भीमसेनः सदा मयि ॥ १८ ॥

वैशम्पायन उवाच। तथेति तत् प्रतिज्ञाय भीमसेनोऽब्रवीदिदम्। शृणु राक्षसि सत्येन समयं ते वदाम्यहम् ॥ १९ ॥ यावत्कालेन भवति पुत्रस्योत्पादनं शुभे। तावत्कालं गमिष्यामि त्वया सह सुमध्यमे ॥ २० ॥

वैशम्पायन उवाच। तथेति तत् प्रतिज्ञाय हिडिम्बा राक्षसी तदा। भीमसेनमुपादाय सोर्ज्जमाचक्रमे ततः ॥ २१ ॥ शैलशृङ्गेषु रम्येषु देवतायतनेषु च। मृगपक्षिविघुष्टेषु रमणीयेषु सर्वदा ॥ २२ ॥ कृत्वा च रूपं परमं सर्वाभरणभूषिता। सञ्जल्पन्ती सुमधुरं रमयामास पाण्डवम् ॥ २३ ॥ तथैव वनदुर्गेषु पुष्पितद्रुमसानुषु। सरःसु रमणीयेषु पद्मोत्पलयुतेषु च ॥ २४ ॥ नदीद्वीपप्रदेशेषु वैदूर्य्यसिकतासु च। सुतीर्थवनतोयासु तथा गिरिनदीषु च ॥ २५ ॥ काननेषु विचित्रेषु पुष्पितद्रुमवल्लिषु। हिमवद्गिरिकुञ्जेषु गुहासु विविधासु च ॥ २६ ॥ प्रफुल्लशतपत्रेषु सरःस्वमलवारिषु। सागरस्य प्रदेशेषु मणिहेमचितेषु च ॥ २७ ॥ पत्तनेषु च रम्येषु महागजवनेषु च। देवारण्येषु

मुख्येषु तथा पर्वतसानुषु ॥ २८ ॥ गुह्यकानां निवासेषु तापसायतनेषु च। सर्वर्तुफलरम्येषु माल्येषु सरःसु च ॥ २९ ॥ विभ्रती परमं रूपं रमयामास पाण्डवम्। रमयन्ती तथा भीमं तत्र तत्र मनोजवा ॥ ३० ॥ प्रजज्ञे राक्षसी पुत्रं भीमसेनान्महाबलम्। विरूपाक्षं महावक्त्रं शङ्कुकर्णं विभीषणम् ॥ ३१ ॥ भीमनादं सुताम्रोष्ठं तीक्ष्णदंष्ट्रं महारवम्। महेष्वासं महावीर्यं महारक्षं महाभुजम् ॥ ३२ ॥ महाजवं महाकायं महामायमरिन्दमम्। दीर्घघ्राणं महोरस्कं विकटोद्वद्धपिण्डिकम् ॥ ३३ ॥ अमानुषं मानुषजं भीमवेगं महाबलम्। यः पिशाचानतीत्यान्यान् बभूतातीव राक्षसान् ॥ ३४ ॥ बालोऽपि यौवनं प्राप्तो मानुषेषु विशांपते। सर्वास्त्रेषु परं वीरः प्रकर्षमगमद्बली ॥ ३५ ॥ सद्यो हि गर्भान्राक्षस्यो लभन्ते प्रसवन्ति च। कामरूपधराश्चैव भवन्ति बहुरूपिकाः ॥ ३६ ॥ प्रणम्य विकचः पादावनटङ्कात्स पितुस्तदा। मातुश्च परमेष्वासौ च नामास्य चक्रतुः ॥ ३७ ॥ घटो ह्योत्कच इति माता तं प्रत्यभाषत। अब्रवीत्तेन नामास्य घटोत्कच इति स्म ह ॥ ३८ ॥ अनुरक्तस्य नानाशीत् पाण्डवान् स घटोत्कचः। तेषाञ्च दयितो नित्यमात्मनिल्यो बभूव ह ॥ ३९ ॥ संवाससमयो जीर्णं इत्याभाष्य ततस्तु तान्। हिडिम्बा समयं कृत्वा स्वां गतिं प्रत्यपद्यत ॥ ४० ॥ कृत्यकाल उपस्थास्ये पितुर्निति घटोत्कचः। आमन्त्र्य रक्षसां श्रेष्ठः प्रतस्थे चोत्तरां दिशम् ॥ ४१ ॥ स हि सृष्टो मघवता शक्तिहेतोर्महात्मना। कर्णस्याप्रतिवीर्यस्य प्रतियोद्धा महारथः ॥ ४२ ॥

इत्यादिपर्वणि हिडिम्बवधपर्वणि घटोत्कचोत्पत्तौ सप्तषष्ट्यधिकशततमोऽध्यायः ॥ १५७ ॥

वैशम्पायन उवाच । ते वनेन वनं गत्वा घ्नन्तो मृगगणान् बहून् । अपक्रम्य ययूराजंस्त्वरमाणा महारथाः ॥ १ ॥ मत्स्यां खिगर्त्तान् पाञ्चालान् कीचकानन्तरेण च । रमणीयान्यनोहेद्यान् प्रेक्षमाणाः सरांसि च ॥ २ ॥ जटाः कृत्वात्मनः सर्वे वल्कलाजिनवाससः । सह कुन्त्या महात्मानो विभ्रतस्तापसं वपुः ॥ ३ ॥ क्वचिद्हन्तो जननीं त्वरमाणा महारथाः । क्वचिच्छन्देन गच्छन्तस्ते जग्मुः प्रसभं पुनः ॥ ४ ॥ ब्राह्मं वेदमधीयाना वेदाङ्गानि च सर्वशः । नीतिशास्त्रञ्च सर्वज्ञा दद्दशुस्ते पितामहम् ॥ ५ ॥ तेऽभिवाद्य महात्मानं कृष्णद्वैपायनं तदा । तस्थुः प्राञ्जलयः सर्वे सह माता परन्तपाः ॥ ६ ॥

व्यास उवाच । मयेदं व्यसनं पूर्वं विदितं भरतर्षभाः । यथा तु तैरधर्मेण धार्त्तराष्ट्रैर्विवासिता ॥ ७ ॥ तद्विदित्वास्मि सम्प्राप्तश्चिकीर्षुः परमं हितम् । न विषादोऽत्र कर्त्तव्यः सर्वमेतत्सुखाय वः ॥ ८ ॥ समास्ते चैव मे सर्वे यूयं चैव न संशयः । दीनतो बालतश्चैव स्नेहं कुर्वन्ति मानवाः ॥ ९ ॥ तस्माद्भ्यधिकः स्नेहो युष्मासु मम साम्प्रतम् । स्नेहपूर्वं चिकीर्षामि हितं वस्तन्निबोधत ॥ १० ॥ इदं नगरमभ्यासे रमणीयं निरामयम् । वसतेह प्रतिच्छन्ना ममागमनकाङ्क्षिणः ॥ ११ ॥

वैशम्पायन उवाच । एवं स तान् समाभाष्य व्यासः सत्यवतीसुतः । एकचक्रामभिगतः कुन्तीमाभाषयत् प्रभुः ॥ १२ ॥

व्यास उवाच । जीवत्पुत्रि सुतस्तेऽयं धर्मनित्यो युधिष्ठिरः । धर्मेण पृथिवीं जित्वा महात्मा पुरुषर्षभः । पृथिव्यां पार्थिवान् सर्वान् प्रशासिष्यति धर्मराट् ॥ १३ ॥ पृथिवीमखिलां जित्वा सर्वां सागरमेखलाम् । भीमसेनार्जुनबलाद्भोक्ष्यते नात्र संशयः ॥ १४ ॥ पुत्रास्तव च माद्र्याश्च सर्व एव महारथाः । स्वराष्ट्रे विहरिष्यन्ति सुखं सुमनसः सदा ॥ १५ ॥ यक्ष्यन्ति च

नरव्याघ्रा निर्जित्य पृथिवीमिमाम्। राजसूयाश्वमेधाद्यैः क्रतुभिर्भूरिदक्षिणैः॥ १६॥ अनुगृह्य सुहृद्वर्गं भोगैश्चर्ध्यसुखेन च। पितृपैतामहं राज्यमिमे भोक्ष्यन्ति ते सुताः॥ १७॥

वैशम्पायन उवाच। एवमुक्त्वा निवेद्यैतान् ब्राह्मणस्य निवेशने। अब्रवीत् पाण्डवश्रेष्ठमृषिर्देवायनस्तदा॥ १८॥ इह मासं प्रतीक्षध्वमागमिष्याम्यहं पुनः। देशकालौ विदित्वैव लप्स्यध्वं परमां मुदम्॥ १९॥ स तैः प्राञ्जलिभिः सर्वैस्तथेत्युक्तो नराधिप। जगाम भगवान् व्यासो यथागतमृषिः प्रभुः॥ २०॥

इत्यादिपर्वणि हिडिम्बवधपर्वणि व्यासदर्शने अष्टपञ्चाशदधिकशततोऽध्यायः समाप्तश्चेदं हिडिम्बवधपर्व॥ १५८॥

अथ बकवधपर्व॥ १०॥

जनमेजय उवाच। एकचक्रां गतास्ते तु कुन्तीपुत्रा महारथाः। अत ऊर्ध्वं द्विजश्रेष्ठ किमकुर्वत पाण्डवाः॥ १॥

वैशम्पायन उवाच। एकचक्रां गतास्ते तु कुन्तीपुत्रा महारथाः। ऊषुर्नातिचिरं कालं ब्राह्मणस्य निवेशने॥ २॥ रमणीयानि पश्यन्तो वनानि विविधानि च। पार्थिवानपि चोद्देशान् सरितश्च सरांसि च॥ ३॥ चेरुर्भैक्षं तदा ते तु सर्व एव विशाम्पते। बभूवुर्नागराणाञ्च स्वैर्गुणैः प्रियदर्शनाः॥ ४॥ निवेदयन्ति स्म तदा कुन्त्या भैक्षं सदा निशि। तया विभक्तान् भागांस्ते भुञ्जते स्म पृथक् पृथक्॥ ५॥ अर्धं ते भुञ्जते वीराः सह मात्रा परन्तपाः। अर्धं सर्वस्य भैक्षस्य भीमो भुङ्क्ते महाबलः॥ ६॥ तथा तु तेषां वसतां तस्मिन् राष्ट्रे महात्मनाम्। अतिचक्राम सुमहान् कालोऽथ भरतर्षभ॥ ७॥ तत कदाचित्

भैक्ष्याय गतास्ते पुरुषर्षभाः । सङ्कल्पा भीमसेनस्तु तत्रास्ते पृथया सह ॥ ८ ॥ अथार्त्तिजं महाशब्दं ब्राह्मणस्य निवेशने । अश्रौषमुत्पतितं घोरं कुन्ती शुश्राव भारत ॥ ९ ॥ रोरूयमाणांस्तान् दृष्ट्वा परिदेवयतश्च सा । कारुण्यात्साधुभावाच्च कुन्ती राजन्न चक्षमे ॥ १० ॥ मथ्यमानेन दुःखेन हृदयेन पृथा तदा । उवाच भीमं कल्याणी कृपान्वितमिदं वचः ॥ ११ ॥ वसाम सुसुखं पुत्र ब्राह्मणस्य निवेशने । अज्ञाता धार्त्तराष्ट्रस्य सत्कृता वीतमन्यवः ॥ १२ ॥ सा चिन्तये सदा पुत्र ब्राह्मणस्यास्य किञ्चन । प्रियं कुर्य्यामिति मत्वे यत् कुर्य्युरुषिताः सुखम् ॥ १३ ॥ एतावान् पुरुषस्तात कृतं यस्मिन्न नश्यति । यावच्च कुर्य्यादन्योऽस्य कुर्य्यादभ्यधिकं ततः ॥ १४ ॥ तदिदं ब्राह्मणस्यास्य दुःखमापतितं ध्रुवम् । तत्रास्य यदि साहाय्यं कुर्य्यामुपकृतं भवेत् ॥ १५ ॥

भीमसेन उवाच । ज्ञायतामस्य यद्दुःखं यतश्चैव समुत्थितम् । विदित्वा व्यवसिष्यामि यद्यपि स्यात् सुदुष्करम् ॥ १६ ॥

वैशम्पायन उवाच । एवं तौ कथयन्तौ च भूयः शुश्रुवतुः स्वनम् । आर्त्तिजं तस्य विप्रस्य सभार्य्यस्य विशाम्पते ॥ १७ ॥ अन्तःपुरं ततस्तस्य ब्राह्मणस्य महात्मनः । विवेश त्वरिता कुन्ती वडवत्सैव सौरभी ॥ १८ ॥ ततस्तं ब्राह्मणं तत्र भार्य्यया च सुतेन च । दुहित्रा चैव सहितं ददर्शावनताननम् ॥ १९ ॥

ब्राह्मण उवाच । धिगिदं जीवितं लोके गतसारमनर्थकम् । दुःखमूलं पराधीनं अशमप्रियभागि च ॥ २० ॥ जीविते परमं दुःखं जीविते परमो ज्वरः । जीविते वर्त्तमानस्य दुःखानामागमो ध्रुवः ॥ २१ ॥ आत्मा ह्येको हि धर्मार्थौ कामं चैव निषेवते । एतैश्च विप्रयोगोऽपि दुःखं परमनन्तकम् ॥ २२ ॥ आहुः केचित्परं मोक्षं स च नास्ति कथञ्चन । अर्थप्राप्तौ तु नरकः कृतघ्न एवोपपद्यते ॥ २३ ॥ अर्थैश्रुता परं दुःखमर्थप्राप्तौ

ततोऽधिकम् । जातस्नेहस्य चार्येषु विप्रयोगे महत्तरम् ॥२४॥ न हि योगं प्रपश्यामि येन मुच्येयमापदः । पुत्रदारेण वा सार्द्धं प्राद्रवेयमनामयम् ॥ २५ ॥ यतितं वै मया पूर्वं वेत्थ ब्राह्मणि तत्तथा । क्षेमं यतस्ततो गन्तुं त्वया तु मम न श्रुतम् ॥ २६ ॥ इह जाता विवृद्धाश्च पिता चापि ममेति वै । उक्तवत्यसि दुर्मेधे याच्यमाना मयासकृत् ॥ २७ ॥ स्वर्गतोऽपि पिता वृद्धस्तथा माता चिरं तव । बान्धवा भूतपूर्वाश्च तत्र वासे तु का रतिः ॥ २८ ॥ सौऽयं ते बन्धुकामाया अशृण्वन्त्या वचो मम । बन्धुप्रणाशः सुमहान् दुःखकरो मम ॥ २९ ॥ अथ वा महिनाथोऽयं न हि यच्यामि किञ्चन । परित्यक्तुमहं बन्धुं स्वयं जीवन्नृशंसवत् ॥ ३० ॥ सह धर्मचरीं दान्तां नित्यं मातृसमां मम । सखायं विहितां देवैर्नित्यं परमिकां गतिम् ॥ ३१ ॥ पित्रा माता च विहितां सदा गार्हस्थभागिनीम् । वरयित्वा यथान्यायं मन्त्रवत्परिणीय च ॥ ३२ ॥ कुलीनां शीलसम्पन्नामपत्यजननीमपि । त्वामहं जीवितस्यार्थे साध्वीमनपकारिणीम् ॥ ३३ ॥ परित्यक्तुं न यच्यामि भार्यां नित्यमनुव्रताम् । कुत एव परित्यक्तुं सुतं यच्यास्यहं स्वयम् ॥ ३४ ॥ बालमप्राप्तवयसमजातव्यञ्जनाकृतिम् । भर्तुरर्थाय निक्षिप्तां न्यासं धात्रा महात्मना ॥ ३५ ॥ यया दौहित्रजाल्लोकानाप्तुमिच्छसि पितृभिः सह । स्वयमुत्पादितां बालां कथमुत्सृष्टुमुत्सहे ॥ ३६ ॥ मन्यन्ते केचिदधिकं स्नेहं पुत्रे पितुर्नराः । कन्यायां केचिदपरे मम तुल्यावुभौ स्मृतौ ॥ ३७ ॥ यस्यां लोकाः प्रसूतिश्च स्थिता नित्यमथो सुखम् । अपापां तामहं बालां कथमुत्सृष्टुमुत्सहे ॥ ३८ ॥ आत्मानमपि चोत्सृज्य तस्यामि परलोकगः । त्यक्ता ह्येते मया व्यक्तं नेह यच्यन्ति जीवितुम् ॥ ३९ ॥ एषां चान्यतमत्यागो नृशंसो गर्हितो बुधैः । अत्यागे क्षत्रे क्षेमे मरिष्यन्ति

मया विना ॥ ४० ॥ स कृच्छ्रमहमापन्नो न शक्नोम्यृतुमापदम् । अहो धिक् कां गतिं त्वद्य गमिष्यामि सबान्धवः । सर्वैः सहमृतं श्रेयो न च मे जीवितं क्षमम् ॥ ४१ ॥

इत्यादिपर्वणि वकवधपर्वणि ब्राह्मणचिन्तायां जनमेजयाधिकशततोऽध्यायः ॥ १५९ ॥

—०:०—

ब्राह्मण्युवाच । न सन्तापस्त्वया कार्यः प्राकृतेनेव कर्हिचित् । न हि सन्तापकालोऽयं वैद्यस्य तव विद्यते ॥ १ ॥ अवश्यं निधनं सर्वैर्गन्तव्यमिह मानवैः । अवश्यम्भाविन्यर्थे वै सन्तापो नेह विद्यते ॥ २ ॥ भार्या पुत्रोऽथ दुहिता सर्वमात्मार्थमिष्यते । व्यर्थां जहि सुबुद्धा त्वं स्वयं यास्यामि तत्र च ॥ ३ ॥ एतद्धि परमं नार्याः कार्यं लोके सनातनम् । प्राणानपि परित्यज्य यद्भर्तुर्हितमाचरेत् ॥ ४ ॥ तच्च तव कृतं कर्म तवापीदं सुखावहम् । भवत्यमुत्र चात्यन्तं लोकेऽस्मिंश्च यशस्करम् ॥ ५ ॥ एष चैव गुरुर्धर्मो यं प्रवक्ष्याम्यहं तव । अर्थश्च तव धर्मस्य भूयानत्र प्रदृश्यते ॥ ६ ॥ यदर्थमिष्यते भार्या प्राप्तः सोऽर्थस्त्वया मयि । कन्या चैका कुमारश्च कृताहमनृणा त्वया ॥ ७ ॥ समर्थः पोषणे चापि सुतयोरस्मि तथा । न त्वहं सुतयोः शक्ता तथा रक्षणपोषणे ॥ ८ ॥ मम हि त्वद्विहीनायाः सर्वमाप्यधनेश्वर । कथं स्यातां सुतौ बालौ भवेयं च कथं त्वहम् ॥ ९ ॥ कथं हि विधवानाथा बालपुत्रा विना त्वया । मियुनं जीवयिष्यामि स्थिता साधुगते पथि ॥ १० ॥ अहङ्कृतावलिप्तैव प्रार्थ्यमानामिमां सुताम् । अयुक्तैस्त्वं सम्बन्धे कथं शक्ष्यामि रक्षितुम् ॥ ११ ॥ उत्कृष्टमामिषं भूमौ प्रार्थयन्ति यथा खगाः । प्रार्थयन्ति जनाः सर्वे मतिहीनां तथा स्त्रियम् ॥ १२ ॥ साहं विचाल्यमाना वै प्रार्थ्य-

माना दुरात्मभिः । ख्यातुं पथि न शक्ष्यामि सज्जनेष्टे द्विजोत्तम ॥ १३ ॥ कथं तव कुलस्यैकामिमां बालामनागसम् । पित्र्यैतामहे मार्गे नियोक्तुमहसुत्सहे ॥ १४ ॥ कथं शक्ष्यामि बालेऽस्मिन् गुणानाधातुमीप्सितान् । अनाथे सर्वतो लुप्ते यथा त्वं धर्मदर्शिवान् ॥ १५ ॥ दूरामपि च ते बालामनाथां परिभूय माम् । अनर्हाः प्रार्थयिष्यन्ति शूद्रा वेदश्रुतिं यथा ॥ १६ ॥ तां चेदहं न दित्सेयं लक्षणैरुपलक्षिताम् । प्रमथ्यैनां हरेयुस्ते हविर्ध्वांक्षा इवाध्वरात् ॥ १७ ॥ संक्षेत्तमाणा पुत्रं ते नानुरूपमिवात्मनः । अनर्हैवशमापन्नामिमां चापि सुतां तव ॥ १८ ॥ अवज्ञाता च लोकेषु तथात्मानमजानती । अवलिप्तैर्नरैर्ब्रह्मन्मरिष्यामि न संशयः ॥ १९ ॥ तौ च हीनौ मया बालौ त्वया चैव तथात्मजौ । विनश्येतां न सन्देहो मत्स्याविव जलक्षये ॥ २० ॥ त्वितयं सर्वथाप्येवं विनशिष्यत्यसंशयम् । त्वया विहीनं तस्मान्मां परित्यक्तुमर्हति ॥ २१ ॥ व्युष्टिरेषा परा स्त्रीणां पूर्वं भर्तुः परां गतिम् । गन्तुं ब्रह्मन् सपुत्राणामिति धर्मविदो विदुः ॥ २२ ॥ परित्यक्तः सुतश्चायं दुहितेयं तथा मया । बान्धवाश्च परित्यक्ता स्वदर्थं जीवितञ्च मे ॥ २३ ॥ यज्ञैस्तपोभिर्नियमैर्दानैश्च विविधैरपि । विशिष्यते स्त्रिया भर्तुर्हितं प्रियहिते स्थितिः ॥ २४ ॥ तदिदं यच्चिकीर्षामि धर्मं परमसम्मतम् । इष्टञ्चैव हितञ्चैव तव चैव कुलस्य च ॥ २५ ॥ इष्टानि चाप्यपत्यानि द्रव्याणि सुहृदः प्रियाः । आपद्वैमोक्षाय भार्या चापि सतां मतम् ॥ २६ ॥ आपदर्थं धनं रक्षेद्दारान् रक्षेद्धनैरपि । आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ २७ ॥ दृष्टादृष्टफलार्थं हि भार्या पुत्रो धनं गृहम् । सर्वमेतद्विधातव्यं बुधानामेष निश्चयः ॥ २८ ॥ एकतो वा कुलं कृत्स्नमात्मा वा कुलवर्धन । न समं सर्वमेवेति बुधानामेष निश्चयः ॥ २९ ॥ स कुरुष्व मया कार्ष्णे तारया-

ज्ञानमात्मना । अनुजानीहि मामार्य्ये सुतौ मे परिपालय ॥३०॥ अवध्यां स्त्रियमित्याहुर्धर्मज्ञा धर्मनिश्चये । धर्मज्ञान् राक्षसान्नाऽर्ज्जुन हन्यात्स च मामपि ॥ ३१ ॥ निःसंशयो वधः पुंसां स्त्रीणां संशयितो वधः । अतो मामेव धर्मज्ञ प्रख्यापयितुमर्हसि ॥ ३२ ॥ मुक्तं प्रियाख्यवाप्नोमि धर्मञ्च चरितो महान् । त्वत्प्रसूतिः प्रिया प्राप्ता न मां तत्यक्तुमर्हसि ॥ ३३ ॥ जातपुत्रा च दृष्टा च प्रियकामा च ते सदा । समीक्ष्यैतदहं सर्वं व्यवसायं करोम्यतः ॥ ३४ ॥ उत्सृज्यापि हि मामार्य्ये प्राप्स्यस्यन्यामपि स्त्रियम् । ततः प्रतिष्ठितो धर्मो भविष्यति पुनस्तव ॥ ३५ ॥ न चाप्यधर्मः कल्याणि बहुपत्नीकता नृणाम् । स्त्रीणामधर्मः सुमहान् भर्त्तुः पूर्वस्य लङ्घने ॥ ३६ ॥ एतत्पूर्वं समीक्ष्य त्वमात्मत्यागं च गर्हितम् । आत्मानं तारयाद्यानु कुलं चैवौ च दारकौ ॥ ३७ ॥

वैशम्पायन उवाच । एवमुक्त्वा भर्त्तारं तां समाश्वास्य भारत । सुमोच वाष्पं शनकैः समार्य्यो भृशदुःखितः ॥ ३८ ॥

इत्यादिपर्वणि बकवधपर्वणि ब्राह्मणीवाक्ये षष्ट्यधिकशततोऽध्यायः ॥ १६० ॥

वैशम्पायन उवाच । तयोर्दुःखितयोर्वाक्यमतिमात्रं निशम्य तु । ततो दुःखपरीताङ्गी कन्या तावभ्यभाषत ॥ १ ॥ किमेवं भृशदुःखार्त्तौ रोरूयेतामनाथवत् । ममापि श्रूयतां वाक्यं श्रुत्वा च क्रियतां क्षमम् ॥ २ ॥ धर्मतोऽहं परित्याज्या युवयोर्नात्र संशयः । त्यक्तव्यां मां परित्यज्य त्रातं सर्वं ममैकया ॥ ३ ॥ इत्यर्थमिष्यतेऽपत्यं तारयिष्यति मामिति । अस्मिन्नुपस्थिते काले गर्भं मोक्षयतं मयि ॥ ४ ॥ दृष्ट्वा वा तारयेद्दुर्गादुत वा प्रेत्य भारत ।

सर्वथा तारयेत् पुत्रः पुत्र इत्युच्यते बुधैः ॥ ५ ॥ आकाङ्क्षन्ते च दौहित्रान्मयि नित्यं पितामहाः। तत् स्वयं वै परित्रास्ये रचन्ती जीवितं पितुः ॥ ६ ॥ भ्राता च मम बालोऽयं गते लोकममुं त्वयि। अचिरेणैव कालेन विनङ्क्षेत न संशयः ॥ ७ ॥ तातेऽपि हि गते स्वर्गं विनष्टे च ममानुजे। पिण्डः पितॄणां व्युच्छिद्येतत्तेषां विप्रियं भवेत् ॥ ८ ॥ पित्रा त्यक्ता तथा माता भ्राता चाहमसंशयम्। दुःखाद्दुःखतरं प्राप्य म्रियेयमतथोचिता ॥ ९ ॥ त्वयि त्वरोगे निर्मुक्ते माता भ्राता च मे शिशुः। सन्तानश्चैव पिण्डस्य प्रतिष्ठास्त्वत्यसंशयम् ॥ १० ॥ आत्मा पुत्रः सखा भार्या क्षरन्तु दुहिता किल। स क्षरात्मोच्चयात्मानं मा च धर्मे नियोजय ॥ ११ ॥ अनाथा कृपणा बाला यत्र क्वचन गामिनी। भविष्यामि त्वया तात विहीना कृपणा सदा ॥ १२ ॥ अथवाहं करिष्यामि कुलस्यास्य विमोचनम्। फलसंज्ञा भविष्यामि कृत्वा कर्म सुदुष्करम् ॥ १३ ॥ अथवा यास्यसे तत्र त्यक्त्वा मां द्विजसत्तम। पीड़िताहं भविष्यामि तदवेक्षस्व मामपि ॥ १४ ॥ तदस्मदर्थं धर्मार्थं प्रसवार्थञ्च सत्तम। आत्मानं परिरक्षस्व त्यक्तव्यां मा च सन्त्यज ॥ १५ ॥ अवश्यकरणीये च मा त्वां कालोऽत्यगादयम्। किन्ततः परमं दुःखं यदहं स्वर्गते त्वयि ॥ १६ ॥ याचमानाः परादन्नं परिधावेमहि श्वबत्। त्वयि त्वरोगे निर्मुक्ते क्षेत्रादस्मात्सुबान्धवे। अक्षतेव सती लोके भविष्यामि सुखान्विता ॥ १७ ॥ इतः प्रदाने देवाश्च पितरश्चेति नः श्रुतम्। त्वया दत्तेन तोयेन भविष्यन्ति हिताय वै ॥ १८ ॥

वैशम्पायन उवाच। एवं बहुविधं तस्या निशम्य परिदेवितम्। पिता माता च सा चैव कन्या प्रारुरुदुस्त्रयः ॥ १९ ॥ ततः प्ररुदितान् सर्वान्निशम्याथ सुतस्तदा। उत्फुल्लनयनो बालः कलमव्यक्तमब्रवीत् ॥ २० ॥ मा पितः क्रन्द मा मातर्मा

स्वसखिति चाब्रवीत्। प्रहृष्टानिव सर्वांस्तानेकैकमनुसर्पति ॥२१॥ ततः स तृणमादाय प्रहृष्टः पुनरब्रवीत्। अनेनाहं हनिष्यामि राक्षसं पुरुषादकम् ॥ २२ ॥ तयापि तेषां दुःखेन परीतानां निशम्य तत्। बालस्य वाक्यमव्यक्तं हर्षः समभवन्महान् ॥२३॥ अयं काल इति ज्ञात्वा कुन्ती समुपहृत्य तान्। गतासूनसृतेनेव जीवयन्तीदमब्रवीत् ॥ २४ ॥

इत्यादिपर्वणि वकवधपर्वणि ब्राह्मणपुत्रवाक्ये एकषष्ट्यधिकशततोऽध्यायः ॥ १६१ ॥

—:०:—

कुन्त्युवाच। कुतो मूलमिदं दुःखं ज्ञातुमिच्छामि तत्त्वतः। विदित्वाप्यपकर्षेयं यक्ष्यं वेदपकर्षितुम् ॥ १ ॥

ब्राह्मण उवाच। उपपन्नं सतामेतद्यदुब्रवीषि तपोधने। न तु दुःखमिदं शक्यं मानुषेण व्यपोहितुम् ॥ २ ॥ समीपे नगरस्यास्य वको वसति राक्षसः। ईशो जनपदस्यास्य पुरस्य च महाबलः ॥ ३ ॥ पुष्टो मानुषमांसेन दुर्बुद्धिः पुरुषादकः। रक्षत्यसुरराट् नित्यमिमं जनपदं बली ॥ ४ ॥ नगरं चैव देशं च रक्षोबलसमन्वितम्। तत्कृते परचक्राच्च भूतेभ्यश्च न नो भयम् ॥ ५ ॥ वेतनं तस्य विहितं शालिवाहस्य भोजनम्। महिषौ पुरुषश्चैको यस्तदादाय गच्छति ॥ ६ ॥ एकैकस्यापि पुरुषस्तत् प्रयच्छति भोजनम्। स वारो बहुभिर्वर्षैर्भवत्यसुतरो नरैः ॥७॥ तद्विमोक्षाय ये केचिद्यतन्ति पुरुषाः क्वचित्। सपुत्रदारांस्तान् हत्वा तद्रक्षो भक्षयत्युत ॥ ८ ॥ वेत्रकीयगृहे राजा नायं नयमिहास्थितः। उपायं तं न कुरुते यत्तादपि स मन्दधीः ॥ ९ ॥ अनामयं जनस्यास्य येन स्यादद्य शाश्वतम्। एतदर्था वयं नूनं वसामो दुर्बलस्य ये। विषये नित्यसुद्विग्नाः कुराजानमुपाश्रिताः

॥ १० ॥ ब्राह्मणाः कस्य वास्तव्याः कस्य वा छन्दचारिणः। गुणैरेते हि वत्स्यन्ति कामगाः पक्षिणो यथा ॥ ११ ॥ राजानं प्रथमं विन्देत्ततो भार्यां ततो धनम्। तयस्य सञ्चयेनास्य ज्ञातीन् पुत्रांश्च तारयेत् ॥ १२ ॥ विपरीतं मया चेदं तव सर्वमुपार्जितम्। तदिमामापदं प्राप्य भृशं तप्यामहे वयम् ॥ १३ ॥ सोऽयमस्मानुपप्राप्तो वारः कुलविनाशनः। भोजनं पुरुषश्चैकः प्रदेयं वेतनं मया ॥ १४ ॥ न च मे विद्यते वित्तं संक्रेतुं पुरुषं क्वचित्। सुहृज्जनं प्रदातुञ्च न शक्ष्यामि कदाचन ॥ १५ ॥ गतिञ्चैव न पश्यामि तस्मान्मोक्षाय रक्षसः। सोऽहं दुःखार्णवे मग्नो महत्यसुकरे भृशम् ॥ १६ ॥ सहैवैतैर्गमिष्यामि बान्धवैरद्य राक्षसम्। ततो नः सहितान् क्षुद्रः सर्वानेवोपयोक्ष्यति ॥ १७ ॥

इत्यादिपर्वणि बकवधपर्वणि कुन्तीप्रभृते द्विषष्ट्यधिकशततोऽध्यायः ॥ १६२ ॥

—०:०—

कुन्त्युवाच। न विषादस्त्वया कार्यो भयादस्मात्कथञ्चन। उपायः परिदृष्टोऽत्र तस्मान्मोक्षाय रक्षसः ॥ १ ॥ एकस्त्व सुतो बालः कन्या चैका तपस्विनी। न चैतयोस्त्वया पक्षिन् गमनं तव रोचये ॥ २ ॥ मम पञ्च सुता ब्रह्मंस्तेषामेको गमिष्यति। त्वदर्थं बलिमादाय तस्य पापस्य रक्षसः ॥ ३ ॥

ब्राह्मण उवाच। नाहमेतत्करिष्यामि जीवितार्थी कथञ्चन। ब्राह्मणस्यातिथेश्चैव स्वार्थे प्राणान्वियोजयन् ॥ ४ ॥ नन्वेतदकुलीनासु नाधर्मिष्ठासु विद्यते। यद्ब्राह्मणार्थं विसृजेदात्मानमपि चात्मजम् ॥ ५ ॥ आत्मनस्तु मया श्रेयो बोद्धव्यमिति रोचये। ब्रह्मबध्यात्मबध्या वा श्रेयानात्मबधो मम ॥ ६ ॥ ब्रह्मबध्या परं पापं निष्कृतिर्नात्र विद्यते। अबुद्धिपूर्वं कृत्वापि वर-

स्मात्मवधो मम ॥ ७ ॥ न त्वहं बधसाकाङ्क्षे स्वयमेवात्मनः शुभे । परैः कृते बधे पापं न किञ्चिन्मयि विद्यते ॥ ८ ॥ अभिसन्धिकृते तस्मिन् ब्राह्मणस्य बधे मया । निष्कृतिं न प्रपश्यामि क्षुद्रमेव च ॥ ९ ॥ आगतस्य गृहं त्यागस्तथैव शरणार्थिनः । याचमानस्य च बधो नृशंसो गर्हितो बुधैः ॥ १० ॥ कुर्य्यान्न निन्दितं कर्म न नृशंसं कथञ्चन । इतिपूर्वे महात्मान आपद्धर्मविदो विदुः ॥ ११ ॥ श्रेयांसु सहदारस्य विनाशोऽद्य मम स्वयम् । ब्राह्मणस्य बधं नाहमनुमंस्ये कदाचन ॥ १२ ॥

कुन्त्युवाच । ममाप्येषा मतिर्ब्रह्मन् विप्रा रक्ष्या इति स्थिरा । न चाप्यनिष्टः सुतो मे यदि पुत्रशतं भवेत् ॥ १३ ॥ न चासौ राक्षसः शक्तो मम पुत्रविनाशने । वीर्य्यवान्मन्त्रसिद्धश्च तेजस्वी च सुतो मम ॥ १४ ॥ राक्षसाय च तत्सर्वं प्रापयिष्यति भोजनम् । मोक्षयिष्यति चात्मानमिति मे निश्चिता मतिः ॥ १५ ॥ समागताश्च वीरेण दृष्टपूर्वाश्च राक्षसाः । बलवन्तो महाकाया निहताश्चाप्यनेकशः ॥ १६ ॥ न त्विदं केषुचिद्ब्रह्मन् व्याहर्त्तव्यं कथञ्चन । विद्यार्थिनो हि मे पुत्रान्विप्रकुर्य्युः कुतूहलात् ॥ १७ ॥ गुरुणा चाननुज्ञातो ग्राहयेयं सुतो मम । न स कुर्य्यात्तथा कार्य्यं विद्ययेति सतां मतम् ॥ १८ ॥ एवमुक्तस्तु पृथया स विप्रो भार्य्यया सह । हृष्टः सम्पूजयामास तद्वाक्यमहतोपमम् ॥ १९ ॥ ततः कुन्ती च विप्रश्च सहितावनिलात्मजम् । तमब्रूतां कुरुष्वेति स तथेत्यब्रवीच्च तौ ॥ २० ॥

इत्यादिपर्वणि वकबधपर्वणि भीमवकबधाङ्गीकारे त्रिषष्ट्यधिकशततोऽध्यायः ॥ १६३ ॥

वैशम्पायन उवाच। करिष्य इति भीमेन प्रतिज्ञातेऽथ भारत। आजग्मुस्ते ततः सर्वे भैक्ष्यमादाय पाण्डवाः॥ १॥ आकारेणैव तं ज्ञात्वा पाण्डुपुत्रो युधिष्ठिरः। रहः समुपविश्यैकस्तां पप्रच्छ मातरम्॥ २॥

युधिष्ठिर उवाच। किंचिन्नीर्घत्ययं कर्म भीमो भीमपराक्रमः। भवत्यनुमते कच्चित् स्वयं वा कर्तुमिच्छति॥ ३॥

कुन्त्युवाच। ममैव वचनादेष करिष्यति परन्तपः। ब्राह्मणार्थे महत् कृत्यं मोक्षाय नगरस्य च॥ ४॥

युधिष्ठिर उवाच। किमिदं साहसं तीक्ष्णं भवत्या दुष्करं कृतम्। परित्यागं हि पुत्रस्य न प्रशंसन्ति साधवः॥ ५॥ कथं परसुतस्यार्थे स्वसुतं त्यक्तुमिच्छसि। लोकवेदविरुद्धं हि पुत्रत्यागात् कृतं त्वया॥ ६॥ यस्य बाहू समाश्रित्य सुखं सर्वे गयामहे। राज्यं चापहृतं क्षुद्रैराजिहीर्षामहे पुनः॥ ७॥ यस्य दुर्योधनो वीर्यं चिन्तयन्नमितौजसः। न शेते रजनीः सर्वा दुःखाच्चकुनिना सह॥ ८॥ यस्य वीरस्य वीर्येण मुक्ता जतुगृहाद्वयम्। अन्येभ्यश्चैव पापेभ्यो निहतश्च पुरोचनः॥ ९॥ यस्य वीर्यं समाश्रित्य वसुपूर्णां वसुन्धराम्। दूमां मन्यामहे प्राप्तां निहत्य धृतराष्ट्रजान्॥ १०॥ तस्य व्यवसितत्यागो बुद्धिमास्थाय कां त्वया। कच्चिन्नु दुःखैर्दुर्बुद्धिर्विलुप्ता गतचेतसः॥ ११॥

कुन्त्युवाच। युधिष्ठिर न सन्तापस्त्वया कार्यो वृकोदरे। न चायं बुद्धिदौर्बल्याद्व्यवसायः कृतो मया॥ १२॥ इह विप्रस्य भवने वयं पुत्र सुखोषिताः। अज्ञाता धार्तराष्ट्राणां सत्कृता वीतमन्यवः॥ १३॥ तस्य प्रतिक्रिया पार्थ ममेयं प्रसमीक्षिता। एतावानेव पुरुषः कृतं यस्मिन्न नश्यति॥ १४॥ यावच्च कुर्यादन्योऽस्य कुर्याद्दुष्कृतं ततः। दृष्ट्वा भीमस्य विक्रान्तं तदा जतुगृहे महत्॥ १५॥ हिडिम्बस्य वधाच्चैव विश्वासो मे वृको-

एरे। आच्छोटयेतं हि भीमस्य नागायुतसमं मतम् ॥ १६ ॥ येन यूयं गजप्रख्या निर्व्यूढा वारणावतात्। द्वादशेह समाः पीनो नलेनान्यो न विद्यते। यो व्यतीयाद्युधि श्रेष्ठमपि चक्रधरं स्वयम् ॥ १७ ॥ जातमात्रः पुरा चैव ममाङ्कात् पतितो गिरौ। शरीरगौरवादस्य शिला गात्रैर्विचूर्णिता ॥ १८ ॥ तदहं प्रज्ञया ज्ञात्वा बलं भीमस्य पाण्डव। प्रतिकार्ये च विप्रस्य ततः कृतवती मतिम् ॥ १९ ॥ नेदं लोभान्न चाज्ञानान्न च मोहाद्विनिश्चितम्। बुद्धिपूर्वन्तु धर्मस्य व्यवसायः कृतो मया ॥ २० ॥ अर्थौ द्वावपि निष्पन्नौ युधिष्ठिर भविष्यतः। प्रतीकारश्च दासस्य धर्मश्च चरितो महान् ॥ २१ ॥ यो ब्राह्मणस्य साहाय्यं कुर्य्यादर्थेषु कर्हिचित्। क्षत्रियः स शुभाल्लोकान् प्राप्नुयादिति मे मतिः ॥ २२ ॥ क्षत्रियस्यैव कुर्वाणः क्षत्रियो बन्धमोक्षणम्। विपुलां कीर्तिमाप्नोति लोकेऽस्मिंश्च परत्र च ॥ २३ ॥ वैश्यस्यार्थे च साहाय्यं कुर्वाणः क्षत्रियो भुवि। स सर्वेष्वपि लोकेषु प्रजा रञ्जयति ध्रुवम् ॥ २४ ॥ शूद्रन्तु मोचयेद्राजा शरणार्थिनमागतम्। प्राप्नोतीह कुले जन्म सद्भ्यो राजपूजिते ॥ २५ ॥ एवं मां भगवान् व्यासः पुरा पौरवनन्दन। प्रोवाचासुकरप्रज्ञस्तस्मादेवं चिकीर्षितम् ॥ २६ ॥

इत्यादिपर्वणि वकवधपर्वणि कुन्तीयुधिष्ठिरवाक्ये चतुःषष्ट्यधिकशततोऽध्यायः ॥ १६४ ॥

युधिष्ठिर उवाच। उपपन्नमिदं मातस्त्वया यद्बुद्धिपूर्वकम्। आर्त्तस्य ब्राह्मणस्येतदनुक्रोशादिदं कृतम् ॥ १ ॥ ध्रुवमेष्यति भीमोऽयं निहत्य पुरुषादकम्। सर्वथा ब्राह्मणस्यार्थे यदनुक्रोशवत्यसि ॥ २ ॥ यथात्विदं न विन्देयुर्नरा नगरवासिनः। तथायं ब्राह्मणो वाच्यः परियाह्यश्च यत्नतः ॥ ३ ॥

वैशम्पायन उवाच । ततो रात्र्यां व्यतीतायामन्नमादाय पाण्डवः । भीमसेनो ययौ तत्र यत्रासौ पुरुषादकः ॥ ४ ॥ आसाद्य तु वनं तस्य रक्षसः पाण्डवो बली । आजुहाव ततो नाम्ना तदन्नमुपपादयन् ॥ ५ ॥ ततः स राक्षसः क्रुद्धो भीमस्य वचनात्तदा । आजगाम सुसंक्रुद्धो यत्र भीमो व्यवस्थितः ॥ ६ ॥ महाकायो महावेगो दारयन्निव मेदिनीम् । लोहिताक्षः करालश्च लोहितश्मश्रुमूर्धजः ॥ ७ ॥ आकर्णाद्विन्नवक्त्रश्च शङ्कुकर्णो विभीषणः । त्रिशिखां भ्रुकुटीं कृत्वा सन्दश्य रदनच्छदम् ॥ ८ ॥ अज्ञानमन्नं तं दृष्ट्वा भीमसेनं स राक्षसः । विहत्य नयने क्रुद्ध इदं वचनमब्रवीत् ॥ ९ ॥ कोऽयमन्नमिदं भुङ्क्ते मदर्थमुपकल्पितम् । पश्यतो मम दुर्बुद्धिर्यमसादनम् ॥ १० ॥ भीमसेनस्ततः श्रुत्वा प्रहसन्निव भारत । राक्षसं तमनादृत्य भुङ्क्त एव यराङ्मुखः ॥ ११ ॥ रवं स भैरवं कृत्वा समुद्यम्य करावुभौ । अभ्यद्रवद्भीमसेनं जिघांसुः पुरुषादकः ॥ १२ ॥ तथापि परिभयेन प्रेक्षमाणो वृकोदरः । राक्षसं भुङ्क्त एवान्नं पाण्डवः परवीरहा ॥ १३ ॥ अमर्षेण तु संपूर्णः कुन्तीपुत्रं वृकोदरम् । जघान पृष्ठे पाणिभ्यामुभाभ्यां पृष्ठतः स्थितः ॥ १४ ॥ तथा बलवता भीमः पाणिभ्यां भृशमाहतः । नैवावलोकयामास राक्षसं भुङ्क्त एव सः ॥ १५ ॥ ततः स भूयः संक्रुद्धो वृक्षमादाय राक्षसः । ताडयिष्यंस्तदा भीमं पुनरभ्यद्रवद्बली ॥ १६ ॥ ततो भीमः शनैर्भुक्त्वा तदन्नं पुरुषर्षभः । वार्युपस्पृश्य संहृष्टस्तस्थौ युधि महाबलः ॥ १७ ॥ क्षिप्तं क्रुद्धेन तं वृक्षं प्रतिजग्राह वीर्यवान् । सव्येन पाणिना भीमः प्रहसन्निव भारत ॥ १८ ॥ ततः स पुनरुद्यम्य वृक्षान् बहुविधान् बली । प्राहिणोद्भीमसेनाय तस्मै भीमश्च पाण्डवः ॥ १९ ॥ तद्वृक्षयुद्धमभवन्महोरुद्रविनाशनम् । घोररूपं महाराज नरराक्षसराजयोः ॥ २० ॥ नाम विश्राव्य तु

वकः समभिद्रुत्य पाण्डवम् । भुजाभ्यां परिजग्राह भीमसेनं महाबलम् ॥ २१ ॥ भीमसेनोऽपि तद्भुजः परिरभ्य महाभुजः । विष्फुरन्तं महाबाहुं विचकर्ष बलाद्बली ॥ २२ ॥ स कृष्यमाणो भीमेन कर्षमाणश्च पाण्डवम् । समयुज्यत तीव्रेण क्रमेण पुरुषादकः ॥ २३ ॥ तयोर्वेगेन महता पृथिवी समकम्पत । पादपांश्च महाकायांश्चूर्णयामासतुस्तदा ॥ २४ ॥ क्षीयमाणन्तु तद्भुजः समीक्ष्य पुरुषादकम् । निष्पिष्य भूमौ जानुभ्यां समाजघ्ने वृकोदरः ॥ २५ ॥ ततोऽस्य जानुना पृष्ठमवपीड्य बलादिव । बाहुना परिजग्राह दक्षिणेन शिरोधराम् ॥ २६ ॥ सव्येन च कटीदेशे गृह्य वाससि पाण्डवः । तद्भुजो द्विगुणं चक्रे स्वनन्तं भैरवं रवम् ॥ २७ ॥ ततोऽस्य रुधिरं वक्त्रात् प्रादुरासीद्दिशाम्पते । भज्यमानस्य भीमेन तस्य घोरस्य रक्षसः ॥ २८ ॥

इत्यादिपर्वणि वकवधपर्वणि वकभीमयुद्धे पञ्चषष्ट्यधिकशततोऽध्यायः ॥ १६५ ॥

—०३०—

वैशम्पायन उवाच । ततः स भग्नपार्श्वांसो नदित्वा भैरवं रवम् । शैलराजप्रतीकाशो गतासुरभवद्वकः ॥ १ ॥ तेन शब्देन वित्रस्तो जनस्तस्याय रक्षसः । निष्पपात गृहाद्राजन् सुहृद्भिः परिचारिभिः ॥ २ ॥ तान् भीतान् विगतज्ञानान् भीमः प्रहरतां वरः । सान्त्वयामास बलवान् समये च न्यवेशयत् ॥ ३ ॥ न हिंस्या मानुषा भूयो युष्माभिरिति कर्हिचित् । हिंसतां हि वधः शीघ्रमेवमेव भवेदिति ॥ ४ ॥ तस्य तद्वचनं श्रुत्वा तानि रक्षांसि भारत । एवमस्त्विति तं प्राहुर्जगृहुः समयञ्च तम् ॥ ५ ॥ ततः प्रभृति रक्षांसि तत्र सौम्यानि भारत । नगरे प्रत्यदृश्यन्त लक्षैर्नगरवासिभिः ॥ ६ ॥ ततो भीमस्तमादाय गतासुं पुरुषा-

दक्षम्। द्वारदेशे विनिक्षिप्य जगामानुपलक्षितः ॥ ७ ॥ दृष्ट्वा भीमबलोद्भूतं वकं विनिहतं तदा। ज्ञातयोऽस्य भयोद्विग्नाः प्रतिजग्मुस्ततस्ततः ॥ ८ ॥ ततः स भीमस्तं हत्वा गत्वा ब्राह्मणवेश्म तत्। आचचक्षे यथावृत्तं राज्ञः सर्वमशेषतः ॥ ९ ॥ ततो नरा विनिष्क्रान्ता नगरात्कल्यमेव तु। ददृशुर्निहतं भूमौ राक्षसं रुधिरोक्षितम् ॥ १० ॥ तमद्रिकूटसदृशं विनिकीर्णं भयानकम्। दृष्ट्वा संहृष्टरोमाणो बभूवुश्च नागराः ॥ ११ ॥ एकचक्रां ततो गत्वा प्रहर्षं प्रददुः पुरे। ततः सहस्रशो राजन्नरा नगरवासिनः ॥ १२ ॥ तत्राजग्मुर्वकं द्रष्टुं स्त्रीबालकुमारकाः। ततस्ते विस्मिताः सर्वे कर्म दृष्ट्वातिमानुषम्। दैवतान्यर्चयाञ्चक्रुः सर्व एव विशाम्पते ॥ १३ ॥ ततः प्रगणयामासुः कस्य वारोऽद्य भोजने। ज्ञात्वा चागम्य तं विप्रं पप्रच्छुः सर्व एव ते ॥ १४ ॥ एवं पृष्टः स वज्रश्रो रक्षमाणश्च पाण्डवान्। उवाच नागरान् सर्वानिदं विप्रर्षभस्तदा ॥ १५ ॥ आज्ञापितं मामग्नये वदन्तं सह बन्धुभिः। ददर्श ब्राह्मणः कश्चिन्नन्वसिद्धो महामनाः ॥ १६ ॥ परिपृच्छ्य स मां पूर्वं परिक्लेशं पुरस्य च। अब्रवीद्ब्राह्मणश्रेष्ठो विप्रास्य प्राहसन्निव ॥ १७ ॥ प्रापयिष्याम्यहं तस्मा अन्नमेतद्धराशने। मन्निमित्तं भयं चापि न कार्यमिति चाब्रवीत् ॥ १८ ॥ स तदन्नमुपादाय गतो वकवनं प्रति। तेन नूनं भवेदेतत्कर्म लोकहितं कृतम् ॥ १९ ॥ ततस्ते ब्राह्मणाः सर्वे क्षत्रियाश्च सुविस्मिताः। वैश्याः शूद्राश्च मुदिताश्चक्रुर्ब्रह्ममहं तदा ॥ २० ॥ ततो जनपदाः सर्वे आजग्मुर्नगरं प्रति। तद्दृष्ट्वा ततमं दृष्ट्वा पर्यास्तैव चावसन् ॥ २१ ॥

इत्यादिपर्वणि वकवधपर्वणि वकवधे षट्षष्ट्यधिकशततमोऽध्यायः समाप्तश्चेदं वकवधपर्व ॥ १६६ ॥

अथ चैत्ररथपर्व ॥ ११ ॥

जनमेजय उवाच। ते तथा पुरुषव्याघ्रा निहत्य वकराक्षसम्। अत ऊर्ध्वं ततो ब्रह्मन् किमकुर्वत पाण्डवाः ॥ १ ॥

वैशम्पायन उवाच। तथैव न्यवसन् राजन्निहत्य वकराक्षसम्। अधीयानाः परं ब्रह्म ब्राह्मणस्य निवेशने ॥ २ ॥ ततः कतिपयाहस्य ब्राह्मणः संशितव्रतः। प्रतिश्रयार्थी तद्वेश्म ब्राह्मणस्याजगाम ह ॥ ३ ॥ स सम्यक् पूजयित्वा तं विप्रं विप्रर्षभस्तदा। ददौ प्रतिश्रयं तस्मै सदा सर्वातिथिव्रतः ॥ ४ ॥ ततस्ते पाण्डवाः सर्वे सह कृत्वा नरर्षभाः। उपासाञ्चक्रिरे विप्रं कथयन्तं कथाः शुभाः ॥ ५ ॥ कथयामास देशांश्च तीर्थानि सरितस्तथा। राज्ञश्च विविधाश्चर्ष्यान्देशांश्चैव पुराणि च ॥ ६ ॥ स तत्राकथयद्विप्रः कथान्ते जनमेजय। पाञ्चालेष्वद्भुताकारं याज्ञसेन्याः स्वयम्वरम् ॥ ७ ॥ धृष्टद्युम्नस्य चोत्पत्तिमुत्पत्तिं च शिखण्डिनः। अयोनिजत्वं कृष्णाया द्रुपदस्य महामखे ॥ ८ ॥ तद्भृशं ततमं श्रुत्वा लोके तस्य महात्मनः। विस्तरेणैव पप्रच्छुः कथान्ते पुरुषर्षभाः ॥ ९ ॥

पाण्डवा ऊचुः। कथं द्रुपदपुत्रस्य धृष्टद्युम्नस्य पावकात्। वेदीमध्यात्च कृष्णायाः सम्भवः कथमद्भुतः ॥ १० ॥ कथं द्रोणान्महेष्वासात्सर्वास्त्रविदुषश्चित। कथं विप्र सम्भवो तौ निघ्नो कस्य कृतेन वा ॥ ११ ॥

वैशम्पायन उवाच। एवं तैश्चोदितो राजन् स विप्रः पुरुषर्षभैः। कथयामास तत्सर्वं द्रौपदीसम्भवं तदा ॥ १२ ॥

इत्यादिपर्वणि चैत्ररथपर्वणि द्रौपदीसम्भवे सप्तषष्ट्यधिकशततोऽध्यायः ॥ १६७ ॥

— ०:० —

ब्राह्मण उवाच । गङ्गाद्वारं प्रति महान्बभूवर्षिर्महातपाः ।
भरद्वाजो महाप्राज्ञः सततं संशितव्रतः ॥ १ ॥ सोऽभिषेक्तुं ततो
गङ्गां पूर्वमेवागतां सतीम् । ददर्शाप्सरसं तत्र घृताचीमाशु ता-
म्यृषिः ॥ २ ॥ तस्या वायुर्नदीतीरे वसनं व्यहरत्तदा । अप-
कृष्टाम्बरां दृष्ट्वा तामृषिश्चकमे तदा ॥ ३ ॥ तस्यां संसक्तमनसः
कौमारब्रह्मचारिणः । चिरस्य रेतश्चस्कन्द तद्दृष्ट्वा द्रोण आदधे
॥ ७ ॥ ततः समभवद्द्रोणः कुमारस्तस्य धीमतः । अध्यगीष्ट स
वेदांश्च वेदाङ्गानि च सर्वशः ॥ ८ ॥ भरद्वाजस्य तु सखा पृषतो
नाम पार्थिवः । तस्यापि द्रुपदो नाम तदा समभवत् सुतः ॥९॥
स नित्यमाश्रमं गत्वा द्रोणेन सह पार्षतः । चिक्रीड़ाध्ययनं चैव
चकार क्षत्रियर्षभः ॥ १० ॥ ततस्तु पृषतेऽतीते स राजा द्रुपदो-
ऽभवत् । द्रोणोऽपि रामं शुश्राव दिव्यान्तं वसु सर्वशः ॥ ११ ॥
वनान्तु प्रस्थितं रामं भरद्वाजसुतोऽब्रवीत् । आगतं वित्तकामं
मां विद्धि द्रोणं द्विजोत्तम ॥ १२ ॥

राम उवाच । शरीरमात्रमेवाद्य मया समवशेषितम् ।
अस्त्राणि वा शरीरं वा ब्रह्मन्वृणुतमं वृणु ॥ १३ ॥

द्रोण उवाच । अस्त्राणि चैव सर्वाणि तेषां संहारमेव च ।
प्रयोगञ्चैव सर्वेषां दातुमर्हति मे भवान् ॥ १४ ॥

ब्राह्मण उवाच । तथेत्युक्त्वा ततस्तस्मै प्रददौ भृगुनन्दनः ।
प्रतिगृह्य तदा द्रोणः कृतकृत्योऽभवत्तदा ॥ १५ ॥ संप्रहृष्टमना
द्रोणो रामात्परमसम्मतम् । ब्रह्मास्त्रं समनुज्ञाप्य नरेष्वभ्यधिको-
ऽभवत् ॥ १६ ॥ ततो द्रुपदमासाद्य भारद्वाजः प्रतापवान् ।
अब्रवीत् पुरुषव्याघ्रः सखायं विद्धि मामिति ॥ १७ ॥

द्रुपद उवाच । नाश्रोत्रियः श्रोत्रियस्य नारथी रथिनः
सखा । नाराजा पार्थिवस्यापि सखिपूर्वं किमिष्यते ॥ १८ ॥

ब्राह्मण उवाच । स विनिश्चित्य मनसा पाञ्चाल्यं प्रति बुद्धि

ञान्। जगाम कुरुमुख्यानां नगरं नागसाह्वयम् ॥ १६ ॥ तस्मै पौत्रान् समादाय वस्त्रूनि विविधानि च। प्रादाय प्रददौ भीष्मः शिष्यान् द्रोणाय धीमते ॥ २० ॥ द्रोणः शिष्यांस्ततः पार्थानिदं वचनमब्रवीत्। समानीय तु तान् शिष्यान् द्रुपदस्यासुखाय वै ॥ २१ ॥ आचार्यवेतनं किञ्चिद्बृहि यद्दुर्लभे मम। कृतास्त्रैस्तत् प्रदेयं स्यात्तदहं वदतानघाः। सौऽर्जुनप्रमुखैरुक्तस्तथा-स्त्विति गुरुस्तदा ॥ २२ ॥ यदा च पाण्डवाः सर्वे कृतास्त्राः कृतनिश्चयाः। ततो द्रोणोऽब्रवीद्भ्रातो वेतनार्थमिदं वचः ॥२३॥ पार्षतो द्रुपदो नाम क्षत्रियो नरेश्वरः। तस्मादाक्रम्य तद्राज्यं मम शीघ्रं प्रदीयताम् ॥ २४ ततः पाण्डुसुताः पञ्च निर्जित्य द्रुपदं युधि। द्रोणाय दर्शयामासुर्बद्ध्वा सचिवं तदा ॥ २५ ॥

द्रोण उवाच। प्रार्थयामि त्वया सख्यं पुनरेव नराधिप। अराजा किल नो राज्ञः सखा भवितुमर्हति ॥ २६ ॥ अतः प्रयतितं राज्ये यज्ञसेन त्वया सह। राजासि दक्षिणे कूले भागीरथ्याहमुत्तरे ॥ २७ ॥

ब्राह्मण उवाच। एवमुक्तो हि पाञ्चाल्यो भारद्वाजेन धीमता। उवाचाक्षविदां श्रेष्ठो द्रोणं ब्राह्मणसत्तमम् ॥ २८ ॥ एवं भवतु भद्रन्ते भारद्वाज महामते। सख्यं तदेव भवतु यच्चद्यदभिमन्यसे ॥ २९ ॥ एवमन्योन्यमुक्त्वा तौ कृत्वा सख्यमनुत्तमम्। जग्मतुर्द्रोणपाञ्चाल्यौ यथागतमरिन्दमौ ॥ ३० ॥ असत्कारः स तु महान्मुहूर्त्तमपि तस्य तु। नापैति हृदयाद्राज्ञो दुर्मनाः स क्षयोऽभवत् ॥ २१ ॥

इत्यादिपर्वणि चैत्ररथपर्वणि द्रौपदीसम्भवे अष्टषष्ट्य-धिकशततोऽध्यायः ॥ १६८ ॥

———

ब्राह्मण उवाच। अमर्षी द्रुपदो राजा कर्मसिद्धान् द्विजर्षभान्। अन्विच्छन् परिचक्राम ब्राह्मणावसथान् बहून् ॥ १ ॥ पुत्रजन्म परीप्सन्वै शोकोपहतचेतनः। नास्ति श्रेष्ठमपत्यं मे इति नित्यमचिन्तयत् ॥ २ ॥ जातान् पुत्रान् स निर्वेदाद्विगर्हन्निति चाब्रवीत्। निःश्वासपरमश्चासीद्दीर्घं प्रतिचिकीर्षया ॥ ३ ॥ प्रभावं विनयं शिक्षां द्रोणस्य चरितानि च। चात्मनश्च बलेनास्य चिन्तयन्नाध्यगच्छत ॥ ४ ॥ प्रतिकर्तुं वृषश्रेष्ठो यतमानोऽपि भारत। अभितः सोऽथ कल्माषीं गङ्गाकूले परिभ्रमन् ॥ ५ ॥ ब्राह्मणावसथं पुण्यमाससाद महीपतिः। तत्र नास्नातकः कश्चिन्न चाशीद्व्रती द्विजः ॥ ६ ॥ तस्यैव च महाभागः सोऽपश्यच्छंसितव्रतौ। याजोपयाजौ ब्रह्मर्षी शाश्वतौ परमेष्ठिनौ ॥ ७ ॥ संहिताध्ययने युक्तौ गोत्रतश्चापि काश्यपौ। तारणेयौ युक्तरूपौ ब्राह्मणाद्वृषिसत्तमौ ॥ ८ ॥ स तावामन्त्रयामास सर्वकामैरतन्द्रितः। वृद्धा बलं तयोस्तत्र कनीयांसमुपाद्रवे ॥ ९ ॥ प्रपेदे छन्दयन् कामैरुपयाजं हृतव्रतम्। पादशुश्रूषणे युक्तः प्रियवाक् सर्वकामदः ॥ १० ॥ अर्चयित्वा यथान्यायमुपयाजमुवाच सः। येन मे कर्मणा ब्रह्मन् पुत्रः स्याद् द्रोणमृत्यवे। उपायाज कृते तस्मिन् गवां दातास्मि तेऽर्बुदम् ॥ ११ ॥ यद्वा तेऽन्यद्द्विजश्रेष्ठ मनसः सुप्रियं भवेत्। सर्वं तत्ते प्रदाताहं न हि मेऽत्रास्ति संशयः ॥ १२ ॥ इत्युक्तो नाहमित्येवं तमृषिः प्रत्यभाषत। आराधयिष्यन् द्रुपदः स तं पर्यचरत् पुनः ॥ १३ ॥ ततः संवत्सरस्यान्ते द्रुपदं स द्विजोत्तमः। उपयाजोऽब्रवीत्काले राजन्मधुरया गिरा ॥ १४ ॥ ज्येष्ठो भ्राता ममारण्याद्विचरन् गहने वने। अपरिज्ञातशौचार्थां भूमौ निपतितं फलम् ॥ १५ ॥ तदपश्यमहं भ्रातुरसाम्प्रतमनुव्रजन्। विमर्षं सङ्करादाने नायं कुर्यात्कदाचन ॥ १६ ॥ दृष्ट्वा फलस्य नापश्यद्दोषान्

आपातुदन्यङ्गान्। विविनक्ति न शौर्यं यः सोऽन्यत्रापि कथं भवेत् ॥ १७ ॥ संहिताध्ययनं कुर्वन्मम गुरुकुले च यः। भैक्षमुत्-सृष्टमन्येषां भुङ्क्ते स्म च यदा तदा ॥ १८ ॥ कीर्त्तयन् गुणमज्ञा-नामहत्वी च पुनः पुनः। तं वै फल्गार्थिनं मन्ये भ्रातरं तर्क-चक्षुषा ॥ १९ ॥ तँ वै गच्छस्व नृपतेः स त्वां संयाजयिष्यति। जुगुप्समानो नृपतिर्मनसेदं विचिन्तयन् ॥ २० ॥ उपयाजवचः श्रुत्वा याजस्त्वाश्रममभ्यगात्। ऋत्विग्भिः पूज्य पूजार्हमथ याजमुवाच ह ॥ २१ ॥ क्रतूनां दक्षाष्टौ नवां याजयेमां विभो। द्रोण-वैराभिसन्तप्तं प्रह्लादयितुमर्हसि ॥ २२ ॥ स हि ब्रह्मविदां श्रेष्ठो ब्रह्मास्त्रे चाप्यनुत्तमः। तस्मात् द्रोणः पराजैषीन्मां वै सख्युः विग्रहे ॥ २३ ॥ क्षत्रियो नास्ति तत्राहं दृष्टिव्यां क्वचिदग्रणीः। कौरवाचार्य मुख्यस्य भारद्वाजस्य धीमतः ॥ २४ ॥ द्रोणस्य शर-जालानि प्राणिदेहहराणि च। षड्रत्नि धनुषोऽस्यन्ते परमं महत् ॥ २५ ॥ स हि ब्राह्मणवेगेन क्षत्रं वेगमसंशयम्। प्रति-हन्ति महेष्वासो भारद्वाजो महामनाः ॥ २६ ॥ क्षत्रोच्छेदाय विहितो जामदग्न्य इवास्थितः। तस्य ह्यस्त्रबलं घोरमप्रधृष्यं नरैर्भुवि ॥ २७ ॥ ब्राह्मं सम्भारसंभारो ज्वलाङ्गतिरिवानलः। समेत्य स दहत्याजौ क्षात्रधर्मपुरःसरः ॥ २८ ॥ ब्रह्मचक्रे च विहिते ब्राह्मं तेजो विशिष्यते। सोऽहं क्षात्राद्बलाद्धीतो ब्राह्मं तेजः प्रवेदिवान् ॥ २९ ॥ द्रोणाद्विशिष्टमासाद्य भवन्तं ब्रह्म-वित्तमम्। द्रोणान्तकमहं पुत्रं लभेयं युधि दुर्जयम् ॥ ३० ॥ तत्कर्म कुरु मे याज वितरार्च्यर्बुदं गवाम्। तथेत्युक्त्वा तु तं याजो याज्यार्थमुपकल्पयत् ॥ ३१ ॥ कुर्वर्थ इति चाकामम्प-याजमचोदयत्। याजो द्रोणविनाशाय प्रतिजज्ञे तथा च सः ॥ ३२ ॥ ततस्तस्य नरेन्द्रस्य उपयाजो महातपाः। आचख्यौ कर्म वैतानं तदा पुत्रफलाय वै ॥ ३३ ॥ स च पुत्रो यज्ञवीर्य्यो

महातेजा महाबलः। इष्यते यद्विधो राजन् भविता ते तथाविधः॥ ३४॥ भारद्वाजस्य हन्तारं सोऽभिमन्याय भूपतिः। आजह्रे तत्तथा सर्वं द्रुपदः कर्मसिद्धये॥ ३५॥ याजस्तु हवनस्यान्ते देवीमाज्ञापयत्तदा। प्रेहि मां राज्ञि वृणुते मिथुनं त्वामुपस्थितम्॥ ३६॥

राज्ञ्युवाच। अत्रस्थितं सुखं ब्रह्मन् दिव्यान् गन्धान्बिभर्मि च। सुतार्थे नोपलब्धास्मि तिष्ठ याज मम प्रिये॥ ३७॥

याज उवाच। याजेन यजितं हव्यमुपयाजाभिमन्त्रितम्। कथं कामं न सन्दध्यात्मा त्वं विप्रेहि तिष्ठ वा॥ ३८॥

ब्राह्मण उवाच। एवमुक्ता तु याजेन ऋते हविषि सत्कृते। उत्तस्थौ पावकात्तस्मात् कुमारो देवसन्निभः॥ ३९॥ ज्वालावर्णो घोररूपः किरीटी वर्म चोत्तमम्। बिभ्रत्खड्गः सशरो धनुष्मान् विनदन्मुहुः॥ ४०॥ सोऽध्यारोहद्रथवरं तेन च प्रययौ तदा। ततः प्रणेदुः पाञ्चालाः प्रहृष्टाः साधुसाध्विति॥ ४१॥ हर्षाविष्टांस्ततश्चैतान्वेद्यं वेहे वसुन्धरा। अथापश्यो राजपुत्रः पाञ्चालानां यशस्करः॥ ४२॥ राज्ञः शोकापहो जात एष द्रोणवधाय वै। इत्युवाच महद्भूतमदृश्यं खेचरं तदा॥ ४३॥ कुमारी चापि पाञ्चाली वेदीमध्यात्समुत्थिता। सुभगा दर्शनीयाङ्गी खसितायतलोचना॥ ४४॥ श्यामा पद्मपलाशाक्षी नीलकुञ्चितमूर्धजा। ताम्रतुङ्गनखी सुभ्रूरुपीनपयोधरा॥ ४५॥ मानुषं विग्रहं कृत्वा साक्षादमरवर्णिनी। नीलोत्पलसमो गन्धो यस्याः क्रोशात् प्रधावति॥ ४६॥ या बिभर्ति परं रूपं यस्या नास्त्युपमा भुवि। देवदानवयक्षाणामीप्सितां देवरूपिणीम्॥ ४७॥ तां चापि जातां सुश्रोणीं वागुवाचाशरीरिणी। सर्वयोषिद्वरा कृष्णा निनीषुः क्षत्रियान् क्षयम्॥ ४८॥ सुरकार्यमियं काले करिष्यति सुमध्यमा। अस्या हेतोः कौरवाणां महदुत्पत्स्यते

भयम् ॥ ४९ ॥ तच्छ्रुत्वा सर्वपाञ्चालाः प्रणेदुः सिंहसंघवत्। न चैतान् हर्षसम्पूर्णानियं वेद वसुन्धरा ॥ ५० ॥ तौ दृष्ट्वा पार्षती याज्ञं प्रपेदे वै सुताधिनी। न वै मदन्यां जननीं जानीयातामिमाविति ॥ ५१ ॥ तयेत्युवाच तां याजो राज्ञः प्रियचिकीर्षया। तयोश्च नामनी चक्रुर्द्विजाः सम्पूर्णमानसाः ॥ ५२ ॥ धृष्टत्वादतिधृष्णत्वाद्युम्नाद्युत्सम्भवादपि। धृष्टद्युम्नः कुमारोऽयं द्रुपदस्य भवत्विति ॥ ५३ ॥ क्षणे त्वेवाब्रुवन् कृष्णां कृष्णा भूता हि वर्णतः। तया तस्मिन्युवं जज्ञे द्रुपदस्य महामखे ॥ ५४ ॥ धृष्टद्युम्नस्तु पाञ्चाल्यमानीय स्वं निवेशनम्। उपाकरोदस्त्रहेतोरग्रहाजः प्रतापवान् ॥ ५५ ॥ अमोघत्वं दैवं हि भावि मत्वा महामतिः। तथा तत् कृतवान्द्रोण आत्मकीर्त्यनुरक्षणात् ॥ ५६ ॥

इत्यादिपर्वणि चैत्ररथपर्वणि जनमेजयाधिक्रमे शतोऽध्यायः ॥ १६९ ॥

---०:०---

वैशम्पायन उवाच। एतच्छ्रुत्वा तु कौन्तेयाः प्रह्लादित्वा इवाभवन्। सर्वे चास्यमनसो बभूवुस्ते महाबलाः ॥ १ ॥ ततः कुन्ती सुतान्दृष्ट्वा सर्वांस्तुष्टतचेतसः। युधिष्ठिरमुवाचेदं वचनं सत्यवादिनी ॥ २ ॥

कुन्युवाच। चिररात्रोषिताः स्मेह ब्राह्मणस्य निवेशने। रममाणाः पुरे रम्ये लब्धभैक्षा महात्मनः ॥ ३ ॥ यानीह रमणीयानि वनान्युपवनानि च। सर्वाणि तानि दृष्टानि पुनः पुनरिरिन्दम ॥ ४ ॥ पुनर्द्रष्टुं हि तानीह प्रीणयन्ति न नस्तथा। भैक्षञ्च न तथा वीर लभ्यते कुरुनन्दन ॥ ५ ॥ ते वयं साधु पाञ्चालान् गच्छाम यदि मन्यसे। अपूर्वदर्शनं वीर रमणीयं भविष्यति ॥ ६ ॥ सुभिक्षाश्चैव पाञ्चालाः; भूयन्ते शत्रुकर्षण।

यज्ञसेनश्च राजासौ ब्रह्मण्य इति श्रुतम ॥ ७ ॥ एकत्र चिरवासश्च चमो न च मतो मम। ते तत्र साधु गच्छामो यदि त्वं पुत्र मन्यसे ॥ ८ ॥

युधिष्ठिर उवाच। भवत्या यत्कृतं कार्य्यं तदस्माकं परं हितम्। अनुजांस्तु न जानामि गच्छेयुर्नेति वा पुनः ॥ ९ ॥

वैशम्पायन उवाच। ततः कुन्ती भीमसेनमर्जुनं यमजौ तथा। उवाच गमनं ते च तथेत्येवाब्रुवंस्तदा ॥ १० ॥ तत आमन्त्र्य तं विप्रं कुन्ती राजन् सुतैः सह। प्रतस्थे नगरीं रम्यां द्रुपदस्य महात्मनः ॥ ११ ॥

इत्यादिपर्वणि चैत्ररथपर्वणि पाञ्चालदेशयात्रायां सप्तत्यधिकशततोऽध्यायः ॥१७०॥

—०:०—

वैशम्पायन उवाच। वसत्सु तेषु प्रच्छन्नं पाण्डवेषु महात्मसु। आजगामाथ तान्द्रष्टुं व्यासः सत्यवतीसुतः ॥ १ ॥ तमागतमभिप्रेत्य प्रत्युद्गम्य परन्तपाः। प्रणिपत्याभिवाद्यैनं तस्थुः प्राञ्जलयस्तदा ॥ २ ॥ समनुज्ञाप्य तान् सर्वानासीनान्मुनिरब्रवीत्। प्रच्छन्नं पूजितः पार्थैः प्रीतिपूर्वमिदं वचः ॥ ३ ॥ अचिरेणैव वर्त्स्यध्वं शास्त्रेण च परन्तपाः। अचिरेषु पूजा वः पूजार्हेषु न हीयते ॥ ४ ॥ अथ धर्मार्थवद्वाक्यमुक्त्वा स भगवानृषिः। विचित्राश्च कथास्तासाः पुनरेवेदमब्रवीत् ॥ ५ ॥

व्यास उवाच। आसीत्पुरोवने काचिद्दृषेः कन्या महात्मनः। विलग्नमध्या सुश्रोणी सुभ्रूः सर्वगुणान्विता ॥ ६ ॥ कर्मभिः स्वैस्तैः सा तु दुर्भगा समपद्यत। नाध्यगच्छत् पतिं सा तु कन्या रूपवती सती ॥ ७ ॥ तपस्तप्तुमथारेभे पत्यर्थमनुखा ततः। तोषयामास तपसा सा किलोग्रेण शङ्करम् ॥ ८ ॥ तस्याः स

भगवांस्तुष्टस्तामुवाच यशस्विनीम् । वरं वरय भद्रं ते वरदोऽस्मीति शङ्करः ॥ ९ ॥ अथेश्वरमुवाचेदमालक्ष्य; सा वचो हितम् । पतिं सर्वगुणोपेतमिच्छामीति पुनः पुनः ॥ १० ॥ तामथ प्रत्युवाचेदमीशानो वदतां वरः । यच्च ते मनसो भद्रे भविष्यतीति भारता: ॥ ११ ॥ एवमुक्ता ततः कन्या देवं वरदमब्रवीत् । एकमिच्छाम्यहं देव त्वत्प्रसादात्पतिं प्रभो ॥ १२ ॥ पुनरेवाब्रवीद्देव इदं वचनमुत्तमम् । पञ्चकृत्वस्त्वया प्रोक्तः पतिं देहीत्यहं पुनः ॥ १३ ॥ देहमन्यङ्गतायास्ते यथोक्तं तद्भविष्यति । द्रुपदस्य कुले जज्ञे सा कन्या देवरूपिणी । निर्दिष्टा भवतां पत्नी कृष्णा पार्षत्यनिन्दिता ॥ १४ ॥ पाञ्चालनगरे तस्मान्निवसध्वं महाबला: । सुखिनस्तामनुप्राप्य भविष्यथ न संशय: ॥ १५ ॥ एवमुक्त्वा महाभाग: पाण्डवान् स पितामह: । पार्थानामन्त्र्य कुन्तीञ्च प्रातिष्ठत महातपा: ॥ १६ ॥

इत्यादिपर्वणि चैत्ररथपर्वणि एकसप्तत्यधिकशततमोऽध्याय: ॥ १७१ ॥

वैशम्पायन उवाच । गते भगवति व्यासे पाण्डवा हृष्टमानसा: । ते प्रतस्थु: पुरस्कृत्य मातरं पृथुवर्षभा: ॥ १ ॥ रथैरादित्यसङ्काशैर्गजैश्चोद्दिष्टं परन्तपा: । ते त्वगच्छन्नहोरात्रात्तीर्थं सोमाश्रयायणम् ॥ २ ॥ आवेदयन्पुरुषवाजा गङ्गायां पाण्डुनन्दना: । ऊर्ध्वमुत्सृज्य सलिलं तेषामग्रे धनञ्जय: । प्रकाशार्थं ययौ तत्र रक्षार्थञ्च महारथ: ॥ ३ ॥ तत्र गङ्गाजले रम्ये विविक्ते क्रीडयन् स्त्रिय: । ईयुर्गन्धर्वराजो वै जलक्रीडामुपागत: ॥ ४ ॥ शब्दं तेषां स शुश्राव नदीं समुपसर्पताम् । तेन शब्देन चाविष्टश्चुक्रोध बलवद्बली ॥ ५ ॥ स दृष्ट्वा पाण्डवांस्तत्र सह मात्रा पर-

न्तपान् । विस्फारयन्धनुर्घोरमिदं वचनमब्रवीत् ॥ ६ ॥ सन्ध्या संरज्यते घोरा पूर्वरात्रागमेषु या । अशीतिभिर्लवैर्हीनं तन्मुहूर्त्तं प्रचक्षते ॥ ७ ॥ विहितं कामचाराणां यक्षगन्धर्वरक्षसाम् । शेषमन्यन्मनुष्याणां कर्मचारेषु वै स्मृतम् ॥ ८ ॥ लोभात् प्रचारं चरतस्तानु वेलासु वै नरान् । उपक्रान्तान्निगृह्णीमो राक्षसैः सह बालिशान् ॥ ९ ॥ अतो रात्रौ प्राप्नुवतो जलं ब्रह्मविदो जनाः । सर्हयन्ति नरान् सर्वान् बलस्थान्नपतीनपि ॥ १० ॥ आरात्तिष्ठत मा मह्यं समीपमुपसर्पत । कस्मान्मां नाभिजानीत प्राप्तं भागीरथीजलम् ॥ ११ ॥ अङ्गारपर्णं गन्धर्वं वित्त मां स्वबलाश्रयम् । अहं हि मानी चेषुश्च कुबेरस्य प्रियः सखा ॥ १२ ॥ अङ्गारपर्णमित्येवं ख्यातं चेदं वनं मम । अनुगङ्गां चरन् कामांश्चित्रं यत्र रमाम्यहम् ॥ १३ ॥ न कौरवाः स्मृद्धिमन्तो वा न देवा न च मानुषाः । इदं समुपसर्पन्ति तत्किं समुपसर्पथ ॥ १४ ॥

अर्जुन उवाच । समुद्रे हिमवत्पार्श्वे नद्यामस्यां च दुर्मते । रात्रावहनि सन्ध्यायां कस्य सुप्तः परिग्रहः ॥ १५ ॥ भुक्तो वाप्यथ वाभुक्तो रात्रावहनि खेचर । न कालनियमो ह्यस्ति गङ्गां प्राप्य सरिद्वराम् ॥ १६ ॥ वयञ्च शक्तिसम्पन्ना अकाले त्वामधृष्णुम । अयुक्ता हि रणे क्रूर युध्यानर्चन्ति मानवाः ॥ १७ ॥ पुरा हिमवतश्चैषा हेमशृङ्गाद्विनिःसृता । गङ्गा गत्वा समुद्रान्तः सप्तधा समपद्यत ॥ १८ ॥ गङ्गाञ्च यमुनाञ्चैव ब्रह्मजातां सरस्वतीम् । रथस्यां सरयूञ्चैव गोमतीं गण्डकीं तथा ॥ १९ ॥ अपर्ब्बुपितपापास्ते नदीः सप्त पिबन्ति ये । इयं भूत्वा चैकविधा शुचिराकाशगा पुनः । देवेषु गङ्गा गन्धर्व प्राप्नोत्यलकनन्दताम् ॥ २० ॥ तथा पितॄन् वैतरणी दुस्तरा पापकर्मभिः । गङ्गा भवति वै प्राप्य कृष्णद्वैपायनोऽब्रवीत् ॥ २१ ॥ असम्बाधा देवनदी स्वर्गसम्पादनी शुभा । कथमिच्छसि तां रोद्धुं नैष धर्मः सनातनः

॥ २२ ॥ अनिवार्य्यमसह्यार्धं तव वाचा कथं वयम् । न सृजेम यथाकामं पुरुषं भागीरथीजलम् ॥ २३ ॥

वैशम्पायन उवाच । अङ्गारपर्णस्तच्छ्रुत्वा क्रुद्ध आयस्य कार्मुकम् । सुमोच वाणान्निशितानहीनाशीविषानिव ॥ २४ ॥ उल्मुकं ज्वलयंस्तूर्णं पाण्डवस्यर्थ चोत्तमम् । व्यपोहत शरांस्तस्य सर्वानेव धनञ्जयः ॥ २५ ॥

अर्जुन उवाच । विभीषिका वै गन्धर्व नास्त्रज्ञेषु प्रयुज्यते । अस्त्रज्ञेषु प्रयुक्तेयं क्षेत्रवत् प्रविलीयते ॥ २६ ॥ मानुषानतिगन्धर्वान् सर्वान् गन्धर्व लक्षये । तस्मादस्त्रेण दिव्येन योत्स्येऽहं न तु मायया ॥ २७ ॥ पुरास्त्रमिदमाग्नेयं प्रादात्किल बृहस्पतिः । भरद्वाजाय गन्धर्व गुरुर्मान्यः शतक्रतोः ॥ २८ ॥ भरद्वाजादग्निवेश्य अग्निवेश्याच्च कर्मम । साध्विदं मन्त्रमदद्द्रोणो ब्राह्मणसत्तमः ॥ २९ ॥

वैशम्पायन उवाच । इत्युक्त्वा पाण्डवः क्रुद्धो गन्धर्वाय मुमोच ह । प्रदीप्तमस्त्रमाग्नेयं ददाहास्य रथन्तु तत् ॥ ३० ॥ विरथं विह्वलं तन्तु स गन्धर्वं महाबलम् । अस्त्रतेजःप्रमूढञ्च प्रपतन्तमवाङ्मुखम् ॥ ३१ ॥ शिरोरुहेषु जग्राह माल्यवत्सु धनञ्जयः । भ्रातुः प्रतिचकर्षाथ सोऽस्त्रपातादचेतसम् ॥ ३२ ॥ युधिष्ठिरं तस्य भार्य्या प्रपेदे शरणार्थिनी । नाम्ना कुम्भीनसी नाम पतित्राणमभीप्सती ॥ ३३ ॥

गन्धर्व्युवाच । त्रायस्व मां महाभाग पतिं चेमं विमुञ्च मे । गन्धर्वी शरणं प्राप्ता नाम्ना कुम्भीनसी प्रभो ॥ ३४ ॥

युधिष्ठिर उवाच । युद्धे जितं यशोहीनं स्त्रीनाथमपराक्रमम् । को निहन्याद्दिषुं तात मुञ्चैनं रिपुसूदन ॥ ३५ ॥

अर्जुन उवाच । जीवितं प्रतिपद्यस्व गच्छ गन्धर्व मामुतः । प्रदिष्टमयमस्माभिः कुरुराजो युधिष्ठिरः ॥ ३६ ॥

गन्धर्व उवाच । जितोऽहं पूर्वकं नाम सुश्राव्यङ्गारपर्णतात् । न च श्राधे बलेनाङ्ग न नाम्ना जनसंसदि ॥ ३७ ॥ साध्विदं लब्धवांल्लाभं योऽहं दिव्यास्त्रधारिणम् । गान्धर्व्या मायया इच्छामि संयोजयितुमर्जुनम् ॥ ३८ ॥ अग्न्याभिना विचित्रोऽयं दग्धो मे रथ उत्तमः । सोऽहं चित्ररथो भूत्वा नाम्ना दग्धरथोऽभवम् ॥ ३९ ॥ मन्त्रेणा चैव विद्येयं तपसेह मया पुरा । निवेदयिष्ये तामद्य प्राणदाय महात्मने ॥ ४० ॥ संलभ्यित्वा तरसा जितं शरणमागतम् । यो रिपुं योजयेत् प्राप्तैः कल्याणं किं न सोऽर्हति ॥ ४१ ॥ चाक्षुषी नाम विद्येयं यां सोमाय ददौ मनुः । ददौ स विश्वावसवे मम विश्वावसुर्ददौ ॥ ४२ ॥ येयं कापुरुषं प्राप्ता गुरुदत्ता प्रणश्यति । आगमोऽस्या मया प्रोक्तो वीर्यं प्रति निबोध मे ॥ ४३ ॥ यच्चक्षुषा द्रष्टुमिच्छेत्त्रिषु लोकेषु किञ्चन । तत्तत्पश्येदहं चेदेत्ताहर्यं द्रष्टुमर्हति ॥ ४४ ॥ एकपादेन यस्मात्त्वान् स्थितो विद्यां लभेदिमाम् । अतस्तेभ्यस्त्वहं विद्यां स्वयं तुभ्यं व्रतेऽक्षते ॥ ४५ ॥ विद्यया स्वनया राजन्वयं मुख्यो विशेषिताः । अविशिष्टाश्च देवानामलुभाग्रहर्षिणः ॥४६॥ गन्धर्वजानामज्ञाना-महं पुरुषसत्तम । ज्ञात्वभ्यस्त्व तुभ्यञ्च पृथग्दाता शतं शतम् ॥ ४७ ॥ देवगन्धर्ववाहास्ते दिव्यवर्णा मनोजवाः । क्षीणाक्षीणा भवन्त्येते न क्षीयन्ते च रंहसः ॥४८॥ पुरा शतं महेन्द्रस्य वज्रं हत्वनिवर्हणम् । दधीचा शतशा चैव तच्छीर्णं हतमूर्जनि ॥ ४९ ॥ ततो भागीकृतो देवैर्वज्रभागत्वमास्थिते । लोके यशोधनं किञ्चित्सा वै वज्रतनुः स्मृता ॥५०॥ वज्रनाभिर्नीलाभः स्यात् चलं वज्ररयं स्मृतम् । वैश्या वै हरितवज्राश्च कर्मवज्रा यवीयसः ॥ ५१ ॥ चलं वज्रस्य भागेन अवध्या वाजिनः स्मृताः । रथाङ्गं वडवा स्मृते शूरा-स्याश्वेषु ये मताः ॥ ५२ ॥ हरिवर्णाः कामजवाः कामतः सप्तधा स्थिताः । इति गन्धर्वजाः प्रोक्ता पूरयिष्यसि मे वयाः ॥ ५३ ॥

अर्जुन उवाच । यदि प्रीतेन मे दत्तं संशये जीवितस्य वा । विद्याधनं श्रुतं वापि न तन्मन्यै रोचये ॥ ५४ ॥

गन्धर्व उवाच । संयोगो वै प्रीतिकरो मनुष्येषु प्रतिदृश्यते । जीवितस्य प्रदानेन प्रीतो विद्यां ददामि ते ॥ ५५ ॥ त्वत्तोऽप्यहं ग्रहीष्यामि वज्रमाग्नेयमुत्तमम् । तथैव योग्यं वीभत्सो चिराय भरतर्षभ ॥ ५६ ॥

अर्जुन उवाच । त्वत्तोऽस्त्रेषु हृणीय्यज्ञान् संयोगः शाश्वतोऽस्तु नौ । सख्ये तद्ब्रूहि गन्धर्व युष्मभ्यो यद्भयं भवेत् ॥ ५७ ॥ कारणं ब्रूहि गन्धर्व किं तथ्येन च धर्षिताः । यास्तो वेदविदः सर्वे सन्तो राज्ञावरिन्दमाः ॥ ५८ ॥

गन्धर्व उवाच । अभग्नयोऽनाहुतयो न च विप्रपुरस्कृताः । यूयं ततो धर्षिताः स्थ मया वै पाण्डुनन्दनाः ॥ ५९ ॥ यच्च राक्षसगन्धर्वाः पिशाचोरगदानवाः । विहारं कुरुवंश्यस्य धीमन्तः कथयन्ति ते ॥ ६० ॥ नारदप्रभृतीनान्तु देवर्षीणां मया श्रुतम् । गुणान् कथयतां वीर पूर्वेषां तव धीमताम् ॥ ६१ ॥ स्वयं चापि मया दृष्टस्वरता सागराम्बराम् । इमां वसुमतीं कृत्स्नां प्रभावः सुकृतस्य ते ॥ ६२ ॥ वेदे धनुषि चाचार्यमभिजानामि तेऽर्जुन । विश्रुतं त्रिषु लोकेषु भारद्वाजं यशस्विनम् ॥ ६३ ॥ धर्मं वायुञ्च शक्रञ्च विजानाम्यश्विना तथा । पाण्डुञ्च कुरुशार्दूलं षड्वेतान् कुरुवर्धनान् । पितृनेतानहं पार्थ देवमानुषसत्तमान् ॥ ६४ ॥ दिव्यात्मानो महात्मानः सर्वशस्त्रभृतांवराः । भवन्तो भ्रातरः शूराः सर्वे सुचरितव्रताः ॥ ६५ ॥ उत्तमाञ्च मनोबुद्धिं भवतां भावितात्मनाम् । जानन्नपि च वः पार्थ श्रुतवानिह धर्षणम् ॥ ६६ ॥ क्षीरकाले च क्षीरार्थ न पुमान् हन्तुमर्हति । धर्षणामात्मनः पश्यन् वाल्ऽद्रविणमाश्रितः ॥ ६७ ॥ नक्तञ्च बलमास्थाय भूय एवाभिवर्धते । यतस्ततो मां क्षौन्तेय सदारं गन्धुराविशत्

॥ ६८ ॥ सोऽहं त्वयेह विजितः संख्ये तापत्यवर्द्धन। येन तेनेह विधिना कौरव्यमाजं निबोध मे ॥ ६९ ॥ ब्रह्मचर्य्यं परो धर्मः स चापि नियतस्त्वयि। यस्मात्तस्मादहं पार्थ रक्षोऽस्मि विजितस्त्वया ॥ ७० ॥ यस्तु स्यात् क्षत्रियः कश्चिल्लाभमुक्तः परन्तप। भक्षयेद्वधि युञ्जेत न स जीवेत्त्वयेव न ॥ ७१ ॥ यस्तु स्यात्लाभमुक्तोऽपि पार्थ ब्रह्मपुरस्कृतः। जयेत्सकलवरान् सर्वान् सपुरोहितबान्धवः ॥ ७२ ॥ तस्मात्तापत्य यत्किञ्चिद्भवां श्रेयं दृष्टेप्सितम्। तस्मिन् कर्मणि योक्तव्या दान्तालाभः पुरोहिताः ॥ ७३ ॥ वेदे षडङ्गे निरताः शुचयः सत्यवादिनः। धर्मालाभः तताभाः स्युर्नृपाणां पुरोहिताः ॥ ७४ ॥ जयश्च नियतो राज्ञः स्वर्गश्च तदनन्तरम्। यस्य स्याद्धर्मविद्वाग्मी पुरोधाः शीलवान् शुचि ॥ ७५ ॥ लाभं लब्धुमलब्धं वा लब्धं वा परिरक्षितुम्। पुरोहितं प्रकुर्वीत राजा गुणसमन्वितम् ॥ ७६ ॥ पुरोहितमते तिष्ठेद्य दुच्छेद्भूतिमाप्नुयात्। प्राप्तुं वसुमतीं सर्वां सर्वज्ञः सागराम्बराम् ॥ ७७ ॥ न हि केवलयौर्य्येण तापत्याभिजनेन च। जयेद्ब्राह्मणः कश्चिद्भूमिं भूमिपतिः क्वचित् ॥ ७८ ॥ तस्मादेवं विजानीहि कुरूणां वंशवर्द्धन। ब्राह्मणप्रमुखं राज्यं सक्यं पालयितुं चिरम् ॥ ७९ ॥

इत्यादिपर्वणि चैत्ररथपर्वणि गन्धर्वराज्ये द्विसप्तत्यधिकशततोऽध्यायः ॥ १७२ ॥

अर्जुन उवाच। तापत्य इति यद्वाक्यमुक्तवानसि मामिह। तदहं ज्ञातुमिच्छामि तापत्यार्थविनिश्चयम् ॥ १ ॥ तपती नाम का चैषा तापत्या यत्सुते वयम्। कौन्तेया हि वयं साधो तत्त्वमिच्छामि वेदितुम् ॥ २ ॥

वैशम्पायन उवाच। एवमुक्तः स गन्धर्वः कुन्तीपुत्रं धनञ्जयम्। विश्रुतां त्रिषु लोकेषु आवयामास वै कथाम् ॥ ३ ॥

गन्धर्व उवाच। शृणु ते कथयिष्यामि कथामेतां मनोरमाम्। यथावद्दक्षिणां पार्थ सर्वसुहृदितां वर ॥ ४ ॥ उक्तवानस्मि येन त्वां तापत्य इति यद्वचः। तत्तेऽहं कथयिष्यामि शृणुष्वैकमना भव ॥ ५ ॥ य एष दिवि विख्यैन नाकं व्याप्नोति तेजसा। एतस्य तपती नाम बभूव सदृशी सुता ॥ ६ ॥ विवस्वतो वै देवस्य सावित्र्यावरजा विभो। त्रिषु तेषु तपती तपसा सुता ॥ ७ ॥ न देवी नासुरी चैव न यक्षी न च राक्षसी। नाप्सरा न च गन्धर्वी तथा रूपेण काचन ॥ ८ ॥ सुविभक्तानवद्याङ्गी सुसितायतलोचना। सुकेशा चैव साध्वी च सुवेषा चैव भामिनी ॥ ९ ॥ न तस्याः सदृशं त्रिष्वपि लोकेषु भारत। भर्तारं सविता ज्ञेने रूपशीलगुणश्रुतैः ॥ १० ॥ सम्प्राप्तयौवनां पश्यन्नेयां दुहितरन्तु ताम्। नोपलेभे ततः शान्तिं सम्प्रदानं विचिन्तयन् ॥ ११ ॥ अथर्क्षपुत्रः कौन्तेय कुरुणामृषभो बली। सूर्यमाराधयामास नृपः सम्वरणस्तदा ॥ १२ ॥ अर्घ्यमाल्योपहारार्हैर्गन्धैश्च नियतः शुचिः। नियमैरुपवासैश्च तपोभिर्विविधैरपि ॥ १३ ॥ शुश्रूषुरनहंवादी शुचिः पौरवनन्दनः। अंशुमन्तं समुद्यन्तं पूजयामास भक्तिमान् ॥ १४ ॥ ततः शतक्रतुं धर्मज्ञं रूपेणासदृशं भुवि। तपत्याः सदृशं मेने सूर्यः सम्वरणं पतिम् ॥ १५ ॥ दातुमैच्छत्ततः कन्यां तस्मै सम्वरणाय ताम्। नृपोत्तमाय कौरव्य विश्रुताभिजनाय च ॥ १६ ॥ यथा हि दिवि हीप्तांशुः प्रभासयति तेजसा। तथा भुवि महीपालो हीप्तया सम्वरणोऽभवत् ॥ १७ ॥ यथार्चयन्ति चादित्यमुद्यन्तं ब्रह्मवादिनः। तथा सम्वरणं पार्थ ब्राह्मणावरजाः प्रजाः ॥ १८ ॥ स सोममतिक्रान्तत्वादादित्यमतितेजसा। बभूव नृपतिः

श्रीमान् सुहृदां दुर्हृदामपि ॥ १९ ॥ एवं गुणस्य नृपतेस्तया-
हृत्तस्य कौरव। तस्यै हातुं मनश्चक्रे तपतीं तपनः स्वयम् ॥२०॥
स कदाचिद्दयो राजा श्रीमानमितविक्रमः। चचार मृगयां पार्थ
पर्वतोपवने किल ॥ २१ ॥ चरतो मृगयां तस्य क्षुत्पिपासा-
समन्वितः। ममार राज्ञः कौन्तेय गिरावप्रतिमो हयः ॥ २२ ॥
स तमाश्ववरन् पार्थ पद्भ्यामेव गिरौ नृपः। ददर्शासदृशीं
लोके कन्यामायतलोचनाम् ॥ २३ ॥ स एक एकामासाद्य कन्यां
मरवरार्हणः। तस्थौ नृपतिशार्दूलः पश्यन्निर्विचलेक्षणः ॥ २४ ॥
स हि तां तर्कयामास रूपतो नृपतिः श्रियम्। पुनः सन्तर्कया-
मास रवेर्भेष्टामिव प्रभाम् ॥ २५ ॥ वपुषा वर्चसा चैव शिखा-
मिव विभावसोः। प्रसन्नत्वे च कान्त्या च चन्द्ररेखामिवामलाम्
॥२६॥ गिरिपृष्ठे तु सा यस्मिन् स्थिता सस्मितलोचना। विभ्राज-
माना ह्युषभे प्रतिमेव हिरण्मयी ॥ २७ ॥ तस्या रूपेण स
गिरिर्वेषेण च विशेषतः। स सहस्रांशुपयतो हिरण्मय इवाभवत्
॥ २८ ॥ अवतीर्णे च तां दृष्ट्वा सर्वलोकेषु योषितः। अवाप्तं
चाजनो मेने स राजा चक्षुषः फलम् ॥ २९ ॥ जन्मप्रभृति यत्-
किञ्चिद्दृष्टवान् स महीपतिः। रूपं न सदृशं तस्यास्तर्कयामास
किञ्चन ॥ ३० ॥ अस्या नूनं विधात्राद्या; सदेवासुरमानुषम्।
लोकं निर्मथ्य धात्रेदं रूपमाविष्कृतं कृतम् ॥ ३१ ॥ एवं सञ्च-
र्कयामास रूपद्रविणसम्पदा। कन्यामसदृशीं लोके नृपः सञ्च-
रन्यदा ॥ ३२ ॥ तां तु दृष्ट्वैव कल्याणीं कल्याणाभिजनो नृपः।
जगाम मनसा चिन्तां कामबाणेन पीडितः ॥ ३३ ॥ दह्यमानः
स तीव्रेण नृपतिर्मन्मथाग्निना। अप्रगल्भां प्रगल्भस्तां तदो-
वाच मनोहराम् ॥ ३४ ॥ कासि कस्यासि रम्भोरु किमर्थं चेह
तिष्ठसि। कथञ्च निर्जनेऽरण्ये चरस्येका शुचिस्मिते ॥ ३५ ॥
त्वं हि सर्वानवद्याङ्गी सर्वाभरणभूषिता। विभूषणमिवैतेषां

अप्सरासामभीप्सितम् ॥ ३६ ॥ न देवीं नासुरीं चैव न यक्षीं न च राक्षसीम् । न च भोगवतीं मन्ये न गन्धर्वीं न मानुषीम् ॥ ३७ ॥ या हि दृष्टा मया काश्चिच्छुता वापि वराङ्गनाः । न तासां सदृशीं मन्ये त्वामहं भद्रकामिनि ॥ ३८ ॥ दृष्ट्वैव चारु वदने चन्द्रात्कान्ततरं तव । वदनं पद्मपत्राक्षं मां मथ्नातीव मन्मथः ॥ ३९ ॥ एवं तां स महीपाल्यो बभाषे न तु सा तदा । कामार्त्तं निर्जनेऽरण्ये प्रत्यभाषत किञ्चन ॥ ४० ॥ ततो लाल्यमानस्य पार्थिवस्यायतेक्षणा । सौदामिनीव चाभ्रेषु तत्रैवान्तरधीयत ॥ ४१ ॥ तामन्वेष्टुं स नृपतिः परिचक्राम सर्वतः । वनं वनजपत्राक्ष्यो भ्रमन्नुन्मत्तवत्तदा ॥ ४२ ॥ अपश्यमानः स तु तां बभ्रे तत्र विलप्य च । निश्चेष्टः पार्थिवश्रेष्ठो मुहूर्त्तं स व्यतिष्ठत ॥ ४३ ॥

इत्यादिपर्वणि चैत्ररथपर्वणि तपत्युपाख्याने त्रिसप्तत्यधिकशततोऽध्यायः ॥ १७३ ॥

गन्धर्व उवाच । अथ तस्यामदृश्यायां नृपतिः काममोहितः । पपात भुवि संज्ञां प्रपात धरणीतले ॥ १ ॥ तस्मिन्निपतिते भूमावथ सा चारुहासिनी । पुनः पीनायतश्रोणी दर्शयामास तं नृपम् ॥ २ ॥ अथाबभाषे कल्याणी वाचा मधुरया नृपम् । तं कुरूणां कुलकरं कामाभिहतचेतसम् ॥ ३ ॥ उवाच मधुरं वाक्यं तपती प्रहसन्निव । उत्तिष्ठोत्तिष्ठ भद्रन्ते न त्वमर्हस्यरिन्दम ॥ ४ ॥ मोहं नृपतिशार्दूल गन्तुमाविष्कृतः चितौ । एवमुक्तोऽथ नृपतिर्वाचा मधुरया तदा ॥ ५ ॥ दृष्ट्वा विपुलश्रोणीं तामेवाभिमुखे स्थिताम् । अथ तामसितापाङ्गीमब्रवीत्स पार्थिवः ॥ ६ ॥ मन्मथाग्निपरीताङ्गो सन्दिग्धाक्षरया गिरा ।

साधु त्वमसितापाङ्गि कामार्त्तं मामकाङ्गिनि ॥ ७ ॥ भजस्व भक्त-
मानं मां प्राणा हि प्रजहन्ति माम् । त्वदर्थं हि विशालाक्षि
मामयं निश्चितैः शरैः ॥ ८ ॥ कामः कमलगर्भाभे प्रति विध्यन्न
शाम्यति । दृष्टमेवमनाक्रन्दे भद्रे काममहाग्निना ॥ ९ ॥ सा
त्वं पीनायतश्रोणि मामाभुङ्क्ष्व वरानने । त्वदधीना हि मे प्राणाः
किन्नरोद्गीतभाषिणि ॥ १० ॥ चारुसर्वाङ्गवद्याङ्गि वक्त्रेन्दुप्रति-
मानने । न शक्नुयां त्वहते भीरु शक्ष्यामि खलु जीवितुम् ॥ ११ ॥
कामः कमलपत्राक्षि प्रतिविध्यति मामयम् । तस्मात् कुरु विशा-
लाक्षि मय्यनुक्रोशमङ्गने ॥ १२ ॥ भक्तं मामसितापाङ्गि न परि-
त्यक्तुमर्हसि । त्वं हि मां प्रीतियोगेन त्रातुमर्हसि भाविनि ॥ १३ ॥
त्वदर्थंनक्षतस्नेहं मनश्चरति मे भृशम् । न त्वां दृष्ट्वा पुनरन्यां
द्रष्टुं कल्याणि रोचते ॥ १४ ॥ प्रसीद वशगोऽहं ते भक्तं मां
भज भाविनि । दृष्ट्वैव त्वां वरारोहे मन्मथो भृशमङ्गने ॥ १५ ॥
अन्तर्गतं विशालाक्षि विध्यति स्म शितैः शरैः । मन्मथाग्निसमु-
द्भूतं दाहं कमललोचने ॥ १६ ॥ प्रीतिसंयोगयुक्ताभिरङ्गिः प्रच्छा-
दयस्व मे । पुष्पायुधं दुराधर्षं प्रचण्डशरकार्मुकम् ॥ १७ ॥ त्व-
दर्थंनसमुद्भूतं विध्यन्तं दुःसहैः शरैः । उपशामय कल्याणि
आत्मदानेन भाविनि ॥ १८ ॥ गान्धर्वेण विवाहेन मामुपैहि वरा-
ङ्गने । विवाहानां हि रम्भोरु गान्धर्वः श्रेष्ठ उच्यते ॥ १९ ॥

तपत्युवाच । नाहमीशात्मनो राजन् कन्या पितृमती शुभम् ।
मयि चेदस्ति ते प्रीतिर्वासस्व पितरं मम ॥ २० ॥ यथा हि ते
मया प्राणाः संगृहीता नरेश्वर । दर्शनादेव भूयस्त्वं तथा
प्राणान्ममाहरः ॥ २१ ॥ न चाहमीशा देहस्य तस्मान्नृपतिसत्तम ।
समीपं नोपगच्छामि न स्वतन्त्रा हि योषितः ॥ २२ ॥ का हि
सर्वेषु लोकेषु विश्रुताभिजनं नृपम् । कन्या नाभिलषेन्नाथं भर्तारं
भक्तवत्सलम् ॥ २३ ॥ तस्मादेव गते काले याचस्व पितरं मम ।

आदित्यं प्रणिपातेन तपसा नियमेन च ॥ २४ ॥ स चेत्कामयते दातुं तव मामरिसूदन । भविष्याम्यद्य ते राजन् सततं वश्यवर्त्तिनी ॥ २५ ॥ अहं हि तपती नाम सावित्र्यवरजा सुता । अस्य लोकप्रदीपस्य सवितुः क्षत्रियर्षभ ॥ २६

इत्यादिपर्वणि चैत्ररथपर्वणि तपत्युपाख्याने चतुःसप्तत्यधिकशततोऽध्यायः ॥ १७४ ॥

—०:०—

गन्धर्व उवाच । एवमुक्त्वा ततस्तूर्णं जगामोर्ध्वमनिन्दिता । स तु राजा पुनर्भूमौ तत्रैव निपपात ह ॥ १ ॥ अन्वेषमाणः सबलस्तं राजानं नृपोत्तमम् । अमात्यः सानुयात्रश्च तं ददर्श महावने ॥ २ ॥ क्षितौ निपतितं काले शक्राध्वजमिवोच्छ्रितम् । तं हि दृष्ट्वा महेष्वासं निरस्तं पतितं भुवि ॥ ३ ॥ बभूव सोऽस्य सचिवः संप्रदीप्त इवाग्निना । त्वरया चोपसङ्गम्य स्नेहादागतसम्भ्रमः ॥ ४ ॥ तं समुत्थापयामास नृपतिं काममोहितम् । भूतलाङ्गूमिपालेयं पितेव पतितं सुतम् ॥ ५ ॥ प्रज्ञया वयसा चैव वृद्धः कीर्त्या नयेन च । अमात्यस्तं समुत्थाप्य बभूव विगतज्वरः ॥ ६ ॥ उवाच चैनं कल्याणया वाचा मधुरयोत्थितम् । मा भैर्मनुजशार्दूल भद्रमस्तु तवानघ ॥ ७ ॥ क्षुत्पिपासापरिश्रान्तं तर्कयामास वै नृपम् । पतितं पातनं संख्ये शात्रवाणां महीतले ॥ ८ ॥ वारिणा च सुशीतेन शिरस्स्नाप्यमपेचयत् । अस्फुटन्मुकुटं राज्ञः पुण्डरीकसुगन्धिना ॥ ९ ॥ ततः प्रत्यागतप्राणस्तद्बलं बलवान्नृपः । सर्वं विसर्जयामास तमेकं सचिवं विना ॥ १० ॥ ततस्तस्याज्ञया राज्ञो विप्रतस्थे मनोबलम् । स तु राजा गिरिप्रस्थे तस्मिन् पुनरुपाविशत् ॥ ११ ॥ ततस्तस्मिन् गिरिवरे शुचिर्भूत्वा कृताञ्जलिः । आरिराधयिषुः सूर्यं तस्या-

वूर्ङ्मुखः क्षितौ ॥ १२ ॥ जगाम मनसा चैव वशिष्ठमृषिसत्तमम् । पुरोहितममित्रघ्नं तदा सम्वरणो नृपः ॥ १३ ॥ नक्तन्दिनमथैकाग्र स्थिते तस्मिन् जनाधिप । अथाजगाम विप्रर्षिस्तदा द्वादशमेऽहनि ॥ १४ ॥ स विदित्वैव नृपतिं तपत्या कृतमानसम् । दिव्येन विधिना ज्ञात्वा भावितात्मा महानृषिः ॥ १५ ॥ तया तु नियतात्मानं तं नृपं मुनिसत्तमः । आवभाषे स धर्मात्मा तस्येवार्थचिकीर्षया ॥ १६ ॥ स तस्य मनुजेन्द्रस्य पश्यतो भगवानृषिः । ऊर्ङ्माचक्रमे द्रष्टुं भास्करं भास्करद्युतिः ॥ १७ ॥ सदस्यांश्च ततो विप्रः कृताञ्जलिरुपस्थितः । वशिष्ठोऽहमिति प्रीत्या स आत्मानं न्यवेदयत् ॥ १८ ॥ तमुवाच महातेजा विवस्वान्मुनिसत्तमम् । महर्षे स्वागतं तेऽस्तु कथयस्व यथेप्सितम् ॥ १९ ॥ यद्दिच्छसि महाभाग मत्तः प्रवरतांवर । तत्ते दद्यामभिप्रेतं यद्यपि स्यात् सुदुष्करम् ॥ २० ॥ एवमुक्तः स तेनर्षिर्वशिष्ठः प्रत्यभाषत । प्रणिपत्य विवस्वन्तं भानुमन्तं महातपाः ॥ २१ ॥

वशिष्ठ उवाच । एषा ते तपती नाम सावित्र्यवरजा सुता । तां त्वां सम्वरणस्यार्थे वरयामि विभावसो ॥ २२ ॥ स हि राजा हृतत्कीर्तिर्धर्मार्थविदुदारधीः । युक्तः सम्वरणो भर्त्ता दुहितुस्ते विवस्वतम् ॥ २३ ॥ इत्युक्तः स तदा तेन ददानीत्येव निश्चितः । प्रत्यभाषत तं विप्रं प्रतिनन्द्य दिवाकरः ॥ २४ ॥ वरः सम्वरणो राज्ञां त्वद्वधूनां वरो मुने । तपती योषितां श्रेष्ठा किमन्यदपवर्जनात् ॥ २५ ॥ ततः सर्वानवद्याङ्गीं तपतीं तपनः स्वयम् । ददौ सम्वरणस्यार्थे वशिष्ठाय महात्मने ॥ २६ ॥ प्रतिजग्राह तां कन्यां महर्षिस्तपतीं तदा । वशिष्ठोऽथ विसृष्टस्तु पुनरेवाजगाम ह ॥ २७ ॥ यत्र विख्यातकीर्त्तिः स कुरूणामृषभोऽभवत् । स राजा मन्मथाविष्टस्तत्तेनान्तरात्मना ॥ २८ ॥ दृष्ट्वा च देवकन्यां तां तपतीं चारुहासिनीम् । वशिष्ठेन सहा-

शान्तौ संहृष्टोऽभ्यधिकं बभौ ॥ २८ ॥ ववृधे साधिकं सुभ्रूरापतन्ती नभस्तलात् । सौदामिनीव विभ्रष्टा द्योतयन्ती दिशस्त्विषा ॥ ३० ॥ कस्यात् द्वादशरात्रे तु तस्य राज्ञः समाहिते । आजगाम विशुद्धात्मा वशिष्ठो भगवानृषिः ॥ ३१ ॥ तपसाराध्य वरदं देवं गोपतिमीश्वरम् । लेभे सम्वरणो भार्यां वशिष्ठस्यैव तेजसा ॥ ३२ ॥ ततस्तस्मिन् गिरिश्रेष्ठे देवगन्धर्वसेविते । जग्राह विधिवत्पाणिं तपत्याः स नरर्षभः ॥ ३३ ॥ वशिष्ठेनाभ्यनुज्ञातस्तस्मिन्नेव धराधरे । सोऽकामयत राजर्षिर्विहर्तुं सह भार्यया ॥३४॥ ततः पुरे च राष्ट्रे च वनेषूपवनेषु च । आदिदेश महीपालस्तामेव सचिवं तदा ॥ ३५ ॥ कृपतिं त्वभ्यनुज्ञाप्य वशिष्ठोऽथापचक्रमे । सोऽथ राजा गिरौ तस्मिन्निजहारामरो यथा ॥ ३६ ॥ ततो द्वादशवर्षेषु काननेषु वनेषु च । रेमे तस्मिन् गिरौ राजा तयैव सह भार्यया ॥ ३७ ॥ तस्य राज्ञः पुरे तस्मिन् समा द्वादश सत्तम । न ववर्ष सहस्राक्षो राष्ट्रे चैवास्य भारत ॥३८॥ ततस्तस्यामनावृष्ट्यां प्रवृत्तायामरिन्दम । प्रजाः क्षयमुपाजग्मुः सर्वाः सस्याण्डजङ्गमाः ॥ ३९ ॥ तस्मिंस्तथाविधे काले वर्त्तमाने सुदारुणे । नावस्थायः पयातोर्व्यां ततः शस्त्राणि नाददुः ॥४०॥ ततो विभ्रान्तमनसो जनाः क्षुद्भयपीडिताः । गृहाणि सम्परित्यज्य ययुः प्रदिशो दिशः ॥ ४१ ॥ ततस्तस्मिन् पुरे राष्ट्रे त्यक्तदारपरिग्रहाः । परस्परममर्यादाः क्षुधार्त्ता जघ्निरे जनाः ॥ ४२ ॥ तत् क्षुधार्त्तैर्निराहारैः प्रभूतैस्तया नरैः । अभवत् प्रेतराजस्य पुरं प्रेतैरिवाकुलम् ॥ ४३ ॥ ततस्तु तादृशं दृष्ट्वा स एव भगवानृषिः । अभ्यपद्यत धर्मात्मा वशिष्ठो मुनिसत्तमः ॥४४॥ तच्च पार्थिवशार्दूलमानयामास तत् पुरम् । तपत्या सहितं राजन् व्युषितं द्वादशीः समाः ॥ ४५ ॥ ततः प्रविष्टस्तत्रासौ-द्यथापूर्वं सुरारिहा । तस्मिन्नृपतिशार्दूले प्रविष्टे नगरं पुनः

॥ ४६ ॥ प्रववर्ष सहस्राक्षः शस्यानि जनयन् प्रभुः। ततः सराष्ट्रं मुमुदे तत् पुरं परया मुदा। तेन पार्थिवमुख्येन भावितं भावितात्मना ॥ ४७ ॥ ततो द्वादशवर्षाणि पुनरीजे नराधिपः। तपत्या सहितः पत्न्या यथा शच्या मरुत्पतिः ॥ ४८ ॥

गन्धर्व उवाच। एवमासीन्महाभागा तपती नाम पौर्विकी। तव वैवस्वती पार्थ तापत्यत्वं यया मतः ॥ ४९ ॥ तस्यां सक्तमनायासं कुरुं संवरणो नृपः। तपत्यां तपतां श्रेष्ठ तापत्यत्वं ततोऽर्जुन ॥ ५० ॥

इत्यादिपर्वणि चैत्ररथपर्वणि तापत्ये पञ्चसप्तत्यधिकशततोऽध्यायः ॥१७५॥

—०:०—

वैशम्पायन उवाच। स गन्धर्ववचः श्रुत्वा तत्तदा भरतर्षभ। अर्जुनः परया भक्त्या पूर्णचन्द्र इवाबभौ ॥ १ ॥ उवाच च महेष्वासो गन्धर्वं कुरुसत्तमः। जातकौतूहलोऽतीव वशिष्ठस्य तपोबलात् ॥ २ ॥ वशिष्ठ इति यस्यैतद्ऋषेर्नाम त्वयेरितम्। एतदिच्छाम्यहं श्रोतुं यथावत्तद्वदस्व मे ॥ ३ ॥ य एष गन्धर्वमते पूर्वेषां नः पुरोहितः। आसीदेतन्ममाचक्ष्व क एष भगवानृषिः ॥ ४ ॥

गन्धर्व उवाच। ब्रह्मणो मानसः पुत्रो वशिष्ठोऽरुन्धतीपतिः। तपसा निर्जितो यस्मादजेयावमरैरपि ॥ ५ ॥ कामक्रोधावुभौ यस्य चरणौ संववाहतुः। यस्तु नोच्छेदनं चक्रे कुशिकानामुदारधीः ॥ ६ ॥ विश्वामित्रापराधेन धारयन्मन्युमुत्तमम्। पुत्रव्यसनसन्तप्तः शक्तिमानप्यशक्तवत् ॥ ७ ॥ विश्वामित्रविनाशाय न चक्रे कर्म दारुणम्। मृतांश्च पुनराहर्तुं यः स पुत्रान् यमक्षयात् ॥ ८ ॥ ज्ञातान्तं नातिचक्राम वेलामिव महोदधिः।

यं प्राप्य विजितात्मानं महात्मानं नराधिपाः ॥ ९ ॥ इक्ष्वाकवो महीपाला लेभिरे पृथिवीमिमाम् । पुरोहितमिमं प्राप्य वशिष्ठ-मृषिसत्तमम् ॥ १० ॥ ईजिरे क्रतुभिश्चैव नृपाणे कुरुनन्दन । स हि तान्याजयामास सर्वान्नृपतिसत्तमान् । ब्रह्मर्षिः पाण्डव-श्रेष्ठ इन्द्रस्तिरिवामरान् ॥ ११ ॥ तस्माद्धर्मप्रधानात्मा वेदधर्म-विदीप्सितः । ब्राह्मणो गुणवान् कश्चित् पुरोधाः प्रतिगृह्यताम् ॥ १२ ॥ क्षत्रियेणाभिजातेन पृथिवीं जेतुमिच्छता । पूर्वं पुरो-हितः कार्य्यः पार्थ राज्याभिवृद्धये । महीं जिगीषता राज्ञा ब्रह्म-कार्य्यं पुरःसरम् ॥१३॥ तस्मात् पुरोहितः कश्चिन्गुणवान्विजिते-न्द्रियः । विद्वान् भवतु वो विप्रो धर्मकामार्थतत्त्ववित् ॥ १४ ॥

इत्यादिपर्वणि चैत्ररथपर्वणि पुरोहितकरणकथने षट्-सप्तत्यधिकशततोऽध्यायः ॥ १७६ ॥

अर्जुन उवाच । किं निमित्तमभूद्वैरं विश्वामित्रवशिष्ठयोः । वसतोराश्रमे दिव्ये ब्रूहि नः सर्वमेव तत् ॥ १ ॥

गन्धर्व उवाच । इदं वाशिष्ठमाख्यानं पुराणं परिचक्षते । आर्य सर्वेषु लोकेषु यथावत्तन्निबोध मे ॥ २ ॥ कान्यकुब्जे महा-नासीत्पार्थिवो भरतर्षभ । गाधीति विश्रुतो लोके कुशिकस्यात्म-सम्भवः ॥ ३ ॥ तस्य धर्मात्मनः पुत्रः सच्चबलवाहनः । विश्वा-मित्र इति ख्यातो बभूव रिपुमर्दनः ॥ ४ ॥ स चचार सहामात्यो मृगयां गहने वने । मृगान्विध्यन्वराहांश्च रम्येषु मरुधन्वसु ॥५॥ व्यायामकर्षितः सोऽथ मृगलिप्सुः पिपासितः । आजगाम नर-श्रेष्ठ वशिष्ठस्याश्रमं प्रति ॥ ६ ॥ तमागतमभिप्रेत्य वशिष्ठः श्रेष्ठ-भाङ्मुनिः । विश्वामित्रं नरश्रेष्ठं प्रतिजग्राह पूजया ॥ ७ ॥

पाद्यार्घ्याचमनीयञ्च स्वागतेन च भारत। तथैव परिजग्राह बल्येन हविषा तथा ॥ ८ ॥ तस्याथ कामधुग्धेनुर्वशिष्ठस्य महात्मनः। उक्ता कामान् प्रयच्छेति सा कामान्दुदुहे तदा ॥ ९ ॥ आज्यारक्षाओषधीश्च दुदुहे पय एव च। षड्रसं चान्नतनिभं रसायनमनुत्तमम् ॥ १० ॥ भोजनीयानि पेयानि भक्ष्याणि विविधानि च। लेह्यान्यमृतकल्पानि चोष्याणि च तथार्जुन ॥ ११ ॥ रत्नानि च महार्हाणि वासांसि विविधानि च। तैः कामैः सर्वसंपूर्णैः पूजितश्च महीपतिः। सामात्यः सबलश्चैव तुतोष स हृदं तदा ॥ १२ ॥ षड्व्रतां सुपार्ष्णिं पृथुपञ्चसमाहताम्। मण्डूकनेत्रां स्वाकारां पीनोधसमनिन्दिताम् ॥ १३ ॥ सुवालधिं श्रुकर्णां चारुशृङ्गां मनोरमाम्। पुष्टायतशिरोग्रीवां विस्मितः सोऽभिवीक्ष्य ताम् ॥ १४ ॥ अभिनन्द्य स तां राजन्नन्दिनीं गाधिनन्दनः। अब्रवीच्च हृष्टं तुष्टः स राजा तद्वर्षिं तदा ॥ १५ ॥ अर्बुदेन गवां ब्रह्मन्मम राज्येन वा पुनः। नन्दिनीं संप्रयच्छस्व भुङ्क्ष्व राज्यं महामुने ॥ १६ ॥

वशिष्ठ उवाच। देवतातिथिपित्रर्थं याज्यार्थञ्च पयस्विनी। अदेया नन्दिनीयं वै राज्येनापि तवानघ ॥ १७ ॥

विश्वामित्र उवाच। क्षत्रियोऽहं भवान्ब्रह्मन्तपःस्वाध्यायसाधनः। ब्राह्मणेषु कुतो वीर्यं प्रशान्तेषु दृढात्मसु ॥ १८ ॥ अर्बुदेन गवां यस्मान्न ददासि ममेप्सितम्। स्वधर्मं न प्रहास्यामि नेष्यामि च बलेन गाम् ॥ १९ ॥

वशिष्ठ उवाच। बलस्थासि राजा च बाहुवीर्यश्च क्षत्रियः। यद्येच्छसि तथा क्षिप्रं कुरु मा त्वं विचारय ॥ २० ॥

गन्धर्व उवाच। एवमुक्तस्तया पार्थ विश्वामित्रो बलादिव। हंसचन्द्रप्रतीकाशां नन्दिनीं तां जहार गाम् ॥ २१ ॥ कशादण्डप्रणुदितां क्रोश्यमानामनिन्दितः। हम्भायमाना कल्याणी वशि-

ष्ठस्याथ नन्दिनी ॥ २२ ॥ आगच्याभिमुखी पार्थ तस्थौ भगवदुन्मुखी। भृशञ्च ताड्यमाना वै न जगामाश्रमात्ततः ॥ २३ ॥

वशिष्ठ उवाच। शृणोमि ते रवं भद्रे विनदन्त्याः पुनः पुनः। ह्रियसे त्वं बलाद्भद्रे विश्वामित्रेण नन्दिनि। किं कर्त्तव्यं मया तत्र क्षमावान् ब्राह्मणो ह्यहम् ॥ २४ ॥

गन्धर्व उवाच। सा भथान्नन्दिनी तेषां बलानां भरतर्षभ। विश्वामित्रभयोद्विग्ना वशिष्ठं समुपागमत् ॥ २५ ॥

गौरुवाच। कशाग्रदण्डाभिहतां क्रोशन्तीं सामनाथवत्। विश्वामित्रबलैर्घोरैर्भगवन् किमुपेक्षसे ॥ २६ ॥

गन्धर्व उवाच। नन्दिन्यामेवं क्रन्दन्त्यां धर्षितायां महामुनिः। न चुक्षुभे तदा धैर्य्यान्न चचाल व्रतव्रतः ॥ २७ ॥

वशिष्ठ उवाच। क्षत्रियाणां बलं तेजो ब्राह्मणानां क्षमा बलम्। क्षमा मां भजते यस्माद्गम्यतां यदि रोचते ॥ २८ ॥

नन्दिन्युवाच। किन्नु त्यक्तास्मि भगवन्यदेवं त्वं प्रभाषसे। अत्यक्तां त्वया ब्रह्मन्नेतुं शक्या न वै बलात् ॥ २९ ॥

वशिष्ठ उवाच। न त्वां त्यजामि कल्याणि स्थीयतां यदि शक्यते। दृढेन दाम्ना बद्धैष वत्सस्ते ह्रियते बलात् ॥ ३० ॥

गन्धर्व उवाच। स्थीयतामिति तच्छ्रुत्वा वशिष्ठस्य पयस्विनी। ऊर्द्ध्वोन्नतशिरोग्रीवा प्रवभौ रौद्रदर्शना ॥ ३१ ॥ क्रोधरक्तेक्षणा सा गौर्हुंभारवघनस्वना। विश्वामित्रस्य तत्सैन्यं व्यद्रावयत सर्वशः ॥ ३२ ॥ कशाग्रदण्डाभिहता क्रोश्यमाना ततस्ततः। क्रोधरक्तेक्षणा क्रोधं भूय एव समादधे ॥ ३३ ॥ आदित्य इव मध्याह्ने क्रोधदीप्तवपुर्बभौ। अङ्गारवर्षं सृजन्ती सृङ्कर्वालचितो महत् ॥ ३४ ॥ असृजत् पह्लवान् पुच्छात् प्रस्रवाद्द्राविड़ाञ्छकान्। योनिदेशाच्च यवनान् शकृतः शबरान् बहून् ॥ ३५ ॥ मूत्रतश्चासृजत्काञ्चीञ्छरभांश्चैव पार्श्वतः। पौण्ड्रान्

किरातान् यवनान् सिंहलान्बर्बरान् खशान्॥ ३६॥ चिबुकांश्च पुलिन्दांश्च चीनान् हूनान् सकेरलान्। ससर्ज फेनतः सा गौर्म्लेच्छान् बहुविधानपि॥ ३७॥ तैर्विसृष्टैर्महासैन्यैर्नानाम्लेच्छगणैस्तदा। नानावरणसंच्छन्नैर्नानायुधधरैस्तथा॥ ३८॥ अवाकीर्य्यत संरब्धैर्विश्वामित्रस्य पश्यतः। एकैकश्च तदा योधः पञ्चभिः सप्तभिर्हतः॥ ३९॥ अस्त्रवर्षेण महता बध्यमानं बलं तदा। प्रभग्नं सर्वतस्तस्य विश्वामित्रस्य पश्यतः॥ ४०॥ न च प्राणैर्वियुज्यन्ते केचित्तस्य सैनिकाः। विश्वामित्रस्य संक्रुद्धैर्वाशिष्ठैर्भरतर्षभ॥ ४१॥ सा गौस्तत्सकलं सैन्यं कालयामास दूरतः। विश्वामित्रस्य तत् सैन्यं काल्यमानं त्रियोजनम्॥ ४२॥ क्रोश्यमानं भयोद्विग्नं त्रातारं नाध्यगच्छत। दृष्ट्वा तन्महदाश्चर्यं ब्रह्मतेजोभवन्तदा॥ ४३॥ विश्वामित्रः क्षत्रभावान्निर्विण्णो वाक्यमब्रवीत्। धिग्बलं क्षत्रियबलं ब्रह्मतेजो बलं बलम्॥ ४४॥ बलाबलं विनिश्चित्य तप एव परं बलम्। स राज्यं स्फीतमुत्सृज्य ताश्च दीप्तां नृपश्रियम्॥ ४५॥ भोगांश्च पृष्ठतः कृत्वा तपस्येव मनो दधे। स गत्वा तपसा सिद्धिं लोकान्निष्टभ्य तेजसा॥ ४६॥ तताप सर्वान्दीप्तौजा ब्राह्मण्यमवाप्तवान्। अपिबच्च ततः सोममिन्द्रेण सह कौशिकः॥ ४७॥

इत्यादिपर्वणि चैत्ररथपर्वणि वाशिष्ठे विश्वामित्रपराभवे सप्तसप्तत्यधिकशततोऽध्यायः॥ १७७॥

—:०:—

गन्धर्व उवाच। कल्माषपाद इत्येवं लोके राजा बभूव ह। इक्ष्वाकुवंशजः पार्थ तेजसासदृशो भुवि॥ १॥ स कदाचिद्वनं राजा मृगयां निर्य्ययौ पुरात्। मृगान्विध्यन्वराहांश्च चचार रिपुमर्दनः॥ २॥ तस्मिन् वने महाघोरे खड्गांश्च बहुशोऽहनत्।

दत्वा च सुचिरं ध्यात्वा राजा निवर्तते ततः ॥ ३ ॥ अकामयत्तं राज्यार्थं विश्वामित्रः प्रतापवान् । स तु राजा महात्मानं वाशिष्ठ-मृषिसत्तमम् ॥ ४ ॥ क्षुधार्तश्च तृषार्तश्च एकायनगतः पथि । अपश्यदजितः संख्ये मुनिं प्रतिमुखागतम् ॥ ५ ॥ शक्तिं नाम महाभागं वशिष्ठकुलवर्धनम् । ज्येष्ठं पुत्रं पुत्रशताद्वशिष्ठस्य महात्मनः ॥ ६ ॥ अपमच्छ पथोऽस्माकमित्येवं पार्थिवोऽब्रवीत् । तथा ऋषिरुवाचैनं सान्त्वयन् श्लक्ष्णया गिरा ॥ ७ ॥ मम पन्था महाराज धर्म एष सनातनः । राज्ञा सर्वेषु धर्मेषु देयः पन्था द्विजातये ॥ ८ ॥ एवं परस्परं तौ तु पथोऽर्थं वाक्यमूचतुः । अपसर्पापसर्पेति वागुत्तरमकुर्वताम् ॥ ९ ॥ ऋषिस्तु नापचक्राम तस्मिन्धर्मपथे स्थितः । नापि राजा मुनेर्मानात् क्रोधाच्चाथ जगाम ह ॥ १० ॥ अमुञ्चत्तन्तु पन्थानं तमृषिं नृपसत्तमः । जघान कशया मोहात्तदा राक्षसवन्मुनिम् ॥ ११ ॥ कशाप्रहाराभिहतस्ततः स मुनिसत्तमः । तं शशाप नृपश्रेष्ठं वाशिष्ठः क्रोधमूर्च्छितः ॥ १२ ॥ हंसि राक्षसवद्यस्माद्राजापसद तापसम् । तस्मात्त्वमद्यप्रभृति पुरुषादो भविष्यसि ॥ १३ ॥ मनुष्यमिथिते शक्तश्चरिष्यसि महीमिमाम् । गच्छ राजाधमेत्युक्तः शक्तिना वीर्यशक्तिना ॥ १४ ॥ ततो याज्यनिमित्तन्तु विश्वावित्रवशिष्ठयोः । वैरमासीत्तदा तन्तु विश्वावित्रोऽन्वपद्यत ॥ १५ ॥ तयोर्विवदतोरेवं समीपमुपचक्रमे । ऋषिरुद्यतपाः पार्थ विश्वामित्रः प्रतापवान् ॥ १६ ॥ ततः स बुबुधे पश्चात्तमृषिं नृपसत्तमः । ऋषेः पुत्रं वशिष्ठस्य वशिष्ठमिव तेजसा ॥ १७ ॥ अन्तर्धाय ततोत्मानं विश्वामित्रोऽपि भारत । तावुभावतिचक्राम चिकीर्षन्नात्मनः प्रियम् ॥ १८ ॥ स तु शप्तस्तदा तेन शक्तिना वै नृपोत्तमः । जगाम शरणं शक्तिं प्रसादयितुमर्हयन् ॥ १९ ॥ तस्य भावं विदित्वा स नृपतेः कुरुसत्तम । विश्वामित्रस्ततो रक्ष

आदिदेश नृपं प्रति ॥ २० ॥ शापात्तस्य तु विप्रर्षेर्विश्वामित्रस्य चाज्ञया । राक्षसः किङ्करो नाम विवेश नृपतिं तदा ॥ २१ ॥ रक्षसा तं गृहीतं तु विदित्वा मुनिसत्तमः । विश्वामित्रोऽप्यपाक्रामत्तस्माद्देशाद्दरिन्दम ॥ २२ ॥ ततः स नृपतिस्तेन रक्षसान्तर्गतेन च । बलवत्पीडितः पार्थ नान्ववुध्यत किञ्चन ॥ २३ ॥ ददर्शाथ द्विजः कश्चिद्राजानं प्रस्थितं वनम् । अयाचत क्षुधापन्नः समांसं भोजनं तदा ॥ २४ ॥ तमुवाचाथ राजर्षिर्द्विजं मित्रसहं तदा । आस्स्व ब्रह्मंस्त्वमत्रैव मुहूर्तं प्रतिपालय ॥ २५ ॥ निहत्तः प्रतिदास्यामि भोजनं ते यथेप्सितम् । इत्युक्त्वा प्रययौ राजा तस्थौ स द्विजसत्तमः ॥ २६ ॥ ततो राजा परिक्रम्य यथाकामं यथासुखम् । निहत्तोऽन्तःपुरं पार्थ प्रविवेश महामनाः ॥ २७ ॥ ततोऽर्द्धरात्र उत्थाय क्षुदमानाश्च सत्वरम् । उवाच राजा संस्मृत्य ब्राह्मणस्य प्रतिश्रुतम् ॥ २८ ॥ गच्छासुधिन्वनोहेशे ब्राह्मणो मां प्रतीक्षते । अन्नार्थी तं त्वमन्न न समांसेनोपपादय ॥ २९ ॥

गन्धर्व उवाच । एवमुक्तस्ततः सूदः सोऽनासाद्यामिषं क्वचित् । निवेदयामास तदा तस्मै राज्ञे व्यथान्वितः ॥ ३० ॥ राजा तु रक्षसाविष्टः सूदमाह गतव्यथः । अप्येनं नरमांसेन भोजयेति पुनः पुनः ॥ ३१ ॥ तथेत्युक्त्वा ततः सूदः संस्थानं वध्यघातिनाम् । गत्वा जहार त्वरितो नरमांसमपेतभीः ॥ ३२ ॥ स तत् संस्कृत्य विधिवदन्नोपहितमाशु वै । तस्मै प्रादाद्ब्राह्मणाय क्षुधिताय तपस्विने ॥ ३३ ॥ स सिद्धचक्षुषा दृष्ट्वा तदन्नं द्विजसत्तमः । अभोज्यमिदमित्याह क्रोधपर्य्याकुलेक्षणः ॥ ३४ ॥

ब्राह्मण उवाच । यस्मादभोज्यमन्न मे ददाति स नृपाधमः । तस्मात्तस्यैव मूढस्य भविष्यत्यत्र लोलुपा ॥ ३५ ॥ सक्तो मानुषमांसेषु यथोक्तः शक्तिना पुरा । उद्वेजनीयो भूतानां चरिष्यति महीमिमाम् ॥ ३६ ॥ इत्युक्त्वाहृतो राज्ञः स शापो बल-

वानभूत् । शोकोपहतमाविष्टो विसंज्ञश्चाभवन्नृपः ॥ ३७ ॥ ततः स नृपतिश्रेष्ठो रक्षसापहृतेन्द्रियः । उवाच शक्तिं तं दृष्ट्वा न चिरादिव भारत ॥ ३८ ॥ यस्मादसदृशः शापः प्रयुक्तोऽयं मयि त्वया । तस्मात्ततः प्रवर्त्तिष्ये खादितुं पुरुषानहम् ॥ ३९ ॥ एवमुक्त्वा ततः सद्यस्तं प्राग्वैविप्रसृज्य च । शक्तिं तं भक्षयामास व्याघ्रः पशुमिवेप्सितम् ॥ ४० ॥ शक्तिं तन्तु हतं दृष्ट्वा विश्वामित्रः पुनः पुनः । वशिष्ठस्यैव पुत्रेषु तद्रक्षः सन्दिदेश ह ॥ ४१ ॥ स तान् शक्तिवरान् पुत्रान्वशिष्ठस्य महात्मनः । भक्षयामास संक्रुद्धः सिंहः क्षुद्रमृगानिव ॥ ४२ ॥ वशिष्ठो घातितान् श्रुत्वा विश्वामित्रेण तान् सुतान् । धारयामास तं शोकं महाद्रिरिव मेदिनीम् ॥ ४३ ॥ चक्रे चात्मविनाशाय बुद्धिं स मुनिसत्तमः । न त्वेव कौशिकोच्छेदं मेने मतिमतांवरः ॥ ४४ ॥ स मेरुकूटादात्मानं मुमोच भगवानृषिः । गिरेस्तस्य शिलायान्तु श्लक्ष्णायामिवापतत् ॥ ४५ ॥ न ममार च पातेन स यदा तेन पाण्डव । तदाग्निमिद्धं भगवान् संविवेश महावने ॥ ४६ ॥ तं तदा सुसमिद्धोऽपि न ददाह हुताशनः । दीप्यमानोऽग्निसंस्पर्शात्तोऽग्निरभवत्ततः ॥ ४७ ॥ स समुद्रमभिप्रेत्य शोकाविष्टो महामुनिः । बद्ध्वा कण्ठे शिलां गुर्वीं निपपात तदाम्भसि ॥ ४८ ॥ स समुद्रोर्मिवेगेन क्षिप्तो व्यसुर्महामुनिः । जगाम स ततः खिन्नः पुनरेवाश्रमं प्रति ॥ ४९ ॥

इत्यादिपर्वणि चैत्ररथपर्वणि वाशिष्ठे वशिष्ठशोके अष्टसप्तत्यधिकशततोऽध्यायः ॥ १७८ ॥

—०:०—

गन्धर्व उवाच । ततो दृष्ट्वाश्रमपदं रक्षितं तैः सुतैर्मुनिः । निर्जगाम सुदुःखार्त्तः पुनरभ्याश्रमात्ततः ॥ १ ॥ सोऽपश्यत्सरितं पूर्णां प्रावृट्काले नवाम्भसा । द्रुतान् बहुविधान् पार्थ हरन्तीं

तीरजान् वृक्षान् ॥ २ ॥ अथ चिन्तां समापेदे पुनः कौरवनन्दन। अस्मास्वस्यां निमज्जेयमिति दुःखसमन्वितः ॥ ३ ॥ ततः पाशैस्तदात्मानं गाढं बद्ध्वा महामुनिः। तस्या जले महानद्या निममज्ज सुदुःखितः ॥ ४ ॥ अथ च्छित्त्वा नदी पाशांस्तस्मात्रिवसूदन। स्थलस्थं तमृषिं कृत्वा विपाशं समवाहृजत् ॥ ५ ॥ उत्ततार ततः पाशैर्विमुक्तः स महामुनिः। विपाशेति च नामास्या नद्याश्चक्रे महामुनिः ॥ ६ ॥ शोके बुद्धिं तदा चक्रे न चैकत्र व्यतिष्ठत। सोऽगच्छत्पर्वतांश्चैव सरितश्च सरांसि च ॥ ७ ॥ दृष्ट्वा स पुनरेवर्षिर्नदीं हैमवतीं तदा। चण्डग्राहवतीं भीमां तस्याः स्रोतस्यपातयत् ॥ ८ ॥ सा तमग्निसमं विप्रमनुचिन्त्य सरिद्वरा। शतधा विद्रुता यस्माच्छतद्रुरिति विश्रुता ॥ ९ ॥ ततः स्थलगतं दृष्ट्वा तत्रात्मानमात्मना। मर्क्षुं न शक्यामीत्युक्त्वा पुनरेवाश्रमं ययौ ॥ १० ॥ स गत्वा विविधान् शैलान्देशान् बहुविधांस्तथा। अदृश्यन्त्याख्यया वध्वा आश्रमेऽनुहतोऽभवत् ॥ ११ ॥ अथ शुश्राव सङ्कल्पा वेदाध्ययननिस्वनम्। दृष्टतः परिपूर्णार्थं षडङ्गैरक्षरैर्युतम् ॥ १२ ॥ अनुव्रजति कोऽप्येष मामित्येवाथ सोऽब्रवीत्। अदृश्यन्तीमं सा स्नुषा प्रत्यभाषत। शक्तेर्भार्या महाभाग तपोयुक्ता तपस्विनी ॥ १३ ॥

वसिष्ठ उवाच। पुत्रि कस्यैष साङ्गस्य वेदस्याध्ययनस्वनः। पुरा साङ्गस्य वेदस्य शक्तेरिव मया श्रुतः ॥ १४ ॥

अदृश्यन्त्युवाच। अयं कुक्षौ समुत्पन्नः शक्तेर्गर्भः सुतस्य ते। समा द्वादश तस्येह वेदानभ्यसतो मुने ॥ १५ ॥

गन्धर्व उवाच। एवमुक्तस्तया हृष्टो वसिष्ठः श्रेष्ठभाग्ऋषिः। अस्ति सन्तानमित्युक्त्वा स्नुषां पार्श्व न्यवर्तत ॥ १६ ॥ ततः प्रतिनिवृत्तः स तया वध्वा सहानघ। कल्माषपादमासीनं ददर्श विजने वने ॥ १७ ॥ स तु दृष्ट्वैव तं राजा क्रुद्ध उत्थाय भारत।

आविष्टो रक्षसोग्रेण दृयेषाक्षं तदा मुनिम् ॥ १८ ॥ अदृश्यन्तौ तु तं दृष्ट्वा क्रूरकर्माणमग्रतः । भयसंविग्नया वाचा वशिष्ठमिद-मब्रवीत् ॥ १९ ॥ असौ त्वत्पुरिवोग्रेण दण्डेन भगवन्नितः । प्रगृहीतेन काष्ठेन राक्षसोऽभ्येति दारुणः ॥ २० ॥ तं निवा-रयितुं शक्तो नान्योऽस्ति भुवि कश्चन । त्वदृतेऽद्य महाभाग सर्व-वेदविदांवर ॥ २१ ॥ त्राहि मां भगवन् पापाद्राक्षसाद्दारुणादहम् । राक्षसोऽयमिहात्तुं वै नूनमावां समीहते ॥ २२ ॥

वशिष्ठ उवाच । मा भैः पुत्रि न भेतव्यं राक्षसात्तु कथ-ञ्चन । नैतद्वो भयं यस्मात् पश्यसि त्वमुपस्थितम् ॥ २३ ॥ राजा कल्माषपादोऽयं वीर्यवान् प्रथितो भुवि । स एषोऽस्मिन् वनोद्देशे निवसत्यतिभीषणः ॥ २४ ॥

गन्धर्व उवाच । तमापतन्तं संप्रेक्ष्य वशिष्ठो भगवानृषिः । वारयामास तेजस्वी हुङ्कारेणैव भारत ॥ २५ ॥ मन्त्रपूतेन च पुनः स तमभ्युक्ष्य वारिणा । मोक्षयामास वै शापात्तस्माद्योगा-न्नराधिपम् ॥ २६ ॥ स हि द्वादशवर्षाणि वाशिष्ठस्यैव तेजसा । ग्रस्त आसीद्ग्रहेणेव पर्वकाले दिवाकरः ॥ २७ ॥ रक्षसा विप्र-मुक्तोऽथ स नृपस्तपतां महत् । तेजसा रञ्जयामास सन्ध्याभ्रमिव भास्करः ॥ २८ ॥ प्रतिलभ्य ततः संज्ञामभिवाद्य कृताञ्जलिः । उवाच नृपतिः काले वशिष्ठर्षिसत्तमम् ॥ २९ ॥ सौदासोऽहं महाभाग याज्यस्ते मुनिसत्तम । अस्मिन् काले यदिष्टं ते ब्रूहि किं करवाणि ते ॥ ३० ॥

वशिष्ठ उवाच । हृत्तमेतद्यथाकालं गच्छ राज्यं प्रशाधि वै । ब्राह्मणांस्तु मनुष्येन्द्र नावमंस्थाः कदाचन ॥ ३१ ॥

राजोवाच । नावमंस्ये महाभाग कदाचिद्ब्राह्मणर्षभान् । त्वन्निदेशे स्थितः सम्यक् पूजयिष्याम्यहं द्विजान् ॥ ३२ ॥ इक्ष्वा-कूणाञ्च येनाहमनृणः स्यां द्विजोत्तमः । तत्त्वतः प्रब्रूहि निच्छामि

सर्ववेदविदांवर ॥ ३३ ॥ अपत्यमौक्षितं मह्यं दातुमर्हसि सत्तम।
शीलरूपगुणोपेतमिक्ष्वाकुकुलवृद्धये ॥ ३४ ॥

गन्धर्व उवाच। इदानीमेव तं तत्र राजानं प्रत्युवाच ह।
वशिष्ठः परमेष्वासं सत्यवन्तो द्विजोत्तमः ॥ ३५ ॥ ततः प्रतियतौ
काले वशिष्ठः सह तेन वै। ख्यातां पुरीमिमां लोकेष्वयोध्यां
मनुजेश्वर ॥ ३६ ॥ तं प्रजाः प्रतिमोदन्त्यः सर्वाः प्रत्युद्गता-
स्तदा। विपाप्मानं महात्मानं दिवौकस इवेश्वरम् ॥ ३७ ॥ सु-
चिराय मनुष्येन्द्रो नगरीं पुण्यलक्षणाम्। विवेश सहितस्तेन
वशिष्ठेन महर्षिणा ॥ ३८ ॥ ददृशुस्तं महीपालमयोध्यावासिनो
जनाः। पुरोहितेन सहितं दिवाकरमिवोदितम् ॥ ३९ ॥ स च
तां पूरयामास लक्ष्म्या लक्ष्मीवतां वरः। अयोध्यां व्योम शीतांशुः
शरत्काल इवोदितः ॥ ४० ॥ संसिक्तसृष्टपन्थानं पताकाध्वज-
शोभितम्। मनः प्रह्लादयामास तस्य तत् पुरमुत्तमम् ॥ ४१ ॥
तुष्टपुष्टजनाकीर्णा सा पुरी कुरुनन्दन। अशोभत तदा तेन
शक्रेणेवामरावती ॥ ४२ ॥ ततः प्रविष्टे राजर्षौ तस्मिंस्तत् पुर-
मुत्तमम्। राज्ञस्तस्यान्नया देवी वशिष्ठमुपचक्रमे ॥ ४३ ॥
महर्षिः सम्विदं ज्ञात्वा सत्यभूव तया सह। देव्या दिव्येन विधिना
वशिष्ठः श्रेष्ठभाग्ऋषिः ॥ ४४ ॥ ततस्तस्यां समुत्पन्ने गर्भे स मुनि-
सत्तमः। राज्ञाभिवादितस्तेन जगाम मुनिराश्रमम् ॥ ४५ ॥
दीर्घकालेन सा गर्भं सुषुवे न तु तं यदा। तदा देव्यश्मना कुक्षिं
निर्बिभेद यशस्विनी ॥ ४६ ॥ ततोऽपि द्वादशे वर्षे स जज्ञे
पुरुषर्षभः। अश्मको नाम राजर्षिः पौदन्यं यो न्यवेशयत् ॥ ४७ ॥

इत्यादिपर्वणि चैत्ररथपर्वणि वाशिष्ठे सौदासमुतोत्पत्तौ
जनाशीत्यधिकशततोऽध्यायः ॥ १७९ ॥

गन्धर्व उवाच । आयमस्या ततः पुत्रमदृश्यन्ती व्यजायत । भ्रक्ष्णोः कुलकरं राजन् द्वितीयमिव भक्ष्यिणम् ॥ १ ॥ जातकर्मादिकास्तस्य क्रियाः स मुनिसत्तमः । पौत्रस्य भरतश्रेष्ठ चकार भगवान् स्वयम् ॥ २ ॥ परासुः स यतस्तेन वसिष्ठः स्थापितो मुनिः । गर्भस्थेन ततो लोके पराशर इति स्मृतः ॥ ३ ॥ अमन्यत स धर्मात्मा वसिष्ठं पितरं मुनिम् । जन्मप्रभृति तस्मिंस्तु पितरीवान्ववर्त्तत ॥ ४ ॥ स तात इति विप्रर्षिं वसिष्ठं प्रत्यभाषत । मातुः समक्षं कौन्तेय अदृश्यन्त्याः परन्तप ॥ ५ ॥ तातेति परिपूर्णार्थं तस्य तन्मधुरं वचः । अदृश्यन्त्यनुपूर्वांची शृण्वती तमुवाच ह ॥ ६ ॥ मा तात तात तातेति ब्रूहीमं पितरं पितुः । रक्षसा भक्षितस्तात तव तातो वनान्तरे ॥ ७ ॥ मन्यसे यन्तु तातेति नैष तातस्तवानघ । आर्य्य एष पिता तस्य पितुस्तव यशस्विनः ॥ ८ ॥ स एवमुक्तो दुःखार्त्तः सत्यवान्मुनिसत्तमः । सर्वलोकविनाशाय मतिञ्चक्रे महामनाः ॥ ९ ॥ तं तथा निश्चितात्मानं स महात्मा महातपाः । ऋषिर्ब्रह्मविदां श्रेष्ठो नैवावरुणिरन्वधीः ॥ १० ॥ वसिष्ठो वारयामास हेतुना येन तच्छृणु ।

वसिष्ठ उवाच । क्षतवीर्य्य इति ख्यातो बभूव पृथिवीपतिः । याज्यो वेदविदां लोके भृगूणां पार्थिवर्षभः ॥ ११ ॥ स तानयाजयत्तात धान्येन च धनेन च । सोमान्ते तर्पयामास विपुलेन विशाम्पते ॥ १२ ॥ तस्मिन्नृपतिशार्दूले स्वर्यातेऽथ कथञ्चन । बभूव तत्कुलेयानां द्रव्यकार्य्यसुपस्थितम् ॥ १३ ॥ भृगूणान्तु धनं ज्ञात्वा राजानः सर्व एव ते । याचिष्णवोऽभिजग्मुस्तांस्ततो भार्गवसत्तमान् ॥ १४ ॥ भूमौ तु निदधुः केचिद्भृगवो धनमक्षयम् । ददुः केचिद्द्विजातिभ्यो ज्ञात्वा क्षत्रियतो भयम् ॥ १५ ॥ भृगवस्तु ददुः केचित्तेषां वित्तं यथेप्सितम् । क्षत्रियाणां तदा तात कारणान्तरदर्शनात् ॥ १६ ॥ ततो महीतलं तात क्षत्रि-

येण यदृच्छया। खनताधिगतं वित्तं केनचिद्भृगवेश्मनि ॥१७॥ तद्धित्तं ददशुः सर्वे समेताः क्षत्रियर्षभाः। अवमन्य ततः क्रोधाद्भृगूंस्तान् शरणागतान् ॥ १८ ॥ निजघ्नुः परमेष्वासाः सर्वांस्तान्निशितैः शरैः। आगर्भादवशन्तस्ते भृगूणां वसुन्धराम् ॥ १९ ॥ तत उच्छिद्यमानेषु भृगुष्वेवं भयात्तदा। भृगुपत्न्यो गिरिं दुर्गं हिमवन्तं प्रपेदिरे ॥ २० ॥ तासामन्यतमा गर्भं भयादृषेर्महौजसम्। जघ्नेकेन वामोरुर्भर्तुः कुलविवृद्धये ॥ २१ ॥ तद्गर्भमुपलभ्याशु ब्राह्मणी या भयार्दिता। गत्वैका कथयामास क्षत्रियाणामुपश्रुतौ ॥ २२ ॥ ततस्ते क्षत्रिया जग्मुस्तं गर्भं हन्तुमुद्यताः। ददृशुर्ब्राह्मणीं तेऽथ दीप्यमानां स्वतेजसा ॥ २३ ॥ अथ गर्भः स भित्त्वोरुं ब्राह्मण्या निर्जगाम ह। सुषुवे दृष्टीः क्षत्रियाणां मध्याह्न इव भास्करः ॥ २४ ॥ ततश्चक्षुर्विहीनास्ते गिरिदुर्गेषु वव्रजुः। ततस्ते मोहमापन्ना राजानो नष्टचेतसः। ब्राह्मणीं शरणं जग्मुर्दृष्ट्यर्थं तामनिन्दिताम् ॥ २५ ॥ ऊचुश्चैनां महाभागां क्षत्रियास्ते विचेतसः। ज्योतिःप्रदीप्ता दुःखार्ताः शान्तार्चिष इवाग्नयः ॥ २६ ॥ भगवत्याः प्रसादेन गच्छेत् चक्षुः सचक्षुषम्। उपरम्य च गच्छेम सहिताः पापकर्मिणः ॥२७॥ सप्रसादा त्वं प्रसादं नः कर्तुमर्हसि शोभने। पुनर्दृष्टिप्रसादेन राज्ञः सन्तातुमर्हसि ॥ २८ ॥

इत्यादिपर्वणि चैत्ररथपर्वण्यौर्वोपाख्याने अशीत्यधिकशततोऽध्यायः ॥ १८० ॥

ब्राह्मण्युवाच। नाहं मन्युमि वक्ष्यामि क्षत्रा दृष्टीर्नाशि कृपान्विता। अयन्तु भार्गवो मूनमूरुजः कुपितोऽद्य वः ॥ १ ॥ तेन चक्षूंषि वक्ष्यन्ति व्यक्तं कोपान्मदात्मना। स्मरता निहतान्

बन्धूनादत्तानि न संशयः ॥ २ ॥ गर्भानपि यदा नूनं भृगूणां ज्ञत पुत्रकाः। तदायमुरुणा गर्भो मया वर्षशतं धृतः ॥ ३ ॥ षड़ङ्गवाखिलो वेद इमं गर्भस्थमेव हि। विवेद भृगुवंशस्य भूयः प्रियचिकीर्षया ॥ ४ ॥ सोऽयं पितृवधाद्यक्षं क्रोधाद्दो हन्तुमिच्छति। तेजसा तस्य दिव्येन चक्षूंषि सुषितानि वः ॥ ५ ॥ तस्मिन्नं तात याचध्वमौर्वं मम सुतोत्तमम्। अयं वः प्रणिपातेन तुष्टो दृष्टीः प्रमोक्ष्यति ॥ ६ ॥

वशिष्ठ उवाच। एवमुक्तास्ततः सर्वे राजानस्ते तमूचुजम्। ऊचुः प्रसीदेति तदा प्रसादश्च चकार सः ॥ ७ ॥ अनेनैव च विख्यातो नाम्ना लोकेषु सत्तमः। स और्व इति विप्रर्षिरूरुं भित्त्वा व्यजायत ॥ ८ ॥ चक्षूंषि प्रतिलभ्यैव च प्रतिजग्मुस्ततो नृपाः। भार्गवस्तु मुनिर्मेने सर्वलोकपराभवम् ॥ ९ ॥ स चक्रे तात लोकानां विनाशाय महामनाः। सर्वेषामेव कार्त्स्न्येन मनः प्रवणमात्मनः ॥ १० ॥ इच्छन्नपचितिं कर्त्तुं भृगूणां भृगुनन्दनः। सर्वलोकविनाशाय तपसा महतैधितः ॥ ११ ॥ तापयामास तांल्लोकान् सदेवासुरमानुषान्। तपसोग्रेण महता नन्दयिष्यन् पितामहान् ॥ १२ ॥ ततस्तं पितरस्तात विज्ञाय कुलनन्दनम्। पितृलोकादुपागम्य सर्व ऊचुरिदं वचः ॥ १३ ॥

पितर ऊचुः। और्व दृष्टः प्रभावस्ते तपसोग्रस्य पुत्रक। प्रसादं कुरु लोकानां नियच्छ क्रोधमात्मनः ॥ १४ ॥ नानीशैर्हि तदा तात भृगुभिर्भावितात्मभिः। वधो ह्युपेक्षितः सर्वैः क्षत्रियाणां विहिंसताम् ॥ १५ ॥ आयुषा विप्रकृष्टेन यदा नः खेद आविशत्। तदास्माभिर्बधस्तात क्षत्रियैरीक्षितः स्वयम् ॥ १६ ॥ निखातं यच्च वै वित्तं केनचिद्भृगुवेश्मनि। वैरादेव तदा न्यस्तं क्षत्रियान् कोपयिष्णुभिः ॥ १७ ॥ किं हि वित्तेन नः कार्य्यं स्वर्गेष्वनां द्विजोत्तम। यदस्माकं धनाध्यक्षः प्रभूतं धनमाहरत्

॥ १८ ॥ यदा तु हत्यूरादातुं न नः शक्नोति सर्वशः। तदा-स्माभिरयं हृष्ट उपायस्तात संमतः ॥ १९ ॥ आत्महा च पुमां-स्तात न लोकाल्लभते शुभान्। ततोऽस्माभिः समीक्ष्यैवं नात्म-नात्मा निपातितः ॥ २० ॥ न चैतन्नः प्रियं तात यदिदं कर्तु-मिच्छसि। नियच्छेदं मनः पापात्सर्वलोकपराभवात् ॥ २१ ॥ मा वधीः क्षत्रियांस्तात न लोकान् सप्त पुत्रक। दूषयन्ति तप-स्तेजः क्रोधमुत्यतितं जहि ॥ २२ ॥

हत्यादिपर्वणि चैत्ररथपर्वण्यौर्ववारणे एकाशीत्य-
धिकशततोऽध्यायः ॥ १८१ ॥

—•:•—

और्व उवाच। उक्तवानस्मि यां क्रोधात् प्रतिज्ञां पितर-स्तदा। सर्वलोकविनाशाय न सा मे वितथा भवेत् ॥ १ ॥ वृथा-रोषप्रतिज्ञो वै नाहं भवितुमुत्सहे। अनिस्तीर्णो हि मां रोषो दहेदग्निरिवारणिम् ॥ २ ॥ यो हि कारणतः क्रोधं सञ्जातं क्षन्तुमर्हति। नालं स मनुजः सम्यक् त्रिवर्गं परिरक्षितुम् ॥३॥ अशिष्टानां नियन्ता हि शिष्टानां परिरक्षिता। स्यान्नः रोषः प्रयुक्तः स्यान्नृपैः सर्वजिगीषुभिः ॥ ४ ॥ अथौषमहमूरुस्थो गर्भ-मभ्यागतस्तदा। आरावं मातृवर्गस्य भृगूणां क्षत्रियैर्वधे ॥ ६ ॥ संहारो हि यदा लोके भृगूणां क्षत्रियाधमैः। आगर्भोच्छेद-नात् क्रान्तस्तदा मां मन्युराविशत् ॥ ७ ॥ संपूर्णशोकाः किल मे मातरः पितरस्तथा। भयात्सर्वेषु लोकेषु नाधिजग्मुः परा-यणम् ॥ ८ ॥ तान् भृगूणां यदा दारान् कश्चिन्नाभ्युपपद्यत। माता तदा दधारेयमूरुणैकेन मां शुभा ॥ ९ ॥ प्रतिषेद्धा हि पापस्य यदा लोकेषु विद्यते। तदा सर्वेषु लोकेषु पापकृन्नोप पद्यते ॥ १० ॥ यदा तु प्रतिषेद्धारं पापो न लभते क्वचित्।

तिष्ठन्ति बहवो लोकास्तदा पापेषु कर्मसु ॥ ११ ॥ जानन्नपि च यः पापं शक्तिमान्न नियच्छति। ईशः सन् सोऽपि तेनैव कर्मणा संप्रयुज्यते ॥ १२ ॥ राजभिश्चेश्वरैश्चैव यदि वै पितरो मम। शक्तैर्नं शक्तिताच्चातुमिष्टं मत्वेह जीवितम् ॥ १३ ॥ अत एषामहं क्रुद्धो लोकानामीश्वरो ह्यहम्। भवताञ्च बचो जालकर्तुं समभिवर्त्तितुम् ॥ १४ ॥ ममापि चेच्छवेदेवमीश्वरस्य सतो महत्। उपेक्षमाणस्य पुनर्लोकानां विलियाद्व्ययम् ॥ १५ ॥ यस्मायं मन्युजो मेऽग्निर्लोकानादातुमिच्छति। इच्छेदेव च मामेव निष्टहीतः स्वतेजसा ॥ १६ ॥ अवताञ्च विजानामि सर्वलोकहितेप्सुताम्। तस्माद्विधध्वं यत्क्षेयो लोकानां मम चेश्वराः ॥ १७ ॥

पितर ऊचुः। य एष मन्युजस्तेऽग्निर्लोकानादातुमिच्छति। अप्सु तं सुब्रह्म भद्रं ते लोका ह्यप्सु प्रतिष्ठिताः ॥ १८ ॥ आपोमयाः सर्वरसाः सर्वमापोमयं जगत्। तस्मादप्सु विमुञ्चेमं क्रोधाग्निं द्विजसत्तम ॥ १९ ॥ अयं तिष्ठतु ते विप्र यदीच्छसि महोदधौ। मन्युजोऽग्निर्हविष्मापो लोका ह्यापोमयाः स्मृताः ॥ २० ॥ एवं प्रतिज्ञा सत्येयं तवानघ भविष्यति। न चैवं सामरा लोका गमिष्यन्ति पराभवम् ॥ २१ ॥

वशिष्ठ उवाच। ततस्तं क्रोधसम्भूतं और्वोऽग्निः वडवालये। उत्ससर्ज स चैवाप उपयुङ्क्ते महोदधौ ॥ २२ ॥ महद्वयशिरो भूत्वा यत्तद्वेदविदो विदुः। तमग्निमुद्गिरन् वक्त्रात्पिबत्यापो महोदधौ ॥ २३ ॥ तस्माच्चमपि भद्रं ते न लोकान् हन्तुमर्हसि। पराग्रर पराल्लोकाञ्ज्ञानन् ज्ञानवतां वर ॥ २४ ॥

इत्यादिपर्वणि चैत्ररथपर्वण्यौर्वोपाख्याने द्व्यशीत्यधिकशततोऽध्यायः ॥ १८२ ॥

—:०:—

गन्धर्व उवाच। एवमुक्तः स विप्रर्षिर्वसिष्ठेन महात्मना। न्ययच्छदात्मनः क्रोधं सर्वलोकपराभवात्॥ १॥ ईजे च स महातेजाः सर्ववेदविदांवरः। ऋषौ राक्षसमत्रेण शाक्तेयोऽथ पराशरः॥ २॥ ततो दृष्ट्वांश्च बालांश्च राक्षसान् स महामुनिः। दहाह वितते यज्ञे शक्तेर्वधमनुस्मरन्॥ ३॥ न हि तं वारयामास वसिष्ठो राक्षसां वधात्। द्वितीयामस्य मा भाङ्क्षं प्रतिज्ञामिति निश्चयात्॥ ४॥ तयाणां पावकानाञ्च सत्रे तस्मिन्महामुनिः। आसीत् पुरस्ताद्दीप्तानामुत्तुर्थ इव पावकः॥ ५॥ तेन यज्ञेन मुख्येन क्षयमाणेन शक्तिजः। तस्मिन् दीपितमाकाशं सूर्य्येणेव घनात्यये॥ ६॥ तं वसिष्ठादयः सर्वे मुनयश्च मेनिरे। तेजसा दीप्यमानं वै द्वितीयमिव भास्करम्॥ ७॥ ततः परमदुष्प्रापमन्यैर्ऋषिदारधीः। समाप्तिमगमत्सत्रं तमत्रिः सदुपागमत्॥ ८॥ तथा पुलस्त्यः पुलहः क्रतुश्चैव महाक्रतुः। तत्राजग्मुरमित्रघ्न राक्षसां जीवितेप्सया॥ ९॥ पुलस्त्यस्तु वधात्तेषां राक्षसां भरतर्षभ। उवाचेदं वचः पार्थ पराशरमरिन्दमम्॥ १०॥ कच्चित्तातपविघ्नं ते कच्चिन्नन्दसि पुत्रक। अजानतामदोषाणां सर्वेषां राक्षसां वधात्॥ ११॥ प्रजोच्छेदमिमं मह्यं न हि कर्त्तुमिहार्हसि। नैष तात द्विजातीनां धर्मो दृष्टस्तपस्विनाम्॥ १२॥ क्षम एव परो धर्मस्तमाचर पराशर। अधर्मिष्ठं वरिष्ठः सन् कुरुषे त्वं पराशर॥ १३॥ शक्तिस्त्वापि हि धर्मज्ञ नातिक्रान्तुमिहार्हसि। प्रजायाश्च समोच्छेदं न चैवं कर्त्तुमर्हसि॥ १४॥ शमाद्धि शक्तेर्वसिष्ठ तदा तदुपपादितम्। आत्मजेन स दोषेण शक्तिर्नीत इतो द्विजम्॥ १५॥ न हि तं राक्षसः कश्चिच्छक्तो भक्षयितुं पुनः। आत्मनैवात्मनस्तेन दृष्टो ह्यत्युग्रदर्शनः॥ १६॥ निमित्तमात्रमस्यासीद्विश्वामित्रः पराशर। राजा कल्माषपादश्च दिवमारुह्य मोदते॥ १७॥ ये च शक्तेवराः पुत्रा वसिष्ठस्य

महामुनेः। ते च सर्वे मुदा युक्ता मोदन्ते सहिताः सुरैः॥ १८॥ सर्वमेतद्वशिष्ठस्य विदितं वै महामुने। रक्षसाञ्च समुच्छेद एष तात तपस्विनाम्॥ १९॥ निमित्तभूतस्त्वं चात्र क्रतौ वाशिष्ठनन्दन। तत्क्षमं कुरु भद्रं ते समाप्तिमिदमस्तु ते॥ २०॥

गन्धर्व उवाच। एवमुक्तः पुलस्त्येन वशिष्ठेन च धीमता। तदा समापयामास सत्रं शाक्तो महामुनिः॥ २१॥ सर्वराक्षससंक्षाय सम्भृतं पावकं तदा। उत्तरे हिमवत्पार्श्वे उत्ससर्ज्ज महावने॥ २२॥ स तत्राद्यापि रक्षांसि दहन्नास्ते वनं च। भक्षयन्दृश्यते वह्निः सदा पर्वणि पर्वणि॥ २३॥

इत्यादिपर्वणि चैत्ररथपर्वण्यौर्वोपाख्याने त्र्यशीत्यधिकशततोऽध्यायः॥ १८३॥

अर्जुन उवाच। राज्ञा कल्माषपादेन गुरौ ब्रह्मविदांवरे। कारणं किं पुरस्कृत्य भार्य्या वै सन्नियोजिता॥ १॥ जानता वै परं धर्मं वशिष्ठेन महात्मना। अगम्यागमनं कस्मात् कृतं तेन महर्षिणा॥ २॥ अधर्मिष्ठं वशिष्ठेन श्रुतञ्चापि पुरा सखे। एतन्मे संशयं सर्वं छेत्तुमर्हसि पृच्छतः॥ ३॥

गन्धर्व उवाच। धनञ्जय निबोधेदं यस्मात् त्वं परिपृच्छसि। वशिष्ठं प्रति दुर्धर्ष तथामित्रसहं नृपम्॥ ४॥ कथितं ते मया सर्वं यथा प्राप्तः स पार्थिवः। शक्तिना भरतश्रेष्ठ वाशिष्ठेन महात्मना॥ ५॥ स तु शापवधं प्राप्तः क्रोधपर्य्याकुलेक्षणः। निर्जगाम पुराद्राजा सदारः परन्तपः॥ ६॥ अरण्यं निर्जनं गत्वा सदारः परिचक्रमे। नानाद्रुमगणाकीर्णं नानासत्त्वसमाकुलम्॥ ७॥ नानागुल्मलताच्छन्नं नानाद्रुमसमावृतम्। अरण्यं घोर-

सत्कारं प्राप्नुयात्सः परिव्रजन् ॥ ८ ॥ स कदाचित् क्षुधाविष्टो
भ्रमन् भक्ष्यमात्मनः । ददर्श सुपरिक्लिष्टः कस्मिंश्चिन्निर्जने
वने ॥ ९ ॥ ब्राह्मणं ब्राह्मणीं चैव मिथुनायोपसङ्गतौ । तौ तं
दृष्ट्वा सुवित्रस्तावुक्तवाक्यौ प्रधावितौ ॥ १० ॥ तयोः प्रद्रवतो-
र्विप्रं जग्राह नृपतिर्बलात् । दृष्ट्वा गृहीतं भर्त्तारमथ ब्राह्मण्य-
ब्रवीत ॥ ११ ॥ शृणु राजन्मम वचो यत्त्वां वक्ष्यामि सुव्रत ।
आदित्यवंशप्रभवस्त्वं हि लोके परिश्रुतः ॥ १२ ॥ अप्रमत्तः
क्षितौ धर्मे गुरुशुश्रूषणे रतः । प्राप्तोपहतदुर्धर्षं न पापं कर्त्तु-
मर्हसि ॥ १३ ॥ ऋतुकाले तु सम्प्राप्ते भर्तृव्यसनकर्षिता ।
अकृतार्थाऽहं भर्त्रा प्रसवार्थं समागता ॥ १४ ॥ प्रसीद नृपति-
श्रेष्ठ भर्त्तायं मे विसृज्यताम् । एवं विक्रोशमानायास्तस्यास्तु स
नृशंसवत् ॥ १५ ॥ भर्त्तारं भक्षयामास व्याघ्रो मृगमिवेप्सितम् ।
तस्याः क्रोधाभिभूताया बाष्पमुष्णमपतन् भुवि ॥ १६ ॥ सोऽग्निः
समभवद्दीप्तस्तद्दग्धुं देवं व्यदीपयत् । ततः सा शोकसन्तप्ता भर्तृ-
व्यसनकर्षिता ॥ १७ ॥ कस्मात्त्वयाहं राजर्षिमग्रपद्ब्राह्मणी
कृता । यस्मान्ममाकृतार्थायास्त्वया क्षुद्र नृशंसवत् ॥ १८ ॥ प्रेक्षन्त्या
भक्षितो मेऽद्य प्रियो भर्त्ता महात्मनः । तस्मात्त्वमपि दुर्बुद्धे
मच्छापपरिविक्षतः ॥ १९ ॥ पत्नीश्चतावनुप्राप्य सद्यस्त्यक्ष्यसि
जीवितम् । यस्य चर्षेर्वशिष्ठस्य त्वया पुत्रा विनाशिताः ॥ २० ॥
तेन सङ्गम्य ते भार्या तनयं जनयिष्यति । स ते वंशकरः पुत्रो
भविष्यति नृपाधम ॥ २१ ॥ एवं शप्त्वा तु राजानं सा तमाङ्गि-
रसी शुभा । तस्यैव सन्निधौ दीप्तं प्रविवेश हुताशनम् ॥ २२ ॥
वशिष्ठश्च महाभागः सर्वमेतदवैक्षत । ज्ञानयोगेन महता तपसा
च परन्तप ॥ २३ ॥ मुक्त्वाशापञ्च राजर्षिः कालेन महता ततः ।
ऋतुकालेऽभिपतितो मदयन्त्या निवारितः ॥ २४ ॥ न हि सस्मार
स नृपस्तं शापं शापमोहितः । देव्याः सोऽथ वचः श्रुत्वा संभ्रान्तो

नृपसत्तमः । तं शापमनुसंस्मृत्य पर्वतप्रकृतिं तदा ॥ २५ ॥
एतस्मात्कारणाद्राजा वशिष्ठं संन्ययोजयत् । स्वदारेषु नरश्रेष्ठ
शापदोषसमन्वितः ॥ २६ ॥

इत्यादिपर्वणि चैत्ररथपर्वणि वशिष्ठोपाख्याने चतुरशीत्यधिकशततोऽध्यायः ॥ १८४ ॥

अर्जुन उवाच । अस्माकमनुरूपो वै यः स्याद्गन्धर्व वेदवित् । पुरोहितस्तमाचक्ष्व सर्वं हि विदितं तव ॥ १ ॥

गन्धर्व उवाच । धवोयान्देवलस्यैष वने भ्राता तपस्यति । धौम्य उत्कोचके तीर्थे तं वृणीध्वं यदीच्छथ ॥ २ ॥

वैशम्पायन उवाच । ततोऽर्जुनोऽस्त्रमाग्नेयं ददौ तस्यथाविधि । गन्धर्वाय तदा प्रीतो वचनं चेदमब्रवीत् ॥ ३ ॥ त्वय्येव तावत् तिष्ठन्तु हया गन्धर्वसत्तम । कार्यकाले ग्रहीष्यामः स्वस्ति तेऽस्त्विति चाब्रवीत् ॥ ४ ॥ तेऽन्योन्यमभिसंपूज्य गन्धर्वः पाण्डवाश्च ह । रथ्याङ्गारशतीराद्यथाकामं प्रतस्थिरे ॥ ५ ॥ तत उत्कोचकं तीर्थं गत्वा धौम्यायमन्तु ते । तं वव्रुः पाण्डवा धौम्यं पौरोहित्याय भारत ॥ ६ ॥ तान् धौम्यः प्रतिजग्राह सर्ववेदविदांवरः । वन्येन फलमूलेन पौरोहित्येन चैव ह ॥ ७ ॥ ते समाधंसिरे लब्ध्वा श्रियं राज्यञ्च पाण्डवाः । मातृषष्ठास्तु ते तेन गुरुणा सङ्गतास्तदा । ब्राह्मणं तं पुरस्कृत्य पाञ्चालीं च स्वयम्वरे ॥ ८ ॥ पुरोहितेन तेनाथ गुरुणा सङ्गतास्तदा । नाथवन्तमिवात्मानं मेनिरे भरतर्षभाः ॥ ९ ॥ स हि वेदार्थतत्त्वज्ञस्तेषां गुरुरुदारधीः । तेन धर्मविदा पार्था याज्या सर्वविदा कृताः ॥ १० ॥ वीरांस्तु स हि तान्मेने प्राप्तराज्यान् स्वधर्मतः । बुद्धिवीर्यबलोत्साहैर्युक्तान्देवानिव द्विजः ॥ ११ ॥

श्रुतस्वस्त्ययनाख्येन ततस्ते मनुजाधिपाः । मेनिरे सहिता गन्तुं पाञ्चाल्यास्तं स्वयम्वरम् ॥ १२ ॥

इत्यादिपर्वणि चैत्ररथपर्वणि धौम्यपुरोहितकरणे पञ्चाशो-त्यधिकशततोऽध्यायः समाप्तश्च चैत्ररथपर्व ॥ १८५ ॥

अथ स्वयम्वरपर्व ॥ १२ ॥

वैशम्पायन उवाच । ततस्ते नरशार्दूला भ्रातरः पञ्च पाण्डवाः । प्रययुर्द्रौपदीं द्रष्टुं तञ्च देशं महोत्सवम् ॥ १ ॥ ते प्रयाता नरव्याघ्राः सह मात्रा परन्तपाः । ब्राह्मणान्दद्दशुर्मार्गे गच्छतः सङ्गतान् बहून् ॥ २ ॥ त ऊचुर्ब्राह्मणा राजन् पाण्डवान् ब्रह्मचारिणः । क्व भवन्तो गमिष्यन्ति कुतो वाभ्यागता इह ॥ ३ ॥

युधिष्ठिर उवाच । आगतानेकचक्राया; सोदर्य्यानेकचारिणः । भवन्तो वै विजानन्तु सह मात्रा द्विजर्षभाः ॥ ४ ॥

ब्राह्मणा ऊचुः । गच्छतास्मै व पाञ्चालान्द्रुपदस्य निवेशने । स्वयम्वरो महांस्तत्र भविता सुमहाधनः ॥ ५ ॥ एकसार्थं प्रयाताः स्म वयं तत्रैव गामिनः । तत्र ह्यद्भुतसङ्काशो भविता सुमहोत्सवः ॥ ६ ॥ यज्ञसेनस्य दुहिता द्रुपदस्य महात्मनः । वेदी-मध्यात्समुत्पन्ना पद्मपत्रनिभेक्षणा ॥ ७ ॥ दर्शनीयानवद्याङ्गी सुकुमारी मनस्विनी । धृष्टद्युम्नस्य भगिनी द्रोणशत्रोः प्रतापिनः ॥ ८ ॥ यो जातः कवची खड्गी सशरः सशरासनः । सुसमिद्धे महाबाहुः पावके पावकोपमः ॥ ९ ॥ स्वसा तस्यानवद्याङ्गी द्रौपदी तनुमध्यमा । नीलोत्पलसमो गन्धो यस्याः क्रोशात् प्रवाति वै ॥ १० ॥ यज्ञसेनस्य च सुतां स्वयम्वरकृतक्षणाम् । गच्छामो वै वयं द्रष्टुं तञ्च दिव्यं महोत्सवम् ॥ ११ ॥ राजानो राजपुत्राश्च यज्ञानो भूरिदक्षिणाः । स्वाध्यायवन्तः शुचयो

महात्मानो यतव्रताः ॥ १२ ॥ तरुणा दर्शनीयाश्च नानादेशसमागताः । महारथाः कृतास्त्राश्च समुपैष्यन्ति भूमिपाः ॥ १३ ॥ ते तत्र विविधान्दायान्विजयार्थं नरेश्वराः । प्रदास्यन्ति धनं गाश्च भक्ष्यं भोज्यञ्च सर्वशः ॥ १४ ॥ प्रतिगृह्य च तत्सर्वं दृष्ट्वा चैव स्वयम्वरम् । अनुभूयोत्सवं चैव गमिष्यामो यथेप्सितम् ॥ १५ ॥ नटा वैतालिकास्तत्र नर्त्तकाः सूतमागधाः । नियोधकाश्च देशेभ्यः समेष्यन्ति महाबलाः ॥ १६ ॥ एवं कौतूहलं कृत्वा दृष्ट्वा च प्रतिगृह्य च । सहास्माभिर्महात्मानः पुनः प्रतिनिवर्त्स्यथ ॥ १७ ॥ दर्शनीयांश्च वः सर्वान्देवरूपानवस्थितान् । समीक्ष्य कृष्णा वरयेत्पञ्चत्वेकतमं वरम् ॥ १८ ॥ अयं भ्राता तव श्रीमान्दर्शनीयो महाभुजः । नियुज्यमानो विजयेत्पञ्चत्वं द्रुविणं बहु ॥ १९ ॥

युधिष्ठिर उवाच । परमं भो गमिष्यामो द्रष्टुं चैव महोत्सवम् । भवद्भिः सहिताः सर्वे कन्यायास्तं स्वयम्वरम् ॥ २० ॥

इत्यादिपर्वणि स्वयम्वरपर्वणि पाण्डवगमने षड़शीत्यधिकशततोऽध्यायः ॥ १८६ ॥

—०:०—

वैशम्पायन उवाच । एवमुक्ताः प्रयातास्ते पाण्डवा जनमेजय । राज्ञा दक्षिणपाञ्चालान्द्रुपदेनाभिरक्षितान् ॥ १ ॥ ततस्तेषु महात्मानं प्रगृह्यात्मानमक्लमम् । ददृशुः पाण्डवा वीरा मुनिं द्वैपायनं तदा ॥ २ ॥ तस्मै यथावत्सत्कारं कृत्वा तेन च सत्कृताः । कथान्ते चाभ्यनुज्ञाताः प्रययुर्द्रुपदक्षयम् ॥ ३ ॥ पश्यन्तो रमणीयानि वनानि च सरांसि च । तत्र तत्र वसन्तश्च शनैर्जग्मुर्महारथाः ॥ ४ ॥ स्वाध्यायवन्तः शुचयो मधुराः प्रियवादिनः । आनुपूर्व्येण सम्प्राप्ताः पाञ्चालान् पाण्डुनन्दनाः ॥ ५ ॥ ते तु दृष्ट्वा पुरं तच्च स्कन्धावारञ्च पाण्डवाः । कुम्भकारस्य

शालायां निवासमकरिरे तदा ॥ ६ ॥ तत्र मैक्ष्यं समाजह्रुर्ब्राह्मणेभ्यो बुभुक्षिताः। तान् सम्प्राप्तांस्तथा वीरान् जज्ञिरे न नराः क्वचित् ॥ ७ ॥ यज्ञसेनस्य कामस्तु पाण्डवाय किरीटिने। कृष्णां दद्यामिति सदा न चैतद्विदुरोजसः ॥ ८ ॥ सोऽन्वेषमाणः कौन्तेयं पाञ्चाल्यो जनमेजय। हृतं धनुरनायच्यं कारयामास भारत ॥ ९ ॥ यन्त्रं वैहायसं चापि कारयामास क्षत्रियम्। तेन यन्त्रेण समितं राजा लक्ष्यं चकार सः ॥ १० ॥

द्रुपद उवाच। इदं सज्यं धनुः कृत्वा सज्यैरेभिश्च सायकैः। अतीत्य लक्ष्यं यो वेद्धा स लभ्या मत्सुतामिति ॥ ११ ॥

वैशम्पायन उवाच। इति स द्रुपदो राजा स्वयम्वरमघोषयत्। तच्छ्रुत्वा पार्थिवाः सर्वे समीयुस्तत्र भारत ॥ १२ ॥ ऋषयश्च महात्मानः स्वयम्वरदिदृक्षवः। दुर्योधनपुरोगाश्च सकर्णाः कुरवो नृप ॥ १३ ॥ ब्राह्मणाश्च महाभागा देवेभ्यः समुपागमन्। ततोऽर्चिता राजगणा द्रुपदेन महात्मना ॥ १४ ॥ उपोपविष्टा मञ्चेषु द्रष्टुकामाः स्वयम्वरम्। ततः पौरजनाः सर्वे सागरोद्भूतनिःस्वनाः ॥ १५ ॥ शिशुमारशिरः प्राप्य न्यविशंस्ते स पार्थिवाः। प्रागुत्तरेण नागराज्ञो भिभागे समे शुभे। समाजवाटः शुशुभे भवनैः सर्वतो वृतः ॥ १६ ॥ प्राकारपरिखोपेतो द्वारतोरणमण्डितः। वितानेन विचित्रेण सर्वतः समलङ्कृतः ॥ १७ ॥ दूर्याविशतसङ्कीर्णः पराद्यागुरुधूपितः। चन्दनोदकसिक्तश्च माल्यदामोपशोभितः ॥ १८ ॥ कैलासशिखरप्रख्यैर्नभस्तलविलेखिभिः। सर्वतः संवृतः शुभ्रैः प्रासादैः सुकृतोच्छ्रयैः ॥ १९ ॥ सुवर्णजालसम्वीतैर्मणिकुट्टिमभूषितैः। सुखारोहणसोपानैर्महासनपरिच्छदैः ॥ २० ॥ अग्राह्यममलच्छत्रैरगुरूत्तमवासितैः। हंसांशुवर्णैर्बहुभिरायोजनसुगन्धिभिः ॥ २१ ॥ असम्बाधशतद्वारैः शयनासनशोभितैः। वज्रधातुपिनद्धाङ्गैर्हिमवच्छिखरैरिव ॥ २२ ॥

तत्र नानाप्रकारेषु विमानेषु खलङ्कृताः । स्पर्द्धमानास्तदान्योन्यं निषेदुः सर्वपार्थिवाः ॥ २३ ॥ तत्रोपविष्टान्दृष्टद्युम्नश्चमूसत्त्वपराक्रमान् । राजसिंहान्महाभागान् कृष्णागुरुविभूषितान् ॥२४॥ महाप्रसादान् ब्राह्मण्यान् स्वराष्ट्रपरिरक्षिणः । प्रियान् सर्वस्य लोकस्य सुकृतैः कर्मभिः शुभैः ॥ २५ ॥ मञ्चेषु च परार्द्ध्येषु पौरजानपदा जनाः । कृष्णादर्शनसिद्ध्यर्थं सर्वतः समुपाविशन् ॥२६॥ ब्राह्मणैश्च सहिताः पाण्डवाः समुपाविशन् । ऋद्धिं पाञ्चालराजस्य पश्यन्तस्तामनुत्तमाम् ॥ २७ ॥ ततः समाजो ववृधे स राजन्दिवसान् बहून् । रत्नप्रदानबहुलः शोभितो नटनर्त्तकैः ॥ २८ ॥ वर्त्तमाने समाजे तु रमणीयेऽह्नि षोड़शे । आप्लुताङ्गी सुवसना सर्वाभरणभूषिता ॥ २९ ॥ मालाञ्च सस्रजादाय काञ्चनीं समलङ्कृताम् । अवतीर्णा ततो रङ्गं द्रौपदी भरतर्षभ ॥ ३० ॥ पुरोहितः सोमकानां मन्त्रविद्ब्राह्मणः शुचिः । परिस्तीर्य्य जुहावाग्निमाज्येन विधिवत्तदा ॥३१॥ स तर्पयित्वा ज्वलनं ब्राह्मणान् स्वस्ति वाच्य च । वारयामास सर्वाणि वादित्राणि समन्ततः ॥ ३२ ॥ निःशब्दे तु कृते तस्मिन् धृष्टद्युम्नो विशाम्पते । कृष्णामादाय विधिवन्मेघदुन्दुभिनिःस्वनः ॥ ३३ ॥ रङ्गमध्ये गतस्तत्र मेघगम्भीरया गिरा । वाक्यसुस्रैर्जगादेदं श्लक्ष्णमर्थवदुत्तमम् ॥३४॥ इदं धनुर्लक्ष्यमिमे च बाणाः शृण्वन्तु मे भूपतयः समेताः । छिद्रेण यन्त्रस्य समर्पयद्भिः शरैः शितैर्योमचरैर्दृढाङ्गैः ॥ ३५ ॥ एतन्महत्कर्म करोति यो वै कुलेन रूपेण बलेन युक्तः । तस्याद्य भार्य्या भगिनी ममेयं कृष्णा भवित्री न मृषा ब्रवीमि ॥ ३६ ॥ तानेवमुक्त्वा द्रुपदस्य पुत्रः पश्चादिदं तां भगिनीमुवाच । नाम्ना च गोत्रेण च कर्मणा च सङ्कीर्त्तयन् भूमिपतीन् समेतान् ॥ ३७ ॥

इत्यादिपर्वणि स्वयम्वरपर्वणि धृष्टद्युम्नवाक्ये सप्ताशीत्यधिकशततोऽध्यायः ॥ १८७ ॥

धृष्टद्युम्न उवाच । दुर्योधनो दुर्विषहो दुर्मुखो दुष्प्रधर्षणः ।
विविंशतिर्विकर्णश्च सहो दुःशासनस्तथा ॥ १ ॥ युयुत्सुर्वातवेगश्च
भीमवेगवरस्तथा । उग्रायुधो बलाकी च कराक्षायुर्विरोचनः ॥ २ ॥
कुण्डकश्चित्रसेनश्च सुवर्चाः कनकध्वजः । नन्दको वाहुशाली च
तुङ्गखड्गो विकटस्तथा ॥ ३ ॥ एते चान्ये च बहवो धार्त्तराष्ट्रा
महाबलाः । कर्णेन सहिता वीरास्त्वदर्थं समुपागताः ॥ ४ ॥
असङ्ख्याता महात्मानः पार्थिवाः क्षत्रियर्षभाः । शकुनिः सौबल-
श्चैव वृषकोऽथ हृहलः ॥ ५ ॥ एते गान्धारराजस्य सुताः सर्वे
समागताः । अश्वत्थामा च भोजश्च सर्वशस्त्रभृतां वरौ ॥ ६ ॥
समवेतौ महात्मानौ त्वदर्थे समलङ्कृतौ । हृहन्तो मणिमांश्चैव
दण्डधारश्च पार्थिवः ॥ ७ ॥ सहदेवजयत्सेनौ मेघसन्धिश्च पार्थिवः ।
विराटः सह पुत्राभ्यां शङ्खेनोत्तरेण च ॥ ८ ॥ वार्द्धक्षेमिः
सुधर्मा च सेनाबिन्दुश्च पार्थिवः । सुकेतुः सह पुत्रेण सुनाम्ना
च सुवर्चसा ॥ ९ ॥ सुचित्रः सुकुमारश्च चित्रः सत्यधृतिस्तथा ।
सूर्यध्वजो रोचमानो नीलश्चित्रायुधस्तथा ॥ १० ॥ अंशुमां-
श्चेकितानश्च श्रेणिमांश्च महाबलः । समुद्रसेनपुत्रश्च चन्द्रसेनः
प्रतापवान् ॥ ११ ॥ जलसन्धः पितापुत्रौ विदण्डो दण्ड एव
च । पौण्ड्रको वासुदेवश्च भगदत्तश्च वीर्यवान् ॥ १२ ॥ कलिङ्ग-
स्ताम्रलिप्तश्च पत्तनाधिपतिस्तथा । मद्रराजस्तथा शल्यः सह-
पुत्रो महारथः ॥ १३ ॥ रुक्माङ्गदेन वीरेण तथा रुक्मरथेन च ।
कौरव्यः सोमदत्तश्च पुत्राश्चास्य महारथाः ॥ १४ ॥ समवेताश्चय-
शूरा भूरिर्भूरिश्रवाः प्रभुः । सुदक्षिणश्च काम्बोजो दृढधन्वा
च पौरवः ॥ १५ ॥ हृहलः सुषेणश्च शिविरौशीनरस्तथा ।
पटच्चरनिहन्ता च काक्षधिपतिस्तथा ॥ १६ ॥ सङ्कर्षणो वासु-
देवो रौक्मिणेयश्च वीर्यवान् । साम्बश्च चारुदेष्णश्च प्रद्युम्निः
सगदस्तथा ॥ १७ ॥ अक्रूरः सात्यकिश्चैव कृतवर्मा च महामतिः ।

कृतवर्मा च हार्दिक्यः पृथुर्विपृथुरेव च ॥ १८ ॥ विदूरथस्य कङ्कश्च शङ्कुश्च सगवेषणः। आशावहो निरुद्वश्च समीकः सारिमेजयः ॥ १९ ॥ वीरो वातपतिश्चैव भिल्लो पिण्डारकस्तथा। उशीनरस्य विक्रान्तो वृष्णयस्ते प्रकीर्त्तिताः ॥ २० ॥ भगीरथो बृहत्क्षत्रः सैन्धवश्च जयद्रथः। वृषद्रथो वाह्लिकश्च श्रुतायुश्च महारथः ॥२१॥ उलूकः कैतवो राजा चित्राङ्गदशुभाङ्गदौ। वत्सराजश्च मतिमान् कोशलाधिपतिस्तथा ॥ २२ ॥ शिशुपालश्च विक्रान्तो जरासन्धस्तथैव च। एते चान्ये च बहवो नानाजनपदेश्वराः ॥२३॥ त्वदर्थमागता भद्रे क्षत्रियाः प्रथिता भुवि। एते भेत्स्यन्ति विक्रान्तास्त्वदर्थे लक्ष्यमुत्तमम्। विध्येत य इदं लक्ष्यं वरयेथाः शुभेऽद्य तम् ॥ २४ ॥

इत्यादिपर्वणि स्वयम्वरपर्वणि राजनामकीर्त्तने अष्टाशीत्यधिकशततोऽध्यायः ॥ १८८ ॥

—•:•—

वैशम्पायन उवाच। तेऽलङ्कृताः कुण्डलिनो युवानः परस्परं स्पर्द्धमाना नरेन्द्राः। अस्त्रं बलं चात्मनि मन्यमानाः सर्वे समुत्पेतुरुदायुधास्ते ॥ १ ॥ रूपेण वीर्य्येण कुलेन चैव शीलेन वित्तेन च यौवनेन। समिद्धदर्पा मदवेगभिन्ना मत्ता यथा हैमवता गजेन्द्राः ॥ २ ॥ परस्परं स्पर्द्धया प्रेक्षमाणाः सङ्कल्पजेनाभिपरिप्लुताङ्गाः। कृष्णा मदैवेत्यभिभाषमाणा नृपासनेभ्यः सहसोदतिष्ठन् ॥ ३ ॥ ते क्षत्रिया रङ्गगताः समेता जिगीषमाणा द्रुपदात्मजां ताम्। चकाशिरे पर्वतराजकन्यामुमां यथा देवगणाः समेताः ॥ ४ ॥ कन्दर्पबाणाभिनिपीड़िताङ्गाः कृष्णागतैस्ते हृदयैर्नरेन्द्राः। रङ्गावतीर्णां द्रुपदात्मजार्थं द्वेषं प्रचक्रुः सुहृदोऽपि तत्र ॥ ५ ॥ अथाचयुर्देवगणा विमानैरुद्रादित्या

वसवोऽश्विनौ च। साध्याश्च सर्वे मरुतस्तथैव यमं पुरस्कृत्य धनेश्वरञ्च ॥ ६ ॥ दैत्याः सुपर्णाश्च महोरगाश्च देवर्षयो गुह्यकाश्चारणाश्च। विश्वावसुर्नारदपर्वतौ च गन्धर्वमुख्याः सह चाप्सरोभिः ॥ ७ ॥ हलायुधस्तत्र जनार्दनश्च वृष्ण्यन्धकाश्चैव यथाप्रधानम्। प्रेक्षां स चक्रुर्मुदमुद्वहन्तो स्थिताश्च कृष्णस्य मते महान्तः ॥ ८ ॥ दृष्ट्वा तु तान्मत्तगजेन्द्ररूपान् पद्माभिपद्मानिव वारणेन्द्रान्। भस्माहुताङ्गानिव हव्यवाहान् कृष्णः प्रहृष्यौ यदुवीरमुख्यः ॥ ९ ॥ अर्जुनं रामाय युधिष्ठिरं च भीमं सजिष्णुं च यमौ च वीरौ। घनैः घनैस्तान् प्रसमीक्ष्य रामो जनार्दनं प्रीतमना ददर्श ॥ १० ॥ अन्ये तु वीरा वृषपुत्रपौत्राः कृष्णागतैर्नैकमनःस्वभावैः। व्यावर्त्तमाना ददृशुर्न तान् वै सन्दष्टदन्तच्छदताम्रनेत्राः ॥ ११ ॥ तथैव पार्थाः पृथुवाहवस्ते वीरौ यमौ चैव महानुभावौ। तां द्रौपदीं प्रेक्ष्य तदा च सर्वे कन्दर्पबाणाभिहता बभूवुः ॥ १२ ॥ देवर्षिगन्धर्वसमाकुलं तत् सुपर्णनागासुरसिद्धजुष्टम्। दिव्येन गन्धेन समाकुलञ्च दिव्यैश्च पुष्पैरवकीर्य्यमाणम् ॥ १३ ॥ महास्वनैर्दुन्दुभिनादितैश्च बभूव तत् सङ्कुलमन्तरीक्षम्। विमानसम्बाधमभूत्तदानीं वेणुवीणापणवानुनादम् ॥ १४ ॥ ततस्तु ते राजगणाः क्रमेण कृष्णानिमित्तं कृतविक्रमाश्च। सङ्कर्षणं दुर्योधनश्चित्रयोधनिक्राथसुनीथवक्राः ॥ १५ ॥ कलिङ्गवङ्गाधिपपाण्ड्यपौण्ड्रा विदेहराजो यवनाधिपश्च। अन्ये च नानानृपपुत्रपौत्रा राष्ट्राधिपाः पङ्कजपत्रनेत्राः ॥ १६ ॥ किरीटहाराङ्गदचारुबाहुभिर्विभूषिताङ्गाः पृथुवाहवस्ते। अनुक्रमं विक्रमसत्त्वयुक्ता बलेन वीर्य्येण च तेजमाना ॥ १७ ॥ तत्कार्मुकं संहननोपपन्नं सज्यं न शेकुर्मनसापि कर्त्तुम्। ते विक्रमन्तः स्फुरता दृढेन विचित्र्यमाणा धनुषा नरेन्द्राः ॥ १८ ॥ विचेष्टमाना धरणीतलस्था यथाबलं चैव गुणक्रमाच्च। गतौजसः

कुण्डलकिरीटहारा विनिष्क्रसन्तः श्रमयाम्बभूवुः ॥ १९ ॥ हाहा-कृतं तद्वनुषा हठेन विस्रस्तहाराङ्गदचक्रवालम् । क्षणान्निमित्तं विनिवृत्तकामं राज्ञां तदा मण्डलमार्त्तमासीत् ॥ २० ॥ सर्वान्नृपांस्तान् प्रसमीक्ष्य कर्णो धनुर्द्धराणां प्रवरो जगाम । उद्धृत्य दूर्णं धनुरुद्यतं तत्सज्यं चकाराशु युयोज बाणान् ॥ २१ ॥ दृष्ट्वा स्थितं मेनिरे पाण्डुपुत्रा भित्त्वा नीतं लक्ष्यवरं धरायाम् । धनुर्धरा रागशतप्रतिघ्नमत्यग्निसोमार्कमयार्कपुत्रम् ॥ २२ ॥ दृष्ट्वा तु तं द्रौपदी वाक्यमुच्चैर्जगाद नाहं वरयामि सूतम् । सामर्षहासं प्रसमीक्ष्य सूर्य्यं तत्याज कर्णः क्षुरितं धनुस्तत् ॥ २३ ॥ एवं तेषु निवृत्तेषु क्षत्रियेषु समन्ततः । चेदीनामधिपो वीरो बलवान-न्तकोपमः ॥ २४ ॥ दमघोषसुतो धीरः शिशुपालो महामतिः । धनुरादायमानस्तु जानुभ्यामगमन्महीम् ॥ २५ ॥ ततो राजा महावीर्य्यो जरासन्धो महाबलः । धनुषोऽभ्यासमागत्य तस्थौ गिरिरिवाचलः ॥ २६ ॥ धनुषा पीड्यमानस्तु जानुभ्यामगमन्महीम् । तत उत्थाय राजा स स्वराष्ट्राण्यभिजग्मिवान् ॥२७॥ ततः शल्यो महावीर्य्यो मद्रराजो महाबलः । तदप्यारोप्यमाणस्तु जानुभ्यामगमन्महीम् ॥ २८ ॥ तस्मिंस्तु संभ्रान्तजने समाजे निश्चिन्नवादेषु जनाधिपेषु । कुन्तीसुतो जिष्णुरियेष कर्त्तुं सज्यं धनुस्तल्लघुवरं प्रवीरः ॥ २९ ॥

इत्यादिपर्वणि स्वयम्वरपर्वणि राजपराजुखे जन-
नवत्यधिकशततोऽध्यायः ॥ १८९ ॥

—०:०—

वैशम्पायन उवाच । यदा निवृत्ता राजानो धनुषः सज्य-कर्मणः । अथोदतिष्ठद्विप्राणां मध्याज्जिष्णुरुदारधीः ॥ १ ॥ उदक्रोशन्विप्रमुख्या विधुन्वन्तोऽजिनानि च । दृष्ट्वा सज्यस्थितं

पार्थमिन्द्रकेतुसमप्रभम् ॥ २ ॥ केचिदासन्विमनसः केचिदासन् मुदान्विताः । ऋद्धः परस्परं केचिन्निपुणा बुद्धिजीविनः ॥३॥ यत्कर्णगल्यप्रमुखैः क्षत्रियैर्लोकविश्रुतैः । नानतं वज्रवद्भिर्हि धनुर्वेदपरायणैः ॥ ४ ॥ तत्कथं त्वकृतास्त्रेण प्राणतो दुर्बलीयसा । वटुमात्रेण शक्यं हि सज्यं कर्त्तुं धनुर्हि जाः ॥ ५ ॥ अवहास्या भविष्यन्ति ब्राह्मणाः सर्वराजसु । कर्मण्यस्मिन्समुत्क्षिप्ते चापल्यादपरीक्षिते ॥ ६ ॥ यद्येष दर्पाद्दर्पाह्यो ब्राह्मणचापलात् । प्रस्थितो धनुरायन्तुं वाच्यतां साधु मा गमत् ॥ ७ ॥

ब्राह्मणा ऊचुः । नावहास्या भविष्यामो न च लाघवमास्थिताः । न च विद्विष्टतां लोके गमिष्यामो महीक्षिताम् ॥८॥ केचिदाहुर्युवा श्रीमान्नागराजकरोपमः । पीनस्कन्धोरुबाहुश्च धैर्येण हिमवानिव ॥ ९ ॥ सिंहखेलगतिः श्रीमान्मत्तनागेन्द्रविक्रमः । सम्भाव्यमस्मिन् कर्मदमुत्साहाच्चानुमीयते ॥ १० ॥ शक्तिरस्य महोत्साहा न ह्यशक्तः स्वयं व्रजेत् । न च तद्विद्यते किञ्चित्कर्म लोकेषु यन्नवेत् ॥ ११ ॥ ब्राह्मणानामसाध्यञ्च हृषु संस्थानचारिषु । अभक्ष्या वायुभक्ष्याश्च फलाहारा दृढव्रताः ॥१२॥ दुर्बला अपि विप्रा हि बलीयांसः स्वतेजसा । ब्राह्मणो नावमन्तव्यः सदसद्वा समाचरन् ॥ १३ ॥ सुखं दुःखं महद्वृत्तं कर्म यत्समुपागतम् । जामदग्न्येन रामेण निर्जिताः क्षत्रिया युधि ॥ १४ ॥ पीतः समुद्रोऽगस्त्येन अगाधो ब्रह्मतेजसा । तस्माद्ब्रुवन्तु सर्वेऽत्र वटुरेष धनुर्महान् ॥ १५ ॥ आरोपयतु शीघ्रं वै तथेत्यूचुर्द्विजर्षभाः । एवं तेषां विलपतां विप्राणां विविधा गिरः ॥ १६ ॥ अर्जुनो धनुषोऽभ्यासे तस्थौ गिरिरिवाचलः । स तद्धनुः परिक्रम्य प्रदक्षिणमथाकरोत् ॥ १७ ॥ प्रणम्य शिरसा देवमीशानं वरदं प्रभुम् । स्मृत्वा च मनसा कृष्णं जग्राहे चार्जुनो धनुः ॥ १८ ॥ यत्पार्थिवैरुक्मसुनीथवक्त्रैराधेयदुर्योधनगल्य-

शाल्वैः । तदा धनुर्वेदपरैर्नृसिंहैः कृतं न सज्यं महतोऽपि यत्नात् ॥ १९ ॥ तदर्जुनो वीर्यवतां सदर्पस्तदैन्द्रिरिन्द्रावरज-प्रभावः । सज्यञ्च चक्रे निमिषान्तरेण शरांश्च जग्राह दशार्द्ध-सङ्ख्यान् ॥ २० ॥ विव्याध लक्ष्यं निपपात तच्च छिद्रेण भूमौ सहसातिविद्धम् ॥ २१ ॥ ततोऽन्तरीक्षे च बभूव नादः समाज-मध्ये च महान्निनादः ॥ २२ ॥ पुष्पाणि दिव्यानि ववर्ष देवः पार्थस्य मूर्द्धं द्विषतां निहन्तुः । चैलानि विव्यधुस्तत्र ब्राह्म-णाश्च सहस्रशः ॥ २३ ॥ विलक्षितास्तत्रशकुर्हाहाकारांश्च सर्वशः । व्यपतंश्चात्र नभसः समन्तात् पुष्पवृष्टयः ॥ २४ ॥ शताङ्गानि च तूर्याणि वादकाः समवादयन् । सूतमागधसङ्घाश्च व्यस्तुवंस्तत्र सुस्वराः ॥ २५ ॥ तं दृष्ट्वा द्रुपदः प्रीतो बभूव रिपुसूदनः । सह सैन्यैश्च पार्थस्य साहाय्यार्थमियेष सः ॥ २६ ॥ तस्मिंस्तु शब्दे महति प्रवृद्धे युधिष्ठिरो धर्मभृतां वरिष्ठः आवासमेवोपजगाम शीघ्रं सार्द्धं यमाभ्यां पुरुषोत्तमाभ्याम् ॥ २७ ॥ विद्धन्तु लक्ष्यं प्रस-मीक्ष्य कृष्णा पार्थञ्च चक्रप्रतिमं निरीक्ष्य । आदाय शुक्लाम्बर-माल्यदाम जगाम कुन्तीसुतमुत्स्मयन्ती ॥ २८ ॥ स तामुपादाय विजित्य रङ्गे द्विजातिभिस्तैरभिपूज्यमानः । रङ्गान्निरक्राम-दचिन्त्यकर्मा पत्न्या तया चाप्यनुगम्यमानः ॥ २९ ॥

इत्यादिपर्वणि स्वयम्वरपर्वणि लक्ष्यच्छेदने नव-त्यधिकशततोऽध्यायः ॥ १९० ॥

वैशम्पायन उवाच । तस्मै दित्सति कन्यान्तु ब्राह्मणाय तदा नृपे । कोप आसीन्महीपानामालोक्यान्योन्यमन्तिकात् ॥ १ ॥ अस्मानयमतिक्रम्य तृणीकृत्य च सङ्गतान् । दातुमिच्छति विप्राय द्रौपदीं योषितांवराम् ॥ २ ॥ अवरोप्येह वृक्षान्तु फलकाले

निपात्यते । निहन्मैनं दुरात्मानं योऽयमस्मान्न मन्यते ॥ ३ ॥ न ह्यर्हत्येष सम्मानं नापि हृद्यक्षमं गुणैः । हन्मैनं सह पुत्रेण दुराचारं नृपद्विषम् ॥ ४ ॥ अयं हि सर्वानाक्षिप्य सत्कृत्य च नराधिपान् । गुणवद्भोजयित्वान्नं ततः पश्चान्न मन्यते ॥ ५ ॥ अस्मिन्राजसमावाये देवानामिव सन्निधे । किमयं सहसं कञ्चिन्नृपतिं नैव दृष्टवान् ॥ ६ ॥ न च विप्रेष्वधीकारो विद्यते वरणं प्रति । स्वयम्वरः क्षत्रियाणामितीयं प्रथिता श्रुतिः ॥ ७ ॥ अथवा यदि कन्येयं न च कञ्चिद्वृबुभूषति । अग्नावेनां प्रतिक्षिप्य यास्याम राष्ट्राणि पार्थिवाः ॥ ८ ॥ ब्राह्मणो यदि चापल्यान्मोहाद्वा कृतवानिदम् । विप्रियं पार्थिवेन्द्राणां नैष वध्यः कथञ्चन ॥ ९ ॥ ब्राह्मणार्थं हि नो राज्यं जीवितं हि वसूनि च । पुत्रपौत्रं च यच्चान्यदस्माकं विद्यते धनम् ॥ १० ॥ अवमानभयाच्चैव स्वधर्मस्य च रक्षणात् । स्वयम्वराणामन्येषां माभूद्वैवंविधा गतिः ॥ ११ ॥ इत्युक्त्वा राजशार्दूला हृष्टाः परिघबाहवः । द्रुपदन्तु जिघांसन्तः सायुधाः समुपाद्रवन् ॥ १२ ॥ तान् गृहीतशरासनान् क्रुद्धानापततो बहून् । द्रुपदो वीक्ष्य सन्त्रासाद्ब्राह्मणाञ्शरणं गतः ॥ १३ ॥ वेगेनापततस्तांस्तु प्रभिन्नानिव वारणान् । पाण्डुपुत्रौ महेष्वासौ प्रतियातावरिन्दमौ ॥ १४ ॥ ततः समुत्पेतुरुदायुधास्ते महीक्षितो बद्धतलाङ्गुलित्राः । जिघांसमानाः कुरुराजपुत्रावमर्षयन्तोऽर्जुनभीमसेनौ ॥ १५ ॥ ततस्तु भीमोऽद्भुतभीमकर्मा महाबलो वज्रसमानसारः । उत्पाट्य दोर्भ्यां द्रुममेकवीरो निष्पतयामास यथा गजेन्द्रः ॥ १६ ॥ तं वृक्षमादाय रिपुप्रमाथी दण्डीव दण्डं पितृराज उग्रम् । तस्थौ समीपे पुरुषर्षभस्य पार्थस्य पार्थः पृथुदीर्घबाहुः ॥ १७ ॥ तत् प्रेक्ष्य कर्मातिमनुष्यबुद्धिजिष्णुः स हि भ्रातुरचिन्त्यकर्मा । विसिस्मिये चापि भयं विहाय तस्थौ

धनुर्ग्रहं महेन्द्रकर्मा ॥ १८ ॥ तत् प्रेक्ष्य कर्मातिमनुष्यबुद्धि-
र्जिष्णोः सहभ्रातुरचिन्त्यकर्मा । दामोदरो भ्रातरमुग्रवीर्यं हला-
युधं वाक्यमिदं बभाषे ॥ १९ ॥ य एष सिंहर्षभखेलगामी महा-
द्रुमः कर्षति तालमात्रम् । एषोऽर्जुनो नात्र विचार्यमस्ति यद्यस्ति
सङ्कर्षण वासुदेवः ॥ २० ॥ यस्त्वेष हृत्वं तरसावभज्य राज्ञां
निकारे सहसा प्रवृत्तः । दृकोदरान्यान्य इहैतदद्य कर्त्तुं समर्थः
समरे पृथिव्याम् ॥ २१ ॥ योऽसौ पुरस्तात्कमलायताक्षस्तुमुर्महा-
सिंहगतिर्विनीतः । गौरः प्रलम्बोज्ज्वलचारुघोणो विनिःसृतः
सोऽच्युत धर्मपुत्रः ॥ २२ ॥ यौ तौ कुमारावि कार्त्तिकेयौ
द्वावश्विनेयाविति मे वितर्कः । श्रुता हि तस्माज्जतुवेश्मदाहा-
न्मया श्रुताः पाण्डुसुताः पृथा च ॥ २३ ॥ तमब्रवीन्निर्ज्जलतो-
यदाभो हलायुधोऽनन्तरजं प्रतीतः । प्रीतोऽस्मि दृष्ट्वा हि पितृ-
स्वसारं पृथां विमुक्तां सह कौरवाग्र्यैः ॥ २४ ॥

इत्यादिपर्वणि स्वयम्वरपर्वणि कृष्णवाक्ये एकनवत्य-
धिकशततोऽध्यायः ॥ १९१ ॥

वैशम्पायन उवाच । अजिनानि विधुन्वन्तः करकांश्च द्विज-
र्षभाः । ऊचुस्ते भीमं कर्त्तव्या वयं योत्स्यामहे परान् ॥ १ ॥
तानेवं वदतो विप्रानर्जुनः प्रहसन्निव । उवाच प्रेक्षका भूत्वा
यूयं तिष्ठत पार्श्वतः ॥ २ ॥ अहमेनानजिह्माग्रैः शतशो विकि-
रञ्छरैः । वारयिष्यामि संक्रुद्धान्मन्त्रैराशीविषानिव ॥ ३ ॥ इति
तद्वचनान्यस्य शुल्कावाप्तं महाबलः । भ्रातृभीमेन सहितस्त्रयो
गिरिरिवाचलः ॥ ४ ॥ ततः कर्णमुखान्दृष्ट्वा क्षत्रियान् युद्धदुर्म-
दान् । सम्पेततुरभीतौ तौ गजौ प्रति गजानिव ॥ ५ ॥ ऊचुश्च
वाचः परुषास्ते राजानो युयुत्सवः । आहवे हि द्विजस्यापि वधो

हृष्टो युयुत्सतः ॥ ६ ॥ इत्येवमुक्त्वा राजानः सहसा उद्दुद्रुविरे जान् । ततः कर्णो महातेजा जिष्णुं प्रति ययौ रणे ॥ ७ ॥ युद्धार्थी वासिताहेतोर्गजः प्रतिगजं यथा । भीमसेनं ययौ शल्यो मद्राणामीश्वरो बली ॥ ८ ॥ दुर्योधनादयः सर्वे भ्रातृभिः सह सङ्गताः । बहुपूर्वमयत्नेन प्रत्ययुध्यन्त दाशार्हे ॥ ९ ॥ ततोऽर्जुनः प्रत्यविध्यदापतन्तं शितैः शरैः । कर्णं वैकर्तनं श्रीमान्विक्रम्य बलवद्बलुः ॥ १० ॥ तेषां शराणां वेगेन शितानां तिग्मतेजसाम् । विमुह्यमानो राधेयो यत्नात्तमनुधावति ॥ ११ ॥ तावुभावप्यनिर्देश्यौ लाघवाज्जयतां वरौ । अयुध्येतां सुसंरब्धावन्योऽन्यविजिगीषिणौ ॥ १२ ॥ कृते प्रतिकृतं पश्य पश्य बाहुबलं मे । इति शूरार्थवचनैरभाषेतां परस्परम् ॥ १३ ॥ ततोऽर्जुनस्य भुजयोर्वीर्यमप्रतिमं भुवि । ज्ञात्वा वैकर्तनः कर्णः संरब्धः समयोधयत् ॥ १४ ॥ अर्जुनेन प्रयुक्तांस्तान्बाणान्वेगवतस्तदा । प्रतिहत्य ननादोच्चैः सैन्यानि तदपूजयन् ॥ १५ ॥

कर्ण उवाच । तुष्यामि ते विप्रमुख्य भुजवीर्यस्य संयुगे । अविषादस्य चैवास्त्र बलास्त्रविजयस्य च ॥ १६ ॥ किं त्वं साक्षादनुर्वेदो रामो वा विप्रसत्तम । अथ साक्षादरिष्टयः साक्षाद्वा विष्णुरच्युतः ॥ १७ ॥ आत्मप्रच्छादनार्थं वै बाहुवीर्यमुपाश्रितः । विप्ररूपं विधायेदं मन्ये मां प्रतियुध्यसे ॥ १८ ॥ न हि मामाहवे क्रुद्धमन्यः साक्षाच्छचीपतेः । पुमान् योधयितुं शक्तः पाण्डवाद्वा किरीटिनः ॥ १९ ॥

तमेवं वादिनं तत्र फाल्गुनः प्रत्यभाषत । नास्मि कर्ण धनुर्वेदो नास्मि रामः प्रतापवान् ॥ २० ॥ ब्राह्मणोऽस्मि युधां श्रेष्ठ सर्वशस्त्रभृतांवरः । ब्राह्मे पौरन्दरे चास्त्रे निष्ठितो गुरुशासनात् स्थितोऽस्म्यद्य रणे जेतुं त्वां वै वीर स्थिरो भव ॥ २१ ॥

वैशम्पायन उवाच । एवमुक्तस्तु राधेयो युद्धात्कर्णो व्यवर्तत । ब्राह्मं तेजस्तदाजय्यं मन्यमानो महारथः ॥ २२ ॥

अपरस्त्रिभ्रणोर्ह्रे वीरौ शल्यदुर्योधनौ । बलिनौ युद्धसम्पन्नौ विद्यया च बलेन च ॥ २३ ॥ अन्योन्यमाह्वयन्तौ तु मत्ताविव महागजौ । मुष्टिभिर्जानुभिश्चैव निघ्नन्तावितरेतरम् ॥ २४ ॥ प्रकर्षणाकर्षणयोरभ्याकर्षविकर्षणैः । आचकर्षतुरन्योन्यं मुष्टिभिश्चापि जघ्नतुः ॥ २५ ॥ ततश्चटचटाशब्दः सुघोरो ह्यभवत्तयोः । पाषाणसम्पातनिभैः प्रहारैरभिजघ्नतुः ॥ २६ ॥ मुहूर्तं तौ तदान्योन्यं समरे पर्यकर्षताम् । ततो भीमः समुत्क्षिप्य बाहुभ्यां शल्यमाहवे । अपातयत् क्षुब्धचेष्टो ब्राह्मणा जहसुस्तदा ॥ २७ ॥ तच्चार्द्धं भीमसेनश्चकार मुखवर्धभः । यच्छल्यं पातितं भूमौ नावधीद्बलिनं बली ॥ २८ ॥ पातिते भीमसेनेन शल्ये कर्णे च शङ्किते । शाङ्कृताः सर्वराजानः परिवव्रुर्वृकोदरम् ॥ २९ ॥ ऊचुश्च सचिवास्तत्र साध्विमौ ब्राह्मणर्षभौ । विज्ञायेतां कृजन्मानौ कृनिवासौ तथैव च ॥ ३० ॥ को हि राधासुतं कर्णं शक्तो योधयितुं रणे । अन्यत्र रामाद्द्रोणाद्वा पाण्डवाद्वा किरीटिनः ॥ ३१ ॥ कृष्णाद्वा देवकीपुत्रात् कृपाद्वापि शरद्वतः । को वा दुर्योधनं शक्तः प्रतियोधयितुं रणे ॥ ३२ ॥ तथैव मद्राधिपतिं शल्यं बलवतां वरम् । बलदेवाद्ऋते वीरात् पाण्डवाद्वा वृकोदरात् ॥ ३३ ॥ वीराद्दुर्योधनाद्वान्यः शक्तः पातयितुं रणे । क्रियतामवहारोऽस्माद्युद्धाद्ब्राह्मणसत्कृतात् ॥ ३४ ॥ ब्राह्मणा हि सदा रक्ष्याः सापराधापि नित्यदा । अथैतानुपलभ्येह पुनर्योत्स्याम हृष्टवत् ॥ ३५ ॥

वैशम्पायन उवाच । तत्कर्म भीमस्य समीक्ष्य कृष्णः कुन्तीसुतौ तौ परिषङ्कमानः । निवारयामास महीपतींस्तान्धर्मेण लब्धेत्यनुनीय सर्वान् ॥ ३६ ॥ एवं ते विनिवृत्तास्तु युद्धाद्युद्धविशारदाः । यथागतं ययुः सर्वे विस्मिता राजसत्तमाः ॥ ३७ ॥ इत्युक्तो ब्रह्मोत्तरो राज्ञः पाञ्चाली ब्राह्मणैर्हृता । इति श्रुत्वा

प्रययुर्ये तवासन् समागताः ॥ ३८ ॥ ब्राह्मणेतु प्रतिच्छन्नौ रौरवाजिनवासिभिः । कृष्णेन जग्मतुर्यौ तु भीमसेनधनञ्जयौ ॥ ३९ ॥ विमुक्तौ जनसम्बाधाच्छत्रुभिः परिविक्षतौ । कृष्णयानुगतौ तत्र वृषीरौ तौ विरेजतुः ॥ ४० ॥ पौर्णमास्यां घनैर्मुक्तौ चन्द्रसूर्य्याविवोदितौ । तेषां माता बहुविधं विनाशं पर्य्यचिन्तयत् ॥ ४१ ॥ अनागच्छत्सु पुत्रेषु भैक्ष्यकालेऽभिगच्छति । धार्तराष्ट्रैर्हृता नु स्युरिच्याय कुरुपुङ्गवाः ॥ ४२ ॥ मायान्वितैर्वा रक्षोभिः सुघोरैर्दृढवैरिभिः । विपरीतं मतं जातं व्यासस्यापि महात्मनः ॥ ४३ ॥ इत्येवं चिन्तयामास सुतस्नेहाकुला पृथा । ततः सुप्रजनप्राये दुर्दिने मेघसंप्लुते ॥ ४४ ॥ मध्यंदिनापराह्णे तु घनैः सूर्य्ये वृतावृतः । ब्राह्मणैः प्राविशत्तत्र जिष्णुर्भार्गववेश्म तत् ॥ ४५ ॥

इत्यादिपर्वणि स्वयम्वरपर्वणि पाञ्चालप्रत्यागमने द्विनवत्यधिकशततोऽध्यायः ॥ १९२ ॥

वैशम्पायन उवाच । गत्वा तु तां भार्गवकर्मशालां पार्थौ पृथां प्राप्य महानुभावौ । तां याज्ञसेनीं परमप्रतीतौ भिक्षेत्यवेदयतां नराग्र्यौ ॥ १ ॥ कुटीगता सा त्वनवेक्ष्य पुत्रौ प्रोवाच भुङ्क्ष्वेति समेत्य सर्वे । पश्चाच्च कुन्ती प्रसमीक्ष्य कृष्णां कष्टं मयाभाषितमित्युवाच ॥ २ ॥ सा धर्मभीता परिचिन्तयन्ती तां याज्ञसेनीं परमप्रतीताम् । पाणौ गृहीत्वोपजगाम कुन्ती युधिष्ठिरं वाक्यमुवाच चेदम् ॥ ३ ॥

कुन्त्युवाच । इयन्तु कन्या द्रुपदस्य राज्ञस्त्वयानुजाभ्यां मयि संनिविष्टा । यद्युचितं पुत्र मयापि चोक्तं समेत्य भुङ्क्ष्वेति नृप

प्रमादात् ॥ ४ ॥ एतत् कथं नानृतमुक्तमस्य भवेत् कुरूणामृषभ ब्रवीहि। पाञ्चालराजस्य सुतामधर्मो न चोपसर्क्षेत न विभ्रमेच्च ॥ ५ ॥

वैशम्पायन उवाच। स एवमुक्तो मतिमान् शूरवीरो माद्र्या सुहृत्तं तु विचिन्त्य राजा। कुन्तीं समाश्वास्य कुरुप्रवीरो धनञ्जयं वाक्यमिदं बभाषे ॥ ६ ॥ त्वया जिता फाल्गुन याज्ञसेनी त्वयैव शोभिष्यति राजपुत्री। प्रज्वाल्यतामग्निरभिप्रसाद्य गृह्याग्न्यगारे विधिवत्त्वमस्याः ॥ ७ ॥

अर्जुन उवाच। मा मां नरेन्द्र त्वमधर्मभाजं कृष्णा न धर्मोऽयमभिष्टदृष्टः। भवान्निदेश्यः प्रथमं ततोऽयं भीमो महाबाहुरचिन्त्यकर्मा ॥ ८ ॥ अहं ततो नकुलोऽनन्तरो मे पश्चादयं सहदेवस्तरस्वी। वृकोदरोऽस्माच्च यमौ च राजन्नियञ्च कन्या भवतो नियोज्या ॥ ९ ॥ एवं गते यत्करणीयमत्र धर्म्यं यशस्यं कुरु तद्विचिन्त्य। पाञ्चालराजस्य हितञ्च यत् स्यात् प्रयाधि सर्वं स्म वयं स्थिताः स्मे ॥ १० ॥

वैशम्पायन उवाच। जिष्णोर्वचनमाज्ञाय भक्तिस्नेहसमन्वितम्। दृष्टिं निवेश्यथामासुः पाञ्चाल्यां पाण्डुनन्दनाः ॥ ११ ॥ दृष्ट्वा ते तत्र पश्यन्तीं सर्वे कृष्णां यशस्विनीम्। सस्मरुश्चान्योन्यमासीना हृदयैस्तामधारयन् ॥ १२ ॥ तेषान्तु द्रौपदीं दृष्ट्वा सर्वेषामनितौजसाम्। सस्मरुश्चेन्द्रियग्रामं प्रादुरासीन्मनोभवः ॥ १३ ॥ काम्यं हि रूपं पाञ्चाल्या विधात्रा विहितं स्वयम्। बभूवाधिकमन्याभ्यः सर्वभूतमनोहरम् ॥ १४ ॥ तेषामाकारभावज्ञः कुन्ती पुत्रो युधिष्ठिरः। द्वैपायनवचः कृत्स्नं सस्मार मनुजर्षभाः ॥ १५ ॥ अब्रवीत् स हि तान् भ्रातॄन्नियो भेदभयान्नृपः। सर्वेषां द्रौपदी भार्य्या भविष्यति हि नः शुभा ॥ १६ ॥

वैशम्पायन उवाच। भ्रातुर्वचस्तत् प्रसमीक्ष्य सर्वे ज्येष्ठस्य

पाण्डोस्तनयास्तदानीम्। तमेवार्थं ध्यायमाना मनोभिः सर्वे च ते तस्थुरदीनसत्त्वाः॥ १७॥ हृषीकवीरस्तु कुरुप्रवीरानार्यसमानः सहरौहिणेयः। जगाम तां भार्गवकर्मशालां यत्रास्ते ते पुरुषप्रवीराः॥ १८॥ तत्रोपविष्टं हृयुदीर्घबाहुं ददर्श कृष्णः सहरौहिणेयः। अजातशत्रुं परिवार्य तांस्चाप्युपोपविष्टान् ज्वलनप्रकाशान्॥ १९॥ ततोऽब्रवीद्वासुदेवोऽभिगम्य कुन्तीसुतं धर्मभृतांवरिष्ठम्। कृष्णोऽहमस्मीति निपीड्य पादौ युधिष्ठिरस्याजमीढस्य राज्ञः॥ २०॥ तथैव तस्याप्यतुरौहिणेयस्तौ चापि हृष्टाः कुरवोऽभ्यनन्दन्। पितृष्वसुश्चापि वसुप्रवीरावगृह्णतां भारतमुख्य पादौ॥ २१॥ अजातशत्रुश्च कुरुप्रवीरः पप्रच्छ कृष्णं कुशलं विलोक्य। कथं वयं वासुदेव त्वयेह गूढा वसन्तो विदिताश्च सर्वे॥ २२॥ तमब्रवीद्वासुदेवः प्रहस्य गूढोऽप्यग्निर्न्यायत एव राजन्। तं विक्रमं पाण्डवेयानतीत्य कोऽन्यः कर्त्ता विद्यते मानुषेषु॥ २३॥ दिष्ट्या सर्वे पावकाद्विप्रमुक्ता यूयं घोरात् पाण्डवाः सत्यसाहाः। दिष्ट्या पापो धृतराष्ट्रस्य पुत्रः सहामात्यो न सकामोऽभविष्यत्॥ २४॥ भद्रं वोऽस्तु निहितं यन्न हायां विवर्द्धध्वं ज्वलना दूषयमानाः। मा वो विदुः पार्थिवाः केचिदेव यास्यावहे शिबिरायैव तावत्। सोऽनुज्ञातः पाण्डवेनाग्रयशीः प्रायाच्छौरिं बलदेवेन सार्द्धम्॥ २५॥

इत्यादिपर्वणि स्वयम्वरपर्वणि रामकृष्णागमने त्रिनवत्यधिकशततमोऽध्यायः॥ १९३॥

—०:०—

वैशम्पायन उवाच। धृष्टद्युम्नस्तु पाञ्चाल्यः पृष्ठतः कृष्णनन्दनौ। अन्वगच्छत्तदा यान्तौ भार्गवस्य निवेशने॥ १॥ सोऽन्वायमानः पुरुषानवधार्य समन्ततः। सपञ्चारात्रिकीजो-

ऽभूद्भार्गवस्य निवेशने ॥ २ ॥ सायच्च भीमस्तु रिपुप्रमाथी जिष्णु-
श्च मौ चापि महानुभावौ। भैक्ष्यं चरित्वा तु युधिष्ठिराय निवे-
दयाञ्चक्रुरदीनसत्त्वाः ॥ ३ ॥ ततस्तु कुन्ती द्रुपदात्मजां तामु-
वाच काले वचनं वदान्या। त्वमग्रमादाय कुरुष्व भद्रे बलिञ्च
विप्राय च देहि भिक्षाम् ॥ ४ ॥ ये चान्नमिच्छन्ति ददस्व तेभ्यः
परिश्रिता ये परितो मनुष्याः। ततश्च शेषं प्रविभज्य शीघ्रमर्द्ध-
ञ्चतुर्थं मम चाशनस्य ॥ ५ ॥ अर्द्धन्तु भीमाय च देहि भद्रे य
एष नागर्षभतुल्यरूपः। गौरो युवा संहननोपपन्न एषो हि
वीरो बहुभक्षकश्च ॥ ६ ॥ सा दृष्टरूपेव तु राजपुत्री तस्या
वचः साध्वविशङ्कमाना। यथावदुक्तं प्रचकार साध्वी ते चापि
सर्वे बुभुजुस्तदन्नम् ॥ ७ ॥ कुशेषु भूमौ शयनं चकार माद्रीसुतः
सहदेवस्तरस्वी। यथा स्वकीयान्यजिनानि सर्वे संस्तीर्य वीराः
सुषुपुर्दृढ़ास्वाम् ॥ ८ ॥ अगल्भशास्त्रामभितो दिशन्तु शिरांसि
तेषां कुरुसत्तमानाम्। कुन्ती पुरस्तात्तु बभूव तेषां पादान्तरे
चाथ बभूव कृष्णा ॥ ९ ॥ अशेत भूमौ सह पाण्डुपुत्रैः पादोप-
धानीव कृता कुशेषु। न तत्र दुःखं मनसापि तस्या न चाव-
मेने कुरुपुङ्गवांस्तान् ॥ १० ॥ ते तत्र शूराः कथयाम्बभूवुः कथा
विचित्राः पृतनाधिकाराः। अस्त्राणि दिव्यानि रथांश्च नागान्
खड्गान् गदाश्चापि परश्वधांश्च ॥ ११ ॥ तेषां कथास्ताः परि-
कीर्त्यमानाः पञ्चालराजस्य सुतस्तदानीम्। शुश्राव कृष्णां च
तदा निषण्णां ते चापि सर्वे ददृशुर्मनुष्याः ॥ १२ ॥ धृष्टद्युम्नो
राजपुत्रस्तु सर्वं वृत्तं तेषां कथितञ्चैव रात्रौ। सर्वं राज्ञे द्रुप-
दायाखिलेन निवेदयिष्यंस्वरितो जगाम ॥ १३ ॥ पाञ्चालराजस्तु
विषण्णरूपस्तान् पाण्डवानप्रतिविन्दमानः। धृष्टद्युम्नं पश्च-
दृच्छन्महात्मा क्व सा गता केन नीता च कृष्णा ॥ १४ ॥ कच्चिन्न
शूद्रेण न हीनजेन वैश्येन सा कर्मदोषवत्ता। कच्चित्पदं मूर्ध्नि

न पङ्क्तदिग्धं क्वचिन्न माला पतिता श्मशाने ॥ १५ ॥ क्वचित् सवर्णप्रवरो मनुष्य र्दृष्टक्षवर्णोऽप्युत एव क्वचित्। क्वचिन्न वामो मम मूर्ध्नि पादः कृष्णाभिमर्षेण कृतोऽद्य पुत्र ॥ १६ ॥ क्वचिन्न तप्ये परमप्रतीतः संयुज्य पार्थेन नरर्षभेण। वदस्व तत्त्वेन महानुभाव कोऽसौ विजेता दुहितुर्ममाद्य ॥ १७॥ विचित्रवीर्यस्य सुतस्य क्वचित् कुरुप्रवीरस्य म्रियन्ति पुत्राः। क्वचित्तु पार्थेन यवीयसाद्य धनुर्गृहीतं निहतश्च लक्ष्यम् ॥ १८ ॥

इत्यादिपर्वणि स्वयम्वरपर्वणि धृष्टद्युम्नप्रत्यागमने चतुर्नवत्यधिकशततोऽध्यायः समाप्तश्च स्वयम्वरपर्व ॥ १९४ ॥

—:०:—

अथ वैवाहिकपर्व ॥ १३ ॥

वैशम्पायन उवाच। ततस्तयोक्तः परिहृष्टरूपः पित्रे शशंसाथ स राजपुत्रः। धृष्टद्युम्नः सोमकानां प्रवर्हो वृत्तं यथा येन हृता च कृष्णा ॥ १ ॥

धृष्टद्युम्न उवाच। योऽसौ युवा व्यायतलोहिताक्षः कृष्णाजिनी देवसमानरूपः। यः कार्मुकाग्र्यं कृतवानधिज्यं लक्ष्यञ्च यः पातितवान् पृथिव्याम् ॥ २ ॥ असज्जमानश्च ततस्तरस्वी हुतो द्विजाग्र्यैरभिपूज्यमानः। चक्राम वज्रीव दितेः सुतेषु सर्वेश्च देवैर्ऋषिभिश्च जुष्टः ॥ ३ ॥ कृष्णा प्रगृह्याजिनमन्वयात्तं नगं यथा नागवधूः प्रहृष्टा। अह्रियमाणेषु नराधिपेषु क्रुद्धेषु वै तत्र समापतत्सु ॥ ४ ॥ ततोऽपरः पार्थिवसंघमध्ये महद्रुमारुज्य महीप्ररोहम्। प्रकालयन्नेव स पार्थिवौघान् क्रुद्धोऽन्तकः प्राणभृतो यथैव ॥ ५ ॥ तौ पार्थिवानां मिषतां नरेन्द्र कृष्णामुपादाय गतौ नराग्र्यौ। विभ्राजमानाविव चन्द्रसूर्यौ बाह्यां पुराद्भार्गवकर्मशालाम् ॥ ६ ॥ ततोपविष्टाङ्गिरिवानलस्य तेषां

जनित्रीति मम प्रतर्कः । तथाविधैरेव नरप्रवीरैरुपोपविष्टैस्त्रिभिरग्निकल्पैः ॥ ७ ॥ तस्यास्ततस्तावभिवाद्य पादौ उक्ता च कृष्णा त्वभिवादयेति । स्थिताश्च तत्रैव निवेद्य कृष्णां भिक्षाप्रचाराय गता नराग्र्याः ॥ ८ ॥ तेषान्तु भैक्ष्यं प्रतिगृह्य कृष्णा दत्त्वा बलिं ब्राह्मणसाच्च कृत्वा । ताञ्चैव हृद्यां परिवेष्य तांश्च नरप्रवीरान् स्वयमप्यभुङ्क्त ॥ ९ ॥ सुप्तास्तु ते पार्थिव सर्व एव कृष्णा च तेषां चरणोपधाने । आसीत् पृथिव्यां शयनञ्च तेषां दर्भाजिनाग्र्यास्तरणोपपन्नम् ॥ १० ॥ ते नर्दमाना इव कालमेघाः कथा विचित्राः कथयाञ्चभूवुः । न वैश्यशूद्रौपयिकीः कथास्ता न च द्विजानां कथयन्ति वीराः ॥ ११ ॥ निःसंशयं क्षत्रियपुङ्गवास्ते यथा हि युद्धं कथयन्ति राजन् । आशा हि नो व्यक्तमियं समृद्धा सुक्ष्मान् हि पार्थान् शृणुमोऽग्निदाहात् ॥ १२ ॥ यथा हि लक्ष्यं निहतं धनुश्च सज्यं कृतं तेन तथा प्रसह्य । यथा च भाषन्ति परस्परन्ते श्रुत्वा ध्रुवं ते प्रचरन्ति पार्थाः ॥ १३ ॥ ततः स राजा द्रुपदः प्रहृष्टः पुरोहितं प्रेषयामास तेषाम् । विद्याम युष्मानिति भाषमाणो महात्मनः पाण्डुसुताञ्च कञ्चित् ॥ १४ ॥ गृहीतवाक्यो नृपतेः पुरोधा गत्वा प्रशंसामभिधाय तेषाम् । वाक्यं समग्रं नृपतेर्यथावदुवाच चानुक्रमविक्रमेण ॥ १५ ॥ विज्ञातुमिच्छत्यवनीश्वरो वः पाञ्चालराजो वरदो वरार्हाः । लक्ष्यस्य वेद्धारमिमं हि दृष्ट्वा हर्षस्य नान्तं प्रतिपद्यते सः ॥ १६ ॥ आख्यात च ज्ञातिकुलानुपूर्वीं पदं शिरःसु द्विषतां कुरुध्वम् । प्रह्लादयध्वं हृदयं ममेदं पाञ्चालराजस्य च सानुगस्य ॥ १७ ॥ पाण्डुर्हि राजा द्रुपदस्य राज्ञः प्रियः सखा चात्मसमो बभूव । तस्यैष कामो दुहिता ममेयं स्नुषां प्रदास्यामि हि कौरवाय ॥ १८ ॥ अयं हि कामो द्रुपदस्य राज्ञो हृदि स्थितो नित्यमनिन्दिताङ्गाः । यद्-र्जुनो वै पृथुदीर्घबाहुर्धर्मेण विन्देत सुतां ममैताम् ॥ १९ ॥ कृतं

हि तत् स्यात् सुकृतं ममेदं यशश्च पुण्यञ्च हितं तदेतत् । यथोक्तवाक्यं हि पुरोहितं स्यात् ततो विनीतं समुदीक्ष्य राजा ॥ २० ॥ समीपतो भीममिदं शशास प्रदीयतां पाद्यमर्घ्यं तथास्मै । मान्यः पुरोधा द्रुपदस्य राज्ञस्तस्मै प्रयोज्याभ्यधिका हि पूजा ॥ २१ ॥ भीमस्ततस्तत् कृतवान्नरेन्द्र तां चैव पूजां प्रतिगृह्य हर्षात् । सुखोपविष्टन्तु पुरोहितं तदा युधिष्ठिरो ब्राह्मणमित्युवाच ॥२२॥ पाञ्चालराजेन सुता निसृष्टा स्वधर्मदृष्टेन यथा न कामात् । प्रदिष्टशुल्का द्रुपदेन राज्ञा सा तेन वीरेण तथानुदृत्ता ॥ २३ ॥ न तत्र वर्षेषु कृता विवक्षा न चापि शौल्के न कुले न गोत्रे । कृतेन सख्येन हि कार्मुकेन विद्धेन लक्ष्येण हि विप्रकृष्टा ॥ २४ ॥ सेयं तथा तेन महाबलेन कृष्णा जिता पार्थिवसंघमध्ये । कथं नु सौमकिरद्य राजा सन्तापमर्हत्यसुखाय कर्तुम् ॥ २५ ॥ कामश्च योऽसौ द्रुपदस्य राज्ञः स चापि संपत्स्यति पार्थिवस्य । संग्रामरूपां हि नरेन्द्रकन्यामिमामहं ब्राह्मण साधु मन्ये ॥ २६ ॥ न तद्दुरन्दबलेन शक्यं मौर्व्यां समायोजयितुं तथाहि । न चाकृतास्त्रेण न हीनजेन शक्यं तथा पातयितुं हि लक्ष्यम् ॥२७॥ तस्माच्च तापं दुहितुर्निमित्तं पाञ्चालराजोऽर्हति कर्तुमद्य । न चापि तत्यातनमन्यथेह कर्तुं हि शक्यं भुवि मानवेन ॥ २८ ॥ एवं ब्रुवत्येव युधिष्ठिरे तु पाञ्चालराजस्य समीपतोऽन्यः । तत्रा-जगामाशु नरो द्वितीयो निवेदयिष्यन्निव सिद्धमन्नम् ॥ २९ ॥

इत्यादिपर्वणि वैवाहिकपर्वणि पुरोहितागमने
षण्णवत्यधिकशततोऽध्यायः ॥ १९५ ॥

दूत उवाच । जत्यार्थमन्वं द्रुपदेन राज्ञा विवाहहेतोरुपसंस्कृतञ्च । तदाप्नुवध्वं कृतसर्वकार्य्याः; कृष्णां च तत्रैव चिरं न कार्य्यम् ॥ १ ॥ इमे रथाः काञ्चनपद्मचित्रा सदश्वयुक्ता वसुधाधिपार्हाः । एतान् समारुह्य परैत सर्वे पाञ्चालराजस्य निवेश्मनं तत् ॥ २ ॥

वैशम्पायन उवाच । ततः प्रयाताः कुरुपुङ्गवास्ते पुरोहितं तं परियाप्य सर्वे । आस्थाय यानानि महान्ति तानि कुन्ती च कृष्णा च सहैकयाने ॥ ३ ॥ श्रुत्वा तु वाक्यानि पुरोहितस्य तान् शुक्लवान् भारत धर्मराजः । जिज्ञासयैवाथ कुरूत्तमानां द्रव्याण्यनेकान्युपसंजहार ॥ ४ ॥ फलानि माल्यानि च संस्कृतानि वर्माणि चर्माणि तथासनानि । गाश्चैव राजन्नथ चैव रत्नुर्बीजानि चान्यानि कृषीनिमित्तम् ॥ ५ ॥ अन्येषु शिल्पेषु च यान्यपि स्युः सर्वाणि कृत्यान्यखिलेन तत्र । क्रीडानिमित्तान्यपि यानि तत्र सर्वाणि तत्रोपजहार राजा ॥ ६ ॥ वर्माणि चर्माणि च भासमन्ति खड्गा महान्तोऽथ रथाश्च चित्राः । धनूंषि चाग्राणि शरांश्च चित्राः शक्त्यृष्टयः काञ्चनभूषणाश्च ॥ ७ ॥ प्रासा भुशुण्डाश्च परश्वधाश्च सांग्रामिकञ्चैव तथेह सर्वम् । अभ्यासमान्युत्तमवस्तुवन्ति तथैव वासो विविधञ्च तत्र ॥ ८ ॥ कुन्ती तु कृष्णां परिगृह्य साध्वीमन्तःपुरं द्रुपदस्याविवेश । स्त्रियश्च तां कौरवराजपत्नीं प्रत्यर्चयामासुरदीनसत्त्वाः ॥ ९ ॥ तान् सिंहविक्रान्तगतीन्निरीक्ष्य महर्षभाक्षानजिनोत्तरीयान् । गूढोत्तरांसान् भुजगेन्द्रभोगप्रलम्बबाहून् पुरुषप्रवीरान् ॥ १० ॥ राजा च राज्ञः सचिवाश्च सर्वे सुताश्च राज्ञः सुहृदश्चथैव । प्रेष्याश्च सर्वे निखिलेन राजन् हर्षं समापेतुरतीव तत्र ॥ ११ ॥ ते तत्र वीराः परमासनेषु सपादपीठेष्वविशङ्कमानाः । यथानुपूर्वं विविशुर्नराग्र्यास्तथा महार्हेषु न विस्मयन्तः ॥ १२ ॥ उच्चावचं

यार्थिवभोजनीयं पात्रीषु जाम्बूनदराजतीषु । दासाश्च दास्यश्च सुहृष्टवेषाः सम्भोजकाश्चाप्युपजह्रुरन्नम् ॥ १३ ॥ ते तत्र भुक्त्वा पुरुषप्रवीरा यथामकामं सुहृदं प्रतीताः । उत्क्रम्य सर्वाणि वस्त्रूनि राजन् सांग्रामिकं ते विविधुर्नृवीराः ॥ १४ ॥ तल्लक्षयित्वा द्रुपदस्य पुत्रो राजा च सर्वैः सह मन्त्रिमुख्यैः । समर्थयामासुरपेत्य हृष्टाः कुन्तीसुतान् पार्थिव राजपुत्रान् ॥ १५ ॥

इत्यादिपर्वणि वैवाहिकपर्वणि सांग्रामिकद्रव्यग्रहणे षण्णवत्यधिकशततोऽध्यायः ॥ १९६ ॥

—०:०—

वैशम्पायन उवाच । तत आहूय पाञ्चाल्यो राजपुत्रं युधिष्ठिरम् । परिग्रहेण ब्राह्मेण परिमृह्य महाद्युतिः ॥ १ ॥ पप्रच्छ द्रुपदो राजा कुन्तीपुत्रं सुवर्चसम् । कदज्ञानीम भवतः क्षत्रियान् ब्राह्मणानुत ॥ २ ॥ वैश्यान् वा गुणसम्पन्नानथवा शूद्रयोनिजान् । मायामास्थाय वा विप्रांश्चरतः सर्वतो दिशम् ॥ ३ ॥ कृष्णाहेतोरनुप्राप्ता देवाः सन्दर्शनार्थिनः । ब्रवीतु नो भवान् सत्यं मन्देहो ह्यत्र नो महान् ॥ ४ ॥ अपि नः संशयस्यान्ते मनः सन्तुष्टिमावहेत् । अपि नो भागधेयानि शुभानि स्युः परन्तप ॥ ५ ॥ इच्छया ब्रूहि तत्सत्यं सत्यं राजसु शोभते । इष्टापूर्त्तेन च तथा वक्तव्यमनृतं न तु ॥ ६ ॥ श्रुत्वा ह्यमरसङ्काश तव वाक्यमरिन्दम । ध्रुवं विवाहकरणमास्थास्यामि विधानतः ॥ ७ ॥

युधिष्ठिर उवाच । मा राजन्विमना भूस्त्वं पाञ्चाल्य प्रीतिरस्तु ते । ईप्सितस्ते ध्रुवः कामः सम्वृत्तोऽयमसंशयम् ॥ ८ ॥ वयं हि क्षत्रिया राजन् पाण्डोः पुत्रा महात्मनः । ज्येष्ठं मां विद्धि कौन्तेयं भीमसेनार्जुनाविमौ ॥ ९ ॥ आभ्यां तव सुता राजन्निर्जिता राजसंसदि । यमौ च तत्र कुन्ती च यत्र कृष्णा व्यव-

स्थिता ॥ १० ॥ व्येतु ते मानसं दुःखं क्षत्रियाः स्मो नरर्षभ । पद्मिनीव सुतप्तं ते ह्रदादन्यह्रदं गता ॥ ११ ॥ इति तथ्यं महाराज सर्वमेतदुवीमि ते । भवान् हि गुरुरस्माकं परमश्च परायणम् ॥ १२ ॥

वैशम्पायन उवाच । ततः स द्रुपदो राजा हर्षव्याकुललोचनः । प्रतिवक्तुं मुदा युक्तो नाशकत्तं युधिष्ठिरम् ॥ १३ ॥ यत्नेन तु स तं हर्षं संनिगृह्य परन्तपः । अनुरूपं तदा वाचा प्रत्युवाच युधिष्ठिरम् ॥ १४ ॥ पप्रच्छ चैनं धर्मात्मा यथा ते प्रद्रुताः पुरात् । स तस्मै सर्वमाचख्यावानुपूर्व्येण पाण्डवः ॥ १५ ॥ तच्छ्रुत्वा द्रुपदो राजा कुन्तीपुत्रस्य भाषितम् । विगर्हयामास तदा धृतराष्ट्रं नरेश्वरम् ॥ १६ ॥ आश्वासयामास च तं कुन्तीपुत्रं युधिष्ठिरम् । प्रतिजज्ञे च राज्याय द्रुपदो वदतां वरः ॥ १७ ॥ ततः कुन्ती च कृष्णा च भीमसेनार्जुनावपि । यमौ च राज्ञा सन्दिष्टं विविशुर्भवनं महत् ॥ १८ ॥ तत्र ते न्यवसन् राजन्यज्ञसेनेन पूजिताः । प्रत्याश्वस्तस्ततो राजा सह पुत्रैरुवाच तम् ॥ १९ ॥ गृह्णातु विधिवत् पाणिमद्यायं कुरुनन्दनः । पुण्येऽहनि महाबाहुरर्जुनः कुरुतां क्षणम् ॥ २० ॥

वैशम्पायन उवाच । तमब्रवीत्ततो राजा धर्मात्मा च युधिष्ठिरः । ममापि दारसम्बन्धः कार्य्य स्तावद्विगम्यते ॥ २१ ॥

द्रुपद उवाच । भवान् वा विधिवत्पाणिं गृह्णातु दुहितुर्मम । यस्य वा मन्यसे वीर तस्य कृष्णामुपादिश ॥ २२ ॥

युधिष्ठिर उवाच । सर्वेषां महिषी राजन्द्रौपदी नो भविष्यति । एवं प्रव्याहृतं पूर्वं मम माता विशाम्पते ॥ २३ ॥ अहञ्चाप्यनिविष्टो वै भीमसेनश्च पाण्डवः । पार्थेन विजिता चेषा रत्नभूता सुता तव ॥ २४ ॥ एष नः समयो राजन् रत्नस्य सह भोजनम् । न च तं हातुमिच्छामः समयं राजसत्तम ॥ २५ ॥

सर्वेषां धर्मतः कृष्णा महिषी नो भविष्यति। आनुपूर्व्येण सर्वेषां गृह्णातु ज्वलने करान् ॥ २६ ॥

द्रुपद उवाच। एकस्य बह्वो विहिता महिष्यः कुरुनन्दन। नैकस्या बहवः पुंसः श्रूयन्ते पतयः क्वचित् ॥ २७ ॥ लोकवेद-विरुद्धं त्वं नाधर्मं धर्मविच्छुचिः। कर्तुमर्हसि कौन्तेय कस्मात्ते बुद्धिरीदृशी ॥ २८ ॥

युधिष्ठिर उवाच। सूक्ष्मो धर्मो महाराज नास्य विद्मो वयं गतिम्। पूर्वेषामानुपूर्व्येण यातं वर्त्मानुयामहे ॥ २९ ॥ न मे वागनृतं प्राह नाधर्मे धीयते मनः। एवं चैव वदत्यम्बा मम चैतन्मनोगतम् ॥ ३० ॥ एष धर्मो ध्रुवो राजंश्चरैनमविचारयन्। मा च शङ्का तत्र ते स्यात्क्रियद्दि पार्थिव ॥ ३१ ॥

द्रुपद उवाच। त्वञ्च कुन्ती च कौन्तेय धृष्टद्युम्नश्च मे सुतः। कथयन्त्वितिकर्त्तव्यं श्वः काले करवामहे ॥ ३२ ॥

वैशम्पायन उवाच। ते समेत्य ततः सर्वे कथयन्ति स्म भारत। अथ द्वैपायनो राजन्नभ्यागच्छद्यदृच्छया ॥ ३३ ॥

इत्यादिपर्वणि वैवाहिकपर्वणि द्वैपायनागमने सप्त-
नवत्यधिकशततोऽध्यायः ॥ १९७ ॥

—:०:—

वैशम्पायन उवाच। ततस्ते पाण्डवाः सर्वे पाञ्चाल्यश्च महा-यशाः। प्रत्युत्थाय महात्मानं कृष्णं सर्वेऽभ्यवादयन् ॥ १ ॥ प्रति-नन्द्य स तां पूजां दृष्ट्वा कृष्णसमन्ततः। आसने काञ्चने शुभ्रे निषसाद महामनाः ॥ २ ॥ अनुज्ञातासु ते सर्वे कृष्णेनामित-तेजसा। आसनेषु महार्हेषु निषेदुर्हिपदां वराः ॥ ३ ॥ ततो मुहूर्त्तान्मधुरां वाणीमुच्चार्य पार्षतः। पप्रच्छ तं महात्मानं द्रौपद्यर्थं विशाम्पते ॥ ४ ॥ कथमेका बहूनां स्याद्धर्मपत्नी न सङ्करः। एतन्मे भगवान् सर्वं प्रब्रवीतु यथातथम् ॥ ५ ॥

व्यास उवाच। अस्मिन्धर्मे विप्रलब्धे लोकवेदविरोधके। यस्य यस्य मतं यद्यच्छ्रोतुमिच्छामि तस्य तत् ॥ ६ ॥

द्रुपद उवाच। अधर्मोऽयं मम मतो विरुद्धो लोकवेदयोः। न चोक्ता विद्यते पत्नी बहूनां द्विजसत्तम ॥ ७ ॥ न चाप्याचरितः पूर्वैरयं धर्मो महात्मभिः। न चाप्यधर्मो विद्वद्भिर्वितथः कथञ्चन ॥ ८ ॥ ततोऽहं न करोम्येनं व्यवसायं क्रियां प्रति। धर्मः सदैव सन्दिग्धः प्रतिभाति हि मे त्वयम् ॥ ९ ॥

धृष्टद्युम्न उवाच। यवीयसः कथं भार्यां ज्येष्ठो भ्राता द्विजर्षभ। ब्रह्मन् समभिवर्त्तेत तद्वृत्तः संशयोऽयम् ॥ १० ॥ न तु धर्मस्य सूक्ष्मत्वाद्गतिं विद्म कथञ्चन। अधर्मो धर्म इति वा व्यवसायो न शक्यते ॥ ११ ॥ कर्त्तुमस्माद्विधेर्ब्रह्मंस्ततोऽयं न व्यवस्यति। पञ्चानां महिषी कृष्णा भवत्विति कथञ्चन ॥ १२ ॥

युधिष्ठिर उवाच। न मे वागनृतं प्राह नाधर्मे धीयते मतिः। वर्त्तते हि मनो मेऽत्र नैषोऽधर्मः कथञ्चन ॥ १३ ॥ श्रूयते हि पुराणेऽपि जटिला नाम गौतमी। ऋषीनध्यासितवती सप्त धर्मभृतांवरा ॥ १४ ॥ तथैव सुनिजा वार्क्षी तपोभिर्भावितात्मनः। संगताभूदृषीन् सप्त प्रचेतसः ॥ १५ ॥ गुरोर्हि वचनं प्राहुर्धर्म्यं धर्मभृतां वर। गुरूणाञ्चैव सर्वेषां माता परमको गुरुः ॥ १६ ॥ सा चाप्युक्तवती वाचं भैक्ष्यवद्भुज्यतामिति। तस्मादेतदहं मन्ये परं धर्मं द्विजोत्तम ॥ १७ ॥

कुन्त्युवाच। एवमेतद्यथा प्राह धर्मचारी युधिष्ठिरः। अनृतान्मे भयं तीव्रं मुच्येऽहमनृतात्कथम् ॥ १८ ॥

व्यास उवाच। अनृतान्मोक्ष्यसे भद्रे धर्मश्चैष सनातनः। न तु वक्ष्यामि सर्वेषां पाञ्चाल शृणु मे स्वयम् ॥ १९ ॥ यथायं विहितो धर्मो यतश्चायं सनातनः। यथा च प्राह कौन्तेयस्तथा धर्मो न संशयः ॥ २० ॥

वैशम्पायन उवाच। ततः उत्थाय भगवान् व्यासो द्वैपायनः प्रभुः। करे गृहीत्वा राजानं राजवेश्म समाविशत्॥ २१॥ पाण्डवाश्चापि कुन्ती च धृष्टद्युम्नश्च पार्षतः। विविशुर्यत्र तत्रैव प्रतीक्षन्ते स्म तावुभौ॥ २२॥ ततो द्वैपायनस्तस्मै नरेन्द्राय महात्मने। आचख्यौ तदया धर्मौ बहुनामेकपत्निता॥ २३॥

इत्यादिपर्वणि वैवाहिकपर्वणि व्यासवाक्ये अष्टनवत्यधिकशततोऽध्यायः॥ १९८॥

व्यास उवाच। पुरा वै नैमिषारण्ये देवाः सत्रमुपासते। तत्र वैवस्वतो राजन् ग्रामिचक्रमकरोत्तदा॥ १॥ ततो यमो दीक्षितस्तत्र राजन्नामारयत् क्वचिदपि प्रजानाम्। ततः प्रजास्ता बहुला बभूवुः कालान्निधातान्नारयन्प्रहीणाः॥ २॥ सोमश्च यक्षो वरुणः कुबेरः साध्या रुद्रा वसवोऽश्विनौ च। प्रणेतारं भुवनस्य प्रजापतिं समाजग्मुस्तत्र देवास्तथान्ये॥ ३॥ ततोऽब्रुवन् लोकगुरुं समेता भयात्तीव्रान्मानुषाणां विहन्तुः। तस्माद्भयाद्विद्रवन्तः सुखेप्सवः प्रयाम सर्वे शरणं भवन्तम्॥ ४॥

पितामह उवाच। किं वो भयं मानुषेभ्यो यूयं सर्वे यदामराः। मा वो मर्त्यसकाशाद्वै भयं भवितुमर्हति॥ ५॥

देवा ऊचुः। मर्त्या अमर्त्याः संवृत्ता न विशेषोऽस्ति कश्चन। अविशेषाद्विद्रवन्तो विशेषार्थमिहागताः॥ ६॥

भगवानुवाच। वैवस्वतो व्याहृतः सत्रहेतोस्तेन त्विमे न म्रियन्ते मनुष्याः। तस्मिन्क्रतौ क्रतसर्वस्वदक्षिणे तत एषां भवितैवान्तकालः॥ ७॥ वैवस्वतस्यैव तनुर्विभूषिता वीर्येण युष्माकमुत प्रसूता। तेषामन्तो भविता ह्यन्तकाले न तत्र वीर्यं भविता नरेषु॥ ८॥

व्यास उवाच। ततस्तु ते पूर्वजदेववाक्यं श्रुत्वाऽजगम्यत्र देवा यजन्ते। समासीनास्ते समेता महाबला भागीरथ्यां ददृशुः पुण्डरीकम् ॥ ९ ॥ दृष्ट्वा च तद्विस्मितास्ते बभूवुस्तेषामिन्द्रस्तत्र भूतो जगाम। सोऽपश्यद्योषामथ पावकप्रभां यत्र देवी गङ्गा सततं प्रभूता ॥ १० ॥ सा तत्र योषा रुदती जलार्थिनी गङ्गां देवीं व्यवगाह्य व्यतिष्ठत्। तस्याश्रुबिन्दुः पतितो जले यस्तत् पद्ममासीदथ तत्र काञ्चनम् ॥ ११ ॥ तदद्भुतं प्रेक्ष्य वज्री तदानीमपृच्छत्तां योषितमन्तिकाद्वै। का त्वं भद्रे रोदिषि कस्य हेतोर्वाक्यं तथ्यं कामयेऽहं ब्रवीहि ॥ १२ ॥

स्त्र्युवाच। त्वं वेत्स्यसे मामिह यास्मि शक्र यदर्थं चाहं रोदिमि मन्दभाग्या। आगच्छ राजन् पुरतो गमिष्ये द्रष्टासि तद्रोदिमि यत्कृतेऽहम् ॥ १३ ॥

व्यास उवाच। तां गच्छन्तीमन्वगच्छत्तदानीं सोऽपश्यदारात्तरुणं दर्शनीयम्। सिंहासनस्थं युवतीसहायं क्रीड़न्तमक्षैर्गिरिराजमूर्ध्नि ॥ १४ ॥ तमब्रवीद्देवराजो ममेदं त्वं विद्धि विद्वन् भुवनं वशे स्थितम्। ईशोऽहमस्मीति समन्युरब्रवीद्दृष्ट्वा तमक्षैः सुभृशं प्रमत्तम् ॥ १५ ॥ क्रुद्धश्च शक्रं प्रसमीक्ष्य देवो जहास शक्रश्च पुनरुदैक्षत। संस्तम्भितोऽभूदथ देवराजस्तेनेक्षितः स्थाणुरिवावतस्थे ॥ १६ ॥ यदा तु पर्य्याप्तमिहास्य क्रीड़या तदा देवीं रुदन्तीं तामुवाच। आनीयतामेष यतोऽहमारात्नैनं दर्पः पुनरप्याविशेत ॥ १७ ॥ ततः शक्रः स्मृष्टमात्रस्तया तु स्वरैरङ्गैः पतितोऽभूद्वरण्याम्। तमब्रवीद्भगवानुग्रतेजा मैवं पुनः शक्र कृथाः कथञ्चित् ॥ १८ ॥ निवर्त्तयैनञ्च महाद्रिराजं बलञ्च वीर्य्यञ्च तवाप्रमेयम्। क्षिप्तस्य चैवाविश मध्यमस्य यतासते त्वद्विधाः स्तूर्य्यभासः ॥ १९ ॥ स तद्विदित्वा विवरं महागिरेस्तुल्यद्युतींश्चतुरोऽन्यान्ददर्श। स तानभिप्रेक्ष्य बभूव दुःखितः कञ्चिन्नाहं

भविता वै यथमें ॥ २० ॥ ततो देवो गिरिशो वज्रपाणिं विज्ञत्य नेत्रे कुपितोऽब्रुवाच । हरीमेतां प्रविश त्वं शतक्रतो यन्मां बाल्याद्वमंस्थाः पुरस्तात् ॥ २१ ॥ उक्तस्त्वेवं विभुना देवराजः प्रावेपतार्तो भयमेवाभिपद्यात् । स्रस्तैरङ्गैरनिलेनेव तुन्नमश्वत्थपत्रं गिरिराजमूर्ध्नि ॥ २२ ॥ स प्राञ्जलिर्वै हयवाहनेन प्रवेपमानः सहसैवमुक्तः । उवाच देवं वज्ररूपमुग्रं दृष्ट्वाग्रेषस्य भुवनस्य त्वं भवाद्य ॥ २३ ॥ तमब्रवीदुग्रवर्चाः प्रहस्य नैवं शीलाः शेषमिहाभ्रवन्ति । एतेऽप्येवं भवितारः पुरस्तात्तस्मादेतां हरीमाविशात्रैव शेष्व ॥ २४ ॥ तत्र ह्येवं भवितारो न संशयो योनिं सर्वे मानुषीमाविशध्वम् । तत्र यूयं कर्म कृत्वाविषह्यं बहून्यान्यब्दधनं प्रापयित्वा ॥ २५ ॥ आगन्तारः पुनरेवेन्द्रलोकं स्वकर्मणा पूर्वजितं महार्हम् । सर्वं मया भाषितमेतदेवं कर्त्तव्यमन्यद्विविधार्थयुक्तम् ॥ २६ ॥

पूर्वेन्द्रा ऊचुः । गमिष्यामो मानुषं देवलोकाद्राधरो विहितो यत्र मोक्षः । देवाख्यानादधीरन् जनन्यां धर्मो वायुर्मघवानश्विनौ च । अस्त्रैर्दिव्यैर्मानुषान् बोधयित्वा आगन्तारः पुनरेवेन्द्रलोकम् ॥ २७ ॥

व्यास उवाच । एतच्छ्रुत्वा वज्रपाणिर्वचस्तु देवश्रेष्ठं पुनरेवेदमाह । वीर्येणाहं पुरुषं कार्यहेतोर्दद्यामेषां पञ्चमं मत्प्रसूतम् ॥ २८ ॥ विश्वभुग्भूतधामा च शिबिरिन्द्रः प्रतापवान् । शान्तिश्चतुर्थस्तेषां वै तेजस्वी पञ्चमः स्मृतः ॥ २९ ॥ तेषां कामं भगवानुग्रधन्वा प्रादादिष्टं सन्निसर्गाच्च योक्तम् । तां चाप्येषां योषितं लोककान्तां श्रियं भार्यां व्यदधान्मानुषेषु ॥ ३० ॥ तैरेव सार्द्धन्तु ततः स देवो जगाम नारायणमप्रमेयम् । अनन्तमव्यक्तमजं पुराणं सनातनं विश्वमनन्तरूपम् ॥ ३१ ॥ स चापि तद्भूतधात्मवंमेव ततः सर्वे सत्त्वभूतुर्वरण्याम् । स चापि केशी हरि-

रुद्रवर्हं शुक्लमेकमपरं चापि कृष्णम् ॥ ३२ ॥ तौ चापि केशौ निविशेतां यदूनां कुले स्त्रियौ देवकीं रोहिणीञ्च । तयोरेको बलदेवो बभूव योऽसौ श्वेतस्य देवस्य केशः । कृष्णो द्वितीयः केशवः सम्बभूव केशो योऽसौ वर्णतः कृष्ण उक्तः ॥ ३३ ॥ ये ते पूर्वं शक्ररूपा निबद्धाः तस्यां दर्यां पर्वतस्योदरस्य । इहैव ते पाण्डवा वीर्यवन्तः शक्रस्यांशः पाण्डवः सव्यसाची ॥ ३४ ॥ एवमेते पाण्डवाः सम्बभूवुर्ये ते राजन् पूर्वमिन्द्रा बभूवुः । लक्ष्मीश्चैषां पूर्वमेवोपदिष्टा भार्या यैषा द्रौपदी दिव्यरूपा ॥ ३५ ॥ कथं हि स्त्री कर्मणोऽन्ते मनीतलात्सुत्तिष्ठेदन्यतो दैवयोगात् । यस्या रूपं सोमसूर्यप्रकाशं गन्धश्चास्याः क्रोशमात्रात् प्रवाति ॥ ३६ ॥ इदं चान्यत् प्रीतियुक्तं नरेन्द्र ददानि ते दिव्यमत्यद्भुतञ्च । दिव्यञ्चक्षुः पश्य कुन्तीसुतांस्त्वं युक्तैर्दिव्यैः पूर्वदेहैरुपेतान् ॥ ३७ ॥

वैशम्पायन उवाच । ततो व्यासः परमोदारकर्मा शुचिर्विप्रस्तपसा तस्य राज्ञः । चक्षुर्दिव्यं प्रददौ तांश्च सर्वान्राजा पश्यत् पूर्वदेहैर्यथावत् ॥ ३८ ॥ ततो दिव्यान् हेमकिरीटमालिनः शक्रप्रख्यान् पावकादित्यवर्णान् । वह्नापीड़ांश्चारुरूपांश्च सर्वो व्यूढोरस्कांस्तालमात्रान्ददर्श ॥ ३९ ॥ दिव्यैर्वस्त्रैररजोभिः सुगन्धैर्माल्यैश्चाग्र्यैः शोभमानानतीव । साक्षात्यत्र्वा वसूंस्यापि रुद्रानादित्यान् वा सर्वगुणोपपन्नान् ॥ ४० ॥ तान् पूर्वेन्द्रानभिवीक्याभिरूपान् शक्रात्मजं चेन्द्ररूपं निशम्य । प्रीतो राजा द्रुपदो विस्मितश्च दिव्यां मायां तामवेक्याप्रमेयाम् ॥ ४१ ॥ तां चैवाग्र्यां स्त्रियमतिरूपयुक्तां दिव्यां साक्षात्सोमवक्त्रप्रकाशाम् । योग्यां तेषां रूपतेजोयशोभिः पत्नीं मत्वा दृष्टवान् पार्थिवेन्द्रः ॥ ४२ ॥ स तद्दृष्ट्वा महदाश्चर्यरूपं जग्राह पादौ सत्यवत्याः सुतस्य । नैतच्चित्रं परमर्षे त्वयीति प्रसन्नचेताः स उवाच चैनम् ॥ ४३ ॥

व्यास उवाच। आसीत्तपोवने काचिद्दृषेः कन्या महात्मनः। नाध्यगच्छत् पतिं सा तु कन्या रूपवती सती॥ ४४॥ तोषयामास तपसा सा किलोग्रेण शङ्करम्। तामुवाचेश्वरः प्रीतो वृणु कामामिति स्वयम्॥ ४५॥ सैवमुक्ताब्रवीत्कन्या देवं वरदमीश्वरम्। पतिं सर्वगुणोपेतमिच्छामीति पुनः पुनः॥ ४६॥ ददौ तस्यै स देवेशस्तं वरं प्रीतमानसः। पञ्च ते पतयो भद्रे भविष्यन्तीति शङ्करः॥ ४७॥ सा प्रसाद्यती देवमिदं भूयोऽभ्यभाषत। एकं पतिं गुणोपेतं त्वत्तोऽहमिति शङ्करः॥ ४८॥ तां देवदेवः प्रीतात्मा पुनः प्राह शुभं वचः। पञ्चकृत्वस्त्वयोक्तोऽहं पतिं देहीति वै पुनः॥ ४९॥ तत्तथा भविता भद्रे वचस्तद्धरमस्तु ते। देहमन्यां गतायास्ते सर्वमेतद्भविष्यति॥ ५०॥ द्रुपदैषा हि सा जज्ञे सुता वै देवरूपिणी। पञ्चानां विहिता पत्नी कृष्णा पार्षत्यनिन्दिता॥ ५१॥ स्वर्गश्रीः माण्डवार्थन्तु सस्मृत्यन्ना महामखे। सेह तप्त्वा तपो घोरं दुहितृत्वं तवागता॥ ५२॥ सैषा देवी रुचिरा देवजुष्टा पञ्चानामेका स्वकृतेनेह कर्मणा। दृष्टा स्वयं देवपत्नी स्वयम्भुवा श्रुत्वा राजन्द्रुपदेष्टं कुरुष्व॥ ५३॥

इत्यादिपर्वणि वैवाहिकपर्वणि पञ्चेन्द्रोपाख्याने नवनवत्यधिकशततोऽध्यायः॥ १९९॥

द्रुपद उवाच। अश्रुत्वैवं वचनं ते महर्षे मया पूर्वं यतितं संविधातुम्। नैव शक्यं विहितस्यापयानं तदेवेदमुपपन्नं विधानम्॥ १॥ दिष्टस्य यन्मिरनिवर्त्तनीयः स्वकर्मणा विहितं नेह किञ्चित्। कृतं निमित्तं हि वरैकहेतोस्तदेवेदमुपपन्नं विधानम्॥ २॥ यथैव कृष्णोक्तवती पुरस्तान्नैकान् पतीन्मे भगवान्ददातु। स चाप्येवं वरमित्यब्रवीत्तां देवो हि वेत्ता परमं

यदत्र ॥ ३ ॥ यदि चैवं विहितः शङ्करेण धर्मोऽधर्मो वा नात्र समापराधः । गच्छन्त्वमे विधिवत्पाणिमस्या यथोपजोषं विहितेषां हि कृष्णा ॥ ४ ॥

वैशम्पायन उवाच । ततोऽब्रवीद्भगवान्धर्मराजमद्यैव पुण्याहमुत वः पाण्डवेयाः । अद्य पौष्यं योगमुपैति चन्द्रमाः पाणिं कृष्णायास्तं गृह्णाय पूर्वम् ॥ ५ ॥ ततो राजा यज्ञसेनः सपुत्रो जन्यार्थमुक्तं बहु तत्तदग्र्यम् । समानयामास सुताश्च कृष्णामाप्लाव्य रत्नैर्बहुभिर्विभूष्य ॥ ६ ॥ ततस्तु सर्वे सुहृदो नृपस्य समाजग्मुः सहिता मन्त्रिणश्च । दृष्ट्वं विवाहं परमप्रतीता द्विजाश्च पौराश्च यथाप्रधानाः ॥ ७ ॥ ततोऽस्य वेश्माग्र्यजनोपशोभितं विस्तीर्णमद्योत्सवभूषिताजिरम् । बलीयरत्नौघविचित्रभावभौ नभो यथा निर्मलतारकाचितम् ॥ ८ ॥ ततस्तु ते कौरवराजपुत्रा विभूषिताः कुण्डलिनो युवानः । महार्हवस्त्राम्बरचन्दनोचिताः कृताभिषेकाः कृतमङ्गलक्रियाः ॥ ९ ॥ पुरोहितेनाग्निसमानवर्चसा सहैव धौम्येन यथाविधि प्रभो । क्रमेण सर्वे विविशुर्गृहातः सदो महर्षभा गोष्ठमिवाभिनन्दिनः ॥ १० ॥ ततः समाधाय सवेदपारगो जुहाव मन्त्रैर्ज्वलितं हुताशनम् । युधिष्ठिरं चाप्युपनीय मन्त्रविन्निवेशयामास सहैव कृष्णया ॥ ११ ॥ प्रदक्षिणं तौ प्रगृहीतपाणी परीणयामास स वेदपारगः । ततोऽभ्यनुज्ञाय तमाजिशोभिनं पुरोहितो राजगृहाद्विनिर्ययौ ॥ १२ ॥ क्रमेण चानेन नराधिपालजा वरस्त्रियस्ता जगृहुस्तदा करम् । अहन्यहन्युत्तमरूपधारिणो महारथाः कौरववंशवर्धनाः ॥ १३ ॥ ददर्श तत्राङ्गतरूपमुत्तमं जगाद देवर्षिरतीव मानुषम् । महानुभावा किल सा सुमध्यमा बभूव कन्यैव गते गतेऽहनि ॥ १४ ॥ कृते विवाहे द्रुपदो धनं ददौ महारथेभ्यो बहुरूपमुत्तमम् । शतं रथानां वरहेममालिनां चतुर्युजां हेमखलीनमालिनीम् ॥ १५ ॥

शतं गजानामपि पद्मिनां तथा शतं गिरीणामिव हेमशृङ्गिणाम् ।
तथैव दासीशतमग्र्ययौवनं महार्हवेषाभरणाम्बरस्रजम् ॥ १६ ॥
पृथक् पृथग्दिव्यहयां धनदेदौ तदा धनं सौमकिरग्निसाक्षिकम् ।
तथैव वस्त्राणि विभूषणानि प्रभावयुक्तानि महानुभावः ॥ १७ ॥
कृते विवाहे तु ततस्तु पाण्डवाः प्रभूतवस्त्रासुपलभ्य तां स्त्रियम् ।
विजह्रुरिन्द्रप्रतिमा महाबलाः पुरे तु पाञ्चालनृपस्य तस्य ह ॥१८॥

इत्यादिपर्वणि वैवाहिकपर्वणि द्रौपदीविवाहे
द्विशततोऽध्यायः ॥ २०० ॥

वैशम्पायन उवाच । पाण्डवैः सह संयोगं गतस्य द्रुपदस्य ह । न बभूव भयं किञ्चिद्देवेभ्योऽपि कथञ्चन ॥ १ ॥ कुन्तीमासाद्य ता नार्यो द्रुपदस्य महात्मनः । नाम सङ्कीर्त्तयन्त्योऽस्याः जग्मुः पादौ स्वमूर्द्धनि ॥ २ ॥ कृष्णा च क्षौमसंवीता कृतकौतुकमङ्गला । कृताभिवादना श्वश्वाः श्वशुरस्यौ प्रभा कृताञ्जलिः ॥ ३ ॥ रूपलक्षणसम्पन्नां शीलाचारसमन्विताम् । द्रौपदीमवदत् प्रेम्णा पृथा शीर्षचुंबनं स्नुषाम् ॥ ४ ॥ यथेन्द्राणी हरिश्रेष्ठे स्वाहा चैव विभावसौ । रोहिणी च यथा सोमे दमयन्ती यथा नले ॥ ५ ॥ यथा वैश्रवणे भद्रा वसिष्ठे चाप्यरुन्धती । यथा नारायणे लक्ष्मीस्तथा त्वं भव भर्तृषु ॥ ६ ॥ जीवसूर्वीरसूर्भद्रे बहुसौख्यसमन्विता । सुभगा भोगसम्पन्ना यज्ञपत्नी पतिव्रता ॥ ७ ॥ अतिथीनागतान् साधून् ब्रह्मचारिश्च बालांस्तथा गुरून् । पूजयन्त्या यथान्यायं श्वश्रूस्तुभ्यं तु ते समाः ॥ ८ ॥ कुरुजाङ्गलमुख्येषु राष्ट्रेषु नगरेषु च । अनु त्वमभिषिच्यस्व नृपतिं धर्मवत्सला ॥ ९ ॥ पतिभिर्विजितामुर्वीं विक्रमेण महाबलैः । कुरु ब्राह्मणसात्पुर्वीमश्वमेधे महाक्रतौ ॥ १० ॥ इष्टिव्यां यानि

रत्नानि गुणवन्ति गुणान्विते । तान्यामुष्टिं त्वं कल्याणि सुखिनी शरदां शतम् ॥ ११ ॥ यया च त्वाभिनन्दामि वध्वद्य क्षौमसम्वृताम् । तया भूयोऽभिनन्दिष्ये जातपुत्रां गुणान्विताम् ॥ १२ ॥

वैशम्पायन उवाच । ततस्तु कृतदारेभ्यः पाण्डुभ्यः प्राहिणोद्धरिः । वैदूर्यमणिचित्राणि हैमान्याभरणानि च ॥ १३ ॥ वासांसि च महार्हाणि नानादेश्यानि माधवः । कम्बलाजिनरत्नानि सुगन्धवन्ति शुभानि च ॥ १४ ॥ शयनासनयानानि विविधानि महान्ति च । वैदूर्यवज्रचित्राणि शतशो भाजनानि च ॥ १५ ॥ रूपयौवनदाक्षिण्यैरुपेताश्च स्वलङ्कृताः । प्रेष्याः सम्प्रददौ कृष्णो नानादेश्याः सहस्रशः ॥ १६ ॥ गजान्विनीतान् भद्रांश्च सदश्वांश्च स्वलङ्कृतान् । रथांश्च दान्तान् सौवर्णैः शुभ्रैः षड्भिरलङ्कृतान् ॥ १७ ॥ कोटिशश्च सुवर्णं च तेषामशतकं तथा । दौतीकृतमनेयात्मा प्राहिणोन्मधुसूदनः ॥ १८ ॥ तत् सर्वमतिजग्राह धर्मराजो युधिष्ठिरः । मुदा परमया युक्तो गोविन्दप्रियकाम्यया ॥ १९ ॥

इत्यादिपर्वणि वैवाहिकपर्वणि श्रीकृष्णोपहारप्रेषणे एकाधिकद्विशततोऽध्यायः समाप्तश्च वैवाहिकपर्व ॥ २०१ ॥

—:•:—

अथ विदुरागमनपर्व ॥ १४ ॥

वैशम्पायन उवाच । ततो राज्ञां चरैराप्तैः प्रवृत्तिरुदनीयत । पाण्डवैरुपसम्पन्ना द्रौपदी पतिभिः शुभा ॥ १ ॥ येन तद्धनुरायम्य लक्ष्यं विद्धं महात्मना । सोऽर्जुनो जयतां श्रेष्ठो महाबाणधनुर्धरः ॥ २ ॥ यः शल्यं मद्रराजं वै प्रोत्क्षिप्यापातयद्बली । त्रासयामास संक्रुद्धो हत्वेमं पुरुषान् रणे ॥ ३ ॥ न चास्य संभ्रमः कश्चिदासीत्तत्र महात्मनः । स भीमो भीमसंस्पर्शः

शत्रुसेनाङ्गपातनः ॥ ४ ॥ ब्रह्मरूपधरान् श्रुत्वा प्रयान्तान् पाण्डुनन्दनान्। कौन्तेयानमितेजसाम् विस्मयः समजायत ॥ ५ ॥ सुप्ता हि पुरा कुन्ती दग्धा जतुगृहे श्रुता। पुनर्जातानिव च तान् तेऽमन्यन्त नराधिपाः ॥ ६ ॥ धिगकुर्वंस्तदा भीष्मं धृतराष्ट्रञ्च कौरवम्। कर्मणातिनृशंसेन पुरोचनकृतेन वै ॥ ७ ॥ हृत्ते स्वयम्वरे चैव राजानः सर्व एव ते। यद्यागतं विप्रजहमुर्विदित्वा पाण्डवान्नृतान् ॥ ८ ॥ अथ दुर्योधनो राजा विमना भ्रातृभिः सह। अभ्यभाषत सानुक्रोशं कर्णेन च कृपेण च ॥ ९ ॥ विनिवृत्तो हृतं दृष्ट्वा द्रौपद्या क्षेत्रवाहनम्। तन्तु दुःशासनो व्रीड़मन्दं मन्दमिवाब्रवीत् ॥ १० ॥ यद्यसौ ब्राह्मणो न स्याद्विन्देत द्रौपदीं नरः। न हि तं तत्त्वतो राजन्वेद कश्चिदनञ्जयम् ॥ ११ ॥ दैवञ्च परमं मन्ये पौरुषं चाप्यनर्थकम्। धिगस्तु पौरुषं तात म्रियन्ते बत पाण्डवाः ॥ १२ ॥ एवं सम्भाषमाणास्ते निन्दन्तश्च पुरोचनम्। विविशुर्हास्तिनपुरं दीना विगतचेतसः ॥ १३ ॥ तच्छ्रुत्वा विगतसङ्कल्पा दृष्ट्वा पार्थान्महौजसः। सुतान् हव्यभुजश्चैव संयुक्तान् द्रुपदेन च ॥ १४ ॥ दृष्ट्वा च सन्तु सञ्चिन्त्य तथैव च शिखण्डिनम्। द्रुपदस्यात्मजांश्चान्यान् सर्वयुद्धविशारदान् ॥ १५ ॥ विदुरश्चथ तां श्रुत्वा द्रौपदीं पाण्डवैर्हृताम्। व्रीड़तान् धार्तराष्ट्रांश्च भग्नदर्पानुपागतान् ॥ १६ ॥ ततः प्रीतमनाः क्षत्ता धृतराष्ट्रं विशाम्पते। उवाच दिष्ट्या कुरवो वर्द्धन्त इति विस्मितः ॥ १७ ॥ वैचित्रवीर्यन्तु नृपो निशम्य विदुरस्य तत्। अब्रवीत्परमप्रीतो दिष्ट्या दिष्ट्येति भारत ॥ १८ ॥ मन्यते स हृतं पुत्रं ज्येष्ठं द्रुपदकन्यया। दुर्योधनमविज्ञानात् प्रज्ञाचक्षुर्नरेश्वरः ॥ १९ ॥ अथ त्वाज्ञापयामास द्रौपद्या भूषणं बहु। आनीयतां वै कृष्णेति पुत्रं दुर्योधनं तदा ॥ २० ॥ अथास्य पश्चाद्विदुर आचख्यौ पाण्डवान् हृतान्। सर्वान् कुश-

लिनो वीरान् पूजितान् द्रुपदेन ह ॥ २१ ॥ तेषां सम्बन्धिनः सर्वान् बन्धून् बलसमन्वितान् । समागतान् पाण्डवेयैस्त्वमिन्नेव स्वयम्वरे ॥ २२ ॥

धृतराष्ट्र उवाच । यथैव पाण्डोः पुत्रास्तु तथैवाभ्यधिका मम । यथा चाभ्यधिका बुद्धिर्मम तान् प्रति तच्छृणु ॥ २३ ॥ यत्ते कृतशिलनो वीरा मित्रवन्तश्च पाण्डवाः । तेषां सम्बन्धिनः सर्वान्ये बहवश्च महाबलाः ॥ २४ ॥ को हि द्रुपदमासाद्य मित्रं क्षत्तः सबान्धवम् । न बुभूषेज्जवेनार्थी गतश्रीरिव पार्थिवः ॥ २५ ॥

वैशम्पायन उवाच । तं तथा भाषमाणन्तु विदुरः प्रत्यभाषत ॥ नित्यं भवतु ते बुद्धिरेषा राजन् शृतं समाः ॥ २६ ॥ ततो दुर्योधनश्चापि राधेयश्च विशाम्पते । धृतराष्ट्रमुपागम्य वचोब्रूतामिदं तदा ॥ २७ ॥ सन्निधौ विदुरस्य त्वां दोषं वक्तुं न शक्नुवः । विविक्तमिति वक्ष्यावः किं तवेदं चिकीर्षितम् ॥ २८ ॥ सपत्नदृद्धिं यत्तात मन्यसे दुर्बुद्धिमात्मनः । अभिष्टौषि च यत् क्षत्तुः समीपे द्विपदां वर ॥ २९ ॥ अन्यस्मिन्नुपकर्त्तव्ये त्वमन्यत् कुरुषेऽनघ । तेषां बलविघातो हि कर्त्तव्यस्तात नित्यशः ॥ ३० ॥ ते वयं प्राप्तकालस्य चिकीर्षां मन्त्रयामहे । यथा नो न ग्रसेयुस्ते सपुत्रबलबान्धवान् ॥ ३१ ॥

इत्यादिपर्वणि विदुरागमनपर्वणि दुर्योधनवाक्ये द्व्यधिकद्विशततोऽध्यायः ॥ २०२ ॥

—०:०—

धृतराष्ट्र उवाच । अहमप्येवमेवैतच्चिकीर्षामि यथा शुवाम् । विवेक्तुं नाहमिच्छामि त्वाकारं विदुरं प्रति ॥ १ ॥ ततस्तेषां गुणानेव कीर्त्तयामि विशेषतः । नावबुध्येत विदुरो ममाभि-

प्रायमिङ्गितैः ॥ २ ॥ यच्च त्वं मन्यसे प्राप्तं तद्ब्रवीहि सुयोधन। राधेय मन्यसे यच्च प्राप्तकालं वदाशु मे ॥ ३ ॥

दुर्योधन उवाच। अद्य तान् कुशलैर्विप्रैः सुगुप्तैराप्तकारिभिः। कुन्तीपुत्रान् भेदयामो माद्रीपुत्रौ च पाण्डवौ ॥ ४ ॥ अथ वा द्रुपदो राजा महद्भिर्वित्तसञ्चयैः। पुत्रार्थास्तु प्रलोभ्यन्तामात्मार्थैर्व सबन्धवः ॥ ५ ॥ परित्यजेद्यथा राजा कुन्तीपुत्रं युधिष्ठिरम्। अथ तत्रैव वा तेषां निवासं रोचयन्तु ते ॥ ६ ॥ दृष्टैषां दोषवद्वासं वर्णयन्तु पृथक् पृथक्। ते भिद्यमानास्तत्रैव मनः कुर्वन्तु पाण्डवाः ॥ ७ ॥ अथवा कुशलाः केचिदुपायनिपुणा नराः। इतरेतरतः पार्थान् भेदयन्त्वनुरागतः ॥ ८ ॥ व्युत्थापयन्तु वा कृष्णां बहुत्वात् सुकरं हि तत्। अथवा पाण्डवांस्तस्यां भेदयन्तु ततश्च ताम् ॥ ९ ॥ भीमसेनस्य वा राजन् उपायकुशलैर्नरैः। स्त्र्युपविधीयतां क्षुद्रैः स हि तेषां बलाधिकः ॥ १० ॥ तमाश्रित्य हि कौन्तेयः पुरा चास्मान्न मन्यते। स हि तीक्ष्णश्च शूरश्च तेषाञ्चैव पराश्रयः ॥ ११ ॥ तस्मिंस्त्वभिहते राजन् हतोत्साहा हतौजसः। यतिष्यन्ते न राज्याय स हि तेषां व्यपाश्रयः ॥ १२ ॥ अजेयो ह्यर्जुनः संख्ये षष्ठगोपि हलोदरे। तस्मते फाल्गुनो युद्धे राधेयस्य न पादभाक् ॥ १३ ॥ ते जानानास्तु दौर्बल्यं भीमसेनकृतं महत्। अस्मान् बलवतो ज्ञात्वा न यतिष्यन्ति दुर्बलाः ॥ १४ ॥ दृष्टागतेषु वा तेषु निर्देशवशवर्त्तिषु। प्रवर्त्तिष्यामहे राजन्यथाशास्त्रं निबर्हणम् ॥ १५ ॥ अथ वा दर्शनीयाभिः प्रमदाभिर्विलोभ्यताम्। एकैकशस्तु कौन्तेयस्ततः कृष्णा विरज्यताम् ॥ १६ ॥ प्रेष्यतां चैव राधेय तेषामागमनाय वै। तैस्तैः प्रकारैः सन्नीय पात्यन्तामाप्तकारिभिः ॥ १७ ॥ एतेषामप्युपायानां यस्ते निर्दोषवान्मतः। तस्य प्रयोगमातिष्ठ पुरा कालोऽतिवर्त्तते ॥ १८ ॥ यावद्धृतविश्वासा द्रुपदे पार्थिव-

र्षभे। तावदेव हि ते शक्या न शक्यास्तु ततः परम् ॥ १९ ॥ एषा मम मतिस्तात निग्रहाय प्रवर्त्तते। साध्वी वा यदि वासाध्वी किम्वा राधेय मन्यसे ॥ २० ॥

इत्यादिपर्वणि विदुरागमनपर्वणि दुर्योधनवाक्ये त्र्यधिकद्वियतोऽध्यायः ॥ २०३ ॥

—:०:—

कर्ण उवाच। दुर्योधन तव प्रज्ञा न सम्यगिति मे मतिः। न ह्युपायेन ते शक्याः पाण्डवाः कुरुवर्द्धन ॥ १ ॥ पूर्वमेव हि ते सूच्योऽप्यायेयंतिताक्षया। निगृहीतुं तदा वीर न चैव शकिताक्षया ॥ २ ॥ इदैव वर्त्तमानास्ते समीपे तव पार्थिव। अजातपक्षा विश्वस्ताः शकिता नैव बाधितुम् ॥ ३ ॥ जातपक्षा विदेशस्था विदृष्टाः सर्वशोऽद्य ते। नोपायसाध्याः कौन्तेया ममैषा मतिरच्युता ॥ ४ ॥ न च ते व्यसनैर्योक्तुं शक्या दिष्टकृतेन च। शकिताश्चैव ध्रुवश्चैव पित्र्यैतामहं पदम् ॥ ५ ॥ परस्परेण भेदश्च नाधातुं तेषु शक्यते। एकस्यां वै रताः पत्न्यां न भिद्यन्ते परस्परम् ॥ ६ ॥ न चापि कृष्णा शक्येत तेभ्यो भेदयितुं परैः। परिद्यूनान्वृतवती किमुताद्य समागतः ॥ ७ ॥ ईप्सितश्च गुणः स्त्रीणामेकस्या बहुभर्तृता। तच्च प्राप्तवती कृष्णा न सा भेदयितुं क्षमा ॥ ८ ॥ आर्यव्रतश्च पाञ्चाल्यो न स राजा धनप्रियः। न संत्यक्ष्यति कौन्तेयान् राज्यदानैरपि ध्रुवम् ॥ ९ ॥ तस्मात्स्य सुतो गुरुवानुरक्तश्च पाण्डवान्। तस्मान्नोपायसाध्यांस्तानहं मन्ये कथञ्चन ॥ १० ॥ इदं त्वद्य क्षमं कर्त्तुमस्माकं पुरुषर्षभ। यावन्न कृतमूलास्ते पाण्डवेया विशाम्पते। तावत् प्रहरणीयास्ते तच्छ्रेयं तात रोचताम् ॥ ११ ॥ अल्पत्यक्षो महान्यावद्यावत् पाञ्चालको लघुः। तावत् प्रहरणं तेषां क्रियतां मा विचारय

॥ १२ ॥ वाहनानि प्रभूतानि मित्राणि च कुलानि च । यावन्त्येषां गान्धारे तावद्विक्रम पार्थिव ॥१३॥ यावच्च राजा पाञ्चाल्यो नोद्यमे कुरुते मनः । सहपुत्रैर्महावीर्यैस्तावद्विक्रम पार्थिव ॥१४॥ यावच्चायाति वार्ष्णेयः सर्षभ्यादववाहिनीम् । राज्यार्धं पाण्डवेयानां पाञ्चाल्यसदनं प्रति ॥ १५ ॥ वसूनि विविधान् भोगान् राज्यमेव च केवलम् । नात्याज्यमस्ति कृष्णस्य पाण्डवार्थे कथञ्चन ॥ १६ ॥ विक्रमेण मही प्राप्ता भरतेन महात्मना । विक्रमेण च लोकांस्त्रीन् जितवान् पाकशासनः ॥ १७ ॥ विक्रमञ्च प्रशंसन्ति क्षत्रियस्य विशाम्पते । स्वको हि धर्मः शूराणां विक्रमः पार्थिवर्षभ ॥ १८ ॥ ते बलेन वयं राजन्नहता चतुरङ्गिणा । प्रमथ्य द्रुपदं शीघ्रमानयामेह पाण्डवान् ॥ १९ ॥ न हि साम्ना न दानेन न भेदेन च पाण्डवाः । शक्याः साधयितुं तस्माद्विक्रमेणैव तान् जहि ॥ २० ॥ तान्विक्रमेण जित्वेमामखिलां भुङ्क्ष्व मेदिनीम् । अतो नान्यं प्रपश्यामि कार्य्योपायं जनाधिप ॥ २१ ॥

वैशम्पायन उवाच । श्रुत्वा तु राधेयवचो धृतराष्ट्रः प्रतापवान् । अभिपूज्य ततः पश्चादिदं वचनमब्रवीत् ॥ २२ ॥ उपपन्नं महाप्राज्ञे सूतानन्दने । त्वयि विक्रमसम्पन्नमिदं वचनमीदृशम् ॥ २३ ॥ भूय एव तु भीष्मञ्च द्रोणं विदुर एव च । बुद्धाञ्च कुरुतं बुद्धिं भवेद्या नः सुखोदया ॥ २४ ॥ ततो आनाय्य तान् सर्वान्मन्त्रिणः सुमहायशाः । धृतराष्ट्रो महाराज मन्त्रयामास वै तदा ॥ २५ ॥

इत्यादिपर्वणि विदुरागमनपर्वणि धृतराष्ट्रमन्त्रणे चतुरधिकद्विशततोऽध्यायः ॥ २०४ ॥

भीष्म उवाच । न रोचते विग्रहो मे पाण्डुपुत्रैः कथञ्चन । यथैव धृतराष्ट्रो मे तथा पाण्डुरसंशयम् ॥ १ ॥ गान्धार्याश्च यथा पुत्रास्तथा कुन्तीसुता मम । यथा च मम ते रक्ष्या धृतराष्ट्रस्य तथा तव ॥ २ ॥ यथा च मम राज्ञश्च तथा दुर्योधनस्य ते । तथा कुरूणां सर्वेषामन्येषामपि पार्थिव ॥ ३ ॥ एवं गते विग्रहं तैर्न रोचे सन्धाय वीरैर्दीयतामर्द्धभूमिः । तेषामपीह प्रपिता-महानां राज्यं पितुश्चैव कुरूत्तमानाम् ॥ ४ ॥ दुर्योधन यथा राज्यं त्वमिदं तात पश्यसि । मम पैतृकमित्येवं तेऽपि पश्यन्ति पाण्डवाः ॥ ५ ॥ यदि राज्यं न ते प्राप्ताः पाण्डवेया यशस्विनः । कुत एव तवापीदं भारतस्यापि कस्यचित् ॥ ६ ॥ अथ धर्मेण राज्यं त्वं प्राप्तवान् भरतर्षभ । तेऽपि राज्यमनुप्राप्ताः पूर्वमेवेति मे मतिः ॥ ७ ॥ मधुरेणैव राज्यस्य तेषामर्द्धं प्रदीयताम् । एतद्धि पुरुषव्याघ्र हितं सर्वजनस्य च ॥ ८ ॥ अतोऽन्यथा चेत् क्रियते न हितं नो भविष्यति । तवाप्यकीर्त्तिः सकला भविष्यति न संशयः ॥ ९ ॥ कीर्त्तिरक्षणमातिष्ठ कीर्त्तिर्हि परमं बलम् । नष्टकीर्त्तेर्मनुष्यस्य जीवितं ह्यफलं स्मृतम् ॥ १० ॥ यावत्कीर्त्तिर्मनुष्यस्य न प्रणश्यति कौरव । तावज्जीवति गान्धारे नष्टकीर्त्तिस्तु नश्यति ॥ ११ ॥ तमिमं समुपातिष्ठ धर्मं कुरु-कुलोचितम् । अनुरूपं महाबाहो पूर्वेषामात्मनः कुरु ॥ १२ ॥ दिष्ट्या म्रियन्ते पार्थाः हि दिष्ट्या जीवति सा पृथा । दिष्ट्या पुरोचनः पापो न सकामोऽत्ययं गतः ॥ १३ ॥ यदा प्रभृति दग्धास्ते कुन्तिभोजसुतासुताः । तदा प्रभृति गान्धारे न शक्नोम्यभिवीक्षितुम् ॥ १४ ॥ लोके प्राणभृतां कश्चिच्छ्रुत्वा कुन्तीं तथागताम् । न चापि दोषेण तथा लोको मन्येत् पुरोचनम् । तथा त्वां पुरुषव्याघ्र लोको दोषेण गच्छति ॥ १५ ॥ तदिदं जीवितं तेषां तव किल्बिषनाशनम् । सम्मन्तव्यं महाराज पाण्ड-

वानाञ्च दर्शनम् ॥ १६ ॥ न चापि तेषां वीराणां जीवतां कुरु-
नन्दन। पित्र्योंऽशः शक्य आदातुमपि वज्रभृता स्वयम् ॥ १७ ॥
ते सर्वेऽवस्थिताः धर्मे सर्वे चैवैकचेतसः। अधर्मेण निरस्ताश्च तुल्ये
राज्ये विशेषतः ॥ १८ ॥ यदि धर्मस्तया कार्यो यदि कार्यं
प्रियञ्च मे। क्षेमञ्च यदि कर्त्तव्यं तेषामर्द्धं प्रदीयताम् ॥ १९ ॥

इत्यादिपर्वणि विदुरागमनपर्वणि भीष्मवाक्ये पञ्चा-
धिकद्विशततोऽध्यायः ॥ २०५ ॥

द्रोण उवाच। सन्त्राय समुपानीतैर्धृतराष्ट्रहितैर्नृप।
धर्म्यमर्थ्यं यशस्यञ्च वाक्यमित्यनुशुश्रुमः ॥ १ ॥ समाप्येषा मति-
स्तात या भीष्मस्य महात्मनः। संविभज्यासु कौन्तेया धर्म एव
सनातनः ॥ २ ॥ प्रेष्यतां द्रुपदायाशु नरः कश्चित् प्रियंवदः।
बहुलं रत्नमादाय तेषामर्थाय भारत ॥ ३ ॥ मिथः कृत्यञ्च तस्यै
स आहाय वसु गच्छतु। दृष्ट्विञ्च परमां ब्रूयात्सम्बन्धोद्भवां
तथा ॥ ४ ॥ संप्रीयमाणं त्वां ब्रूयाद्राजन् दुर्य्योधनं तदा।
अनुरक्तद्रुपदे चैव धृष्टद्युम्ने च भारत ॥ ५ ॥ उचितत्वं प्रियत्वञ्च
योगस्यापि च वर्णयेत्। पुनः पुनश्च कौन्तेयान्माद्रीपुत्रौ च
सान्त्वयन् ॥ ६ ॥ हिरण्मयानि शुभ्राणि बहून्याभरणानि च।
वचनात्तव राजेन्द्र द्रौपद्याः संप्रयच्छतु ॥ ७ ॥ तथा द्रुपद-
पुत्राणां सर्वेषां भरतर्षभ। पाण्डवानाञ्च सर्वेषां कुन्त्या युक्तानि
यानि च ॥ ८ ॥ एवं सान्त्वसमायुक्तं द्रुपदं पाण्डवैः सह। उक्त्वा
सोऽनन्तरं ब्रूयात्तेषामागमनं प्रति ॥ ९ ॥ अनुज्ञातेषु वीरेषु
बलं गच्छतु शोभनम्। दुःशासनो विकर्णश्चाप्यानेतुं पाण्डवा-
निह ॥ १० ॥ ततस्ते पाण्डवाः श्रेष्ठाः पूज्यमानाः सदा त्वया।
प्रकृतीनामनुमते यदि स्थास्यन्ति वैदृके ॥ ११ ॥ एतत्तव महा-

राज पुत्रेषु तेषु चैव हि । दृत्तमौपयिकं मन्ये भौम्येण सह भारत ॥ १२ ॥

कर्ण उवाच । योजितावर्थमानाभ्यां सर्वकार्येष्वनन्तरौ । न मन्त्रमेतां त्वच्छ्रेयः किमन्यत्ततरं ततः ॥ २२ ॥ दुष्टेन मनसा यो वै प्रच्छन्नेनान्तरात्मना । ब्रूयाच्छ्रेयस नाम कथं कुर्यात् सतां मतम् ॥ २३ ॥ न मिलाख्यर्थकृच्छ्रेषु श्रेयसे वेतराय वा । विधिपूर्वं हि सर्वस्य दुःखं वा यदि वा सुखम् ॥ २४ ॥ कृतप्रज्ञोऽकृतप्रज्ञो बालो वृद्धश्च मानवः । ससहायोऽसहायश्च सर्वं सर्वत्र विन्दति ॥ २५ ॥ श्रूयते हि पुरा कश्चिद्यवीय इतीश्वरः । आसीद्राजगृहे राजा मागधानां महीक्षिताम् ॥ २६ ॥ स हीनः करणैः सर्वैरुच्छ्रासपरमो नृपः । अमात्यसंस्थः सर्वेषु कार्येष्वेवाभवत्तदा ॥ २७ ॥ तस्यामात्यो महाकर्णिर्बभूवैकेश्वरस्तदा । स लब्धबलमात्मानं मन्यमानोऽवमन्यते ॥ २८ ॥ स राज्ञ उपभोग्यानि स्त्रियो रत्नधनानि च । आदत्ते सर्वशो मूढ ऐश्वर्यं च स्वयं तदा ॥ २९ ॥ तदादाय च लुब्धस्य लाभाल्लोभोऽभ्यवर्धत । तथाहि सर्वमादाय राज्यमस्य जिहीर्षति ॥ ३० ॥ हीनस्य करणैः सर्वैरुच्छ्रासपरमस्य च । यतमानोऽपि तद्राज्यं न ग्रहीतेति नः श्रुतम् ॥ ३१ ॥ किमन्यद्धिहिता नूनं तस्य सा पुरुषेन्द्रता । यदि ते विहितं राज्यं भविष्यति विशाम्यते ॥ ३२ ॥ मिषतः सर्वलोकस्य स्थास्यते त्वयि तद्ध्रुवम् । अतोऽन्यथा चेद्विहितं यतमानो न लप्स्यसे ॥ ३३ ॥ एवं विद्वन्प्रादत्स्व मन्त्रिणां साध्वसाधुताम् । दुष्टानाञ्चैव बोद्धव्यमदुष्टानाञ्च भाषितम् ॥ ३४ ॥

द्रोण उवाच । विद्म ते भावदोषेण यदर्थमिदमुच्यते । दुष्टं प्राह्यवचस्तोक्ष्णं दोषमाख्यापयस्युत ॥ ३५ ॥ हितन्तु परमं कर्ण ब्रवीमि कुलवर्धनम् । अथ त्वं मन्यसे दुष्टं ब्रूहि यत् परमं

हितम् ॥ २६ ॥ अतोऽन्यथा चेत् क्रियते यद्ब्रवीमि परं हितम् ।
कुरवो वै विनङ्क्ष्यन्ति न चिरेणैव मे मतिः ॥ २७ ॥

इत्यादिपर्वणि विदुरागमनपर्वणि द्रोणवाक्ये षष्ठाधिकद्विशततोऽध्यायः ॥ २०६ ॥

विदुर उवाच । राजन्विसंशयं श्रेयो वाच्यमस्मि बान्धवैः ।
न त्वशुश्रूषमाणे वै वाक्यं संप्रति तिष्ठति ॥ १ ॥ प्रियं हितञ्च तदाच्यमुक्तवान् कुरुसत्तमः । भीष्मः शान्तनवो राजन् प्रतिगृह्णासि तच्च न ॥ २ ॥ तथा द्रोणेन बहुधा भाषितं हितमुत्तमम् । तच्च राधासुतः कर्णो मन्यते न हितं तव ॥ ३ ॥ चिन्तयंश्च न पश्यामि राजंस्तव सुहृत्तमम् । आभ्यां पुरुषसिंहाभ्यां यो वा स्यात् प्रज्ञयाधिकः ॥ ४ ॥ उभौ हि वृद्धौ वयसा प्रज्ञया च श्रुतेन च । समौ च त्वयि राजेन्द्र तथा पाण्डुसुतेषु च ॥ ५ ॥ धर्मे चानवरौ राजन् सत्यतायाञ्च भारत । रामाद्दाशरथेश्चैव गयाच्चैव न संशयः ॥ ६ ॥ न चोक्तवन्तावश्रेयः पुरस्तादपि किञ्चन । न चाप्यपकृतं किञ्चिदनयोर्लक्ष्यते त्वयि ॥ ८ ॥ तावुभौ पुरुषव्याघ्रावनागसि नृप त्वयि । न मन्यतां त्वच्छ्रेयः कथं सत्यपराक्रमौ ॥ ९ ॥ प्रज्ञावन्तौ नरश्रेष्ठावस्मिल्लोके नराधिप । त्वन्निमित्तमतो नेमौ किञ्चिज्जिह्मं वदिष्यतः ॥ १० ॥ इति मे नैष्ठिकी बुद्धिर्वर्तते कुरुनन्दन । न चार्यहेतोर्हन्यौ वक्ष्यतः पक्षसंश्रितम् ॥ ११ ॥ एतद्धि परमं श्रेयो मन्येऽहं तव भारत । दुर्योधनप्रश्रयतः पुत्रा राजन्यथा तव । तथैव पाण्डवेयास्ते पुत्रा राजन्न संशयः ॥ १२ ॥ तेषु वेदहितं किञ्चिन्मन्त्रयेयुरतद्विदः । मन्त्रिणस्ते न च श्रेयः प्रपश्यन्ति विशेषतः

॥ १३ ॥ अथ ते हृदये राजन्विद्येयः स्वेषु वर्त्तते । अन्तरज्ञं विदित्वानाः ज्ञेयः कुर्य्युर्न ते ध्रुवम् ॥ १४ ॥ एतदर्थमिमौ राजन् महात्मानौ महाद्युती । नीचतुर्विकृतं किञ्चिन्न क्षेष तव निश्चयः ॥ १५ ॥ यच्चाप्यशक्यतां तेषामाहतुः पुरुषर्षभौ । तत्तथा पुरुषव्याघ्र तव तद्भद्रमस्तु ते ॥ १६ ॥ कथं हि पाण्डवः श्रीमान् सव्यसाची धनञ्जयः । शक्यो विजेतुं संग्रामे राजन्नपवतापि हि ॥ १७ ॥ भीमसेनो महाबाहुर्नागायुतबलो महान् । कथं च युधि शक्येत विजेतुममरैरपि ॥ १८ ॥ तथैव क्षतिनौ युद्धे यमौ यमसुताविव । कथं विजेतुं शक्यौ तौ रणे जीवितुमिच्छता ॥ १९ ॥ यस्मिन् धृतिरनुक्रोशः क्षमा सत्यं पराक्रमः । नित्यानि पाण्डवे व्येष्ठे स जीयेत रणे कथम् ॥ २० ॥ येषां पक्षधरो रामो येषां मन्त्री जनार्दनः । किन्नु तैरजितं संख्ये येषां पक्षे च सात्यकिः ॥ २१ ॥ द्रुपदः श्वशुरो येषां येषां श्यालाश्च पार्षताः । धृष्टद्युम्नमुखा वीरा भ्रातरो द्रुपदात्मजाः ॥ २२ ॥ सोऽशक्यतांश्च विज्ञाय तेषामग्रे च भारत । दायादतांश्च धर्मेण सम्यक् तेषु समाचर ॥ २३ ॥ इदं निर्दिष्टमयथः पुरोचनकृतं महत् । तेषामनुग्रहेणाद्य राजन् प्रक्षालयात्मनः ॥ २४ ॥ तेषामनुग्रहस्यायं सर्वेषाञ्चैव नः कुले । जीवितञ्च परं श्रेयः क्षत्रस्य च विवर्द्धनम् ॥ २५ ॥ द्रुपदोऽपि महाञ्जाता कृतवैरश्च नः पुरा । तस्य संग्रहणं राजन् स्वपक्षस्य विवर्द्धनम् ॥ २६ ॥ बलवन्तश्च दाशार्हा बहवश्च विशाम्पते । यतः कृष्णस्ततः सर्वे यतः कृष्णस्ततो जयः ॥ २७ ॥ यच्च साम्नैव शक्येत कार्य्यं साधयितुं नृप । को दैवयुक्तात्कार्य्यं विग्रहेण समाचरेत् ॥ २८ ॥ श्रुत्वा च जीवतः पार्थान् पौरजानपदा जनाः । बलवद्दर्शने हृष्टास्तेषां राजन् प्रियं कुरु ॥ २९ ॥ दुर्योधनश्च कर्णश्च शकुनिश्चापि सौबलः । अधर्मयुक्ता दुष्प्रज्ञा बालाः सैषां वचः क्षमाः ॥ ३० ॥

उक्तमेतत् पुरा राजन्मया गुणवतस्तव । दुर्योधनापराधेन प्रजेयं वै विनङ्क्ष्यति ॥ २१ ॥

इत्यादिपर्वणि विदुरागमनपर्वणि विदुरवाक्ये सप्ताधिकद्विशततोऽध्यायः ॥ २०७ ॥

धृतराष्ट्र उवाच । भीष्मः शान्तनवो विद्वान्द्रोणश्च भगवानृषिः । हितञ्च परमं वाक्यं त्वञ्च सत्यं ब्रवीषि माम् ॥ १ ॥ यथैव पाण्डोस्ते वीराः कुन्तीपुत्रा महारथाः । तथैव धर्मतः सर्वे मम पुत्रा न संशयः ॥ २ ॥ यथैव मम पुत्राणामिदं राज्यं विधीयते । तथैव पाण्डुपुत्राणामिदं राज्यं न संशयः ॥ ३ ॥ क्षत्तरानय गच्छैतान् सह माता सुसत्कृतान् । तथा च देवरूपिण्या कृष्णया सह भारत ॥ ४ ॥ दिष्ट्या जीवन्ति ते पार्था दिष्ट्या जीवति सा पृथा । दिष्ट्या द्रुपदकन्याञ्च लब्धवन्तो महारथाः ॥ ५ ॥ दिष्ट्या वर्धामहे सर्वे दिष्ट्या शान्तः पुरोचनः । दिष्ट्या मम परं दुःखमपनीतं महाद्युते ॥ ६ ॥

वैशम्पायन उवाच । ततो जगाम विदुरो धृतराष्ट्रस्य शासनात् । सकाशं यज्ञसेनस्य पाण्डवानाञ्च भारत ॥ ७ ॥ समुपादाय रत्नानि वसूनि विविधानि च । द्रौपद्याः पाण्डवानाञ्च यज्ञसेनस्य चैव ह ॥ ८ ॥ तत्र गत्वा स धर्मज्ञः सर्वशास्त्रविशारदः । द्रुपदं न्यायतो राजन् संयुक्तमुपतस्थिवान् ॥ ९ ॥ स चापि प्रतिजग्राह धर्मेण विदुरं ततः । पप्रच्छ च यथान्यायं कुशलप्रश्नसंविदम् ॥ १० ॥ ददर्श पाण्डवांस्तत्र वासुदेवञ्च भारत । स्नेहात्परिष्वज्य स तान् पप्रच्छानामयं ततः ॥ ११ ॥ तैश्चाप्यमितबुद्धिः स पूजितो हि यथाक्रमम् । वचनाद्धृतराष्ट्रस्य स्नेहयुक्तं पुनः पुनः ॥ १२ ॥ पप्रच्छानामयं राजंस्ततस्तान् पाण्डु-

नन्दनान् । प्रददौ चापि रत्नानि विविधानि वसूनि च ॥१४॥ पाण्डवानाञ्च कुन्त्याश्च द्रौपद्याश्च विशाम्पते । द्रुपदस्य च पुत्राणां यथा दत्तानि कौरवैः ॥ १५ ॥ प्रोवाच चामितमतिः प्रश्रितं विनयान्वितः । द्रुपदं पाण्डुपुत्राणां सन्धिधौ केशवस्य च ॥१६॥

विदुर उवाच । राजन् शृणु सहामात्यः सुतस्य वचो मम । धृतराष्ट्रः सुतैस्त्यक्तः सहामात्यः सबान्धवः ॥ १७ ॥ अब्रवीत् कुशलं राजन् प्रीयमाणः पुनः पुनः । प्रीतिमांस्ते दृढञ्चापि सम्बन्धेन नराधिप ॥ १८ ॥ तथा भीष्मः शान्तनवः कौरवैः सह सर्वशः । कुशलं त्वां महाप्राज्ञः सर्वतः परिपृच्छति ॥ १९ ॥ भारद्वाजो महाप्राज्ञो द्रोणः शिष्यसखस्तव । समाश्लेषमुपेत्य त्वां कुशलं परिपृच्छति ॥ २० ॥ धृतराष्ट्रश्च पाञ्चाल्य त्वया सम्बन्धमीयिवान् । कृतार्थं मन्यतेऽऽत्मानं तथा सर्वेऽपि कौरवाः ॥ २१ ॥ न तथा राज्यसंप्राप्तिस्तेषां प्रीतिकरी मता । यथा सम्बन्धकं प्राप्य यत्नेन त्वया सह ॥ २२ ॥ एतद्विदित्वा तु भवान् प्रस्थापयतु पाण्डवान् । द्रष्टुं हि पाण्डुपुत्रांश्च त्वरन्ति कुरवो भृशम् ॥ २३ ॥ विप्रोषिता दीर्घकालमेते चापि नरर्षभाः । तत्पुरीं नगरं द्रष्टुं भविष्यन्ति तथा पुरा ॥ २४ ॥ कृष्णामपि च पाञ्चाल्यीं सर्वाः कुरुवरस्त्रियः । द्रष्टुकामाः प्रतीक्षन्ते पुरञ्च विषयाश्च नः ॥ २५ ॥ स भवान् पाण्डुपुत्राणामाज्ञापयतु मा चिरम् । गमनं सहदाराणामेतदत्र मतं मम ॥ २६ ॥ निवृत्तेषु त्वया राजन् पाण्डवेषु महात्मसु । ततोऽहं प्रेषयिष्यामि धृतराष्ट्रस्य शीघ्रगान् । आगमिष्यन्ति कौन्तेयाः कुन्ती च सह कृष्णया ॥ २७ ॥

इत्यादिपर्वणि विदुरागमनपर्वणि विदुरसंवादे अष्टाधिकद्विशततोऽध्यायः समाप्तश्च विदुरागमनपर्व ॥ २०८ ॥

—:०:—

द्रुपद उवाच । एवमेतन्महाप्राज्ञ यथात्थ विदुरार्य माम् ।
ममापि परमो हर्षः सम्बन्धेऽस्मिन् कृते प्रभो ॥ १ ॥ गमनं चापि युक्तं स्याद्दृढमेषां महात्मनाम् । न तु तावन्मया युक्तमेतद्वक्तुं स्वयं गिरा ॥ २ ॥ यदा तु मन्यते वीरः कुन्तीपुत्रो युधिष्ठिरः । भीमसेनार्जुनौ चैव यमौ च पुरुषर्षभौ ॥३॥ रामकृष्णौ च धर्मज्ञौ तदा गच्छन्तु पाण्डवाः । एतौ हि पुरुषव्याघ्रावेषां प्रियहिते रतौ ॥४॥

युधिष्ठिर उवाच । परवन्तो वयं राजंस्त्वयि सर्वे सहानुगाः । यथा वक्ष्यसि नः प्रीत्या तत्करिष्यामहे वयम् ॥ ५ ॥

वैशम्पायन उवाच । ततोऽब्रवीद्वासुदेवो गमनं रोचते मम । यथा वा मन्यते राजा द्रुपदः सर्वधर्मवित् ॥ ६ ॥

द्रुपद उवाच । यथैव मन्यते वीरो दाशार्हः पुरुषोत्तमः । प्राप्तकालं महाबाहुः सा बुद्धिर्निश्चिता मम ॥ ७ ॥ यथैव हि महाभागाः कौन्तेया मम साम्प्रतम् । तथैव वासुदेवस्य पाण्डुपुत्रा न संशयः ॥ ८ ॥ न तज्जायति कौन्तेयः पाण्डुपुत्रो युधिष्ठिरः । यथैषां पुरुषव्याघ्रः श्रेयो ध्यायति केशवः ॥ ९ ॥

वैशम्पायन उवाच । ततस्ते समनुज्ञाता द्रुपदेन महात्मना । पाण्डवाश्चैव कृष्णश्च विदुरश्च महीपते ॥ १० ॥ आदाय द्रौपदीं कृष्णां कुन्तीं चैव यशस्विनीम् । सविहारं सुखं जग्मुर्नगरं नागसाह्वयम् ॥ ११ ॥ श्रुत्वा चाप्यागतान्वीरान् धृतराष्ट्रो जनेश्वरः । प्रतिग्रहाय पाण्डूनां प्रेषयामास कौरवान् ॥ १२ ॥ विकर्णञ्च महेष्वासं चित्रसेनञ्च भारत । द्रोणञ्च परमेष्वासं गौतमं कृपमेव च ॥ १३ ॥ तैस्ते परिवृता वीराः शोभमाना महाबलाः । नगरं दक्षिणपुरं शनैः प्रविविशुस्तदा ॥ १४ ॥ कौतूहलेन नगरं दीप्यमानमिवाभवत् । तत्र ते पुरुषव्याघ्राः शोकदुःखविनाशनाः ॥ १५ ॥ तत उच्चावचा वाचः पौरैः प्रिय-

चिकीर्षुभिः। उदीरिता अमृष्यन्ते पाण्डवा हृदयङ्गमाः ॥१६॥ अयं स पुरुषव्याघ्रः पुनरायाति धर्मवित्। योनः स्वानिव दायादान् धर्मेण परिरक्षति ॥ १७ ॥ अयं पाण्डुमहाराजो वनाद्दिव्य जनप्रियः। आगतः प्रियमस्माकं चिकीर्षुर्नात्र संशयः ॥ १८ ॥ किन्नु नाद्य कृतं तात सर्वेषां नः परं प्रियम्। यन्नः कुन्तीसुता वीरा नगरं पुनरागताः ॥ १९ ॥ यदि दत्तं यदि हुतं विद्यते यदि नस्तपः। तेन तिष्ठन्तु नगरे पाण्डवाः शरदां शतम् ॥२०॥ ततस्ते धृतराष्ट्रस्य भीष्मस्य च महात्मनः। अन्येषाञ्च तद्वर्णाः चक्रुः पादाभिवन्दनम् ॥ २१ ॥ ज्ञात्वा तु कुशलप्रश्नं सर्वेषां नागरेषु च। न्यवेदयन्ताथ वेश्मानि धृतराष्ट्रस्य शासनात् ॥२२॥ विश्रान्ताञ्छे महात्मानः कञ्चित्कालं महाबलाः। आहूता धृतराष्ट्रेण राज्ञा शान्तनवेन च ॥ २३ ॥

धृतराष्ट्र उवाच। भ्रातृभिः सह कौन्तेय निबोध गदतो मम। पुनर्नो विग्रहो माभूत् खाण्डवप्रस्थमाविश ॥२४॥ न च वो वसतस्तत्र कश्चिच्छक्तः प्रबाधितुम्। संरक्ष्यमाणान् पार्थेन त्रिदशानिव वज्रिणा। अर्धं राज्यस्य संप्राप्य खाण्डवप्रस्थमाविश ॥ २५ ॥

वैशम्पायन उवाच। प्रतिगृह्य तु तद्राज्यं नृपं सर्वे प्रणम्य च। प्रतस्थिरे ततो घोरं वनं तन्नृषभाः ॥ २६ ॥ अर्धं राज्यस्य संप्राप्य खाण्डवप्रस्थमाविशन्। ततस्ते पाण्डवास्तत्र गत्वा कृष्णपुरोगमाः ॥ २७ ॥ मनश्चक्रिरे तत्र पुरं स्वर्गवदच्युताः। ततः पुण्ये शिवे देशे शान्तिं कृत्वा महारथाः ॥२८॥ नगरं मापयामासुर्द्वैपायनपुरोगमाः। सागरप्रतिरूपाभिः परिखाभिरलङ्कृतम् ॥ २९ ॥ प्राकारेण च सम्पन्नं दिवमावृत्य तिष्ठता। पाण्डुराभ्रप्रकाशेन हिमरश्मिनिभेन च ॥ ३० ॥ शुशुभे तत् पुरश्रेष्ठं नागैर्भोगवती यथा। द्विपचतुरङ्गप्रख्यैर्द्वारैः सौधैश्च शोभितम् ॥ ३१ ॥ युक्तमञ्चचयप्रख्यैर्गोपुरैर्मन्दरोपमैः।

विविधैरतिनिर्विद्धैः शस्त्रोपेतैः सुसंवृतैः ॥ ३२ ॥ शक्तिभिश्चावृतं तद्वि द्विजिह्वैरिव पन्नगैः । तस्यैश्वाभ्यसिकैर्युक्तं शुशुभे योधरक्षितम् ॥ ३३ ॥ तीक्ष्णाङ्कुशयतघ्नीभिर्यन्त्रजालैश्च शोभितम् । आयसैश्च महाचक्रैः शुशुभे तत् पुरोत्तमम् ॥ ३४ ॥ सुविभक्तमहारथ्यं देवतायतनैर्वृतम् । विरोचमानं विविधैः पाण्डवैर्भवनोत्तमैः ॥ ३५ ॥ तत्सिपिष्टपसङ्काशमिन्द्रप्रस्थं व्यरोचत । मेघवृन्दमिवाकाशे विद्युत्सम्भावृतम् ॥ ३६ ॥ तत्र रम्ये शिवे देशे कौरवस्य निवेशनम् । शुशुभे धनसम्पूर्णं धनाध्यक्षक्षयोपमम् ॥ ३७ ॥ तत्रागच्छन् द्विजा राजन् सर्ववेदविदाम्वराः । निशम्य रोचयन्ति स्म सर्वभाषाविदस्तथा ॥ ३८ ॥ वणिजश्चाप्ययुस्तत्र नानादिग्भ्यो धनार्थिनः । सर्वशिल्पविदस्तत्र वासायाभ्यागमंस्तदा ॥ ३९ ॥ उद्यानानि च रम्याणि नगरस्य समन्ततः । आम्रैराम्रातकैर्नीपैरशोकैश्चम्पकैस्तथा ॥ ४० ॥ पुन्नागैर्नागपुष्पैश्च लकुचैः पनसैस्तथा । शालतालतमालैश्च बकुलैश्च सकेतकैः ॥ ४१ ॥ मनोहरैः सुपुष्पैश्च फलभारावनामितैः । प्राचीनामलकैर्लोध्रैरङ्कोलैश्च सुपुष्पितैः ॥ ४२ ॥ जम्बुभिः पाटलाभिश्च कुब्जकैरतिमुक्तकैः । करवीरैः पारिजातैरन्यैश्च विविधैर्द्रुमैः ॥ ४३ ॥ नित्यपुष्पफलोपेतैर्नानाद्विजगणायुतैः । मत्तबर्हिणसंघुष्टं कोकिलैश्च सदामदैः ॥ ४४ ॥ गृहैरादर्शविमलैर्विविधैश्च खताम्रकैः । मनोहरैश्चित्रगृहैस्तथा जगतिपर्वतैः ॥ ४५ ॥ वापीभिर्विविधाभिश्च पूर्णाभिः परमाम्भसा । सरोभिरतिरम्यैश्च पद्मोत्पलसुगन्धिभिः ॥ ४६ ॥ हंसकारण्डवयुतैश्चक्रवाकोपशोभितैः । रम्याश्च विविधास्तत्र पुष्करिण्यो वनावृताः । तडागानि च रम्याणि वृहन्ति सुखवन्ति च ॥ ४७ ॥ तेषां पुण्यजनोपेतं राष्ट्रमाविशतां महत् । पाण्डवानां महाराज शश्वत् प्रीतिरवर्धत ॥ ४८ ॥ तत्र भौमेन राज्ञा च धर्मप्रणयने कृते । पाण्डवाः समपद्यन्त खाण्डवप्रस्थ-

वासिनः ॥ ४८ ॥ पञ्चभिस्तैर्महेष्वासैरिन्द्रकल्पैः समन्वितम् । शुशुभे तत् पुरश्रेष्ठं नागैर्भोगवती यथा ॥ ५० ॥ तां निवेश्य ततो वीरो रामेण सह केशवः । ययौ द्वारवतीं राजन् पाण्डवानुमते तदा ॥ ५१ ॥

इत्यादिपर्वणि राज्यलाभपर्वणि कृष्णगमने
नवाधिकद्विशततोऽध्यायः ॥ २०९ ॥

—:०:—

जनमेजय उवाच । एवं सम्राप्य राज्यन्तदिन्द्रप्रस्थं तपोधन । अत ऊर्द्धं महात्मानः किमकुर्वत पाण्डवाः ॥ १ ॥ सर्व एव महासत्त्वा मम पूर्वपितामहाः । द्रौपदी धर्मपत्नी च कथं तानन्ववर्त्तत ॥ २ ॥ कथञ्च पञ्च कृष्णायामेकस्यां ते नराधिपाः । वर्त्तमाना महाभागा नाभिद्यन्त परस्परम् ॥ ३ ॥ श्रोतुमिच्छाम्यहं सर्वं विस्तरेण तपोधन । तेषां चेष्टितमन्योन्यं युक्तानां कृष्णया सह ॥ ४ ॥

वैशम्पायन उवाच । धृतराष्ट्राभ्यनुज्ञाताः कृष्णया सह पाण्डवाः । रेमिरे खाण्डवप्रस्थे प्राप्तराज्याः परन्तपाः ॥ ५ ॥ प्राप्य राज्यं महातेजाः सत्यसन्धो युधिष्ठिरः । पालयामास धर्मेण पृथिवीं भ्रातृभिः सह ॥ ६ ॥ जितारयो महाप्राज्ञाः सत्यधर्मपरायणाः । सुखं परमिकां प्राप्ताक्षत्रियाः पाण्डुनन्दनाः ॥ ७ ॥ कुर्वाणाः पौरकार्य्याणि सर्वाणि पुरुषर्षभाः । आसाञ्चक्रुर्महार्हेषु पार्थिवेष्वासनेषु च ॥ ८ ॥ अथ तेषूपविष्टेषु सर्वेष्वेव महात्मसु । नारदस्तत्र देवर्षिराजगाम यदृच्छया ॥ ९ ॥ आसनं रुचिरं तस्मै प्रददौ स्वं युधिष्ठिरः । देवर्षेरुपविष्टस्य स्वयमर्घ्यं यथाविधि ॥ १० ॥ प्रादाद्युधिष्ठिरो धीमान् राज्यं तस्मै न्यवेदयत् । प्रतिगृह्य तु तां पूजामृषिः प्रीतमनास्तदा

॥ ११ ॥ आशीर्भिर्वर्द्धयित्वा च तमुवाचास्यतामिति। निषसादाभ्यनुज्ञातस्ततो राजा युधिष्ठिरः ॥ १२ ॥ प्रेषयामास कृष्णायै भगवन्तमुपस्थितम्। श्रुत्वैतद्द्रौपदी चापि शुचिर्भूत्वा समाहिता ॥ १३ ॥ जगाम तत्र यत्रास्ते नारदः पाण्डवैः सह। तस्याभिवाद्य चरणौ देवर्षेर्धर्मचारिणौ ॥ १४ ॥ कृताञ्जलिः सुसम्वीता स्थिताथ द्रुपदात्मजा। तस्यापि स धर्मात्मा सत्यवाग्ऋषिसत्तमः ॥ १५ ॥ आशिषो विविधाः प्रोच्य राजपुत्र्यास्तु नारदः। गम्यतामिति होवाच भगवांस्तामनिन्दिताम् ॥ १६ ॥ गतायामथ कृष्णायां युधिष्ठिरपुरोगमान्। विविक्ते पाण्डवान् सर्वानुवाच भगवानृषिः ॥ १७ ॥

नारद उवाच। पाञ्चाली भवतामेका धर्मपत्नी यशस्विनी। यथा वो नात्र भेदः स्यात्तथा नीतिर्विधीयताम् ॥ १८ ॥ सुन्दोपसुन्दौ हि पुरा भ्रातरौ सहितावुभौ। आक्रामवध्यावन्येषां त्रिषु लोकेषु विश्रुतौ ॥ १९ ॥ एकराज्यावेकगृहावेकशय्यासनाशनौ। तिलोत्तमाभावार्थौ हेतोरन्योन्यमभिजघ्नतुः ॥ २० ॥ रक्ष्यतां सौहृदं तस्मादन्योन्यप्रीतिभावकम्। यथा वो नात्र भेदः स्यात्तत् कुरुष्व युधिष्ठिर ॥ २१ ॥

युधिष्ठिर उवाच। सुन्दोपसुन्दावसुरौ कस्य पुत्रौ महामुने। उत्पन्नश्च कथं भेदः कथञ्चान्योन्यमघ्नताम् ॥ २२ ॥ अप्सरा देवकन्या वै कस्य चैषा तिलोत्तमा। यस्याः कामेन सम्मत्तौ जघ्नतुस्तौ परस्परम् ॥ २३ ॥ एतत्सर्वं यथावृत्तं विस्तरेण तपोधन। श्रोतुमिच्छामहे ब्रह्मन् परं कौतूहलं हि नः ॥ २३ ॥

इत्यादिपर्वणि राज्यलाभपर्वणि युधिष्ठिरनारदसंवादे दशाधिकद्विशततोऽध्यायः ॥ २१० ॥

———

नारद उवाच । शृणु मे विस्तरेणेममितिहासं पुरातनम् । भ्रातृभिः सहितः पार्थ यथाऽऽप्तं सुखिष्ठिर ॥ १ ॥ महासुरस्याम्ववाये हिरण्यकशिपोः पुरा । निकुम्भो नाम दैत्येन्द्रस्तेजस्वी बलवानभूत् ॥ २ ॥ तस्य पुत्रौ महावीर्य्यौ जातौ भीमपराक्रमौ । सुन्दोपसुन्दौ दैत्येन्द्रौ दारुणौ क्रूरमानसौ ॥ ३ ॥ तावेकनिश्चयौ दैत्यावेककार्य्यार्थसम्मतौ । निरन्तरमवर्त्तेतां समदुःखसुखावुभौ ॥ ४ ॥ विनान्योऽन्यं न भुञ्जाते विनान्योऽन्यं न जग्मतुः । अन्योऽन्यस्य प्रियकरावन्योऽन्यस्य प्रियंवदौ ॥ ५ ॥ एकशीलसमाचारौ द्विधैवैकोऽभवत् कृतः । तौ विहृत्य महावीर्य्यौ कार्य्येष्वप्येकनिश्चयौ ॥ ६ ॥ त्रैलोक्यविजयार्थाय समाधायैकनिश्चयम् । दीक्षां कृत्वा गतौ विन्ध्यं तावुग्रं तेपतुस्तपः ॥ ७ ॥ तौ तु पूर्वेण कालेन तपोयुक्तौ बभूवतुः । क्षुत्पिपासापरिश्रान्तौ जटावल्कलधारिणौ ॥ ८ ॥ मलोपचितसर्वाङ्गौ वायुभक्षौ बभूवतुः । आत्ममांसानि जुह्वन्तौ पादाङ्गुष्ठाग्रधिष्ठितौ । ऊर्द्ध्वबाहू चानिमिषौ दीर्घकालं धृतव्रतौ ॥ ९ ॥ तयोस्तपःप्रभावेण दीर्घकालं प्रतापितः । धूमं प्रसुसुचे विन्ध्यस्तदद्भुतमिवाभवत् ॥ १० ॥ ततो देवा भयं जग्मुरुग्रं दृष्ट्वा तयोस्तपः । तपोविघातार्थमथो देवा विघ्नानि चक्रिरे ॥ ११ ॥ रत्नैः प्रलोभयामासुः स्त्रीभिश्चोभौ पुनः पुनः । न च तौ चक्रतुर्भङ्गं व्रतस्य सुमहाव्रतौ ॥ १२ ॥ अथ मायां पुनर्दैत्यावास्थायोग्रमुपाश्रितौ । भगिन्यौ मातरौ भार्य्यास्तयोश्चालजनस्तया ॥ १३ ॥ प्रपात्यमाना विवशाः शूलहस्तेन रक्षसा । भ्रष्टाभरणकेशान्ता भ्रष्टाभरणवाससः ॥ १४ ॥ अभिभाष्य ततः सर्वास्तौ चाहीति विचुक्रुशुः । न च तौ चक्रतुर्भङ्गं व्रतस्य सुमहाव्रतौ ॥ १५ ॥ यदा क्षोभं नोपयाति नार्त्तिमन्यतरस्तयोः । ततः स्त्रियस्ता भूतश्च सर्वमन्तरधीयत ॥ १६ ॥ ततः पितामहः साक्षादभिगम्य महा-

सुरौ । वरेण छन्दयामास सर्वलोकहितः प्रभुः ॥ १७ ॥ ततः सुन्दोपसुन्दौ तौ भ्रातरौ दृढविक्रमौ । दृष्ट्वा पितामहं देवं तस्थतुः प्राञ्जली तदा ॥ १८ ॥ ऊचतुस्तु प्रभुं देवं ततस्तौ सहितौ तदा । आवयोस्तपसानेन यदि प्रीतः पितामहः ॥ १९ ॥ मायाविदावस्त्रविदौ बलिनौ कामरूपिणौ । उभावप्यमरौ स्यावः प्रसन्नो यदि नौ प्रभुः ॥ २० ॥

ब्रह्मोवाच । ऋतेऽमरत्वं युवयोः सर्वमुक्तं भविष्यति । अन्यदृणीतं मृत्योश्च विधानममरैः समम् ॥ २१ ॥ प्रभविष्याव इति यन्मयेदमुद्यतं तपः । युवयोर्हेतुनानेन नामरत्वं विधीयते ॥ २२ ॥ त्रैलोक्यविजयार्थाय भवद्भ्यामास्थितं तपः । हेतुनानेन दैत्येन्द्रौ न वाञ्छां करोम्यहम् ॥ २३ ॥

सुन्दोपसुन्दौ ऊचतुः । त्रिषु लोकेषु यद्भूतं किञ्चित् स्थावरजङ्गमम् । सर्वस्मान्नौ भयं न स्यादृतेऽन्योऽन्यं पितामह ॥ २४ ॥

पितामह उवाच । यत् प्रार्थितं यथोक्तञ्च कामभेतं ददानि वाम् । मृत्योर्विधानमेतच्च यथावद्वां भविष्यति ॥ २५ ॥

नारद उवाच । ततः पितामहो दत्त्वा वरमेतत्तदा तयोः । निवर्त्य तपसस्तौ च ब्रह्मलोकं जगाम ह ॥ २६ ॥ लब्ध्वा वराणि दैत्येन्द्रावथ तौ भ्रातरावुभौ । अवध्यौ सर्वलोकस्य स्वमेव भवनं गतौ ॥ २७ ॥ तौ तु लब्धवरौ दृष्ट्वा कृतकामौ मनस्विनौ । सर्वः सुहृज्जनस्ताभ्यां प्रहर्षमुपजग्मिवान् ॥ २८ ॥ ततस्तौ तु जटां भित्त्वा मौलिनौ समभूवतुः । महार्हाभरणोपेतौ विरजोऽम्बरधारिणौ ॥ २९ ॥ अकालकौमुदीं चैव चक्रतुः सार्वकालिकीम् । नित्यप्रमुदितः सर्वस्तयोश्चैव सुहृज्जनः ॥ ३० ॥ भक्ष्यतां भुज्यतां नित्यं दीयतां रम्यतामिति । गीयतां पीयतां चेति शब्दस्तासीन्नृहे गृहे ॥ ३१ ॥ तत्र तत्र महानादैरुत्कृष्टतलनादितैः । हृष्टं प्रमुदितं सर्वं दैत्यानामभवत् पुरम् ॥ ३२ ॥ तैस्तैर्विहारैः

वैरूपैर्दैत्यानां कामरूपिणाम् । समाः संक्रीडतां तेषामहरेकमिवाभवत् ॥ ३२ ॥

इत्यादिपर्वणि राज्यलाभपर्वणि सुन्दोपसुन्दोपाख्याने एकादशाधिकद्विशततोऽध्यायः ॥ २११ ॥

—०:०—

नारद उवाच । उत्सवे वृत्तमात्रे तु त्रैलोक्याकाङ्क्षिणावुभौ । मन्त्रयित्वा ततः सैनां तावाज्ञापयतां तदा ॥ १ ॥ सुहृद्भिरप्यनुज्ञातौ दैत्यैर्दैत्यैश्च मन्त्रिभिः । कृत्वा प्राच्यानिकं रात्रौ मघासु ययतुस्तदा ॥ २ ॥ गदापट्टिशधारिण्या घूतसुङ्गरहस्तया । प्रस्थितौ सह वर्मिण्या महत्या दैत्यसेनया ॥ ३ ॥ मङ्गलैः स्तुतिभिश्चापि विजयप्रतिसंहितैः । चारणैः स्तूयमानौ तौ जग्मतुः परया मुदा ॥ ४ ॥ तावन्तरीक्षमुत्पत्य दैत्यौ कामगमावुभौ । देवानामेव भवनं जग्मतुर्बृहदुर्मदौ ॥ ५ ॥ तयोरागमनं ज्ञात्वा वरदानञ्च तत्प्रभोः । हित्वा त्रिपिष्टपं जग्मुर्ब्रह्मलोकं ततः सुराः ॥ ६ ॥ तावित्यूचुः निर्जित्य यक्षरक्षोगणांस्तदा । खेचरानपि भूतानि जग्नतुस्तीव्रविक्रमौ ॥ ७ ॥ अन्तर्भूमिगताञ्जागान् जित्वा तौ च महारथौ । समुद्रवासिनीः सर्वा म्लेच्छजातीर्विजिग्यतुः ॥ ८ ॥ ततः सर्वां महीं जेतुमारब्धावुग्रशासनौ । सैनिकांश्च समाहूय सुतीक्ष्णं वाक्यमूचतुः ॥ ९ ॥ राजर्षयो महायज्ञैर्हव्यकव्यैर्हिजातयः । तेजोबलञ्च देवानां बर्हयन्ति श्रियं तथा ॥ १० ॥ तेषामेवं प्रवृत्तानां सर्वेषामसुरद्विषाम् । सभूय सर्वैरस्माभिः काव्यैः सर्वात्मना वधः ॥ ११ ॥ एवं सर्वान् समादिश्य पूर्वतीरे महोदधेः । क्रूरां मतिं समास्थाय जग्मतुः सर्वतोमुखौ ॥ १२ ॥ यज्ञैर्यजन्ति ये केचिद्याजयन्ति च ये द्विजाः । तान् सर्वान् प्रसभं हत्वा बलिनौ जग्मतुस्ततः ॥ १३ ॥ आश्रमे-

ष्वग्निहोत्राणि मुनीनां भावितात्मनाम् । गृहीत्वा प्रक्षिपन्त्यम्भ विध्वंसैनिकास्तयोः ॥ १४ ॥ तपोधनेषु ये क्रुद्धैः शापा उक्ता महात्मभिः । नाक्रामन्त तयोरुक्षेऽपि वरदाननिराकृताः ॥ १५ ॥ नाक्रामन्त यदा शापा बाणा मुक्ताः शिलास्विव । नियमान् संपरित्यज्य व्यद्रवन्त द्विजातयः ॥ १६ ॥ दृषिव्यां ये तपःसिद्धा दान्ताः शमपरायणाः । तयोर्भयात् दुद्रुवुस्ते वैनतेयादिवोरगाः ॥ १७ ॥ मथितैराश्रमैर्भग्नैर्विकीर्णकलशस्रुवैः । शून्यमासीज्जगत्सर्वं कालेनेव हतं तदा ॥ १८ ॥ ततो राजन्महाशृङ्गैरृक्षैर्गिरिमिव मदासुरौ । उभौ विनिश्चयं कृत्वा विक्रुर्वाते बधैषिणौ ॥ १९ ॥ प्रभिन्नकरटौ मत्तौ भूत्वा कुञ्जररूपिणौ । संक्षीनमपि दुर्गेषु निघ्नतुर्ध्वंसयन्तौ ॥ २० ॥ सिंहौ भूत्वा पुनर्व्याघ्रौ पुनश्चान्तर्हितावुभौ । तैस्तैरुपायैस्तौ क्रूरानृषीन् दृष्ट्वा निजघ्नतुः ॥ २१ ॥ निवृत्तयज्ञस्वाध्याया प्रणष्टदृषतिद्विजा । उत्सन्नोत्सवसंज्ञा च बभूव वसुधा तदा ॥ २२ ॥ हाहाभूता भयार्त्ता च निवृत्तविपणापणा । निवृत्तदैवकार्य्या च मुण्डोद्वाहविवर्जिता ॥ २३ ॥ निवृत्तऋषिगोरक्षा विध्वस्तनगराश्रमा । अस्थिकङ्कालसंकीर्णा भूर्बभूवोग्रदर्शना ॥ २४ ॥ निवृत्तपितृकार्य्यं च निर्वषट्कारमङ्गलम् । जगत् प्रतिभयाकारं दुष्प्रेक्ष्यमभवत्तदा ॥ २५ ॥ चन्द्रादित्यौ ग्रहास्तारा नक्षत्राणि दिवौकसः । जग्मुर्विषादं तत्कर्म दृष्ट्वा सुन्दोपसुन्दयोः ॥ २६ ॥ एवं सर्वा दिशो दैत्यौ जित्वा क्रूरेण कर्मणा । निःसपत्नौ कुरुक्षेत्रे निवेशमभिचक्रतुः ॥ २७ ॥

इत्यादिपर्वणि राज्यलाभपर्वणि सुन्दोपसुन्दोपाख्याने द्वादशाधिकद्विशततोऽध्यायः ॥ २१२ ॥

नारद उवाच । ततो देवर्षयः सर्वे सिद्धाश्च परमर्षयः । जग्मुस्तदा परामार्तिं दृष्ट्वा तत्कदनं महत् ॥ १ ॥ तेऽभिजग्मुर्जितक्रोधा जितात्मानो जितेन्द्रियाः । पितामहस्य भवनं जगतः कृपया तदा ॥ २ ॥ ततो ददृशुरासीनं सह देवैः पितामहम् । सिद्धैर्ब्रह्मर्षिभिश्चैव समन्तात् परिवारितम् ॥ ३ ॥ तत्र देवो महादेवस्तत्राग्निर्वायुना सह । चन्द्रादित्यौ च शक्रश्च पारमेष्ठ्यास्तथर्षयः ॥ ४ ॥ वैखानसा वालिखिल्या वानप्रस्था मरीचिपाः । अजाश्चैवाविमूढाश्च तेजोगर्भास्तपस्विनः ॥ ५ ॥ ऋषयः सर्व एवैते पितामहमुपागमन् । ततोऽभिगम्य ते दीनाः सर्व एव महर्षयः ॥ ६ ॥ सुन्दोपसुन्दयोः कर्म सर्व एव न्यवेदयंस्ततः सर्वमखिलेन पितामहे । ततो देवगणाः सर्वे ते चैव परमर्षयः ॥ ८ ॥ तमेवार्थं पुरस्कृत्य पितामहमचोदयन् । ततः पितामहः श्रुत्वा सर्वेषां तद्वचस्तदा ॥ ९ ॥ मुहूर्तमिव संचिन्त्य कर्तव्यस्य च निश्चयम् । तयोर्बधं समुद्दिश्य विश्वकर्माणमाह्वयत् ॥ १० ॥ दृष्ट्वा च विश्वकर्माणं व्यादिदेश पितामहः । सृज्यतां प्रार्थनीयैका प्रमदेति महातपाः ॥ ११ ॥ पितामहं नमस्कृत्य तद्वाक्यमभिनन्द्य च । तिलमेव योषितं दिव्यां चिन्तयित्वा पुनः पुनः ॥ १२ ॥ त्रिषु लोकेषु यत्किञ्चिद्भूतं स्थावरजङ्गमम् । समानयद्दर्शनीयं तत्तदत्र स विश्वकृत् ॥ १३ ॥ कोटिशश्चैव रत्नानि तस्या गात्रे न्यवेशयत् । तां रत्नसङ्घातमयीमसृजद्देवरूपिणीम् ॥ १४ ॥ सा प्रयत्नेन महता निर्मिता विश्वकर्मणा । त्रिषु लोकेषु नारीणां रूपेणाप्रतिमाभवत् ॥ १५ ॥ न तस्याः सूक्ष्ममप्यस्ति यद्गात्रे रूपसम्पदा । नियुक्ता यत्र वा दृष्टिर्न सज्जति निरीक्षताम् ॥ १६ ॥ सा विग्रहवतीव श्रीः कामरूपा वपुष्मती । जहार सर्वभूतानां चक्षूंषि च मनांसि च ॥ १७ ॥ तिलं तिलं

समानीय रत्नानां यद्विनिर्मिता। तिलोत्तमेति तत्तस्या नाम चक्रे पितामहः॥ १८॥ ब्रह्माणं सा नमस्कृत्य प्राञ्जलिर्वाक्यमब्रवीत्। किं कार्यं मयि भूतेश येनास्म्याद्येह निर्मिता॥ १९॥

पितामह उवाच। गच्छ सुन्दोपसुन्दाभ्यामसुराभ्यां तिलोत्तमे। प्रार्थनीयेन रूपेण कुरु भद्रे प्रलोभनम्॥ २०॥ त्वत्कृते दर्शनादेव रूपसम्पत् कृतेन वै। विरोधः स्याद्यथा ताभ्यामन्योऽन्येन तथा कुरु॥ २१॥

नारद उवाच। सा तथेति प्रतिज्ञाय नमस्कृत्य पितामहम्। चकार मण्डलं तत्र विबुधानां प्रदक्षिणम्॥ २२॥ प्राङ्मुखो भगवानास्ते दक्षिणेन महेश्वरः। देवायैवोत्तरेणासन् सर्वतस्त्वृषयोऽभवन्॥ २३॥ कुर्वत्या तं तया तत्र मण्डलं तत् प्रदक्षिणम्। इन्द्रः स्थाणुश्च भगवान्यत्नैर्वर्णैः प्रत्यवस्थितौ॥ २४॥ द्रष्टुकामस्य चात्यर्थं गतया पार्श्वतस्तया। अन्यदक्षितपद्माभं दक्षिणं निःसृतं मुखम्॥ २५॥ पृष्ठतः परिवर्त्यान्या पश्चिमं निःसृतं मुखम्। गतया चोत्तरं पार्श्वमुत्तरं निःसृतं मुखम्॥ २६॥ महेन्द्रस्यापि नेत्राणां पृष्ठतः पार्श्वतोऽग्रतः। रक्तान्तानां विशालानां सहस्रं सर्वतोऽभवत्॥ २७॥ एवं चतुर्मुखः स्थाणुर्महादेवोऽभवत् पुरा। तथा सहस्रनेत्रश्च बभूव बलसूदनः॥ २८॥ तया देवनिकायानां महर्षीणाञ्च सर्वशः। मुखानि चाभ्यवर्त्तन्त येन याता तिलोत्तमा॥ २९॥ तस्या गात्रे निपतिता दृष्टिलेखा महात्मनाम्। सर्वेषामेव भूयिष्ठमृते देवं पितामहम्॥ ३०॥ गच्छन्त्या तु तया सर्वे देवाश्च परमर्षयः। कृतमित्येव तत्कार्यं मेनिरे रूपसम्पदा॥ ३१॥ तिलोत्तमायां तस्यान्तु गतायां लोकभावनः। सर्वान् विसर्ज्जयामास देवर्षिगणांश्च तान्॥ ३२॥

इत्यादिपर्वणि राज्यलाभपर्वणि तिलोत्तमाप्रस्थापने त्रयोदशाधिकद्विशततोऽध्यायः॥ २१३॥

नारद उवाच। जित्वा तु पृथिवीं दैत्यौ निःसपत्नौ गतव्यथौ। कृत्वा त्रैलोक्यमव्यग्रं कृतकृत्यौ बभूवतुः॥ १॥ देवगन्धर्वयक्षाणां नागपार्थिवरक्षसाम्। आदाय सर्वरत्नानि परां तुष्टिमुपागतौ॥ २॥ यदा न प्रतिषेद्धारस्तयोः सन्तीह केचन। निरुद्योगौ तदा भूत्वा विजह्रातेऽमरावि॥ ३॥ स्त्रीभिर्माल्यैश्च गन्धैश्च भक्ष्यभोज्यैः; सुपुष्कलैः। पानैश्च विविधैर्हृद्यैः; परां प्रीतिमवापतुः॥ ४॥ अन्तःपुरवनोद्याने पर्वतेषु वनेषु च। यथेष्वितेषु देशेषु विजह्रातेऽमरावि॥ ५॥ ततः कदाचिद्विन्ध्यस्य प्रस्थे समधिरोहतले। पुष्पिताग्रेषु शालेषु विहारमभिजग्मतुः॥ ६॥ दिव्येषु सर्वकामेषु समानीतेषु तावुभौ। वरासनेषु संहृष्टौ सहस्त्रीभिर्निषेदतुः॥ ७॥ ततो वादित्रवृत्याभ्यासुपातिष्ठन्त तौ स्त्रियः। गीतैश्च स्तुतिसंयुक्तैः प्रीत्या समुपजह्निरे॥ ८॥ ततस्तिलोत्तमा तत्र वने पुष्पाणि चिन्वती। वेशं साचिन्तमाधाय रक्तेनैकेन वाससा॥ ९॥ नदीतीरेषु जातान् सा कर्णिकारान् प्रचिन्वती। शनैर्जगाम तं देशं यत्रास्तां तौ महासुरौ॥ १०॥ तौ तु पीत्वा वरं पानं मदरक्तान्तलोचनौ। दृष्ट्वैव तां वरारोहां व्यथितौ समभूवतुः॥ ११॥ तावुत्थायासनं हित्वा जग्मतुर्यत्र सा स्थिता। उभौ च कामसम्मत्तावुभौ प्रार्थयतश्च ताम्॥ १२॥ दक्षिणे तां करे सुन्दूं सुन्दो जग्राह पाणिना। उपसुन्दोऽपि जग्राह वामे पाणौ तिलोत्तमाम्॥ १३॥ वरप्रदानमत्तौ तावैश्वरेण बलेन च। धनरत्नमदाभ्याञ्च सुरापानमदेन च॥ १४॥ सर्वैरेतैर्मदैर्मत्तावन्योऽन्यं भ्रुकुटीकृतौ। मदकामसमाविष्टौ परस्परमथोचतुः॥ १५॥ मम भार्य्या तव गुरुरिति सुन्दोऽभ्यभाषत। मम भार्य्या तव बधूरुपसुन्दोऽभ्यभाषत॥ १६॥ नैषा तव ममैषेति ततस्तौ मन्युराविशत्। तस्या रूपेण सम्मत्तौ विगतस्नेहसौहृदौ॥ १७॥ तस्या हेतोर्गदे भीमे सङ्गृहीता-

वुभौ तदा। प्रगृह्य च गदे भीमे तस्यां तौ काममोहितौ ॥१८॥ अहं पूर्वमहं पूर्वमित्यन्योन्यं निजघ्नतुः। तौ गदाभिहतौ भीमौ पेततुर्धरणीतले ॥ १९ ॥ रुधिरेणावसिक्ताङ्गौ द्वाविवार्कौ नभच्युतौ। ततस्ता विद्रुता नार्श्वः स च दैत्यगणस्तथा। पातालमगमत्सर्वो विषादभयकम्पितः ॥ २० ॥ ततः पितामहस्तत्र सहदेवैर्महर्षिभिः। आजगाम विशुद्धात्मा पूजयंश्च तिलोत्तमाम् ॥ २१ ॥ वरेण छन्दयामास भगवान् प्रपितामहः। वरदित्सुः स तत्रैनां प्रीतः प्राह पितामहः ॥ २२ ॥ आदित्यचरितालोकान्विचरिष्यसि भाविनि। तेजसा च सुदृष्टां त्वां न करिष्यति कश्चन ॥ २३ ॥ एवं तस्यै वरं दत्वा सर्वलोकपितामहः। इन्द्रे त्रैलोक्यमाधाय ब्रह्मलोकं गतः प्रभुः ॥ २४ ॥

नारद उवाच। एवं तौ सहितौ भूत्वा सर्वार्थैरेकनिश्चयौ। तिलोत्तमार्थं संक्रुद्धावन्योन्यमभिजघ्नतुः ॥२५॥ तस्मादुब्रवीमि वः स्नेहात् सर्वान् भरतसत्तमाः। यथा वो नात्र भेदः स्यात् सर्वेषां द्रौपदीकृते। तथा कुरुतः भद्रं वो मम चेत् प्रियमिच्छथ ॥२६॥

वैशम्पायन उवाच। एवमुक्ता महात्मानो नारदेन महर्षिणा। समयं चक्रिरे राजंस्तेऽन्योन्यं वशमागताः ॥ २७ ॥ समयं तस्य देवर्षेर्नारदस्यामितौजसः। द्रौपद्या नः सहासीनन्योऽन्यं योऽभिदर्शयेत्। २८ ॥ स नो द्वादशवर्षाणि ब्रह्मचारी वने वसेत्। कृते तु समये तस्मिन् पाण्डवैर्धर्मचारिभिः। नारदोऽप्यगमत् प्रीत इष्टं देशं महामुनिः ॥ २९ ॥ एवं तैः समयः पूर्वं कृतो नारदचोदितैः। न चाभिद्यन्त ते सर्वे तदान्योऽन्येन भारत ॥ ३० ॥

इत्यादिपर्वणि राज्यलाभपर्वणि सुन्दोपसुन्दोपाख्याने चतुर्दशाधिकद्विशततोऽध्यायः समाप्तश्च राज्यलाभपर्व ॥ २१४ ॥

—०:०—

वैशम्पायन उवाच। एवं ते समयं कृत्वा न्यवसंस्तत्र पाण्डवाः। वशे शस्त्रप्रतापेन कुर्वन्तोऽन्यान्महीक्षितः ॥ १ ॥ तेषां मनुजसिंहानां पञ्चानाममितौजसाम्। बभूव कृष्णा सर्वेषां पार्थानां वशवर्त्तिनी ॥ २ ॥ ते तया तैश्च सा वीरैः पतिभिः सह यज्ञभिः। बभूव परमप्रीता नागैरिव सरस्वती ॥ ३ ॥ वर्त्तमानेषु धर्मेण पाण्डवेषु महात्मसु। व्यवर्द्धन् कुरवः सर्वे हीनदोषाः सुखान्विताः ॥ ४ ॥ अथ दीर्घेण कालेन ब्राह्मणस्य विशाम्पते। कस्यचित्तस्करा जह्रुः केचिन्ना नृपसत्तम ॥ ५ ॥ ह्रियमाणे धने तस्मिन् ब्राह्मणः क्रोधमूर्च्छितः। आगम्य खाण्डवप्रस्थमुदक्रोशत्स पाण्डवान् ॥ ६ ॥ ह्रियते गोधनं क्षुद्रैर्नृशंसैरकृतात्मभिः। प्रसह्य चास्मद्विषयाद्भ्यधावत पाण्डवाः ॥ ७ ॥ ब्राह्मणस्य प्रयान्तस्य हविर्व्यालैः प्लुष्यते। यार्द्रं तस्य मुखं शून्यं नीचः क्रोष्टाभिमर्दति ॥ ८ ॥ अरक्षितारं राजानं बलषड्भागहारिणम्। तमाहुः सर्वलोकस्य समयं पापचारिणम् ॥ ९ ॥ ब्राह्मणस्वे हृते चौरैर्धर्मार्थे च विलोपिते। रोरूयमाणे च मयि क्रियतां हस्तधारणा ॥ १० ॥

वैशम्पायन उवाच। रोरूयमाणस्याभ्याशे श्रुत्वं विप्रस्य पाण्डवः। तानि वाक्यानि शुश्राव कुन्तीपुत्रो धनञ्जयः ॥ ११ ॥ श्रुत्वैव च महाबाहुर्भैरित्याह तं द्विजम्। आयुधानि च यत्रासन् पाण्डवानां महात्मनाम् ॥ १२ ॥ कृष्णया सह तत्रास्ते धर्मराजो युधिष्ठिरः। सम्प्रवेशाय चाशक्तो गमनाय च पाण्डवः ॥ १३ ॥ तस्य चार्त्तस्य तैर्वाक्यैरुद्यमानः पुनः पुनः। आक्रन्दे तत्र कौन्तेयश्चिन्तयामास दुःखितः ॥ १४ ॥ ह्रियमाणे धने तस्मिन् ब्राह्मणस्य तपस्विनः। अश्रुप्रमार्जनं तस्य कर्त्तव्यमिति निश्चयः ॥ १५ ॥ उपप्रेक्षणजोऽधर्मः सुमहान् स्यान्महीपतेः।

यद्यस्य रुदतो द्वारि न करोम्यद्य रक्षणम् ॥ १६ ॥ अनास्तिक्यञ्च सर्वेषामस्माकमपि रक्षणे । प्रतितिष्ठेत लोकोऽस्मिन्नधर्मश्चैव नो भवेत् ॥ १७ ॥ अनादृत्य तु राजानं गते मयि न संशयः । अजातशत्रोर्नृपतेर्मयि चैवाहृतं भवेत् ॥ १८ ॥ अनुप्रवेशे राज्ञस्तु वनवासो भवेन्मम । सर्वमन्यत्परिहृतं धर्षणात्तु महीपतेः ॥ १९ ॥ अधर्मो वै महानस्तु वने वा मरणं मम । शरीरस्य विनाशेन धर्म एव विशिष्यते ॥ २० ॥ एवं विनिश्चित्य ततः कुन्तीपुत्रो धनञ्जयः । अनुप्रविश्य राजानमाहूच्छ्य च विशाम्पते ॥ २१ ॥ धनुरादाय संहृष्टो ब्राह्मणं प्रत्यभाषत । ब्राह्मणागम्यतां शीघ्रं यावत् परधनैषिणः ॥ २२ ॥ न दूरे ते गताः क्षुद्रास्तावच्छक्ष्यामहे वयम् । यावन्निवर्त्तयाम्यद्य चौरहस्ताद्धनं तव ॥ २३ ॥ सोऽनुहृत्य महाबाहुर्ध्वजी वर्मी रथी ध्वजी । शरैर्विध्वस्य तांश्चौरानवजित्य च तद्धनम् ॥ २४ ॥ ब्राह्मणं समुपाहृत्य यशः प्राप्य च पाण्डवः । ततस्तद्धनदं पार्थो दत्त्वा तस्मै द्विजातये ॥ २५ ॥ आजगाम पुरं वीरः सव्यसाची धनञ्जयः । सोऽभिवाद्य गुरून् सर्वान् सर्वैश्चाप्यभिनन्दितः ॥ २६ ॥ धर्मराजमुवाचेदं व्रतमादिश्य मे प्रभो । समयः समतिक्रान्तो भवत्सन्दर्शने मया ॥ २७ ॥ वनवासं गमिष्यामि समयो ह्येष नः कृतः । इत्युक्तो धर्मराजस्तु सहसा वाक्यमप्रियम् ॥ २८ ॥ कथमित्यब्रवीद्वाचा शोकार्तः सज्जमानया । युधिष्ठिरो गुडाकेशं भ्राता भ्रातरमच्युतम् ॥ २९ ॥ उवाच दीनो राजा च धनञ्जयमिदं वचः । प्रमाणमस्मि यदि ते मत्तः शृणु वचोऽनघ ॥ ३० ॥ अनुप्रवेशे यद्वीर कृतवांस्त्वं ममाप्रियम् । सर्वं तदनुजानामि व्यलीकं न च मे हृदि ॥ ३१ ॥ गुरोरनुप्रवेशो हि नोपघातो यवीयसः । यवीयसोऽनुप्रवेशो ज्येष्ठस्य विधिलोपकः ॥ ३२ ॥ निवर्त्तस्व महाबाहो कुरुष्व वचनं मम । न हि ते धर्मलोपोऽस्ति न च मे धर्षणा कृता ॥ ३३ ॥

अर्जुन उवाच । न व्याजेन चरेद्धर्ममिति मे भवतः श्रुतम् । न सत्याद्विचलिष्यामि सत्येनायुधमालभे ॥ ३४ ॥

वैशम्पायन उवाच । सोऽभ्यनुज्ञाप्य राजानं वनचर्यायै दीक्षितः । वने द्वादशवर्षाणि वासायानुजगाम ह ॥ ३५ ॥

इत्यादिपर्वणि अर्जुनवनवासपर्वणि अर्जुनतीर्थयात्रायां पञ्चदशाधिकद्विशततोऽध्यायः ॥ २१५ ॥

वैशम्पायन उवाच । तं प्रयातं महाबाहुं कौरवाणां यशस्करम् । अनुजग्मुर्महात्मानो ब्राह्मणा वेदपारगाः ॥ १ ॥ वेदवेदाङ्गविद्वांसस्तथैवाध्यात्मचिन्तकाः । भैक्षाश्च भगवद्भक्ताः सूताः पौराणिकाश्च ये ॥ २ ॥ कथकाश्चापरे राजन् श्रमणाश्च वनौकसः । दिव्याख्यानानि ये चापि पठन्ति मधुरं द्विजाः ॥ ३ ॥ एतैश्चान्यैश्च बहुभिः सहायैः पाण्डुनन्दनः । ईयतः श्रुत्वा कथैः प्रायान्मरुद्भिरिव वासवः ॥ ४ ॥ रमणीयानि चित्राणि वनानि च सरांसि च । सरितः सागरांश्चैव देशानपि च भारत ॥ ५ ॥ पुण्यान्यपि च तीर्थानि ददर्श भरतर्षभः । स गङ्गाद्वारमाश्रित्य निवेशमकरोत् प्रभुः ॥ ६ ॥ तत्र तस्याद्भुतं कर्म शृणुत्वं जनमेजय । कृतवान्यद्धिमुद्वाहा पाण्डूनां प्रवरो हि सः ॥ ७ ॥ निविष्टे तत्र कौन्तेये ब्राह्मणेषु च भारत । अग्निहोत्राणि विप्राणे प्रादुश्चक्रुरनेकशः ॥ ८ ॥ तेषु प्रबोध्यमानेषु ज्वलितेषु हुतेषु च । कृतपुष्पोपहारेषु तीरान्तरगतेषु च ॥ ९ ॥ कृताभिषेकैर्विद्वद्भिर्नियतैः सत्यधर्मिभिः । शुशुभेऽतीव तद्राजन् गङ्गाद्वारं महात्मभिः ॥ १० ॥ तथा पर्व्याकुले तस्मिन्निवेशे पाण्डवर्षभः । अभिषेकाय कौन्तेयो गङ्गामवततार ह ॥ ११ ॥ तत्राभिषेकं कृत्वा स तर्पयित्वा पितामहान् । उत्तितीर्षुर्जलाद्राजन्नग्निकार्यं-

चिकीर्षया ॥ १२ ॥ अपकृष्टो महाबाहुर्नागराजस्य कन्यया। अन्तर्जले महाराज उलूप्या कामयानया ॥ १३ ॥ ददर्श पाण्डवस्तत्र पावकं सुसमाहितः। कौरव्यस्याथ नागस्य भवने परमार्चिते ॥ १४ ॥ तत्राग्निकार्य्यं कृतवान् कुन्तीपुत्रो धनञ्जयः। अग्निहुमानेन हुतस्तेनातुष्यद्धुताशनः ॥ १५ ॥ अग्निकार्य्यं स कृत्वा तु नागराजसुतां तदा। प्रहसन्निव कौन्तेय इदं वचनमब्रवीत् ॥ १६ ॥ किमिदं साहसं भीरु कृतवत्यसि भाविनि। कस्यायं सुभगे देशः का च त्वं कस्य चात्मजा ॥ १७ ॥

उलूप्युवाच। ऐरावतकुले जातः कौरव्यो नाम पन्नगः। तस्यास्मि दुहिता राजन् उलूपी नाम पन्नगी ॥ १८ ॥ साहं त्वामभिषेकार्थमवतीर्णं ससुद्रगाम्। दृष्ट्वैव पुरुषव्याघ्र कन्दर्पेणाभिमूर्च्छिता ॥ १९ ॥ तां मामनङ्गसन्तप्तां त्वत्कृते कुरुनन्दन। अनन्यां नन्दयस्वाद्य प्रदानेनात्मनोऽनघ ॥ २० ॥

अर्जुन उवाच। ब्रह्मचर्य्यमिदं भद्रे मम द्वादशवार्षिकम्। धर्मराजेन चादिष्टं नाहमस्मि स्वयं वशः ॥ २१ ॥ तव चापि प्रियं कर्त्तुमिच्छामि जलचारिणि। अनृतं नोक्तपूर्वञ्च मया किञ्चन कर्हिचित् ॥ २२ ॥ कथञ्च नानृतं मे स्यात्तव चापि प्रियं भवेत्। न च पीड्येत मे धर्मस्तथा कुर्य्यां भुजङ्गमे ॥ २३ ॥

उलूप्युवाच। जानाम्यहं पाण्डवेय यथा चरसि मेदिनीम्। यथा च ते ब्रह्मचर्य्यं इदमादिष्टवान् गुरुः ॥ २४ ॥ परस्परं वर्त्तमानान् द्रुपदस्यात्मजां प्रति। यो नोऽनुप्रविशेन्मोहात्स वै द्वादशवार्षिकम् ॥ २५ ॥ वने चरेद्ब्रह्मचर्य्यमिति वः समयः कृतः। तदिदं द्रौपदीहेतोरन्योऽन्यस्य प्रवासनम् ॥ २६ ॥ कृतवांस्त्वत्र धर्मार्थमत्र धर्मो न दुष्यति। परित्राणञ्च कर्त्तव्यमार्त्तानां दृढुलोचन ॥ २७ ॥ कृत्वा मम परित्राणं तव धर्मो न लुप्यते। यदि वाप्यस्य धर्मस्य सूक्ष्मोऽपि स्याद्व्यतिक्रमः ॥ २८ ॥

स च ते धर्म एवस्याद्दत्त्वा प्राणान्ममार्जुन। भक्ताञ्च भज मां पार्थ सतामेतन्मतं प्रभो ॥ २८ ॥ न करिष्यसि चेदेवं वृतां मामुपधारय। प्राणदानान्महाबाहो चर धर्ममनुत्तमम् ॥ ३० ॥ शरण्यञ्च प्रपन्नास्मि त्वामद्य पुरुषोत्तम। दीनाननाथान् कौन्तेय परिरक्षसि नित्यशः। साहं शरणमभ्येमि रोरवीमि च दुःखिता ॥ ३१ ॥ याचे त्वां चाभिकामाहं तस्मात् कुरु मम प्रियम्। स त्वमात्मप्रदानेन सकामां कर्त्तुमर्हसि ॥ ३२ ॥

वैशम्पायन उवाच। एवमुक्तस्तु कौन्तेयः पन्नगेश्वरकन्यया। कृतवांस्तत्तथा सर्वं धर्मसुद्दिश्य कारणम् ॥ ३३ ॥ स नागभवने रात्रिं तामुषित्वा प्रतापवान्। उदितेऽभ्युत्थितः सूर्ये कौरव्यस्य निवेशनात् ॥ ३४ ॥ आगतस्तु पुनस्तत्र गङ्गाद्वारं तया सह। परित्यज्य गता साध्वी उलूपी निजमन्दिरम् ॥ ३५ ॥ दत्त्वा वरमजेयत्वं जले सर्वत्र भारत। साध्या जलचराः सर्वे भविष्यन्ति न संशयः ॥ ३६ ॥

इत्यादिपर्वण्यर्जुनवनवासपर्वणि उलूपीसङ्गे षोड़शाधिकद्विशततोऽध्यायः ॥ २१६ ॥

—०:०—

वैशम्पायन उवाच। कथयित्वा च तत्सर्वं ब्राह्मणेभ्यः स भारतः। प्रययौ हिमवत्पार्श्वं ततो वज्रधरात्मजः ॥ १ ॥ अगस्त्यवटमासाद्य वशिष्ठस्य च पर्वतम्। भृगुतुङ्गे च कौन्तेयः कृतवान् शौचमात्मनः ॥ २ ॥ प्रददौ गोसहस्राणि सुवर्णानि च भारत। निवेशांश्च द्विजातिभ्यः सोऽददत् कुरुसत्तमः ॥ ३ ॥ हिरण्यबिन्दोस्तीर्थे च स्नात्वा पुरुषसत्तमः। दृष्टवान् पाण्डवश्रेष्ठः पुण्यान्यायतनानि च ॥ ४ ॥ अवतीर्य्य नरश्रेष्ठो ब्राह्मणैः सह भारत। प्राचीं दिशमभिप्रेप्सुर्जगाम भरतर्षभः ॥ ५ ॥ आनु-

पूर्व्वेण तीर्थानि दृष्टवान् कुरुसत्तमः । नदीं चोत्पलिनीं रम्यामरण्यं नैमिषं प्रति ॥ ६ ॥ नन्दामपरनन्दाञ्च कौशिकीञ्च यशस्विनीम् । महानदीं गयाञ्चैव गङ्गामपि च भारत ॥ ७ ॥ एवं तीर्थानि सर्वाणि पश्यमानस्तथाश्रमान् । आत्मनः पावनं कुर्वन् ब्राह्मणेभ्यो ददौ च गाः ॥ ८ ॥ अङ्गवङ्गकलिङ्गेषु यानि तीर्थानि कानिचित् । जगाम तानि सर्वाणि तथान्यायतनानि च ॥ ९ ॥ दृष्ट्वा च विधिवत्तानि धनञ्चापि ददौ ततः । कलिङ्गराष्ट्रद्वारेषु ब्राह्मणाः पाण्डवानुगाः । अभ्यनुज्ञाय कौन्तेयमुपावर्त्तन्त भारत ॥ १० ॥ स तु तैरभ्यनुज्ञातः कुन्तीपुत्रो धनञ्जयः । सहायैरल्पकैः शूरः प्रययौ यत्र सागरः ॥ ११ ॥ स कलिङ्गानतिक्रम्य देशानायतनानि च । रम्याणि रमणीयानि प्रेक्षमाणो ययौ प्रभुः ॥ १२ ॥ महेन्द्रपर्वतं दृष्ट्वा तापसैरुपशोभितम् । समुद्रतीरेण शनैर्मणिपूरं जगाम ह ॥ १३ ॥ तत्र सर्वाणि तीर्थानि पुण्यान्यायतनानि च । अभिगम्य महाबाहुरभ्यगच्छन्महीपतिम् ॥ १४ ॥ मणिपूरेश्वरं राजन् धर्मज्ञं चित्रवाहनम् । तस्य चित्राङ्गदा नाम दुहिता चारुदर्शना ॥ १५ ॥ तां ददर्श पुरे तस्मिन् विचरन्तीं यदृच्छया । दृष्ट्वा च तां वरारोहां चकमे चैत्रवाहिनीम् ॥ १६ ॥ अभिगम्य च राजानमवदत्स्वं प्रयोजनम् । देहि मे स्वस्त्रियां राजन् क्षत्रियाय महात्मने ॥ १७ ॥ तच्छ्रुत्वा त्वब्रवीद्राजा कस्य पुत्रोऽसि नाम किम् । उवाच तं पाण्डवोऽहं कुन्तीपुत्रो धनञ्जयः ॥ १८ ॥ तमुवाचाथ राजा स सान्त्वपूर्वमिदं वचः । राजा प्रभञ्जनो नाम कुलेऽस्मिन् संबभूव ह ॥ १९ ॥ अपुत्रः प्रसवेनार्थी तपस्तेपे स उत्तमम् । उग्रेण तपसा तेन देवदेवः पिनाकधृक् ॥ २० ॥ ईश्वरस्तोषितः पार्थ देवदेव उमापतिः । स तस्मै भगवान् प्रादादेकैकं प्रसवं कुले ॥ २१ ॥ एकैकः प्रसवस्तस्माज्जायत्यस्मिन् कुले सदा । तेषां कुमाराः सर्वेषां

पूर्वेषां मम जज्ञिरे ॥ २२ ॥ एका च मम कन्येयं कुलस्योत्-
पादनी भृशम् । पुत्रो ममायमिति मे भावना पुरुषर्षभ ॥२३॥
पुत्रिकाहेतुविधिना संज्ञिता भरतर्षभ । तस्मादेकः सुतो योऽस्यां
जायते भारत त्वया ॥ २४ ॥ एतच्छुल्कं भवत्वस्याः कुलक-
ज्जायतामिह । एतेन समयेनेमां प्रतिगृह्णीष्व पाण्डव ॥ २५ ॥
स तथेति प्रतिज्ञाय तां कन्यां प्रतिगृह्य च । उवास नगरे तस्मिन्
तिस्रः कुन्तीसुतः समाः ॥ २६ ॥ तस्यां सुते समुत्पन्ने परिष्वज्य
वराङ्गनाम् । आमन्त्र्य नृपतिं तन्तु जगाम परिवर्तितुम् ॥ २७ ॥

इत्यादिपर्वण्यर्जुनवनवासपर्वणि चित्राङ्गदासंग्रहे
सप्तदशाधिकद्विशततोऽध्यायः ॥ २१७ ॥

वैशम्पायन उवाच । ततः समुद्रे तीर्थानि दक्षिणे भरत-
र्षभः । अभ्यगच्छत् सुपुण्यानि शोभनानि तपस्विभिः ॥ १ ॥
वर्ज्यन्ति स्म तीर्थानि तत्र पञ्च स्म तापसाः । अवकीर्णानि
यान्यासन् पुरस्तात्तु तपस्विभिः ॥ २ ॥ अगस्त्यतीर्थं सौभद्रं
पौलोमञ्च सुपावनम् । कारन्धमं प्रसन्नञ्च हयमेधफलञ्च तत् ॥३॥
भारद्वाजस्य तीर्थन्तु पापप्रशमनं महत् । एतानि पञ्च तीर्थानि
ददर्श पुरुषोत्तमः ॥ ४ ॥ विविक्तान्युपलक्ष्याथ तानि तीर्थानि
पाण्डवः । दृष्ट्वा च वर्ज्यमानानि मुनिभिर्धर्मबुद्धिभिः ॥ ५ ॥
तपस्विनस्ततोऽपृच्छत् प्राञ्जलिः कुरुनन्दनः । तीर्थान्येतानि
वर्ज्यन्ते किमर्थं ब्रह्मवादिभिः ॥ ६ ॥

तापसा ऊचुः । ग्राहाः पञ्च वसन्त्येषु हरन्ति च तपो-
धनान् । तत एतानि वर्ज्यन्ते तीर्थानि कुरुनन्दन ॥ ७ ॥

वैशम्पायन उवाच । तेषां श्रुत्वा महाबाहुर्वार्ज्यमाणस्तपो-
धनैः । जगाम तानि तीर्थानि द्रष्टुं पुरुषसत्तमः ॥ ८ ॥ ततः

सौभद्रमामाद्य महर्षेस्तीर्थमुत्तमम्। विगाह्य सहसा शूरः स्नान-
श्चक्रे परन्तपः॥ ९॥ अथ तं पुरुषव्याघ्रमन्तर्जलचरो महान्।
जग्राह चरणे ग्राहः कुन्तीपुत्रं धनञ्जयम्॥ १०॥ स तमादाय कौन्तेयो विक्षिपन्तं जलेचरम्। उदतिष्ठन्महाबाहुर्बलेन बलिनां
वरः॥ ११॥ उत्कृष्ट एव ग्राहस्तु सोऽर्जुनेन यशस्विना। बभूव नारी कल्याणी सर्वाभरणभूषिता॥ १२॥ दीप्यमाना श्रिया राजन् दिव्यरूपा मनोरमा। तदद्भुतं महद्दृष्ट्वा कुन्ती-
सुतो धनञ्जयः॥ १३॥ तां स्त्रियं परमप्रीत इदं वचनमब्रवीत्। का वै त्वमसि कल्याणि कुतो वासि जलेचरि। किमर्थञ्च महत् पापमिदं कृतवती पुरा॥ १४॥

वर्गोवाच। अप्सरास्मि महाबाहो देवारण्यविहारिणी। इष्टा धनपतेर्नित्यं वर्गा नाम महाबल॥ १५॥ मम सख्यश्चतस्रोऽन्याः सर्वाः कामगमाः शुभाः। ताभिः सार्द्धं प्रयातास्मि लोकपाल-
निवेशनम्॥ १६॥ ततः पश्यामहे सर्वा ब्राह्मणं संशितव्रतम्। रूपवन्तमधीयानमेकमेकान्तचारिणम्॥ १७॥ तस्यैव तपसा राजंस्तेजसा हुतम्। आदित्य इव तं देशं कृत्स्नं सर्वं व्यकाशयत्॥ १८॥ तस्य दृष्ट्वा तपस्याद्यूपं चाद्भुतमुत्तमम्। अव-
तीर्णाः स्म तं देशं तपोविघ्नचिकीर्षया॥ १९॥ अहञ्च सौरभेयी च समीची बुद्बुदा लता। यौगपद्येन तं विप्रमभ्यगच्छाम भारत॥ २०॥ गायन्त्योऽथ हसन्त्यश्च लोभयित्वा च तं द्विजम्। स च नास्मासु कृतवान्मनो वीर कथञ्चन॥ २१॥ नाकम्पत महातेजाः स्थितस्तपसि निर्मले। सोऽशपत् कुपितोऽस्मासु ब्राह्मणः क्षत्रिय-
र्षभ। ग्राहभूता जले यूयं चरिष्यथ शतं समाः॥ २२॥

इत्यादिपर्वणि अर्जुनवनवासपर्वणि तीर्थग्राहविमोचने
अष्टादशाधिकद्विशततोऽध्यायः॥ २१८॥

वर्गौवाच। ततो वयं प्रव्यथिताः सर्वा भारतसत्तम। अयाम शरणं विप्रं तत्तपोधनमच्युतम् ॥ १ ॥ रूपेण वयसा चैव कन्दर्पेण च दर्पिताः। अब्रुवं कृतवत्यः स्म क्षन्तुमर्हसि नो द्विज ॥ २ ॥ एष एव वधोऽस्माकं सुपर्व्याप्तस्तपोधन। यद्वयं संश्रितात्मानं प्रलोब्धुं त्वामिहागताः ॥ ३ ॥ अवध्यासु स्त्रियः सृष्टा मन्यन्त धर्मचारिणः। तस्माद्धर्मेण वर्तं त्वं नास्मान् हिंसितुमर्हसि ॥४॥ सर्वभूतेषु धर्मज्ञ मैत्रो ब्राह्मण उच्यते। सत्यो भवतु कल्याण एवं वादो मनीषिणाम् ॥५॥ शरणञ्च प्रपन्नानां शिष्टाः कुर्वन्ति पालनम्। शरणं त्वां प्रपन्नाः स्मस्तस्मात्त्वं क्षन्तुमर्हसि ॥ ६ ॥

वैशम्पायन उवाच। एवमुक्तः स धर्मात्मा ब्राह्मणः शुभकर्मकृत्। प्रसादं कृतवान्वीर रविसोमसमप्रभः ॥ ७ ॥

ब्राह्मण उवाच। शतं शतसहस्रन्तु सर्वमत्रव्यवाचकम्। परिमाणं शतं त्वेतन्नेदमत्रव्यवाचकम् ॥८॥ यदा च वो ग्राहभूता ग्रहन्तीः पुरुषान् जले। उत्कर्षति जलात्तस्मात् स्थलं पुरुषसत्तमः ॥९॥ तदा यूयं पुनः सर्वाः स्वरूपं प्रतिपत्स्यथ। अनृतं नोक्तपूर्वं मे हसतापि कदाचन ॥१०॥ तानि सर्वाणि तीर्थानि ततः प्रभृति चैव ह। नारीतीर्थानि नाम्नेह ख्यातिं यास्यन्ति सर्वशः। पुण्यानि च भविष्यन्ति पावनानि मनीषिणाम् ॥ ११ ॥

वर्गौवाच। ततोऽभिवाद्य तं विप्रं कृत्वा चापि प्रदक्षिणम्। अचिन्तयामोऽपहृत्य तस्माद्देशात् सुदुःखिताः ॥ १२ ॥ क्वनु नाम वयं सर्वाः कालेनाल्पेन तं नरम्। समागच्छेम यो न स्वद्रूपमापादयेत् पुनः ॥ १३ ॥ ता वयं चिन्तयित्वैव मुहूर्त्तादिव भारत। दृष्टवत्यो महाभागं देवर्षिसुत नारदम् ॥ १४ ॥ सम्प्रहृष्टाः स्म तं दृष्ट्वा देवर्षिममितद्युतिम्। अभिवाद्य च तं पार्श्वे स्थिताः स्म व्रीडिताननाः ॥ १५ ॥ स नोऽपृच्छत् दुःखमूलमुक्तवत्यो वयञ्च तम्। श्रुत्वा तत यथावृत्तमिदं वचनमब्र-

वीत्॥ १६॥ दक्षिणे सागरानूपे पञ्चतीर्थानि सन्ति वै। पुण्यानि रमणीयानि तानि गच्छत माचिरम्॥ १७॥ तत्राप्लुतपुरुषव्याघ्रः पाण्डवेयो धनञ्जयः। मोक्षयिष्यति शुद्धात्मा दुःखादस्मान्न संशयः॥ १८॥ तस्य सर्वा वयं वीर श्रुत्वा वाक्यमितो गताः। तदिदं सत्यमेवाद्य मोचितास्त्वं त्वयानघ॥ १९॥ एतास्तु मम ताः सख्यश्चतस्रोऽन्या जले स्थिताः। कुरु कर्म शुभं वीर एताः सर्वा विमोचय॥ २०॥

वैशम्पायन उवाच। ततस्ताः पाण्डवश्रेष्ठः सर्वा एव विशाम्पते। तस्माच्छापादहीनात्मा मोचयामास वीर्यवान्॥ २१॥ उत्थाय च जलात्तस्मात् प्रतिलभ्य वपुः स्वकम्। ताश्चदाप्सरसो राजन्नदृश्यन्त यथा पुरा॥ २२॥ तीर्थानि शोधयित्वा तु तथानुज्ञाय ताः प्रभुः। चित्राङ्गदां पुनर्द्रष्टुं मणिपूरं पुनर्ययौ॥ २३॥ तस्यामजनयत् पुत्रं राजानं बभ्रुवाहनम्। तां दृष्ट्वा पाण्डवो राजन् गोकर्णमभितोऽगमत्॥ २४॥

इत्यादिपर्वण्यर्जुनवनवासपर्वण्यर्जुनतीर्थयात्रायां जनविंशत्यधिकद्विशततोऽध्यायः॥ २१९॥

वैशम्पायन उवाच। सोऽपरान्तेषु तीर्थानि पुण्यान्यायतनानि च। सर्वाण्येवानुपूर्व्येण जगामामितविक्रमः॥ १॥ समुद्रे पश्चिमे यानि तीर्थान्यायतनानि च। तानि सर्वाणि गत्वा स प्रभासमुपजग्मिवान्॥ २॥ प्रभासदेशं सम्प्राप्तं बीभत्सुमपराजितम्। सुपुण्यं रमणीयञ्च शुश्राव मधुसूदनः॥ ३॥ ततोऽभ्यगच्छत् कौन्तेयं सखायं तत्र माधवः। ददृशाते तदान्योन्यं प्रभासे कृष्णपाण्डवौ॥ ४॥ तावन्योन्यं समाश्लिष्य दृष्ट्वा च कुशलं वने। आस्तां प्रियसखायौ तौ नरनारायणावृषी॥ ५॥

ततोऽर्जुनं वासुदेवस्ताच्छ्यां पर्व्व पृच्छत । किमर्थं पाण्डवैतानि तीर्थान्यनुचरस्युत ॥ ६ ॥ ततोऽर्जुनो यथा वृत्तं सर्वमाख्यातवांस्तदा । श्रुत्वोवाच च वार्ष्णेय एवमेतदिति प्रभुः ॥ ७ ॥ तौ विहृत्य यथा कामं प्रभासे कृष्णपाण्डवौ । मही धरं रैवतकं वासायैवाभिजग्मतुः ॥ ८ ॥ पूर्वमेव तु कृष्णस्य वचनात्तं महीधरम् । पुरुषा मण्डयाञ्चक्रुरुपजह्रुश्च भोजनम् ॥ ९ ॥ प्रतिगृह्यार्जुनः सर्वमुपभुज्य च पाण्डवः । सहैव वासुदेवेन दृष्टवान्नटनर्त्तकान् ॥ १० ॥ अभ्यनुज्ञाय तान् सर्वानर्च्चयित्वा च पाण्डवः । सत्कृतं शयनं दिव्यमभ्यगच्छन्महामतिः ॥ ११ ॥ ततस्तत्र महाबाहुः शयानः शयने शुभे । नदीनां पल्वलानाञ्च पर्व्वतानां तथैव च । आपगानां वनानाञ्च कथयामास सात्वते ॥ १२ ॥ एवं स कथयन्नेव निद्रया जनमेजय । कौन्तेयोऽपि हृतस्तस्मिन् शयने स्वर्गसन्निभे ॥ १३ ॥ मधुरेणैव गीतेन वीणाशब्देन चैव ह । प्रबोध्यमानो बुबुधे स्तुतिभिर्मङ्गलैस्तथा ॥ १४ ॥ स कृत्वावश्यकार्य्याणि वार्ष्णेयेनाभिनन्दितः । रथेन काञ्चनाङ्गेन द्वारकामभिजग्मिवान् ॥ १५ ॥ अलङ्कृता द्वारका तु बभूव जनमेजय । कुन्तीपुत्रस्य पूजार्थमपि निष्कुटकेष्वपि ॥ १६ ॥ दिदृक्षन्तश्च कौन्तेयं द्वारकावासिनो जनाः । नरेन्द्रमार्गमाजग्मुस्तूर्णं शतसहस्रशः ॥ १७ ॥ अवलोकेषु नारीणां सहस्राणि शतानि च । भोजवृष्ण्यन्धकानाञ्च समवायो महानभूत् ॥ १८ ॥ स तथा सत्कृतः सर्वैर्भोजवृष्ण्यन्धकोत्तमैः । अभिवाद्याभिवाद्यांश्च सर्वैश्च प्रतिनन्दितः ॥ १९ ॥ कुमारैः सर्वशो वीरः सत्कारेणाभिचोदितः । समानवयसः सर्वानाश्लिष्य स पुनः पुनः ॥ २० ॥ कृष्णस्य भवने रम्ये रत्नभोज्यसमावृते । उवास सह कृष्णेन बहुलास्तत्र शर्व्वरीः ॥ २१ ॥

इत्यादिपर्वण्यर्जुनवनवासपर्वण्यर्जुनद्वारकागमने विंशत्यधिकद्विशततोऽध्यायः समाप्तश्चार्जुनवनवासपर्व ॥ २२० ॥

वैशम्पायन उवाच। ततः कतिपयाहस्य तस्मिन् रैवतके गिरौ। वृष्ण्यन्धकानामभवदुत्सवो नृपसत्तम ॥ १ ॥ तत्र दानं ददुर्वीरा ब्राह्मणेभ्यः सहस्रशः। भोजवृष्ण्यन्धकाश्चैव महेन्द्रस्य गिरेस्तदा ॥ २ ॥ प्रासादैरत्नचित्रैश्च गिरेस्तस्य समन्ततः। स देशः शोभितो राजन् कल्पवृक्षैश्च सर्वशः ॥ ३ ॥ वादित्राणि च तत्रान्ये वादकाः समवादयन्। ननृतुर्नर्तकाश्चैव जगुर्गेयानि गायनाः ॥ ४ ॥ अलङ्कृताः कुमाराश्च वृष्णीनां सुमहौजसाम्। यानैर्हाटकचित्रैश्च चचूर्ब्रुवन्ति स्म सर्वशः ॥ ५ ॥ शौरेश्च पादचारेण यानैरुच्चावचैस्तथा। सदाराः सानुयात्राश्च यतयोऽथ सहस्रशः ॥ ६ ॥ ततो हलधरः श्रीवो रेवतीसहितः प्रभुः। अनुगम्यमानो गन्धर्वैरचरत्तत्र भारत ॥ ७ ॥ तथैव राजा वृष्णीनामुग्रसेनः प्रतापवान्। अनुगीयमानो गन्धर्वैः स्त्रीसहस्रसहायवान् ॥ ८ ॥ रौहिणेयश्च शाम्बश्च श्रीवौ समरदुर्मदौ। दिव्यमाल्याम्बरधरौ विजह्रातेऽमराविव ॥ ९ ॥ अक्रूरः सारणश्चैव गदो वभ्रुर्विदूरथः। निशठश्चारुदेष्णश्च पृथुर्विपृथुरेव च ॥ १० ॥ सत्यकः सात्यकिश्चैव भङ्गकारमहारवौ। हार्दिक्य कृतवर्मा च ये चान्ये नानुकीर्तिताः ॥ ११ ॥ एते परिवृताः स्त्रीभिर्गन्धर्वैश्च पृथक् पृथक्। तमुत्सवं रैवतके शोभयाञ्चक्रिरे तदा ॥ १२ ॥ चित्रकौतूहले तस्मिन् वर्त्तमाने महाद्भुते। वासुदेवश्च पार्थश्च सहितौ परिजग्मतुः ॥ १३ ॥ तत्र चक्रममाणौ तौ वसुदेवसुतां शुभाम्। अलङ्कृतां सखीमध्ये सुभद्रां ददृशुस्तदा ॥ १४ ॥ दृष्ट्वैव तामर्जुनस्य कन्दर्पः समजायत। तं तदैकाग्रमनसं कृष्णः पार्थमलक्षयत्। १५॥ अब्रवीत् पुरुषव्याघ्रो प्रहसन्निव भारत। वनेचरस्य किमिदं कामेनालोड्यते मनः ॥ १६ ॥ ममैषा भगिनी पार्थ सारणस्य सहोदरा। सुभद्रा नाम भद्रं ते पितुर्मे दयिता सुता। यदि ते वर्त्तते बुद्धिर्ब्रूयामि पितरं स्वयम् ॥ १७॥

अर्जुन उवाच । दुहिता वसुदेवस्य वासुदेवस्य च स्वसा । रूपेण चैषा सम्पन्ना कमिवैषा न मोहयेत् ॥ १८ ॥ कृतमेव तु कल्याणं सर्वं मम भवेद्ध्रुवम् । यदि स्यान्मम वार्ष्णेयी महिषीयं स्वसा तव ॥ १९ ॥ प्राप्तौ तु क उपायः स्यात्तं ब्रवीहि जनार्दन । आख्यास्यामि तदा सर्वं यदि शक्यं नरेण तत् ॥२०॥

वासुदेव उवाच । स्वयम्वरः क्षत्रियाणां विवाहः पुरुषर्षभ । स च संशयितः पार्थ स्वभावस्थानिमित्ततः ॥ २१ ॥ प्रसह्य हरणं चापि क्षत्रियाणां प्रशस्यते । विवाहहेतुः शूराणामिति धर्मविदो विदुः ॥ २२ ॥ स त्वमर्जुन कल्याणीं प्रसह्य भगिनीं मम । हर स्वयम्वरे श्रद्धाः को वै वेद चिकीर्षितम् ॥ २३ ॥ ततोऽर्जुनश्च कृष्णश्च विनिश्चित्येतिकृत्यताम् । शीघ्रगान् पुरुषानन्यान् प्रेषयामासतुस्तदा ॥ २४ ॥ धर्मराजाय तत्सर्वमिन्द्रप्रस्थगताय वै । श्रुत्वैव च महाबाहुरनुजज्ञे स पाण्डवः ॥ २५ ॥

इत्यादिपर्वणि सुभद्राहरणपर्वणि युधिष्ठिरानुज्ञायामेकविंशत्यधिकद्विशततोऽध्यायः ॥ २२१ ॥

वैशम्पायन उवाच । ततः संवादिते तस्मिन्ननुज्ञातो धनञ्जयः । गतां रैवतके कन्यां विदित्वा जनमेजय ॥ १ ॥ वासुदेवाभ्यनुज्ञातः कथयित्वेतिकृत्यताम् । कृष्णस्य मतमादाय प्रययौ भरतर्षभः ॥ २ ॥ रथेन काञ्चनाङ्गेन कल्पितेन यथाविधि । शैव्यसुग्रीवयुक्तेन किङ्किणीजालमालिना ॥ ३ ॥ सर्वशस्त्रोपपन्नेन जीमूतस्वनादिना । ज्वलिताग्निप्रकाशेन द्विषतां हर्षघातिना ॥ ४ ॥ सन्नद्धः कवची खड्गी बद्धगोधाङ्गुलित्रवान् । मृगयाव्यपदेशेन प्रययौ पुरुषर्षभः ॥ ५ ॥ सुभद्रा त्वथ शैलेन्द्रमभ्यर्च्यैव हि रैवतम् । दैवतानि च सर्वाणि ब्राह्मणान् स्वस्ति वाच्य च

॥ ६ ॥ प्रदक्षिणं गिरेः कृत्वा प्रययौ द्वारकां प्रति। तामभिद्रुत्य कौन्तेयः प्रसह्योरोपयद्रथम् ॥ ७ ॥ सुभद्रां चारुसर्वाङ्गीं कामबाणप्रपीडितः। ततः स पुरुषव्याघ्रस्तामादाय शुचिस्मिताम्। रथेन काञ्चनाङ्गेन प्रययौ स्वपुरं प्रति ॥ ८ ॥ ह्रियमाणान्तु तां दृष्ट्वा सुभद्रां सैनिका जनाः। विक्रोशन्तोऽद्रवन् सर्वे द्वारकामभितः पुरीम् ॥ ९ ॥ ते समासाद्य सहिताः सुधर्मामभितः सभाम्। सभापालस्य तत्सर्वमाचख्युः पार्थविक्रमम् ॥ १० ॥ तेषां श्रुत्वा सभापालो भेरीं सान्वाहिकीं ततः। समाजघ्ने महाघोषां जाम्बूनदपरिष्कृताम् ॥ ११ ॥ तूर्य्यास्तेनाथ शब्देन भोजवृष्ण्यन्धकास्तदा। अन्नपानमपास्याथ समापेतुः समन्ततः ॥ १२ ॥ तत्र जाम्बूनदाङ्गानि स्पर्द्धास्तरणवन्ति च। मणिविद्रुमचित्राणि ज्वलिताग्निप्रभाणि च ॥ १३ ॥ भेजिरे पुरुषव्याघ्रा वृष्ण्यन्धकमहारथाः। सिंहासनानि शतशो दिष्ट्या नीव कृताग्नयः ॥ १४ ॥ तेषां समुपविष्टानां देवानामिव सन्निधौ। आचख्यौ चेष्टितं जिष्णोः सभापालः सहानुगः ॥ १५ ॥ तच्छ्रुत्वा वृष्णिवीरास्ते मदसंरक्तलोचनाः। अक्षम्यमाणाः पार्थस्य समुत्पेतुरहङ्कृताः ॥ १६ ॥ योजयध्वं रथानाशु प्रासानाहरतेति च। धनूंषि च महार्हाणि कवचानि वृहन्ति च ॥ १७ ॥ सूतानुच्चक्रुशुः केचिद्रथान्योजयतेति च। स्वयञ्च तुरगान् केचिदायुञ्जन् हेममूषितान् ॥ १८ ॥ रथेष्वानीयमानेषु कवचेषु ध्वजेषु च। अभिक्रन्दे वृवीराणां तदासीत् तुमुलं महत् ॥ १९ ॥ वनमाली ततः क्षीवः कैलासशिखरोपमः। नीलवासा मदोत्क्षिप्त इदं वचनमब्रवीत् ॥ २० ॥ किमिदं कुरुथाप्रज्ञास्तूष्णींभूते जनार्दने। अस्य भावमविज्ञाय संक्रुद्धा मोघगर्जिताः ॥ २१ ॥ एष तावदभिप्रायमाख्यातु स्वं महामतिः। यदस्य रुचितं कर्त्तुं तत् कुरुध्वमतन्द्रिताः ॥ २२ ॥ ततस्ते तद्वचः श्रुत्वा यादवरूपं हलायुधात्। तूष्णींभूतास्ततः

सर्वे साधु साध्विति चाब्रुवन् ॥ २३ ॥ समं वचो निशम्यैव बलदेवस्य धीमतः । पुनरेव सभामध्ये सर्वे ते समुपाविशन् ॥ २४ ॥ ततोऽब्रवीद्वासुदेवं वचो रामः परन्तपः । किमवागुपविष्टोऽसि प्रेक्षमाणो जनार्दन ॥ २५ ॥ यत्कृतस्यत्कृते पार्थैः सर्वैरस्माभिरच्युत । न च सोऽर्हति तां पूजां दुर्बुद्धिः कुलपांसनः ॥ २६ ॥ को हि तत्रैव भुक्तान्नं भाजनं भेत्तुमर्हति । मन्यमानः कुले जातमात्मानं पुरुषः क्वचित् ॥ २७ ॥ इच्छन्नेव हि सम्बन्धं कृतं पूर्वञ्च मानयन् । को हि नाम भवेनार्थी साहसेन समाचरेत् ॥ २८ ॥ सोऽवमन्य तथास्माकमनादृत्य च वेश्मवम् । प्रसह्य हृतवानद्य सुभद्रां मृत्युमात्मनः ॥ २९ ॥ कथं हि शिरसो मध्ये कृतं तेन पदं मम । मर्षयिष्यामि गोविन्द पादस्पर्शमिवोरगः ॥ ३० ॥ अद्य निष्कौरवामेकः करिष्यामि वसुन्धराम् । न हि मे मर्षणीयोऽयमर्जुनस्य व्यतिक्रमः ॥ ३१ ॥ तं तथा गर्जमानन्तु मेघदुन्दुभिनिस्वनम् । अन्वपद्यन्त ते सर्वे भोजदृष्ण्यन्धकास्तदा ॥ ३२ ॥

इत्यादिपर्वणि सुभद्राहरणपर्वणि बलदेवक्रोधे द्वाविंशत्यधिकद्विशततोऽध्यायः समाप्तश्च सुभद्राहरणपर्व ॥ २२२ ॥

अथ हरणाहरणपर्व ॥ १८ ॥

वैशम्पायन उवाच । उक्तवन्तो यथावीर्यमसकृत्यदुवृष्णयः । ततोऽब्रवीद्वासुदेवो वाक्यं धर्मार्थसंयुतम् ॥ १ ॥ नावमानं कुलस्यास्य गुडाकेशः प्रयुक्तवान् । उन्मानोऽभ्यधिकस्नेन प्रयुक्तोऽयं न संशयः ॥ २ ॥ अर्थलुब्धान्न वः पार्थो मन्यते सात्वतान् सदा । स्वयम्वरमनाधृष्यं मन्यते चापि पाण्डवः ॥ ३ ॥ प्रदानमपि कन्यायाः पशुवत् कोऽनुमन्यते । क्रिक्रयं चाप्यपत्यस्य कः कुर्य्यात् पुरुषो भुवि ॥ ४ ॥ एतान् दोषांस्तु कौन्तेयो दृष्टवानिति मे

मतिः । अतः प्रसह्य हृतवान् कन्यां धर्मेण पाण्डवः ॥ ५ ॥
उचितश्चैव सम्बन्धः सुभद्रा च यशस्विनी । एष चापीहशः पार्थः
प्रसह्य हृतवानिति ॥ ६ ॥ भरतस्यान्वये जातं शान्तनोश्च यश-
स्विनः । कुन्तिभोजात्मजापुत्रं को बुभूषेत नार्जुनम् ॥ ७ ॥
न च पश्यामि यः पार्थं विजयेत रणे बलात् । वर्जयित्वा विरू-
पाक्षं भगनेत्रहरं हरम् ॥ ८ ॥ अपि सर्वेषु लोकेषु सेन्द्ररुद्रेषु
मारिष । स च नाम रथस्थाद्दक् मदीयास्ते च वाजिनः ॥ ९ ॥
योद्धा पार्थश्च शीघ्रास्त्रः को नु तेन समो भवेत् । तमभिद्रुत्य
सान्त्वेन परमेण धनञ्जयम् । न्यवर्त्तयत संहृष्टा ममैषा परमा
मतिः ॥ १० ॥ यदि निर्जित्य वः पार्थो बलाद्गच्छेत् स्वकं पुरम् ।
प्रणश्येद्वो यशः सद्यो न तु सान्त्वे पराजयः ॥ ११ ॥ तच्छ्रुत्वा
वासुदेवस्य तथा चक्रुर्जनाधिप । निवृत्तश्चार्जुनस्तत्र विवाहं
कृतवान् प्रभुः ॥ १२ ॥ उषित्वा तत्र कौन्तेयः संवत्सरपरा: क्षपाः ।
विहृत्य च यथाकामं पूजितो हृष्टिनन्दनैः ॥ १३ ॥ पुष्करे तु ततः
श्रेष्ठं कालं वर्तितवान् प्रभुः । पूर्णे तु द्वादशे वर्षे खाण्डवप्रस्थ-
मागतः ॥ १४ ॥ अभिगम्य च राजानं नियमेन समाहितः ।
अभ्यर्च्य ब्राह्मणान् पार्थो द्रौपदीमभिजग्मिवान् ॥ १५ ॥ तं
द्रौपदी प्रत्युवाच प्रणयात् कुरुनन्दनम् । तत्रैव गच्छ कौन्तेय
यत्र सा सात्वतात्मजा ॥ १६ ॥ सुबद्धस्यापि भारस्य पूर्ववन्धः
श्रयायते । तथा बहुविधं कृष्णां विलपन्तीं धनञ्जयः ॥ १७ ॥
सान्त्वयामास भूयश्च शमयामास चासकृत् । सुभद्रां त्वरमाणश्च
रक्तकौशेयवासिनीम् ॥ १८ ॥ पार्थः प्रस्थापयामास कृत्वा
गोपालिकावपुः । साधिकं तेन रूपेण शोभमाना यशस्विनी ॥ १९ ॥
भवनस्थं समासाद्य वीरपत्नी वराङ्गना । ववन्दे पृथुताम्राक्षी पृथां
भद्रां यशस्विनी ॥ २० ॥ तां कुन्ती चारुसर्वाङ्गीमुपाजिघ्रत मूर्द्धनि । प्रीत्या परमया युक्ता आशीर्भिर्युञ्जतातुलम् ॥ २१ ॥

ततोऽभिगम्य त्वरिता पूर्णेन्दुसदृशानना। ववन्दे द्रौपदी भद्रा प्रेष्याहमिति चाब्रवीत् ॥ २२ ॥ प्रत्युत्थाय तदा कृष्णा स्वसारं माधवस्य च। परिष्वज्याब्रवीत् प्रीत्या निःसपत्नोऽस्तु ते पतिः ॥ २३ ॥ तथैव मुदिता भद्रा तामुवाचैवमस्त्विति। ततस्ते हृष्टमनसः पाण्डवेया महारथाः ॥ २४ ॥ कुन्ती च परमप्रीता बभूव जनमेजय। श्रुत्वा तु पुण्डरीकाक्षः संप्राप्तं स्वं पुरोत्तमम् ॥ २५ ॥ अर्जुनं पाण्डवश्रेष्ठमिन्द्रप्रस्थगतं तदा। आजगाम विशुद्धात्मा सह रामेण केशवः ॥ २६ ॥ वृष्ण्यन्धकमहामात्रैः सह वीरैर्महारथैः। भ्रातृभिश्च कुमारैश्च योधैश्च बहुभिर्वृतः ॥ २७ ॥ सैन्येन महता शौरिरभिगुप्तः परन्तपः। तत्र दानपतिर्धीमानाजगाम महायशाः ॥ २८ ॥ अक्रूरो वृष्णिवीराणां सेनापतिररिन्दमः। अनाधृष्टिर्महातेजा उद्धवश्च महायशाः ॥ २९ ॥ साम्बो बृहस्पतेः शिष्यो महाबुद्धिर्महामनाः। सत्यकः सात्यकिश्चैव कृतवर्मा च सात्वतः ॥ ३० ॥ प्रद्युम्नश्चैव शाम्बश्च निशठः शङ्कुरेव च। चारुदेष्णश्च विक्रान्तो झिल्ली विपृथुरेव च। सारणश्च महाबाहुर्गदश्च विदुषाम्वरः ॥ ३१ ॥ एते चान्ये च बहवो वृष्णिभोजान्धकास्तथा। आजग्मुः खाण्डवप्रस्थमादाय हरणं बहु ॥ ३२ ॥ ततो युधिष्ठिरो राजा श्रुत्वा माधवमागतम्। प्रतिग्रहार्थं कृष्णस्य यमौ प्राह्यापयत्तदा ॥ ३३ ॥ ताभ्यां प्रतिगृहीतन्तु वृष्णिचक्रं महर्द्धिमत्। विवेश खाण्डवप्रस्थं पताकाध्वजशोभितम् ॥ ३४ ॥ संमृष्टसिक्तपन्थानं पुष्पप्रकरशोभितम्। चन्दनस्य रसैः शीतैः पुण्यगन्धैर्निषेवितम् ॥ ३५ ॥ दृश्यतागुरुणा चैव देशे देशे सुगन्धिना। हृष्टपुष्टजनाकीर्णं वणिग्भिरुपशोभितम् ॥ ३६ ॥ प्रतिपेदे महाबाहुः सह रामेण केशवः। वृष्ण्यन्धकैस्तथा भोजैः समेतः पुरुषोत्तमः ॥ ३७ ॥ सम्पूज्यमानः पौरैश्च ब्राह्मणैश्च सहस्रशः। विवेश भवनं राज्ञः पुरन्दरगृहोपमम्

यमम् ॥ ३८ ॥ युधिष्ठिरस्तु रामेण समागच्छद्यथाविधि । मूर्ध्नि केशवमाघ्राय बाहुभ्यां परिषस्वजे ॥३९॥ तं प्रीयमाणो गोविन्दो विनयेनाभ्यपूजयत् । भीमञ्च पुरुषव्याघ्रं विधिवत् प्रत्यपूजयत् ॥ ४० ॥ तांश्च दृष्ट्वान्धकश्रेष्ठान् कुन्तीपुत्रो युधिष्ठिरः । प्रतिजग्राह सत्कारैर्यथाविधि यथागतम् ॥ ४१ ॥ गुरुवत् पूजयामास कांश्चित्कांश्चिदयस्यवत् । कांश्चिदभ्यवदत् प्रेम्णा कैश्चिदभ्यभिवादितः ॥ ४२ ॥ तेषां ददौ हृषीकेशो जन्यार्थं धनमुत्तमम् । हरणे वै सुभद्रायाः स्नातिदेयं महायशाः ॥ ४३ ॥ रथानां काञ्चनाङ्गानां किङ्किणीजालमालिनाम् । चतुर्युजासुपेतानां सूतैः कुशलशिक्षितैः ॥ ४४ ॥ सहस्रं प्रददौ कृष्णो गवामयुतमेव च । श्रीमन्माथुरदेश्यानां दोग्ध्रीणां पुण्यवर्चसाम् ॥ ४५ ॥ वडवानाञ्च मुख्यानां चन्द्रांशुसमवर्चसाम् । ददौ जनार्दनः प्रीत्या सहस्रं हेममूषितम् ॥ ४६ ॥ तथैवाश्वतरीणाञ्च दान्तानां वातरंहसाम् । प्रतान्यञ्जनकेशीनां श्वेतानां पञ्च पञ्च च ॥ ४७ ॥ स्नानयानोत्सवे चैव प्रयुक्तं वयसान्वितम् । स्त्रीणां सहस्रं गौरीणां सुवेशानां सुवर्चसाम् ॥ ४८ ॥ सुवर्णशतकण्ठीनामरोगाणां स्वलङ्कृतम् । परिचर्यासु दक्षाणां ददौ पुष्करेक्षणः ॥ ४९ ॥ शय्यानामपि चाख्यानां वाह्निकानां जनार्दनः । ददौ शतसहस्राख्यं कन्याधनमनुत्तमम् ॥ ५० ॥ कृताकृतस्य मुख्यस्य कनकस्याग्निवर्चसः । मनुष्यभारान् दाशार्हो ददौ दश जनार्दनः ॥५१॥ गजानान्तु प्रभिन्नानां त्रिधा प्रस्रवतां मदम् । गिरिकूटनिकाशानां समरेष्वनिवर्तिनाम् ॥ ५२ ॥ कृष्णानां पटुषण्ठानां चारूणां हेममालिनाम् । हस्त्यारोहैरुपेतानां सहस्रं साहसप्रियम् ॥५३॥ रामः पाणिग्रहणिकं ददौ पार्थाय लाङ्गली । प्रीयमाणो हलधरः सम्बन्धं प्रति मानयन् ॥ ५४ ॥ स महाधनरत्नौघो वस्त्रकम्बलफेनवान् । महागजमहाग्राहः पताकाशैवलाकुलः ॥ ५५ ॥

पाण्डुसागरमाविश्य प्रविवेश महाधनः। पूर्णमापूरयंस्तेषां हृषच्छोकावहोऽभवत् ॥ ५६ ॥ प्रतिजग्राह सत्त्ववं धर्मराजो युधिष्ठिरः। पूजयामास तांश्चैव वृष्ण्यन्धकमहारथान् ॥ ५७ ॥ ते समेता महात्मानः कुरुवृष्ण्यन्धकोत्तमाः। विजह्रुरमरावासे नराः सुकृतिनो यथा ॥ ५८ ॥ तत्र तत्र महायानैर्वृत्तलष्टतलादितैः। यथायोगं यथाप्रीति विजह्रुः कुरुवृष्णयः ॥ ५९ ॥ एवमुत्तमवीर्य्यास्ते विहृत्य दिवसान् बहून्। पूजिताः कुरुभिर्जग्मुः पुनर्द्वारवतीं प्रति ॥ ६० ॥ रामं पुरस्कृत्य ययुर्वृष्ण्यन्धकमहारथाः। रत्नान्यादाय शुभ्राणि दत्तानि कुरुसत्तमैः ॥ ६२ ॥ वासुदेवस्तु पार्थेन तत्रैव सह भारत। उवास नगरे रम्ये शक्रप्रस्थे महात्मना ॥ ६३ ॥ व्यचरद्यमुनातीरे मृगयां स महायशाः। मृगान् विध्यन् वराहांश्च रेमे सार्द्धं किरीटिना ॥ ६४ ॥ ततः सुभद्रा सौभद्रं केशवस्य प्रिया स्वसा। जयन्तमिव पौलोमी ख्यातिमन्तमजीजनत् ॥ ६५ ॥ दीर्घबाहुं महोरस्कं वृषभाक्षमरिन्दमम्। सुभद्रा सुषुवे वीरमभिमन्युं नरर्षभम् ॥ ६६ ॥ अभीषुमन्युमांश्चैव ततस्त्वमरिमर्दनम्। अभिमन्युमिति प्राहुरार्जुनिं पुरुषर्षभम् ॥ ६७ ॥ स साक्षात्त्वामतिरथः सर्वभूमधनञ्जयात्। मखे निर्मथनेनेव शमीगर्भादुताशनः ॥ ६८ ॥ यस्मिन् जाते महातेजाः कुन्तीपुत्रो युधिष्ठिरः। अयुतं गा द्विजातिभ्यः प्रादान्निष्कांश्च भारत ॥ ६९ ॥ दयितो वासुदेवस्य बाल्यात् प्रभृति चाभवत्। पितृणाञ्चैव सर्वेषां प्रजानामिव चन्द्रमाः ॥ ७० ॥ जन्मप्रभृति कृष्णश्च चक्रे तस्य क्रियाः शुभाः। स चापि ववृधे बालः शुक्लपक्षे यथा शशी ॥ ७१ ॥ चतुष्पादं दशविधं धनुर्वेदमरिन्दमः। अर्जुनाद्वेद वेदज्ञः सकलं दिव्यमानुषम् ॥ ७२ ॥ विज्ञानेष्वपि चास्त्राणां स्थैर्ये च महाबलः। क्रियास्वपि च सर्वासु विशेषानध्यरोचयत् ॥ ७३ ॥ आगमे च प्रयोगे च चक्रे

तुल्यमिवात्मना। तुतोष पुत्रं सौभद्रं प्रेक्षमाणो धनञ्जयः ॥७४॥ सर्वसंहननोपेतं सर्वलक्षणलक्षितम्। दुर्दर्षमृषभस्कन्धं व्यात्ताननमिवोरगम् ॥ ७५ ॥ सिंहदर्पं महेष्वासं मत्तमातङ्गविक्रमम्। मेघदुन्दुभिनिर्घोषं पूर्णचन्द्रनिभाननम् ॥ ७६ ॥ कृष्णस्य सदृशं शौर्ये वीर्ये रूपे तथाकृतौ। ददर्श पुत्रं बीभत्सुर्मघवानिव तं यथा ॥ ७७ ॥ पाञ्चाल्यपि तु पञ्चभ्यः पतिभ्यः शुभलक्षणा। लेभे पञ्च सुतान्वीरान् श्रेष्ठान् पञ्चाचलानिव ॥ ७८ ॥ युधिष्ठिरात् प्रतिविन्ध्यं सुतसोमं वृकोदरात्। अर्जुनाच्छ्रुतकर्माणं शतानीकञ्च नाकुलिम् ॥ ७९ ॥ सहदेवाच्छ्रुतसेनमेतान् पञ्च महारथान्। पाञ्चाली सुषुवे वीरानादित्यानदितिर्यथा ॥ ८० ॥ प्राक्षतः प्रतिविन्ध्यस्तूर्वप्रा युधिष्ठिरम्। परप्रहरणज्ञाने प्रतिविन्ध्यो भवत्वयम् ॥ ८१ ॥ सुते सोमसहस्रे तु सोमार्कसमतेजसम्। सुतसोमं महेष्वासं सुषुवे भीमसेनतः ॥ ८२ ॥ श्रुतं कर्म महत् कृत्वा निवृत्तेन किरीटिना। जातः पुत्रस्तवेत्येवं श्रुतकर्मा ततोऽभवत् ॥ ८३ ॥ शतानीकस्य राजर्षेः कौरवस्य महात्मनः। चक्रे पुत्रं सनामानं नकुलः कीर्तिवर्धनम् ॥ ८४ ॥ ततस्वजीजनत् कृष्णा नक्षत्रे वह्निदैवते। सहदेवात् सुतं तस्माच्छ्रुतसेनेति यं विदुः ॥८५॥ एकवर्षान्तराश्वेते द्रौपदेया यशस्विनः। अन्वजायन्त राजेन्द्र परस्परहितैषिणः ॥८६॥ जातकर्मादयानुपूर्व्यात् चूडोपनयनानि च। चकार विधिवद्धौम्यस्तेषां भरतसत्तम ॥ ८७ ॥ कृत्वा च वेदाध्ययनं ततः सुचरितव्रताः। जगदुः सर्वमिष्वस्त्रमर्जुनादिव्यमानुषम् ॥८८॥ दिव्यगर्भोपमैः पुत्रैर्व्यूढोरस्कैर्महारथैः। अन्विता राजशार्दूल पाण्डवा मुदमाप्नुवन् ॥ ८९ ॥

इत्यादिपर्वणि हरणाहरणपर्वणि त्रयोविंशत्यधिकद्विशततोऽध्यायः समाप्तश्च हरणाहरणपर्व ॥ २२३ ॥

अथ खाण्डवदहनपर्व ॥ १८ ॥

वैशम्पायन उवाच। इन्द्रप्रस्थे वसन्तस्ते जघ्नुरन्यान् नराधिपान्। शासनाद्धृतराष्ट्रस्य राज्ञः शान्तनवस्य च ॥१॥ आश्रित्य धर्मराजानं सर्वलोकोऽवसत् सुखम्। पुण्यलक्षणकर्माणं स्वदेहमिव देहिनः ॥ २ ॥ स समं धर्मकामार्थान् सिषेवे भरतर्षभ। त्रीनिवात्मसमान् बन्धून्नीतिमानिवमानयन् ॥ ३ ॥ तेषां समविभक्तानां क्षितौ देहवतामिव। बभौ धर्मार्थकामानां चतुर्थ इव पार्थिवः ॥ ४ ॥ अध्येतारं परं वेदान् प्रयोक्तारं महाध्वरे। रक्षितारं शुभान् लोकान् लेभिरे तं जनाधिपम् ॥ ५ ॥ अधिष्ठानवती लक्ष्मीः परायणवती मतिः। वर्द्धमानोऽक्षिपो धर्मस्तेनासीत् पृथिवीक्षिताम् ॥ ६ ॥ भ्रातृभिः सहितो राजा चतुर्भिरधिकं बभौ। प्रयुज्यमानैर्विततो वेदैरिव महाध्वरः ॥७॥ तन्तु धौम्यादयो विप्राः परिवार्योपतस्थिरे। बृहस्पतिसमा मुख्याः प्रजापतिमिवामराः ॥ ८ ॥ धर्मराजे क्षितिप्रीत्या पूर्णचन्द्र इवामले। प्रजानां रेमिरे तुल्यं नेत्राणि हृदयानि च ॥ ९ ॥ न तु केवलदैवेन प्रजाभावेन रेमिरे। यद्वभूव मनःकान्तं कर्मणा स चकार तत् ॥ १० ॥ न क्षुद्रं न चासत्यं नासह्यं न च वाप्रियम्। भाषितं चारुभाषस्य जज्ञे पार्थस्य धीमतः ॥ ११ ॥ स हि सर्वस्य लोकस्य हितमात्मन एव च। चिकीर्षन् सुमहातेजा रेमे भरतसत्तम ॥ १२ ॥ तथा तु मुदिताः सर्वे पाण्डवा विगतज्वराः। अवसन् पृथिवीपालांस्तापयन्तः स्वतेजसा ॥ १३॥ ततः कतिपयाहस्य बीभत्सुः कृष्णमब्रवीत्। उष्णानि कृष्ण वर्त्तन्ते गच्छावो यमुनां प्रति ॥ १४ ॥ सुहृज्जनवृतौ तत्र विहृत्य मधुसूदन। सायाह्ने पुनरेष्यावो रोचतां ते जनार्दन ॥ १५ ॥

वासुदेव उवाच। कुन्तीमातर्मनाप्येतद्रोचते यद्वयं जले। सुहृज्जनहृताः पार्थ विहरेम यथासुखम्॥ १६॥

वैशम्पायन उवाच। आमन्त्र्य तौ धर्मराजमनुज्ञाप्य च भारत। जग्मतुः पार्थगोविन्दौ सुहृज्जनहृतौ ततः॥ १७॥ विहारदेशं संप्राप्य नानाद्रुमवदुत्तमम्। महैरुच्चावचैर्युक्तं पुरन्दरपुरोपमम्॥ १८॥ अन्नैर्भोज्यैश्च पेयैश्च रसवद्भिर्महाधनैः। माल्यैश्च विविधैर्गन्धैर्युक्तं वार्णेयपार्थयोः॥ १९॥ विवेशान्तःपुरे तूर्णं रत्नैरुच्चावचैः शुभैः। ययोपजोषं सर्वत्र जनश्चिक्रीड भारत॥ २०॥ स्त्रियश्च विद्युत्सौदामरूपीनपयोधराः। महत्स्खलितगामिन्यश्चिक्रीडुर्वामलोचनाः॥ २१॥ वने काश्चिज्जले काश्चित्काश्चिद्वेश्मसु चाङ्गनाः। यथादेशं यथाप्रीति चिक्रीडुः पार्थकृष्णयोः॥ २२॥ द्रौपदी च सुभद्रा च वासांस्याभरणानि च। प्रायच्छतां महाराज स्त्रीणां ते च महोत्कटे॥ २३॥ काश्चित् प्रहृष्टा ननृतुरुक्षुश्च तत्रापराः। जहसुश्च परा नार्यः पपुश्चान्या वरासवम्॥ २४॥ रुरुधुश्चापरास्तत्र प्रजह्रुश्च परस्परम्। मन्त्रयामासुरन्याश्च रहस्यानि परस्परम्॥ २५॥ वेणुवीणाचदङ्गानां मनोज्ञानाञ्च सर्वशः। शब्देन पूर्यते स्म तद्वनं सुमहद्भिमत्॥ २६॥ तस्मिंस्तदा वर्त्तमाने कुरुदाशार्हनन्दनौ। समीपं जग्मतुः कञ्चिद्देशं सुमनोरमम्॥ २७॥ तत्र गत्वा महात्मानौ कृष्णौ परपुरञ्जयौ। महार्हासनयोराजंस्ततस्तौ संन्यसीदताम्॥ २८॥ तत्र पूर्वव्यतीतानि विक्रान्तानीतराणि च। बहूनि कथयित्वा तौ रेमाते पार्थमाधवौ॥ २९॥ तत्रोपविष्टौ मुदितौ नाकपृष्ठेऽश्विनाविव। अभ्यागच्छत्तदा विप्रो वासुदेवधनञ्जयौ॥ ३०॥ बृहच्छालप्रतीकाशः प्रतप्तकनकप्रभः। हरिपिङ्गोज्ज्वलश्मश्रुः प्रमाणायामतः समः॥ ३१॥ तरुणादित्यसङ्काशयज्ञोपवीतवासा जटाधरः। पद्मपत्राननः पिङ्गस्तेजसा प्रज्वल

त्विव ॥ २२ ॥ उपसृत्य तं कृष्णो भ्राजमानं द्विजोत्तमम् । अर्जुनो वासुदेवश्च तूष्णीमूचतुरुत्तमम् ॥ २३ ॥

इत्यादिपर्वणि खाण्डवदहनपर्वणि ब्राह्मणरूपनलागमने चतुर्विंशत्यधिकद्विशततोऽध्यायः ॥ २२४ ॥

—०:०—

वैशम्पायन उवाच । सोऽब्रवीदर्जुनञ्चैव वासुदेवञ्च सात्वतम् । लोकप्रवीरौ तिष्ठन्तौ खाण्डवस्य समीपतः ॥ १ ॥ ब्राह्मणो बहुभोक्तास्मि भुञ्जेऽपरिमितं सदा । भिक्षे वार्ष्णेयपार्थौ वामेकां तृप्तिं प्रयच्छताम् ॥ २ ॥ एवमुक्तौ तमब्रूतां ततस्तौ कृष्णपाण्डवौ । केनान्नेन भवांस्तृप्येत्तस्यान्नस्य यतावहे ॥ ३ ॥ एवमुक्तः स भगवानब्रवीत्तावुभौ ततः । भाषमाणौ तदा वीरौ किमन्नं क्रियतामिति ॥ ४ ॥

ब्राह्मण उवाच । नाहमन्नं बुभुक्षे वै पावकं मां निबोधतम् । यदन्नमनुरूपं मे तद्वां सम्प्रयच्छतम् ॥ ५ ॥ इदमिन्द्रः सदा दावं खाण्डवं परिरक्षति । न च शक्नोम्यहं दग्धुं रक्ष्यमाणं महात्मना ॥ ६ ॥ वसत्यत्र सखा तस्य तक्षकः पन्नगः सदा । सगणस्तत्कृते दावं परिरक्षति वज्रभृत् ॥ ७ ॥ तत्र भूतान्यनेकानि रक्षतेऽस्य प्रसङ्गतः । तं दिधक्षुन शक्नोमि दग्धुं शक्रस्य तेजसा ॥ ८ ॥ स मामभ्यज्वलितं दृष्ट्वा मेघाम्भोभिः प्रवर्षति । ततो दग्धुं न शक्नोमि दिधक्षुर्दावमीप्सितम् ॥ ९ ॥ स युवाभ्यां सहायाभ्यामस्त्रविद्भ्यां समागतः । दहेयं खाण्डवं दावमेतदन्नं हृतं मया ॥ १० ॥ युवां ह्यूदकधारास्त्रा भूतानि च समन्ततः । उत्तमास्त्रविदौ सम्यक् सर्वतो वारयिष्यथः ॥ ११ ॥

जनमेजय उवाच । किमर्थं भगवानग्निः खाण्डवं दग्धुमिच्छति । रक्ष्यमाणं महेन्द्रेण नानासत्त्वसमावृतम् ॥ १२ ॥

न ह्येतत्कारणं ब्रह्मन्नल्पं सम्प्रतिभाति मे। यद्दाह सुसंक्रुद्धः खाण्डवं हव्यवाहनः॥ १३॥ एतद्विस्तरशो ब्रह्मन् श्रोतुमिच्छामि तत्त्वतः। खाण्डवस्य पुरा दाहो यथा समभवन्मुने॥ १४॥

वैशम्पायन उवाच। हन्त ते कथयिष्यामि पौराणीमृषिसंस्तुताम्। कथामिमां नरश्रेष्ठ खाण्डवस्य विनाग्निनीम्॥१५॥ पौराणः श्रूयते राजन् राजा हरिहयोपमः। श्वेतकिर्नाम विख्यातो बलविक्रमसंयुतः॥ १६॥ यज्वा दानपतिर्धीमान् यथा नान्योऽस्ति कश्चन। ईजे च स महायज्ञैः क्रतुभिराप्तदक्षिणैः॥ १७॥ तस्य नान्याभवद्बुद्धिर्दिवसे दिवसे नृप। सत्रे क्रियासमारम्भे दानेषु विविधेषु च॥ १८॥ ऋत्विग्भिः सहितो धीमानेवमीजे स भूमिपः। ततस्तु ऋत्विजश्चास्य धूमव्याकुललोचनाः॥ १९॥ कालेन महता खिन्नास्तत्याजुस्तं नराधिपम्। ततः प्रचोदयामास ऋत्विजस्तान्महीपतिः। चक्षुर्विकलतां प्राप्ता न प्रपेदुश्च ते क्रतुम्॥ २०॥ ततस्ते वामनुमते तद्विप्रेषु नराधिपः। सत्रं समापयामास ऋत्विग्भिरपरैः सह॥ २१॥ तस्यैवं वर्त्तमानस्य कदाचित्कालपर्य्यये। सत्रमाहर्तुकामस्य सम्बभूवुरृतं किल॥ २२॥ ऋत्विजो नाभ्यपद्यन्त समाहर्त्तुं महाक्रतुः। स च राजाकरोद्यत्नं महान्तं सुसुहृज्जनः॥ २३॥ प्रणिपातेन सान्त्वेन दानेन च महायशाः। ऋत्विजोऽनुनयामास भूयोभूयस्तदन्वितः॥ २४॥ ते चास्य तमभिप्रायं न चक्रुरमितौजसः। स चाभ्यसूयान् राजर्षिस्तानुवाच रुषान्वितः॥ २५॥ यद्यहं पतितो विप्राः शुश्रूषायां न च स्थितः। आहुः त्याज्योऽस्मि युष्माभिर्ब्राह्मणैश्च जुगुप्सितः॥ २६॥ तन्नार्हथ क्रतुश्रेष्ठां व्याघातयितुमद्य ताम्। अस्थाने वा परित्यागं कर्त्तुं मे द्विजसत्तमाः॥ २७॥ प्रपन्न एव वो विप्राः प्रसादं कर्त्तुमर्हथ। सान्त्वदानादिभिर्वाक्यैस्तत्त्वतः कार्य्यवत्तया॥ २८॥ प्रसा-

दयित्वा वक्ष्यामि यज्ञं कार्यं द्विजोत्तमाः । क्षयवाहं परित्यक्तो भवद्भिर्ईषकारणात् ॥ २९ ॥ ऋत्विजोऽन्यान् गमिष्यामि याजनार्थं द्विजोत्तमाः । एतावदुक्त्वा वचनं विरराम स पार्थिवः ॥३०॥ यदा न शेकुराजानं याजनार्थं परन्तपम् । ततस्ते याजकाः क्रुद्धाश्चमूचुर्नृपसत्तमम् ॥ ३१ ॥ तव कर्माण्यजस्रं वै वर्त्तन्ते पार्थिवोत्तम । ततो वयं परिश्रान्ताः सततं कर्मवाहिनः ॥३२॥ अमादस्मात्परिश्रान्तान् स त्वं नस्त्यक्तुमर्हसि । बुद्धिमोहं समास्थाय त्वरासम्भावितोऽनघ ॥ ३३ ॥ गच्छ रुद्रसकाशं त्वं स हि त्वां याजयिष्यति । साधिक्षेपं वचः श्रुत्वा संक्रुद्धः श्वेतकिर्नृपः ॥ ३४ ॥ कैलासं पर्वतं गत्वा तप उग्रं समास्थितः । आराधयन्महादेवं नियतः संयतव्रतः ॥ ३५ ॥ उपवासपरो राजन् दीर्घकालमतिष्ठत । कदाचिद्दादशे काले कदाचिदपि षोड़शे ॥ ३६ ॥ आहारमकरोद्राजा मूलानि च फलानि च । ऊर्द्ध-बाहुस्त्वनिमिषस्तिष्ठन् स्थाणुरिवाचलः ॥ ३७ ॥ षष्ठमासानभवद्राजा श्वेतकिः सुसमाहितः । तं तथा नृपशार्दूलं तप्यमानं महत्तपः ॥ ३८ ॥ शङ्करः परमप्रीत्या दर्शयामास भारत । प्रीतोऽस्मि नरशार्दूल तपसा ते परन्तप ॥ ३९ ॥ वरं वृणीष्व भद्रं ते यं त्वमिच्छसि पार्थिव । एतच्छ्रुत्वा तु वचनं रुद्रस्यामिततेजसः ॥ ४० ॥ प्रणिपत्य महात्मानं राजर्षिः प्रत्यभाषत । यदि मे भगवान् प्रीतः सर्वलोकनमस्कृतः ॥ ४१ ॥ स्वयं मां देवदेवेश याजयस्व सुरेश्वर । एतच्छ्रुत्वा तु वचनं राज्ञा तेन प्रभाषितम् ॥ ४२ ॥ उवाच भगवान् प्रीतः स्मितपूर्वमिदं वचः । नास्माकमेतद्विषये वर्त्तते याजनं प्रति ॥ ४३ ॥ त्वया च सुमहत्तप्तं तपो राजन्वरार्थिना । याजयिष्यामि राजंस्त्वां समयेन परन्तप ॥४४॥

रुद्र उवाच । समा द्वादश राजेन्द्र ब्रह्मचारी समाहितः । सततं त्वाज्यधाराभिर्यदि तर्पयसेऽनलम् ॥ ४५ ॥ कामं प्रार्थयसे

यं त्वमुक्तः प्राप्स्यसि तं नृप । एवमुक्तस्तु रुद्रेण श्वेतकिर्मनुजाधिपः ॥ ४६ ॥ तथा चकार तत्सर्वं यथोक्तं शूलपाणिना । पूर्णे तु द्वादशे वर्षे पुनरायान्महेश्वरम् ॥ ४७ ॥ दृष्ट्वैव च स राजानं शङ्करो लोकभावनः । उवाच परमप्रीतः श्वेतकिं नृपसत्तमम् ॥ ४८ ॥ तोषितोऽहं नरश्रेष्ठ त्वयेह स्वेन कर्मणा । याजनं ब्राह्मणानान्तु विधिदृष्टं परन्तप ॥ ४९ ॥ अतोऽहं त्वां स्वयं नाद्य याजयामि परन्तप । ममांशस्तु क्षितितले महाभागो द्विजोत्तमः ॥ ५० ॥ दुर्वासा इति विख्यातः स हि त्वां याजयिष्यति । मन्नियोगान्महातेजाः सम्भाराः संभियन्तु ते ॥ ५१ ॥ एतच्छ्रुत्वा तु वचनं रुद्रेण समुदाहृतम् । स्वपुरं पुनरागम्य सम्भारान् पुनरार्जयत् ॥ ५२ ॥ ततः सम्भृतसम्भारो भूयो रुद्रमुपागमत् । सम्भृता मम सम्भाराः सर्वोपकरणानि च ॥ ५३ ॥ त्वत्प्रसादान्महादेव श्रुतो मे दीक्षा भवेदिति । एतच्छ्रुत्वा तु वचनं तस्य राज्ञो महात्मनः ॥ ५४ ॥ दुर्वाससं समाहूय रुद्रो वचनमब्रवीत् । एष राजा महाभागः श्वेतकिर्द्विजसत्तम ॥ ५५ ॥ एनं याजय विप्रेन्द्र मन्नियोगेन भूमिपम् । बाढमित्येव वचनं रुद्रं त्वृषिरुवाच ह ॥ ५६ ॥ ततः सत्रं समभवत्तस्य राज्ञो महात्मनः । यथाकामं यथोक्तञ्च सत्रं सुबहुदक्षिणम् ॥ ५७ ॥ तस्मिन् परिसमाप्ते तु राज्ञः सत्रे महात्मनः । दुर्वाससाभ्यनुज्ञाता विप्रतस्थुः स्म याजकाः ॥ ५८ ॥ ये तत्र दीक्षिताः सर्वे सदस्याश्च महौजसः । सोऽपि राजन्महाभागः स्वपुरं प्राविशत्तदा ॥ ५९ ॥ ततो भगवतो वक्त्रे विकारः समजायत । तेजसा विप्रहीणश्च ग्लानिश्चैनं समाविशत् ॥ ६० ॥ स लक्षयित्वा चात्मानं तेजोहीनं हुताशनः । जगाम सदनं पुण्यं ब्रह्मणो लोकपूजितम् ॥ ६१ ॥ तत्र ब्रह्माणमासीनमिदं वचनमब्रवीत् । तेजसा विप्रहीणोऽस्मि बलेन च जगत्पते ॥ ६२ ॥ इच्छेयं त्वत्प्रसादेन स्वात्मनः प्रकृतिं स्थिराम् ।

एतच्छ्रुत्वा हुतवहाद्भगवान् सर्वलोकभृत् ॥ ६३ ॥ हव्यवाहमिदं वाक्यमुवाच प्रहसन्निव । त्वया द्वादश वर्षाणि वसोर्धाराहुतं हविः ॥ ६४॥ उपयुक्तं महाभाग तेन त्वां ग्लानिराविशत् । तेजसा विप्रहीणत्वात् सहसा हव्यवाहन ॥ ६५॥ मा गमस्त्वं व्यथां वह्ने प्रकृतिस्थो भविष्यसि । पुरा देवनियोगेन यच्चया भस्मसात् कृतम् ॥ ६६ ॥ आलयं देवयत्नूणां सुघोरं खाण्डवं वनम् । तत्र सर्वाणि सत्त्वानि निवसन्ति विभावसो ॥ ६७ ॥ तेषां त्वं मेदसा तृप्तः प्रकृतिस्थो भविष्यसि । गच्छ शीघ्रं प्रदग्धुं त्वं ततो मोक्ष्यसि किल्बिषात् ॥ ६८ ॥ एतच्छ्रुत्वा तु वचनं परमेष्ठिमुखाच्छ्रुतम् । उत्तमं जवमास्थाय प्रदुद्राव हुताशनः ॥ ६९ ॥ आगम्य खाण्डवं दावमुत्तमं जवमास्थितः । सहसा प्राज्वलज्ज्वाग्निः क्रुद्धो वायुसमीरितः ॥ ७० ॥ प्रदीप्तं खाण्डवं दृष्ट्वा ये स्युस्तत्र निवासिनः । परमं यत्नमातिष्ठन् पावकस्य प्रशान्तये ॥ ७१ ॥ करैस्तु करिणः शीघ्रं जलमादाय सत्वराः । सिषिचुः पावकं क्रुद्धाः शतशोऽथ सहस्रशः ॥ ७२ ॥ बृंहणैर्वासितो नागाः शिरोभिर्जलसन्ततिम् । मुमुचुः पावकाभ्याशे सत्वराः क्रोधमूर्छिताः ॥ ७३ ॥ तथैवान्यानि सत्त्वानि नानाप्रहरणोद्यमैः । विलयं पावकं शीघ्रमनयन् भरतर्षभ ॥ ७४ ॥ अनेन तु प्रकारेण भूयोभूयश्च प्रज्वलन् । सप्तकृत्वः प्रशमितः खाण्डवे हव्यवाहनः ॥७५॥

इत्यादिपर्वणि खाण्डवदहनपर्वणि अग्निपराभवे पञ्चविंशत्यधिकद्विशततोऽध्यायः ॥ २२५ ॥

वैशम्पायन उवाच । स तु नैराश्यमापन्नः सदा ग्लानिसमन्वितः । पितामहमुपागच्छत् संक्रुद्धो हव्यवाहनः ॥ १ ॥ तत्र सर्वं यथान्यायं ब्रह्मणे स न्यवेदयत् । उवाच चैनं भगवान्मुहूर्तं

स विचिन्त्य तु ॥ २ ॥ उपायः परिदृष्टो मे यथा त्वं धक्ष्यसेऽनघ। खाण्डवं दावमद्यैव मिषतोऽस्य शचीपतेः ॥ ३ ॥ नरनारायणौ यौ तौ पूर्वदेवौ विभावसो। संप्राप्तौ मानुषे लोके कार्य्यार्थं हि दिवौकसाम् ॥ ४ ॥ अर्जुनं वासुदेवञ्च यौ तौ लोकोऽभिमन्यते। तावेतौ सहितावेहि खाण्डवस्य समीपतः ॥ ५ ॥ तौ त्वं याचस्व दाहार्थे दाहार्थं खाण्डवस्य च। ततो धक्ष्यसि तं दावं रक्षितं त्रिदशैरपि ॥ ६ ॥ तौ तु सत्त्वानि सर्वाणि यत्नतो वारयिष्यतः। देवराजञ्च सहितौ तत्र मे नास्ति संशयः ॥ ७ ॥ एतच्छ्रुत्वा तु वचनं त्वरितो हव्यवाहनः। ब्राह्मणार्थावुपागम्य यमर्थं त्वभ्यभाषत ॥ ८ ॥ तन्ते कथितवानस्मि पूर्वमेव नृपोत्तम। तच्छ्रुत्वा वचनं त्वग्नेर्बीभत्सुर्जातवेदसम् ॥ ९ ॥ अब्रवीन्नृपशार्दूल तत्कालसदृशं वचः। दिधक्षुं खाण्डवं दावमकामस्य शतक्रतोः ॥ १० ॥

अर्जुन उवाच। उत्तमास्त्राणि मे सन्ति दिव्यानि च बहूनि च। यैरहं शक्नुयां योद्धुमपि वज्रधरान् बहून् ॥ ११ ॥ धनुर्मे नास्ति भगवन् बाहुवीर्य्येण संमितम्। कुर्वतः समरे यत्नं वेगं यद्विषहेन्मम ॥ १२ ॥ शरैश्च मेऽक्षयौ बहुभिरक्षयः क्षिप्रमस्यतः। न हि वोढुं रथः शक्तः शरान्मम यथेप्सितान् ॥ १३ ॥ अश्वांश्च दिव्यानिच्छेयं पाण्डुरान् वातरंहसः। रथञ्च मेघनिर्घोषं सूर्य्यप्रतिमतेजसम् ॥ १४ ॥ तथा कृष्णस्य वीर्य्येण नायुधं विद्यते समम्। येन नागान् पिशाचांश्च निहन्यान्माधवो रणे ॥ १५ ॥ उपायं कर्मसिद्धौ च भगवन्वक्तुमर्हसि। निवारयेयं येनेन्द्रं वर्षमाणं महावने ॥ १६ ॥ पौरुषेण तु यत्कार्य्यं तत्कर्त्तारौ स्व पावक। करणानि समर्थानि भगवन् दातुमर्हसि ॥ १७ ॥

इत्यादिपर्वणि खाण्डवदहनपर्वण्यर्जुनाग्निसंवादे षड्विंशत्यधिकद्विशततोऽध्यायः ॥ २२६ ॥

वैशम्पायन उवाच। एवमुक्तः स भगवान् धूमकेतुर्हुताशनः। चिन्तयामास वरुणं लोकपालं दिदृक्षया ॥१॥ आदित्यमुदके देवं निवसन्तं जलेश्वरम्। स च तच्चिन्तितं ज्ञात्वा दर्शयामास पावकम् ॥ २ ॥ तमब्रवीद्धूमकेतुः प्रतिगृह्य जलेश्वरम्। चतुर्थं लोकपालानां देवदेवं सनातनम् ॥ ३ ॥ सोमेन राज्ञा यद्दत्तं धनुषी वेगवद्धनुषी च ते। तत् प्रयच्छोभयं शीघ्रं रथश्च कपिलक्षणम् ॥ ४ ॥ कार्यं च सुमहत्पार्थो गाण्डीवेन करिष्यति। चक्रेण वासुदेवश्च तन्ममाद्य प्रदीयताम् ॥५॥ ददानीत्येव वरुणः पावकं प्रत्यभाषत। तदद्भुतं महादीप्तं यशःकीर्तिविवर्धनम् ॥ ६ ॥ सर्वशस्त्रैरनाधृष्यं सर्वशस्त्रप्रमाथि च। सर्वायुधमहामात्रं परसैन्यप्रधर्षणम् ॥ ७ ॥ एकं शतसहस्रेण संमितं राष्ट्रवर्धनम्। चित्रमुच्चावचैर्वर्णैः शोभितं श्लक्ष्णमव्रणम् ॥ ८ ॥ देवदानवगन्धर्वैः पूजितं शाश्वतीः समाः। प्रादाच्चैव धनूरत्नमक्षयौ च महेषुधी ॥ ९ ॥ रथं च दिव्याश्वयुजं कपिप्रवरकेतनम्। उपेतं राजतैरश्वैर्गान्धर्वैर्हेममालिभिः ॥ १० ॥ पाण्डराभ्रप्रतीकाशैर्मनोवायुसमैर्जवे। सर्वोपकरणैर्युक्तमजय्यं देवदानवैः ॥ ११ ॥ भानुमन्तं महाघोषं सर्वरत्नमनोरमम्। ससर्ज यं सुतपसा भौमनो भुवनप्रभुः ॥ १२ ॥ प्रजापतिरनिर्देश्यं यस्य रूपं रवेरिव। यं स्म सोमः समारुह्य दानवानजयत् प्रभुः ॥ १३ ॥ नवमेघप्रतीकाशं ज्वलन्तमिव च श्रिया। आस्थितौ तौ रथश्रेष्ठं शक्रायुधसमावुभौ ॥ १४ ॥ तापनीया सुरुचिरा ध्वजयष्टिरनुत्तमा। तस्यान्तु वानरो दिव्यः सिंहशार्दूलकेतनः ॥ १५ ॥ दिधक्षन्निव तत्र स्थ संस्थितो मूर्ध्नि शोभत। ध्वजे भूतानि तत्रासन्विविधानि महान्ति च ॥ १६ ॥ नादेन रिपुसैन्यानां श्रुत्वा संज्ञा प्रणश्यति। स तं नानापताकाभिः शोभितं रथसत्तमम्। प्रदक्षिणमुपावृत्य देवतेभ्यः प्रणम्य च ॥ १७ ॥ सन्नद्धः कवची

खड्गी बद्धगोधाङ्गुलित्रकः। आरुरोह तदा पार्थो विमानं सुकृती यथा ॥ १८ ॥ तच्च दिव्यं धनुःश्रेष्ठं ब्रह्मणा निर्मितं पुरा। गाण्डीवमुपसंगृह्य बभूव मुदितोर्जुनः ॥ १९ ॥ कृताग्नेयं पुरस्कृत्य ततस्तदपि वीर्यवान्। जग्राह बलमास्थाय ज्यया च युयुजे धनुः ॥ २० ॥ सौर्यान्तु योज्यमानायां बलिना पाण्डवेन ह। येऽस्पृखन् कूजितं तत्र तेषां वै व्यथितं मनः ॥ २१ ॥ लब्ध्वा रथं धनुश्चैव तथाक्षय्ये महेषुधी। बभूव कल्यः कौन्तेयः प्रहृष्टः सख्यकर्मणि ॥ २२ ॥ वज्रनाभं ततश्चक्रं ददौ कृष्णाय पावकः। आग्नेयमस्त्रं दयितं स च कल्योऽभवत्तदा ॥ २३ ॥ अब्रवीत् पावकश्चैवमेतेन मधुसूदन। अमानुषानपि रणे जेष्यसि त्वमसंशयम् ॥ २४ ॥ अनेन तु मनुष्याणां देवानामपि चाहवे। रक्षःपिशाचदैत्यानां नागानाञ्चाधिकस्तथा ॥ २५ ॥ भविष्यसि न सन्देहः प्रवरोऽपि निबर्हणे। क्षिप्तं क्षिप्तं रणे चैव त्वया माधव शत्रुषु। हत्वाप्रतिहतं संख्ये पाणिमेष्यति ते पुनः ॥ २६ ॥ वरुणश्च ददौ तस्मै गदामग्निनिःस्वनाम्। दैत्यान्तकरणीं घोरां नाम्ना कौमोदकीं प्रभुः ॥ २७ ॥ ततः पावकमब्रूतां प्रहृष्टावर्जुनाच्युतौ। कृताक्षौ शस्त्रसम्पन्नौ रथिनौ ध्वजिनावपि ॥ २८ ॥ कल्यौ स्वो भगवन्योद्धुमपि सर्वैः सुरासुरैः। किं पुनर्वज्रिणैकेन पन्नगार्थे युयुत्सुना ॥ २९ ॥

अर्जुन उवाच। चक्रपाणिर्हृषीकेशो विचरन् युधि वीर्यवान्। त्रिषु लोकेषु तन्नास्ति यन्न कुर्याज्जनार्दनः ॥ ३० ॥ गाण्डीवं धनुरादाय तथाक्षय्यौ महेषुधी। अहमप्युत्सहे लोकान् विजेतुं युधि पावक ॥ ३१ ॥ सर्वतः परिवार्यैव दावमेतं महत् प्रभो। कामं सम्भक्षयाद्यैव कल्यौ स्वः सख्यकर्मणि ॥ ३२ ॥

वैशम्पायन उवाच। एवमुक्तः स भगवान् दाशार्हेणार्जुनेन च। तैजसं रूपमास्थाय दाव दग्धु प्रचक्रमे ॥ ३३ ॥ सर्वतः

परिवार्य्याथ सप्तार्च्चिर्ज्वलनस्तदा । ददाह खाण्डवं दावं युगान्तमिव दर्शयन् ॥ ३४ ॥ प्रतिगृह्य समाविश्य तद्वनं भरतर्षभ । मेघस्तनितनिर्घोषः सर्वभूतान्यकम्पयत् ॥ ३५ ॥ दह्यतस्तस्य च बभौ रूपं दावस्य भारत । मेरोरिव नगेन्द्रस्य कीर्ण-स्यांशुमतोंऽशुभिः ॥ ३६ ॥

इत्यादिपर्वणि खाण्डवदहनपर्वणि खाण्डवदाहे सप्तविंशत्यधिकद्विशततोऽध्यायः ॥ २२७ ॥

वैशम्पायन उवाच । तौ रथाभ्यां रथिश्रेष्ठौ दावस्थोभयतः स्थितौ । दिक्षु सर्वासु भूतानां चक्राते क्रन्दनं महत् ॥ १ ॥ यत्र यत्र च दृश्यन्ते प्राणिनः खाण्डवालयाः । पलायन्तः प्रवीरौ तौ तत्र तत्राभ्यधावताम् ॥ २ ॥ छिद्रं न स्म प्रपश्यन्ति रथयोराशुचारिणोः । आविद्ध्याविव दृश्येते रथिनौ तौ रथोत्तमौ ॥ ३ ॥ खाण्डवे दह्यमाने तु भूतानि शतसंघशः । चुक्रोशुर्भैरवान्नादान् विनदन्तः समन्ततः ॥ ४ ॥ दग्धैकदेशा बहवो निष्टप्ताश्च तथापरे । स्फुटिताश्चा विशीर्णाश्च विप्लुताश्च तथा परे ॥ ५ ॥ समालिङ्ग्य सुतानन्ये पितॄन् भ्रातॄंस्तथापरे । त्यक्तुं न शेकुः स्नेहेन तत्रैव निधनं गताः ॥ ६ ॥ सन्दष्टदशनाश्चान्ये समुत्पेतुरनेकशः । ततस्तेऽतीव घूर्णन्तः पुनरग्नौ प्रपेदिरे ॥ ७ ॥ दग्धपक्षाश्चिरचरणा विचेष्टन्तो महीतले । तत्र तत्र स्म दृश्यन्ते विनश्यन्तः शरीरिणः ॥ ८ ॥ जलाशयेषु तप्तेषु क्वाथ्यमानेषु वह्निना । गतसत्त्वाः स्म दृश्यन्ते कूर्ममत्स्याः समन्ततः ॥ ९ ॥ शरीरैरपरैर्हीनैर्देहवन्त इवाग्नयः । अदृश्यन्त वने तत्र प्राणिनः प्राणसङ्क्षये ॥ १० ॥ कांश्चिदुत्पतितः पार्थः शरैः सञ्छिद्य खण्डशः ।

पातयामास विहगान् प्रदीप्ते कृष्णवर्त्मनि ॥ ११ ॥ ते शराच्छित-सर्वाङ्गा निनदन्तो महारवान्। जङ्गमुत्पत्य वेगेन निपेतुः खाण्डवे पुनः ॥ १२ ॥ शरैरभ्याहतानाञ्च सङ्घशः स्म वनौकसाम्। विरावः शुश्रुवे घोरः समुद्रस्येव मथ्यतः ॥ १३ ॥ वज्रेणापि प्रदीप्तस्य खमुत्पेतुर्महार्चिषः। जनयामासुरुद्वेगं सुमहान्तं दिवौकसाम् ॥ १४ ॥ तेनार्चिषा सुसन्तप्ता देवाः सर्षिपुरोगमाः। ततो जग्मुर्महात्मानः सर्व एव दिवौकसः। शतक्रतुं सहस्राक्षं देवेशमसुरार्दनम् ॥ १५ ॥

देवा ऊचुः। किन्विमे मानवाः सर्वे दह्यन्ते चित्रभानुना। कच्चिन्न सङ्क्षयः प्राप्तो लोकानाममरेश्वर ॥ १६ ॥

वैशम्पायन उवाच। तच्छ्रुत्वा वृत्रहा तेभ्यः स्वयमेवान्ववेक्ष्य च। खाण्डवस्य विमोक्षार्थं प्रययौ हरिवाहनः ॥ १७ ॥ महता रथवृन्देन नानारूपेण वासवः। आकाशं समवाकीर्य प्रववर्ष सुरेश्वरः ॥ १८ ॥ ततोऽचलाभा व्यसृजन् धाराः शतसहस्रशः। चोदिता देवराजेन जलदाः खाण्डवं प्रति ॥ १९ ॥ असंप्राप्तासु ता धारास्तेजसा जातवेदसः। ख एव समशुष्यन्त न काश्चित् पावकं गताः ॥ २० ॥ ततो नमुचिहा क्रुद्धो भयमर्चिष्मतस्तदा। पुनरेव महामेघैरभ्यसृजद्वज्र ॥ २१ ॥ अर्चिर्द्वाराभि-सम्वृतं धूमविद्युत्समाकुलम्। बभूव तद्वनं घोरं स्तनयित्नु-समाकुलम् ॥ २२ ॥

इत्यादिपर्वणि खाण्डवदहनपर्वणि इन्द्रक्रोधे अष्टाविंश-त्यधिकद्विशततोऽध्यायः ॥ २२८ ॥

—०:०—

वैशम्पायन उवाच । तस्याथ वर्षतो वारि पाण्डवः प्रत्यवारयत् । शरवर्षेण वीभत्सुरुत्तमास्त्राणि दर्शयन् ॥ १ ॥ खाण्डवञ्च वनं सर्वं पाण्डवो बहुभिः शरैः । प्राच्छादयदमेयात्मा नीहारेणेव चन्द्रमाः ॥ २ ॥ न च स्म किञ्चिच्चक्रोति भूतं निष्क्रमितुं ततः । सञ्छाद्यमाने खे बाणैरस्यता सव्यसाचिना ॥ ३ ॥ तक्षकस्तु न तत्रासीन्नागराजो महाबलः । दह्यमाने वने तस्मिन् कुरुक्षेत्रं गतो हि सः ॥ ४ ॥ अश्वसेनोऽभवत्तत्र तक्षकस्य सुतो बली । स यत्नमकरोत्तीव्रं मोक्षार्थं जातवेदसः ॥ ५ ॥ न शशाक स निर्गन्तुं निरुद्धोऽर्जुनपत्रिभिः । मोक्षयामास तं माता निगीर्य्य भुजगात्मजा ॥ ६ ॥ तस्य पूर्वं शिरो ग्रस्तं पुच्छमस्य निगीर्य्यते । निगीर्य्यमाणा साक्रामत् सुतं नागी सुमुक्षया ॥ ७ ॥ तस्याः शरेण तीक्ष्णेन पृथुधारेण पाण्डवः । शिरश्चिच्छेद गच्छन्त्याः क्षामयञ्छचीपतिः ॥ ८ ॥ तं मुमोचयिषुर्वज्री वातवर्षेण पाण्डवम् । मोक्षयामास तत्कालमश्वसेनमथामुचत ॥ ९ ॥ तान्त्र मायां तदा दृष्ट्वा घोरां नागेन वञ्चितः । द्विधा त्रिधा च खगतान् प्राणिनः पाण्डवोऽच्छिनत् ॥ १० ॥ शशाप तञ्च संक्रुद्धो वीभत्सुर्जिह्मगामिनम् । पावको वासुदेवस्याप्यप्रतिष्ठो भविष्यसि ॥ ११ ॥ ततो जिष्णुः सहस्राक्षं खं वितत्याशुगैः शरैः । योधयामास संक्रुद्धो वज्रिणां तामनुस्मरन् ॥ १२ ॥ देवराजोऽपि तं दृष्ट्वा संरब्धं समरेऽर्जुनम् । खमस्त्रमसृजत्तीव्रं छादयित्वाखिलं नभः ॥ १३ ॥ ततो वायुर्महाघोषः क्षोभयन् सर्वसागरान् । वियत्स्थो जनयन् मेघान् जलधारासमाकुलान् ॥ १४ ॥ ततोऽशनिमुचो घोरांस्तडित्स्तनितनिस्वनान् । तद्विघातार्थमसृजदर्जुनोऽप्यस्त्रमुत्तमम् ॥ १५ ॥ वायव्यमभिमन्त्र्याथ प्रतिपत्तिविशारदः । तेनेन्द्राशनिमेघानां वीर्य्यौजस्तद्विनाशितम् ॥ १६ ॥ जलधाराश्च ताः शीघ्रं जग्मुर्नैशुच्च विद्युतः । क्षणेन

चाभवद्व्योम रुक्मग्रान्तरजसावृतम् ॥ १७ ॥ सुखशीतानिलवहं प्रकृतिस्थार्कमण्डलम् । निष्प्रतीकारदृष्टश्च क्षुतभुग्विविधाकृतिः ॥ १८ ॥ सिच्यमानो वसौघैस्तैः प्राणिनां देहनिःसृतैः । प्रजज्वालाथ सोऽर्चिष्मान् स्वनादैः पूरयन् जगत् ॥ १९ ॥ कृष्णाभ्यां रक्षितं दृष्ट्वा तच्च दावमहङ्कृताः । खमुत्पेतुर्महाराज सुपर्णाद्याः पतत्रिणः ॥ २० ॥ गरुत्मान् वज्रसदृशैः पक्षतुण्डनखैस्तथा । प्रहर्तुकामो न्यपतदाकाशात् कृष्णपाण्डवौ ॥ २१ ॥ तथैवोरगसंघाताः पार्श्वतश्च समीपतः । चतुर्दशन्तो विषं घोरं निष्पेतुर्व्वलितानना: ॥ २२ ॥ तांश्चकर्त्त शरैः पार्थः खरोषाग्निसमुक्षितैः । विविशुश्चापि तं दीप्तं देहाभावाय पावकम् ॥ २३ ॥ ततोऽसुराः सगन्धर्वा यक्षराक्षसपन्नगाः । चतुर्पेतुर्नादमतुलमुत्सृजन्तो रणार्थिनः ॥ २४ ॥ अयःकृणपचक्राश्मभुशुण्डिप्रहतबाहवः । कृष्णपार्थौ जिघांसन्तः क्रोधसंमूर्च्छितौजसः ॥ २५ ॥ तेषामतिष्याहरतां शस्त्रवर्षञ्च मुञ्चताम् । प्रममाथोत्तमाङ्गानि बीभत्सुर्निशितैः शरैः ॥ २६ ॥ कृष्णश्च सुमहातेजाश्चक्रेणारिविनाशनः । दैत्यदानवसंघानां चकार कदनं महत् ॥ २७ ॥ अथापरैः शरैर्विद्धाश्चक्रवेगेरितास्तथा । वेलामिव समासाद्य व्यतिष्ठन्नमितौजसः ॥ २८ ॥ ततः शक्रोऽतिसंक्रुद्धस्त्रिदशानां महेश्वरः । पाण्डवस्य रथं शीघ्रमाजगाम सहायवान् ॥ २९ ॥ वेगेनाशनिमादाय वज्रमस्त्रञ्च सोऽहजत् । हतावेताविति प्राह सुरानसुरसूदनः ॥ ३० ॥ ततः सम्भ्रान्तां दृष्ट्वा देवेन्द्रेण महाशनिम् । जगृहुः सर्वशस्त्राणि स्वानि स्वानि सुरास्तथा ॥ ३१ ॥ कालदण्डं यमो राजन् गदाञ्चैव धनेश्वरः । पाशांश्च तत्र वरुणो विचित्रांश्च तथाशनिम् ॥ ३२ ॥ स्कन्दः शक्तिं समादाय तस्थौ मेरुरिवाचलः । ओषधीर्दीप्यमानाश्च जगृहातेऽश्विनावपि ॥ ३३ ॥ जगृहे च धनुर्वीरो सुषेणस्तु जयस्तथा । पर्वतञ्चापि जयाह

क्रुद्धस्त्वष्टा महाबलः ॥ ३४ ॥ अंशस्तु शक्तिं जग्राह मृत्युर्दैवः परश्वधम् । प्रगृह्य परिघं घोरं विचचारार्यमा अपि ॥ ३५ ॥ मित्रश्च क्षुरपर्यन्तं चक्रमादाय तस्थिवान् । पूषा भगश्च संक्रुद्धः सविता च विशाम्पते ॥ ३६ ॥ आत्तकार्मुकनिस्त्रिंशाः क्षणदापार्थौ प्रदुद्रुवुः । रुद्राश्च वसवश्चैव मरुतश्च महाबलाः ॥ ३७ ॥ विश्वेदेवास्तथा साध्या दीप्यमानाः स्वतेजसा । एते चान्ये च बहवो देवास्तौ पुरुषोत्तमौ ॥ ३८ ॥ कृष्णपार्थौ जिघांसन्तः प्रतोयुर्विविधायुधाः । तत्राङ्गुतान्यदृश्यन्त निमित्तानि महाहवे ॥ ३९ ॥ युगान्तसमरूपाणि भूतसंमोहनानि च । तथा दृष्ट्वा समारब्धं शक्रं देवैः सहाच्युतौ ॥ ४० ॥ अभीतौ युधि दुर्धर्षौ तस्थतुः सज्यकार्मुकौ । आगच्छतस्ततो देवानुभौ युद्धविशारदौ ॥ ४१ ॥ व्यताडयेतां संक्रुद्धौ शरैर्वज्रोपमैस्तदा । असङ्गमग्नसङ्कल्पाः सुराश्च बहवः कृताः । भयाद्रणं परित्यज्य शक्रमेवाभिदुद्रुवुः ॥ ४२ ॥ दृष्ट्वा निवारितान् देवान् माधवेनार्जुनेन च ॥ ४३ ॥ आश्चर्यमगमंस्तत्र मुनयो नभसि स्थिताः । शक्रस्यापि तयोर्वीर्यं सुपरीक्ष्यासकृद्रणे ॥ ४४ ॥ बभूव परमप्रीतो भूयश्चैतावयोधयत् । ततोऽभ्रवर्षं सुमहद्यदृच्छजत्पाकशासनः ॥ ४५ ॥ भूय एव तदा वीर्यं जिज्ञासुः सव्यसाचिनः । तच्छरैरर्जुनो वर्षं प्रतिजघ्नेऽत्यमर्षितः ॥ ४६ ॥ विफलं क्रियमाणं तत्समवेक्ष्य शतक्रतुः । भूयः संवर्धयामास तद्वर्षं पाकशासनः ॥ ४७ ॥ सोऽभ्रवर्षं महावेगैरिषुभिः पाकशासनिः । विलयं गमयामास हर्षयन् पितरं तथा ॥ ४८ ॥ ततः उत्पाट्य पाणिभ्यां मन्दराच्छिखरं महत् । सद्रुमं व्यसृजच्छक्रो जिघांसुः पाण्डुनन्दनम् ॥ ४९ ॥ ततोऽर्जुनो वेगवद्भिर्ज्वलिताग्रैरजिह्मगैः । शरैर्विध्वंसयामास गिरेः शृङ्गं सहस्रधा ॥ ५० ॥ गिरेर्विशीर्यमाणस्य तस्य रूपं तदा बभौ । सार्कचन्द्रग्रहस्येव नभसः परिशीर्यतः

॥ ५१ ॥ तेनाभिपतता दावं शैलेन महता भृशम्। भूकम्पेन निकृत्ताश्च प्राणिनः खाण्डवालयाः ॥ ५२ ॥

इत्यादिपर्वणि खाण्डवदहनपर्वणि देवकृष्णार्जुनयुद्धे ऊनविंशत्यधिकद्विशततोऽध्यायः ॥ २२९ ॥

वैशम्पायन उवाच। तया शैलनिपातेन भीषिता खाण्डवालयाः। दानवा राक्षसा नागास्तरक्षवश्चमनौकसः ॥ १ ॥ द्विपाः प्रभिन्नाः शार्दूलाः सिंहाः केशरिणस्तथा। समुद्विग्ना विसस्रुस्तथान्या भूतजातयः ॥ २ ॥ तं दावं समुदैक्षन्त कृष्णौ चाभ्युद्यतायुधौ। उत्पातनादशब्देन सञ्चारित इव स्थितः ॥ ३ ॥ ते वनं प्रसमीक्ष्याथ दह्यमानमनेकधा। कृष्णमभ्युद्यतास्त्रञ्च नादं मुमुचुरुल्बलम् ॥ ४ ॥ तेन नादेन रौद्रेण नादेन च विभावसोः। ररास गगनं कृत्स्नमुत्पातजलदैरिव ॥ ५ ॥ ततः कृष्णो महाबाहुः स्वतेजोभास्करं महत्। चक्रं व्यसृजदत्युग्रं तेषां नाशाय केशवः ॥ ६ ॥ तेनार्ता जातयः क्षुद्राः सदानवनिशाचराः। निकृत्ताः शतशः सर्वा निपेतुरनलं क्षणात् ॥ ७ ॥ ततोऽहृष्यन्त ते दैत्याः कृष्णचक्रविदारिताः। वसारुधिरसंपृक्ताः सन्ध्यायामिव तोयदाः ॥ ८ ॥ पिशाचान् पक्षिणो नागान् पशूंश्चैव सहस्रशः। निघ्नं चरति वार्ष्णेयः कालवत्तत्र भारत ॥ ९ ॥ छिन्नं छिन्नं पुनश्चक्रं कृष्णस्यामित्रघातिनः। छित्त्वा नैकानि सत्त्वानि पाणिमेति पुनः पुनः ॥ १० ॥ तथा तु निघ्नतस्तस्य पिशाचोरगराक्षसान्। बभूव रूपमत्युग्रं सर्वभूतात्मनस्तदा ॥ ११ ॥ क्रमेतानान्तु सर्वेषां देवतानाञ्च सर्वशः। विजेता नाभवत्कश्चित् कृष्णपाण्डवयोर्मृधे ॥ १२ ॥ तयोर्बलात् परित्रातुं तत्र दावं यदा सुराः। नाशक्नुवन् शमयितुं तदाभूवन् पराङ्मुखाः ॥ १३ ॥

शतक्रतुस्तु संप्रेक्ष्य विमुखानमरांस्तथा । बभूव मुदितो राजन् प्रशंसन् केशवार्जुनौ ॥ १४ ॥ निर्दग्धेष्वथ देवेषु वागुवाचाशरीरिणी । शतक्रतुं समाभाष्य महागम्भीरनिस्वना ॥ १५ ॥ न ते सखा संनिहतस्तक्षको भुजगोत्तमः । दाहकाले खाण्डवस्य कुरुक्षेत्रं गतो ह्यसौ ॥ १६ ॥ न च शक्यो युधा जेतुं कथञ्चिदपि वासव । वासुदेवार्जुनावेतौ निबोध वचनान्मम ॥ १७ ॥ नरनारायणावेतौ पूर्वदेवौ दिवि श्रुतौ । भवानप्यभिजानाति यद्वीर्यौ यत्पराक्रमौ ॥ १८ ॥ नैतौ शक्यौ दुराधर्षौ विजेतुमजितौ युधि । अपि सर्वेषु लोकेषु पुराणावृषिसत्तमौ ॥ १९ ॥ पूजनीयतमावेतावपि सर्वैः सुरासुरैः । यक्षराक्षसगन्धर्वनरकिन्नरपन्नगैः ॥ २० ॥ तस्मादितः सुरैः सार्धं गन्तुमर्हसि वासव । दिष्टं चाप्यनुपश्यैतत् खाण्डवस्य विनाशनम् ॥ २१ ॥ इति वाक्यमुपश्रुत्य तथ्यमित्यमरेश्वरः । क्रोधामर्षौ समुत्सृज्य संप्रतस्थे दिवं तदा ॥ २२ ॥ तं प्रस्थितं महात्मानं समवेक्ष्य दिवौकसः । सहिताः सेनया राजन्ननुजग्मुः पुरन्दरम् ॥ २२ ॥ देवराजं तदा यान्तं सह देवैरवेक्ष्य तु । वासुदेवार्जुनौ वीरौ सिंहनादं विनेदतुः ॥ २३ ॥ देवराजे गते राजन् प्रहृष्टौ केशवार्जुनौ । निर्विशङ्कं वनं वीरौ दाहयामासतुस्तदा ॥ २४ ॥ स मारुतं दूवाभ्राणि नाशयित्वार्जुनः सुरान् । व्यधमच्छरसङ्घातैर्देहिनः खाण्डवालयान् ॥ २५ ॥ न च स्म किञ्चिच्छक्नोति भूतं निश्चरितुं ततः । संच्छिद्यमानमिषुभिरस्यता सव्यसाचिना ॥ २६ ॥ नाशक्नुवंश्च भूतानि महान्त्यपि रणेऽर्जुनम् । निरीक्षितुममोघास्त्रं योद्धुञ्चापि कुतो रणे ॥ २७ ॥ शतं चैकेन विव्याध शतेनैकं शतत्रिणाम् । व्यसवस्तेऽपतन्नग्नौ साक्षात्कालहता इव ॥ २८ ॥ न चालभन्त ते शर्म रोधःसु विषमेषु च । विद्धदेहनिवासेषु सन्तापश्चाप्यजायत ॥ २९ ॥ भूतसंघाश्च बहवो दीनाश्चक्रुर्मुहुः

स्वनम्। रुरुदुर्वारणाश्चैव तथा खगतरक्षवः॥ ३०॥ तेन शब्देन वित्रस्ता दुर्गङ्गोदधिचरा झषाः। विद्याधरगणाश्चैव ये च तत्र वनौकसः॥ ३१॥ न त्वर्जुनं महाबाहो नापि कृष्णं जनार्दनम्। निरीक्षितुं वै शक्नोति कश्चिद्योद्धुं कुतः पुनः॥ ३२॥ एकायनगता येऽपि नित्यं तुस्तत्र केचन। राक्षसा दानवा नागा जघ्ने चक्रेण तान् हरिः॥ ३३॥ ते तु भिन्नशिरोदेहाश्चक्रवेगाङ्कितासवः। पेतुरग्नौ महाकायाः प्रदीप्ते वसुरेतसि॥ ३४॥ स मांसरुधिरौघैश्च वसाभिश्चापि तर्पितः। जपर्ष्याकायगो भूत्वा विधूमः समवर्धत॥ ३५॥ दीप्ताग्नो दीप्तजिह्वश्च सम्प्रदीप्तमहाननः। दीप्तोर्ध्वकेशः पिङ्गाक्षः पिबन् प्राणभृतां वसाः॥ ३६॥ तां स कृष्णार्जुनकृतां सुधां प्राप्य हुताशनः। बभूव मुदितस्तृप्तः परां निर्वृतिमागतः॥ ३७॥ तथासुरं मयं नाम तक्षकस्य निवेशनात्। विप्रद्रवन्तं सहसा ददर्श मधुसूदनः॥ ३८॥ तमग्निः प्रार्थयामास दिधक्षुर्वातसारथिः। शरीरवान् जटी भूत्वा नदन्निव बलाहकः॥३९॥ जिघांसुर्वासुदेवस्तं चक्रमुद्यम्य विष्ठितः। स चक्रमुद्यतं दृष्ट्वा दिधक्षन्तञ्च पावकम्॥४०॥ अभिधावार्जुनेत्येवं मयस्त्राहीति चाब्रवीत्। तस्य भीतस्वनं श्रुत्वा मा भैरिति धनञ्जयः॥ ४१॥ प्रत्युवाच मयं पार्थो जीवयन्निव भारत। तं न भेतव्यमित्याह मयं पार्थो दयापरः॥ ४२॥ तं पार्थेनाभये दत्ते मयस्तेजसुचेर्भ्रातरं मयम्। न हन्तुमैच्छद्दाशार्हः पावको न ददाह च॥४३॥

वैशम्पायन उवाच। तद्वनं पावको धीमान् दिनानि दश पञ्च च। ददाह कृष्णपार्थाभ्यां रक्षितः पाकशासनात्॥ ४४॥ तस्मिन् वने दह्यमाने षड्भिर्नैव ददाह च। अश्वसेनं मयञ्चैव चतुरः शार्ङ्गकांस्तथा॥ ४५॥

इत्यादिपर्वणि खाण्डवदहनपर्वणि मयदानवत्राणे त्रिंशदधिकद्विशततोऽध्यायः॥ २३०॥

जनमेजय उवाच । किमर्थं शार्ङ्गकानग्निर्न ददाह तथागते । तस्मिन्वने दह्यमाने ब्रह्मन्नेतत् प्रचक्ष्व मे ॥ १ ॥ अदाहे ह्यश्वसेनस्य दानवस्य मयस्य च । कारणं कीर्त्तितं ब्रह्मन् शार्ङ्गकाणां न कीर्त्तितम् ॥ २ ॥ तदेतदद्भुतं ब्रह्मन् शार्ङ्गकाणामनामयम् । कीर्त्तयस्वाग्निसम्मर्हे कथन्ते न विनाशिताः ॥ ३ ॥

वैशम्पायन उवाच । यदर्थं शार्ङ्गकानग्निर्न ददाह तथागते । तत्ते सर्वं प्रवक्ष्यामि यथा भूतमरिन्दम ॥ ४ ॥ धर्मज्ञानां मुख्यतमस्तपस्वी संयितव्रतः । आसीन्महर्षिः श्रुतवान्मन्दपाल इति श्रुतः ॥ ५ ॥ स मार्गमाश्रितो राजन्नृषीणामूर्द्ध्वरेतसाम् । स्वाध्यायवान् धर्मरतस्तपस्वी विजितेन्द्रियः ॥ ६ ॥ स गत्वा तपसः पारं देहमुत्सृज्य भारत । जगाम पितृलोकाय न लेभे तत्र तत्फलम् ॥ ७ ॥ स लोकानफलान् दृष्ट्वा तपसा निर्जितानपि । पप्रच्छ धर्मराजस्य समीपस्थान् दिवौकसः ॥ ८ ॥

मन्दपाल उवाच । किमर्थमाहृता लोका ममैते तपसार्जिताः । किं मया न कृतं तत्र यस्यैतत् कर्मणः फलम् ॥ ९ ॥ तत्त्वाहं तत्करिष्यामि यदर्थमिदमाहृतम् । फलमेतस्य तपसः कथयध्वं दिवौकसः ॥ १० ॥

देवा ऊचुः । ऋणिनो मानवा ब्रह्मन् जायन्ते येन तच्छृणु । क्रियाभिर्ब्रह्मचर्य्येण प्रजया च न संशयः ॥ ११ ॥ तदप्राक्रियते सर्वं यज्ञेन तपसा सुतैः । तपस्वी यज्ञकृच्चापि न च ते विद्यते प्रजा ॥ १२ ॥ त इमे प्रस्तवस्यार्थे तव लोकाः समाहृताः । प्रजायस्व ततो लोकानुपभोक्ष्यसि पुष्कलान् ॥ १३ ॥ पुन्नाम्नो नरकात् पुत्रस्त्रायते पितरं सुतः । तस्मात्पुत्रसन्ताने यतस्व ब्रह्मसत्तम ॥ १४ ॥

वैशम्पायन उवाच । तच्छ्रुत्वा मन्दपालस्तु वचस्तेषां दिवौकसाम् । क्व नु शीघ्रमपत्यं स्याद्दृढं चेत्यचिन्तयत् ॥ १५ ॥ स चिन्तयन्नभ्यगच्छत् सुबहूप्रस्तवान् खगान् । शार्ङ्गिकां शार्ङ्गको

भूत्वा जरितां समुपेयिवान् ॥ १६ ॥ तस्यां पुत्रानजनयच्चतुरो ब्रह्मवादिनः। तानपास्य स तत्रैव जगाम लपितां प्रति ॥ १७ ॥ बालान् सुतानण्डगतान् सह माता मुनिर्वने। तस्मिन् गते महाभागे लपितां प्रति भारत ॥ १८ ॥ अपत्यस्नेहसंयुक्ता जरिता बह्वचिन्तयत्। तेन त्यक्तानसन्त्याज्यानृषीनण्डगतान्वने ॥ १९ ॥ न जहौ पुत्रशोकार्त्ता जरिता खाण्डवे सुतान्। बभार चैतान् सञ्जातान् स्वहृत्या स्नेहविक्लवा ॥ २० ॥ ततोऽग्निं खाण्डवं दग्धुमायान्तं दृष्टवानृषिः। मन्दपालश्चरंस्तस्मिन् वने लपितया सह ॥ २१ ॥ तं सङ्कल्पं विदित्वाग्नेर्ज्ञात्वा पुत्रांश्च बालकान्। सोऽभितुष्टाव विप्रर्षिर्ब्राह्मणो जातवेदसम्। पुत्रान् प्रति वदन् भीतो लोकपालं महौजसम् ॥ २२ ॥

मन्दपाल उवाच। त्वमग्ने सर्वलोकानां मुखं त्वमसि हव्यवाट्। त्वमन्तः सर्वभूतानां गूढश्चरसि पावक ॥ २३ ॥ त्वमेकमाहुः कवयस्त्वामाहुस्त्रिविधं पुनः। त्वामष्टधा कल्पयित्वा यज्ञवाहमकल्पयन् ॥ २४ ॥ त्वया विसृष्टमिदं सृष्टं वदन्ति परमर्षयः। त्वदृते हि जगत् कृत्स्नं सद्यो नश्येद्धुताशन ॥ २५ ॥ तुभ्यं कृत्वा नमो विप्राः स्वकर्मविजितां गतिम्। गच्छन्ति सह पत्नीभिः सुतैरपि च शाश्वतीम् ॥ २६ ॥ त्वामग्ने जलदानाहुः खे विषक्तान् सविद्युतः। दहन्ति सर्वभूतानि त्वत्तो निष्क्रम्य हेतयः ॥ २७ ॥ जातवेदस्त्वयैवेदं विसृष्टं सप्तधा श्रुतम्। तवैव कर्म विहितं भूतं सर्वं चराचरम्। २८ ॥ त्वय्यापो विहिताः पूर्वं त्वयि सर्वमिदं जगत्। त्वयि हव्यञ्च कव्यञ्च यथावत् सम्प्रतिष्ठितम् ॥ २९ ॥ त्वमेव दहनो देव त्वं धाता त्वं बृहस्पतिः। त्वमश्विनौ यमौ मित्रः सोमस्त्वमसि चानिलः ॥ ३० ॥

वैशम्पायन उवाच। एवं स्तुतस्तदा तेन मन्दपालेन पावकः। तुतोष तस्य तपसे मुनेरमिततेजसः ॥ ३१ ॥ उवाच चैनं प्रीतात्मा

किमिष्टं करवाणि ते । तमब्रवीन्मन्दपालः प्राञ्जलिर्हव्यवाहनम् । प्रदहन् खाण्डवं दावं मम प्रजान् विसर्जय ॥ ३२ ॥ तथेति तत् प्रतिश्रुत्य भगवान् हव्यवाहनः । खाण्डवे तेन कालेन प्रजज्वाल दिधक्षया ॥ ३३ ॥

इत्यादिपर्वणि खाण्डवदहनपर्वणि आङ्गिकोपाख्याने एकत्रिंशदधिकद्विशततोऽध्यायः ॥ २३१ ॥

—०:०—

वैशम्पायन उवाच । ततः प्रज्वलिते वह्नौ आङ्गिकाद्ये सुदुःखिताः । व्यथिताः परमोद्विग्ना नाधिजग्मुः परायणम् ॥ १ ॥ निशम्य पुत्रकान् बालान् माता तेषां तपस्विनी । जरिता दुःखशोकार्ता विललाप सुदुःखिता ॥ २ ॥

जरितोवाच । अयमग्निर्दहन् कक्षमित आयाति भीषणः । जगत्सन्दीपयन् भीमो मम दुःखविवर्द्धनः ॥ ३ ॥ इमे च मां कर्षयन्ति शिशवो मन्दचेतसः । अवर्हाश्चरणैर्हीनाः पूर्वेषां नः परायणाः ॥ ४ ॥ त्रासयंश्चाय मायाति लेलिहानो महीरुहान् । अजातपक्षाश्च सुता न शक्ताः सरणे मम ॥ ५ ॥ आदाय च न शक्नोमि पुत्रांस्तारितुमात्मना । न च त्यक्तुमहं शक्ता हृदयं दूयतीव मे ॥ ६ ॥ कन्तु जह्यामहं पुत्रं कमादाय व्रजाम्यहम् । किन्नु मे स्यात् कृतं कृत्ये किं वा मन्यत पुत्रकाः ॥ ७ ॥ चिन्तयाना विमोक्षं वो नाधिगच्छामि किञ्चन । क्षादयिष्यामि वो गात्रैः करिष्ये मरणं सह ॥ ८ ॥ जरितारौ कुलं ह्येतत् ज्येष्ठत्वेन प्रतिष्ठितम् । सारिसृक्षः प्रजायेत पितॄणां कुलवर्द्धनः ॥ ९ ॥ स्तम्बमित्रस्तपः कुर्य्यात् द्रोणो ब्रह्मविदाम्वरः । इत्येवमुक्ता प्रययौ पिता वो निर्घृणः पुरा ॥ १० ॥ कमुपादाय शक्ष्येयं गन्तुं कष्टापदुत्तमा । किन्नु कृत्वा कृतं कार्य्यं भवेदिति च विह्वला । नाध्यगच्छत् स्वधिया मोक्षं स्वसुतानां तदानलात् ॥ ११ ॥

वैशम्पायन उवाच। एवं ब्रुवाणं शार्ङ्गास्ते प्रत्यूचुरथ मातरम्। स्नेहमुत्सृज्य मातस्त्वं पत यत्र न हव्यवाट्॥ १२॥ अस्मास्विह विनष्टेषु भवितारः सुतास्तव। त्वयि मातर्विनष्टायां नातः स्यात् कुलसन्ततिः॥ १३॥ अन्ववेक्ष्यैतदुभयं क्षेमं स्यात् यत् कुलस्य नः। तद्धि कर्त्तुं परः कालो मातरेष भवेत्तव॥१४॥ मा त्वं सर्वविनाशाय स्नेहं कार्षीः सुते पुनः। न ह्येदं कर्म मोघं स्यात्लोककामस्य नः पितुः॥ १५॥

जरितोवाच। इदमाखोर्बिलं भूमौ दृश्यस्यास्य समीपतः। तदाविशध्वं त्वरिता वक्ष्येऽत्र न वो भयम्॥ १६॥ ततोऽहं पांशुना छिद्रमपिधास्यामि पुत्रकाः। एवं प्रतिकृतं मन्ये ज्वलतः कृष्णवर्त्मनः॥ १७॥ तत एष्यत्यतीतेऽग्नौ विहन्तुं पांशुसञ्चयम्। मोचयतामेष वो वादो मोचार्थश्च हुताशनात्॥ १८॥

शार्ङ्गा ऊचुः। अवर्षन्नांसभूताभ्रः कृत्स्नादाखुर्विनाशयेत्। यज्ञमाना भयमिदं प्रवेष्टुं नात्र शक्नुमः॥ १९॥ कथमग्निर्न नो धक्ष्येत् कथमाखुर्न नाशयेत्। कथं न स्यात् पिता मोघः कथं माता म्रियेत नः॥ २०॥ बिल आखोर्विनाशः स्यादग्नेराकाशचारिणाम्। अन्ववेक्ष्यैतदुभयं श्रेयान् दाहो न भक्षणम्॥२१॥ गर्हितं मरणं नः स्यादाखुना भक्षिते बिले। शिष्टादिष्टः परित्यागः शरीरस्य हुताशनात्॥ २२॥

इत्यादिपर्वणि खाण्डवदहनपर्वणि जरिताविलापे द्वात्रिंशदधिकद्विशततोऽध्यायः॥ २३२॥

जरितोवाच। अस्माद्बिलान्निष्पतितमाखुं श्येनो जघार तम्। चटुं पक्षौ गृहीत्वा च यातो नात्र भयं हि वः॥ १॥

शार्ङ्गा ऊचुः। न हृतं तं वयं विद्मः श्येनेनाखुं कथञ्चन।

अन्येऽपि भवितारोऽत्र तेभ्योऽपि भयमेव नः ॥ २ ॥ संशयो वक्ररागच्छे दृष्टं वायोर्निवर्त्तनम् । मृत्युर्नो बिलवासिभ्यो बिले स्यान्नात्र संशयः ॥ ३ ॥ निःसंशयात् संशयितो मृत्युर्मातर्विशिष्यते । चर खे त्वं यथान्यायं पुत्रानाश्वसि शोभनान् ॥ ४ ॥

जरितोवाच । अहं वेगेन तं यान्तमद्राक्षं पततांवरम् । बिलादाखुं समादाय श्येनं पुत्रा महाबलम् ॥ ५ ॥ तं पतन्तं महावेगात्त्वरिता पृष्ठतोऽन्वगाम् । आशिषोऽस्य प्रयुञ्जाना हरतो मूषिकं बिलात् ॥ ६ ॥ यो नो हेष्टारमादाय श्येनराज प्रधावसि । भव त्वं दिवमास्थाय निर्मिलो हिरण्मयः ॥ ७ ॥ स यदा भक्षितस्तेन श्येनेनाखुः पतत्रिणा । तदाहं तदनुज्ञाप्य प्रत्युपायां पुनर्गृहे ॥ ८ ॥ प्रविशध्वं बिलं पुत्रा विश्रब्धा नास्ति वो भयम् । श्येनेन मम पश्यन्ता हृत आखुर्महात्मना ॥ ९ ॥

शार्ङ्गा ऊचुः । न विद्महे हृतं मातः श्येनेनाखुं कथञ्चन । अविज्ञाय न शक्यामः प्रवेष्टुं विवरं भुवः ॥ १० ॥

जरितोवाच । अहं तमभिजानामि हृतं श्येनेन मूषिकम् । नास्ति वोऽत्र भयं पुत्राः क्रियतां वचनं मम ॥ ११ ॥

शार्ङ्गा ऊचुः । न त्वं मिथ्योपचारेण मोक्षयेथा भयाद्वि नः । समाकुलेषु ज्ञानेषु न बुद्धिकृतमेव तत् ॥ १२ ॥ न चोपकृतमस्माभिर्न चास्मान्वेत्थ ये वयम् । पीड्यमाना विभर्त्स्यस्मान् का सती के वयं तव ॥ १३ ॥ तरुणी दर्शनीयासि समर्था मर्त्तुरेषणे । अनुगच्छ पतिं मातः पुत्रानाश्वसि शोभनान् ॥ १४ ॥ वयमग्निं समाविश्य लोकानाप्नुम शोभनान् । अथास्मान्न दहेदग्निरायास्यं पुनरेव नः ॥ १५ ॥

वैशम्पायन उवाच । एवमुक्ता ततः शार्ङ्गी पुत्रानुत्सृज्य खाण्डवे । जगाम त्वरिता देशं क्षेममग्नेरनामयम् ॥ १६ ॥ ततस्तीक्ष्णार्चिरभ्यागात्त्वरितो हव्यवाहनः । यत्र शार्ङ्गी बभू-

वृक्ष मन्दपालस्य शृङ्गकाः ॥ १७ ॥ ततस्तं ज्वलितं दृष्ट्वा ज्वलनं ते विहङ्गमाः । जरितारिसुतो वाक्यं आवयामास पावकम् ॥१८॥

इत्यादिपर्वणि खाण्डवदहनपर्वणि शार्ङ्गोपाख्याने त्रयस्त्रिंशदधिकद्विशततोऽध्यायः ॥ २३३ ॥

जरितारिरुवाच । पुरतः क्षुच्चकालस्य धीमान् जागर्त्ति पूरुषः । स क्षुच्चकालं संप्राप्य व्यथां नैवेति कर्हिचित् ॥ १ ॥ यस्तु क्षुच्चमनुप्राप्तं विचेता नावबुध्यते । स क्षुच्चकाले व्यथितो न श्रेयो विन्दते महत् ॥ २ ॥

सारिसृक्क उवाच । धीरस्यमसि मेधावी प्राणक्षुच्चमिदं च नः । प्राज्ञः शूरो बहूनां हि भवत्येको न संशयः ॥ ३ ॥

स्वस्रीय उवाच । ज्येष्ठस्तातो भवति वै ज्येष्ठो मुञ्चति क्षुच्चतः । ज्येष्ठस्त्वेव प्रजानाति कनीयान् किं करिष्यति ॥ ४ ॥

द्रोण उवाच । हिरण्यरेतास्त्वरितो ज्वलन्नायाति नः क्षयम् । सप्तजिह्वाननः क्रूरो लेलिहानो विसर्पति ॥ ५ ॥

वैशम्पायन उवाच । एवं सम्भाष्य तेऽन्योऽन्यं मन्दपालस्य शृङ्गकाः । तुष्टुवुः प्रयता भूत्वा यथाग्निं शृणु पार्थिव ॥ ६ ॥

जरितारिरुवाच । आत्मासि वायोर्ज्वलन शरीरमसि वीरुधाम् । योनिरापस्य ते शुक्रं योनिस्त्वमसि चाम्भसः ॥ ७ ॥ ऊर्द्ध्वं चाघस्य सर्पन्ति पृष्ठतः पार्श्वतस्तथा । अर्चिषस्ते महावीर्य्य रश्मयः सवितुर्यथा ॥ ८ ॥

सारिसृक्क उवाच । माता प्रणष्टा पितरं न विद्मः पत्न्या भ्राता नैव नो धूमकेतो । न स्वस्रीयो विद्यते वै त्वदन्यस्तस्मादस्मांस्त्वाहि बालांस्त्वमग्ने ॥ ९ ॥ यदग्ने ते शिवं रूपं ये च ते सप्त हेतयः । तेन नः परिपाहि त्वमार्त्तान्न, शरणैषिणः ॥१०॥

त्वमेवैकस्त्वपत्ये जातवेदो नान्यस्त्वत्तो विद्यते गोषु देव । ऋषी-नस्मान् बालकान् पालयस्व परेणास्मान् प्रैहि वै हव्यवाह ॥ ११ ॥

स्वस्त्वमित्र उवाच । सर्वमग्ने त्वमेवैकस्त्वयि सर्वमिदं जगत् । त्वं धारयसि भूतानि भुवनं त्वं बिभर्षि च ॥ १२ ॥ त्वमग्निर्हव्य-वाहस्त्वं त्वमेव परमं हविः । मनीषिणस्त्वां जानन्ति बहुधा चैकधापि च ॥ १३ ॥ सृष्ट्वा लोकांस्त्रीनिमान् हव्यवाह काले प्राप्ते पचसि पुनः समिद्धः । त्वं सर्वस्य भुवनस्य प्रसूतिस्त्वमेवाग्ने भवसि पुनः प्रतिष्ठा ॥ १४ ॥

द्रोण उवाच । त्वमन्नं प्राणिभिर्भुक्तमन्तर्भूतो जगत्पते । नित्यं प्रदृप्तः पचसि त्वयि सर्वं प्रतिष्ठितम् ॥ १५ ॥ सूर्यो भूत्वा रश्मिभिर्जातवेदो भूमेरब्धो भूमिजातान् रसांश्च । विश्वानादाय पुनरुत्सृज्य काले दृष्ट्वा स्पृष्ट्वा भावयसीह शुक्र ॥ १६ ॥ त्वत्त एताः पुनः शुक्र वीरुधो हरितच्छदाः । जायन्ते पुष्करिण्यश्च सुभद्रश्च महोदधिः ॥ १७ ॥ इदं वै सत्र तिग्मांशो वरुणस्य परा-यणम् । शिवस्त्राता भवास्माकं मास्मानद्य विनाशय ॥ १८ ॥ पिङ्गाक्ष लोहितग्रीव कृष्णवर्त्मन् कृताशन । परेण प्रैहि सुभा-स्मान् सागरस्य गृहानिव ॥ १९ ॥

वैशम्पायन उवाच । एवमुक्तो जातवेदा द्रोणेन ब्रह्म-वादिना । द्रोणमाह प्रतीतात्मा मन्दपालप्रतिश्रया ॥ २० ॥

अग्निरुवाच । ऋषिर्द्रोणस्त्वमसि वै ब्रह्मतेजाहृतं त्वया । ईप्सितं ते करिष्यामि न च ते विद्यते भयम् ॥ २१ ॥ मन्दपालेन वै यूयं मम पूर्वं निवेदिताः । वर्जयेः पुत्रकान्मह्यं दहन् दाव-मिति ह स्म ह ॥ २२ ॥ तस्य तद्वचनं द्रोण त्वया यच्चेह भाषितम् । अभयं मे गरीयस्तु ब्रूहि किं करवाणि ते । दृष्ट्या प्रीतोऽस्मि भद्रं ते ब्रह्मन् स्तोत्रेण सत्तम ॥ २३ ॥

द्रोण उवाच । दूरे मार्जारकाः शुक्र नित्यमुद्वेजयन्ति

नः। एतान् कुरुष्व दग्धांस्त्वं हुताशन सबान्धवान् ॥ २४ ॥
तथा तत् कृतवानग्निरभ्यनुज्ञाय शार्ङ्गकान्। ददाह खाण्डवं दावं समिद्धो जनमेजय ॥ २५ ॥

इत्यादिपर्वणि खाण्डवदहनपर्वणि शार्ङ्गोपाख्याने चतुस्त्रिंशदधिकद्विशततोऽध्यायः ॥ २३४ ॥

—०:०—

वैशम्पायन उवाच। मन्दपालोऽपि कौरव्य चिन्तयामास पुत्रकान्। उक्त्वापि च स तिग्मांशुं नैव शर्माधिगच्छति ॥ १ ॥
स तप्यमानः पुत्रार्थे जपितामिदमब्रवीत्। कथं त्वशक्ताः शरणे जपिते मम पुत्रकाः ॥ २ ॥ वर्द्धमाने ऋतवहे वाते चाग्नौ प्रवायति। असमर्था विमोक्षाय भविष्यन्ति ममात्मजा ॥ ३ ॥ कथन्त्वशक्ता त्राणाय माता तेषां तपस्विनी। भविष्यति हि शोकार्ता पुत्रत्राणमपश्यती ॥ ४ ॥ कथमुड्डीयनेऽशक्तान् पतने च ममात्मजान्। सन्तप्यमाना बहुधा वाश्यमाना प्रधावति ॥ ५ ॥ जरितारिः कथं पुत्रः सारिसृक्कः कथञ्च मे। स्तम्बमित्रः कथं द्रोणः कथं सा च तपस्विनी ॥ ६ ॥ लालप्यमानं तमृषिं मन्दपालं तथा वने। जपिता प्रत्युवाचेदं सास्रूयमिव भारत ॥ ७ ॥
न ते पुत्रेष्ववेक्षास्ति यादृशीमुक्तवानसि। तेजस्विनो वीर्यवन्तो न तेषां ज्वलनाद्भयम् ॥ ८ ॥ त्वयाग्नौ ते परीताश्च स्वयं हि मम सन्निधौ। प्रतिश्रुतं तथा चेति ज्वलनेन महात्मना ॥ ९ ॥
लोकपालो न तां वाचमुक्त्वा मिथ्या करिष्यति। समक्षं बन्धुकृत्येन तेन ते स्वस्त्वमानसम् ॥ १० ॥ तामेव तु ममामित्रां चिन्तयन् परितप्यसे। ध्रुवं मयि न ते स्नेहो यथा तस्यां पुराभवत् ॥ ११ ॥ न हि पक्षवता न्याय्यं निःस्नेहेन सुहृज्जने। पीड्यमान उपद्रष्टुं शक्तेनात्मा कथञ्चन ॥ १२ ॥ गच्छ त्वं जरि-

तामेव यदर्थं परितप्यसे । चरिष्याम्यहमप्येका यथा कुपुरुषाश्रिता ॥ १३ ॥

मन्दपाल उवाच । नाहमेवं चरे लोके यथा त्वमभिमन्यसे । अपत्यहेतोर्विचरे तच्च कृच्छ्रगतं मम ॥ १४ ॥ भूतं हित्वा च भाव्यर्थे योऽवलम्बेत मन्दधीः । अवमन्येत तं लोको यथेच्छसि तथा कुरु ॥ १५ ॥ एष हि प्रज्वलन्नग्निर्लेलिहानो महीरुहान् । आविग्ने हृदि सन्तापं जनयत्यशिवं तथा ॥ १६ ॥

वैशम्पायन उवाच । तस्मादेवादतिक्रान्ते ज्वलने जरिता पुनः । जगाम पुत्रकानेव जरिता पुत्रगृद्धिनी ॥ १७ ॥ सा तान् कुशलिनः सर्वान् विमुक्तान् जातवेदसः । रोरूयमाणान् ददृशे वने पुत्रान्निरामयान् ॥ १८ ॥ अश्रूणि मुमुचे तेषां दर्शनात्सा पुनः पुनः । एकैकशो न तान् सर्वान् क्रोशमानान्यपद्यत ॥ १९ ॥ ततोऽभ्यगच्छत्सहसा मन्दपालोऽपि भारत । अथ ते सर्व एवैनं नाभ्यनन्दंस्तदा सुताः ॥ २० ॥ लालप्यमानमेकैकं जरिताच्च पुनः पुनः । न चैवोचुस्तदा किञ्चित्तच्छ्रुत्वा साध्वसाधु वा ॥ २१ ॥

मन्दपाल उवाच । ज्येष्ठः सुतस्ते कतमः कतमश्चास्य चानुजः । मध्यमः कतमश्चैव कनीयान् कतमश्च ते ॥ २२ ॥ एवं ब्रुवन्तं दुःखार्त्तं किं मां न प्रतिभाषसे । कृतवानपि हि त्यागं नैव शान्तिमितो लभे ॥ २३ ॥

जरितोवाच । किञ्च ज्येष्ठेन ते कार्य्यं किमन्तरजेन ते । किं वा मध्यमजातेन किङ्कनिष्ठेन वा पुनः ॥ २४ ॥ यां त्वं मां सर्वतो हीनामुत्सृज्यापि गतः पुरा । तामेव लपिताङ्गच्छ तरुणीं चारुहासिनीम् ॥ २५ ॥

मन्दपाल उवाच । न स्त्रीणां विद्यते किञ्चिदसुख पुरुषान्तरात् । सापत्नकञ्हते लोके नान्यदर्थविनाशनम् ॥ २६ ॥ वैराग्निदीपनं चैव भयमुद्वेगकारि च । सुव्रता चापि कल्याणि

सर्वभूतेषु विश्रुता ॥ २७ ॥ अरुन्धती महात्मानं वशिष्ठं पर्य्य-
यङ्कत । विशुद्धभावमत्यन्तं सदा प्रियहिते रतम् ॥२८॥ सप्तर्षि-
मध्यगं वीरमवमेने च तं मुनिम् । अपध्यानेन सा तेन धूमा-
रुणसमप्रभा । लक्ष्यालक्ष्या नाभिरूपा निमित्तमिव दृश्यति ॥२९॥
अपत्यहेतोः संप्राप्तं तया त्वमपि मामिह । दृष्टमेवं गते हि त्वं
सा तथैवाद्य वर्त्तते ॥ ३० ॥ न हि भार्य्येति विश्वासः कार्य्यः
पुंसा कथञ्चन । न हि कार्य्यमनुध्याति नारी पुत्रवती सती ॥३१॥

वैशम्पायन उवाच । ततस्ते सर्व एवैनं पुत्राः सम्यगुपासते ।
स च तानात्मजान् सर्वानाश्वासयितुमुद्यतः ॥ ३२ ॥

इत्यादिपर्वणि खाण्डवदहनपर्वणि आर्ङ्गीपाख्याने
पञ्चत्रिंशदधिकद्विशततोऽध्यायः ॥ २३५ ॥

मन्दपाल उवाच । युष्माकमपवर्गार्थं विज्ञप्तो ज्वलनो मया ।
अग्निना च तथेत्येवं प्रतिज्ञातं महात्मना ॥ १ ॥ अग्नेर्वचन-
मादाय मातुर्भर्त्सनताञ्च वः । भवताञ्च परं वीर्य्यं पूर्वं नाह-
मिहागतः ॥ २ ॥ न सन्तापो हि वः कार्य्यः पुत्रका हृदि मां
प्रति । ऋषीन् वेद्म्यृताशोऽपि ब्रह्म तद्विदितञ्च वः ॥ ३ ॥

वैशम्पायन उवाच । एवमाश्वासितान् पुत्रान् भार्य्यामादाय
स द्विजः । मन्दपालस्ततो देशाद्दक्षं देशं जगाम ह ॥ ४ ॥ भग-
वानपि तिग्मांशुः सन्निधिं खाण्डवं गतः । ददाह सह कृष्णाभ्यां
जनयन् जगतो हितम् ॥ ५ ॥ वसामेदोवहाः कुल्याश्चक्रे पीत्वा
च पावकः । जगाम परमां तृप्तिं दर्शयामास चार्जुनम् ॥ ६ ॥
ततोऽन्तरीक्षाद्भगवानवतीर्य्य पुरन्दरः । मरुद्भिर्वेष्टितः पार्थं
केशवं चेदमब्रवीत् ॥ ७ ॥ कृतं युवाभ्यां कर्मेदममरैरपि दुष्क-
रम् । वरं वृणीतं तुष्टोऽस्मि दुर्लभं पुरुषैरपि ॥ ८ ॥

वैशम्पायन उवाच । पार्थेन वरयामास शक्रादस्त्राणि सर्वशः । प्रादात्तु तच्च शक्रस्तु कालं चक्रे महातिः ॥ ९ ॥ यदा प्रसन्नो भगवान्महादेवो भविष्यति । तदा तुभ्यं प्रदास्यामि पाण्डवास्त्राणि सर्वशः ॥ १० ॥ अहमेव च तं कालं वेत्स्यामि कुरुनन्दन । तपसा महता चापि द्रक्ष्यामि भवतोऽप्यहम् ॥११॥ आग्नेयानि च सर्वाणि वायव्यानि च सर्वशः । मदीयानि च सर्वाणि ग्रहीष्यसि धनञ्जय ॥ १२ ॥ वासुदेवोऽपि जग्राह प्रीतिं पार्थेन शाश्वतीम् । ददौ सुरपतिश्चैव वरं कृष्णाय धीमते ॥१३॥ एवं दत्त्वा वरं ताभ्यां सह देवैर्मरुत्पतिः । कृताग्रनमनुज्ञाप्य जगाम त्रिदिवं प्रभुः ॥ १४ ॥ पावकस्य तदा दाहं दृष्ट्वा सलिलपक्षिणम् । अहानि पञ्च चैकञ्च विरराम सुतर्पितः ॥ १५ ॥ जग्ध्वा मांसानि पीत्वा च मेदांसि रुधिराणि च । मुक्तः परमया प्रीत्या तावुवाचाच्युतार्जुनौ ॥ १६ ॥ युवाभ्यां पुरुषाग्राभ्यां तर्पितोऽस्मि यथासुखम् । अनुजानामि वां वीरौ चरतं यत्र वाञ्छितम् ॥ १७ ॥ एवं तौ समनुज्ञातौ पावकेन महात्मना । अर्जुनो वासुदेवश्च दानवश्च मयस्तथा ॥ १८ ॥ परिक्रम्य ततः सर्वे त्रयोऽपि भरतर्षभ । रमणीये नदीकुक्षे सहिता समुपाविशन् ॥ १९ ॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां आदिपर्वणि खाण्डवदाहः समाप्तः षट्त्रिंशदधिकद्विशततोऽध्यायः ॥ २३६ ॥

समाप्तमादिपर्व ।

वेदाकाशवसुबलमितेऽब्दे नभसं शुभम् ।
भास्करेऽधिगते पर्व समाप्तं वेदमादिमम् ॥